आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः २८

महामुनिश्रीमद्व्यासप्रणीतं

ब्रह्मपुराणम् ।

एतत्पुस्तकमानन्दाश्रमस्थपण्डितैः सपाठान्तर-
निर्देशं संशोधितम् ।

तच्च

हरि नारायण आपटे

इत्यनेन

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८१७

खिस्ताब्दाः १८९५

मूल्यं सपादरूपकषट्कम् ।

आदर्शपुस्तकोल्लेखपत्रिका ।

ब्रह्मपुराणस्यास्य पुस्तकानि यैः परहितैकपरायणमनीषया संस्करणार्थं प्रदत्तानि तेषां नामादीनि पुस्तकानां संज्ञाश्च कृतज्ञतया प्रकाश्यन्ते ।

क. इति संज्ञितम्—पूर्णम्, जनस्थाननिवासिनां साठे इत्युपाह्वानां वे० शा० ' नारायण शास्त्री ' इत्येतेषाम् ।

ख. इति संज्ञितम्—पूर्णं गौतमीमाहात्म्यरहितम्, आष्टेग्रामनिवासिनां लिमये इत्येतेषाम् ।

ग. इति संज्ञितम्—पूर्णं गौतमीमाहात्म्यरहितम्, दक्षिणापथवर्तिविद्यालयगतपुस्तकसंग्रहस्थम् ।

घ. इति संज्ञितम्—केवलं गौतमीमाहात्म्यम्, रा० रा० 'भाऊसाहेब नगरकर' इत्येतेषाम् ।

ङ. इति संज्ञितम्—केवलं गौतमीमाहात्म्यम्, श्री० 'पंतसचिव संस्थानभोर' इत्येतेषाम् ।

च. इति संज्ञितम्—केवलं गौतमीमाहात्म्यम्, चोपडेग्रामनिवासिनां वे० रा० रा० 'वामनबुवा अयाचित' इत्येतेषाम् ।

समाप्तेयमादर्शपुस्तकोल्लेखपत्रिका ।

२
५४
५५
६

अथ ब्रह्मपुराणान्तर्गताध्यायविषयानुक्रमः ।

अ०

समाप्तेयं ब्रह्मपुराणान्तर्गताध्यायविषयानुक्रमणी ।

ॐ तत्सद्ब्रह्मणे नमः ।

महामुनिश्रीव्यासप्रणीतं

ब्रह्मपुराणम् ।

अथ प्रथमोऽध्यायः ।

*यस्मात्सर्वमिदं प्रपञ्चैरचितं[1] मायाजगज्जायते

यस्मिंस्तिष्ठति[2] याति चान्तसमये कल्पानुकल्पे पुनः ।

यं ध्यात्वा मुनयः प्रपञ्चरहितं विन्दन्ति मोक्षं ध्रुवं

तं वन्दे पुरुषोत्तमाख्यममलं नित्यं विभुं निश्चलम्[3] ॥ १

यं ध्यायन्ति बुधाः समाधिसमये शुद्धं वियत्संनिभं

नित्यानन्दमयं प्रसन्नममलं सर्वेश्वरं निर्गुणम् ।

व्यक्ताव्यक्तपरं प्रपञ्चरहितं ध्यानैकगम्यं[4] विभुं[5]

तं संसारविनाशहेतुमजरं वन्दे हरिं मुक्तिदम्[6] ॥ २

सुपुण्ये नैमिषारण्ये पवित्रे सुमनोहरे । नानामुनिजनाकीर्णे नानापुष्पोपशोभिते ॥ ३

सरलैः कर्णिकारैश्च पनसैर्धवखादिरैः । आम्रजम्बूकपित्थैश्च न्यग्रोधैर्देवदारुभिः ॥ ४

अश्वत्थैः पारिजातैश्च चन्दनागुरुपाटलैः[7] । बकुलैः सप्तपर्णैश्च पुंनागैर्नागकेसरैः[8] ॥ ५

शालैस्तालैस्तमालैश्च नारिकेलैस्तथाऽर्जुनैः[9] । अन्यैश्च बहुभिर्वृक्षैश्चम्पकाद्यैश्च शोभिते ॥ ६

नानापक्षिगणाकीर्णे नानामृगगणैर्युते । नानाजलाशयैः पुण्यैर्दीर्घिकाद्यैरलंकृते[10] ॥ ७

ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च जातिभिः । वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः[11] ॥ ८

संपन्नैर्गोकुलैश्चैव सर्वत्र समलंकृते । यवगोधूमचणकैर्माषमुद्गतिलेक्षुभिः[12] ॥ ९

चीनकाद्यैस्तथा मेध्यैः सस्यैश्चान्यैश्च शोभिते । तत्र दीप्ते हुतवहे हूयमाने महामखे ॥ १०

यजतां नैमिषेयाणां सत्रे द्वादशवार्षिके । आजग्मुस्तत्र मुनयस्तथाऽन्येऽपि[13] द्विजातयः ॥ ११

तानागतान्द्विजांस्ते तु पूजां चक्रुर्यथोचिताम्[14] । तेषु तत्रोपविष्टेषु ऋत्विग्भिः सहितेषु च ॥ १२

---

* "जयति जलभारगर्भितनीलनीरदसवर्णः । मन्दरगिरिपरिवर्तनविशिलालाञ्छनाङ्कितो विष्णुः ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् " इति श्लोकद्वयं क. पुस्तके एतस्मात्प्रागधिकं दृश्यते ।

---

१ ख. °ञ्चरचितं मा° । २ क. °ति लीयते तु स° । ख. °ति लीयते च स° । ३ ग. निष्कल° । ४ ज्ञानैकगम्यं । ५ ग. प्रभुं । ६ क. °म् ॥२॥ ये पु° । ७ ग. °लैः । स° । ८ ग. °नागैः पलाशैर्ना° । ९ क.ङ. नालिकेरैस्त° । १० क. पुण्ये वेदिका° । ११ क. °भिः । समदैर्गो° । ख. °भिः । समृद्धैर्गो° । १२ ग. °भिः । शालिभिश्च तथा । १३ क. °न्ये च द्वि° । १४ क.ख. °थोदिता° ।

तत्राऽऽजगाम सूतस्तु मतिमाँ[1]ल्लोमहर्षणः। तं दृष्ट्वा ते मुनिवराः पूजां चक्रुर्मुदान्विताः॥ १३
सो[2]ऽपि तान्प्रतिपूज्यैव संविवेश वरासने। कथां चक्रु[3]स्तदाऽन्योन्यं सूतेन [4]सहिता द्विजाः॥ १४
कथा[5]न्ते व्यासशिष्यं [6]ते पप्र[7]च्छुः संशयं मुदा। ऋत्विग्भिः सहिताः सर्वे सदस्यैः सह दीक्षिताः

मुनय ऊचुः—

पुराणागमशास्त्राणि सेतिहासानि सत्तम। जानासि देवदैत्यानां चरितं जन्म कर्म च॥ १६
न तेऽस्त्यविदितं किंचि[8]द्वेदे शास्त्रे च भारते। पुराणे मोक्षशास्त्रे च सर्वज्ञोऽसि महामते॥ १७
यथापूर्वमिदं सर्वमुत्पन्नं सचराचरम्। ससुरासुरगन्धर्वं स यक्षोरगराक्षसम्॥ १८
श्रोतुमिच्छामहे सूत ब्रूहि सर्वं यथा[9] जगत्। बभूव भूयश्च यथा महाभाग भविष्यति॥ १९
यतश्चैव जगं[10]त्सूत यतश्चैव च[11]राचरम्। लीनमासीत्तथा यत्र लयमेष्यति यत्र च[12]॥ २०

लोमहर्षण उवाच—

अविकाराय [13]शुद्धाय नित्याय परमात्मने। सदैकरूपरूपाय विष्णवे सर्वजिष्णवे॥ २१
नमो हिरण्यगर्भाय हरये शंकराय च। वासुदेवाय ताराय सर्गस्थित्यन्तकर्मणे॥ २२
एकानेकस्वरूपाय स्थूलसूक्ष्मा[14]त्मने नमः। अव्यक्तव्यक्तभूताय विष्णवे [15]मुक्तिहेतवे॥ २३
सर्गस्थितिविनाशा[16]य जगतो [17]योऽजरामरः। मूलभू[18]तो नमस्तस्मै विष्णवे परमात्मने॥ २४
आधारभूतं विश्वस्याप्यणीयांसमणीयसाम्। प्रणम्य सर्व[19]भूतस्थमच्युतं पुरुषोत्तमम्॥ २५
ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः। [20]तमेवा[21]र्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम्॥ २६
विष्णुं ग्रसिष्णुं विश्वस्य स्थि[22]तौ सर्गे तथा प्रभुम्। सर्वज्ञं जगतामीशमजमक्षयमव्ययम्॥ २७
आ[23]द्यं सुसूक्ष्मं[24] विश्वेशं ब्रह्मादीन्प्रणिपत्य [25]च। इतिहासपुराणज्ञं वेदवेदाङ्गपारगम्॥ २८
सर्वशास्त्रार्थतत्त्वज्ञं पराशरसुतं प्रभुम्। गुरुं प्रणम्य वक्ष्यामि पुराणं वेदसंमितम्॥ २९
कथयामि यथा पूर्वं दक्षाद्यैर्मुनिसत्तमैः। पृष्टः प्रोवाच भगवा[26]नब्जयोनिः पितामहः॥ ३०
शृणुध्वं संप्रवक्ष्यामि कथां पाप[27]प्रणाशिनीम्। कथ्यमानां मया चित्रां बह्वर्थां [28]श्रुतिविस्तराम्॥ ३१
यस्त्विमां धारयेन्नित्यं शृणुयाद्वाऽप्यभीक्ष्णशः। स्ववंशधारणं कृत्वा स्वर्गलोके महीयते॥ ३२
अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकम्। प्रधानं पुरुषस्तस्मान्निर्ममे विश्व[29]मीश्वरः॥ ३३
तं बुध्यध्वं मुनिश्रेष्ठा ब्रह्माणममितौजसम्। स्रष्टारं सर्वभूतानां नारायणपरायणम्॥ ३४
अहंकारस्तु महतस्तस्माद्भूतानि जज्ञिरे। भूतभेदाश्च भूतेभ्य इति सर्गः सनातनः॥ ३५
विस्तरावयवं चैव यथाप्रज्ञं यथाश्रुति। कीर्त्यमानं शृणुध्वं [30]वः सर्वेषां कीर्तिवर्धनम्॥ ३६
कीर्तितं स्थिरकीर्तिनां सर्वेषां पु[31]ण्यवर्धनम्। ततः स्वयंभूर्भगवान्सिसृक्षुर्विविधाः प्रजाः॥ ३७
अप एव ससर्जाऽऽदौ तासु वीर्य[32]मथासृजत्। आपो नारा इति प्रोक्ता आपो वै नरसूनवः ३८
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः। हिरण्यवर्णमभवत्तदण्डमुदकेशयम्॥ ३९

१ क. °मान्रोम°। २ ग. °पि तां प्रतिगृह्यैव। ३ क. °स्तथाऽन्यो°। ४ ग. सह ते द्वि°। ५ ख. °न्ते च व्या°। ६ क. तु। ७ क. °प्रच्छुस्तेऽव्ययं मु°। ८ क. °द्वेदशास्त्रेषु भा°। ९ क. °थागतम्। ब°। १० क. °गत्सर्वे य°। ११ क. भविष्यति। १२ क. वा। १३ क. ख. गुह्याय। १४ क. °क्ष्माय ते न°। १५ क. व्यक्तहेतवे। १६ ख. ग. °शानां ज°। १७ ख. ग. यो जगन्मयः। मू°। १८ क °तोऽवसत्तस्मै। १९ ग. °भूतेशम°। २० क. तमेव स्वस्व°। २१ ग. °वाऽऽत्मस्व°। २२ क. स्थितिसर्गे। ग. स्थितिसर्गे। २३ ख. °द्यं सू°। २४ ख. °क्ष्मं च वि°। २५ ख. वै। २६ क. °नजो नित्यः पि°। २७ क. °प्रमोचिनी°। २८ ग. °तिसंमिताम्। २९ ग. °मीदृशम्। तं। ३० क. वै। ३१ ख. ग. °ण्यकर्मणाम्। ३२ ख. °मवासृ°।

तत्र जज्ञे स्वयं ब्रह्मा स्वयंभूरिति[1] नः श्रुतम् । हिरण्यवर्णो भगवानुषित्वा परिवत्सरम् ॥ ४०
तदण्डमकरोद्द्वैधं दिवं भुवमथापि च । तयोः शकलयोर्मध्य आकाशमकरोत्प्रभुः ॥ ४१
अप्सु पारिप्लवां पृथ्वीं दिशश्च दशधा दधे[2] । तत्र कालं मनो वाचं कामं क्रोधमथो रतिम् ॥४२
ससर्ज सृष्टिं तद्रूपां स्रष्टुमिच्छन्प्रजापतीन्[3] । मरीचिमत्र्यङ्गिरसौ[4] पुलस्त्यं पुलहं क्रतुम् ॥ ४३
वसिष्ठं च महातेजाः सोऽसृजत्सप्त मानसान् । सप्त ब्रह्माण इत्येते पुराणे निश्चयं गताः ॥ ४४
नारायणात्मकानां तु[5] सप्तानां ब्रह्मजन्मनाम् । ततोऽसृजत्पुरा[6] ब्रह्मा रुद्रं रोषात्मसंभवम् ॥ ४५
सनत्कुमारं च विभुं पूर्वेषामपि पूर्वजम्[7] । सप्तस्वेता[8] अजायन्त प्रजा रुद्राश्च[9] भो द्विजाः ॥ ४६
स्कन्दः सनत्कुमारश्च तेजः संक्षिप्य तिष्ठतः[10] । तेषां सप्त महावंशा दिव्या देवगणान्विताः[11] ॥४७
क्रियावन्तः प्रजावन्तो महर्षिभिरलंकृताः । विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च ॥ ४८
वयांसि च ससर्जाऽऽदौ पर्जन्यं च ससर्ज ह । ऋचो यजूंषि सामानि निर्ममे यज्ञसिद्धये ॥४९
साध्यानजनयद्देवानित्येवमनुसंजगुः[12][13] । उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे ॥ ५०
आपवस्य[14] प्रजासर्गं सृजतो हि प्रजापतेः । *सृज्यमानाः प्रजा नैव विवर्धन्ते यदा तदा ॥ ५१
द्विधा कृत्वाऽऽत्मनो देहमर्धेन पुरुषोऽभवत् । अर्धेन नारी तस्यां तु सोऽसृजद्द्विविधाः प्रजाः ॥
दिवं च पृथिवीं चैव महिम्ना व्याप्य तिष्ठति[15] । विराजमसृजद्विष्णुः सोऽसृजत्पुरुषं विराट् ५३
पुरुषं तं मनुं विद्यात्तस्य मन्वन्तरं स्मृतम् । द्वितीयं मानसस्यैतन्मनोरन्तरमुच्यते ॥ ५४
स वैराजः प्रजासर्गं ससर्ज पुरुषः प्रभुः । नारायणविसर्गस्य प्रजास्तस्याप्ययोनिजाः ॥ ५५
आयुष्मान्कीर्तिमान्[16]पुण्यप्रजावांश्च भवेन्नरः । आदिसर्गं विदित्वेमं[17] यथेष्टां चाऽऽप्नुयाद्गतिम्+॥५६

इति श्रीमहापुराणे ब्राह्मे प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ।

लोमहर्षण उवाच—

स सृष्ट्वा[18] तु प्रजास्त्वेवमापवो वै प्रजापतिः । लेभे वै पुरुषः पत्नीं शतरूपामयोनिजाम् ॥ १
आपवस्य महिम्ना तु दिवमावृत्य तिष्ठतः । धर्मेणैव मुनिश्रेष्ठाः शतरूपा व्यजायत ॥ २
सा तु वर्षायुतं तप्त्वा तपः परमदुश्चरम् । भर्तारं दीप्ततपसं पुरुषं प्रत्यपद्यत ॥ ३
स वै स्वायंभुवो विप्राः पुरुषो मनुरुच्यते । तस्यैकसप्ततियुगं मन्वन्तरमिहोच्यते ॥ ४
वैराजात्पुरुषाद्वीरं शतरूपा व्यजायत । प्रियव्रतोत्तानपादौ वीरात्काम्या व्यजायत ॥ ५
काम्या नाम[19] सुता श्रेष्ठा कर्दमस्य प्रजापतेः । काम्यापुत्रास्तु चत्वारः सम्राट्कुक्षिर्विराट्प्रभुः ६

---

* इदमर्धं क. ख. पुस्तकयोर्नास्ति । + क. ख. पुस्तकयोरत्राध्यायसमाप्तिर्नास्ति ।

---

१ क. °ति विश्रु° । २ क. दधौ । ३ क. °पतिः । म° । ४ ख. ग. °रसं पु° । ५ क. च । ६ ग. °त्पुनर्ब्रह्मा । ७ क. °म् । ततश्चैता । ८ ग. °स त्वेता अ° । ९ ग. रुद्रश्च । १० क. तिश्रति । ११ ग. °णार्चिताः । १२ ख. °ध्यानन्यांस्तथा देवा° । १३ ख. °नुशुश्रुमः । उ° । ग. °नुशुश्रुम । उ° । १४ ख. आयतं च प्र° । १५ क. ख. तिष्टतः । १६ क. ख. °मान्धन्यः प्र° । १७ ग. °दित्वैनं य° । १८ ख. मृष्टासु प्र° । १९ क. ख °म मुनिश्रेष्ठाः क° ।

उत्तानपादं जग्राह पुत्रमत्रिः प्रजापतिः । उत्तानपादाच्चतुरः सूनृता सुषुवे सुतान् ॥ ७
धर्मस्य कन्या सुश्रोणी सूनृता नाम विश्रुता । उत्पन्ना वाजिमेधेन ध्रुवस्य जननी शुभा ॥ ८
ध्रुवं च कीर्तिमन्तं च आयुष्मन्तं वसुं तथा । उत्तानपादोऽजनयत्सूनृतायां प्रजापतिः ॥ ९
ध्रुवो वर्षसहस्राणि[1] त्रीणि[2] दिव्यानि भो द्विजाः । तपस्तेपे महाभागः प्रार्थयन्सुमहद्यशः ॥ १०
तस्मै ब्रह्मा ददौ प्रीतः स्थानमात्मसमं प्रभुः । अचलं चैव पुरतः सप्तर्षीणां प्रजापतिः ॥ ११
तस्याभिमान[3]मृद्धिं च महिमानं निरीक्ष्य च[4] । देवासुराणामाचार्यः श्लोकं प्रागुशना जगौ ॥१२
*अहोऽस्य तपसो वीर्यमहो श्रुतमहोऽद्भुतम् । यमद्य पुरतः कृत्वा ध्रुवं सप्तर्षयः स्थिताः ॥१३
तस्मा[5]च्छ्लिष्टिं च भव्यं च ध्रुवाच्छंभुर्व्यजायत[6] । श्लिष्टेराधत्त सुच्छाया[7] पञ्च पुत्रानकल्मषान् ॥
रिपुं[8] रिपुंजयं [9]वीरं वृकलं वृकतेजसम् । रिपोराधत्त बृहती [10]चक्षुषं सर्वतेजसम् ॥ १५
अजीजनत्पुष्करिण्यां वैरिण्यां चाक्षुषं मनुम् । प्रजापतेरात्मजा[11]यां वीरणस्य महात्मनः ॥ १६
मनोरजायन्त दश [12]नड्वलायां महौजसः । कन्यायां मुनिशार्दूला वैराजस्य प्रजापतेः ॥ १७
[13]कुत्सः [14]पुरुः शतद्युम्नस्तपस्वी सत्यवाक्कविः । अग्निष्टु[15]दतिरात्रश्च सुद्युम्न[16]श्चेति ते नव ॥ १८
[17]अभिमन्युश्च दशमो [18]नड्वलायां महौजसः[19] । पुरोरजनयत्पुत्रान्षडाग्नेयी महाप्रभान् ॥ १९
अङ्गं सुमनसं [20]स्वातिं क्रतुमङ्गिरसं [21]गयम् । अङ्गात्सुनीथाऽपत्यं वै वेण(न)मेकं व्यजायत ॥ २०
अपचारेण वेण(न)स्य प्रकोपः सुमहानभूत् । प्रजार्थमृषयो यस्य ममन्थुर्दक्षिणं करम् ॥ २१
वेण(न)स्य मथिते पाणौ संबभूव महा[22]न्नृपः । तं दृष्ट्वा मुनयः प्राहुरेष वै मुदिताः प्रजाः ॥ २२
करिष्यति महातेजा यशश्च प्राप्स्यते महत् । स धन्वी कवची [23]जातो ज्वलज्ज्वलनसंनिभः ॥२३
पृथुर्वैण्य(न्य)स्तथा [24]चेमां ररक्ष [25]क्षत्रपूर्वजः । राजसूयाभिषिक्तानामाद्यः स वसुधाधिपः ॥२४
तस्माच्चैव समुत्पन्नौ निपुणौ सूतमागधौ । [26]तेनेयं गौर्मुनिश्रेष्ठा दुग्धा सस्यानि भूभृता ॥ २५
प्रजानां वृत्तिकामेन [27]देवैः सर्षिगणैः सहः । पितृभिर्दानवैश्चैव गन्ध[28]र्वैरप्स[29]रोगणैः ॥ २६
सर्पैः पुण्यजनैश्चैव वीरुद्भिः पर्वतैस्तथा । तेषु तेषु च पात्रेषु दुह्यमाना वसुंधरा ॥ २७
प्रादाद्यथेप्सितं क्षीरं तेन प्राणानधारयन् । पृथोस्तु पुत्रौ धर्मज्ञौ यज्ञान्तेऽन्तर्धिपातिनौ ॥ २८
शिखण्डिनी हविर्धानमन्तर्धानाद्व्यजायत । हविर्धानात्षडाग्नेयी[30] धिषणाऽजनयत्सुतान् ॥ २९
प्राचीनबर्हिषं शुक्रं गयं कृष्णं व्रजाजिनौ । प्राचीनबर्हिर्भगवान्महानासीत्प्रजापतिः ॥ ३०
हविर्धानान्मुनिश्रेष्ठा येन संवर्धिताः प्रजाः+ । प्राचीनबर्हिर्भगवान्पृथिवीतलचारिणीः[31] ॥ ३१
समुद्रतनयायां [32]तु कृतदारोऽभवत्प्रभुः । महतस्तपसः पारे सवर्णायां प्रजापतिः ॥ ३२
सवर्णाऽऽधत्त सामुद्री दश प्राचीनबर्हिषः । सर्वान्प्रचेतसो नाम धनुर्वेदस्य पारगान् ॥ ३३
अपृथग्धर्मचरणास्तेऽतप्यन्त महत्तपः । दश वर्षसहस्राणि समुद्रसलिलेशयाः ॥ ३४

---

* संधिरत्राऽऽर्षः । + ग. पुस्तक एतदग्रे 'प्राचीनाग्रकुशास्तस्य पृथिव्यां द्विजसत्तमाः' इत्यर्धमधिकं दृश्यते ।

---

१ ग. °स्रान्ते त्रीं° । २ ग. °णि वर्षाणि भो° । ३ ख °नवृद्धिं । ४ ख. वै । ५ क. ग. °स्मात्सृष्टिं । ६ क. °त । सृष्टे° । ७ क. °या मन्त्रपूतान° । ८ ख. °पुंजयं पुरंजयं पुत्रं च वृ° । ९ ग. विप्रं । १० क. ग. चाक्षुषं । ११ क. ग. °जायामरण्यस्य । १२ ख. नद्वला° । १३ क. रुरुः । ग. ऊरुः । १४ ग. पूरुः । १५ ख. °ष्टुबति° । १६ ख. °म्नश्चापि ते । १७ क. अभिम° । १८ ख. नद्वला° । १९ ग. °सः । ऊरो° । २० ख. ख्यातिं । २१ क. ग. गयम् । २२ ग. °ह्रानृषिः । तं । २३ क. राजा । २४ क. वेमां । २५ ख. दक्षपूर्वजः । २६ ख. तेन पृथ्वी मुनि° । २७ क. देवैर्ऋषिग° । २८ ख. °न्धर्वाप्स° । २९ ख. °प्सरसां ग° । ३० क. °यी पुण्यानज° । ३१ क. ग. °रिणः । स° । ३२ क. च ।

तपश्चरत्सु पृथिवीं प्रचेतःसु महीरुहाः । अरक्षमाणामावव्रुर्बभूवाथ प्रजाक्षयः ॥ ३५
नाशकन्मारुतो वातुं [1]वृतं खमभवद्द्रुमैः । दश वर्षसहस्राणि न [2]शेकुश्चेष्टितुं प्रजाः ॥ ३६
तदुपश्रुत्य तपसा युक्ताः सर्वे प्रचेतसः । मुखेभ्यो वायुमग्निं च ससृजुर्जातमन्यवः ॥ ३७
[3][4]उन्मूलानथ वृक्षांस्तु कृत्वा वायुरशोषयत्[5] । तानग्निरदहद्[6]घोरं एवमासीद्द्रुमक्षयः ॥ ३८
द्रुमक्षयमथो [7]बुद्ध्वा किंचिच्छि[8]ष्टेषु शाखिषु । उपगम्याब्रवी[9]देतांस्तदा सोमः प्रजापतीन् ॥ ३९
कोपं यच्छत राजानः सर्वे प्राचीनबर्हिषः । वृक्षशून्या कृता पृथ्वी शाम्येतामग्निमारुतौ ॥ ४०
रत्नभूता च कन्येयं वृक्षाणां वरवर्णिनी । भविष्यं जान[10]तां तात धृता गर्भेण वै मया ॥ ४१
मारिषा नाम नाम्नैषा वृक्षाणामिति निर्मिता । भार्या वोऽस्तु महा[11]भागाः सोमवंशविवर्धिनी ॥ ४२
युष्माकं तेजसोऽर्धेन मम चार्धेन तेजसः । अस्यामुत्पत्स्यते विद्वान्दक्षो नाम प्रजापतिः ॥ ४३
स इमां दग्धभूयिष्ठां युष्मत्तेजोमयेन वै । अग्निनाऽग्निसमो भूयः प्रजाः संवर्धयिष्यति ॥ ४४
ततः सोमस्य वचनाज्जगृहुस्ते [12]प्रचेतसः । संहृत्य कोपं [13]वृक्षेभ्यः पत्नीं धर्मेण मारिषाम् ॥ ४५
दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः । दक्षो जज्ञे महातेजाः सो[14]मस्यांशेन भो द्विजाः ॥ ४६
अचरांश्च चरांश्चैव द्विपदोऽथ चतुष्पदः । स [15]सृष्ट्वा [16]मनसा दक्षः [17]पश्चादसृजत स्त्रियः ॥ ४७
ददौ[18] दश स धर्माय कश्यपाय त्रयोदश । शिष्टाः सोमाय राज्ञे च[19] नक्षत्राख्या ददौ प्रभुः ॥ ४८
तासु देवाः खगा गावो नागा दितिजदानवाः । गन्धर्वाप्सरसश्चैव जज्ञिरेऽन्याश्च जातयः ॥ ४९
ततः प्रभृति विप्रेन्द्राः प्रजा मैथुनसंभवाः । संकल्पाद्दर्शनात्स्पर्शात्पूर्वेषां प्रोच्यते प्रजा ॥ ५०

[20]मुनय ऊचुः—

देवानां दानवानां च गन्धर्वोरगरक्षसाम् । संभवस्तु श्रुतोऽस्माभिर्दक्षस्य च महात्मनः ॥ ५१
[21]अङ्गुष्ठाद्ब्रह्मणो[22] जज्ञे दक्षः किल शुभव्रतः । वामाङ्गुष्ठात्तथा चैवं तस्य पत्नी व्यजायत ॥ ५२
कथं प्राचेतसत्वं [23]स पुनर्लेभे महातपाः । [24]एतं नः संशयं सूत व्याख्यातुं[25] त्वमिहार्हसि ॥
दौहित्रश्चैव सोमस्य कथं श्वशुरतां गतः ॥ ५३

लोमहर्षण उवाच—

उत्पत्तिश्च [26]निरोधश्च नित्यं भूतेषु भो द्विजाः । ऋषयोऽत्र न मुह्यन्ति विद्यावन्तश्च ये जनाः ॥
युगे युगे भवन्त्येते[27] पुनर्दक्षादयो नृपाः । पुनश्चैव [28]निरुध्यन्ते विद्वांस्तत्र न मुह्यति[29] ॥ ५५
ज्यैष्ठ्यं कानिष्ठमप्येषां पूर्वं नाऽऽसीद्द्विजोत्तमाः । तप एव गरीयोऽभूत्प्रभावश्चैव कारणम् ॥ ५६
[30]इमां विसृष्टिं दक्षस्य यो विद्यात्सचरा[31]चराम् । प्रजावानायुरुत्तीर्णः स्वर्गलोके महीयते* ॥ ५७

इति श्रीमहापुराणे ब्राह्मे सृष्टिकथनं नाम द्वितीयोऽध्यायः ॥ २ ॥

श्लोकानामादितः समष्ट्यङ्काः—११३

---

* क. ग. पुस्तकयोरत्र प्रथमाध्यायसमाप्तिः ।

---

१ ख. °तं सम° । २ क. °कुश्चषितुं । ३ क. °लान्स ततो वृक्षान्कृत्वा । ४ ख. °थ तान्वृक्षान्कृत्वा । ५ क. °त्। दिव्याभि° । ६ ग. °रमेव° । ७ क. दृष्ट्वा । ८ क. °षु भो द्विजाः । उ° । ९ ग. °देतान्राजा सो° । १० क. ख. °ता सातु धृ° । ११ ग. °भागा सो° । १२ ख. तपोधनाः । १३ क. वृक्षेषु । १४ क. °मस्याऽऽत्मसमो द्वि° । १५ क. °ष्ट्वा मानसान्दक्षः । १६ क. °सा भूयः प° । १७ ख. °श्चात्सृजन्स्त्रियः । १८ क. ख. °दौ स दश ध° । १९ क. ख. तु । २० क. ऋषय । २१ ग. °ष्ठाद्दक्षिणाज्जातो द° । २२ क. °णो जातो द° । २३ ग. च । २४ क. एतं । ख. एनं तु सं° । २५ ख. °तुं वै त्वमर्ह° । २६ क. विपत्तिश्च । २७ क. ख. °ते सर्वे दक्षा° । २८ क. विपद्यन्ते । २९ क. °ति । जन्म चैव विपत्तिश्च पू° । ३० क. °मां तु सृ° । ३१ क. ग. °चरम् ।

अथ तृतीयोऽध्यायः ।

मुनय ऊचुः—

देवानां दानवानां च गन्धर्वोरगरक्षसाम् । उत्पत्तिं विस्तरेणैव लोमहर्षण कीर्तय ॥ १

लोमहर्षण उवाच—

प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयंभुवा । यथा ससर्ज भूतानि तथा शृणुत भो द्विजाः ॥२

मानसान्येव भूतानि[3] पूर्वमेवासृजत्प्रभुः । ऋषीन्देवान्सगन्धर्वानसुरान्यक्षराक्षसान् ॥ ३

यदाऽस्य मानसी [5]विप्रा न व्यवर्धत वै प्रजा । तदा संचिन्त्य धर्मात्मा प्रजाहेतोः प्रजापतिः ४

स मैथुनेन धर्मेण सिसृक्षुर्विविधाः प्रजाः । असिक्नीमावहत्पत्नीं वीरणस्य प्रजापतेः ॥ ५

सुतां सुतपसा युक्तां महतीं लोकधारिणीम् । अथ पुत्रसहस्राणि वैरण्यां पञ्च वीर्यवान् ॥ ६

असिक्न्यां जनयामास दक्ष एव प्रजापतिः । तांस्तु दृष्ट्वा महाभागान्संविवर्धयिषून्प्रजाः ॥ ७

देवर्षिः प्रियसंवादो नारदः प्राब्रवीदिदम् । नाशाय वचनं तेषां शापायैवाऽऽत्मनस्तथा ॥ ८

यं कश्यपः सुतवरं परमेष्ठी व्यजीजनत् । दक्षस्य वै दुहितरि दक्षशापभयान्मुनिः ॥ ९

पूर्वं स हि समुत्पन्नो नारदः परमेष्ठिनः । असिक्न्यामथ [8]वैरण्यां भूयो देवर्षिसत्तमः ॥ १०

तं भूयो जनयामास [9]पितेव [10]मुनिपुंगवम् । तेन दक्षस्य वै पुत्रा हर्यश्वा इति विश्रुताः ॥ ११

निर्मथ्य नाशिताः सर्वे विधिना च न संशयः । तस्योद्यतस्तदा दक्षो नाशायामितविक्रमः॥१२

ब्रह्मर्षीन्पुरतः कृत्वा याचितः परमेष्ठिना । ततोऽभि[11]संधिश्चक्रे वै दक्षस्य परमेष्ठिना ॥ १३

कन्यायां नारदो[12] मह्यं तव पुत्रो भवेदिति । ततो दक्षः सुतां प्रादात्प्रियां वै परमेष्ठिने ॥

स तस्यां नारदो जज्ञे भूयः शापभयादृषिः ॥ १४

[13]मुनय ऊचुः—

कथं प्रणाशिताः पुत्रा नारदेन महर्षिणा । प्रजा[14]पतेः सूतवर्य श्रोतुमिच्छाम तत्त्वतः ॥ १५

लोमहर्षण उवाच—

दक्षस्य पुत्रा[15] हर्यश्वा विवर्धयिषवः प्रजाः । समागता महावीर्या नारदस्तानुवाच ह ॥ १६

नारद उवाच—

बालिशा बत यू[16]यं वै नास्या जानीत वै भुवः । प्रमाणं स्रष्टुकामा वै प्रजाः प्राचेतसात्मजाः१७

अन्तरूर्ध्वमधश्चैव कथं सृ[17]जथ वै प्रजाः । ते तु तद्वचनं श्रुत्वा प्रयाताः सर्वतो [18]दिशः । १८

अद्यापि न निवर्तन्ते समुद्रेभ्य इवाऽऽपगाः । हर्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः[19] ॥ १९

वैरण्यामथ पुत्राणां सहस्रमसृजत्प्रभुः । विवर्धयिषवस्ते तु शबलाश्वास्तथा प्रजाः ॥ २०

पूर्वोक्तं वच[20]नं ते तु नारदे[21]न प्रचोदिताः । अन्योन्यमूचुस्ते सर्वे सम्यगाह मह[22]र्नृषिः ॥ २१

भ्रातॄणां पदवीं ज्ञातुं गन्तव्यं नात्र संशयः । ज्ञात्वा प्रमाणं पृथ्व्याश्च सुखं स्रक्ष्यामहे प्रजाः२२

तेऽपि तेनैव मार्गेण प्रयाताः सर्वतो दिशम् । अद्यापि न निवर्तन्ते समुद्रेभ्य इवाऽऽपगाः ॥२३

---

१ क. सूत । २ क. ग. पूर्वद° । ३ ख. °नि प्रजापातिरवासृजत् । ऋ° । ४ क. °र्वान्नरान्यक्षांश्च रा° । ५ ख. तात । ६ ख. जुष्टां । ७ क. वीरण्यां ख. वीरिण्यां । ८ क. ख. वीरिण्यां । ९ क. पीवर्यां । १० क. मुनिपुंगवः । ११ ग. °संधिं चक्रे । १२ क. °दोऽपत्यं त° । १३ क. ऋषय । १४ क. ख. °पतेस्तु भगवञ्श्रोतु° । १५ क. °त्रास्ते सर्वे वि° । १६क. भूयो । १७ क. रक्षथ । १८ ख. दिशम् । १९ क. °नः । वीरिण्या° । २० ग. °चनात्ते तु । २१ क. ख. °देनैव चो° । २२ क. °हामुनिः । श्रा° ।

तदा प्रभृति वै भ्राता भ्रातुरन्वेषणे [1]द्विजाः । प्रयातो नश्यति क्षिप्रं तन्न कार्यं विपश्चिता॥ २४
तांश्चैव नष्टान्विज्ञाय पुत्रान्दक्षः प्रजापतिः । षष्टिं ततोऽसृजत्कन्या[2] वैरण्यामिति नः श्रुतम्॥ २५
तास्तदा प्रतिजग्राह [3]भार्यार्थं कश्यपः प्रभुः । सोमो धर्मश्च भो विप्रास्तथैवान्ये महर्षयः ॥ २६
ददौ स दश धर्माय कश्यपाय त्रयोदश । *सप्तविंशति सोमाय चतस्रोऽरि[4]ष्टनेमिने ॥ २७
द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तथा । द्वे कृशाश्वाय विदुषे तासां नामानि[5] मे शृणु ॥ २८
अरुन्धती वसु[6]र्यामी [7]लम्बा भानुर्मरुत्वती । संकल्पा च मुहूर्ता च साध्या विश्वा च भो द्विजाः ॥
धर्मपत्न्यो दश त्वेतास्तास्वपत्यानि[8] बोधत । विश्वेदेवास्तु विश्वायाः साध्या साध्यान्व्यजायत
मरुत्वत्यां मरुत्वन्तो वसोस्तु व[9]सवः सु[10]ताः । भानोस्तु भानवः पुत्रा मुहूर्तास्तु मुहूर्तजाः ॥ ३१
लम्बायाश्चैव [11]घोषोऽथ नागवीथी च [12]यामिजा । पृथिवी[13] विषयं सर्वमरुन्धत्यां व्यजायत ॥ ३२
संकल्पा[14]यास्तु वि[15]श्वात्मा जज्ञे संकल्प एव हि । नाग[16]वीथ्यां च यामि[17]न्यां वृषलश्च व्यजायत(?)॥
परा याः सोमपत्नीश्च दक्षः प्राचेतसो ददौ । सर्वा नक्षत्रनाम्न्यस्ता ज्योतिषे परिकीर्तिताः ३४
ये त्वन्ये ख्यातिमन्तो वै देवा ज्योतिष्पुरोगमाः । वसवोऽष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरम्
आपो ध्रुवश्च सोम[18]श्च ध[19]रश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च वसवो नामभिः स्मृताः ॥ ३६
आपस्य पुत्रो वै[20]तण्ड्यः श्रमः [21]श्रान्तो मुनिस्तथा । ध्रुवस्य पुत्रो भगवान्कालो लोकप्रका[22]लनः ३७
सोमस्य भगवान्वर्चा वर्चस्वी येन जायते । [23]धरस्य पुत्रो द्रविणो हुतहव्यवहस्तथा ॥
मनोहरायाः शिशिरः प्राणोऽथ रमणस्तथा ॥ ३८
अनिलस्य शिवा भार्या तस्याः पुत्रो मनोजवः । अविज्ञातगतिश्चैव द्वौ पुत्रावनिलस्य च[24] ॥ ३९
अग्निपुत्रः कुमारस्तु शरस्त[25]म्बे श्रिया वृतः । तस्य शाखो विशाखश्च नैगमेयश्च पृ[26]ष्ठजः ॥ ४०
अपत्यं कृत्तिकानां तु कार्तिकेय इति स्मृतः । प्रत्यूषस्य विदुः पुत्रमृषिं नाम्नाऽथ देवलम्॥ ४१
द्वौ पुत्रौ देवलस्यापि क्षमावन्तौ मनीषिणौ । बृहस्पतेस्तु भगिनी वरस्त्री ब्र[27]ह्मवादिनी ॥ ४२
[28]योगसिद्धा जगत्कृत्स्न[29]मस[30]क्ता विचचार ह । प्रभासस्य तु सा भार्या वसूनामष्टमस्य तु[31] ॥ ४३
विश्वकर्मा महाभागो [32]यस्यां [33]जज्ञे [34]प्रजापतिः । कर्ता शिल्पसहस्राणां त्रिदशानां च वार्धकिः ४४
भूषणानां च सर्वेषां कर्ता शिल्पवतां वरः । यः सर्वेषां विमानानि दैवतानां चकार ह ॥ ४५
मानुषाश्चोपजीवन्ति यस्य शिल्पं महात्मनः । [35]सुरभी कश्यपाद्रुद्रानेकादश विनिर्ममे ॥ ४६
महादेवप्रसादेन तपसा भाविता सती । अजैकपादहिर्बु[36]ध्न्यस्त्वष्टा रुद्रश्च वीर्यवान् ॥ ४७
हरश्च बहुरूपश्च त्र्यम्बकश्चापराजितः । वृषाकपिश्च शंभुश्च कपर्दी रैवतस्तथा ॥ ४८

---

* क्रियाविशेषणम् । सप्तविंशतिं सोमायेत्येव तूचितम्।

---

१ क. ख. रतः । २ क. °न्या वीरिण्या° । ख. °न्या वैरिण्या° । ३ क. भार्यार्थे । ग. भार्यात्वे । ४ ग. °रिचने° । ५ ख. °नि बोधत । अ° । ६ ख. °सुर्जामी । ७ ग. नंश्वा । ८ ग. °नि यानि च । वि° । ९ क. °सवस्तथा । भा° । १० ख. स्मृताः । ११ ख. घोषश्च । १२ ख. जामिजा । १३ ख. °थिव्या विषये स° । १४ क. °ल्पायां तु सर्वात्मा । १५ख. सर्वात्मा । १६ ख. °वीथी च जामि° । १७ ख. °न्यां विश्वा विश्वान्व्यजा° । १८ क. °श्च बलश्चै° । १९ ख. धरश्चै° । २० क. वैतण्डः । २१ ग. शान्तो । २२ ग. °काशनः । २३ क. बलस्य । ख. धरस्य । २४ ख. तु । २५ ख. °म्बेषु यो धृतः । २६ क. पृष्ठतः । २७ ग. °ह्मचारिणी । यो° । २८ क. तपःसिद्धा । २९ क. °मश्रान्ता वि° । ३० ख. °सक्तं वि° । ३१ ख. हि । ३२ क यस्या । ३३ ख. जातः । ३४ ख. मुवर्धाकिः । ३५ ख.सुराभिः । ३६ क. °र्बुध्नस्त्व° ।

मृगव्याधश्च शर्वश्च कपाली च द्विजोत्तमाः । एकाद[1]शैते विख्याता रुद्रास्त्रिभुवनेश्वराः ॥ ४९
शतं त्वेवं समाख्यातं रुद्राणाममितौजसाम् । पुराणे मुनिशार्दूला यैर्व्याप्तं सचराचरम् ॥ ५०
दाराञ्शृणुध्वं विप्रेन्द्राः कश्यपस्य प्रजापतेः । अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खसा ॥ ५१
सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा । कद्रुर्मुनिश्च भो विप्रास्तास्वपत्यानि बोधत ॥ ५२
पूर्वमन्वन्तरे श्रेष्ठा द्वादशाऽऽसन्सुरोत्तमाः । तुषिता नाम तेऽन्योन्यमूचुर्वैवस्वतेऽन्तरे ॥ ५३
उपस्थितेऽतियशसश्चाक्षुषस्यान्तरे मनोः । हितार्थं सर्वलोकानां समागम्य परस्परम् ॥ ५४
आगच्छत द्रुतं देवा अदितिं संप्रविश्य वै । मन्वन्तरे प्रसूयामस्तन्नः श्रेयो भविष्यति ॥ ५५

लोमहर्षण उवाच—

एवमुक्त्वा तु ते सर्वे चाक्षुषस्यान्तरे मनोः । मारीचात्कश्यपाज्जातास्त्वदित्या दक्षकन्यया॥५६
तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव हि । अर्यमा चैव धाता च त्वष्टा पूषा तथैव च ॥ ५७
विवस्वान्सविता चैव मित्रो वरुण एव च । अंशो भगश्चातितेजा आदित्या द्वादश स्मृताः* ॥
+सप्तविंशति याः प्रोक्ताः सोमपत्न्यो महाव्रताः । तासामपत्यान्यभवन्दी[2]प्तान्यमिततेजसः ॥५९
अरिष्टनेमिपत्नीनामपत्यानीह षोडश । बहुपुत्रस्य विदुषश्चतस्रो [3]विद्युतः स्मृता[4]ः ॥ ६०
चाक्षुषस्यान्तरे पू[5]र्वे ऋचो ब्रह्मर्षिसत्कृताः । कृशाश्वस्य च देवर्षेर्देवप्रहरणाः स्मृताः ॥ ६१
एते युगसहस्रान्ते जायन्ते पुनरेव हि । सर्वे देवगणाश्चात्र त्रयस्त्रिंशत्तु कामजाः ॥ ६२
तेषामपि च भो विप्रा निरोधोत्पत्तिरुच्यते । यथा सूर्यस्य गगन उदयास्तम[6]याविह ॥ ६३
एवं देवनिकायास्ते संभवन्ति युगे युगे । [7]दित्याः पुत्रद्वयं जज्ञे कश्यपादिति नः श्रुतम् ॥ ६४
हिरण्यकशिपुश्चैव हिरण्याक्षश्च वीर्यवान् । सिंहिका चाभवत्कन्या विप्रचित्तेः परिग्रहः ॥ ६५
सैंहिकेया इति ख्याता यस्याः पुत्रा महाबलाः । *हिरण्यकशिपोः पुत्राश्चत्वारः प्रथितौजसः
ह्लादश्च अनुह्लादश्च प्रह्लादश्चैव वीर्यवान् । संह्लादश्च चतुर्थोऽभूद्ध्लादपुत्रो ह्रदस्तथा ॥ ६७
ह्रदस्य पु[8]त्रौ द्वौ वीरौ शिवः कालस्तथैव च । विरोचनश्च प्राह्लादिर्बलिर्जज्ञे विरोचनात् ॥ ६८
बलेः पुत्रशतं त्वासीद्बाणज्येष्ठं तपोधनाः । धृतराष्ट्रश्च सूर्यश्च चन्द्रमाश्चन्द्रतापनः ॥ ६९
कुम्भनाभो ग[9]र्दभाक्षः कुक्षिरित्येवमादयः । बाणस्तेषामतिबलो ज्येष्ठः पशुपतेः प्रियः ॥ ७०
पुरा कल्पे तु बाणेन प्रसाद्योमापतिं प्रभुम् । पार्श्वतो विहरिष्यामि इत्येवं याचितो वरः ॥ ७१
हिरण्याक्ष[10]सुताश्चैव विद्वांसश्च महाबलाः । [11]भर्भरः शकुनिश्चैव भूतसंतापनस्तथा ॥ ७२
म[12]होनाभश्च विक्रान्तः कालनाभस्तथैव च । अभवन्दनुपुत्राश्च शतं तीव्रपराक्रमाः ॥ ७३
तपस्विनो महावीर्याः प्राधान्येन ब्रवीमि तान् । द्विमूर्धा शङ्कुकर्णश्च तथा [13]हयशिरा विभु[14]ः ॥७४

---

* एतदनन्तरम्—'चाक्षुषस्यान्तरे पूर्वमासंस्ते तुषिताः सुराः । वैवस्वतेऽन्तरे ते वा आदित्या द्वादश स्मृताः' इति श्लोकः क. ख. पुस्तकयोरधिकोऽस्ति । + क्रियाविशेषणं कथंचित् । सप्तविंशतिर्या इत्येव तूचितम् । * इत आरभ्याग्रे महाबला इत्यन्तं ग. पुस्तके नास्ति ।

---

१ ख. °दशोति वि° । २ ग. °प्तानामतिते° । ३ क. वैद्युताः । ४ ग. °ताः । प्रत्याङ्गिरसवाः श्रेष्ठा ऋ° । ५ क. पूर्वमृभवो वीतिस° । ६ क. °मने त्विह । ख. °मने इह । ७ ख. दित्यां । ८ ख. पुत्रोऽप्यायुर्वै शि° । ९ क. गर्दभश्च । १० ख. °सुताः पञ्च वि° । ११ ख. ऊर्जराः । ग. ह्यर्कविः । १२ क. °हागर्भश्च । ख. °हाभागश्च । १३ क. ख. शङ्कुशिरा । १४ क. द्विजाः ।

अयोमुखः शम्बरश्च कपिलो वामनस्तथा । *मारीचिर्मघवांश्चैव इल्वलः स्वसृमस्तथा ॥ ७५
विक्षोभणश्च केतुश्च केतुवीर्यशतह्रदौ । इन्द्रजित्सर्वजिच्चैव वज्रनाभस्तथैव च ॥ ७६
ऐ[1]कचक्रो महाबाहु[2]स्तारकश्च महाबलः । वैश्वानरः पुलोमा च विद्रावणमहाशिराः ॥ ७७
स्वर्भानुर्वृषपर्वा च विप्रचित्तिश्च वीर्यवान् । सर्व एते दनोः पुत्राः कश्यपादभिजज्ञिरे ॥ ७८
विप्रचित्तिप्रधानास्ते दान[3]वाः सुमहाबलाः । एते[4]षां पुत्रपौत्रं तु न तच्छक्यं द्विजोत्तमाः ॥ ७९
प्रसंख्यातुं बहुत्वाच्च पुत्रपौत्रमनन्तकम् । स्वर्भानोस्तु प्रभा कन्या पुलोम्नस्तु शची सुता ॥ ८०
उप[5]दीप्तिर्हयशिराः शर्मिष्ठा वार्षपर्वणी । पुलोमा कालिका चैव वैश्वानरसुते उभे ॥ ८१
बह्वपत्ये म[6]हापत्ये मरीचेस्तु परिग्रहः । तयोः पुत्रसहस्राणि षष्टिर्दानवनन्दनाः ॥ ८२
चतुर्दशशतानन्यान्हिरण्यपुरवासिनः । मरीचिर्जनयामास महता तपसाऽन्वितः ॥ ८३
पौलोमाः कालकेयाश्च दानवास्ते महाबलाः । अवध्या देवतानां हि हिरण्यपुरवासिनः ॥ ८४
पितामहप्रसादेन ये हताः सव्यसाचिना । ततोऽपरे महावीर्या दानवास्त्वतिदारुणाः ॥ ८५
सिंहिकायामथोत्पन्ना विप्रचित्तेः सुतास्तथा । दैत्यदानवसंयोगाज्जातास्तीव्रपराक्रमाः ॥ ८६
[10]सैंहिकेया इति ख्यातास्त्रयोदश महाबला[11]ः । वंश्यः शल्यश्च [12]बलिनौ नलश्चैव तथा बलः ॥ ८७
वाता[13]पिर्नमुचिश्चैव इल्व[14]लः स्वसृमस्तथा । [15]अञ्जिको नरकश्चैव कालनाभस्तथैव च ॥ ८८
सरमा[16]नस्तथा चैव स्वरकल्पश्च वीर्यवान्+ । एते वै[17] दा[18]नवाः श्रेष्ठा दनोर्वंशविवर्धनाः ॥ ८९
तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः । संह्रादस्य तु दैत्यस्य निवातकवचाः कुले ॥ ९०
समुत्पन्नाः सुमहता तपसा भावितात्मनः । तिस्रः कोट्यः सुतास्तेषां मणिवत्यां निवासिनः ९१
अवध्यास्तेऽपि देवानामर्जुनेन निपातिताः । षट्सुताः सुमहाभागास्ताम्रायाः परिकीर्तिताः ९२
[19]क्रौञ्ची श्येनी च भासी च सुग्रीवी शुचिगृध्रिका । क्रौञ्ची[20] तु[21] जनयामास उलूकप्रत्युलूककान् ॥
श्येनी श्येनांस्तथा भासी भासान्गृध्रांश्च गृध्र्यपि । शुचिरौदकान्पक्षिगणान्सुग्रीवी तु द्विजोत्तमाः
अश्वानुष्ट्रान्गर्दभांश्च ताम्रावंशः[22] प्रकीर्तितः[23] । विनताया[24]स्तु द्वौ पुत्रौ विख्यातौ गरुडारुणौ ॥ ९५
[25]गरुडः पततां श्रेष्ठो दारुणः स्वेन कर्मणा । सुरसायाः सहस्रं तु सर्पाणाममितौजसाम् ॥ ९६
अनेकशिरसां विप्राः खचराणां महात्मनाम् । काद्रवेयास्तु बलिनः सहस्रममितौजसः ॥ ९७
सुपर्णवशगा नागा जज्ञिरे नैकमस्तकाः । येषां प्रधानाः सततं शेषवासुकितक्षकाः ॥ ९८
ऐरावतो महापद्मः कम्बलाश्वतरावुभौ । एलापत्रश्च शङ्खश्च कर्कोटकधनंजयौ ॥ ९९
महानीलमहाकर्णौ धृतराष्ट्र[26]बलाहकौ । कुहरः पुष्पदंष्ट्रश्च दुर्मुखः सुमुखस्तथा ॥ १००

---

* इदमर्धं क. ख. पुस्तकयोर्नास्ति । + एतदनन्तरम्—"मूकश्चैव तु हुण्डश्च ह्रदपुत्रौ बभूवतुः । मारीचः सुन्दपुत्रस्तु प्रस्तुतायां व्यजायत । शरमानस्तथा चैव शरकल्कश्च वीर्यवान्" । इति सार्धः श्लोकोऽधिकः ख. पुस्तके ।

---

१ ख. एकवक्त्रो । २ ग. °हुस्थावरश्च । ३ क. °नवा वै म° । ४ ख. °षां यदपत्यं तु । ५ ख. ग. °पदानवी हय° । ६ क. ख. महासत्त्वे । ७ ग. °त्ये मारी° । ८ क. °ष्टिश्च दितिन° । ९ ग. °नः । मारी° । १० क. कालकेया । ११ क. °लाः । विशः स्वल्पश्च । ख. °लाः । शतं शताश्चव° । १२ ग. वलयो । १३ क. ख. °तापी नमु° । १४ क. °ल्वलेयः स्नृतस्त° । १५ क. अजितो । १६ क. °मानामतश्चैव । १७ क. तु । १८ क. °नवश्रे° । १९ ख. क्रुची । २० ख. क्रुची । २१ ग. °ञ्ची क्रौञ्चानजनयदुलू° । २२ ख. ग. °वंशाः प्र° । २३ ख. ग. °र्तिताः । वि° । २४ क. ख. °याश्च पुत्रौ द्वावरुणो गरुडस्तथा । सु° । २५ ख. ग. सुपर्णः । २६ क. °ष्ट्रमहाबलौ । कु° ।

शङ्खश्च शङ्खपालश्च कपिलो[1] वामनस्तथा । नहुषः शङ्खरोमा च मणिरित्येवमादयः ॥ १०१
तेषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः । चतुर्दशसहस्राणि[2] क्रूराणामनिलाशिनाम् ॥ १०२
गणं(णः) क्रोधवशं(शो) विप्रास्तस्य सर्वे च दंष्ट्रिणः। स्थलजाः पक्षिणोऽब्जाश्च धरायाः प्रसवाः स्मृताः ॥ १०२
गास्तु वै जनयामास सुरभिर्महिषीस्तथा[3] । इरा वृक्षलता वल्लीस्तृणजातीश्च सर्वशः[4] ॥ १०४
खसा तु यक्षरक्षांसि मुनिरप्सरसस्तथा । अरिष्टा तु महासिद्धा[5] गन्धर्वानमितौजसः ॥ १०५
एते कश्यपदायादाः कीर्तिताः स्थाणुजङ्गमाः । [6]येषां पुत्राश्च पौत्राश्च शतशोऽथ सहस्रशः १०६
एष[7] मन्वन्तरे विप्राः सर्गः[8] स्वारोचिषे स्मृतः[9] । वैवस्वतेऽतिमहति वारुणे वितते क्रतौ ॥ १०७
जुह्वानस्य ब्रह्मणो वै प्रजासर्ग इहोच्यते । पूर्वं यत्र समुत्पन्नान्ब्रह्मर्षीन्सप्त मानसान् ॥ १०८
पुत्रत्वे कल्पयामास स्वयमेव पितामहः । ततो विरोधे[10] देवानां दानवानां च भो द्विजाः ॥१०९
दितिर्विनष्टपुत्रा वै तोषयामास कश्यपम् । कश्यपस्तु प्रसन्नात्मा सम्यगाराधितस्तया ॥ ११०
वरेण च्छन्दयामास सा च वव्रे वरं तदा । पुत्रमिन्द्रवधार्थाय समर्थममितौजसम् ॥ १११
स च तस्मै वरं प्रादात्प्रार्थितः सुमहातपाः । दत्त्वा च वरमत्युग्रो[11] मारीचः[12] समभाषत ॥ ११२
इन्द्रं पुत्रो निहन्ता ते गर्भं वै शरदां शतम् । यदि धारयसे शौचतत्परा व्रतमास्थिता ॥ ११३
तथेत्यभिहितो भर्ता तया देव्या महातपाः । धारयामास गर्भं तु शुचिः सा मुनिसत्तमाः ११४
ततोऽभ्युपागमद्[13]दित्यां गर्भमाधाय कश्यपः । रोधयन्वै गणं श्रेष्ठं देवानाममितौजसम् ॥ ११५
तेजः संहृत्य दुर्धर्षमवध्यममरैरपि । जगाम पर्वतायैव तपसे संशितव्रता[14] ॥ ११६
तस्याश्चैवान्तरप्रेप्सुरभवत्पाकशासनः । ऊने[15] वर्षशते चास्या ददर्शान्तरमच्युतः ॥ ११७
अकृत्वा पादयोः शौचं दितिः शयनमाविशत् । निद्रां चाऽऽहारयामास तस्यां कुक्षिं प्रविश्य सः[16]
वज्रपाणिस्ततो गर्भं सप्तधा तं न्यकृन्तयत् । स पाट्यमानो गर्भोऽथ वज्रेण प्ररुरोद ह ॥ ११९
मा रोदीरिति तं शक्रः पुनः पुनरथाब्रवीत्[17] । सोऽभवत्सप्तधा गर्भस्तमिन्द्रो रुषितः पुनः १२०
एकैकं सप्तधा चक्रे वज्रेणैवारिकर्षणः । मरुतो नाम ते देवा[18] बभूवुर्द्विजसत्तमाः ॥ १२१
यथोक्तं वै मघवता तथैव मरुतोऽभवन् । देवाश्चैकोनपञ्चाशत्सहाया वज्रपाणिनः ॥ १२२
तेषामेवं प्रवृत्तानां भूतानां द्विजसत्तमाः । रोचयन्वै गणश्रेष्ठान्देवानाममितौजसाम् ॥ १२३
निकायेषु निकायेषु हरिः[19] प्रादात्प्रजापतीन्[20] । क्रमशस्तानि राज्यानि पृथुपूर्वाणि भो द्विजाः ॥
स हरिः पुरुषो वीरः कृष्णो जिष्णुः प्रजापतिः । पर्जन्यस्तपनो[21]ऽनन्त[22]स्तस्य सर्वमिदं जगत् ॥
भूतसर्गमिमं सम्यग्जानतो द्विजसत्तमाः । नाऽऽवृत्तिभयमस्तीह परलोकभयं कुतः[23] ॥ १२६

इति श्रीमहापुराणे ब्राह्मे देवासुराणामुत्पत्तिकथनं नाम तृतीयोऽध्यायः ॥ ३ ॥

श्लोकानामादितः समष्ट्यङ्काः—२३७

---

१ ख. °लो मानसस्त° । २ क. °णि सर्पाणा° । ३ ग. °हिषांस्त° । ४ क. °शः । सरमा य° । ५ क. ख. महासत्त्वा । ६ क. तेषां । ७ क. एवं । ८ क. सर्वे । ९ क. स्मृताः । १० ख.ग. विरोधो । ११ ख. °मव्यग्रो । १२ ख. °रीचस्ताम° । १३ क. °पायमाधाय गर्भनाशाय वासवः । ते° । १४ क. °व्रतः । त° । १५ क. ऊने । १६ ग. ह । १७ क. °नरुवाच ह । सोऽ° । १८ ख. बाला । १९ क. हरिं । ग. हविः । २० क. °पतिम् । क्र° । ग. °पतिः । क्र° । २१ ख. °पसा व्यक्तः कृष्णः स° । २२ ग. °नो व्यक्तस्त° । २३ क. न च ।

अथ चतुर्थोऽध्यायः ।

लोमहर्षण उवाच—

[1]अभिषिच्या[2]धिराजेन्द्रं पृथुं वैण्यं पितामहः । ततः क्रमेण राज्यानि व्यादेष्टुमुपचक्रमे ॥ १
द्विजानां वीरुधां चैव नक्षत्रग्रहयोस्तथा । यज्ञानां तपसां चैव सोमं राज्येऽभ्यषेचयत् ॥ २
[3]अपां तु वरुणं राज्ये राज्ञां वैश्रवणं [4]पतिम् । आदित्यानां तथा विष्णुं वसूनामथ पावकम् ॥ ३
प्रजापतीनां दक्षं तु मरुतामथ वासवम् । दैत्यानां दानवानां वै प्रह्लादममितौजसम् ॥ ४
वैवस्वतं पितॄणां च यमं राज्येऽभ्यषेचयत् । यक्षाणां राक्षसानां च पार्थिवानां तथैव च ॥ ५
सर्वभूतपिशाचानां गिरीशं शूलपाणिनम् । शैलानां हिमवन्तं च नदीनामथ सागरम् ॥ ६
गन्धर्वाणामधिपतिं चक्रे चित्ररथं प्रभुम् । नागानां वासुकिं चक्रे सर्पाणामथ तक्षकम् ॥ ७
वारणानां तु राजानमैरावतमथाऽऽदिशत् । उच्चैःश्रवसमश्वानां गरुडं चैव पक्षिणाम् ॥ ८
मृगाणामथ शार्दूलं गोवृषं तु गवां पतिम् । वनस्पतीनां राजानं प्लक्षमेवाभ्यषेचयत् ॥ ९
एवं विभज्य राज्यानि [5]क्रमेणैव पितामहः । दिशां पालानथ ततः स्थापयामास स प्रभुः ॥ १०
पूर्वस्यां दिशि पुत्रं तु वैराजस्य प्रजापतेः । दिशः पालं सुधन्वानं राजानं सोऽभ्यषेचयत् ॥ ११
दक्षिण[6]स्यां दिशि तथा कर्दमस्य प्रजापतेः । पुत्रं [7]शङ्खपदं नाम राजानं सोऽभ्यषेचयत् ॥ १२
पश्चिमस्यां दिशि तथा रजसः पुत्रमच्युतम् । केतुमन्तं महात्मानं राजानं सोऽभ्यषेचयत् ॥ १३
तथा हिरण्यरोमाणं पर्जन्यस्य प्रजापतेः । उदीच्यां दिशि दुर्धर्षं राजानं सोऽभ्यषेचयत् ॥ १४
तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना । यथाप्रदेशमद्यापि धर्मेण प्रतिपाल्यते ॥ १५
राज[8]सूयाभिषिक्तस्तु पृथुरेतैर्नराधिपैः । वेददृष्टेन विधिना [9]राजा राज्ये नराधिपः ॥ १६
ततो मन्वन्तरेऽतीते चाक्षुषेऽमिततेजसि । वैवस्वताय मनवे [10]पृथिव्यां राज्यमादिशत् ॥ १७
तस्य विस्तरमाख्यास्ये मनोर्वैवस्वतस्य ह । [11]भवतां चाऽऽनुकूल्याय यदि श्रोतुमिहेच्छथ ॥
महदेतदधिष्ठानं पुराणे तदधिष्ठितम् ॥ १८

मुनय ऊचुः—

विस्तरेण पृथोर्जन्म लोमहर्षण कीर्तय । यथा महात्मना तेन [12]दुग्धा वेयं वसुंधरा ॥ १९
[13]यथा वाऽपि नृभिर्दुग्धा यथा [14]देवैर्महर्षिभिः । यथा दैत्यैश्च नागैश्च यथा यक्षैर्यथा द्रुमैः ॥ २०
यथा शैलैः पिशाचैश्च गन्धर्वैश्च द्विजोत्तमैः । राक्षसैश्च महासत्त्वैर्यथा दुग्धा वसुंधरा ॥ २१
तेषां पात्रविशेषांश्च वक्तुमर्हसि सुव्रत । [15]वत्सक्षीरविशेषांश्च दोग्धारं चानुपूर्वशः ॥ २२
यस्माच्च कारणात्पाणिर्वेणस्य मथितः पुरा । क्रुद्धैर्महर्षिभिस्तात कारणं [16]तच्च कीर्तय ॥ २३

[17]लोमहर्षण उवाच—

शृणुध्वं कीर्तयिष्यामि पृथोर्वैण्यस्य विस्तरम् । एकाग्राः [18]प्रयताश्चैव पुण्यार्थं वै [19]द्विजर्षभाः ॥२४

---

१ क. अध्यापयच्च रा° । २ ग. °च्याऽऽदिरा° । ३ ग. आपे । ४ क. प्रभुम् । ५ क. ग. °मेण प्रपि° । ६ क. ख. °स्यां महात्मानं क° । ७ क. शङ्खपदं । ८ ख. °सूयेऽभि° । ९ क. ख. राजरा° । १० ग. °थिवीरा° । ११ क. °वतामानु° । १२ ख. भृता । १३ ख. °था च पितृभि° । १४ क. ख. °वैर्यथर्षि° । १५ ख. वत्सान्क्षीर° । १६ क. तत्प्रकी° । १७ क. सूत । १८ ख. प्रणता° । १९ क. ख. द्विजोत्तमाः ।

नाशुचेः क्षुद्रमनसो नाशिष्यस्याव्रतस्य च[1] । कीर्तयेयमिदं विप्राः कृतघ्नायाहिताय च ॥ २५
स्वर्ग्यं[2] यशस्यमायुष्यं धन्यं वेदैश्च संमितम् । रहस्यमृषिभिः प्रोक्तं शृणुध्वं वै यथातथम् ॥ २६
यश्चेमं[3] कीर्तयेन्नित्यं पृथोर्वैण्यस्य विस्तरम् । ब्राह्मणेभ्यो नमस्कृत्य न स शोचेत्कृताकृतम् ॥ २७
आसीद्धर्मस्य संगोप्ता पूर्वमत्रिसमः प्रभुः । अत्रिवंशे समुत्पन्नस्त्वङ्गो नाम प्रजापतिः ॥ २८
तस्य पुत्रोऽभवद्वेणो नात्यर्थं धर्मकोविदः । जातो मृत्युसुतायां वै सुनीथायां प्रजापतिः ॥ २९
स[4] मातामहदोषेण तेन कालात्मजात्मजः । स्वधर्मं पृष्ठतः कृत्वा कामलोभेष्ववर्तत[5] ॥ ३०
मर्यादां[6] भेदयामास धर्मोपेतां[7] स पार्थिवः । वेदधर्मानतिक्रम्य सोऽधर्मनिरतोऽभवत् ॥ ३१
निःस्वाध्यायवषट्कारारः प्रजास्तस्मिन्प्रजापतौ । प्रवृत्तं न पपुः सोमं हुतं यज्ञेषु देवताः ॥ ३२
न यष्टव्यं न होतव्यमिति तस्य प्रजापतेः । आसीत्प्रतिज्ञा क्रूरेयं विनाशे प्रत्युपस्थिते ॥ ३३
अहमिज्यश्च यष्टा च यज्ञश्चेति भृगूद्वह[8] । मयि यज्ञो[9] विधातव्यो[10] मयि होतव्यमित्यपि ॥ ३४
तमतिक्रान्तमर्यादमाददानमसांप्रतम् । ऊचुर्महर्षयः सर्वे मरीचिप्रमुखास्तदा ॥ ३५
वयं दीक्षां प्रवेक्ष्यामः संवत्सरगणान्बहून् । अधर्मं कुरु मा वेण एष[11] धर्मः सनातनः ॥ ३६
निधनेऽत्रेः प्रसूतस्त्वं प्रजापतिरसंशयम् । प्रजाश्च पालयिष्येऽहमितीह[12] समयः कृतः ॥ ३७
तांस्तथा ब्रुवतः सर्वान्महर्षीनब्रवीत्तदा । वेणः प्रहस्य दुर्बुद्धिरिममर्थमनर्थवित् ॥ ३८

वेण उवाच—

स्रष्टा[13] धर्मस्य कश्चान्यः श्रोतव्यं कस्य वा मया । श्रुतवीर्यतपःसत्यैर्मया वा कः समो भुवि ३९
प्रभवं सर्वभूतानां धर्माणां च विशेषतः । संमूढा न विदुर्नूनं भवन्तो[14] मां विचेतसः ॥ ४०
इच्छन्दहेयं पृथिवीं प्लावयेयं जलैस्तथा । द्यां वै भुवं च रुन्धेयं नात्र कार्या विचारणा ॥ ४१
यदा न शक्यते मोहादवलेपाच्च पार्थिवः । अपनेतुं तदा वेणस्ततः क्रुद्धा महर्षयः ॥ ४२
तं निगृह्य महात्मानो विस्फुरन्तं महाबलम् । ततोऽस्य[15] सव्यमूरुं ते ममन्थुर्जातमन्यवः ॥ ४३
तस्मिन्निमथ्यमाने[16] वै राज्ञ ऊरौ तु जज्ञिवान् । ह्रस्वोऽतिमात्रः पुरुषः कृष्णश्चेति बभूव ह ॥ ४४
स भीतः प्राञ्जलिर्भूत्वा तस्थिवान्द्विजसत्तमाः । तमत्रिर्विह्वलं दृष्ट्वा निषीदेत्यब्रवीत्तदा ॥ ४५
निषादवंशकर्ताऽसौ बभूव वदतां वराः[17] । धीवरानसृजच्चापि वेणकल्मषसंभवान् ॥ ४६
ये चान्ये विन्ध्यनिलयास्तथा[18] पर्वतसंश्रयाः । अधर्मरुचयो विप्रास्ते तु वै वेणकल्मषाः ॥ ४७
ततः पुनर्महात्मानः पाणिं वेणस्य दक्षिणम् । अरणीमिव संरब्धा[19] ममन्थुर्जातमन्यवः ॥ ४८
पृथुस्तस्मात्समुत्पन्नः कराज्ज्वलनसंनिभः । दीप्यमानः स्ववपुषा साक्षादग्निरिवं[20] ज्वलन्[21] ॥ ४९
अथ सोऽजगवं नाम धनुर्गृह्य* महारवम् । शरांश्च दिव्यान्रक्षार्थं कवचं च महाप्रभम् ॥ ५०
तस्मिञ्जातेऽथ भूतानि संप्रहृष्टानि[22] सर्वशः । समापेतुर्महाभागा वेणस्तु त्रिदिवं ययौ ॥ ५१

* ल्यबार्षः ।

१ ख. वा । २ ख. °र्ग्यं परममा° । ३ ख. °मं कथये° । ४ ग. स पिता° । ५ ख. ग. कामाल्लोभे° । ६ क. ग. °दां स्थापया° । ७ क. ग. धर्मापे° । ८ ग. ऋतूद्वह । ९ ग. यज्ञा । १० ग. विधातव्या । ११ ग. नैष । १२ क °मिति ह स°, ग. °मिति ते स° । १३ क. ख. कर्ता । १४ ख. °न्तो मामचे° । १५ क. °तोऽपस° । १६ क. ख. तस्मिंस्तु म° । १७ ख. वरः । १८ ख. °यास्तुषारास्तम्बुरास्तथा । अ° । ग. °यास्तुषारास्तुम्बुरास्तथा । अ° । १९ क. ख. संबद्धा । २० क. °रिवापरः । अ° । २१ क. ग. °न् । आद्यमाज° । २२ ग. °प्रकृष्टा° ।

समुत्पन्नेन भो विप्राः सत्पुत्रेण महात्मना । त्रातः स पुरुषव्याघ्रः पुंनाम्नो नरकात्तदा ॥ ५२
तं समुद्राश्च नद्यश्च रत्नान्यादाय सर्वशः । तोयानि चाभिषेकार्थं सर्व एवोपतस्थिरे ॥ ५३
पितामहश्च भगवान्देवैराङ्गिरसैः सह । स्थावराणि च भूतानि जङ्गमानि च सर्वशः ॥ ५४
समागम्य तदा वैण्यमभ्यषिञ्चन्नराधिपम् । महता राजराजेन प्रजास्तेनानुरञ्जिताः ॥ ५५
सोऽभिषिक्तो महातेजा विधिवद्धर्मकोविदैः । आधिराज्ये तदा राज्ञां पृथुर्वैण्यः प्रतापवान् ५६
पित्राऽपरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः । अनुरागात्ततस्तस्य नाम राजाऽभ्यजायत ॥ ५७
आपस्तस्तम्भिरे तस्य समुद्रमभियास्यतः । पर्वताश्च ददुर्मार्गं ध्वजभङ्गश्च नाभवत् ॥ ५८
अकृष्टपच्या पृथिवी सिध्यन्त्यन्नानि चिन्तनात्[1] । सर्वकामदुघा गावः पुटके पुटके मधु ॥ ५९
एतस्मिन्नेव काले तु यज्ञे पैतामहे शुभे । सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामतिः ॥ ६०
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः । पृथोः स्तवार्थं तौ तत्र समाहूतौ महर्षिभिः ॥ ६१
तावूचुर्ऋषयः सर्वे स्तूयतामेष पार्थिवः । कर्मैतदनुरूपं वां पात्रं चायं नराधिपः ॥ ६२
तावूचतुस्तदा सर्वास्तानृषीन्सूतमागधौ । आवां देवानृषींश्चैव प्रीणयावः स्वकर्मभिः ॥ ६३
न चास्य विद्मो वै कर्म[4] नाम वा लक्षणं[5] यशः[6] । स्तोत्रं येनास्य कुर्याव[7] राज्ञस्तेजस्विनो द्विजाः
ऋषिभिस्तौ नियुक्तौ तु भविष्यैः स्तूयतामिति । यानि कर्माणि कृतवान्पृथुः पश्चान्महाबलः ६५
ततः प्रभृति[8] वै लोके स्तवेषु मुनिसत्तमाः । आशीर्वादाः प्रयुज्यन्ते सूतमागधबन्दिभिः ॥ ६६
तयोः स्तवान्ते सुप्रीतः पृथुः प्रादात्प्रजेश्वरः । अनूपदेशं सूताय मगधं मागधाय च ॥ ६७
तं दृष्ट्वा परमप्रीताः प्रजाः[9] प्रोचुर्मनीषिणः । वृत्तीनामेष[10] वो दाता भविष्यति नराधिपः ॥ ६८
ततो वैण्यं महात्मानं प्रजाः समभिदुद्रुवुः । त्वं नो वृत्तिं विधत्स्वेति महर्षिवचनात्तदा ॥ ६९
सोऽभिद्रुतः प्रजाभिस्तु प्रजाहितचिकीर्षया । धनुर्गृह्य पृषत्कांश्च पृथिवीमाद्रवद्बली[11] ॥ ७०
ततो[12] वैण्यभयत्रस्ता गौर्भूत्वा प्राद्रवन्मही । तां पृथुर्धनुरादाय द्रवन्तीमन्वधावत ॥ ७१
सा लोकान्ब्रह्मलोकादीन्गत्वा वैण्यभयात्तदा[13] । प्रददर्शाग्रतो[14] वैण्यं प्रगृहीतशरासनम् ॥ ७२
ज्वलद्भिर्निशितैर्बाणैर्दीप्ततेजसमन्ततः[15] । महायोगं महात्मानं दुर्धर्षममरैरपि ॥ ७३
*अलभन्ती तु सा त्राणं वैण्यमेवान्वपद्यत । कृताञ्जलिपुटा भूत्वा पूज्या लोकैस्त्रिभिस्तदा ७४
उवाच[16] वैण्यं[17] नाधर्मं स्त्रीवधे परिपश्यसि । कथं धारयिता चासि प्रजा राजन्विना मया ॥ ७५
मयि लोकाः स्थिता[18] राजन्मयेदं धार्यते जगत् । मद्विनाशे विनश्येयुः प्रजाः पार्थिव विद्धि तत् ॥
न मामर्हसि हन्तुं वै [19]श्रेयश्चेत्त्वं चिकीर्षसि । प्रजानां पृथिवीपाल शृणु चेदं वचो मम ॥ ७७
उपायतः[20] समारब्धाः सर्वे सिध्यन्त्युपक्रमाः । उपायं पश्य येन त्वं धारयेथाः प्रजामिमाम् ७८
हत्वाऽपि[21] मां न शक्तस्त्वं प्रजानां पोषणे नृप । अनुकूला भविष्यामि यच्छ कोपं महामते[22] ७९

---

* अनुदात्तेत्त्वप्रयुक्तात्मनेपदस्यानित्यत्वादभावः ।

---

१ क. °न्त्य ददुर्वैण्य° । २ क. °न्नान्ययत्नतः । स° । ३ ग. चिन्तया । ४ ख. °र्म न तथा ल° । ५ क. नास्य ल° । ६ क. °क्षणमञ्जसा । स्तो° । ७.क. ख. कुर्वो वै रा° । ८ घ. ख. °ति त्रैलो° । ९ क. ख. °जाः प्राहुर्म° । १० ग. वृत्तिं तामे° । ११ ख. °मार्दयद्ब° । १२ क. वैण्यादपत्र° । १३ क. °दा । द° । १४ क. °र्शाग्रे ततो वै° । १५ क. ख. °मच्युतम् । म° । १६ क. चैनं । १७ ग. °ण्यं माऽध° । १८ ख. स्थिरा । १९ क. श्रेयो यत्त्वं । २० क. °यसहिता रम्याः सर्वे । २१ क. °पि मामश° । २२ ख. महीपते । ग. महाद्युते ।

अवध्यां च स्त्रियं प्राहुस्तिर्यग्योनिगतेष्वपि[2] । यद्येवं[3] पृथिवीपाले[4] न धर्मं त्यक्तुमर्हसि ॥ ८०
एवं बहुविधं वाक्यं श्रुत्वा राजा महामनाः । कोपं निगृह्य धर्मात्मा वसुधामिदमब्रवीत्[5] ॥ ८१

पृथुरुवाच—

एकस्यार्थे[6] तु यो हन्यादात्मनो वा परस्य वा । बहून्वा प्राणिनो[7]ऽनन्तं भवेत्तस्येह पातकम् ॥ ८२
सुखमेधन्ति बहवो यस्मिंस्तु निहतेऽशुभे । तस्मिन्हते नास्ति भद्रे[8] पातकं चोपपातकम् ॥ ८३
सोऽहं प्रजानिमित्तं[9] त्वां हनिष्यामि वसुंधरे । यदि मे वचनं[10]नाद्य करिष्यसि जगद्धितम् ॥ ८४
त्वां निहत्याद्य बाणेन मच्छासनपराङ्मुखीम् । आत्मानं प्रथयित्वाऽहं प्रजा धारयिता स्वयम् ॥
सा त्वं शासनमास्थाय मम धर्मभृतां वरे । संजीवय प्रजाः सर्वाः समर्था ह्यसि धारणे ॥ ८६
दुहितृत्वं च मे गच्छ तत एनमहं शरम् । नियच्छेयं त्वद्वधार्थमुद्यन्तं घोरदर्शनम् ॥ ८७

वसुधोवाच—

सर्वमेतदहं वीर विधास्यामि न संशयः । वत्सं[11] तु मम[12] संपश्य क्षरेयं येन वत्सला ॥ ८८
समां च कुरु सर्वत्र मां त्वं धर्मभृतां वर । यथा[13] विस्यन्दमानं मे क्षीरं सर्वत्र भावयेत् ॥ ८९

लोमहर्षण उवाच—

तत उत्सारयामास शैलाञ्शतसहस्रशः । धनुष्कोट्या तदा वैन्यस्तेन शै(से)ला विवर्धिताः (ता)
न हि पूर्वविसर्गे वै विषमे पृथिवीतले[14] । संविभागः पुराणां वा ग्रामाणां वाऽभवत्तदा ॥ ९१
न सस्यानि न गोरक्ष्यं[15] न कृषिर्न वणिक्पथः । *नैव सत्यानृतं चाऽऽसीन्न लोभो न च मत्सरः
वैवस्वतेऽन्तरे तस्मिन्सांप्रतं समुपस्थिते । वैण्यात्प्रभृति वै विप्राः सर्वस्यैतस्य संभवः ॥ ९३
यत्र यत्र समं त्वस्या भूमेरासीत्तदा द्विजाः । तत्र तत्र प्रजाः सर्वा निवासं समरोचयन् ॥ ९४
आहारः फलमूलानि प्रजानामभवत्तदा । कृच्छ्रेण महता युक्त[16] इत्येवमनुशुश्रुम[17] ॥ ९५
स कल्पयित्वा वत्सं तु मनुं स्वायंभुवं प्रभुम् । स्वपाणौ पुरुषव्याघ्रो दुदोह पृथिवीं[18] ततः ॥ ९६
सस्यजातानि सर्वाणि पृथुर्वैण्यः प्रतापवान् । तेनान्नेन प्रजाः सर्वा वर्तन्तेऽद्यापि सर्वशः[19] ॥ ९७
ऋषयश्च तदा देवाः पितरो[20]ऽथ सरीसृपाः । दैत्या यक्षाः पुण्यजना गन्धर्वाः पर्वता नगाः ॥ ९८
एते पुरा द्विजश्रेष्ठा दुदुहुर्धरणीं किल । क्षीरं वत्सश्च पात्रं च तेषां दोग्धा पृथक्पृथक् ॥ ९९
ऋषीणामभवत्सोमो वत्सो दोग्धा बृहस्पतिः । क्षीरं तेषां तपो ब्रह्म पात्रं छन्दांसि भो द्विजाः
देवानां काञ्चनं पात्रं वत्सस्तेषां शतक्रतुः । क्षीरम्[21]ओजस्करं चैव दोग्धा च भगवान्[22]रविः ॥ १०१
पितॄणां राजतं पात्रं यमो वत्सः प्रतापवान् । अन्तकश्चाभवद्दोग्धा क्षीरं तेषां सुधा[23] स्मृता १०२
नागानां तक्षको वत्सः पात्रं चालाबुसंज्ञकम् । दोग्धा त्वैरावतो नागस्तेषां क्षीरं विषं स्मृतम् ॥
असुराणां मधुर्दोग्धा क्षीरं मायामयं स्मृतम् । विरोचनस्तु वत्सोऽभूदायसं पात्रमेव च ॥ १०४

---

* एतदारभ्य समुपस्थित इत्यन्तं ग. पुस्तके नास्ति ।

---

१ क. °गता अपि । २ ख. °पि । संपश्यन्पृथि° । ३ क. संपश्य । ४ क. °ल अध° । ५ क. °त् । ए° । ६ ख. °स्यार्थाय यो । ग. °स्यार्थेन यो । ७ क. °नो भद्रे भ° । ८ क. ख. शुभे । ९ क. °मित्ते त्वां । १० ख. °चनं नाद्य । ११ ख. °त्सं त्वममृतं प° । १२ ग. °म तं प° । १३ क. यस्या । १४ म. °ले । प्रवि° । १५ ग. गौरक्षं । १६ ख. कृच्छ्र । १७ क. °म । संक° । १८ क. °थिवीतलम् । स° । १९ ख सर्वतः । २० क. °तरः सस° । ख. °तरोऽपि स° । २१ ख. °रमूर्जस्क° । २२ क. °वान्कविः । २३ ग. स्वधा ।

यक्षाणामामपात्रं तु वत्सो वैश्रवणः प्रभुः । दोग्धा रजतनाभस्तु क्षीरान्तर्धानमेव च(?) ॥१०५
सुमाली[1] राक्षसेन्द्राणां वत्सः क्षीरं च शोणितम् । दोग्धा रजतनाभस्तु कपालं पात्रमेव च १०६
गन्धर्वाणां चित्ररथो वत्सः पात्रं च पङ्कजम् । दोग्धा च सुरुचिः क्षीरं तेषां गन्धः शुचिः स्मृतः
शैलं पात्रं पर्वतानां क्षीरं रत्नौषधीस्तथा । वत्सस्तु हिमवानासीद्दोग्धा मेरुर्महागिरिः ॥ १०८
प्लक्षो वत्सस्तु वृक्षाणां दोग्धा शालस्तु पुष्पितः । पालाशपात्रं क्षीरं च च्छिन्नदग्धप्ररोहणम् ॥
सेयं धात्री विधात्री च पावनी च वसुंधरा । चराचरस्य सर्वस्य[2] प्रतिष्ठा योनिरेव च ॥ ११०
सर्वकामदुधा दोग्ध्री सर्वसस्यप्ररोहणी । आसीदियं समुद्रान्ता मेदिनी परिविश्रुता ॥ १११
मधुकैटभयोः कृत्स्ना मेदसा[3] समभिप्लुता । तेनेयं मेदिनी देवी उच्यते ब्रह्मवादिभिः ॥ ११२
ततोऽभ्युपगमाद्राज्ञः पृथोर्वैण्यस्य भो द्विजाः । दुहितृत्वमनुप्राप्ता देवी पृथ्वीति चोच्यते॥११३
पृथुना प्रविभक्ता च शोधिता च वसुंधरा । सस्याकरवती स्फीता पुर[4]पत्तनशालिनी ॥ ११४
एवं प्रभावो वैण्यः स राजाऽऽसीद्राजसत्तमः । नमस्यश्चैव पूज्यश्च भूतग्रामैर्न[5] संशयः ॥ ११५
ब्राह्मणैश्च महाभागैर्वेदवेदाङ्गपारगैः । पृथुरेव नमस्कार्यो ब्रह्मयोनिः सनातनः ॥ ११६
पार्थिवैश्च महाभागैः[6] पार्थिवत्वमिहेच्छुभिः । आदिराजो नमस्कार्यः पृथुर्वैण्यः प्रतापवान्॥११७
योधैरपि च विक्रान्तैः[7] प्राप्तुकामैर्जयं युधि । आदिराजो नमस्कार्यो[8] योधानां प्रथमो नृपः ११८
यो हि योद्धा रणं याति कीर्तयित्वा पृथुं नृपम् । स घोररूपात्सङ्ग्रामात्[9]क्षेमी भवति कीर्तिमान्॥
वैश्यैरपि च वित्ताढ्यै[10]र्वैश्यवृत्तिविधायिभिः । पृथुरेव नमस्कार्यो वृत्तिदाता महायशाः ॥ १२०
तथैव शूद्रैः[11] शुचिभिस्त्रिवर्णपरिचारिभिः । पृथुरेव नमस्कार्यः श्रेयः परमिहेप्सुभिः ॥ १२१
एते वत्सविशेषाश्च दोग्धारः क्षीरमेव च । पात्राणि च मयोक्तानि किं भूयो वर्णयामि वः १२२

इति श्रीमहापुराणे ब्राह्मे पृथोर्जन्ममाहात्म्यकथनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३५९

अथ पञ्चमोऽध्यायः ।

ऋषय ऊचुः—

मन्वन्तराणि सर्वाणि विस्तरेण महामते । तेषां पूर्वविसृष्टिं च लोमहर्षण कीर्तय ॥ १
यावन्तो मनवश्चैव यावन्तं कालमेव च । मन्वन्तराणि भोः सूत श्रोतुमिच्छाम तत्त्वतः ॥ २

लोमहर्षण उवाच—

न शक्यो विस्तरो विप्रा वक्तुं वर्षशतैरपि । मन्वन्तराणां सर्वेषां संक्षेपाच्छृणुत द्विजाः ॥ ३
स्वायंभुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा[12] । उत्तमस्तामसश्चैव रैवतश्चाक्षुषस्तथा ॥ ४
वैवस्वतश्च भो विप्राः सांप्रतं मनुरुच्यते । सावर्णिश्च मनुस्तद्वद्रुद्रेभ्यो[13] रौच्यस्तथैव च ॥ ५
तथैव मेरुसावर्ण्यश्चत्वारो मनवः स्मृताः । अतीता वर्तमानाश्च तथैवानागता द्विजाः ॥ ६

---

१ ग. सुमना । २ क. विश्वस्य । ३ क. °सा च परिप्लु° । ४ क. °रग्रामवती च सा । ए° । ५ ग. °श्च नमस्कार्यो म° । ६ ग. °गैः फलेप्सुभिः । ७ ख. °कान्तैरापु° । ८ ख. °र्यो वृत्तिदाता महायशाः । यो । ९ ख. °मात्तराति बहुकी° । १० ख. °त्तार्थं वैश्य° । ११ ग. शूरैः । १२ ग. °था । औत्त° । १३ ख. °द्रुद्राव्यो रौ° ।

कीर्तिता मनवस्तुभ्यं मयैवैते यथा श्रुताः । ऋषींस्त्वेषां प्रवक्ष्यामि पुत्रान्देवगणांस्तथा ॥ ७
मरीचिरत्रिर्भगवानङ्गिराः पुलहः क्रतुः । पुलस्त्यश्च वसिष्ठश्च सप्तैते ब्रह्मणः सुताः ॥ ८
उत्तरस्यां दिशि तथा द्विजाः सप्तर्षयस्तथा । आग्नीध्रश्चाग्निबाहुश्च मे[1]ध्यो मेधातिथि[2]र्वसुः ॥ ९
ज्योतिष्मान्द्युतिमान्[3]हव्यः सवलः पुत्रसंज्ञकः । मनोः स्वायंभुवस्यैते दश पुत्रा महौजसः ॥ १०
एतद्वै प्रथमं विप्रा मन्वन्तरमुदाहृतम् । और्वो वसिष्ठपुत्रश्च स्तम्बः [4]कश्यप एव च ॥ ११
प्राणो बृहस्पतिश्चैव दत्तोऽत्रिश्च्यवनस्तथा । एते महर्षयो विप्रा वायुप्रोक्ता [5]महाव्रताः ॥ १२
देवाश्च तुषिता नाम स्मृताः स्वारोचिषेऽन्तरे । [6]हविघ्रः सुकृतिर्ज्योतिरापो मूर्तिरपि स्मृतः ॥ १३
प्रतीतश्च नभस्यश्च नभ[7] ऊर्जस्तथैव च । स्वारोचिषस्य पुत्रास्ते मनो[8]र्विप्रा महात्मनः ॥ १४
कीर्तिताः पृथिवीपाला महावीर्यपराक्रमाः । द्वितीयमेतत्कथितं विप्रा मन्वन्तरं मया ॥ १५
इदं तृतीयं वक्ष्यामि तद्बुध्यध्वं द्विजोत्तमाः । वसिष्ठपुत्राः सप्ताऽऽसन्वासिष्ठा इति विश्रुताः १६
हिरण्यगर्भस्य सुता ऊर्जा जाताः सुतेजसः । ऋषयोऽत्र मया प्रोक्ताः कीर्त्यमानान्निबोधत ॥ १७
औत्तमेयान्मुनिश्रेष्ठा दश पुत्रान्मनोरिमान् । इष ऊर्जस्तनूर्जस्तु मधुर्माधव एव च ॥ १८
शुचिः शुक्रः सहश्चैव नभस्यो नभ एव च । भानवस्तत्र देवाश्च मन्वन्तरमुदाहृतम् ॥ १९
मन्वन्तरं चतुर्थं वः[9] कथयिष्यामि सांप्रतम् । काव्यः पृथुस्तथैवाग्निर्जह्नुर्धाता द्विजोत्तमाः ॥ २०
[10]कपीवानकपीवांश्च तत्र सप्तर्षयो द्विजाः । पुराणे कीर्तिता विप्राः पुत्राः पौत्राश्च भो द्विजाः २१
[11]तथा देवगणाश्चैव तामसस्यान्तरे मनोः[12] । द्युतिस्तपस्यः सुतपास्तपो[13]भूतः सनातनः ॥ २२
तपोरतिरकल्माष[14]स्तन्वी ध[15]न्वी परं[16]तपः । तामसस्य मनोरेते दश पुत्राः प्रकीर्तिताः ॥ २३
वायुप्रोक्ता[17] मुनिश्रेष्ठाश्चतुर्थं चैतदन्तरम् । देवबाहुर्यदुध्रश्च मुनिर्वेदशिरास्तथा ॥ २४
हिरण्यरोमा पर्जन्य ऊर्ध्वबाहुश्च सो[18]मजः । सत्यनेत्रस्तथाऽऽत्रेय एते सप्तर्षयोऽपरे ॥ २५
दे[19]वाश्चाभूतरजसस्तथा प्रकृतयः स्मृता[20]ः । वारिप्लवश्च रै[21]भ्यश्च मनोरन्तरमुच्यते ॥ २६
अथ पुत्रानिमांस्तस्य बुध्यध्वं गदतो मम । धृतिमानव्ययो युक्तस्तत्त्वदर्शी निरुत्सुकः ॥ २७
[22]आरण्यश्च प्रकाशश्च नि[23]र्मोहः सत्यवाकृती । रैवतस्य मनोः पुत्राः पञ्चमं चैतदन्तरम् ॥ २८
षष्ठं तु संप्रवक्ष्यामि तद्बुध्यध्वं द्विजोत्तमाः । भृगुर्नभो विवस्वांश्च सुधामा विरजास्तथा ॥ २९
[24]अतिनामा सहिष्णुश्च स[25]प्तैते च महर्षयः । चाक्षुषस्यान्तरे [26]विप्रा मनोर्देवास्त्विमे स्मृता[27]ः ॥ ३०
आवालप्रथितास्ते वै पृथक्त्वेन दिवौकसः । लेखाश्च नामतो विप्राः पञ्च देवगणाः स्मृताः ३१
ऋषेरङ्गिरसः पुत्रा महात्मानो महौजसः । [28]नाड्वलेया मुनिश्रेष्ठा दश पुत्रास्तु विश्रुता[29]ः ॥ ३२
रुरुप्रभृतयो विप्राश्चाक्षुषस्यान्तरे मनोः । षष्ठं मन्वन्तरं प्रोक्तं सप्तमं तु निबोधत ॥ ३३
अत्रिर्वसिष्ठो भगवान्कश्यपश्च महानृषिः । गौतमोऽथ भरद्वाजो विश्वामित्रस्तथैव च ॥ ३४

---

१ ख. ग. मेधा । २ क. °थिर्विभुः । ज्यो° । ३ ख. °न्हव्यो मनुपुत्रस्तथैव च । म° । ४ ग. काश्यप । ५ क. जितेन्द्रियाः । ख. महाबलाः । ६ क. हविष्यः । ग. हविध्र° । ७ ख. °भस्तर्षस्त° । ८ ख. नाम । ९ क. तु । ख. च । १० क. कक्षीवान्कपिवांश्चैव त° । ११ ख. सत्या । १२ क. °नोः । धृतिस्तपःसुतरणस्तपोमूलं स° । १३ ख. °पोमूलः स° । १४ क. °स्तन्विध° । १५ क. °धन्विप° । १६ क. °तपाः । ता° । १७ ख. °क्ताश्च भो विप्राश्च° । १८ क. सोमपः । १९ क. °वाश्च भू° । २० ख. °ताः । पारि° । २१ ग. वैद्यश्च । २२ ख. ग. अरण्यश्च । २३ क. निर्भेदः । २४ क. °तिधामा । २५ ग. °सैतेऽतिम° । २६ ख. चैते । २७ क. °ताः । अप्रसूताश्च ऋषयः पृथुशाज्या दिवौकसः । २८ ख. नाद्वले° । २९ क. °ताः । गुरु° ।

तथैव पुत्रो भगवानृचीकस्य महात्मनः । सप्तमो जमदग्निश्च ऋषयः सांप्रतं दिवि ॥ ३५
साध्या रुद्राश्च विश्वे च वसवो मरुतस्तथा । आदित्याश्चाश्विनौ चापि देवौ वैवस्वतौ स्मृतौ ३६
मनोर्वैवस्वतस्यैते वर्तन्ते सांप्रतेऽन्तरे । इक्ष्वाकुप्रमुखाश्चैव दश पुत्रा महात्मनः ॥ ३७
एतेषां कीर्तितानां तु महर्षीणां महौजसाम् । तेषां पुत्राश्च पौत्राश्च दिक्षु सर्वासु भो द्विजाः ३८
मन्वन्तरेषु सर्वेषु प्रागासन्सप्त सप्तकाः । लोके धर्मव्यवस्थार्थं लोकसंरक्षणाय च ॥ ३९
मन्वन्तरे व्यतिक्रान्ते चत्वारः सप्तका गणाः । कृत्वा कर्म दिवं यान्ति ब्रह्मलोकमनामयम् ॥ ४०
ततोऽन्ये तपसा युक्ताः स्थानं तत्पूरयन्त्युत । अतीता वर्तमानाश्च क्रमेणैतेन भो द्विजाः ॥ ४१
अनागताश्च सप्तैते स्मृता दिवि महर्षयः । मनोरन्तरमासाद्य सावर्णस्येह भो द्विजाः ॥ ४२
रामो व्यासस्तथाऽऽत्रेयो दीप्तिमन्तो बहुश्रुताः । भारद्वाजस्तथा द्रौणिरश्वत्थामा महाद्युतिः ४३
गौतमश्चाजरश्चैव शरद्वान्नाम गौतमः । कौशिको गालवश्चैव और्वः काश्यप एव च ॥ ४४
एते सप्त महात्मानो भविष्या मुनिसत्तमाः । वैरी चैवाध्वरीवांश्च शमनो धृतिमान्वसुः ॥ ४५
अरिष्टश्चाप्यधृष्टश्च वाजी सुमतिरेव च । सावर्णस्य मनोः पुत्रा भविष्या मुनिसत्तमाः ॥ ४६
एतेषां कल्यमुत्थाय कीर्तनात्सुखमेधते । यशश्चाऽऽप्नोति सुमहदायुष्मांश्च भवेन्नरः ॥ ४७
एतान्युक्तानि भो विप्राः सप्तसप्त च तत्त्वतः । मन्वन्तराणि संक्षेपाच्छृणुतानागतान्यपि ॥ ४८
सावर्णा मनवो विप्राः पञ्च तांश्च निबोधत । एको वैवस्वतस्तेषां चत्वारस्तु प्रजापतेः ॥ ४९
परमेष्ठिसुता विप्रा मेरुसावर्ण्यतां गताः । दक्षस्यैते हि दौहित्राः प्रियायास्तनया नृपाः ॥ ५०
महता तपसा युक्ता मेरुपृष्ठे महौजसः । रुचेः प्रजापतेः पुत्रो रौच्यो नाम मनुः स्मृतः ॥ ५१
भूत्यां चोत्पादितो देव्यां भौत्यो नाम रुचेः सुतः। अनागताश्च सप्तैते कल्पेऽस्मिन्मनवः स्मृताः
तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना । पूर्णं युगसहस्रं तु परिपाल्या द्विजोत्तमाः ॥ ५३
प्रजापति(ते)श्च तपसा संहारं ते(रस्ते)षु नित्यशः । युगानि सप्ततिस्तानि साग्राणि कथितानि च
कृतत्रेतादियुक्तानि मनोरन्तरमुच्यते । चतुर्दशैते मनवः कथिताः कीर्तिवर्धनाः ॥ ५५
वेदेषु सपुराणेषु सर्वेषु प्रभविष्णवः । प्रजानां पतयो विप्रा धन्यमेषां प्रकीर्तनम् ॥ ५६
मन्वन्तरेषु संहाराः संहारान्तेषु संभवाः । न शक्यंतेऽन्तस्तेषां वै वक्तुं वर्षशतैरपि ॥ ५७
विसर्गस्य प्रजानां वै संहारस्य च भो द्विजाः । मन्वन्तरेषु संहाराः श्रूयन्ते द्विजसत्तमाः ॥ ५८
सशेषास्तत्र तिष्ठन्ति देवाः सप्तर्षिभिः सह । तपसा ब्रह्मचर्येण श्रुतेन च समन्विताः ॥ ५९
पूर्णे युगसहस्रे तु कल्पो निःशेष उच्यते । तत्र भूतानि सर्वाणि दग्धान्यादित्यरश्मिभिः ॥ ६०
ब्रह्माणमग्रतः कृत्वा सहाऽऽदित्यगणैर्द्विजाः । प्रविशन्ति सुरश्रेष्ठं हरिंनारायणं प्रभुम् ॥ ६१
स्रष्टारं सर्वभूतानां कल्पान्तेषु पुनः पुनः । अव्यक्तः शाश्वतो देवस्तस्य सर्वमिदं जगत् ॥ ६२
अत्र वः कीर्तयिष्यामि मनोर्वैवस्वतस्य वै । विसर्गं मुनिशार्दूलाः सांप्रतस्य महाद्युतेः ॥ ६३

---

१ क. ऋषिर्यस्माच्च जज्ञिरे । सा° । २ ख. °षु प्रथिताः सप्त । ३ क. °श्च ऋषयोऽपि च भो । ४ क. °र्णस्य ऽऽदितो द्वि° । ख. °र्णस्योदिता द्वि° । ५ क. °ताः । भर° । ६ क. ग. °मस्याऽऽत्मजश्चै° । ७ क. °व भरद्वाजोऽथ गौ° । ८ ख. धौम्यः । ९ क. सुमन्तो । १० ख. °वेत्सदा । ए° । ११ क. °नवस्तात्वत्पञ्च । ख. °नवस्तात प° । १२ क. ख. °ध मे । ए° । १३ क. °को विव° । १४ क. °प्रा मनुसा° । १५ ग. द्विजाः । १६ क. °म मनुः स्मृतः । अ° । १७ ग. ससमुद्रा । १८ ग. पूर्णवर्षस° । १९ क. ग. °क्यमन्तरं तेषां व° । २० ख. भरतर्षभ । २१ ग. °र्णे वर्षस° । २२ क. ते ।

अत्र वंशप्रसङ्गेन कथ्यमानं पुरातनम् । यत्रोत्पन्नो महात्मा स हरिर्वृष्णिकुले[1] प्रभुः ॥ ६४

इति श्रीमहापुराणे ब्राह्मे मन्वन्तरकीर्तनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

श्लोकानामादितः समष्ट्यङ्काः—४२३

अथ षष्ठोऽध्यायः ।

लोमहर्षण उवाच—

विवस्वान्कश्यपाज्जज्ञे दाक्षायण्यां द्विजोत्तमाः । तस्य भार्याऽभवत्संज्ञा त्वाष्ट्री देवी विवस्वतः १
सुरे[2]श्वरीति विख्याता त्रिषु लोकेषु भाविनी[3] । सा वै भार्या भगवतो मार्तण्डस्य महात्मनः ॥ २
भर्तृरूपेण नातुष्यद्रूपयौवनशालिनी । संज्ञा नाम[4] सुतपसा सुदीप्तेन समन्विता ॥ ३
आदित्यस्य हि तद्रूपं मण्डलस्य सुतेजसा[5] । गात्रेषु परिदग्धं वै नातिकान्तमिवाभवत् ॥ ४
न खल्वयं मृतो(ता)ण्डस्य इति स्नेहादभाषत । अजानन्काश्यपस्तस्मान्मार्तण्ड इति चोच्यते ॥५
तेजस्त्वभ्यधिकं तस्य नित्यमेव विवस्वतः । येनातितापयामास त्रीँल्लोकान्कश्यपात्मजः ॥ ६
त्रीण्यपत्या[6]नि भो विप्राः संज्ञायां[7] तपतां वरः । आदित्यो जनयामास कन्यां द्वौ च प्रजापती ७
मनुर्वैवस्वतः पूर्वं श्राद्धदेवः प्रजापतिः । यमश्च यमुना चैव यमजौ संबभूवतुः ॥ ८
श्यामवर्णं तु तद्रूपं संज्ञा दृष्ट्वा विवस्वतः । असहन्ती तु स्वां छायां सवर्णां निर्ममे ततः ॥ ९
मायामयी तु सा संज्ञा तस्यां छायासमुत्थिताम् । प्राञ्जलिः प्रणता भूत्वा छाया संज्ञां[8] द्विजोत्तमाः
उवाच किं मया कार्यं कथयस्व शुचिस्मिते । स्थिताऽस्मि तव निर्देशे शाधि मां वरवर्णिनि ११

संज्ञोवाच—

अहं यास्यामि भद्रं ते स्वमेव भवनं पितुः । त्वयैव[9] भवने मह्यं[10] वस्तव्यं निर्विशङ्कया ॥ १२
इमौ च बालकौ मह्यं कन्या चेयं सुमध्यमा । संभाव्यास्ते न चाऽऽख्येयमिदं भगवते किंचित्[11]१३

सवर्णोवाच—

आ कचग्रहणाद्देवि आ शापान्नैव कर्हिचित् । आख्यास्यामि[12] नमस्तुभ्यं गच्छ देवि यथासुखम्॥

लोमहर्षण उवाच—

समादिश्य सवर्णां तु तथेत्युक्ता तया[13] च सा । त्वष्टुः[14] समीपमगमद्[15]व्रीडितेव तपस्विनी ॥ १५
पितुः समीपगा सा तु पित्रा निर्भर्त्सिता शुभा[16] । भर्तुः[17] समीपं गच्छेति नियुक्ता च पुनः पुनः॥
आगच्छद्वडवा भूत्वाऽऽच्छाद्य रूपमनिन्दिता । कुरूनथोत्तरान्गत्वा तृणान्यथ चचार ह ॥ १७
द्वितीयायां तु संज्ञायां संज्ञेयमिति चिन्तयन् । आदित्यो जनयामास पुत्रमात्मसमं तदा ॥ १८
पूर्वजस्य मनोर्विप्राः सदृशोऽयमिति प्रभुः । मनुरेवाभवन्नाम्ना सावर्ण[18] इति चोच्यते ॥ १९
द्वितीयो यः सुतस्तस्याः[19] स विज्ञेयः शनैश्चरः । संज्ञा तु पार्थिवी विप्राः स्वस्य पुत्रस्य वै तदा

---

१ क. ख. °कुलोद्भवः । इ° । २ क. उरेणुरिति । ख. सुरेणुरिति । ३ क. भामिनी । ४ ख. °म स्वत° । ५ क. ख. सुतेजसः । ६ ख. °नि कौरव्य सं° । ७ क. °यां भगवांस्ततः । आ° । ८ ख. °ज्ञां ततो द्विजाः । उ° । ९ ख. त्वयेह भ° । १० ख. मत्के । ११ क. ख. शुभे । १२ क. ग. °मि मतं तुभ्यं । १३ ख. तयैव सा । १४ क. पितुः । १५ क. °मद्व्रीसेव च त° । १६ क. ख. पुरा । १७ ग. रवेः । १८ क. ग. सावर्ण्य । १९ ख. °स्तस्यां स ।

चकाराभ्यधिकं स्नेहं न तथा पूर्वजेषु वै। मनुस्तस्याः क्षमत्तत्तु(स्या अक्षमत) यमस्तस्या न चक्षमे
स वै रोषाच्च बाल्याच्च भाविनोऽर्थस्य वाऽनघ। पदा [1]संतर्जयामास संज्ञां वैवस्वतो यमः ॥२२
[2]तं शशाप ततः क्रोधात्[3]सावर्णजननी तदा। चरणः पततामेष तवेति भृशदुःखिता ॥ २३
यमस्तु [4]तत्पितुः सर्वं प्राञ्जलिः प्रत्यवेदयत्। भृशं शापभयोद्विग्नः संज्ञावाक्यैर्विशङ्कितः ॥ २४
शापोऽयं विनिव[5]र्तेत प्रोवाच पितरं [6]द्विजाः। मात्रा स्नेहेन सर्वेषु वर्तितव्यं सुतेषु वै ॥ २५
सेयमस्मा[7]नपास्येह विवस्वन्संबुभूषति। तस्यां मयोद्यतः पादो न तु देहे निपातितः ॥ २६
बाल्याद्वा यदि [10]वा लौल्यान्मोहात्तत्क्षन्तुमर्[11]हसि। शप्तोऽहमस्मि लो[12]केश जनन्या तपतां वर ॥
तव प्रसादाच्चरणो न पतेन्मम गोपते ॥ २७

विवस्वानुवाच—

असंशयं पुत्र महद्भविष्यत्यत्र कारणम्। येन [13]त्वामाविशत्क्रोधो धर्मज्ञं सत्यवादिनम् ॥ २८
न श[14]क्यमेतन्मिथ्या तु कर्तुं मातृवचस्तव। [15]कृमयो मांसमादा[16]य यास्यन्त्यवनिमेव च ॥ २९
कृतमेवं वचस्तथ्यं मातुस्तव भविष्यति। शापस्य परिहारेण त्वं च त्रातो भविष्यसि ॥ ३०
आदित्यश्चाब्रवीत्संज्ञां किमर्थं तनयेषु वै। तुल्येष्वभ्यधिकः स्नेह एकस्मिन्क्रियते त्वया ॥ ३१
सा तत्परिहरन्ती तु नाऽऽचचक्षे विवस्वते। स चाऽऽत्मानं समाधाय योगात्तथ्यमपश्यत ॥३२
तां शप्तुकामो भगवान्नाशपन्मुनिसत्तमाः। *मूर्धजेषु निजग्राह(स तु तां मुनिसत्तमाः) ॥ ३३
ततः सर्वं यथावृत्तमाचचक्षे विवस्वते। विवस्वानथ तच्छ्रुत्वा क्रुद्धस्त्वष्टारमभ्यगा[17]त् ॥ ३४
दृष्ट्वा तु तं यथान्यायमर्चयित्वा विभावसुम्। निर्दग्धुकामं रोषेण सान्त्वयामास वै तदा ॥ ३५

त्वष्टोवाच—

तवातितेजसाऽऽविष्टमिदं रूपं न शोभते। असहन्ती च संज्ञा सा वने चरति [18]शाड्वले ॥ ३६
द्रष्टा हि तां भवानद्य स्वां भार्यां शुभचारिणीम्। श्लाघ्यां योगबलोपेतां योगमास्थाय गोपते ॥
अनुकूलं तु ते देव यदि स्यान्[19]मम संमतम्। रूपं निर्वर्तयाम्यद्य तव कान्तमरिंदम ॥ ३८
ततोऽभ्युपगमात्त्वष्टा मार्तण्डस्य विवस्वतः। भ्रमिमारोप्य तत्ते[20]जः शातयामास भो द्विजाः ॥३९
ततो निर्भासितं रूपं तेजसा संहतेन वै। कान्तात्कान्तत[21]रं द्रष्टुमधिकं शुशुभे तदा ॥ ४०
ददर्श योगमास्थाय [22]स्वां भार्यां वडवां ततः। अधृष्यां सर्वभूतानां तेजसा नियमेन च ॥ ४१
वडवावपुषा विप्राश्चरन्तीमकुतोभयाम्। सोऽश्वरूपेण भगवांस्तां मुखे समभावयत् ॥ ४२
मैथुनाय विचेष्टन्तीं परपुंसोऽवशङ्कया। सा तन्निरवमच्छुक्रं नासिकाभ्यां विवस्वतः ॥ ४३
देवौ तस्यामजायेतामश्विनौ भिषजां वरौ। नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति ॥ ४४

---

* एतदर्धं ख. ग. पुस्तकयोर्नास्ति।

---

१ ख. संताडयामास। २ ख. सा। ३ क. ग. °वर्ण्यज°। ४ ख. स्वपितुः। ५ ग. °र्तैति प्रो°। ६ क. ख. तदा। ७ ख. °नपहाय यवीयांसं। ८ क. °पादाग्र वि°। ९ ग. °ह यवीयांसं। १० ख. वा मोहात्तद्भवान्क्षन्तु°। ११ ख. °र्हति। श°। १२ ख. °केशाप्यनया त°। ग. °केऽस्मिन्नन°। १३ क. त्वामशपन्माता ध°। क. ख. त्वामशपत्क्रोधाद्धर्मं°। १४ क. °क्यते त°। १५ ग. क्रिमयो। १६ ख. °य पतस्यन्त्यत्र महीतलम्। कृ°। १७ ख. °त्। सक्रोधं तत्र चाऽऽयातम°। १८ क. शोभने। १९ ग. °म तन्मत°। २० ग. °जः पात°। २१ ग. °रं रूपम°। २२ क. स्वां प्रियां स दिवाकरः। अ°।

मार्तण्डस्याऽऽत्मजावेतावष्टमस्य प्रजापतेः । तां तु रूपेण कान्तेन दर्शयामास भास्करः ॥ ४५
सा तु दृष्ट्वैव भर्तारं तुतोष मुनिसत्तमाः । यमस्तु कर्मणा तेन भृशं पीडितमानसः ॥ ४६
धर्मेण रञ्जयामास धर्मराज इमाः प्रजाः । स लेभे कर्मणा तेन शुभेन परमद्युतिः ॥ ४७
पितॄणामाधिपत्यं च लोकपालत्वमेव च । मनुः प्रजापतिस्त्वासीत्सावर्णिः स तपोधनाः ॥ ४८
भाव्यः समागते तस्मिन्मनुः सावर्णिकेऽन्तरे । मेरुपृष्ठे तपो नित्यमद्यापि स चरत्युत ॥ ४९
भ्राता शनैश्चरस्तस्य ग्रहत्वं स तु लब्धवान् । त्वष्टा तु तेजसा तेन विष्णोश्चक्रमकल्पयत् ॥ ५०
तदप्रतिहतं युद्धे दानवान्तचिकीर्षया । यवीयसी तु साऽप्यासीद्यमी कन्या यशस्विनी ॥ ५१
अभवच्च सरिच्छ्रेष्ठा यमुना लोकपावनी । मनुरित्युच्यते लोके सावर्ण इति चोच्यते ॥ ५२
द्वितीयो यः सुतस्तस्य मनोर्भ्राता शनैश्चरः । ग्रहत्वं स च लेभे वै सर्वलोकाभिपूजितः ॥ ५३
य इदं जन्म देवानां शृणुयान्नरसत्तमः । आपदं प्राप्य मुच्येत प्राप्नुयाच्च महद्यशः ॥ ५४

इति श्रीमहापुराणे ब्राह्म आदित्योत्पत्तिकथनं नाम षष्ठोऽध्यायः ॥ ६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४७६

अथ सप्तमोऽध्यायः ।

लोमहर्षण उवाच—

मनोर्वैवस्वतस्याऽऽसन्पुत्रा वै नव तत्समाः । इक्ष्वाकुश्चैव नाभागो धृष्टः शर्यातिरेव च ॥ १
नरिष्यन्तश्च षष्ठो वै प्रांशू रिष्टश्च सप्तमः । करूषश्च पृषध्रश्च नवैते मुनिसत्तमाः ॥ २
अकरोत्पुत्रकामस्तु मनुरिष्टिं प्रजापतिः । मित्रावरुणयोर्विप्राः पूर्वमेव महामतिः ॥ ३
अनुत्पन्नेषु बहुषु पुत्रेष्वेतेषु भो द्विजाः । तस्यां च वर्तमानायामिष्ट्यां च द्विजसत्तमाः ॥ ४
मित्रावरुणयोरंशे मनुराहुतिमावहत् । तत्र दिव्याम्बरधरा दिव्याभरणभूषिता ॥ ५
दिव्यसंहनना चैव इला जज्ञ इति श्रुतिः । तामिलेत्येव होवाच मनुर्दण्डधरस्तदा ॥ ६
अनुगच्छस्व मां भद्रे तमिला प्रत्युवाच ह । धर्मयुक्तमिदं वाक्यं पुत्रकामं प्रजापतिम् ॥ ७

इलोवाच—

मित्रावरुणयोरंशे जाताऽस्मि वदतां वर । तयोः सकाशं यास्यामि न मां धर्महतां कुरु ॥ ८
सैवमुक्त्वा मनुं देवं मित्रावरुणयोरिला । गत्वाऽन्तिकं वरारोहा प्राञ्जलिर्वाक्यमब्रवीत् ॥ ९

इलोवाच—

अंशेऽस्मि युवयोर्जाता देवौ किं करवाणि वाम् । मनुना चाहमुक्ता वा अनुगच्छस्व मामिति ॥
तौ तथावादिनीं साध्वीमिलां धर्मपरायणाम् । मित्रश्च वरुणश्चोभावूचतुस्तां द्विजोत्तमाः ॥ ११

---

१ ख. °ण्डस्य सुतावे° । २ ख. °व्यः सोऽभ्याग° । ग. °व्यः सोऽप्याग° । ३ क. °हत्वमुपल° । ४ ग. °कभाविनी । ५ ख. विश्रुतः । ६ ख. °तीयस्तु सु° । ७ क. ख. सत्तमाः । ८ ख. °न्तस्तु ष° । ९ ख. °ष्टो नाभागोऽरिष्टश्च सत्तमाः । क° । १० ग. पुग्ध्रश्च । ११ क. °स्तु मुनिरि° । १२ क. °माजुहोत् । १३ ख. °वपत् । १४ क. ख. °लेतीति हो° । १५ ख. °स्मिन्युव° ।

मित्रावरुणावूचतुः—

अनेन तव धर्मेण प्रश्रयेण दमेन च । सत्येन चैव सुश्रोणि प्रीतौ स्वो वरवर्णिनि ॥ १२
आवयोस्त्वं महाभागे ख्यातिं कन्येति यास्यसि ॥ १३
मनोर्वंशकरः पुत्रस्त्वमेव च भविष्यसि । सुद्युम्न इति विख्यातस्त्रिषु लोकेषु शोभने ॥ १४
जगत्प्रियो धर्मशीलो [1]मनोर्वंशविवर्धनः । निवृत्ता सा तु तच्छ्रुत्वा गच्छन्ती पितुरन्तिकात् १५
बुधेनान्तरमासाद्य मैथुनायोप[2]मन्त्रिता । सोमपुत्राद्बुधा[3]द्विप्रास्तस्यां जज्ञे पुरूरवाः ॥ १६
जनयित्वा ततः सा तमिला सुद्युम्नतां गता । सुद्युम्नस्य तु दायादास्त्र[5]यः परमधार्मिकाः ॥ १७
उत्कलश्च गयश्चैव [4]विनताश्वश्च भो द्विजाः । उत्कलस्योत्कला विप्रा विनताश्वस्य पश्चिमाः ॥ १८
दिक्पूर्वा मुनिशार्दूला गयस्य तु गया स्मृता । प्रविष्टे तु मनौ विप्रा दिवाकरमरिंदमम् ॥ १९
दश[6]धा तत्पुनः क्षत्रमकरोत्पृथिवीमिमाम् । इक्ष्वाकु[7]र्ज्येष्ठदायादो मध्यदेशमवाप्तवान् ॥ २०
कन्याभावात्तु सुद्युम्नो नै[8]तद्राज्यमवाप्तवान् । वसिष्ठवचना[9]त्त्वासीत्प्रतिष्ठाने महात्मनः ॥ २१
प्रतिष्ठा धर्मराजस्य सुद्युम्नस्य द्विजोत्तमाः । तत्पुरूरवसे प्रादाद्राज्यं प्राप्य महायशाः* ॥ २२
मानवेयो मुनिश्रेष्ठाः स्त्रीपुंसोर्लक्षणैर्युतः । धृतवांस्तामिले[10]त्येवं सुद्युम्नेति च [11]विश्रुतः ॥ २३
नारिष्यन्ताः शकाः पुत्रा नाभागस्य तु भो द्विजाः । अम्बरीषोऽभवत्पुत्रः पार्थि[12]वर्षभसत्तमः २४
धृष्टस्य धार्ष्टकं क्षत्रं रणदृप्तं बभूव ह । करूषस्य च कारूषाः क्षत्रिया युद्धदुर्मदाः ॥ २५
नाभागधृष्टपुत्राश्च क्षत्रिया वैश्यतां गताः । प्रांशोरेकोऽभवत्पुत्रः प्रजापतिरिति स्मृतः ॥ २६
नरिष्यन्तस्य दायादो राजा दण्डधरो यमः । शर्यातेर्मिथुनं त्वासीदानर्तो नाम विश्रुतः ॥ २७
पुत्रः कन्या सुकन्या च या पत्नी च्यवनस्य ह । आनर्तस्य तु दायादो [13]रैवो नाम महाद्युतिः २८
आनर्तविषयश्चैव पुरी चास्य कुशस्थली । रैवस्य रैवतः पुत्रः ककुद्मी नाम धार्मिकः ॥ २९
ज्येष्ठः [14]पुत्रः स तस्याऽऽसीद्राज्यं प्राप्य कुशस्थलीम् । स कन्यासहितः श्रुत्वा गान्धर्वं
ब्रह्मणोऽन्तिके ॥ ३०
मुहूर्तभूतं देवस्य तस्थौ बहुयुगं द्विजाः । आजगाम स चैवाथ स्वां [15]पुरीं यादवैर्वृताम् ॥ ३१
[16]कृतां द्वारवतीं नाम बहुद्वारां मनोरमाम् । भोजवृष्ण्यन्धकैर्गुप्तां वसुदेवपुरोगमैः ॥ ३२
[17]तत्रैव रैवतो ज्ञात्वा [18]यथातत्त्वं द्विजोत्तमाः । कन्यां तां बलदेवाय सुभद्रां नाम रेवतीम् ॥ ३३
दत्त्वा जगाम शिखरं मेरोस्तपसि [19]संस्थितः । रेमे रामोऽपि धर्मात्मा रेवत्या सहितः सुखी ३४

मुनय ऊचुः—

कथं बहुयुगे काले समतीते महामते । न जरा रेवतीं प्राप्ता रैवतं च ककुद्मिनम् ॥ ३५

---

*एतदनन्तरं—"सुद्युम्नः कारयामास प्रतिष्ठाने नृपक्रियाम् । धृष्णुकश्चाम्बरीषश्च दण्डकश्चेति ते समाः । यश्चकार महात्मा वै दण्डकारण्यमुत्तमम् । यत्र प्रविष्टमात्रस्तु नरः पापात्प्रमुच्यते । सुद्युम्नश्च दिवं यात ऐलमुत्पाद्य भो द्विजाः" इति श्लोकद्वयं सार्धं क. पुस्तकेऽधिकं दृश्यते ।

---

१ क मनुवंश° । २ क. °पशंसिता । ३ ख. °धाद्राज्ञा तस्माज्जज्ञे । ४ क. त्रिजिता° । ५ क. त्रिजिता° । ६ क. °धा तदभूत्क्षत्र° । ग. °धा तु कुरुक्षेत्रम° । ७ ख °कुर्योऽष्टदा° । ८ ग. °तद्गुणम° । ९ ख. °नाच्चाऽऽसीं° । १० ख. °त्येव सु° । ११ ग. विश्रुतिः । १२ ख. °वस्त्वृषिसत्तमाः । धृ° । १३ ग. रेवो । १४ ख. ग. पुत्रशत° । १५ ख. °रीं पादपैर्वृ° । १६ ख. °तां द्वारवतीं नाम्ना ब° । १७ ख. ततस्तद्दैव° । १८ क. याथातथ्यं । १९ ग. संश्रितः ।

मेरुं गतस्य वा तस्य शर्यातेः संततिः कथम् । स्थिता पृथिव्यामद्यापि श्रोतुमिच्छाम तत्त्वतः ३६

लोमहर्षण उवाच—

न जरा क्षुत्पिपासा वा न मृत्युर्मुनिसत्तमाः । ऋतुचक्रं प्रभवति[1] ब्रह्मलोके सदाऽनघाः ॥
ककु[2]द्मिनः स्वर्लोकं तु रैवतस्य गतस्य ह ॥ ३७
[3]हृता पुण्यजनैर्विप्रा राक्षसैः सा कुशस्थली । तस्य भ्रातृशतं[4] त्वासीद्धार्मिकस्य महात्मनः ॥ ३८
तद्बध्यमानं रक्षोभिर्दिशः प्राक्राम[5]दच्युताः । विद्रुतस्य च विप्रेन्द्रास्तस्य भ्रातृशतस्य वै ॥ ३९
अन्ववायस्तु सुमहांस्तत्र तत्र द्विजोत्तमाः[6] । [7]तेषां ह्येते मुनिश्रेष्ठाः शर्याता इति विश्रुताः ॥ ४०
क्षत्रिया गुणसंपन्ना दिक्षु सर्वासु विश्रुताः । श(स)र्वशः सर्वगहनं प्रविष्टास्ते महौजसः ॥ ४१
नाभागरिष्टपुत्रौ द्वौ वैश्यौ ब्राह्मणतां गतौ । करूषस्य तु कारूषाः क्षत्रिया युद्धदुर्मदाः ॥ ४२
पृषध्रो हिंसयित्वा तु गुरोर्गां द्विजसत्तमाः । शापाच्छूद्रत्वमापन्नो नवैते परिकीर्तिताः ॥ ४३
वैवस्वतस्य तनया मुनेर्वै मुनिसत्तमाः । क्षुवतस्तु मनोर्विप्रा इक्ष्वाकुरभवत्सुतः ॥ ४४
तस्य पुत्रशतं त्वासीदिक्ष्वाकोर्भूरिदक्षिणम्[9] । तेषां वि[10]कुक्षिर्ज्येष्ठस्तु वि[11]कुक्षित्वादयोधताम् ॥ ४५
प्राप्तः परमधर्म[12]ज्ञ सोऽयोध्याधिपतिः प्रभुः । शकुनिप्रमुखास्तस्य पुत्राः पञ्चशतं स्मृताः ॥ ४६
उत्तरापथदेशस्य रक्षितारो महाबलाः । चत्वारिंशद्दशाष्टौ च दक्षिणस्यां तथा [13]दिशि ॥ ४७
वशातिप्रमुखाश्चान्ये रक्षितारो द्विजोत्तमाः । इक्ष्वाकुस्तु विकुक्षिं वा अष्टकायामथाऽऽदिशत् ४८
मांसमानय श्राद्धार्थं मृगान्हत्वा महाबल । श्राद्धकर्मणि चोद्दिष्टो अकृते श्राद्धकर्मणि ॥ ४९
भक्षयित्वा शशं विप्रा शशादो मृगयां गतः । इक्ष्वाकुणा परित्यक्तो वसिष्ठवचनात्प्रभुः ॥ ५०
इक्ष्वाकौ संस्थिते विप्राः शशादस्तु नृपोऽभवत् । शशादस्य तु दायादः ककुत्स्थो नाम वीर्यवान् ॥
[14]अनेनास्तु ककुत्स्थस्य पृथुश्चानेनसः स्मृतः[15] । [16]विष्टराश्वः पृथोः पुत्रस्तस्मादार्द्रस्त्वजायत ॥ ५२
आर्द्रस्य युवनाश्वस्तु श्रावस्तस्तत्सुतो द्विजाः । जज्ञे श्रावस्तको राजा श्रावस्ती येन निर्मिता ॥
श्रावस्तस्य तु दायादो बृहदश्वो महीपतिः । कुवलाश्वः सुतस्तस्य राजा परमधार्मिकः ॥ ५४
[17]यः स धुन्धुवधाद्राजा धुन्धुमारत्वमागतः ॥ ५५

मुनय ऊचुः—

[18]धुन्धोर्वधं महाप्राज्ञ श्रोतुमिच्छाम तत्त्वतः । यद्वधात्कुवलाश्वोऽसौ धुन्धुमारत्वमागतः ॥ ५६

लोमहर्षण उवाच—

कुवलाश्वस्य पुत्राणां शतमुत्तमधन्विनाम् । सर्वे विद्यासु निष्णाता बलवन्तो दुरासदाः ॥ ५७
बभूवुर्धार्मिकाः सर्वे यज्वानो भूरिदक्षिणाः । कुवलाश्वं [19]पिता राज्ये बृहद[20]श्वो न्ययोजयत् ॥ ५८
पुत्रसंक्रामितश्रीस्तु वनं राजा विवेश ह । तमुत्तङ्कोऽथ विप्रर्षिः [21]प्रयान्तं प्रत्यवारयत् ॥ ५९

---

१ क. °ति तत्र लो° । २ ख. °द्मिनश्च स्व° । ३ क. ग. हता । ४ ख. °तं चाऽऽसी° । ५ ख. °दप्युत । वि° । ६ क. °माः । एवं ते तु मु° । ७ क. तेषामेते । ८ क. °ष्टाश्च म° । ९ ग. °क्षिणाः । ते° । १० क. °कुक्षिः श्रेष्ठ° । ११ क. विक्रमे रुद्रसंनिभः । प्रा° । ख. विक्रमेण समन्वितः । प्रा° । १२ क. °र्मज्ञः पृथिव्याधि° । १३ ख. °शि । इणदप्र° । १४ ख. °नेनसः क° । १५ ख. °तः । वीराश्वस्तु पृ° । १६ क. विष्णोरंशः पृ° । १७ क. ख. यस्तु धु° । १८ क. °धं वयं ब्रह्मञ्श्रोतु° । १९ क. ख. सुतं । २० क. ख. °श्वोऽभ्यषेचय° । २१ ग. प्रयातं ।

उत्तङ्क उवाच—

भवता रक्षणं कार्यं तच्च कर्तुं[1] त्वमर्हसि । निरुद्विग्नस्तपश्चर्तुं* न हि शक्नोमि पार्थिव ॥ ६०
ममाऽऽश्रमसमीपे वै समेषु मरुधन्वसु । समुद्रो[2] वालुकापूर्ण उद्दालक[3] इति स्मृतः[4] ॥ ६१
देवतानामवध्यश्च महाकायो महाबलः । अन्तर्भूमि[5]गतस्तत्र वालुकान्तर्हितो महान् ॥ ६२
राक्षसस्य[6] मधोः पुत्रो धुन्धुर्नाम महासुरः[7] । शेते लोकविनाशाय तप आस्थाय दारुणम् ॥ ६३
संवत्सरस्य पर्यन्ते स निश्वासं विमुञ्चति । यदा तदा मही तत्र चलति स्म नराधिप ॥ ६४
तस्य निःश्वासवातेन रज उद्धूयते महत् । आदित्यपथमावृत्य सप्ताहं भूमिकम्पनम् ॥ ६५
सविस्फुलिङ्गं साङ्गारं सधूममतिदारुणम् । तेन तात न शक्नोमि तस्मिन्स्थातुं स्व आश्रमे ॥ ६६
तं मारय महाकायं लोकानां हितकाम्यया । लोकाः[8] स्वस्था भवन्त्वद्य तस्मिन्विनिहते त्वया ॥
त्वं हि तस्य वधायैकः समर्थः पृथिवीपते । विष्णुना च वरो दत्तो मह्यं पूर्वयुगे नृप ॥ ६८
यस्तं महासुरं रौद्रं हनिष्यति महाबलम् । तस्य त्वं वरदानेन तेजश्चाऽऽप्यापयिष्यसि ॥ ६९
न हि धुन्धुर्महातेजास्तेजसाऽल्पेन शक्यते । निर्दग्धुं पृथिवीपाल चिरं युगशतैरपि ॥ ७०
वीर्यं च सुमहत्तस्य देवैरपि दुरासदम् । स एवमुक्तो राजर्षिरुत्तङ्केन महात्मना ॥
कुवलाश्वं सुतं प्रादात्तस्मै धुन्धुनिबर्हणे ॥ ७१

बृहदश्व उवाच—

भगवन्न्यस्तशस्त्रोऽहमयं तु तनयो मम । भविष्यति द्विजश्रेष्ठ धुन्धुमारो न संशयः ॥ ७२
स तं व्यादिश्य तनयं राजर्षिर्धुन्धुमारणे । जगाम पर्वतायैव नृपतिः संशितव्रतः ॥ ७३

लोमहर्षण उवाच—

कुवलाश्वस्तु पुत्राणां शतेन सह भो द्विजाः । प्रायादुत्तङ्कसहितो धुन्धोस्तस्य निबर्हणे ॥ ७४
तमाविशत्तदा विष्णुस्तेजसा भगवान्प्रभुः । उत्तङ्कस्य नियोगाद्वै लोकानां हितकाम्यया ॥ ७५
तस्मिन्प्रयाते दुर्धर्षे दिवि शब्दो महानभूत् । एष श्रीमानवध्योऽद्य धुन्धुमारो भविष्यति ॥ ७६
दिव्यैर्गन्धैश्च माल्यैश्च[9] तं देवाः समवाकिरन् । देवदुन्दुभयश्चैव प्रणेदुर्[10]द्विजसत्तमाः ॥ ७७
स गत्वा जयतां श्रेष्ठ[11]स्तनयैः सह वीर्यवान् । समुद्रं खानयामास वालुकान्तरमव्ययम् ॥ ७८
तस्य पुत्रैः खनद्भिश्च वालुकान्तर्हितस्तदा । धुन्धुरासादितो विप्रा दिशमावृत्य पश्चिमाम् ॥ ७९
मुखजेनाग्निना क्रोधाल्लोकानुद्वर्तयन्निव । वारिसुस्राववेगेन महोदधिरिवोदये ॥ ८०
सौमस्य मुनिशार्दूला वरोर्मिकलिलो महान् । तस्य पुत्रशतं दग्धं त्रिभिरूनं तु रक्षसा ॥ ८१
ततः स राजा द्युतिमात्राक्षसं तं महाबलम् । आससाद महातेजा धुन्धुं धुन्धुविनाशनः ॥ ८२
तस्य वारिमयं वेगमापीय स नराधिपः । योगी[12] योगेन वह्निं च शमयामास वारिणा ॥ ८३
[13]निहत्य तं महाकायं बलेनोदकराक्षसम् । उत्तङ्कं दर्शयामास कृतकर्मा नराधिपः ॥ ८४
उत्तङ्कस्तु वरं प्रादात्तस्मै राज्ञे महात्मने । ददौ तस्याक्षयं वित्तं शत्रुभिश्चापराजितम् ॥ ८५

---

* इडभाव आर्षः ।

---

१ क. ख. कर्तुमिहार्ह° । २ ख. °मुद्रवा° । ३ ख. उज्जानक° । ४ ख. °तः । दैव° । ५ ख. अनुभूमि° । ६ क. °सस्तु म° । ७ ख. °रः । स तु लो° । ८ क. लोकाश्च सुखमेधन्ते त° । ९ क. ख. °श्च समन्तात्सम° । १० ख. °दुर्हि तदा भृशम् । स । ११ क. श्रेष्ठस्त° । १२ ख. योगियो° । १३ क. विशस्य । ग. निरस्य ।

धर्मे रतिं च सततं स्वर्गे वासं तथाऽक्षयम् । पुत्राणां चाक्षयाँल्लोकान्स्वर्गे ये रक्षसा हताः ॥८६
तस्य पुत्रास्त्रयः शिष्टा दृढाश्वो ज्येष्ठ उच्यते । चन्द्राश्वकपिलाश्वौ तु कनीयांसौ कुमारकौ ॥८७
धौन्धुमारेर्दृढाश्वस्य हर्यश्वश्चाऽऽत्मजः स्मृतः । हर्यश्वस्य निकुम्भोऽभूत्क्षत्रधर्मरतः सदा ॥ ८८
संहताश्वो निकुम्भस्य सुतो रणविशारदः । अकृशाश्वकृशाश्वौ तु संहताश्वसुतौ द्विजाः ॥ ८९
तस्य हैमवती कन्या सतां मता दृषद्वती । विख्याता त्रिषु लोकेषु पुत्रश्चास्याः प्रसेनजित् ॥९०
लेभे प्रसेनजिद्भार्यां गौरीं नाम पतिव्रताम् । अभिशस्ता तु सा भर्त्रा नदी वै बाहुदाऽभवत् ९१
तस्य पुत्रो महानासीद्युवनाश्वो नराधिपः । मांधाता युवनाश्वस्य त्रिलोकविजयी सुतः ॥ ९२
तस्य चैत्ररथी भार्या शशबिन्दोः सुताऽभवत् । साध्वी बिन्दुमती नाम रूपेणासदृशी भुवि॥९३
पतिव्रता च ज्येष्ठा च भ्रातॄणामयुतस्य वै । तस्यामुत्पादयामास मांधाता द्वौ सुतौ द्विजाः॥९४
पुरुकुत्सं च धर्मज्ञं मुचुकुन्दं च पार्थिवम् । पुरुकुत्ससुतस्त्वासीत्त्रसदस्युर्महीपतिः ॥ ९५
नर्मदायामथोत्पन्नः संभूतस्तस्य चाऽऽत्मजः । संभूतस्य तु दायादस्त्रिधन्वा रिपुमर्दनः ॥ ९६
राज्ञस्त्रिधन्वनस्त्वासीद्विद्वांस्त्रय्यारुणः प्रभुः । तस्य सत्यव्रतो नाम कुमारोऽभून्महाबलः ॥ ९७
परिग्रहणमन्त्राणां विघ्नं चक्रे सुदुर्मतिः । येन भार्या कृतोद्वाहा हृता चैव परस्य ह ॥ ९८
बाल्यात्कामाच्च मोहाच्च साहसाच्चापलेन च । जहार कन्यां कामार्तः कस्यचित्पुरवासिनः ॥९९
अधर्मशङ्कुना तेन तं स त्रय्यारुणोऽत्यजत् । अपध्वंसेति बहुशो वदन्क्रोधसमन्वितः ॥ १००
सोऽब्रवीत्पितरं त्यक्तः क्व गच्छामीति वै मुहुः । पिता च तमथोवाच श्वपाकैः सह वर्तय १०१
नाहं पुत्रेण पुत्रार्थी त्वयाऽद्य कुलपांसन । इत्युक्तः स निराक्रामन्नगराद्वचनात्पितुः ॥ १०२
न च तं वारयामास वसिष्ठो भगवानृषिः । स तु सत्यव्रतो विप्राः श्वपाकावसथान्तिके ॥ १०३
पित्रा त्यक्तोऽवसद्वीरः पिताऽप्यस्य वनं ययौ । ततस्तस्मिंस्तु विषये नावर्षत्पाकशासनः॥१०४
समा द्वादश भो विप्रास्तेनाधर्मेण वै तदा । दारांस्तु तस्य विषये विश्वामित्रो महातपाः ॥१०५
संन्यस्य सागरान्ते तु चकार विपुलं तपः । तस्य पत्नी गले बद्ध्वा मध्यमं पुत्रमौरसम् ॥ १०६
शेषस्य भरणार्थाय व्यक्रीणाद्गोशतेन वै । तं च बद्धं गले दृष्ट्वा विक्रयार्थं नृपात्मजः ॥ १०७
महर्षिपुत्रं धर्मात्मा मोक्षयामास भो द्विजाः । सत्यव्रतो महाबाहुर्भरणं तस्य चाकरोत् ॥ १०८
विश्वामित्रस्य तुष्ट्यर्थमनुकम्पार्थमेव च । सोऽभवद्गालवो नाम गले बन्धान्महातपाः ॥
महर्षिः कौशिको धीमांस्तेन वीरेण मोक्षितः ॥ १०९

इति श्रीमहापुराणे ब्राह्मे सूर्यवंशानिरूपणं नाम सप्तमोऽध्यायः ॥ ७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५८५

अथाष्टमोऽध्यायः ।

लोमहर्षण उवाच—

सत्यव्रतस्तु भक्त्या च कृपया च प्रतिज्ञया । विश्वामित्रकलत्रं तु बभार विनये [16]स्थितः ॥ १

---

१ ग. शिष्टाः सुदासो ज्ये° । २ क. ख. स्मृतः । ३ ख. ग. भार्या । ४ ग. तस्याः । ५ क. °ध्वी चेन्दुम° । ६ क. °भूतिस्त° । ७ क. °भूतेश्चैव दा° । ८ ख. °द्विद्वान्वस्त्रारु° । ९ ग. हता । १० ख. त्यक्त्वा । ११ ख. पातकैः । १२ ख. दुष्टेन । १३ ख. °प्राः पुरस्य स्वस्य चान्ति° । १४ ख. °णादाश° । १५ ख. भगवान्कृप° । १६ क. स्थितम् ।

हत्वा मृगान्वराहांश्च महिषांश्च वनेचरान् । विश्वामित्राश्रमाभ्याशे मांसं वृक्षे बबन्ध च ॥ २
उपांशुव्रतमास्थाय दीक्षां द्वादशवार्षिकीम् । पितुर्नियोगादवसत्तस्मिन्वनगते नृपे ॥ ३
अयोध्यां चैव राज्यं च तथैवान्तःपुरं मुनिः । याज्योपाध्यायसंयोगाद्वसिष्ठः पर्यरक्षत ॥ ४
सत्यव्रतस्तु बाल्याच्च भाविनोऽर्थस्य वै बलात् । वसिष्ठेऽभ्यधिकं मन्युं धारयामास [1]नित्यशः ५
पित्रा हि तं तदा राष्ट्रात्त्यज्यमानं प्रियं सुतम् । निवारयामास मुनिर्बहुना कारणेन न ॥ ६
पाणिग्रहणमन्त्राणां निष्ठा स्यात्सप्तमे पदे । न च सत्यव्रतस्तस्माद्धृतवान्सप्तमे पदे ॥ ७
जानन्धर्मं वसिष्ठस्तु न मां त्रातीति भो द्विजाः । सत्यव्रतस्तदा रोषं वसिष्ठे मनसाऽकरोत् ॥८
गुणबुद्ध्या तु भगवान्वसिष्ठः कृतवांस्तथा । न च सत्यव्रतस्तस्य तमुपांशुमबुध्यत ॥ ९
तस्मिन्नपरितोषश्च पितुरासीन्महात्मनः । तेन द्वादश वर्षाणि नावर्षत्पाकशासनः ॥ १०
तेन त्विदानीं विहितां दीक्षां तां दुर्वहां भुवि । कुलस्य निष्कृतिर्विप्राः कृता सा वै भवेदिति ॥
न तं वसिष्ठो भगवान्पित्रा त्यक्तं न्यवारयत् । अभिषेक्ष्याम्यहं पुत्रमस्येत्येवंमतिर्मुनिः ॥ १२
स तु द्वादश वर्षाणि तां दीक्षामवहद्बली । अविद्यमाने मांसे तु वसिष्ठस्य महात्मनः ॥ १३
सर्वकामदुघां दोग्ध्रीं स ददर्श नृपात्मजः । तां वै क्रोधाच्च मोहाच्च श्रमाच्चैव क्षुधाऽन्वि[2]तः ॥१४
देशधर्मगतो राजा [3]जघान मुनिसत्तमाः । तन्मांसं [4]स स्वयं चैव विश्वामित्रस्य चाऽऽत्मजान् १५
भोजयामास तच्छ्रुत्वा वसिष्ठोऽप्यस्य चुक्रुधे ॥ १६

वसिष्ठ उवाच—

पातयेयमहं क्रूर तव [5]शङ्कुमसंशयम् । यदि ते द्वाविमौ शङ्कू न स्यातां वै कृतौ पुनः ॥ १७
पितुश्चापरितोषेण [6]गुरुदोग्ध्रीवधेन च । अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः ॥ १८
एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महातपाः । त्रिशङ्कुरिति होवाच त्रिशङ्कुस्तेन स स्मृतः १९
विश्वामि[7]त्रस्य दाराणामनेन भरणं कृतम् । तेन त[8]स्मै वरं प्रादान्मुनिः प्रीतस्त्रिशङ्कवे ॥ २०
छन्द्यमानो वरेणाथ वरं वव्रे नृपात्मजः । सशरीरो व्रजे स्वर्गमित्येवं याचितो वरः ॥ २१
अनावृष्टिभये तस्मिन्गते द्वादशवार्षिके । पित्र्ये राज्येऽभिषिच्याथ याजयामास पार्थिवम् ॥ २२
मिषतां देवतानां च वसिष्ठस्य च कौशिकः । दिवमारोपयामास सशरीरं महातपाः ॥ २३
तस्य सत्यरथा नाम पत्नी कैकेयवंशजा । कुमारं जनयामास हरिश्चन्द्रमकल्मषम् ॥ २४
स वै राजा हरिश्चन्द्रस्त्रैशङ्कव इति स्मृतः । आहर्ता राजसूयस्य सम्राडिति ह विश्रुतः ॥ २५
हरिश्चन्द्रस्य पुत्रोऽभूद्रोहितो नाम [9]पार्थिवः । हरितो रोहितस्या[10]र्थं चञ्चुर्हारित उच्यते ॥ २६
विजयश्च मुनिश्रे[11]ष्ठाश्चञ्चुपुत्रो बभूव ह । जेता स सर्वपृथिवीं विजयस्तेन स स्मृतः ॥ २७
[12]रुरुकस्तनयस्तस्य राजा धर्मार्थकोविदः । [13]रुरुकस्य वृकः पुत्रो वृकाद्बाहुस्तु जज्ञिवान् ॥ २८
है[14]हयास्तालजङ्घाश्च निरस्यन्ति स्म तं [15]नृपम् । तत्पत्नी गर्भमादाय और्वस्याऽऽश्रममाविशत् २९
[16]नासत्यो धार्मिकश्चैव स ह धर्मयुगेऽभवत् । सगरस्तु सुतो बाहोर्यज्ञे सह गरेण वै ॥ ३०

---

१ ख. ग. नित्यदा । २ ख. °तः । हत्वा धेनुं ततो रा° । ३ ख. जगाम । ४ ख. तु । ५ ख. शङ्कुं न संशयः । य° । ६ क. ख. गुरोर्दोग्ध्रीं° । ७ क. ख. °त्रस्तु दा° । ८ क. ख. °णामागतो भरणे कृते । ततस्तस्मै । ९ क. धार्मिकः । १० ख. °थ चुञ्चुर्हा° । ११ ख. °ष्ठाश्चुञ्चुपु° । १२ ख. रुरुक° । १३ ख. रुरुक° । १४ ग. °हयाः काल° । १५ क. ख. नृपाः । १६ ग. नात्यर्थं ।

और्वस्याऽऽश्रममासाद्य भार्गवेणाभिरक्षितः । आग्नेयमस्त्रं लब्ध्वा च भार्गवात्सगरो नृपः ॥ ३१
जिगाय पृथिवीं हत्वा तालजङ्घान्सहैहयान् । शकानां पह्लवानां च धर्मं निरसदच्युतः ॥
क्षत्रियाणां मुनिश्रेष्ठाः पारदानां च धर्मवित् ॥ ३२

मुनय ऊचुः—

कथं स सगरो जातो गरेणैव सहाच्युतः । किमर्थं च शकादीनां क्षत्रियाणां महौजसाम् ॥ ३३
धर्मान्कुलोचितान्राजा क्रुद्धो निरसदच्युतः । एतन्नः सर्वमाचक्ष्व विस्तरेण महामते ॥ ३४

लोमहर्षण उवाच—

बाहोर्व्यसनिनः पूर्वं हृतं राज्यमभूत्किल । हैहयैस्तालजङ्घैश्च शकैः सार्धं द्विजोत्तमाः ॥ ३५
यवनाः पारदाश्चैव काम्बोजाः पह्लवास्तथा । एते ह्यपि गणाः पञ्च हैहयार्थे पराक्रमन् ॥ ३६
हृतराज्यस्तदा राजा स वै बाहुर्वनं ययौ । पत्न्या चानुगतो दुःखी तत्र प्राणानवासृजत् ॥ ३७
पत्नी तु यादवी तस्य सगर्भा पृष्ठतोऽन्वगात् । सपत्न्या च गरस्तस्यै दत्तः पूर्वं किलानघाः ३८
सा तु भर्तुश्चितां कृत्वा वने तामभ्यरोहत । और्वस्तां भार्गवो विप्राः कारुण्यात्समवारयत्॥३९
तस्याऽऽश्रमे च गर्भः स गरेणैव सहाच्युतः । व्यजायत महाबाहुः सगरो नाम पार्थिवः ॥४०
और्वस्तु जातकर्मादींस्तस्य कृत्वा महात्मनः । अध्याप्य वेदशास्त्राणि ततोऽस्त्रं प्रत्यपादयत्॥४१
आग्नेयं तु महाभागा अमरैरपि दुःसहम् । स तेनास्त्रबलेनाऽऽजौ बलेन च समन्वितः ॥ ४२
हैहयान्विजघानाऽऽशु क्रुद्धो रुद्रः पशूनिव । आजहार च लोकेषु कीर्तिं कीर्तिमतां वरः ॥ ४३
ततः शकांश्च यवनान्काम्बोजान्पारदांस्तथा । पह्लवांश्चैव निःशेषान्कर्तुं व्यवसितो नृपः ॥ ४४
ते वध्यमाना वीरेण सगरेण महात्मना । वसिष्ठं शरणं गत्वा प्रणिपेतुर्मनीषिणम् ॥ ४५
वसिष्ठस्त्वथ तान्दृष्ट्वा समयेन महाद्युतिः । सगरं वारयामास तेषां दत्त्वाऽभयं तदा ॥ ४६
सगरः स्वां प्रतिज्ञां तु गुरोर्वाक्यं निशम्य च । धर्मं जघान तेषां वै वेषानन्यांश्चकार ह ॥ ४७
अर्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत् । यवनानां शिरः सर्वं काम्बोजानां तथैव च॥४८
पारदा मुक्तकेशाश्च पह्लवाञ्श्मश्रुधारिणः । निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना ॥४९
शका यवनकाम्बोजाः पारदाश्च द्विजोत्तमाः । कोणिसर्पा माहिषका दर्वाश्चोलाः सकेरलाः ५०
सर्वे ते क्षत्रिया विप्रा धर्मस्तेषां निराकृतः । वसिष्ठवचनाद्राज्ञा सगरेण महात्मना ॥ ५१
स धर्मविजयी राजा विजित्येमां वसुंधराम् । अश्वं प्रचारयामास वाजिमेधाय दीक्षितः ॥ ५२
तस्य चारयतः सोऽश्वः समुद्रे पूर्वदक्षिणे । वेलासमीपेऽपहृतो भूमिं चैव प्रवेशितः ॥ ५३
स तं देशं तदा पुत्रैः खानयामास पार्थिवः । आसेदुस्ते तदा तत्र खन्यमाने महार्णवे ॥ ५४
तमादिपुरुषं देवं हरिं कृष्णं प्रजापतिम् । विष्णुं कपिलरूपेण स्वपन्तं पुरुषं तदा ॥ ५५
तस्य चक्षुःसमुत्थेन तेजसा प्रतिबुध्यतः । दग्धाः सर्वे मुनिश्रेष्ठाश्चत्वारस्त्ववशेषिताः ॥ ५६
बर्हिकेतुः सुकेतुश्च तथा धर्मरथो नृपः । शूरः पञ्चनदश्चैव तस्य वंशकरा नृपाः ॥ ५७

---

१ ख. °मध्यरो° । २ ख. °व । लेभे सदा स लो° । ३ ख. यशः । ४ ख. तदा स य° । ५ ख. °नान्राजा काम्बो° । ६ ख. °गरस्तां प्र° । ७ क. °माः । केलिसर्गा महाषीका और्वाश्चौडाः स° । ख. °माः । केलसर्गा माहिषदा द्वाश्चोलाश्च स° । ८ क. ख. कृतास्त्रेण । ९ क. ख. स्वयंभूं । १० ख. ग. बर्हके° । ११ क. बर्हिरथो । ख. बार्हद्रथो । १२ ख. ग. खरः । १३ क. °ञ्जनश्चै° । १४ ख. °करोऽभवत् । प्रा° ।

प्रादाच्च तस्मै भगवान्हरिर्नारायणो वरम् । अक्षयं वंशमिक्ष्वाकोः कीर्तिं चाप्यनिवर्तिनीम्॥ ५८
पुत्रं समुद्रं च विभुः स्वर्गे वासं तथाऽक्षयम् । समुद्रश्चार्घमादाय ववन्दे तं महीपतिम् ॥ ५९
सागरत्वं च लेभे स कर्मणा तेन तस्य ह । तं चाऽऽश्वमेधिकं सोऽश्वं समुद्रादुपलब्धवान् ॥ ६०
आजहाराश्वमेधानां शतं स सुमहा[1]तपाः । पुत्राणां च सहस्राणि षष्टिस्तस्येति नः श्रुतम् ॥ ६१

मुनय ऊचुः—

सगरस्याऽऽत्मजा वीराः कथं जाता महाबलाः । विक्रान्ताः षष्टिसाहस्रा विधिना केन स[2]त्तम॥

लोमहर्षण उवाच—

द्वे भार्ये सगरस्याऽऽस्तां तपसा दग्धकिल्बिषे । ज्येष्ठा विदर्भदुहिता केशिनी नाम नामतः॥ ६३
कनीयसी तु महती पत्नी परमधर्मिणी । अरिष्टनेमिदुहिता रूपेणाप्रतिमा भुवि ॥ ६४
औ[3]र्वस्ताभ्यां वरं प्रादात्तद्बुध्यध्वं द्विजोत्तमाः । षष्टिं पुत्रसहस्राणि गृह्णात्वेका नितम्बिनी ६५
एकं वंशधरं त्वेका यथेष्टं वरयत्विति । तत्रैका जगृहे पुत्रा[4]न्षष्टिसाहस्रसंमितान् ॥ ६६
एकं वंशधरं त्वेका तथेत्याह ततो मुनिः । राजा पञ्चजनो नाम बभूव स महाद्युतिः ॥ ६७
इतरा सुषुवे तुम्बीं बीजपूर्णामिति श्रुतिः । तत्र षष्टिसहस्राणि गर्भास्ते तिलसंमिताः ॥ ६८
संबभूवुर्यथाकालं ववृधुश्च यथासुखम् । घृतपूर्णेषु कुम्भेषु तान्गर्भान्निदधे ततः ॥ ६९
धात्रीश्चैकैकशः प्रादात्तावतीः पोषणे नृपः । [5]ततो दशसु मासेषु समुत्तस्थुर्यथाक्रमम् ॥ ७०
कुमारास्ते यथाकालं सगरप्रीतिवर्धनाः । [*षष्टिपुत्रसहस्राणि तस्यैवमभवन्द्विजाः ॥ ७१
गर्भादलाबूमध्याद्वै जातानि पृथिवीपतेः । तेषां नारायणं तेजः प्रविष्टानां महात्मनाम्] ॥ ७२
एकः पञ्चजनो नाम पुत्रो राजा बभूव ह । [6]शूरः पञ्चजनस्याऽऽसी[7]दंशुमान्नाम वीर्यवान् ॥ ७३
दिलीपस्तस्य तनयः खट्वाङ्ग इति विश्रुतः । येन स्वर्गादिहाऽऽगत्य मुहूर्तं प्राप्य जीवितम्[8] ॥७४
[9]त्रयोऽभिसंधिता लोका बुद्ध्या सत्येन चानघाः। दिलीपस्य तु दायादो [10]महाराजो भगीर[11]थः ॥
यः स गङ्गां सरिच्छ्रेष्ठामवातारयत प्रभुः । समुद्रमानयच्चैनां दुहितृत्वेऽप्यकल्पयत् ॥ ७६
तस्माद्भागीरथी गङ्गा कथ्यते [12]वंशचिन्तकैः । भगीरथसुतो राजा श्रुत इत्यभिविश्रुतः ॥ ७७
नाभागस्तु श्रुतस्याऽऽसीत्पुत्रः परमधार्मिकः । अम्बरीषस्तु नाभागिः सिन्धुद्वीपपिताऽभवत्७८
अयुताजित्तु दायादः सिन्धुद्वीपस्य वीर्यवान् । अयुताजित्सुतस्त्वासीदृतुपर्णो महायशाः ॥ ७९
दिव्याक्षहृदयज्ञो वै राजा नलसखो बली । ऋतुप[13]र्णसुतस्त्वासीदार्तपर्णिर्महायशाः ॥ ८०
सुदासस्तस्य तनयो राजा इन्द्रसखोऽभवत् । सुदासस्य सुतः प्रोक्तः सौदासो नाम पार्थिवः ॥
ख्यातः कल्माषपा[14]दो वै राजा मित्रसहोऽभवत् । कल्माषपादस्य सुतः सर्वकर्मेति विश्रुतः ॥८२
अनरण्यस्तु पुत्रोऽभूद्विश्रुतः सर्वकर्मणः । अनरण्यसुतो निघ्नो निघ्नतो द्वौ बभूवतुः ॥ ८३
अनमित्रो रघुश्चैव पार्थिवर्षभसत्तमौ । अनमित्रसुतो राजा विद्वा[15]न्दुलिदुहोऽभवत् ॥ ८४

---

* धनुश्चिह्नान्तर्गतः पाठः क. पुस्तके नास्ति ।

---

१ क. ख. °हायशाः । पु° । २ क. ख. सुतज । ३ ख. तपस्विनी । ग. तरस्विनी । ४ ग. °त्राऽऽर्ष्याञ्शूरान्बहूंस्तथा । ए° । ५ क. ततोऽथ दशमे मासे स° । ६ ख. सुतः । ७ क. °सीद्रगुमा° । ८ क. °म् । ततो भि° । ९ ख. °भिवन्दिता । १० ग. महारथो । ११ क. °थः । स्वर्गात्स तु स° । १२ क. धर्मचिन्तकैः । १३ ख. °र्णस्य तस्याऽऽर्सा° । १४ ग. °दोऽभून्नाम्ना मि° । १५ क. °न्दुहितृहो° ।

दिलीपस्तनयस्तस्य रामस्य प्रपितामहः । दीर्घबाहुर्दिलीपस्य रघुर्नाम्ना सुतोऽभवत् ॥ ८५
अयोध्यायां महाराजो[1] यः पुराऽऽसीन्महाबलः । अजस्तु राघवो जज्ञे तथा[2] दशरथोऽप्यजात् ॥
रामो दशरथाज्जज्ञे धर्मात्मा सुमहायशाः । रामस्य तनयो जज्ञे कुश इत्यभिसंज्ञितः ॥ ८७
अतिथिस्तु कुशाज्जज्ञे धर्मात्मा सुमहायशाः । अतिथेस्त्वभवत्पुत्रो निषधो नाम वीर्यवान् ॥८८
निषधस्य नलः पुत्रो नभः पुत्रो नलस्य तु । नभस्य[3] पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः ॥ ८९
क्षेमधन्वसुतस्त्वासीद्देवानीकः प्रतापवान् । आसीदहीनगुर्नाम देवानीकात्मजः प्रभुः ॥ ९०
अहीनगोस्तु दायादः सुधन्वा नाम पार्थिवः । सुधन्वनः सुतश्चापि ततो जज्ञे शलो नृपः ॥ ९१
उक्थो नाम स धर्मात्मा शलपुत्रो बभूव ह । वज्रनाभः सुतस्तस्य नलस्तस्य महात्मनः ॥ ९२
नलौ द्वावेव विख्यातौ पुराणे मुनिसत्तमाः । वीरसेनात्मजश्चैव यश्चेक्ष्वाकुकुलोद्वहः ॥ ९३
इक्ष्वाकुवंशप्रभवाः प्राधान्येन प्रकीर्तिताः । एते विवस्वतो वंशे राजानो भूरितेजसः ॥ ९४
पठन्सम्यगिमां सृष्टिमादित्यस्य विवस्वतः । श्राद्धदेवस्य [4]देवस्य प्रजानां पुष्टिदस्य च ॥
प्रजावानेति सायुज्यमादित्यस्य विवस्वतः ॥ ९५

इति श्रीमहापुराणे ब्राह्म आदित्यवंशानुकीर्तनं नामाष्टमोऽध्यायः ॥ ८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६८०

अथ नवमोऽध्यायः ।

लोमहर्षण उवाच—

पिता सोमस्य भो विप्रा जज्ञेऽत्रिर्भगवानृषिः । ब्रह्मणो मानसात्पूर्वं प्रजासर्गं विधित्सतः ॥ १
अनुत्तरं नाम तपो येन तप्तं[5] हि तत्पुरा । त्रीणि वर्षसहस्राणि दिव्यानीति हि नः श्रुतम् ॥ २
ऊर्ध्वमाचक्रमे तस्य रेतः सोमत्वमीयिवत् । नेत्राभ्यां वारि सुस्राव दशधा द्योतयन्दिशः ॥ ३
तं गर्भं विधिनाऽऽदिष्टा दश देव्यो दधुस्ततः । समेत्य धारयामासुर्न च ताः समशक्नुवन् ॥ ४
यदा न धारणे शक्तास्[6]तस्य गर्भस्य ता दिशः । ततस्ताभिः स[7] त्यक्तस्तु निपपात वसुंधराम् ॥ ५
पतितं सोममालोक्य ब्रह्मा लोकपितामहः । रथमारोपयामास लोकानां हितकाम्यया ॥ ६
तस्मिन्निपतिते देवाः[8] पुत्रेऽत्रेः[9] परमात्मनि । तुष्टुवुर्ब्रह्मणः पुत्रास्तथाऽ[10]न्ये मुनिसत्तमाः ॥ ७
तस्य संस्तूयमानस्य तेजः सोमस्य भास्वतः । आप्यायनाय लोकानां भावयामास सर्वतः ॥ ८
स तेन रथमुख्येन सागरान्तां वसुंधराम् । त्रिःसप्तकृत्वोऽतियशाश्चकाराभिप्रदक्षिणाम् ॥ ९
तस्य [11]यच्चरितं तेजः पृथिवी[12]मन्वपद्यत । ओषध्यस्ताः समुद्भूता याभिः संधार्यते जगत् ॥ १०
स लब्धतेजा भगवान्संस्तवैश्च स्वकर्मभिः । तपस्तेपे महाभागः पद्मानां [13]दर्शनाय सः ॥ ११
ततस्तस्मै ददौ राज्यं ब्रह्मा ब्रह्मविदां वरः । बीजौ[14]षधीनां विप्राणामपां च मुनिसत्तमाः ॥ १२
स तत्प्राप्य महाराज्यं सोमः सौम्यवतां वरः । समाजह्रे राजसूयं सहस्रशतदक्षिणम् ॥ १३

---

१ ख. °जो रघुरासी° । २ ख. तस्माद्दशरथोऽभवत् । ३ ख. नभसः । ४ ख. वीरस्य । ५ ख. °सं महत्पु° । ६ ख. °क्तास्ता गर्भस्य दिशो दश । त° । ७ ग. सहैवाऽऽशु नि° । ८ ख. देवे । ९ ख. °त्रे च सुमहात्म° । १० ख. °था ते मु° । ११ क. यत्स्नावितं । ख. यद्ध्याधितं । १२ ख. °थिवीं समप° । १३ ग. दशतीर्दश । त° । १४ क. °नां राजानं निर्ममे मु° ।

दक्षिणामददात्सोमस्त्रीँल्लोकानिति नः श्रुतम् । तेभ्यो ब्रह्मर्षिमुख्येभ्यः सदस्येभ्यश्च भो द्विजाः
हिरण्यगर्भो ब्रह्माऽत्रिर्भृगुश्च ऋत्विजोऽभवत् । सदस्योऽभूद्धरिस्तत्र मुनिभिर्बहुभिर्वृतः ॥ १५
तं सिनीश्च कुहूश्चैव द्युतिः पुष्टिः प्रभा वसुः । कीर्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे ॥ १६
*प्राप्यावभृथमप्यग्र्यं सर्वदेवर्षिपूजितः । विरराजाधिराजेन्द्रो दशधा भासयन्दिशः ॥ १७
तस्य तत्प्राप्य दुष्प्राप्यमैश्वर्यमृषिसत्कृतम् । विबभ्राम मतिस्ताताविनयादनयाहृता ॥ १८
बृहस्पतेः स वै भार्यामैश्वर्यमदमोहितः । जहार तरसा सोमो विमत्याङ्गिरसः सुतम् ॥ १९
स याच्यमानो देवैश्च [1]तथा देव[2]र्षिभिर्मुहुः । नैव व्यसर्जयत्तारां [3]तस्मा अङ्गिरसे तदा ॥ २०
उशना तस्य जग्राह पार्ष्णिमङ्गिरसस्तथा । रुद्रश्च पार्ष्णि जग्राह गृहीत्वाऽजगवं धनुः ॥ २१
तेन ब्रह्मशिरो नाम परमास्त्रं महात्मना । उद्दिश्य देवानुत्सृ[4]ष्टं येनैषां नाशितं यशः ॥ २२
तत्र तद्युद्धमभवत्प्रख्यातं तारकामयम् । +देवानां दानवानां च लोकक्षयकरं महत् ॥ २३
†तत्र शिष्टास्तु ये देवास्तुषिताश्चैव ये द्विजाः । ब्रह्माणं शरणं जग्मुरादिदेवं सनातनम् ॥ २४
तदा निवार्योशनसं तं वै रुद्रं च शंकरम् । ददावङ्गिरसे तारां स्वयमेव पितामहः ॥ २५
तामन्तःप्रसवां दृष्ट्वा क्रुद्धः प्राह बृहस्पतिः । मदीयायां न ते योनौ गर्भो धार्यः कथंचन ॥ २६
इषीकास्तम्बमासाद्य गर्भं सा चोत्ससर्ज ह । जातमात्रः स भगवान्देवानामाक्षिपद्वपुः ॥ २७
ततः संशयमापन्नास्तारामूचुः सुरोत्तमाः । सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः ॥ २८
पृच्छ्यमाना यदा देवैर्नाऽऽह सा विबुधान्किल । तदा तां शप्तुमारब्धः कुमारो [5]दस्युहन्तमः २९
तं निवार्य ततो ब्रह्मा तारां पप्रच्छ संशयम् । यदत्र तथ्यं तद्ब्रूहि तारे कस्य सुतस्त्वयम् ॥ ३०
उवाच प्राञ्जलिः सा तं सोमस्येति पितामहम् । तदा तं मूर्ध्नि चाऽऽघ्राय सोमो रा[6]जा सुतं प्रति
बुध इत्यकरोन्नाम तस्य बालस्य धीमतः । प्रतिकूलं च गगने समभ्युत्तिष्ठते बुधः ॥ ३२
उत्पादयामास तदा पु[7]त्रं वैराजपुत्रिकम् । तस्यापत्यं महातेजा बभूवैलः पुरूरवाः ॥ ३३
उर्वश्यां जज्ञिरे यस्य पुत्राः सप्त महात्मनः । एतत्सोमस्य वो जन्म कीर्तितं कीर्तिवर्धनम् ॥ ३४
वंशमस्य मुनिश्रेष्ठाः कीर्त्यमानं निबोधत । धन्यमायुष्यमारोग्यं पुण्यं संकल्पसाधनम् ॥ ३५
सोमस्य जन्म श्रुत्वैव पापेभ्यो विप्रमुच्यते ॥ ३६

इति श्रीमहापुराणे ब्राह्मे सोमोत्पत्तिकथनं नाम नवमोऽध्यायः ॥ ९ ॥

श्लोकानामादितः समष्ट्यङ्काः—७१६

अथ दशमोऽध्यायः ।

लोमहर्षण उवाच—

बुधस्य तु मुनिश्रेष्ठा विद्वान्पुत्रः पुरूरवाः । तेजस्वी दानशीलश्च यज्वा विपुलदक्षिणः ॥ १

---

* एतदादिश्लोकद्वयं क. ग. पुस्तकयोर्नास्ति । + एतदर्धं ख. पुस्तके नास्ति । † अयं श्लोकः ख. ग. पुस्तकयोर्नास्ति ।

---

१ ग. तदा । २ क. ग. °र्षिभिः सह । नै° । ३ ख. तस्यैवाङ्गिरसस्तदा । ४ ख. °ष्टं तेषां नाशाय शंभुना । त° । ५ क. ख. मुनिसत्तमाः । ६ क. ग. °जा प्रजापतिः । बु° । ७ ख. °त्रिकः । त° ।

ब्रह्मवादी पराक्रान्तः [1]शत्रुभिर्युधि दुर्दमः । आहर्ता चाग्निहोत्रस्य [2]यज्ञानां च महीपतिः ॥ २
सत्यवादी पुण्यमतिः [3]सम्यक्संवृतमैथुनः । अतीव त्रिषु लोकेषु यशसाऽप्रति[4]मः [5]सदा ॥ ३
तं ब्रह्मवादिनं शान्तं धर्मज्ञं सत्यवादिनम् । उर्वशी वरयामास हित्वा मानं [6]यशस्विनी ॥ ४
तया सहावसद्राजा दश वर्षाणि पञ्च च । षट्पञ्च सप्त [7]चाष्टौ च दश [8]चाष्टौ च भो द्विजाः॥ ५
वने चैत्ररथे रम्ये [9]तथा मन्दाकिनीतटे । अलकायां विशालायां नन्दने च वनोत्तमे ॥ ६
उत्तरान्स कुरून्प्राप्य [10]मनोरमफलद्रुमान् । गन्धमादनपादेषु [11]मेरुशृङ्गे तथोत्तरे ॥ ७
एतेषु वनमुख्येषु सुरैराचरितेषु च । उर्वश्या सहितो राजा रेमे परमया मुदा ॥ ८
देशे पुण्यतमे चैव महर्षिभिरभिष्टुते । राज्यं स कारयामास प्रयागे पृथिवीपतिः ॥ ९
एवंप्रभावो राजाऽऽसीदैलस्तु नरसत्तमः । [*उत्तरे जाह्नवीतीरे प्रतिष्ठाने महायशाः] ॥ १०

लोमहर्षण उवाच—

ऐलपुत्रा [12]बभूवुस्ते [13]सप्त [14]देवसुतोपमाः । गन्धर्वलोके विदिता [15]आयुर्धीमानमावसुः ॥ ११
विश्वायुश्चैव [16]धर्मात्मा श्रुतायुश्च तथाऽपरः । दृढायुश्च [17]वनायुश्च बह्वायुश्चोर्वशीसुताः ॥ १२
अमावसोस्तु दायादो भीमो [18]राजर्षोऽथ राजराट् । श्रीमान्भीमस्य दायादो राजाऽऽसीत्काञ्चन-[19]प्रभः ॥ १३
विद्वांस्तु काञ्चनस्यापि सुहोत्रोऽभून्महाबलः । सुहोत्रस्याभ[20]वज्जह्नुः केशिन्या गर्भसंभवः ॥ १४
आजह्रे यो [21]महत्सत्रं सर्पमेधं महामखम् । पतिलोभेन यं गङ्गा पतित्वेन ससार ह ॥ १५
नेच्छतः प्लावयामास तस्य [22]गङ्गा तदा सदः । स तया प्लावितं दृष्ट्वा यज्ञवाटं समन्ततः ॥ १६
[23]सौहोत्रिरशपद्गङ्गां क्रुद्धो राजा द्विजोत्तमाः । एष [24]ते विफलं [25]यत्नं पिबन्नम्भः करोम्यहम् ॥ १७
अस्य गङ्गेऽ[26]वलेपस्य सद्यः फलमवाप्नुहि । जह्नुराजर्षिणा पीतां गङ्गां दृष्ट्वा महर्षयः ॥ १८
उपनिन्युर्महा[27]भागां दुहितृत्वेन [29]जाह्नवीम् । युवनाश्वस्य पुत्रीं तु कावेरीं जह्नुराव[28]हत् ॥ १९
युवनाश्वस्य शापेन गङ्गार्धेन विनिर्गता । कावेरीं सरितां श्रेष्ठां जह्नोर्भार्यामनिन्दिताम् ॥ २०
जह्नुस्तु दयितं पुत्रं [30]सुनद्यं नाम धार्मिकम् । कावेर्यां जनयामास [31]अजकस्तस्य चाऽऽत्मजः॥२१
[32]अजकस्य तु दायादो बलाकाश्वो महीपतिः । बभूव मृगयाशीलः कुशस्तस्याऽऽत्मजोऽभवत् २२
कुशपुत्रा बभूवुर्हि चत्वारो देववर्चसः । कुशिकः कुशनाभश्च [33]कुशाम्बो मूर्तिमांस्त[34]था ॥ २३
बल्लवैः सह संवृद्धो राजा वनचरः सदा । कुशिकस्तु तपस्तेपे पुत्रमिन्द्रसमं [35]प्रभुः ॥ २४

---

* एतच्चिह्नान्तर्गतः पाठः ख. पुस्तके न ।

---

१ ख. शत्रूणां युधि दुर्जयः । २ ख. सुभक्त्या । ३ क. °म्यग्निभृत° । ४ क. °तिमो युधि । तं । ५ ख. °दा । विश्वं हि ब्रह्मंस्ततस्य कर्मापि विलयं गतम् । उर्वशीं व° । ६ ख. °नीम् । त° । ७ ख. वाऽष्टौ । ८ ख. वाऽष्टौ । ९ क. देशे । ख. तदा । १० ग. °रथफ° । ११ क. °रुपृष्ठान्तरेषु च । ए° । १२ ख. °स्ते स्मरदे° । १३ क. सर्वे । १४ ख. °माः । दिवि जाता महात्मान आ° । १५ ख. °मान्विभाव° । १६ क. °र्मायुरनायु° । १७ क. °श्च सर्वे चैवोर्व° । ख. °श्च सुतायु° १८ क °जा स रा° । ख. °जाऽधिरा° । १९ ग. °प्रभुः । वि° । २० ख. °वत्पुत्रो जह्नुर्वै नाम नामतः । आ° । २१ ख. °त्रं पूर्वमेव म° । २२ ग. °ङ्गा च तत्सदः । २३ क. °रवदद्ग° । २४ क. ते त्रिषु लोकेषु संक्षिप्यापः पिबाम्य° । २५ ग. जन्म । २६ ख. °ङ्गेऽनयस्यापि स° । २७ क. ख. °भागा दु° । २८ क. °त् । गङ्गाशापेन देहार्धे नदीं पश्चाद्विनिर्ममे । का° । २९ ग. °निर्मिते । का° । ३० क. महान्तं । ३१ क. अजक° । ३२ क. अजक° । ३३ ख. °शाश्वान्मूर्ति° । ग. °शाश्वो मू° । ३४ ख. °था । पह्लवैः स निराकामद्राजा । ३५ ख. प्रभुम् ।

लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान् । पूर्णे वर्षसहस्रे वै ततः शक्रो ह्यपश्यत ॥ २५
अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरंदरः । समर्थः पुत्रजनने स्वयमेवास्य शाश्वतः ॥ २६
पुत्रार्थं कल्पयामास देवेन्द्रः सुरसत्तमः । स गाधिरभवद्राजा मघवान्कौशिकः स्वयम् ॥ २७
पौरा यस्याभवद्भार्या गाधिस्तस्यामजायत । गाधेः कन्या महाभागा नाम्ना सत्यवती शुभा २८
तां गाधिः काव्यपुत्राय ऋचीकाय ददौ प्रभुः । तस्याः प्रीतः स वै भर्ता भार्गवो भृगुनन्दनः ॥
पुत्रार्थं साधयामास चरुं गाधेस्तथैव च । उवाचाऽऽहूय तां भार्यामृचीको भार्गवस्तदा ॥ ३०
उपयोज्यश्चरुरयं त्वया मात्रा स्वयं शुभे । तस्यां जनिष्यते पुत्रो दीप्तिमान्क्षत्रियर्षभः ॥ ३१
*अजेयः क्षत्रियैर्लोके क्षत्रियर्षभसूदनः । तवापि पुत्रं कल्याणि धृतिमन्तं तपोधनम् ॥ ३२
शमात्मकं द्विजश्रेष्ठं चरुरेष विधास्यति । एवमुक्त्वा तु तां भार्यामृचीको भृगुनन्दनः ॥ ३३
तपस्यभिरतो नित्यमरण्यं प्रविवेश ह । गाधिः सदारस्तु तदा ऋचीकाश्रममभ्यगात् ॥ ३४
तीर्थयात्राप्रसङ्गेन सुतां द्रष्टुं नरेश्वरः । चरुद्वयं गृहीत्वा सा ऋषेः सत्यवती तदा ॥ ३५
चरुमादाय यत्नेन सा तु मात्रे न्यवेदयत् । माता तु तस्या दैवेन दुहित्रे स्वं चरुं ददौ ॥ ३६
तस्याश्चरुमथाज्ञानादात्मसंस्थं चकार ह । अथ सत्यवती सर्वं क्षत्रियान्तकरं तदा ॥ ३७
धारयामास दीप्तेन वपुषा घोरदर्शना । तामृचीकस्ततो दृष्ट्वा योगेनाभ्युपसृत्य च ॥ ३८
ततोऽब्रवीद्द्विजश्रेष्ठः स्वां भार्यां वरवर्णिनीम् । मात्राऽसि वञ्चिता भद्रे चरुव्यत्यासहेतुना॥ ३९
जनिष्यति हि पुत्रस्ते क्रूरकर्माऽतिदारुणः । भ्राता जनिष्यते चापि ब्रह्मभूतस्तपोधनः ॥ ४०
विश्वं हि ब्रह्म तपसा मया तस्मिन्समर्पितम् । एवमुक्ता महाभागा भर्त्रा सत्यवती तदा ॥ ४१
प्रसादयामास पतिं पुत्रो मे नेदृशो भवेत् । ब्राह्मणापसदस्त्वत्त इत्युक्तो मुनिरब्रवीत् ॥ ४२

ऋचीक उवाच—

नैष संकल्पितः कामो मया भद्रे तथाऽस्त्विति । उग्रकर्मा भवेत्पुत्रः पितुर्मातुश्च कारणात् ॥ ४३
पुनः सत्यवती वाक्यमेवमुक्त्वाऽब्रवीदिदम् । इच्छँल्लोकानपि मुने सृजेथाः किं पुनः सुतम् ४४
शमात्मकमृजुं त्वं मे पुत्रं दातुमिहार्हसि । काममेवंविधः पौत्रो मम स्यात्तव च प्रभो ॥ ४५
यद्यन्यथा न शक्यं वै कर्तुमेतद्द्विजोत्तम । ततः प्रसादमकरोत्स तस्यास्तपसो बलात् ॥ ४६
पुत्रे नास्ति विशेषो मे पौत्रे वा वरवर्णिनि । त्वया यथोक्तं वचनं तथा भद्रे भविष्यति ॥ ४७
ततः सत्यवती पुत्रं जनयामास भार्गवम् । तपस्यभिरतं दान्तं जमदग्निं समात्मकम् ॥ ४८
भृगोर्जगत्यां वंशेऽस्मिञ्जमदग्निरजायत । सा हि सत्यवती पुण्या सत्यधर्मपरायणा ॥ ४९
कौशिकीति समाख्याता प्रवृत्तेयं महानदी । इक्ष्वाकुवंशप्रभवो रेणुर्नाम नराधिपः ॥ ५०
तस्य कन्या महाभागा कामली नाम रेणुका । रेणुकायां तु कामल्यां तपोविद्यासमन्वितः ॥५१
आर्चीको जनयामास जामदग्न्यं सुदारुणम् । सर्वविद्यान्तगं श्रेष्ठं धनुर्वेदस्य पारगम् ॥ ५२

* एतदर्धं ग. पुस्तके नास्ति ।

१ ख. पूर्णैर्वर्षसहस्रैस्तु त° । २ क. पौरकुत्साऽभ° । ३ ख. °भ्ययात् । ४ क. चरुं विप्रा गृहीतं तमृषेः । ५ क. °दा । विपर्ययात्तदा तं वै सा । ६ क. ख. तदभेदेन । ७ क. °ज्ञात्वा आत्म° । ८ ख. हि तपसा ब्रह्म म° । ९ क. °त् । न स सं° । १० ग. पुत्रो । ११ क. ख. भद्रे । १२ क. °गोश्चरुविपर्यासे जम° । ग. °गोश्चरुविपर्यासे रौद्रवैष्णवयोः पुरा । यजनाद्वैष्णवे चांशे जम° । १३ क. ख. °द्यानुगश्रे° ।

रामं क्षत्रियहन्तारं प्रदीप्तमिव पावकम् । और्वस्यैवं(?)मृचीकस्य सत्यवत्यां महायशाः ॥ ५३
जमदग्निस्तपोवीर्याज्जज्ञे ब्रह्मविदां वरः । मध्यमश्च शुनःशेफः शुनःपुच्छः कनिष्ठकः ॥ ५४
विश्वामित्रं तु दायादं गाधिः कुशिकनन्दनः । जनयामास पुत्रं तु तपोविद्याशमात्मकम् ॥ ५५
प्राप्य ब्रह्मर्षिसमतां योऽयं ब्रह्मर्षितां गतः । विश्वामित्रस्तु धर्मात्मा नाम्ना विश्वरथः स्मृतः ५६
जज्ञे भृगुप्रसादेन कौशिकाद्वंशवर्धनः । विश्वामित्रस्य च सुता देवरातादयः स्मृताः ॥ ५७
प्रख्यातास्त्रिषु लोकेषु तेषां नामान्यतःपरम् । देवरातः कतिश्चैव यस्मात्कात्यायनाः स्मृताः ५८
शालावत्यां हिरण्याक्षो रेणुर्जज्ञेऽथ रेणुकः । सांकृतिर्गालवश्चैवं मुद्गलश्चैव विश्रुतः ॥ ५९
मधुच्छन्दो जयश्चैव देवलश्च तथाऽष्टकः । कच्छपो हारितश्चैव विश्वामित्रस्य ते सुताः ॥ ६०
तेषां ख्यातानि गोत्राणि कौशिकानां महात्मनाम् । पाणिनो बभ्रवश्चैव ध्यानजप्यास्तथैव च ॥
पार्थिवा देवराताश्च शालङ्कायनबाष्कलाः । लोहिता यमदूताश्च तथा कारूषकाः स्मृताः* ॥६२
पौरवस्य मुनिश्रेष्ठा ब्रह्मर्षेः कौशिकस्य च । संबन्धोऽप्यस्य वंशेऽस्मिन्ब्रह्मक्षत्रस्य विश्रुतः ॥६३
विश्वामित्रात्मजानां तु शुनःशेफोऽग्रजः स्मृतः । भार्गवः कौशिकत्वं हि प्राप्तः स मुनिसत्तमः ॥
विश्वामित्रस्य पुत्रस्तु शुनःशेफोऽभवत्किल । हरिदश्वस्य यज्ञे तु पशुत्वे विनियोजितः ॥ ६५
देवैर्दत्तः शुनःशेफो विश्वामित्राय वै पुनः । देवैर्दत्तः स वै यस्माद्देवरातस्ततोऽभवत् ॥ ६६
देवरातादयः सप्त विश्वामित्रस्य वै सुताः । दृषद्वतीसुतश्चापि वैश्वामित्रस्तथाऽष्टकः ॥ ६७
अष्टकस्य सुतो लौहिः प्रोक्तो जह्नुगणो मया । अत ऊर्ध्वं प्रवक्ष्यामि वंशमायोर्महात्मनः ॥६८

इति श्रीमहापुराणे आदिब्राह्मे सोमवंशेऽमावसुवंशानुकीर्तनं नाम दशमोऽध्यायः ॥ १० ॥

आदितः श्लोकानां समष्ट्यङ्काः—७८४

अथैकादशोऽध्यायः ।

लोमहर्षण उवाच—

आयोः पुत्राश्च ते पञ्च सर्वे वीरा महारथाः । स्वर्भानुतनयायां च प्रभायां जज्ञिरे नृपाः ॥ १
नहुषः प्रथमं जज्ञे वृद्धशर्मा ततः परम् । रम्भो रजिरनेनाश्च त्रिषु लोकेषु विश्रुताः ॥ २
रजिः पुत्रशतानीह जनयामास पञ्च वै । राजेयमिति विख्यातं क्षत्रमिन्द्रभयावहम् ॥ ३
यत्र दैवासुरे युद्धे समुत्पन्ने सुदारुणे । देवाश्चैवासुराश्चैव पितामहमथाब्रुवन् ॥ ४

देवासुरा ऊचुः—

आवयोर्भगवन्युद्धे को विजेता भविष्यति । ब्रूहि नः सर्वभूतेश श्रोतुमिच्छाम तत्त्वतः ॥ ५

---

* इतः परं श्लोकत्रयमधिकं ग.पुस्तके—"सौश्रवाः कौशिकाश्चैव तथाऽन्ये सैन्धवायनाः । देवला रेणवश्चैव याज्ञवल्क्याच मर्षणः । औदुम्बराम्बुभिष्णावास्तारकायणचुचुलाः । शालवत्या हिरण्याक्षाः सांकृत्या गालवास्तथा । नारायणिर्नरश्चान्यो विश्वामित्रस्य धीमतः । ऋष्यन्तरविरान्ताश्च कौशिका बहवः स्मृताः" इति ।

---

१ ख. °व ऋचीं° । २ ख. °यासमन्वितम् । ३ क. ख. °व दे° । ४ क. तेषामाख्यामि गो° । ५ क. °तायनहारीतावष्टकायाजनाः स्मृ° । ६ ग. यामभूताश्च । ७ ग. कारीकयः । ८ क. °पि विश्वामित्रादथाष्ट° । ९ क. ख. लोहिः । १० क. विप्रा ।

ब्रह्मोवाच—

येषामर्थाय सङ्ग्रामे रजिरात्तायुधः प्रभुः । योत्स्यते ते विजेष्यन्ति त्रीँल्लोकान्नात्र संशयः ॥ ६
यतो रजिर्धृतिस्तत्र श्रीश्च तत्र यतो धृतिः । यतो धृतिश्च श्रीश्चैव धर्मस्तत्र जयस्तथा ॥ ७
ते देवा दानवाः प्रीता देवेनोक्ता रजिं तदा । अभ्ययुर्जयमिच्छन्तो वृण्वानास्तं नरर्षभम् ॥ ८
स हि स्वर्भानुदौहित्रः प्रभायां समपद्यत । राजा परमतेजस्वी सोमवंशविवर्धनः ॥ ९
ते हृष्टमनसः सर्वे रजिं वै देवदानवाः । ऊचुरस्मज्जयाय त्वं गृहाण वरकार्मुकम् ॥ १०
अथोवाच रजिस्तत्र तयोर्वै देवदैत्ययोः । अर्थज्ञः स्वार्थमुद्दिश्य यशः स्वं च प्रकाशयन् ॥ ११

रजिरुवाच—

यदि दैत्यगणान्सर्वा[1]ञ्जित्वा वीर्येण वासवः(व) । इन्द्रो भवामि धर्मेण ततो योत्स्यामि संयुगे ॥
देवाः प्रथमतो विप्राः प्रतीयुर्हृष्टमानसाः । एवं यथेष्टं नृपते कामः संपद्यतां तव ॥ १३
श्रुत्वा सुरगणानां तु वाक्यं राजा रजिस्तदा । पप्रच्छासुरमुख्यांस्तु यथा देवानपृच्छत ॥ १४
दानवा दर्पसंपूर्णाः स्वार्थमेवावगम्य ह । प्रत्यूचुस्तं नृपवरं साभिमानमिदं वचः ॥ १५

दानवा ऊचुः—

अस्माकमिन्द्रः प्रह्लादो यस्यार्थे विजयामहे । अस्मिंस्तु समरे राजंस्तिष्ठ त्वं राजसत्तम ॥ १६
स तथेति ब्रुवन्नेव देवैरप्यतिचोदितः । भविष्यसीन्द्रो जित्वैनं देवैरुक्तस्तु पार्थिवः ॥ १७
जघान दानवान्सर्वान्येऽवध्या वज्रपाणिनः । स विप्रनष्टां देवानां परमश्रीः श्रियं वशी ॥ १८
निहत्य दानवान्सर्वानाजहार रजिः प्रभुः । ततो रजिं महावीर्यं देवैः सह शतक्रतुः ॥ १९
रजिपुत्रोऽहमित्युक्त्वा पुनरेवाब्रवीद्वचः । इन्द्रोऽसि तात[2] देवानां सर्वेषां नात्र संशयः ॥ २०
यस्याहमिन्द्रः पुत्रस्ते ख्यातिं यास्यामि कर्मभिः । स तु शक्रवचः श्रुत्वा वञ्चितस्तेन मायया ॥
तथैवेत्यब्रवीद्राजा प्रीयमाणः शतक्रतुम् । तस्मिंस्तु देवैः सदृशे दिवं प्राप्ते महीपतौ ॥ २२
दायाद्यमिन्द्रादाजह्रू राज्यं तत्तनया रजेः । पञ्च पुत्रशतान्यस्य तद्वै स्थानं शतक्रतोः ॥ २३
समाक्रामन्त बहुधा स्वर्गलोकं त्रिविष्टपम् । ते यदा तु स्व[3]संमूढा रागोन्मत्ता विधर्मिणः ॥ २४
ब्रह्मद्विषश्च संवृत्ता हतवीर्यपराक्रमाः । ततो लेभे स्वमैश्वर्यमिन्द्रः स्थानं तथोत्तमम् ॥ २५
हत्वा रजिसुतान्सर्वान्कामक्रोधपरायणान् । य इदं च्यावनं स्थानात्प्रतिष्ठानं शतक्रतोः ॥
शृणुयाद्धारयेद्वाऽपि न स दौर्गत्यमाप्नुयात् ॥ २६

लोमहर्षण उवाच—

रम्भोऽनपत्यस्त्वासीच्च वंशं वक्ष्याम्यनेनसः । अनेनसः सुतो राजा [4]प्रतिक्षत्रो महायशाः ॥ २७
प्रतिक्षत्र[5]सुतश्चाऽऽसी[6]त्संजयो नाम विश्रुतः । संजयस्य[7] जयः पुत्रो विजयस्तस्य चाऽऽत्मजः २८
विजयस्य कृतिः पुत्रस्तस्य [8]हर्यत्वतः सुतः । हर्यत्वत[9]सुतो राजा सहदेवः प्रतापवान् ॥ ॥ २९
सहदेवस्य धर्मात्मा [10]नंदीन इति विश्रुतः । नंदी[11]नस्य जयत्सेनो जयत्सेनस्य संकृ[12]तिः ॥ ३०
[13]संकृतेरपि धर्मात्मा [14]क्षत्रवृद्धो महायशाः । अनेनसः समाख्याताः क्षत्रवृद्धस्य चापरः ॥ ३१

---

१ ख. °र्वान्क्षिप्त्वा वी° । २ क. तावद्देवा° । ३ ख. सुसंपुष्टा । ४ ग. प्रतिक्षेत्रो । ५ ग. °तिक्षेत्रसु° । ६ क. ख. °सीत्सृञ्जयो° । ७ क. ख. °तः । सृञ्जय° । ८ क. हर्यश्वतः । ख. हर्यश्वनः । ९ क. °र्यश्वतसु° । ख. °र्यश्वनसु° । १० क. नदीज । ११ क. °दीजस्य । १२ ग. संहातिः । १३ ग. संहृते° । १४ ख. कृतवर्मा ।

क्षत्रवृद्धात्मजस्तत्र सुनहोत्रो महायशाः । सुनहोत्रस्य दायादास्त्रयः परमधार्मिकाः ॥ ३२
काशः शलश्च द्वावेतौ तथा गृत्समदः प्रभुः । पुत्रो गृत्समदस्यापि शुनको यस्य शौनकः ॥ ३३
ब्राह्मणाः क्षत्रियाश्चैव वैश्याः शूद्रास्तथैव च । शलात्मज[1] आर्ष्टिसेनस्तनयस्तस्य काश्यपः ॥ ३४
काशस्य काशिपो राजा पुत्रो दीर्घतपास्तथा[2] । धनुस्तु[3] दीर्घतपसो[4] विद्वान्धन्वन्तरिस्ततः ॥ ३५
तपसोऽन्ते सुमहतो जातो वृद्धस्य धीमतः । पुनर्धन्वन्तरिर्देवो मानुषेष्विह जन्मनि ॥ ३६
तस्य गेहे समुत्पन्नो देवो धन्वन्तरिस्तदा । काशिराजो[5] महाराजः सर्वरोगप्रणाशनः ॥ ३७
आयुर्वेदं भरद्वाजात्प्राप्येह स भिषक्क्रियः । तमष्टधा पुनर्व्यस्य शिष्येभ्यः प्रत्यपादयत् ॥ ३८
धन्वन्तरेस्तु[6] तनयः केतुमानिति विश्रुतः । अथ केतुमतः पुत्रो वीरो भीमरथः स्मृतः ॥ ३९
पुत्रो भीमरथस्यापि दिवोदासः प्रजेश्वरः । दिवोदासस्तु धर्मात्मा वाराणस्यधिपोऽभवत् ॥ ४०
एतस्मिन्नेव काले तु पुरीं वाराणसीं द्विजाः । शून्यां निवेशयामास क्षेमको नाम राक्षसः ॥ ४१
शप्ता हि सा मतिमता निकुम्भेन महात्मना । शून्या वर्षसहस्रं वै भवित्री तु न संशयः ॥ ४२
तस्यां हि शप्तमात्रायां दिवोदासः प्रजेश्वरः । विषयान्ते पुरीं रम्यां गोमत्यां संन्यवेशयत् ४३
*भद्रश्रेण्यस्य पूर्वं तु पुरी वाराणसी अभूत् । भद्रश्रेण्यस्य पुत्राणां शतमुत्तमधन्विनाम् ॥ ४४
हत्वा निवेशयामास दिवोदासो नराधिपः । भद्रश्रेण्यस्य तद्राज्यं हृतं येन बलीयसा ॥ ४५
भद्रश्रेण्यस्य पुत्रस्तु दुर्दमो नाम विश्रुतः । दिवोदासेन बालेति घृणया स विसर्जितः ॥ ४६
हैहयस्य तु दायाद्यं[7] हृतवान्वै महीपतिः । आजह्रे पितृदायाद्यं दिवोदासहृतं बलात् ॥ ४७
भद्रश्रेण्यस्य पुत्रेण दुर्दमेन महात्मना । वैरस्यान्तो महाभागाः कृतश्चाऽऽत्मीयतेजसा ॥ ४८
दिवोदासाद्दृषद्वत्यां वीरो जज्ञे प्रतर्दनः । तेन बालेन पुत्रेण प्रहृतं तु पुनर्बलम् ॥ ४९
प्रतर्दनस्य पुत्रौ द्वौ वत्सभर्गौ[8] सुविश्रुतौ[9] । वत्सपुत्रो ह्यलर्कस्तु संनतिस्तस्य चाऽऽत्मजः ॥ ५०
अलर्कस्तस्य पुत्रस्तु ब्रह्मण्यः सत्यसंगरः । अलर्कं प्रति राजर्षिं श्लोको गीतः पुरातनैः ॥ ५१
षष्टिवर्षसहस्राणि षष्टिवर्षशतानि च । युवा रूपेण संपन्नः प्रागासीच्च कुलोद्वहः ॥ ५२
लोपामुद्राप्रसादेन परमायुरवाप्तवान् । तस्याऽऽसीत्सुमहद्राज्यं रूपयौवनशालिनः ॥ ५३
शापस्यान्ते महाबाहुर्हत्वा क्षेमकराक्षसम् । रम्यां निवेशयामास पुरीं वाराणसीं पुनः ॥ ५४
संनतेरपि दायादः सुनीथो नाम धार्मिकः । सुनीथस्य तु दायादः क्षेमो नाम महायशाः ॥ ५५
क्षेमस्य केतुमान्पुत्रः सुकेतुस्तस्य चाऽऽत्मजः । सुकेतोस्तनयश्चापि धर्मकेतुरिति स्मृतः ॥ ५६
धर्मकेतोस्तु दायादः सत्यकेतुर्महारथः । सत्यकेतुसुतश्चापि विभुर्नाम प्रजेश्वरः[10] ॥ ५७
आनर्तस्तु विभोः पुत्रः सुकुमारश्च तत्सुतः । सुकुमारस्य पुत्रस्तु धृष्टकेतुः सुधार्मिकः ॥ ५८
धृष्टकेतोस्तु दायादो वेणुहोत्रः प्रजेश्वरः । वेणुहोत्रसुतश्चापि भार्गो[11] नाम प्रजेश्वरः ॥ ५९
वत्सस्य वत्सभूमिस्तु[12] भार्गभूमिस्तु[13] भार्गजः[14] । एते त्वङ्गिरसः पुत्रा जाता वंशेऽथ भार्गव ॥ ६०

---

* इदमर्धं क. ख. पुस्तकयोर्नास्ति ।

---

१ ग. °त्मजः पार्ष्णिसे° । २ ग. °तमास्त° । ३ ख. धन्वस्तु । ४ ग. °तमसो । ५ ग. मणिराजो । ६ क. °न्तरेः सुतो नम्रः के° । ७ ग. °यादान्कृत° । ८ क. °त्सगौरौ सु° । ९ ख. °तौ । शत्रुजिद्वत्सपुत्रोऽथ तस्य पुत्र ऋतध्वजः । अ° । १० ग. °रः । स्वविभुस्तु । ११ ख. भर्गो । १२ ख. °स्तु भर्ग° । १३ क. °भूतिस्तु । १४ ग. भार्गवात् ।

ब्राह्मणाः क्षत्रिया वैश्यास्त्रयः पुत्राः सहस्रशः । इत्येते काश्यपाः प्रोक्ता नहुषस्य निबोधत ६१

इति श्रीमहापुराणे ब्राह्मे सोमवंशे वृद्धक्षत्रप्रसूतिनिरूपणं नामैकादशोऽध्यायः ॥ ११ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८४९

अथ द्वादशोऽध्यायः ।

लोमहर्षण उवाच—

उत्पन्नाः पितृकन्यायां विरजायां महौजसः[1] । नहुषस्य तु दायादाः षडिन्द्रोपमतेजसः[2] ॥ १
यतिर्ययातिः संयातिरायातिः[3] पार्श्वकोऽभवत् । यतिर्ज्येष्ठस्तु तेषां वै ययातिस्तु ततः परम् ॥ २
ककुत्स्थकन्यां गां नाम लेभे परमधार्मिकः । यतिस्तु मोक्षमास्थाय ब्रह्मभूतोऽभवन्मुनिः ॥ ३
तेषां ययातिः पञ्चानां विजित्य वसुधामिमाम् । देवयानीमुशनसः सुतां भार्यामवाप सः ॥ ४
शर्मिष्ठामासुरीं चैव तनयां वृषपर्वणः । यदुं च तुर्वसुं चैव देवयानी व्यजायत ॥ ५
द्रुह्युं चानुं च पुरुं[4] च शर्मिष्ठा वार्षपर्वणी । तस्मै शक्रो ददौ प्रीतो रथं परमभास्वरम्[5] ॥ ६
असङ्गं काञ्चनं[6] दिव्यं दिव्यैः परमवाजिभिः । युक्तं मनोजवैः[7] शुभ्रैर्येन कार्यं समुद्वहन् ॥ ७
स तेन रथमुख्येन[8] षड्रात्रेणाजयन्महीम् । ययातिर्युधि दुर्धर्षस्तथा[9] देवान्सदानवान् ॥ ८
सरथः [10]कौरवाणां तु सर्वेषामभवत्तदा । संवर्तवसुनाम्नस्तु कौरवाज्जनमेजयात् ॥ ९
कुरोः पुत्रस्य[11] राजेन्द्रराज्ञः पारीक्षितस्य(?) ह । जगाम स रथो नाशं शापाद्गर्गस्य धीमतः ॥ १०
गर्गस्य हि सुतं बालं स राजा जनमेजयः । [12]कालेन हिंसयामास ब्रह्महत्यामवाप सः[13] ॥ ११
स लोहगन्धी राजर्षिः परिधावन्नितस्ततः । पौरजानपदैस्त्यक्तो न लेभे शर्म कर्हिचित् ॥ १२
ततः स दुःखसंतप्तो नालभत्संविदं क्वचित् । [14]विप्रेन्द्रं शौनकं राजा शरणं प्रत्यपद्यत ॥ १३
याजयामास[15] च ज्ञानी शौनको जनमेजयम् । अश्वमेधेन राजानं पावनार्थं द्विजोत्तमाः ॥ १४
स लोहगन्धो व्यनशत्तस्यावभृथमेत्य ह । स च दिव्यरथो राज्ञो वंशश्चेदिपतेस्तदा[16] ॥ १५
दत्तः शक्रेण तुष्टेन लेभे तस्माद्बृहद्रथः । बृहद्रथात्क्रमेणैव गतो बार्हद्रथं नृपम् ॥ १६
ततो हत्वा जरासन्धं भीमस्तं रथमुत्तमम् । प्रददौ वासुदेवाय प्रीत्या कौरवनन्दनः ॥ १७
सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागराम् । विभज्य[17] पञ्चधा राज्यं पुत्राणां नाहुषस्तदा १८
ययातिर्दिशि पूर्वस्यां यदुं ज्येष्ठं न्ययोजयत् । मध्ये [18]पुरुं च राजानमभ्यषिञ्चत्स नाहुषः ॥ १९
दिशि दक्षिणपूर्वस्यां तुर्वसुं मतिमान्नृपः । तैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना ॥ २०
यथाप्रदेशमद्यापि धर्मेण प्रतिपाल्यते । प्रजास्तेषां पुरस्तात्तु वक्ष्यामि मुनिसत्तमाः ॥ २१

---

१ क. °श्या आयोः पुत्राः । २ ख. °न्द्रोपेन्द्रते° । ३ ख. °यातिर्यातिरेव च । सुयातिः षष्ठस्तेषां वै ययातिः पार्थिवोऽभवत् । य° । ४ क. ग. पूरुं । ५ ख. °म् । सशस्त्रास्त्रं का° । ६ ख. °नं च दिव्यैः । ७ ग. मनोरमैः । ८ ख. °न दिग्जयेन ज° । ९ ख. °तिर्वर्षसाहस्रांस्त° । १० क. ग. पौरवाणां । ११ ख. °स्य विप्रेन्द्र° । १२ ख. चाक्रूरं । ग. वाक्क्रूरं । १३ ख. सः । दुर्गन्धयुक्तो रा° । १४ क. होतारं । ग. इन्द्रोतं । १५ क. °स चेन्द्रेण शौ° । १६ क. वसोश्चे° । १७ ख. °ज्य स्वं तदा रा° । १८ ग. पूरुं ।

धनुर्न्यस्य पृषत्कांश्च पञ्चभिः पुरुषर्षभैः । जरावानभवद्राजा भारमावेश्य बन्धुषु ॥ २२
निक्षिप्तशस्त्रः पृथिवीं चचार पृथिवीपतिः । प्रीतिमानभवद्राजा ययातिरपराजितः ॥ २३
एवं विभज्य पृथिवीं ययातिर्यदुमब्रवीत् । जरां मे प्रतिगृह्णीष्व पुत्र कृत्यान्तरेण वै ॥ २४
तरुणस्तव रूपेण चरेयं पृथिवीमिमाम् । जरां त्वयि समाधाय तं यदुः प्रत्युवाच ह ॥ २५

यदुरुवाच—

अनिर्दिष्टा मया भिक्षा ब्राह्मणस्य प्रतिश्रुता । अनपाकृत्य तां राजन्न ग्रहीष्यामि ते जराम् २६
जरायां बहवो दोषाः पानभोजनकारिताः । तस्माज्जरां न ते राजन्ग्रहीतुमहमुत्सहे ॥ २७
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप । प्रतिग्रहीतुं धर्मज्ञ पुत्रमन्यं वृणीष्व वै ॥ २८
स एवमुक्तो यदुना राजा कोपसमन्वितः । उवाच वदतां श्रेष्ठो ययातिर्गर्हयन्सुतम् ॥ २९

ययातिरुवाच—

क आश्रमस्तवान्योऽस्ति को वा धर्मो विधीयते । मामनादृत्य दुर्बुद्धे यदहं तव देशिकः ॥ ३०
एवमुक्त्वा यदुं विप्राः शशापैनं स मन्युमान् । अराज्या ते प्रजा मूढ भवित्रीति न संशयः ३१
द्रुह्युं च तुर्वसुं चैवाप्यनुं च द्विजसत्तमाः । एवमेवाब्रवीद्राजा प्रत्याख्यातश्च तैरपि ॥ ३२
शशाप तानतिक्रुद्धो ययातिरपराजितः । यथावत्कथितं सर्वं मयाऽस्य द्विजसत्तमाः ॥ ३३
एवं शप्त्वा सुतान्सर्वांश्चतुरः [2]पुरुपूर्वजान् । तदेव वचनं राजा पुरुमप्याह भो द्विजाः ॥ ३४
तरुणस्तव रूपेण चरेयं पृथिवीमिमाम् । जरां त्वयि समाधाय त्वं पुरो यदि मन्यसे ॥ ३५
स जरां प्रतिजग्राह[3] पितुः पुरुः प्रतापवान् । ययातिरपि रूपेण पुरोः पर्यचरन्महीम् ॥ ३६
स मार्गमा[4]णः कामानामन्तं नृपतिसत्तमः । विश्वाच्या सहितो रेमे वने चैत्ररथे प्रभुः ॥ ३७
यदा च तृप्तः कामेषु भोगेषु च नराधिपः । तदा [5]पुरोः सकाशाद्वै स्वां जरां प्रत्यपद्यत ॥ ३८
यत्र गाथा मुनिश्रेष्ठा गीताः किल ययातिना । याभिः प्रत्याहरेत्कामान्सर्वशोऽङ्गानि कूर्मवत् ३९
न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ४०
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः । नालमेकस्य तत्सर्वमिति कृत्वा न मुह्यति ॥ ४१
यदा भावं न कुरुते सर्वभूतेषु पापकम् । कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ॥ ४२
यदा तेभ्यो न बिभेति यदा चास्मान्न बिभ्यति । यदा नेच्छति न द्वेष्टि ब्रह्म संपद्यते तदा ४३
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः । योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम्
जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः । धनाशा जीविताशा च जीर्यतोऽपि न जीर्यति
यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् । तृष्णाक्षयसुखस्यैते नार्हन्ति षोडशीं कलाम् ॥ ४६
एवमुक्त्वा स राजर्षिः सदारः प्राविशद्वनम् । कालेन महता चा[6]यं चचार विपुलं तपः ॥ ४७
भृगुतुङ्गे[7] गतिं प्राप तपसोऽन्ते महायशाः । [8]अनश्नन्देहमुत्सृज्य सदारः स्वर्गमाप्तवान् ॥ ४८
तस्य वंशे मुनिश्रेष्ठाः पञ्च राजर्षिसत्तमाः । यैर्व्याप्ता पृथिवी सर्वा सूर्यस्येव गभस्तिभिः ॥४९
यदोस्तु वंशं वक्ष्यामि शृणुध्वं राजसत्कृतम् । यत्र नारायणो जज्ञे हरिर्वृष्णिकुलोद्वहः ॥ ५०

---

१ ख. ग. नराधिप । २ ग. पूरुपूर्वजान् । ३ ख. °ह पुरुः पुरुप्र° । ४ ख. °माणस्तरुणीं सुमत्तो नृपस° । ५ क. ख. पूरोः । ६ ख. चापि । ग. वाऽपि । ७ ख. ग. °ङ्गे तपश्चीर्त्वा त° । ८ क. अनाशकं चरित्वा तु स° ।

सुस्थः प्रजावानायुष्मान्कीर्तिमांश्च भवेन्नरः । ययातिचरितं नित्यमिदं शृण्वन्द्विजोत्तमाः ॥ ५१

इति श्रीमहापुराणे ब्राह्मे सोमवंशे ययातिचरितनिरूपणं नाम द्वादशोऽध्यायः ॥ १२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८९६

अथ त्रयोदशोऽध्यायः ।

ब्राह्मणा ऊचुः—

*पुरोर्वंशं वयं सूत श्रोतुमिच्छाम तत्त्वतः । द्रुह्यस्यानोर्यदोश्चैव तुर्वसोश्च पृथक्पृथक् ॥ १

लोमहर्षण उवाच—

शृणुध्वं मुनिशार्दूलाः पुरोर्वंशं महात्मनः । विस्तरेणाऽऽनुपूर्व्या च प्रथमं वदतो मम ॥ २

पुरोः पुत्रः सुवीरोऽभून्मन[1]स्युस्तस्य चाऽऽत्मजः । राजा चाभयदो नाम मन[2]स्योरभवत्सुतः ॥ ३

तथैवाभयदस्याऽऽसीत्सुधन्[3]वा नाम पार्थिवः । सुधन्वनः सुबाहुश्च रौद्राश्वस्तस्य चाऽऽत्मजः ॥ ४

रौद्राश्वस्य द[4]शार्णेयुः कृक[5]णेयुस्तथैव च । कक्षेयुस्थण्डिलेयुश्च स[6]न्नतेयुस्तथैव च ॥ ५

ऋचेयुश्च जलेयुश्च स्थलेयुश्च म[7]हाबलः । ध[8]नेयुश्च व[9]नेयुश्च पुत्रकाश्च दश स्त्रियः ॥ ६

भ[10]द्रा शूद्रा च मद्रा च शलदा मलदा त[11]था । ख[12]लदा च ततो विप्रा न[13]लदा सुरसाऽपि च ॥ ७

तथा गोचपला च स्त्रीरत्नकूटा च ता दश । ऋषिर्जातोऽत्रिवंशे च तासां भर्ता प्रभाकरः ॥ ८

भ[14]द्रायां जनयामास सुतं सोमं यशस्विनम् । स्वर्भानुना हते सूर्ये पतमाने दिवो महीम् ॥ ९

तमोभिभूते लोके च प्रभा येन प्रवर्तिता । स्वस्ति तेऽस्त्विति चोक्त्वा वै पतमानो दिवाकरः १०

वचनात्तस्य विप्रर्षेर्न पपात दिवो महीम् । अत्रिश्रेष्ठानि गोत्राणि यश्चकार महातपाः ॥ ११

य[15]ज्ञेष्वत्रेर्बलं चैव देवैर्यस्य प्रतिष्ठितम् । स तासु जनयामास पुत्रिकास्वात्म[16]कामजान् ॥ १२

दश पुत्रान्महासत्त्वांस्तपस्युग्रे रतांस्त[17]था । ते तु गोत्रकरा विप्रा ऋषयो वेदपारगाः ॥ १३

स्वस्त्यात्रेया इति ख्याताः किंच त्रिधनवर्जिताः । कक्षेयोस्तन[18]यास्त्वासंस्त्रय एव महारथाः १४

सभानरश्चाक्षुपश्च परम[19]न्युस्तथैव च । सभानरस्य पुत्रस्तु विद्वान्कालानलो नृपः ॥ १५

कालानलस्य धर्मज्ञः सृञ्जयो नाम वै सुतः । सृञ्जयस्याभवत्पुत्रो वीरो राजा पुरंजयः ॥ १६

ज[20]नमेजयो मुनिश्रेष्ठाः पुरंजयसुतोऽभवत् । जनमेजयस्य राजर्षेर्महाशालोऽभवत्सुतः ॥ १७

देवेषु स परिज्ञातः प्रतिष्ठितयशा भुवि । महाम[21]ना नाम सुतो महाशालस्य वि[22]श्रुतः ॥ १८

जज्ञे वीरः सुरगणैः पूजितः सुमहामनाः । महामनास्तु पुत्रौ द्वौ जनयामास भो द्विजाः ॥ १९

उशीनरं च धर्मज्ञं तितिक्षुं च महाबलम् । उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः ॥ २०

---

* अयं श्लोकः ख. ग. पुस्तकयोर्नास्ति ।

---

१ ख. °नस्यस्त° । २ ख. °नस्यस्याभ° । ३ ख. °न्वा च महीपतिः । सु° । ४ ख. दशार्णायुः । ग. दशार्नेयुः । ५ क. °कणायु° । ६ ख. सनुते° । ७ ख. महायशाः । ८ क. ग. वननित्यो । ९ क. धनेयुश्च । १० ग. रुद्रा । ११ ख. °था । शलावला त° । १२ क. रालदा । १३ क. ख. वरदा । १४ ग. रुद्रायां । १५ क. यज्ञे ह्यत्रेर्धनं चै° । १६ क. °त्मजान्स्वकान् । १७ क. °था । पृथुगो° । १८ क. °याश्चाऽऽसंस्ते त्रयश्च म° । १९ ग. °मनुस्त° । २० ख. जन्मेज° । २१ क. °मनाः सुतो जज्ञे म° । २२ क. ख. धार्मिकः ।

नृगा कृमिर्नवा दर्वा[1] पञ्चमी च दृषद्वती । उशीनरस्य पुत्रास्तु पञ्च तासु कुलोद्वहाः ॥ २१
तपसा चैव महता जाता वृद्धस्य चाऽऽत्मजाः । नृगायास्तु नृगः पुत्रः कृम्यां[2] कृमिरजायत २२
नवायास्तु नवः पुत्रो दर्वायाः[3] सुव्रतोऽभवत् । दृषद्वत्यास्तु संजज्ञे शिबिरौशीनरो नृपः ॥ २३
शिबेस्तु शिबयो विप्रा यौधेयास्तु नृगस्य ह । नवस्य नवराष्ट्रं[4] तु कृमेस्तु कृमिला[5] पुरी ॥ २४
सुव्रतस्य तथा[6]ऽम्बष्ठाः शिविपुत्रान्निबोधत । शिबेस्तु शिबयः पुत्राश्चत्वारो लोकविश्रुताः ॥ २५
वृषदर्भः[7] सुवीरश्च केकयो मद्रकस्तथा । तेषां जनपदाः स्फीता केकया मद्रकास्तथा ॥ २६
वृषदर्भाः[8] सुवीराश्च तितिक्षोस्तु प्रजास्त्विमाः[9] । तितिक्षुरभवद्राजा पूर्वस्यां दिशि भो द्विजाः २७
उषद्रथो महावीर्यः[10] फेनस्तस्य[11] सुतोऽभवत् । फेनस्य सुतपा जज्ञे ततः सुतपसो बलिः[12] ॥ २८
जातो मानुषयोनौ तु स राजा काञ्चनेषुधिः । महायोगी स तु बलिर्बभूव नृपतिः पुरा ॥ २९
पुत्रानुत्पादयामास पञ्च वंशकरान्भुवि । अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मस्तथैव च ॥ ३०
पुण्ड्रः कलिङ्गश्च तथा बालेयं[13] क्षत्रमुच्यते । बालेया ब्राह्मणाश्चैव तस्य वंशकरा[14] भुवि ॥ ३१
बलेश्च ब्रह्मणा दत्तो वरः प्रीतेन भो द्विजाः । महायोगित्वमायुश्च कल्पस्य परिमाणतः ॥ ३२
बले[15] चाप्रतिमत्वं वै धर्मतत्त्वार्थदर्शनम् । सङ्ग्रामे चाप्यजेयत्वं धर्मे चैव प्रधानताम् ॥ ३३
त्रैलोक्यदर्शनं चापि प्राधान्यं[16] प्रसवे तथा । चतुरो नियतान्वर्णांस्त्वं च स्थापयितेति च ॥ ३४
इत्युक्तो विभुना राजा बलिः शान्तिं परां ययौ । कालेन महता विप्राः[17] स्वं च स्थानमुपागमत् ॥
तेषां जनपदाः पञ्च अङ्गा वङ्गाः[18] ससुह्मकाः । कलिङ्गाः पुण्ड्रकाश्चैव प्रजास्त्वङ्गस्य सांप्रतम् ३६
अङ्गपुत्रो महानासीद्राजेन्द्रो दधिवाहनः । दधिवाहनपुत्रस्तु राजा दिविरथोऽभवत् ॥ ३७
पुत्रो दिविरथस्याऽऽसीच्छक्रतुल्यपराक्रमः । विद्वान्धर्मरथो[19][20] नाम तस्य चित्ररथः सुतः ॥ ३८
तेन धर्मरथेनाथ तदा कालंजरे गिरौ । यजता सह शक्रेण सोमः पीतो महात्मना ॥ ३९
अथ[21] चित्ररथस्यापि पुत्रो दशरथोऽभवत् । लोमपाद इति ख्यातो यस्य शान्ता सुताऽभवत् ४०
तस्य दाशरथिर्वीरश्चतुरङ्गो महायशाः । ऋष्यशृङ्गप्रसादेन जज्ञे वंशविवर्धनः ॥ ४१
चतुरङ्गस्य पुत्रस्तु पृथुलाक्ष इति स्मृतः । पृथुलाक्षसुतो राजा चम्पो नाम महायशाः ॥ ४२
चम्पस्य तु पुरी चम्पा या मालिन्यभवत्पुरा । पूर्णभद्रप्रसादेन हर्यङ्गो[22]ऽस्य सुतोऽभवत् ॥ ४३
ततो वैभाण्डकिस्तस्य वारणं शक्रवारणम् । अवतारयामास महीं मन्त्रैर्वाहनमुत्तमम् ॥ ४४
हर्यङ्गस्य[23][24] सुतस्तत्र राजा भद्ररथः स्मृतः । पुत्रो भद्ररथस्याऽऽसीद्बृहत्कर्मा प्रजेश्वरः ॥ ४५
बृहद्दर्भः सुतस्तस्य यस्माज्जज्ञे बृहन्मनाः । बृहन्मनास्तु राजेन्द्रो जनयामास वै सुतम् ॥ ४६
नाम्ना जयद्रथं नाम यस्माद्दृढरथो नृपः । आसीद्दृढरथस्यापि विश्वजिज्जनमेजयी ॥ ४७
दायादस्तस्य वैकर्णो विकर्णस्तस्य चाऽऽत्मजः । तस्य पुत्रशतं त्वासीदङ्गानां कुलवर्धनम् ॥४८
एतेऽङ्गवंशजाः सर्वे राजानः कीर्तिता मया । सत्यव्रता महात्मानः प्रजावन्तो महारथाः ॥ ४९

---

१ ग. दर्घा । २ ख. कृम्याः । ३ ग. दर्घायाः । ४ क. °राष्ट्रास्तु कृ° । ५ क. कृमिभा । ६ ख. °था त्वष्टा शि° । ७ क. वृकदर्भः । ८ क. वृकदर्भाः । ९ ख. °माः । तैति° । ग. °माः । तैतिक्षवोऽभ° । १० क. °र्यः शालस्त° । ११ क. शालस्य । १२ ग. बली । १३ ग. वालेयं । १४ क. °शसमुद्भवाः । ब° । १५ क. बलं चाप्रतिमं तस्य तथा धर्मार्थचिन्तनम् । १६ क. °न्यं सर्वतस्तथा । १७ ख. विप्रा वर्जस्था° । १८ ख. वङ्गाश्च सु° । १९ क. °रतो ना° । २० क. धर्मरवः । २१ क. °थ धर्मर° । २२ क. °र्यश्वोऽस्य । २३ क. °र्यश्वस्य । २४ क. ग. °स्य सुतः कर्णो ।

ऋचेयोस्तु मुनिश्रेष्ठा रौद्राश्वतनयस्य वै । शृणुध्वं संप्रवक्ष्यामि वंशं राज्ञस्तु भो द्विजाः ॥ ५०
ऋचेयोस्तनयो राजा मतिनारो महीपतिः । मतिनारसुतास्त्वासंस्त्रयः परमधार्मिकाः ॥ ५१
वंसुरोधः प्रतिरथः सुबाहुश्चैव धार्मिकः । सर्वे वेदविदश्चैव ब्रह्मण्याः सत्यवादिनः ॥ ५२
इला नाम तु यस्याऽऽसीत्कन्या वै मुनिसत्तमाः । ब्रह्मवादिन्यधिस्त्री सा तंसुस्तामभ्यगच्छत ॥
तंसोः सुतोऽथ राजर्षिर्धर्मनेत्रः प्रतापवान् । ब्रह्मवादी पराक्रान्तस्तस्य भार्योपदानवी ॥ ५४
उपदानवी ततः पुत्रांश्चतुरोऽजनयच्छुभान् । दुंष्यन्तमथ सुंष्मन्तं प्रवीरमनघं तथा ॥ ५५
दुंष्यन्तस्य तु दायादो भरतो नाम वीर्यवान् । स सर्वदमनो नाम नागायुतबलो महान् ॥ ५६
चक्रवर्ती सुतो जज्ञे दुंष्यन्तस्य महात्मनः । शकुन्तलायां भरतो यस्य नाम्ना तु भारताः ॥ ५७
भरतस्य विनष्टेषु तनयेषु महीपतेः । मातॄणां तु प्रकोपेण मयां तत्कथितं पुरा ॥ ५८
बृहस्पतेरङ्गिरसः पुत्रो विप्रो महामुनिः । अयाजयद्भरद्वाजो महद्भिः क्रतुभिर्विभुः ॥ ५९
पूर्वं तु वितथे तस्य कृते वै पुत्रजन्मनि । ततोऽथ वितथो नाम भरद्वाजात्सुतोऽभवत् ॥ ६०
ततोऽथ वितथे जाते भरतस्तु दिवं ययौ । वितथं चाभिषिच्याथ भरद्वाजो वनं ययौ ॥ ६१
स चापि वितथः पुत्राञ्जनयामास पञ्च वै । सुहोत्रं च सुहोतारं गयं गर्गं तथैव च ॥ ६२
कपिलं च महात्मानं सुहोत्रस्य सुतद्वयम् । कौशिकं च महासत्यं तथा गृत्समतिं नृपम् ॥ ६३
तथा गृत्समतेः पुत्रा ब्राह्मणाः क्षत्रिया विशः । कौशिकस्य तु काशेयः पुत्रो दीर्घतपास्तथा ६४
बभूव दीर्घतपसो विद्वान्धन्वन्तरिः सुतः । धन्वन्तरेस्तु तनयः केतुमानिति विश्रुतः ॥ ६५
तथा केतुमतः पुत्रो विद्वान्भीमरथः स्मृतः । पुत्रो भीमरथस्यापि वाराणस्यधिपोऽभवत् ॥ ६६
दिवोदास इति ख्यातः सर्वक्षत्रप्रणाशनः । दिवोदासस्य पुत्रस्तु वीरो राजा प्रतर्दनः ॥ ६७
प्रतर्दनस्य पुत्रौ द्वौ वत्सो भार्गव एव च । अलर्को राजपुत्रस्तु राजा सन्मतिमान्भुवि ॥ ६८
हैहयस्य तु दायाद्यं हृतवान्वै महीपतिः । आजह्रे पितृदायाद्यं दिवोदासहृतं बलात् ॥ ६९
भद्रश्रेण्यस्य पुत्रेण दुर्दमेन महात्मना । दिवोदासेन बालेति घृणयाऽसौ विसर्जितः ॥ ७०
अष्टारथो नाम नृपः सुतो भीमरथस्य वै । तेन पुत्रेण बालस्य प्रहृतं तस्य भो द्विजाः ॥ ७१
वैरस्यान्तं मुनिश्रेष्ठाः क्षत्रियेण विधित्सता । अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसंगरः ॥ ७२
[*षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च । युवा रूपेण संपन्न आसीत्काशिकुलोद्वहः ॥ ७३
लोपामुद्राप्रसादेन परमायुरवाप सः । वयसोऽन्ते मुनिश्रेष्ठा हत्वा क्षेमकराक्षसम् ॥ ७४
रम्यां निवेशयामास पुरीं वाराणसीं नृपः । अलर्कस्य तु दायादः क्षेमको नाम पार्थिवः ॥ ७५
क्षेमकस्य तु पुत्रो वै वर्षकेतुस्ततोऽभवत् । वर्षकेतोश्च दायादो विभुर्नाम प्रजेश्वरः ॥ ७६

---

* इत आरभ्याष्टकस्य सुतो लौहिरित्यन्तो नास्ति पाठः ख. पुस्तके ।

---

१ ख. तमुरोधः । २ ख. °रथो बाहुश्चैव तु धा° । ३ क. °वें ब्रह्मवि° । ख. °वें धर्मवि° । ४ ख. ब्राह्मणाः । ५ ख. दुष्कन्त° । ६ ख. पुष्कन्तं । ७ ख. दुष्कन्त° । ८ क. ख. दुष्कन्त° । ९ क. ख. भारतम् । १० क. °या ते परिकीर्तिताः । बृ° । ११ क. °विभुम् । पू° । १२ क. ख. °द्वाजसुतोऽ° । १३ क. तर्जं । ग. गर्ङ्गं । १४ क. कौशिकं । १५ क. मृगमतिं । १६ क. मृगमतेः । १७ क. कौशिकस्य । १८ क. ख. अथ । १९ क. ख्यातो रोगदुष्टनिबर्हणः । दि° । २० ख. °र्वक्षात्र° । २१ ख. पुत्रोऽभूद्वीरो । २२ क. °स्तु सत्यवादी प्र° । २३ ख. वत्सो । २४ ख. °मानपि । है° । २५ क. ख. दायादो । २६ ग. °द्यं कृत° । २७ क. °वाप्तवान् । व° । २८ क. पुनः । २९ क. तु दायादो व° । ३० क. °तुर्महीपतिः । व° ।

आनर्तस्तु विभोः पुत्रः सुकुमारस्ततोऽभवत् । सुकुमारस्य पुत्रस्तु सत्यकेतुर्महारथः ॥ ७७
सुतोऽभवन्महातेजा राजा परमधार्मिकः । वत्सस्य वत्सभूमिस्तु भर्गभूमिस्तु भार्गवात् ॥ ७८
एते त्वङ्गिरसः पुत्रा जाता वंशेऽथ भार्गवे । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च मुनिसत्तमाः ७९
+आजमीढोऽपरो वंशः श्रूयतां द्विजसत्तमाः । सुहोत्रस्य बृहत्पुत्रो बृहतस्तनया[2]स्त्रयः ॥ ८०
अजमीढो द्विमीढश्च पुरुमीढश्च वीर्यवान् । अजमीढस्य पत्न्यस्तु तिस्रो[3] वै यशसाऽन्विताः ॥ ८१
[4]नीली च केशिनी चैव धूमिनी च वराङ्गनाः । अजमीढ[5]स्य केशिन्यां जज्ञे जह्नुः प्रतापवान् ८२
आजह्रे यो महासत्रं सर्व[6]मेधमखं विभुम् । पतिलोभेन यं गङ्गा विनीतेव ससार ह ॥ ८३
नेच्छतः प्लावयामास तस्य गङ्गा च तत्सदः । तत्तया प्लावितं दृष्ट्वा यज्ञवाटं समन्ततः ॥ ८४
जह्नुरप्यब्रवीद्गङ्गां क्रुद्धो विप्रास्तदा नृपः । एष ते त्रिषु लोकेषु संक्षिप्याऽपः पिबाम्यहम् ॥
अ[7]स्य गङ्गेऽवलेपस्य सद्यः फलमवाप्नुहि ॥ ८५
ततः पीतां महात्मानो दृष्ट्वा गङ्गां महर्षयः । उपनिन्युर्महाभागा दुहितृत्वेन जाह्नवीम् ॥ ८६
युवनाश्वस्य पुत्रीं तु कावेरीं जह्नुरावहत् । गङ्गाशापेन देहा[8]र्धं यस्याः पश्चान्नदीकृ[9]तम् ॥ ८७
जह्नोस्तु दयितः पुत्रो अजको नाम वीर्यवान् । अजकस्य तु दायादो बलाकाश्वो महीपतिः ८८
बभूव मृगयाशीलः कुशिकस्तस्य चाऽऽत्मजः । प[10]ह्लवैः सह संवृद्धो राजा वनचरैः सह ॥ ८९
कुशिकस्तु तपस्ते[11]पे पुत्रमिन्द्रसमं विभुम् । लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान् ॥ ९०
स गाधिरभवद्राजा मघवा कौशिकः स्वयम् ।विश्वामित्रस्तु गाधे[12]यो विश्वामित्रात्तथाऽष्टकः*९१
[13]अष्टकस्य सुतो लौहिः] प्रोक्तो जह्नुगणो मया[14] । आजमीढोऽपरो वंशः श्रूयतां मुनिसत्तमाः ९२
अजमीढात्तु नील्यां[15] वै सुशान्तिरुदपद्यत । पुरुजा[16]तिः सुशान्तेश्च बा[17]ह्या[18]श्वः पुरुजातितः ॥ ९३
बा[19]ह्याश्वतनयाः प[20]ञ्च स्फीता जनपदावृताः । मुद्गलः सृञ्जयश्चैव राजा बृहदिषुस्तथा ॥ ९४

+ इदमर्धं क. पुस्तके नास्ति ।

* एतदनन्तरं ग. पुस्तकेऽधिकाः श्लोका उपलभ्यन्ते ते यथा—

"विश्वबाधिः श्वजिच्चैव तथा सत्यवती द्विजाः । ऋचीकाज्जमदग्निस्तु सत्यवत्यामजायत ॥
विश्वामित्रस्य तु सुता देवरातादयः स्मृताः । प्रख्यातास्त्रिषु लोकेषु तेषां नामानि भो द्विजाः ॥
देवरातः कतिश्चैव यस्मात्कात्यायनः स्मृतः । शालवत्यां हिरण्याक्षो रेणुर्यस्याथ रेणुका ॥
सांकृत्यां गालवा विप्रा मौद्गल्याश्चेति विश्रुताः । तेषां ख्यातानि गोत्राणि कौशिकानां महात्मनाम् ॥
पाणिनो बभ्रवश्चैव ध्यानजप्यास्तथैव च । पार्थिवा देवराताश्च शालङ्कायनसौश्रवाः ॥
लोहिता यामभूताश्च तथा कारीषयः स्मृताः । विश्रुताः कौशिका विप्रास्तथाऽन्ये सैन्धवायनाः ॥
ऋष्यन्तरविवाह्याश्च कौशिका बहवः स्मृताः । पौरवस्य मुनिश्रेष्ठा ब्रह्मर्षेः कौशिकस्य च ॥
संबन्धोऽस्याथ वंशेऽस्मिन्ब्रह्मक्षत्रस्य विश्रुतः । विश्वामित्रात्मजानां तु शुनःशेफोऽग्रजः स्मृतः ॥
भार्गवः कौशिकत्वं हि प्राप्तः स मुनिपुंगवः । देवरातादयश्चापि विश्वामित्रस्य वै सुताः ॥
दृषद्वतीसुतश्चापि विश्वामित्रस्तथाऽष्टकः ॥

---

१ क. °स्तु च्यवनो नाम भार्गवः । ए° । २ क. °यास्ततः । अ° । ३ क. °स्रो रूपगुणान्वि° । ४ क. नीलिनी के° । ५ क. °ढस्य पुत्रस्तु जह्नुर्जज्ञे प्र° । ६ ग. °मेव महारथः । प° । ७ घ. तस्य । ८ क. °हार्धाद्यस्य प° । ९ क. °कृता । ज° । १० क. निषादैः । ११ फ. °पे रम्यमिन्द्रपदं प्रभुः । ल° । १२ क. °यो राजा विश्वरथस्तथा । १३ ख. अलर्कस्य । १४ ख. ग. °या । अज° । १५ क. ख. नीलिन्यां सु° । १६ क. °जातिसु° । ख. °जातिसुशान्ते च बा° । १७ क. बाह्यश्च । १८ ख. °ह्याश्च पुरुजातिजाः । बाह्याश्च तनयाः पञ्च बभूवुरमरोपमाः । मु° । १९ क. बाह्यस्य त° । २० क. °ञ्च बभूवुरमरोपमाः । म° ।

यवीनरश्च विक्रान्तः कृमिलाश्वश्च पञ्चमः । पञ्चैते[1] रक्षणायालं देशानामिति विश्रुताः ॥ ९५
पञ्चानां ते तु पञ्चालाः स्फीता जनपदावृताः । अलं संरक्षणे तेषां पञ्चाला इति विश्रुताः ९६
मुद्गलस्य तु दायादो मौद्गल्यः सुमहायशाः + । इन्द्रसेना यतो गर्भं वध्र्यश्वं[3] च प्रत्यपद्यत ॥ ९७
आसीत्पञ्चजनः पुत्रः सृञ्जयस्य महात्मनः । सुतः पञ्चजनस्यापि सोमदत्तो महीपतिः ॥ ९८
सोमदत्तस्य दायादः सहदेवो महायशाः । सहदेवसुतश्चापि सोमको नाम विश्रुतः[4] ॥ ९९
अजमीढसुतो जातः क्षीणे वंशे तु सोमकः । सोमकस्य सुतो जन्तुर्यस्य पुत्रशतं बभौ ॥ १००
तेषां यवीयान्पृषतो[5] द्रुपदस्य पिता प्रभुः । आजमीढाः स्मृताश्चैते[6] महात्मानस्तु सोमकाः[7] ॥ १०१
महिषी त्वजमीढस्य धूमिनी *पुत्रगृद्धिनी[8] । पतिव्रता महाभागा कुलजा मुनिसत्तमाः ॥ १०२
[+सा च पुत्रार्थिनी देवी व्रतचर्यासमन्विता । ततो वर्षायुतं तप्त्वा तपः परमदुश्चरम् ॥ १०३
हुत्वाऽग्निं विधिवत्सा[9] तु पवित्रा मितभोजना । अग्निहोत्रकुशेष्वेव सुष्वाप मुनिसत्तमाः] ॥ १०४
धूमिन्या स तया देव्या त्वजमीढः समीयिवान् । ऋक्षं संजनयामास धूम्रवर्णं सुदर्शनम्[10] ॥ १०५
ऋक्षात्संवरणो जज्ञे कुरुः संवरणात्तथा[11] । यः प्रयागादतिक्रम्य कुरुक्षेत्रं चकार ह ॥ १०६
पुण्यं च रमणीयं च पुण्यकृद्भिर्निषेवितम् । तस्यान्ववायः सुमहान्यस्य नाम्नाऽथ कौरवाः १०७
कुरोश्च पुत्राश्चत्वारः सुधन्वा सुधनुस्तथा । परीक्षिच्च[12] महाबाहुः प्रवरश्चारिमेजयः ॥ १०८
*परीक्षितस्तु दायादो धार्मिको जनमेजयः+ । श्रुतसेनोऽग्रसेनश्च भीमसेनश्च नामतः ॥ १०९
एते सर्वे महाभागा विक्रान्ता बलशालिनः । जनमेजयस्य[13] पुत्रस्तु[14] सुरथो मतिमांस्तथा ॥ ११०
सुरथस्य तु विक्रान्तः पुत्रो जज्ञे विदूरथः । विदूरथस्य दायाद ऋक्ष[15] एव महारथः[16] ॥ १११

+ एतदनन्तरं क. पुस्तके—

"पुत्रः सत्यधृतिर्नाम धनुर्वेदस्य पारगः । तस्य सत्यधृते रेतो दृष्ट्वाऽप्सरसमग्रतः ॥
अवस्कन्नं शरस्तम्बे मिथुनं समपद्यत । कृपया तच्च जगृहे शंतनुर्मृगयां गतः ॥
कृपः स्मृतः स वै तस्माद्गौतमी च कृपी स्मृता । एते शारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः ॥
अत ऊर्ध्वं प्रवक्ष्यामि दिवोदासस्य संततिम् । दिवोदासस्य दायादो ब्रह्मर्षिर्मित्रयुर्नृपः ॥
मित्रयोस्तु ततः सोमो मैत्रेयास्ते ततः स्मृताः । एतेऽपि संश्रिताः पक्षं क्षत्रोपेतास्तु भार्गवम्" ॥

इत्येते श्लोका अधिका उपलभ्यन्ते, इन्द्रसेनेत्याद्यर्धं च नोपलभ्यते ॥

* पुस्तकत्रयेऽप्ययमेव पाठः । + एतदादि मुनिसत्तमा इत्यन्तं नास्ति ख. पुस्तके । * इदमर्धं कपुस्तके नास्ति ।

+ इतःपरमधिकाः श्लोकाः ख. पुस्तके ते यथा—

"सुधन्वनस्तु दायादः सुहोत्रो मतिमान्स्मृतः । च्यवनस्तस्य पुत्रस्तु राजा धर्मार्थकोविदः ॥
च्यवनात्कृतयज्ञस्तु इष्ट्वा यज्ञैस्तु धर्मवित् । विश्रुतं जनयामास पुत्रमिन्द्रसखं नृपम् ॥
चैद्योपरिवरं वीरं वसुं नाम्नाऽन्तरिक्षगम् । चैद्योपरिवाराज्जज्ञे गिरिका सप्त मानवान् ॥
महारथो मगध इति विश्रुतो यो बृहद्रथः । प्रत्यग्रथः क्रथश्चैव यमाहुर्मणिवाहनम् ॥
शाकलश्च यदुश्चैव मत्स्यः काली च सप्तमः । बृहद्रथस्य दायादः कुशाग्रो नाम विश्रुतः ॥
कुशाग्रस्याऽऽत्मजो विद्वानृषभो नाम वीर्यवान् । जह्नोस्तु कथयिष्यामि वंशं सर्वगुणान्वितम् ॥
जह्नुस्त्वजनयत्पुत्रं सुरथो नाम भूमिपम्" इति ॥

---

१ क. पञ्चानां । ख. पञ्च ते र° । २ ख. °ञ्चालानां तु । ३ ग. वध्वश्वं प्र° । ४ ख. °तः । तथा ग्लसमतेः पुत्रो अजमीढो महाबलः । अ° । ५ क. °षतः पृषतस्य विभावसुः । आ° । ६ क. ख. °ता ह्येते । ७ ख. सोमकात् । ८ क. °वद्धिप्राः प° । ९ क. °वित्रमि° । १० ग. सुदर्शनः । ११ क. ख. °त्ततः । यः । १२ क. परीक्षितो । ग. मरीचिश्च । १३ ख. जन्मेज° । १४ ख. पुत्रोऽभूत्सुर° । ग. पुत्रौ तु सु° । १५ ग. क्षत्र । १६ क. ख. महाबलः ।

द्वितीयस्तु भरद्वाजान्नाम्ना तेनैव विश्रुतः । द्वावृक्षौ सोमवंशेऽस्मिन्द्वावेव च परीक्षितौ ॥ ११२
भीमसेनास्त्रयो विप्रा द्वौ चापि जनमेजयौ । ऋक्षस्य तु द्वितीयस्य भीमसेनोऽभवत्सुतः ॥ ११३
प्रतीपो भीमसेनात्तु प्रतीपस्य तु शांन्तनुः । देवापिर्बाह्लिकश्चैव त्रय एव महारथाः ॥ ११४
शान्तनोस्त्वभवद्भीष्मस्तस्मिन्वंशे द्विजोत्तमाः । बाह्लिकस्य तु राजर्षेर्वंशं शृणुत भो द्विजाः ११५
बाह्लिकस्य सुतश्चैव सोमदत्तो महायशाः । जज्ञिरे सोमदत्तात्तु भूरिर्भूरिश्रवाः शलः ॥ ११६
उपाध्यायस्तु देवानां देवापिरभवन्मुनिः । च्यवनपुत्रः कृतक इष्ट आसीन्महात्मनः ॥ ११७
शान्तनुस्त्वभवद्राजा कौरवाणां धुरंधरः । शान्तनोः संप्रवक्ष्यामि वंशं त्रैलोक्यविश्रुतम् ॥ ११८
गाङ्गं देवव्रतं नाम पुत्रं सोऽजनयत्प्रभुः । स तु भीष्म इति ख्यातः पाण्डवानां पितामहः ११९
काली विचित्रवीर्यं तु जनयामास भो द्विजाः । शान्तनोर्दयितं पुत्रं धर्मात्मानमकल्मषम् ॥ १२०
कृष्णद्वैपायनाच्चैव क्षेत्रे वैचित्रवीर्यके । धृतराष्ट्रं च पाण्डुं च विदुरं चाप्यजीजनत्+ ॥ १२१
[*धृतराष्ट्रस्तु गान्धार्यां पुत्रानुत्पादयच्छतम्] । तेषां दुर्योधनः श्रेष्ठः सर्वेषामपि स प्रभुः १२२
पाण्डोर्धनंजयः पुत्रः सौभद्रस्तस्य चाऽऽत्मजः । अभिमन्योः परीक्षित्तु पिता पारीक्षितस्य ह ॥
पारीक्षितस्य काश्यायां द्वौ पुत्रौ संबभूवतुः । चन्द्रापीडस्तु नृपतिः सूर्यापीडश्च मोक्षवित् ॥१२४
चन्द्रापीडस्य पुत्राणां शतमुत्तमधन्विनाम् । जांनमेजयमित्येवं क्षात्रं भुवि परिश्रुतम् ॥ १२५
तेषां ज्येष्ठस्तु तत्राऽऽसीत्पुरे वारणसाह्वये । सत्यकर्णो महाबाहुर्यज्वा विपुलदक्षिणः ॥ १२६
सत्यकर्णस्य दायादः श्वेतकर्णः प्रतापवान् । अपुत्रः स तु धर्मात्मा प्रविवेश तपोवनम् ॥ १२७
तस्माद्वनगता गर्भं यादवी प्रत्यपद्यत । सुचारोर्दुहिता सुभ्रूर्मालिनी ग्राहमालिनी ॥ १२८
संभूते स च गर्भे च श्वेतकर्णः प्रजेश्वरः । अन्वगच्छत्कृतं पूर्वं महाप्रस्थानमच्युतम् ॥ १२९

+ एतदनन्तरं ख.पुस्तकेऽधिकाः श्लोका उपलभ्यन्ते ते चाग्रे लिखिताः—

"तथाऽजपार्श्व इति वै चक्राते तस्य नाम तत् । स तु वेमकशालायां द्विजानां परिवर्धितः ॥
वेमकस्य तु भार्या तमुद्व(?)हत्पुत्रकारणात् । वेमक्याः स तु पुत्रोऽभूद्ब्राह्मणौ सचिवौ च तौ ॥
तेषां पुत्राश्च पौत्राश्च युगपत्तुल्यजीविनः । स एष पौरवो वंशः पाण्डवानां प्रतिष्ठितः ॥
श्लोकोऽपि चात्र गीतोऽयं नाहुषेण ययातिना । जरासंक्रमणे पूर्वं भृशं प्रीतेन धीमता ॥
अचन्द्रार्कग्रहा भूमिर्भवेदत्र न संशयः । अपौरवा न तु मही भविष्यति कदाचन ॥
एष वः पौरवो वंशो विख्यातः कथितो मया । तुर्वसोश्च प्रवक्ष्यामि द्रुह्योश्चानोर्यदोस्तथा ॥
तुर्वसोश्च सुतो वह्निर्गोभानुस्तस्य चाऽऽत्मजः । गोभानोस्तु सुतो राजा त्रैसानुरपराजितः ॥
करंधमस्तु त्रैसानोर्मरुतस्तस्य चाऽऽत्मजः । अन्यस्त्वविजितो राजा मरुतः कथितस्तव ॥
राजा च परमायुश्च यज्वा विपुलदक्षिणः । दुहिता संयता नाम्नी तस्याऽऽसीत्पृथिवीपतेः ॥
दक्षिणार्थे हि सा दत्ता संवर्ताय महात्मने । दुष्यन्तं पौरवं चापि लेभे पुत्रमकल्मषम् ॥
एवं ययातेः शापेन जरासंक्रमणे तदा । पौरवं तुर्वसोर्वंशं प्रविवेश नृपोत्तमः ॥
दुष्यन्तस्य तु दायादः करूषः स नरेश्वरः । करूषादथक्रीडाश्च(?) चत्वारस्तस्य चाऽऽत्मजाः ॥
यामश्च केरलश्चैव कोलश्चोलश्च पार्थिवः । तेषां जनपदाः स्फीताः पाण्ड्याश्चोलाश्च केरलाः ॥
द्रुह्योश्च तनयो विप्रा वभ्रुः सेरुश्च पार्थिवः" इति ॥

* धृतराष्ट्रेण गान्धार्यां पुत्रा उत्पादिताः शतामिति तूचितम् ।

---

१ क. ख. °यस्त्वभवद्राजा नाम्ना । २ क. °स्मिन्विख्यातौ द्विजसत्तमाः । भीं° । ३ क. ख. शंतनुः । ४ क. °तश्चाऽऽसीत्सोम° । ५ ग. °त्तु हविर्भूरि° । ६ ख. °वनः पुत्रकृ° । ७ ख. इन्दुश्चाऽऽसीन्महामतिः । शा° । ८ क. ख. °षामेव स । ९ क. मोक्षजित् । १० क. ख. जान्मेजयं व इत्ये° । ११ क. ख. °त्रं तु वि° ।

सा तु दृष्ट्वा प्रियं तं च मालिनी पृष्ठतोऽन्वगात् । सुचारोर्दुहिता साध्वी वने राजीवलोचना ॥
पथि सा सुषुवे बाला सुकुमारं कुमारकम् । तमपास्याथ तत्रैव राजानं साऽन्वगच्छत ॥ १३१
पतिव्रता महाभागा द्रौ[1]प[2]दीव पुरा सती । कु[3]मारः सुकुमारोऽसौ [4]गिरिपृष्ठे रुरोद [5]ह ॥ १३२
दयार्थं तस्य मेघास्तु प्रादुरासन्महात्मनः । श्रविष्ठायास्तु पुत्रौ द्वौ पै[6]प्पलादिश्च कौशिकः ॥ १३३
दृष्ट्वा कृपान्वितौ *गृह्य [7]तौ प्राक्षालयतां जले । निघृष्टौ तस्य पार्श्वौ तु शिलायां [8]रुधिरप्लुतौ ॥
अजश्[9]यामः स पार्श्[10]वाभ्यां घृष्टाभ्यां सुसमाहितः । अजश्यामौ तु तत्पार्श्वौ देवेन संबभूवतुः ॥
[+अथाजपार्श्व इति वै चक्राते नाम तस्य तौ । स तु रेमकशालायां द्विजाभ्यामभिवर्धितः १३६
रेमकस्य तु भार्या तमुद्वह(?)त्पुत्रकारणात् । रेमत्याः स तु पुत्रोऽभूद्ब्राह्मणौ सचिवौ तु तौ १३७
तेषां पुत्राश्च पौत्राश्च युगपत्तुल्यजीविनः । स एष पौरवो वंशः पाण्डवानां महात्मनाम् ॥ १३८
श्लोकोऽपि चात्र गीतोऽयं नाहुषेण ययातिना । जरासंक्रमणे पूर्वं तदा प्रीतेन धीमता ॥ १३९
अचन्द्रार्कग्रहा भूमिर्भवेदियमसंशयम् । अपौरवा मही नैव भविष्यति कदाचन ॥ १४०
एष वः पौरवो वंशो विख्यातः कथितो मया । तुर्वसोस्तु प्रवक्ष्यामि द्रुह्योश्चानोर्यदोस्तथा १४१
तुर्वसोस्तु सुतो वह्निर्गोभानुस्तस्य चाऽऽत्मजः । गोभानोस्तु सुतो राजा ऐशानुरपराजितः १४२
करंधमस्तु ऐशानोर्मरुत्तस्तस्य चाऽऽत्मजः । अन्यस्त्वाविक्षितो राजा मरुत्तः कथितो मया १४३
अनपत्योऽभवद्राजा यज्वा विपुलदक्षिणः । दुहिता संयता नाम तस्याऽऽसीत्पृथिवीपतेः १४४
दक्षिणार्थं तु सा दत्ता संवर्ताय महात्मने । दुष्यन्तं पौरवं चापि लेभे पुत्रमकल्मषम् ॥ १४५
एवं ययातिशापेन जरासंक्रमणे तदा । पौरवं तुर्वसोर्वंशं प्रविवेश द्विजोत्तमाः ॥ १४६
दुष्यन्तस्य तु दायादः करूरोमः प्रजेश्वरः । [11]करूरोमादथाह्रीदश्चत्वारस्तस्य चाऽऽत्मजाः १४७
पाण्ड्यश्च केरलश्चैव कालश्चोलश्च पार्थिवः । द्रुह्योश्च तनयो राजन्बभ्रुसेतुश्च पार्थिवः] ॥ १४८
अङ्गारसेतुस्तत्पुत्रो मरुतां पतिरुच्यते । यौवनाश्वेन समरे कृच्छ्रेण निहतो बली ॥ १४९
युद्धं सुमहदप्यासीन्मासान्परि[12]चरं दश । अङ्गारसेतोर्दायादो गान्धारो नाम पार्थिवः ॥ १५०
[13]ख्यायते यस्य नाम्ना वै गान्धारविषयो महान् । गान्धारदेशजाश्चैव तुरगा वाजिनां वराः १५१
अनोस्तु पुत्रो धर्मोऽभू[14]द्द्यूतस्तस्याऽऽत्मजोऽभव[15]त् । द्यूताद्वनदुहो जज्ञे प्रचेतास्तस्य चाऽऽत्मजः
प्रचेतसः सुचेतास्तु कीर्तितास्त्वनवो म(स्तुर्वसोर्म)या । बभूवुस्तु यदोः पुत्राः पञ्च देवसुतोपमाः ॥
सहस्रादः पयोदश्च क्रोष्टा [16]नीलोऽञ्जिकस्तथा । सहस्रादस्य दायादास्त्रयः परमधार्मिकाः ॥ १५४
[17]हैहयश्च हयश्चैव राजा वेणुहयस्तथा । हैहयस्याभवत्पुत्रो धर्मनेत्र इति श्रुतः ॥ १५५
धर्मनेत्रस्य कार्त[18]स्तु साहञ्जस्तस्य चाऽऽत्मजः । साहञ्जनी नाम पुरी तेन राज्ञा निवेशिता १५६
आसीन्*महिष्मतः पुत्रो भद्रश्रेण्यः प्रतापवान् । भद्रश्रेण्यस्य दायादो दुर्दमो नाम विश्रुतः ॥ १५७
दुर्दमस्य सुतो धीमान्कनको नाम नामतः । कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः ॥ १५८

---

* ल्यबार्षः । + इत आरभ्याग्रे बभ्रुसेतुश्च पार्थिव इत्यन्तं ख. पुस्तके नास्ति । * इदं साहञ्जस्यापरं नामेति भाति ।

---

१ ग. °पती च पु° । २ ख. °दी च पुरातनी । कु° । ३ ख. कुमारं । ४ ख. गिरिकुम्भे । ५ क. ह । पार्श्वतस्तस्य । ६ ख. °प्पल्यादि° । ७ क. ख. तं । ८ क. रुधिरोक्षितौ । ९ ग. °श्यामस्य पा° । १० क. °र्श्वाभ्यामुभाभ्यां । ११ ग. °रूपामा° । १२ ग. °चतुर्दश । १३ ख. ख्यातस्तु । १४ ख. °भूद्घृत° । १५ख. °त् । घृताच्छतद्रुहो । १६ ख. °ष्टाऽनिलोऽ° । १७ ख. °हश्च हैहयश्चै° । १८ ग. °स्तु कार्तपुत्रास्तथाऽभवन् । कृ° ।

कृतवीर्यः कृतौजाश्च [1]कृतधन्वा तथैव च । [2]कृताग्निस्तु चतुर्थोऽभूत्कृतवीर्यादथार्जुनः ॥ १५९
योऽसौ बाहुसहस्रेण सप्तद्वी[3]पेश्वरोऽभवत् । जिगाय पृथिवीमेको रथेनाऽऽदित्यवर्चसा ॥ १६०
स हि वर्षायुतं तप्त्वा तपः परमदुश्चरम् । दत्तमाराधयामास कार्तवीर्योऽत्रिसंभवम् ॥ १६१
तस्मै दत्तो वरान्प्रादाच्चतुरो भूरितेजसः । पूर्वं बाहुसहस्रं तु प्रार्थितं सुमहद्वरम् ॥ १६२
अधर्मेऽधीयमानस्य सद्भिस्तत्र निवारणम् । उग्रेण पृथिवीं जित्वा[4] धर्मेणैवानुरञ्जनम् ॥ १६३
सङ्ग्रामान्सुबहूञ्जित्वा हत्वा चारीन्सहस्रशः । सङ्ग्रामे वर्तमानस्य वधं चाभ्यधिकाद्रणे ॥ १६४
तस्य बाहुसहस्रं तु युध्यतः कि[5]ल भो द्विजाः । योगाद्योगीश्वरस्येव प्रादुर्भवति मायया ॥१६५
तेनेयं पृथिवी सर्वा सप्तद्वीपा सपत्तना । ससमुद्रा सनगरा उग्रेण विधिना जिता ॥ १६६
तेन सप्तसु द्वीपेषु सप्त यज्ञशतानि वै । प्राप्तानि विधिना राज्ञा श्रूयन्ते मुनिसत्तमाः ॥ १६७
सर्वे यज्ञा मुनिश्रेष्ठाः सहस्रशतदक्षिणाः । *सर्वे काञ्चनयूपाश्च सर्वे काञ्चनवेदयः ॥ १६८
सर्वे देवैर्मुनिश्रेष्ठा विमानस्थैरलंकृतैः । गन्धर्वैरप्सरोभिश्च नित्यमेवोपशोभिताः ॥ १६९
यस्य यज्ञे जगौ गाथां गन्धर्वो नारदस्तथा । [6]वरीदासात्मजो विद्वान्महिम्ना तस्य विस्मितः ॥

नारद उवाच—

न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः । यज्ञैर्दानैस्तपो[7]भिश्च विक्रमेण श्रुतेन च ॥ १७१
स हि सप्तसु द्वीपेषु चर्मी खड्गी शरासनी । रथी द्वीपाननुचरन्योगी संदृश्यते नृभिः ॥ १७२
अनष्टद्रव्यता चैव न शोको न च विभ्रमः । प्रभावेण महाराज्ञः प्रजा धर्मेण र[8]क्षतः ॥ १७३
स[9] सर्वरत्नभा[10]क्सम्राट्चक्रवर्ती बभूव ह । स एव पशुपालोऽभूत्क्षेत्रपालः स एव च ॥ १७४
स एव वृष्ट्या पर्जन्यो योगित्वादर्जुनोऽभवत् । स वै बाहुसहस्रेण ज्यावातकठिनत्वचा ॥ १७५
भाति रश्मिसहस्रेण शरदीव च भास्करः । स हि नागान्मनुष्येषु माहिष्मत्यां महाद्युतिः ॥१७६
कर्कोट[11]कसुताञ्जित्वा पुर्यां तस्यां न्यवेशयत् । स वै वेगं समुद्रस्य प्रावृट्कालेऽम्बुजेक्षणः ॥१७७
क्रीडन्निव भुजोद्भिन्नं प्रतिस्रोतश्चकार ह । लुण्ठिता क्रीडता ते[12]न नदी तद्ग्राममालि[13]नी ॥ १७८
चलदूर्मिसहस्रेण श[14]ङ्किताऽभ्येति नर्मदा । तस्य बाहुसहस्रेण क्षिप्यमाणे महोदधौ ॥ १७९
भयान्निलीना निश्चेष्टाः पातालस्था महीसुराः । चूर्णीकृतमहावी[15]चिं चलन्मीनमहातिमिम् ॥ १८०
मारु[16]ताविद्धफेनौघमावर्तक्षो[17]भसंकुलम् । प्रावर्तयत्तदा राजा सहस्रे[18]ण च बाहुना ॥ १८१
देवासुरसमाक्षिप्तः क्षीरोदमिव मन्दरैः[19] । मन्दरक्षोभचकि[20]ताः अमृतोत्पादशङ्किताः ॥ १८२
सहसोत्पतिता भीता भीमं दृष्ट्वा नृपोत्तमम् । नता निश्चलमूर्धानो बभूवुस्ते महोरगाः ॥ १८३
सायाह्ने कदलीखण्डाः कम्पिता इव वायुना । स वै बद्ध्वा धनुर्ज्याभिरुत्सिक्तं पञ्चभिः शरैः ॥
लङ्केशं मोहयित्वा तु स[21]बलं रावणं बलात् । निर्जित्य वशमानीय माहिष्मत्यां बबन्ध तम् १८५

* इदमर्धं ख. पुस्तके नास्ति ।

१ ख. कृतकर्मा । २ क. कृताविनश्चतु° । ३ ख. °द्वीपाधिपोऽभ° । ४ ख. °त्वा स्वधर्मेणानु° । ५ ख. °ल भारतः । यो° । ६ ख. वरदा° । ७ ख. °भिर्वा वि° । ८ क. सत्कृतः । ग. राक्षिताः । ९ क. स तु सर्वत्र भोगाढ्यश्चक्र° । १० ख. °त्नभोगाढ्यश्चक्र° । ११ ख. °कयुतान्क्षिप्त्वा पु° । १२ ग. °न फेनश्चोद्दाम° । १३ ग. °नी । वल° । १४ ग. °ङ्किनाऽभ्ये° । १५ ग. °चिं वल° । १६ क. °रुतोद्भिन्नफे° । १७ ग. °भदुःसहम् । १८ क. °स्रेणैव बा° । १९ ख. °रः । तत्संक्षोभेणाऽऽचकितास्ताक्ष्यागमनश° । २० क. °तास्ताक्ष्यागमनश° । २१ ग. सगणं ।

श्रुत्वा तु वद्धं पौलस्त्यं रावणं त्वर्जुनेन च । ततो गत्वा पुलस्त्यस्तमर्जुनं ददृशे स्वयम् ॥ १८६
मुमोच रक्षः पौलस्त्यं पुलस्त्येनाभियाचितः । यस्य बाहुसहस्रस्य बभूव ज्यातलस्वनः ॥ १८७
युगान्ते तोयदस्येव स्फुटतो ह्यशनेरिव । अहो बत मृधे वीर्यं भार्गवस्य यदच्छिनत् ॥ १८८
राज्ञो बाहुसहस्रस्य हैमं तालवनं यथा । तृषितेन कदाचित्स भिक्षितश्चित्रभानुना ॥ १८९
स भिक्षामददाद्वीरः सप्त द्वीपान्विभावसोः । पुराणि ग्रामघोषांश्च विषयांश्चैव सर्वशः ॥ १९०
जज्वाल तस्य सर्वाणि चित्रभानुर्दिधक्षया । स तस्य पुरुषेन्द्रस्य प्रभावेण महात्मनः ॥ १९१
ददाह कार्तवीर्यस्य शैलांश्चैव वनानि च । स शून्यमाश्रमं रम्यं वरुणस्याऽऽत्मजस्य वै ॥ १९२
ददाह बलवद्भीतश्चित्रभानुः स हैहयः । यं लेभे वरुणः पुत्रं पुरा भास्वन्तमुत्तमम् ॥ १९३
वसिष्ठं(ष्ठो) नाम स मुनिः ख्यात आपव इत्युत । यत्राप(तत्राऽऽप)वस्तु तं क्रोधाच्छप्तवानर्जुनं विभुः
यस्मान्न वर्जितमिदं वनं ते मम हैहय । तस्मात्ते दुष्करं कर्म कृतमन्यो हनिष्यति ॥ १९५
रामो नाम महाबाहुर्जामदग्न्यः प्रतापवान् । छित्वा बाहुसहस्रं ते प्रमथ्य तरसा बली ॥ १९६
[1]तपस्वी ब्राह्मणस्त्वां तु [2]हनिष्यति स भार्गवः । अनष्टद्रव्यता [3]यस्य बभूवामित्रकर्षिणः ॥ १९७
[4]प्रतापेन नरेन्द्रस्य प्रजा धर्मेण रक्ष[5]तः । प्राप्तस्ततोऽस्य मृत्युर्वै तस्य शापान्महामुनेः ॥ १९८
वरस्तथैव भो विप्राः स्वयमेव वृतः पुरा । तस्य पुत्र[6]शतं त्वासीत्पञ्च शेषा महात्मनः ॥ १९९
कृतास्त्रा [7]बलिनः शूरा धर्मात्मानो यशस्विनः । शूरसेनश्च शूर[8]श्च वृषणो मधुपध्वजः ॥ २००
जयध्वजश्च नाम्नाऽऽसीदावन्त्यो नृपतिर्महान् । कार्तवीर्यस्य तनया वीर्यवन्तो महाबलाः २०१
जयध्वजस्य पुत्रस्तु तालजङ्घो महाबलः । तस्य पुत्रशतं ख्यातास्तालजङ्घा इति स्मृताः २०२
तेषां कुले [9]मुनिश्रेष्ठा हैहयानां महात्मनाम् । वीतिहोत्राः सुजा[10]ताश्च भोजाश्चावन्तयः स्मृताः ॥
[11]तौण्डिकेराश्च विख्यातास्तालजङ्घास्तथैव [12]च । भरताश्च सुजाताश्च बहुत्वान्नानुकीर्तिताः २०४
[13]वृषप्रभृतयो विप्रा यादवाः पुण्यकर्मिणः । वृषो वंशधरस्तत्र तस्य पुत्रोऽभवन्मधुः ॥ २०५
मधोः पुत्रशतं त्वासीद्वृषणस्तस्य वंशकृत् । वृषणाद्वृष्णयः सर्वे मधोस्तु माधवाः स्मृताः ॥ २०६
यादवा यदुनाम्ना ते निरुच्यन्ते च हैहयाः । न तस्य वित्तनाशः स्यान्नष्टं प्रति लभेच्च सः २०७
कार्तवीर्यस्य यो जन्म कथयेदिह नित्यशः । एते ययातिपुत्राणां पञ्च वंशा द्विजोत्तमाः ॥ २०८
कीर्तिता [14]लोकवीराणां ये [15]लोकान्धारयन्ति वै । भूतानीव मुनिश्रेष्ठाः पञ्च स्थावरजङ्गमान् २०९
श्रुत्वा पञ्च विसर्गांस्तु राजा धर्मार्थकोविदः । वशी भवति पञ्चानामात्मजानां तथेश्वरः ॥ २१०
लभेत्पञ्च वरांश्चैव दुर्लभानिह लौकिकान् । आयुः कीर्तिं तथा पुत्रानैश्वर्यं भूतिमेव [16]च ॥ २११
धारणाच्छ्रवणाच्चैव पञ्चवर्गस्य भो द्विजाः । क्रोष्टोर्वंशं मुनिश्रेष्ठाः शृणुध्वं गदतो मम ॥ २१२
यदोर्वंशधरस्याथ यज्विनः पुण्यकर्मिणः । [17]क्रोष्टोर्वंशं हि [18]श्रुत्वैव सर्वपापैः प्रमुच्यते ॥
यस्यान्ववायजो विष्णुर्हरिर्वृष्णिकुलोद्वहः ॥ २१३

इति श्रीमहापुराणे आदिब्राह्मे ययातिवंशानुकीर्तनं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—११०८

---

१ ख. तेजस्वी । २ ख. ग. वधिष्यति । ३ क. तस्य । ४ क. ग. प्रभावेण । ५ क. ग. °तः । रामात्ततोऽ° । ६ क. ख. °शतान्यासन्पञ्च । ७ क. धन्विनः । ८ ग. °श्च धृष्टोक्तः कृष एव च । ज° । ९ ख. महावीर्या । १० ग. °जात्याश्च । ११ क. तौंडिके° । ख. तोण्डिके° । १२ क. च । भार° । १३ ख. °षमष्टतपो वि° । १४ क. °णां लोकधारणहेतवः । भू° । १५ ख. लोकांस्तार° । १६ ख. वा । १७ क्रोष्टुवंशं । १८ ख. ग. श्रुत्वैनं ।

अथ चतुर्दशोऽध्यायः ।

लोमहर्षण उवाच—

गान्धारी चैव माद्री च क्रोष्टोर्भार्ये बभूवतुः । गान्धारी जनयामास अनमित्रं महाबलम् ॥ १
माद्री युधाजितं पुत्रं ततोऽन्यं देवमीढुषम् । तेषां वंशस्त्रिधा भूतो वृष्णीनां कुलवर्धनः ॥ २
माद्र्याः पुत्रौ तु जज्ञाते [1]श्रुतौ वृष्ण्यन्धकावुभौ । जज्ञाते तनयौ वृष्णेः श्वफल्कश्चित्रकस्तथा ॥ ३
श्व[2]फल्कस्तु मुनिश्रेष्ठा [3]धर्मात्मा यत्र वर्तते । नास्ति व्याधिभयं [4]तत्र नावर्षस्तपमेव च ॥ ४
कदाचित्काशिराजस्य विषये मुनिसत्त[5]माः । त्रीणि [6]वर्षाणि पूर्णानि नावर्षत्पाकशासनः ॥ ५
स [7]तत्र चाऽऽनयामास श्वफल्कं [8]परमार्चितम् । श्वफल्कपरि[9]वर्तेन ववर्ष हरिवाहनः ॥ ६
श्वफल्कः काशिराजस्य सुतां भार्या[10]मविन्दत । गान्दिनीं नाम गां सा च ददौ विप्राय नित्य[11]शः ॥
दाता यज्वा च वीरश्च श्रुतवानतिथिप्रियः । अक्रूरः सुषुवे तस्माच्छ्वफल्काद्भूरिदक्षिणः ॥ ८
उप[12]मद्गुस्तथा [13]मद्गुर्मेदुरश्चारिमेज[14]यः । [15]अविक्षितस्तथाऽक्षेपः शत्रुघ्नश्चारिमर्दनः ॥ ९
धर्मधृग्यतिधर्मा [16]च धर्मोक्षाऽन्धकरुस्तथा । आवाहप्रतिवाहौ च सुन्दरी च [17]वराङ्गना ॥ १०
अक्रूरेणोग्रसेनायां सुगात्र्यां [18]द्विजसत्तमाः । प्रसेनश्चोपदेवश्च जज्ञाते दे[19]ववर्चसौ ॥ ११
चित्रकस्याभवन्पुत्राः पृथुर्विपृथुरेव च । अश्वग्रीवोऽश्वबाहुश्च स्वपार्श्वकगवेषणौ ॥ १२
अरिष्टनेमि[20]रश्वश्च सुधर्मा धर्मभृत्तथा । सुबा[21]हुर्बहुबाहुश्च श्रविष्ठाश्रवणे स्त्रियौ ॥ १३
[22]असिक्न्यां जनयामास शूरं वै देवमीढुषम् । महिष्यां जज्ञिरे शू[23]रा भोज्यायां पुरुषा दश ॥ १४
वसुदे[24]वो महाबाहुः पूर्वमानकदुन्दुभिः । जज्ञे यस्य प्रसूतस्य दुन्दुभ्यः प्राणदन्दिवि ॥ १५
आनकानां च संह्रादः सुमहानभवद्दिवि । पपात पुष्प[25]वर्षश्च शूरस्य [26]जनने [27]महान् ॥ १६
मनुष्यलोके कृत्स्नेऽपि रूपे नास्ति समो भुवि । यस्याऽऽसीत्पुरुषाग्र्यस्य कान्तिश्चन्द्रमसो यथा
दे[28]वभागस्ततो जज्ञे तथा देवश्रवाः पुनः । अना[29]धृष्टिः कन[30]वको वत्सवा[31]नथ गृञ्जमः ॥ १८
श्यामः शमीको गण्डूषः पञ्च चास्य वराङ्गनाः । पृथुकीर्तिः पृथा चैव श्रुतदेवा श्रुतश्रवा ॥ १९
राजाधिदेवी च तथा पञ्चैता वीरमातरः । श्रुतश्रवायां चै[32]द्यस्तु शिशुपालोऽभवन्नृपः ॥ २०
हिरण्यकशिपुर्यो[33]ऽसौ दैत्यराजोऽभवत्पुरा । पृथुकीर्त्यां तु संजज्ञे तनयो [34]वृद्धशर्मणः ॥ २१
करूषाधिपतिर्वीरो दन्तवक्रो महाबलः । पृथां दुहितरं चक्रे कुन्तिस्तां पाण्डुरावहत् ॥ २२
[35]यस्यां स धर्मविद्राजा धर्मो जज्ञे युधिष्ठिरः । भीमसेनस्तथा वातादिन्द्राच्चैव धनंजयः ॥ २३

---

१ क. ख. शुभौ । २ क. °फल्कात्तु मु° । ३ क. धर्मो नैवात्यवर्तत । ना° । ४ क. °त्र न चावृष्टिभयं तथा । क° । ५ क. °माः । पुरा द्वादश वर्षाणि ना° । ६ ग. वर्षसहस्राणि ना° । ७ ख. °त्र वासया° । ग. °त्र याजया° । ८ ग. परमार्चितः । ९ क. °रिचारेण व° । १० ख. °मवाप ह । गा° । ११ क. °शः । जाता यज्ञप्रिया दक्षा श्रुतज्ञा चातिथिप्रिया । अ° । १२ क. °मन्युस्तथा मन्युर्मे° । १३ ख. °द्गुर्मुदर° । ग. °द्गुर्मृदवश्चा° । १४ ग. °यः । परिक्षिपस्तथाऽत्यक्षः श° । १५ ख. अरिक्षिपस्तथोपेक्षः श° । १६ ग. च गृध्रमो जान्तकस्त° । १७ क. वरानना । १८ ख. कुरुनन्दनौ । १९ क. ख. मुनिवर्चसौ । २० ग. °रब्धश्च । २१ ख. °हुश्चारुबा° । २२ ग. अश्मक्यां । २३ क. °रास्ततोऽन्ये पु° । २४ क. °वोऽनन्तबा° । २५ ख. °वर्ष च शू° । २६ ग. भवने । २७ ख. महत् । २८ क. °वनाग° । २९ क. °नावृष्टिः । ३० क. °को वंशे तस्य बभूव ह । श्या° । ३१ ग. °नमसुञ्जयः । श्या° । ३२ ग. °द्यस्य शि° । ३३ ग. °सौ चैद्यरा° । ३४ क. विश्वकर्मणा । ३५ क. यस्याः ।

लोके प्रतिरथो वीरः शक्रतुल्यपराक्रमः । अनमित्रां[1]च्छिनिर्जज्ञे कनिष्ठा[2]द्वृष्णिनन्दनात् ॥ २४
शैनेयः सत्यकस्तस्माद्युयुधानश्च सात्यकिः । उद्धवो देवभागस्य महाभागः सुतोऽभवत् ॥ २५
पण्डितानां परं प्राहुर्देवश्रवसमु[3]त्तमम् । अश्मक्यं[4] प्राप्तवान्पुत्रमना[5]धृष्टिर्यशस्विनम् ॥ २६
[6]निवृत्तशत्रुं शत्रुघ्नं[7] श्रुतदेवा त्वजायत[8] । श्रुतदेवात्मजास्ते तु (जोऽसौ तु) नैषादिर्यः परिश्रुतः २७
एकलव्यो मुनिश्रेष्ठा निषादैः परिवर्धितः । वत्सवते[9] त्वपुत्राय वसुदेवः प्रतापवान् ॥
अद्भिर्ददौ सुतं वीरं शौरिः कौ[10]शिकमौरसम् ॥ २८
गण्डूषाय ह्यपुत्राय विष्वक्सेनो ददौ सुतान् । चारुदेष्णं सु[11]देष्णं च पञ्चालं कृतलक्षणम् ॥ २९
असङ्ग्रामेण यो वीरो नाऽऽव[12]र्तत कदाचन । रौक्मिणेयो महाबाहुः कनीयान्द्विजसत्तमाः ॥ ३०
वायसानां सहस्राणि यं यान्तं पृष्ठतोऽन्वयुः । चारूनद्योपभोक्ष्यामश्चारुदेष्णहतानिति ॥ ३१
तन्त्रिजस्तन्त्रिपालश्च सुतौ कनवकस्य तौ । वीरुश्चाश्वहनुश्चैव वीरौ तावथ गृञ्झिमौ[13] ॥ ३२
श्यामपुत्रः शमीकस्तु शमीको राज्यमावहत् । जुगुप्समानो भोजत्वाद्राजसूयमवाप सः ॥ ३३
अजातशत्रुः शत्रूणां जज्ञे तस्य विनाशनः । वसुदेवसुतान्वीरान्कीर्तयिष्याम्यतः परम् ॥ ३४
वृष्णेस्त्रिविधमेवं तु बहुशाखं म[14]हौजसम् । धारयन्विपुलं वंशं नानर्थैरिह युज्यते ॥ ३५
[*याः पत्न्यो वसुदेवस्य चतुर्दश वराङ्गनाः । पौरवी रोहिणी नाम मदिरादित(स्त)थाऽव(प)रा
वैशाखी च तथा भद्रा सुनाम्नी चैव पञ्चमी । सहदेवा शान्तिदेवा श्रीदेवी देवरक्षिता ॥ ३७
वृकदेव्युपदेवी च देवकी चैव सप्तमी । सुतनुर्वडवा चैव द्वे एते परिचारिके] ॥ ३८
[†पौरवी रोहिणी नाम बाह्लिकस्याऽऽत्मजाऽभवत्] । ज्येष्ठा पत्नी मुनिश्रेष्ठा दयिताऽऽनकदु-
न्दुभेः ॥ ३९
लेभे ज्येष्ठं सुतं रामं श[15]रण्यं श[16]ठमेव च । दुर्दमं द[17]मनं शुभ्रं पिण्डारकमुशीनरम् ॥ ४०
चित्रा नाम कुमारी च रोहि[18]णीतनया न[19]व । चि[20]त्रा सुभद्रेति पुनर्विख्याता मुनिसत्तमाः ॥ ४१
वसुदेवाच्च देवक्यां जज्ञे शौरिर्महायशाः । रामाच्च नि[21]शठो जज्ञे रे[22]वत्यां दयितः सु[23]तः ॥ ४२
सुभद्रायां रथी पार्थादभिमन्युरजायत । अक्रू[24]रात्काशिकन्यायां सत्यकेतुरजायत ॥ ४३
वसुदेवस्य भार्या[25]सु महाभागासु सप्तसु । ये पुत्रा जज्ञिरे शू[26]राः समस्तांस्तान्निबोधत ॥ ४४
भोजश्च विजयश्चैव शान्तिदेवासुतावुभौ । वृकदेवः सुनामायां गदश्चाऽऽस्तां सुतावुभौ ॥ ४५
अगावहं महात्मानं वृकदेवी व्यजायत । कन्या त्रिगर्तराजस्य भा[27]र्या वै[28] शिशिराय[29]णेः ॥ ४६

---

* इत आरभ्य श्लोकत्रयं ख. ग. पुस्तकयोर्नास्ति । † इदमर्धं क. पुस्तके नास्ति ।

---

१ ख. ॰त्राच्छ्रिणिर्ज॰ । २ ग. ॰ष्ठाद्दष्णि॰ । ३ ख. ग. ॰मुद्धवम् । ४ ग. अश्मक्यां । ५ क. ग. ॰नाव्रष्टिं यश॰ । ६ क. विभिन्नशत्रुं । ख. निनर्तशत्रुं । ७ ख. ॰घ्नं नै॰ । ग. ॰घ्नं शक्रादेव व्यजा॰ । ८ ग. ॰त । श्राद्धदेवात्प्रजातस्तु नै॰ । ९ क. व-त्सामस्तस्य पौत्राय शौ॰ । १० क. कौरक॰ । ११ क. सुचारुं । १२ ख. ॰वर्तेत । १३ क. ॰ज्झिनौ । धर्मात्मानौ तयोर्विप्रा अर्भाको राजसत्तमः । जुगुप्समानो भोजस्तु राज॰ । १४ ख. महौजसः । १५ ख. शारणं । ग. सारणं । १६ ख. शवसे॰ । १७ ग. दशनं । १८ क. ॰णी दयिता दश । चि॰ । १९ ग. दश । २० क. पित्रा । २१ क. धिषणो । ख. निषधो । २२ क. ख. रोहिण्यां । २३ क. स्मृतः । ख. पुनः । २४ क. ॰राद्राजक॰ । २५ क. ॰सु तासु सप्तसु भो द्विजाः । ये । २६ ख. शूरा नामतस्ता॰ । २७ ग. भर्ता । २८ क. वैरपरायणा । जि॰ । २९ ग. ॰यणा । जि॰ ।

जिज्ञासां [1]पौरुषे चक्रे न च[2]स्कन्दे च पौरुष[3]म् । कृष्णायससम[4]प्रख्यो वर्षे द्वादशमे [5]तथा ॥ ४७
मिथ्याभिशस्तो गार्ग्यस्तु मन्युर्[6]नाऽतिसमीरि[7]तः । घोषकन्यामुपादाय मैथुनायोपचक्रमे ॥ ४८
गोपा[8]ली चाप्सरास्तस्य गोपस्त्रीवेषधारिणी । धारयामास गार्ग्यस्य गर्भं दुर्धरमच्युतम् ॥ ४९
मानुष्यां [9]गर्ग[10]भार्यायां नियोगाच्छूलपाणिनः । स कालयवनो नाम जज्ञे राजा महाबलः॥ ५०
[11]वृत्तपूर्वार्धकार्य[12][13]स्तु सिंहसंहननो युवा । अपुत्रस्य स राज्ञस्तु ववृधेऽन्तःपुरे शिशुः ॥ ५१
यवनस्य मुनिश्रेष्ठाः स कालयवनोऽभवत् । [14]आयुध्यमानो नृपतिः पर्यपृच्छद्द्विजो[15]त्तमम् ॥ ५२
वृष्ण्यन्धक[16]कुलं तस्य नारदोऽकथ[17]यद्विभुः । अक्षौहिण्या तु सैन्यस्य मथुरामभ्ययात्तदा ॥ ५३
दूतं संप्रेषयामास वृष्ण्यन्धकनिवेशनम् । ततो वृष्ण्यन्धकाः कृष्णं पुरस्कृत्य महामतिम् ॥ ५४
समेता मन्त्रयामासुर्यवनस्य भयात्तदा । कृत्वा विनिश्चयं सर्वे पलायनमरोचयन् ॥ ५५
विहाय मथुरां रम्यां [18]मानयन्तः पिनाकिनम् । कुशस्थलीं द्वारवतीं निवेशयितुमीप्सवः ॥ ५६
इति कृष्णस्य जन्[19]मेदं यः शुचिर्नियतेन्द्रियः । पर्वसु श्रावयेद्विद्वाननृणः स सुखी भवेत् ॥ ५७

इति श्रीमहापुराणे आदिब्राह्मे कृष्णजन्मानुकीर्तनं नाम चतुर्दशोऽध्यायः ॥ १४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—११६५

अथ पञ्चदशोऽध्यायः ।

लोमहर्षण उवाच—

क्रोष्टोरथाभवत्पुत्रो वृजिनीवान्महायशाः । वार्जिनीवतमिच्छन्ति स्वाहिं स्वाहाकृतां वरम् ॥ १
स्वाहिपुत्रोऽभवद्रा[20]जा उष[21]द्गुर्वदतां वरः । महाक्रतुभिरीजे यो विविधैर्भूरिदक्षिणैः ॥ २
ततः प्रसूतिमिच्छ[22]न्वै [23]उषद्गुः सोऽग्र्यमात्मजम् । जज्ञे चित्ररथस्तस्य पुत्रः कर्मभि[24]रन्वितः ॥ ३
आसीच्चैत्ररथिर्वीरो यज्वा विपुलदक्षिणः । शशबिन्दुः परं [25]वृत्तं राजर्षीणामनुष्ठितः ॥ ४
पृथुश्रवाः पृथुयशा राजाऽऽ[26]सीच्छाशबि[27]न्दवः । शंसन्ति च पुराणज्ञाः पार्थश्रवसमन्तरम् ॥ ५
अन्तरस्य सुयज्ञस्तु सुयज्ञतनयोऽभवत् । [28]उषतो यज्ञमखिलं स्व[29]धर्मे च कृता[30]दरः (?) ॥ ६
शिनेयुरभवत्पुत्र [31]उषतः शत्रुतापनः । मरुतस्तस्य तनयो राजर्षिरभवन्नृपः ॥ ७
[32]मरुत्तोऽलभत ज्येष्ठं सुतं कम्बलबर्हिषम् । चचार विपुलं धर्मममर्[33]षात्प्रत्यभाग[34]पि ॥ ८
स सत्प्रसूतिमि[35]च्छन्वै सुतं कम्बलबर्हिषः । बभूव रुक्मकवचः शतप्रस[36]वतः सुतः ॥ ९

---

१ ग. पौरवे । २ क. °स्कन्दास्य पौ° । ३ ख. °म् । स्कन्दाय° । ४ क. °प्रख्ये व° । ग. °प्रख्यैर्वर्षे । ५ क. तदा । भिशस्तो गार्ग्यः शालेन म° । ६ क. °ना समुदीरि° । ख. °नाऽभिस° । ७ ग. °तः । गोपक° । ८ ग. °ली तस्य भद्रा तु गो° । ९ क. गर्गस्य । १० ग. गर्दभा° । ११ ख. ग. वृषपू° । १२ ख. °यस्तमवहत्वाजिनोरणे । अ° । १३ ग. °स्तुमवहत्वाजिनो रणे । अ° । १४ क. सुयुध्यमानो । ग. अयुध्यमानो । १५ ख. ग. °त्तमान् । वृ° । १६ क. °कुले त° । १७ ख. °यद्द्विजाः । अ° । १८ ख. भावयन्तः । १९ क. °न्मेह यः । २० क. °जा षडर्वा वद° । २१ ख. °षगुर्व° । २२ क. °न्वै षडर्वा आप चाऽऽत्म° । २३ ख. उषगुः । २४ ख. °रञ्चितः । २५ क. कृत्यं । २६ ख. °सीच्छश° । २७ ख. °बिन्दुजः । शं° । २८ क. उषितो । २९ ख. °धर्मसुखतां वरः । ग. °धर्ममुखतां वरः । ३० क. °रः । सिनन्युर° । ३१ उषितः । ३२ ग. °रुतस्त्वलभच्छ्रेष्ठं । ३३ ख. °र्षाप्रत्य° । ग. °र्षात्प्रेत्यजाग° । ३४ ख. ग. °पि । शतप्रसू° । ३५ ख. ग. °च्छन्ति सु° । ३६ ख. °वता सु° ।

निहत्य रुक्मकवचः शतं कवचिनां रणे । धन्विनां निशितैर्बाणैरवाप श्रियमुत्तमाम् ॥ १०
जज्ञे च रुक्मकवचा[1]त्परजित्परवीरहा । जज्ञिरे पञ्च पुत्रास्तु महा[2]वीर्याः पराजिताः ॥ ११
रुक्मेषुः पृथुरुक्मश्च [3]ज्यामघः पालितो हरिः । पालितं च हरिं चैव [4]विदेहेभ्यः पिता ददौ ॥ १२
रुक्मेषुरभवद्राजा पृथुरुक्मस्य संश्रयात् । ताभ्यां प्रव्राजितो [5]राजा ज्यामघोऽवसदाश्रमे ॥ १३
प्र[6]शान्तश्च तदा राजा ब्राह्मणैश्चावबोधितः । जगाम धनुरादाय देशमन्यं ध्वजी रथी ॥ १४
नर्मदाकूलमेकाकीमे[7]कलां मृत्तिका[8]वतीम् । [9]ऋक्षवन्तं गिरिं जि[10]त्वा शुक्तिमत्यामुवास [11]सः ॥ १५
ज्यामघस्याभवद्भार्या शैब्या बलवती सती । अपुत्रोऽपि स राजा वै नान्यां भार्यामविन्दत १६
तस्याऽऽसीद्विजयो युद्धे तत्र कन्यामवाप सः । भार्यामुवाच संत्रस्तः [12]स्नुषेति स जनेश्वरः ॥ १७
एतच्छ्रुत्वाऽब्रवीद्देवी कस्य देव स्नुषेति [13]वै । अब्रवीत्तदुपश्रुत्य ज्यामघो राजसत्तमः ॥ १८

राजोवाच—

यस्ते जनिष्यते [14]पुत्रस्तस्य भार्योपपादिता ॥ १९

लोमहर्षण उवाच—

उग्रेण तपसा तस्याः कन्यायाः सा व्यजायत । पुत्रं विदर्भं सुभगा शैब्या परिणता सती ॥ २०
[15]राजपुत्र्यां तु विद्वांसौ स्नुषायां क्र[16]थकैशिकौ । पश्चाद्विदर्भोऽजनयच्छूरौ रणविशारदौ ॥ २१
भीमो विदर्भस्य सुतः कुन्तिस्तस्याऽऽत्मजोऽभवत् । कु[17]न्तेर्धृष्टः सुतो जज्ञे रणधृष्टः प्रतापवान् ॥
धृष्टस्य जज्ञिरे शूरास्त्रयः परमधार्मिकाः । [18]आवन्तश्च दशार्हश्च बली वि[19]षहरश्च [20]सः ॥ २३
दशार्हस्य सुतो व्योमा व्योम्नो जीमूत उच्यते । जीमूतपु[21]त्रो विकृतिस्तस्य भीमरथः [22]स्मृतः ॥ २४
अथ भीमरथस्याऽऽसीत्पुत्रो [23]नवरथस्तथा । [24]तस्य चाऽऽसीद्दशरथः [25]शकुनिस्तस्य चाऽऽत्मजः २५
[26]तस्मात्करम्भः कारम्भिर्देवरातोऽभवन्नृपः । देवक्षत्रोऽभवत्त[27]स्य वृद्धक्षत्रो महाय[28]शाः ॥ २६
देवगर्भसमो जज्ञे देवक्षत्रस्य नन्दनः । मधूनां वंशकृद्राजा मधुर्मधुरवागपि ॥ २७
मधोर्जज्ञेऽथ [29]वैदर्भ्यां पुरुद्वान्पुरुषोत्तमः* । ऐक्ष्वाकी चाभवद्भार्या मधोस्तस्यां व्यजायत ॥ २८
[30]सत्त्वान्सर्व[31]गुणोपेतः सात्वतां कीर्तिवर्धनः । [32]इमां विसृष्टिं विज्ञाय [33]ज्यामघस्य महात्मनः ॥
युज्यते [34]परमप्रीत्या प्रजावांश्च [35]भवेत्सदा ॥ २९

लोमहर्षण [36]उवाच—

सत्त्वतः सत्त्वसंपन्ना[37]न्कौशल्या सुषुवे सुतान् । [38]भागिनं भजमानं च दिव्यं [39]देवावृधं नृपम् ॥ ३०

---

* इतः परमधिकमेतदर्धं ग. पुस्तके—"मधुर्जज्ञेऽथ वैदर्भ्यां भद्रवत्यां कुरुद्वहः" इति ।

१ ग °त्पराजि । २ ख. °वीर्यपराक्रमाः । रु° । ३ क समयः । ग. यामघः । ४ क. वैदिशेभ्यः । ५ ग राज्ये ह्याम° । ६ ख. °शान्तेः सवरस्थश्च ब्रा° । ७ ख. °कलामृ° । ८ क. °वर्तीम् । ९ ग. अक्षवन्तं । १० ग. °त्वा श्रुतिम° । ११ क. सः । श्यामलस्या° । ग. सः । ह्योम° । १२ ख. °षेयं ते ज° । १३ ख. ग. वै । य° । १४ ग. पुत्रो भार्येयं तस्य जातभीः । उ° । १५ क. राजपुत्रौ । १६ ग. °थकौशिकाम् । प° । १७ ग. °न्तेर्वृष्णिसु° । १८ क. अचरश्च । १९ क. °षघर° । २० क. ख. यः । २१ क. ख. °त्रो बृहतिस्त° । २२ ख. सुतः । २३ ग. नरर° । २४ ग. तथा । २५ क. शक्रतुल्योऽस्य । २६ क. ततः करम्भिस्तस्माच्च देव° । २७ ख. ग. °स्य देवक्षत्रिर्महा° । २८ क. °शाः । हेमग° । २९ क. °दांभस्तस्य च प्रियभूर्वहः । ऐक्ष्वाकिरभवद्राजा सत्त्वस्तस्य व्य° । ३० ख. °र्य सावस्त° । ३१ ख. °त्वात्सत्त्वगु° । ३२ क. °मां च सृ° । ३३ ग. ह्यामघस्य । ३४ ख. °रमं प्रि° । ३५ क. भवेद्द्विजः । ३६ ख. °च । सात्त्वतान्सत्त्व° । ३७ क. °न्कौशिकी सु° । ३८ क. भाभिनं । ख. भजिनं । ३९ ग. देववृधं ।

अन्धकं च महाबाहुं[1] वृष्णिं[2] च यदुनन्दनम् । तेषां विसर्गाश्चत्वारो विस्तरेणेह कीर्तिताः ॥ ३१
भजमानस्य सृञ्जय्यौ बाह्यकाऽथोपबाह्यका । आस्तां भार्ये तयोस्तस्माज्जज्ञिरे बहवः सुताः[3] ३२
क्रिमिश्च क्रमणश्चैव[4] धृष्टः[5][6] शूरः पुरंजयः । एते बाह्यकसृञ्जय्यां भजमानाद्विजज्ञिरे ॥ ३३
आयुतजित्[7]सहस्राजि[8][9]च्छताजित्त्वथ दासकः । उपबाह्यकसृञ्जय्यां भजमानाद्विजज्ञिरे ॥ ३४
यज्वा देवावृधो राजा चचार विपुलं तपः । पुत्रः सर्वगुणोपेतो मम स्यादिति निश्चितः ॥ ३५
संयुज्यमानस्तपसा[10] पर्णाशाया जलं स्पृशन् । सदोपस्पृशतस्तस्य[11] चकार प्रियमापगा ॥ ३६
चिन्तयाऽभिपरीता[12][13] सा न जगामैव[14] निश्चयम् । कल्याणत्वान्नरपतेस्तस्य सा निम्नगोत्तमा ॥३७
नाध्यगच्छत्तु तां नारीं यस्यामेवंविधः सुतः । भवेत्तस्मात्स्वयं गत्वा भवाम्यस्य सहानुगा[15] ॥३८
अथ भूत्वा कुमारी सा बिभ्रती परमं वपुः । वरयामास नृपतिं तामियेष च स प्रभुः ॥ ३९
तस्यामाधत्त[16] गर्भं स तेजस्विनमुदारधीः । अथ सा दशमे मासि सुषुवे सरितां वरा ॥ ४०
पुत्रं सर्वगुणोपेतं बभ्रुं देवावृधं द्विजाः । अत्र वंशे पुराणज्ञा गायन्तीति परिश्रुतम् ॥ ४१
गुणान्देवावृधस्यापि कीर्तयन्तो महात्मनः । यथैवाग्रे तथा दूरात्पश्यामस्तावदन्तिकात् ॥ ४२
बभ्रुः श्रेष्ठो मनुष्याणां देवैर्देवावृधः समः । षष्टिश्च षट्[17] च[19] पुरुषाः सहस्राणि च सप्त च[18] ॥ ४३
एतेऽमृतत्वं प्राप्ता वै बभ्रोर्देवावृधादपि । यज्वा दानपतिर्धीमान्ब्रह्मण्यः सुदृढायुधः ॥ ४४
तस्यान्ववायः सुमहान्भोजा[20] ये मार्तिकावताः । अन्धकात्[21]काश्यदुहिता चतुरोऽलभताऽऽत्मजान्
[*कुकुरं भजमानं च समकं[22] बलबर्हिषम् । कुकुरस्य सुतो वृष्टिर्वृष्टेस्तु[23] तनयस्तथा ॥ ४६
कपोतरोमा तस्याथ[24] तित्तिरिस्तनयोऽभवत् । जज्ञे पुनर्वसुस्तस्मादभिजि[25]च्च पुनर्वसोः ॥ ४७
तथा वै पुत्रमिथुनं बभूवाभिजितः किल । आहुकः[26] श्चाहुकश्चैव ख्यातौ ख्यातिमतां[27] वरौ ॥ ४८
इमां चोदाहरन्त्यत्र गाथां प्रति तमाहुकम्[28] । श्वेतेन परिवारेण किशोरप्रतिमो महान्] ॥ ४९
अशीतिवर्मणा[29] युक्त आहुकः प्रथमं व्रजेत् । नापुत्रवान्नाशतदो नासहस्रशतायुषः ॥ ५०
नाशुद्धकर्मा नायज्वा यो भोजमभितो व्रजेत्[30] । पूर्वस्यां दिशि नागानां भोजस्य प्रययुः किल ॥
[+सोमात्सङ्गानुकर्षाणां ध्वजिनां सवरूथिनाम् । रथानां मेघघोषाणां सहस्राणि दशैव तु]॥५२
रौप्यकाञ्चनकक्षाणां[31] सहस्राण्येकविंशतिः । तावत्येव सहस्राणि उत्तरस्यां तथा दिशि ॥ ५३
आभूमिपाला भोजास्[32]तु[33] सन्ति ज्याकिङ्किणीकिनः । आहुः[34] किं चाप्यवन्तिभ्यः स्वसारं ददु-
रन्धकाः[35] ॥ ५४

---

* एतदादिश्लोकचतुष्टयं ग. पुस्तके नास्ति । + अयं श्लोकः क. ग. पुस्तकयोर्नास्ति ।

---

१ क. °हुं प्रथितं य° । २ ख. वृंजि । ३ क. °ताः । क्रमि° । ४ ग. क्रमिण° । ५ ख. वृषः । ६ क. °ष्टः सुरसुतोपमः । ए° । ७ ख. °युतजि° । ८ क. °तायुतसत्राजिच्छतजिच्चार्थदा° । ९ ख. °हस्रजि° । १० क. संजुष्टकायस्त° । ११ क. °दोग्रतपसस्त° । १२ क. चिंतेन परितापं सा । १३ ख. °ताऽत्मा ज° । १४ क. °मेका विनि° । ख. °मैकं विनि° । १५ ख. सहव्रता । अ° । १६ क. तस्मादागत्य सा गर्भं दधार परया मुदा । अ° । १७ क. षष्टिस्तु° । ख. षड्द्रे पु° । १८ ख. वा । १९ क. ख. °तिर्विद्वान्ब्र° । २० क. °जानामार्तिकावताम् । अ° । ग. °जाजेमार्तिकारताः । अ° । २१ क. °काङ्कस्य दु° । ख. °काश्वस्य दु° । २२ ख. समकं दल° । २३ क. वृष्णिर्वृष्णेस्तु । २४ क. °थ तत्तिरि° । २५ क. °दानभिच्च । २६ क. °हुक आहुकी चैव । २७ क. मतिमतां । २८ ख. °हुवम् । २९ क. °तिकर्म° । ख. °तिचर्म° । ३० ख. व्रजन् । ३१ ग. °कलशानां स° । ३२ क. °जाश्वाः स° । ख. °जास्ते सातिष्ठन्किङ्किणी किल । आ° । ३३ ग. °स्तु सातिष्ठन्किङ्करी किलः । आ° । ३४ क. ग. आहुकीं चा° । ३५ ख. °रश्वकाः ।

आहुकस्य तु [1]काश्यायां द्वौ पुत्रौ संबभूवतुः । देवकश्चोग्रसेनश्च देवग[2]र्भसमावुभौ ॥ ५५
देवकस्याभवन्पुत्राश्चत्वारस्त्रिदशोपमाः । दे[3]ववानुपदेवश्[4]च संदेवो देवरक्षितः ॥ ५६
कुमार्यः स[5]प्त चास्याथ वसुदेवाय ता ददौ । देवकी शान्तिदेवा च [6]सुदेवा देवरक्षिता ॥ ५७
वृकदेव्युपदेवी च [7]सुनाम्नी चैव सप्तमी । नवोग्रसेनस्य सुतास्तेषां कंसस्तु पूर्वजः ॥ ५८
न्यग्रोधश्च सुनामा च तथा [8]कङ्कः सुभूषणः । राष्ट्रपालोऽथ सु[9]तनुर[10]नाधृष्टिस्तु पुष्टिमान् ॥ ५९
तेषां स्वसारः पञ्चाऽऽसन्कंसा कंसवती तथा । सुतनू राष्ट्रपाली च कङ्का चैव वराङ्गना ॥ ६०
उग्रसेनः सहापत्यो व्याख्यातः कुकुरोद्भवः । कुकुराणामिमं वंशं धारयन्नमितौजसाम् ॥ ६१
आत्मनो विपुलं वंशं प्रजा[11]वांनाप्नुयान्नरः ॥ ६२

इति श्रीमहापुराणे आदिब्राह्मे वृष्णिवंशनिरूपणं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

श्लोकानामादितः समष्ट्यङ्काः—१२२७

अथ षोडशोऽध्यायः ।

लोमहर्षण उवाच—

भजमानस्य पुत्रोऽथ [12]रथमुख्यो विदूरथः । राजाधिदेवः शूरस्तु विदूरथसुतोऽभवत् ॥ १
राजाधिदेवस्य सुता जज्ञिरे वीर्यवत्तराः । दत्ता[13]तिदत्तौ बलिनौ शोणाश्वः श्वेतवाहनः ॥ २
शमी च दण्डशर्मा च द[14]न्तशत्रुश्च शत्रुजित् । [15]श्रवणा च श्रविष्ठा च स्वसारौ संबभूवतुः ॥ ३
[16]शमिपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य चाऽऽत्मजः । स्वयंभोजः स्वयंभोजा[17]द्धदिकः संबभूव ह ॥ ४
तस्य पुत्रा बभूवुर्हि सर्वे भीमपराक्रमाः । कृतवर्माऽग्रजस्तेषां शतधन्वा तु मध्यमः ॥ ५
देवान्तश्च नरान्तश्च भिषग्वैतरणश्च [18]यः । सुदान्तश्चातिदान्तश्च निकाश्यः कामदम्भकः ॥ ६
देवान्तस्याभवत्पुत्रो विद्वान्कम्बलबर्हिषः । असमौजाः सुतस्तस्य [19]नासमौजाश्च तावुभौ ॥ ७
अजातपुत्राय सुतान्प्रददावसमौजसे । सुदंष्ट्रश्च सुचारुश्च कृष्ण इ[20]त्यन्धकाः स्मृताः ॥ ८
गान्धारी चैव माद्री च [21]क्रोष्टुभार्ये [22]बभूवतुः । गान्धारी जनयामास अनमित्रं महाबलम् ॥ ९
माद्री युधाजितं पुत्रं [23]ततो वै देवमीढुषम् । अनमित्रम[24]मित्राणां जेतारमपराजितम् ॥ १०
अनमित्रसुतो निघ्नो निघ्नतो द्वौ बभूवतुः । प्रसेनश्[25]चाथ सत्राजिच्छत्रुसेनाजितावुभौ ॥ ११
प्रसेनो द्वारवत्यां तु नि[26]र्वसन्यो महामणिम् । दिव्यं स्यमन्तकं नाम [27]स सूर्यादुपलब्धवान् ॥ १२
तस्य सत्राजितः सूर्यः सखा प्राणसमोऽभवत् । स कदाचिन्निशापाये रथेन रथिनां वरः ॥ १३
तोयकू[28]लमपःस्प्रष्टुमुपस्थातुं ययौ रविम् । तस्योपतिष्ठतः सूर्यं विवस्वानग्रतः स्थि[29]तः ॥ १४
विस्पष्टमूर्तिर्भगवांस्तेजोमण्डलवान्विभुः । अथ राजा विवस्वन्तमुवाच स्थितमग्रतः ॥ १५

---

१ ग. काश्याया । २ ख. °र्भसुतावु° । ३ ग. °वरानु° । ४ ग. °श्च सदे° । ५ ख. °सधाऽस्या° । ६ क. संदेवी । ७ क. सुनामा । ८ क. काङ्कः । ९ ख. °तरुर° । १० ग. °नाधृष्टि° । ११ क. °वान्प्राप्नु° । १२ क. जम्भमानो । १३ क. °त्ताभिद° । १४ क. °न्तचक्रश्च । १५ क. श्रीवीरा । १६ क. ख. शमीपु° । १७ क. °जाद्वृदीकः । ख. °जाद्वृदि° । १८ क. यः । युवानश्चापि निष्कोश्यो निष्कोश्यात्काम° । १९ क. तामसौजाश्च । ख. नाममौजाश्च । २० ख. °त्यश्वकाः । २१ क. ख. क्रोष्टोर्भार्ये । २२ क. महाद्युती । २३ क. तथा । २४ ख. °मित्रं च शत्रूणां । २५ क. °श्चापि स° । २६ ख. °वसंश्च स° । २७ क. ग. समुद्रादु° । २८ ख. °लमुपस्थातुं स राजा च य° । २९ ग. °तः । अस्प° ।

यथैव [1]व्योम्नि पश्यामि सदा त्वां ज्योतिषां पते । तेजोमण्डलिनं देवं तथैव पुरतः स्थितम् १६
को विशेषोऽस्ति मे त्वत्तः [2]सख्येनोपगतस्य वै । एतच्छ्रुत्वा तु भगवान्मणिरत्नं स्यमन्तकम् १७
स्वकण्ठादव[3]मुच्याथ एकान्ते न्यस्तवान्विभुः । ततो विग्रहवन्तं तं ददर्श नृपतिस्तदा ॥ १८
प्रीतिमानथ तं दृष्ट्वा मुहूर्तं कृतवान्कथाम् । तमभिप्रस्थितं भूयो विवस्वन्तं स सत्राजित् ॥ १९
लोका[4]न्भासयसे सर्वान्येन त्वं सततं प्रभो । तदेतन्मणिरत्नं मे भगवन्दातुमर्हसि ॥ २०
ततः स्यमन्तकमणिं दत्तवान्भास्करस्तदा । स तमा[5]बध्य नगरीं प्रविवेश महीपतिः ॥ २१
तं जनाः पर्यधावन्त सूर्योऽयं गच्छतीति [6]हं । स्वां पुरीं स विसिष्माय राजा त्वन्तःपुरं तथा ॥
तं प्रसेनजितं दिव्यं मणिरत्नं स्यमन्तकम् । ददौ [7]भ्रात्रे नरपतिः प्रेम्णा सत्राजिदुत्तमम् ॥ २३
स मणिः स्यन्दते रुक्मं वृष्ण्यन्धकनिवेशने । कालवर्षी च पर्जन्यो न च व्याधिभयं ह्यभूत् २४
लिप्सां चक्रे प्र[8]सेनस्य मणिरत्ने स्यमन्तके । गोविन्दो न च तं लेभे शक्तोऽपि न जहार सः ॥
कदाचिन्मृगयां यातः प्रसेनस्तेन भूषितः । स्यमन्तककृते सिंहा[9]द्वधं प्राप वनेचरात् ॥ २६
अथ सिंहं प्रधावन्तमृक्षराजो महाबलः । निहत्य मणिर[10]त्नं तदादाय प्रावि[11]शद्गुहाम् ॥ २७
ततो वृष्ण्यन्धकाः कृष्णं प्रसेनवधकारणात् । [12]प्रार्थनां तां मणेर्बुद्ध्वा सर्व एव शशङ्किरे ॥ २८
स [13]शङ्क्यमानो धर्मात्मा अकारी तस्य कर्मणः । आहरिष्ये मणिमिति प्रतिज्ञाय वनं ययौ २९
यत्र प्रसेनो मृगयां व्यचरत्तत्र चाप्यथ । प्रसेनस्य पदं गृह्य पुरुषै[14]राप्तकारिभिः ॥ ३०
[15]ऋक्षवन्तं गिरिवरं विन्ध्यं च गिरिमुत्तमम् । [16]अन्वेषयन्परिश्रान्तः स ददर्श महामनाः ॥ ३१
साश्वं हतं प्रसेनं तु नाविन्दत च तन्मणिम् । अथ सिंहः प्रसेनस्य शरीरस्याविदूरतः ॥ ३२
ऋक्षेण निहतो [17]दृष्टः पदै[18]र्ऋक्षैस्तु सूचितः । पदैस्तैरन्वियायाथ गुहामृक्षस्य माधवः ॥ ३३
स हि ऋक्षबिले वाणीं शुश्राव प्रमदेरिताम् । धात्र्या कुमारमादाय सुतं जाम्बवतो द्विजाः ३४
क्रीडयन्त्या च मणिना मा रोदीरित्यथेरिताम् ॥ ३५

धात्र्युवाच—

सिंहः प्रसेनमवधीत्सिंहो जाम्बवता हतः । सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः ॥ ३६
[19]व्यक्तितस्तस्य [20]शब्दस्य तूर्णमेव बिलं ययौ । प्र[21]विश्य तत्र भगवांस्तदृक्षबिलमञ्जसा ॥ ३७
स्थापयित्वा बिलद्वारे यदूल्लाँङ्गलिना सह । शार्ङ्गधन्वा बिलस्थं तु जाम्बवन्तं ददर्श सः ॥ ३८
युयुधे वासुदेवस्तु बिले जाम्बवता सह । [*बाहु[22]भ्यामेव गोविन्दो दिवसानेकविंशतिम् ॥ ३९
प्रविष्टेऽथ बिले कृष्णे बलदेवपुरःसराः । पुरीं द्वारवतीमेत्य हतं कृष्णं न्यवेदयन्] ॥ ४०
वासुदेवोऽपि निर्जित्य जाम्बवन्तं [23]महाबलम् । लेभे जाम्बवतीं कन्यामृक्षराजस्य [24]संमताम् ॥ ४१

---

* इतः प्रभृति सार्धश्लोको नास्ति ख. पुस्तके ।

---

१ क. देव । २ ख. सहायत्वं ग° । ३ ख. °मुच्यैवमेका° । ग. °मुच्यैनमेका° । ४ क. ग. °कानुद्भासयस्येतान्ये° । ५ ख. °मामुच्य न° । ६ ख. ह । पुरीं विस्मापयित्वा तु स राजाऽन्तः° । ७ क. ख. ततो । ८ ग. °सेनात्तु म° । ९ क. °द्वधमाप । १० ग. °त्नं तु आदाय वनमाविशत् । त° । ११ क. °शद्बिलम् । १२ क. प्रार्थितं तं मणिं बुद्ध्वा । १३ क. शङ्क्मा° । १४ ख. °रात्मका । १५ ग. अक्षवन्तं । १६ क. ग. अन्वियेष पारि° । १७ ख. °ष्टः पादै° । १८ क. °क्षस्य भावितः । ख. °क्षस्य सू° । १९ ख. व्यक्तीकृतश्च श° । ग. व्यक्तीकृतस्य श° । २० ख. शब्दश्च । २१ क. °विष्टस्तत्र । २२ क. °भ्यामथ गो° । २३ क. महाबलः । २४ ख. संमतम् ।

मणिं स्यमन्तकं चैव [1]जग्राहाऽऽत्मविशुद्धये । अनुनीयर्क्षराजं तु निर्ययौ च ततो बिलात् ॥ ४२
उपायाद्द्वारकां[2] कृष्णः स विनीतैः पुरःसरैः । एवं स मणिमाहृत्य विशोध्याऽऽत्मानमच्युतः ४३
ददौ सत्राजिते तं वै [3]सर्वसात्त्वतसंसदि । एवं मिथ्याभिशस्तेन कृष्णेनामित्रघातिना ॥ ४४
आत्मा विशोधितः पापाद्विनिर्जित्य स्यमन्तकम् । सत्राजितो दश त्वासन्भार्यास्तासां शतं सुताः
ख्यातिमन्तस्त्रयस्तेषां[4] [5]भगंकारस्तु पूर्वजः[6] । वीरो वातपतिश्चैवं वसुमेधस्तथैव च ॥ ४६
कुमार्यश्चापि तिस्रो वै दिक्षु ख्याता द्विजोत्तमाः । सत्यभामोत्तमा तासां व्रतिनी च दृढव्रता ४७
तथा प्रस्वापिनी चैव भार्यां कृष्णाय ता(तां) ददौ । सभाक्षो[9] भङ्गकारिस्तु [10]नांवेयश्च नरोत्तमौ ॥
जज्ञाते गुणसंपन्नौ विश्रुतौ [11]रूपसंपदा । माद्र्याः पुत्रोऽथ जज्ञेऽथ[12] वृष्णिपुत्रो युधाजितः ॥ ४९
जज्ञाते तनयौ [13]वृष्णेः श्वफल्कश्चित्रकस्तथा । श्वफल्कः काशिराजस्य सुतां भार्यामविन्दत ॥५०
गान्दिनीं नाम तस्याश्च गाः सदा प्रददौ पिता । तस्यां जज्ञे महाबाहुः श्रुतवा[14]नतिथिप्रियः ५१
अक्रूरोऽथ महाभागो [15]जज्ञे विपुलदक्षिणः । उपमद्गुस्तथा मद्गु[16]र्मुदरश्चारिमर्दनः[17] ॥ ५२
आरिक्षेप[18]स्तथोपेक्षः शत्रुहा चारिमेजयः । धर्मभृच्चापि [19]धर्मा च [20]गृध्रंभोजान्धकस्तथा ॥ ५३
[21]आवाहप्रतिवाहौ च सुन्दरी च वराङ्गना । विश्रुता[22]श्वस्य महिषी कन्या चास्य [23]वसुंधरा ॥ ५४
रूपयौवनसंपन्ना सर्वसत्त्वमनोहरा । अक्रूरेणोग्र[24]सेनायां सुतौ वै कुलनन्दनौ[25] ॥ ५५
वसुदेवश्चोपदेवश्च जज्ञाते देववर्चसौ । चित्रकस्याभवन्पुत्राः पृथुर्विपृथुरेव च ॥ ५६
[26]अश्वग्रीवोऽश्वबाहुश्च सुपार्श्वकगवेषणौ । अरिष्टनेमिश्च सुता धर्मो धर्मभृदेव च ॥ ५७
सुबाहुर्बहुबाहुश्च श्रविष्ठाश्रवणे स्त्रियौ । इमां मिथ्याभिशस्तिं यः कृष्णस्य समुदाहृताम् ॥ ५८
वेद मिथ्याभिशापास्तं न स्पृशन्ति कदाचन ॥ ५९

इति श्रीमहापुराण आदिब्राह्मे स्यमन्तकप्रत्यानयननिरूपणं नाम षोडशोऽध्यायः ॥ १६ ॥

श्लोकानामादितः समष्ट्यङ्काः—१२८६

अथ सप्तदशोऽध्यायः ॥

लोमहर्षण उवाच—

यत्तु सत्राजिते कृष्णो मणिरत्नं स्यमन्तकम् । ददावहारयद्बभ्रुर्भोजेन शतधन्वना ॥ १
सदा हि प्रार्थयामास सत्यभामामनिन्दिताम् । अक्रूरोऽन्तरमन्विष्यन्मणिं चैव स्यमन्तकम् ॥ २
सत्राजितं ततो हत्वा शतधन्वा महाबलः । रात्रौ तं मणिमादाय ततोऽक्रूराय दत्तवान् ॥ ३
अक्रूरस्तु तदा विप्रा रत्नमादाय चोत्तमम् । समयं कारयांचक्रे नाऽऽवेद्योऽहं त्वयेत्युत ॥ ४

---

१ ख. जहाराऽऽत्म° । २ ख. °ते चैव स° । ३ क. °र्वेयादवसं° । ४ ग. °षां नङ्कका° । ५ क. भगका° । ६ क. °जः । विरोधाधिप° । ७ क. °व उपश्रावस्त° । ८ क. ग. स्त्रीणां । ९ ख. °क्षो भाङ्ग° । १० ख. तारेयश्च । ११ ख. रूपसंवृतौ । १२ ख. °थ पृश्निः पु° । १३ ख. पृश्नेः । १४ क. ख. °वानिति विश्रुतः । अ° । १५ ग. यज्वा । १६ य. °द्रुर्मृदर° । १७ क. ग. °नः । गिरि° । १८ क. ग. °स्तथाक्षेपः श° । १९ ग. धर्मी । २० क. °ध्रसो जाम्बवस्त° । ग. °ध्रमो जातुकस्त° । २१ क. आबाहुः प्रतिबाहुश्च सु° । २२ क. °ता सा च महिषक° । ग. °ता स्वस्य म° । २३ ख. वराङ्गना । २४ ग. °सेन्यां तु सु° । २५ क. °नौ । वृषदे° । २६ ख. °श्वसेनोऽश्व° । २७ क. °प्रा मणिमा° ।

वैयमभ्युत्प्रपत्स्यामः कृष्णेन त्वां प्रधर्षितम् । ममाद्य द्वारका सर्वा वशे तिष्ठत्यसंशयम् ॥ ५
हते पितरि दुःखार्ता सत्यभामा मनस्विनी । प्रययौ रथमारुह्य नगरं वारणावतम् ॥ ६
सत्यभामा तु तद्वृत्तं भोजस्य शतधन्वनः । भर्तुर्निवेद्य दुःखार्ता पार्श्वस्थाऽश्रूण्यवर्तयत् ॥ ७
पाण्डवानां च दग्धानां हरिः कृत्वोदकक्रियाम् । कुल्यार्थे चापि पाण्डूनां न्ययोजयत सात्यकिम्
ततस्त्वरितमागम्य द्वारकां मधुसूदनः । पूर्वजं हलिनं श्रीमानिदं वचनमब्रवीत् ॥ ९

श्रीकृष्ण उवाच—

हतः प्रसेनः सिंहेन सत्राजिच्छतधन्वना । स्यमन्तकस्तु मद्गामी तस्य प्रभुरहं विभो ॥ १०
तदारोह रथं शीघ्रं भोजं हत्वा महारथम् । स्यमन्तको महाबाहो अस्माकं स भविष्यति ॥ ११

लोमहर्षण उवाच—

ततः प्रववृते युद्धं तुमुलं भोजकृष्णयोः । शतधन्वा ततोऽक्रूरं सर्वतोदिशमैक्षत ॥ १२
संरब्धौ तावुभौ तत्र दृष्ट्वा भोजजनार्दनौ । शक्तोऽपि शापाद्धार्दिक्यमक्रूरो नान्वपद्यत ॥ १३
अपयाने ततो बुद्धिं भोजश्चक्रे भयार्दितः । योजनानां शतं साग्रं हृदया प्रत्यपद्यत ॥ १४
विख्याता हृदया नाम शतयोजनगामिनी । भोजस्य वडवा विप्रा यया कृष्णमयोधयत् ॥ १५
क्षीणां जवेन हृदयामध्वनः शतयोजने । दृष्ट्वा रथस्य स्वां वृद्धिं शतधन्वानमर्दयत् ॥ १६
ततस्तस्या हतायास्तु श्रमात्खेदाच्च भो द्विजाः । खमुत्पेतुरथ प्राणाः कृष्णो राममथाब्रवीत्॥१७

श्रीकृष्ण उवाच—

तिष्ठेह त्वं महाबाहो दृष्टदोषा हया मया । पद्भ्यां गत्वा हरिष्यामि मणिरत्नं स्यमन्तकम्॥१८
पद्भ्यामेव ततो गत्वा शतधन्वानमच्युतः । मिथिलामभितो विप्रा जघान परमास्त्रवित् ॥ १९
स्यमन्तकं च नापश्यद्धत्वा भोजं महाबलम् । निवृत्तं चाब्रवीत्कृष्णं मणिं देहीति लाङ्गली ॥२०
नास्तीति कृष्णश्चोवाच ततो रामो रुषाऽन्वितः । धिक्शब्दपूर्वमसकृत्प्रत्युवाच जनार्दनम् ॥ २१

बलराम उवाच—

भ्रातृत्वान्मर्षयाम्येष स्वस्ति तेऽस्तु व्रजाम्यहम् । कृत्यं न मे द्वारकया न त्वया न च वृष्णिभिः
प्रविवेश ततो रामो मिथिलामरिमर्दनः । सर्वकामैरुपहृतैर्मैथिलेनाभिपूजितः ॥ २३
एतस्मिन्नेव काले तु बभ्रुर्मतिमतां वरः । नानारूपान्क्रतूंन्सर्वानाजहार निरर्गलान् ॥ २४
दीक्षामयं स कवचं रक्षार्थं प्रविवेश ह । स्यमन्तककृते प्राज्ञो गान्दीपुत्रो महायशाः ॥ २५
अथ रत्नानि चान्यानि धनानि विविधानि च । षष्टिं वर्षाणि धर्मात्मा यज्ञेष्वेव न्ययोजयत् ॥
अक्रूरयज्ञा इति ते ख्यातास्तस्य महात्मनः । बह्वन्नदक्षिणाः सर्वे सर्वकामप्रदायिनः ॥ २७
अथ दुर्योधनो राजा गत्वा स मिथिलां प्रभुः । गदाशिक्षां ततो दिव्यां बलदेवादवाप्तवान् २८
संप्रसाद्य ततो रामो वृष्ण्यन्धकमहारथैः । आनीतो द्वारकामेव कृष्णेन च महात्मना ॥ २९
अक्रूरश्चान्धकैः सार्धमायातः पुरुषर्षभः । हत्वा सत्राजितं सुप्तं सहबन्धुं महाबलः ॥ ३०

---

१ ख. वयं कृष्णं प्रप° । २ क. °ष्णे च त्वां । ३ क. प्रधर्षति । ख. प्रधर्षिताम् । ४ ग. °मा यशस्वि° । ५ क. °ति । प्रावर्तत ततो यु° । ६ ग. °पि साध्याद्धार्षिक्य° । ७ ख. °ष्णभयोद्गतः । क्षी° । ८ क. जग्राह । ९ ग. रत्नं । १० ख. द्वारकायां । ११ ख. °तूंन्मुख्याना° । १२ ख. ग. युद्धे ।

ज्ञातिभेदभयात्कृष्णस्तमुपेक्षितवांस्तदा । अपयाते तदाऽक्रूरे नावर्षत्पाकशासनः ॥ ३१
अनावृष्ट्या तदा राष्ट्रमभवद्बहुधा कृशम् । ततः प्रसादयामासुरक्रूरं कुकुरान्धकाः ॥ ३२
पुनर्द्वारवतीं प्राप्ते तस्मिन्दानपतौ ततः । प्रववर्ष सहस्राक्षः कक्षे जलनिधेस्तदा ॥ ३३
कन्यां च वासुदेवाय स्वसारं शीलसंमताम् । अक्रूरः प्रददौ[1] धीमान्प्रीत्यर्थं मुनिसत्तमाः ॥ ३४
अथ विज्ञाय[2] योगेन कृष्णो बभ्रुगतं[3] मणिम् । सभामध्यगतः[4] प्राह तमक्रूरं जनार्दनः ॥ ३५

श्रीकृष्ण उवाच—

यत्तद्रत्नं मणिवरं[5] तव हस्तगतं विभो । तत्प्रयच्छ[6] च मानार्ह मयि माऽनार्यकं कृथाः ॥ ३६
षष्टिवर्षगते काले[7] यो[8] रोषोऽभून्ममानघ । स संरूढो[9]ऽसकृत्प्राप्तस्ततः[10] कालात्ययो महान् ॥ ३७
स ततः[11] कृष्णवचनात्सर्वसात्वतसंसदि । प्रददौ तं मणिं बभ्रुरक्लेशेन महामतिः[12] ॥ ३८
ततस्तमार्जवात्प्राप्तं बभ्रोर्हस्तादरिंदमः । ददौ हृष्टमनाः कृष्णस्तं मणिं बभ्रवे पुनः ॥ ३९
स कृष्णहस्तात्संप्राप्तं[13] मणिरत्नं स्यमन्तकम् । आबध्य गान्दिनीपुत्रो विरराजांशुमानिव ॥ ४०

इति श्रीमहापुराणे आदिब्राह्मे सोमवंशकथनं नाम सप्तदशोऽध्यायः ॥ १७ ॥

श्लोकानामादितः समष्ट्यङ्काः—१३२६

अथाष्टादशोऽध्यायः ।

मुनय ऊचुः—

अहो सुमहदाख्यानं भवता परिकीर्तितम् । भारतानां च सर्वेषां पार्थिवानां तथैव च ॥ १
देवानां दानवानां च गन्धर्वोरगरक्षसाम् । दैत्यानामथ सिद्धानां गुह्यकानां तथैव च ॥ २
अत्यद्भुतानि कर्माणि विक्रमा धर्मनिश्चयाः । विविधाश्च कथा दिव्या जन्म[14] चाग्र्यमनुत्तमम् ॥ ३
सृष्टिः प्रजापतेः सम्यक्त्वया प्रोक्ता महामते[15] । प्रजापतीनां सर्वेषां गुह्यकाप्सरसां तथा ॥ ४
स्थावरं जङ्गमं सर्वमुत्पन्नं विविधं जगत् । त्वया प्रोक्तं महाभाग श्रुतं चैतन्मनोहरम् ॥ ५
कथितं पुण्यफलदं पुराणं श्लक्ष्णया गिरा । मनःकर्णसुखं सम्यक्प्रीणात्यमृतसंमितम् ॥ ६
इदानीं श्रोतुमिच्छामः सकलं मण्डलं भुवः । वक्तुमर्हसि सर्वज्ञ[16] परं कौतूहलं हि नः ॥ ७
यावन्तः सागरा द्वीपास्तथा वर्षाणि पर्वताः । वनानि सरितः पुण्यदेवादीनां महामते ॥ ८
यत्प्रमाणमिदं सर्वं यदाधारं[17] यदात्मकम् । संस्थानमस्य जगतो यथावद्वक्तुमर्हसि ॥ ९

लोमहर्षण उवाच—

मुनयः श्रूयतामेतत्संक्षेपाद्[18]वदतो मम । नास्य वर्षशतेनापि वक्तुं शक्यो[19]ऽतिविस्तरः ॥ १०
जम्बू[20]प्लक्षाह्वयौ द्वीपौ शाल्मल[21]श्चापरो द्विजाः । कुशः क्रौञ्चस्तथा शाकः पुष्करश्चैव सप्तमः ॥ ११

---

१ ग. °दौ श्रीमा° । २ क. °य चातियो° । ३ क. बन्धुग° । ४ क. °गतं प्रा° । ५ ख. मणिमयं । ६ ख. ग. °च्छस्व मा° । ७ ग. °ले यद्रोषो° । ८ क. यो यज्ञोऽभूत्तवान° । ९ क. संतुष्टोऽन्यतः प्राप्त° । १० ग. °स्तदा का° । ११क. तत्र । १२ क. ग. महाद्युतिः । १३ ख. ग. °प्राप्य म° । १४ क. °न्म चैषाम° । १५ क. °ते । नृपतीनां च स° । १६ ग. धर्मज्ञ । १७ क. यदर्धानं । १८ ख. ग. °पाद्वद° । १९ क. शक्येत विस्तरम् । ज° । २० ग. जम्बुप्र° । २१ क. ख. शाल्मलिश्चा° ।

एते द्वीपाः [1]समुद्रैस्तु सप्त सप्तभिरावृताः । लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः [2]समम् ॥ १२
[3]जम्बूद्वीपः [4]समस्तानामेतेषां [5]मध्यसंस्थितः । तस्यापि मध्ये विप्रेन्द्रा मेरुः कनकपर्वतः ॥ १३
चतुरशीतिसाहस्रैर्योजनैस्तस्य चोच्छ्रयः । प्रविष्टः षोडशाधस्ता[6]द्द्वात्रिंशन्मूर्ध्नि विस्तृतः ॥ १४
मूले षोडशसाहस्रैर्विस्तारस्तस्य सर्वतः । [7]भूपद्मस्यास्य [8]शैलोऽसौ कर्णिकाकारसंस्थितः ॥ १५
हिमवान्हेमकूटश्च निषधस्तस्य दक्षिणे । नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः ॥ १६
लक्षप्रमाणौ द्वौ [9]मध्ये दशहीनास्तथाऽपरे । सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च [10]ते ॥ १७
भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतम् । हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्विजाः ॥ १८
रम्यकं चोत्तरं वर्षं [11]तस्यैव तु हिरण्मयम् । उत्तराः कुरवश्चैव यथा वै [12]भारतं तथा ॥ १९
नवसाहस्रमेकैकमेतेषां द्विजसत्तमाः । [13]इलावृतं च तन्[14]मध्ये सौवर्णो मेरुरुच्छ्रितः ॥ २०
मेरोश्चतुर्दिशं [15]तत्र नवसाहस्रविस्तृतम् । [*इलावृतं [16]महाभागाश्चत्वारश्चात्र पर्वताः ॥ २१
[17]विष्कम्भा वितता मेरोर्योजनायुतविस्तृताः] । पूर्वेण [18]मन्दरो नाम दक्षिणे गन्धमादनः ॥ २२
विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्थितः । कदम्बस्तेषु [19]जम्बूश्च पिप्पलो वट एव च ॥ २३
एकादशशतायामाः पादपा गिरिकेतवः । ¶जम्बूद्वीपस्य सा जम्बूर्नामहेतुर्द्विजोत्तमाः ॥ २४
महागजप्रमाणानि जम्ब्वास्तस्याः फलानि वै । पतन्ति भूभृतः पृष्ठे शीर्यमाणानि [20]सर्वतः ॥ २५
रसेन तेषां विख्याता तत्र जम्बूनदीति वै । सरित्प्रवर्तते सा च पीयते तन्निवासिभिः ॥ २६
न [21]खेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षयः । तत्पानस्वस्थमनसां [22]जनानां तत्र जायते ॥ २७
तीरमृत्तद्रसं प्राप्य सुखवायु[23]विशोषिता । जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम् ॥ २८
[24]भद्राश्वं पूर्वतो मेरोः [25]केतुमालं च पश्चिमे । वर्षे द्वे तु मुनिश्रेष्ठास्तयो[26]र्मध्ये त्विलावृतम् ॥ २९
वनं चैत्ररथं [27]पूर्वे दक्षिणे गन्धमादनम् । वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम् ॥ ३०
अरुणोदं [28]महाभद्रमसितोदं समानसम् । सरांस्येतानि चत्वारि देवभोग्यानि [29]सर्वदा ॥ ३१
शान्तवांश्चक्रकुञ्जश्च कुररी माल्यवांस्[30]तथा । वैकङ्कप्रमुखा मेरोः पूर्वतः [31]केसराचलाः ॥ ३२
त्रिकूटः [32]शिशिरश्चैव पतङ्गो रुचकस्तथा । निषधादयो दक्षिणतस्तस्य केसरपर्वताः ॥ ३३
शिखि[33]वासः सवैदूर्यः कपिलो गन्धमादनः । [34]जा[35]नुधिप्रमुखास्तद्वत्पश्चिमे केसराचलाः ॥ ३४
मेरो[36]रनन्तरास्ते च [37]जठरादिष्ववस्थिताः । [38]शङ्खकूटोऽथ ऋषभो हंसो नागस्तथाऽपराः ॥ ३५

---

* इत आरभ्य–विस्तृता इत्यन्तं ग. पुस्तके नास्ति । ¶ इदमर्धं क. ख. पुस्तकयोर्नास्ति ।

---

१ क. ख. °द्रैश्च सप्तभिः परिवारिताः । २ क. समाः । ३ ग. जम्बुद्वी° । ४ क फ. समुद्राणामे° । ५ क. °ध्यतः स्थि° । ६ ख. °द्वाविंशमूर्ध्नि । ७ ख. भूमिपद्मस्य । ८ ग. मध्यौ । ९ क. ये । १० क. द्विजाः । ११ ख. ग. °स्यैवानु हि° । १२ क. °रतास्तथा । १३ क. °वृतश्च त° । १४ क. °ध्ये योजनायुतविस्तृतः । १५ क. तच्च । १६ क. महद्वीपं चत्वा° । १७ क. °म्भारविता । १८ ख. °रो मेरोर्दक्षि° । १९ क. जम्बुश्च । २० क. सर्वशः । २१ क. ख. स्वेदो । २२ क. नराणां । २३ ख. °षितम् । जा° । २४ क. ख. °द्राश्वः पू° । २५ क. ख. °मालश्च प° । २६ क. °र्मध्य इला° । २७ क. पूर्वं । २८ क. °भद्रं शुचितोयं स° । ग. °भद्रं सशीतो° । २९ क. °दा । शीतानकं कुरङ्गं च कुरगी मा° । ग. °दा । शीताम्भश्च कुमुजश्च कुवरी । ३० क. °था । पाकेन्दुप्र° । ३१ ख. केशरावलाः । ३२ ग. शिखर° । ३३ ग. °वासा स° । ३४ ग. जारुधि° । ३५ क. °नुविप्र° । ३६ क. °रत्नान्तरे श्रेष्ठा ज° । ३७ क. °रादौ व्यवस्थि° । ३८ क. °ङ्खकण्ठोऽथ ।

कालञ्जराद्याश्च तथा उत्तरे केसराचलाः । चतुर्दश सहस्राणि योजनानां महापुरी ॥ ३६
मेरोरुपरि विप्रेन्द्रा ब्रह्मणः [1]कथिता दिवि । तस्यां समन्ततश्चाष्टौ दिशासु विदिशासु च ॥ ३७
इन्द्रादिलोकपालानां प्रख्याताः प्रवराः[2] पुरः । विष्णुपादविनिष्क्रान्ता प्लावयन्तीन्दुमण्डलम् ३८
समन्ताद्ब्रह्मणः पुर्यां गङ्गा पतति वै दिवि । सा तत्र पतिता दिक्षु चतुर्धा प्रत्यपद्यत ॥ ३९
सीता चालकनन्दा च चक्षुर्भद्रा च वै क्रमात् । पूर्वे[3]ण सीता शैलाच्च शैलं यान्त्यन्तरिक्षगा ४०
ततश्च पूर्ववर्षेण भद्राश्वेनैति साऽर्णवम् । तथैवालकनन्[4]दा च दक्षिणेनैत्य भारतम् ॥ ४१
प्रयाति सागरं भूत्वा सप्तभेदा द्विजोत्तमाः । चक्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः ॥ ४२
पश्चिमं केतुमालाख्यं वर्षमन्वेति साऽर्णवम् । भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून् ॥ ४३
अतीत्योत्तरमम्भोधिं समभ्येति द्वि[5]जोत्तमाः । आनीलनिषधायामौ माल्यवद्गन्धमादनौ ॥ ४४
तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः । भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा ॥ ४५
पत्राणि लो[6]कशैलस्य मर्यादाशैलबाह्यतः । जठरो देवकूटश्च मर्यादापर्वतावुभौ ॥ ४६
तौ दक्षिणोत्तरायामावानीलनिषधायतौ । [*गन्धमादनकैलासौ पूर्वपश्चात्तु तावुभौ ॥ ४७
अशीतियोजनायामावर्णवान्ते[7]ऽर्यवस्थितौ । निषधः पारियात्रश्च मर्यादापर्वतावुभौ ॥ ४८
तौ दक्षिणोत्तरायामावानीलनिषधायतौ] । +मेरोः पश्चिमदिग्भागे यथा पूर्वौ तथा स्थितौ ॥४९
त्रिशृङ्गो जारुधिश्चैव उत्तरौ वर्षपर्वतौ । पूर्वपश्चायतावेतावर्णवान्तर्व्यवस्थितौ ॥ ५०
इत्येते हि[10] मया प्रोक्ता मर्यादापर्वता द्विजाः । जठ[11]रावस्थिता मेरोर्येषां द्वो द्वौ [12]चतुर्दिशम् ॥ ५१
मेरोश्चतुर्दिशं ये तु प्रोक्ताः [13]केसरपर्व[14]ताः । शीतान्ताद्या द्विजास्तेषामतीव हि मनोहराः ॥ ५२
शैला[15]नामन्तरद्रोण्यः सिद्धचारणसेविताः । सुरम्याणि तथा तासु कानना[16]नि पुराणि च ॥ ५३
लक्ष्मीविष्ण्वग्निसूर्येन्द्रदेवानां मुनिसत्तमाः । [17]तास्वायत[18]नवर्याणि जुष्टानि नरकिंन[19]रैः ॥ ५४
गन्धर्वयक्षरक्षांसि तथा[20] दैतेयदानवाः । क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम् ॥ ५५
भौमा ह्येते स्मृताः स्वर्गा धर्मिणामालया द्विजाः । नैतेषु पापकर्तारो यान्ति जन्मशतैरपि ॥ ५६
भद्राश्वे भगवान्विष्णुरास्ते हयशिरा द्विजाः । [21]वाराहः केतुमाले तु भारते कूर्मरूपधृक् ॥ ५७
मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते सनातनः । विश्वरूपेण सर्वत्र सर्वः सर्वेश्वरो हरिः ॥ ५८
सर्वस्याऽऽधारभूतोऽसौ द्विजा आस्तेऽखिलात्मकः । यानि किंपुरुषाद्यानि वर्षाण्यष्टौ द्विजोत्तमाः ॥
न तेषु शोको नाऽऽयासो नोद्वेगः क्षुद्भयादिकम् । सुस्थाः प्रजा निरातङ्काः सर्वदुःखविवर्जिताः
दशद्वादशवर्षाणां सहस्राणि स्थिरायु[22]षः । नैतेषु भौमान्यन्यानि क्षुत्पिपासादि नो द्विजाः ६१

* एतदि–निषधायताविलन्तो नास्ति पाठः क. पुस्तके । * इदमर्धं नास्ति ग. पुस्तके ।

१ ग. प्रथिता । २ ख. दिवः । ३ ख. °ण शैलाच्छीतालं शै° । ४ ख. °न्दाऽपि द° । ५ ख. महामुने । ६ ग. °कपद्मस्य । ७ ख. तवरो । ८ ग. °श्चायता° । ९ ग. °न्तव्यव° । १० ख. च । ११ ख. °ठराद्यास्थि° । १२ क. व्यवस्थितौ । १३ ख. केशर° । १४ क. °ताः । सीता° । ग. °ताः । पीता° । १५ ख. °नामुत्तरद्रो° । १६ क. °नि च सर्वतः । ल° । १७ क तान्याय° । १८ क. °नमुख्यानि जु° । १९ क. °रैः । अप्सरोय° । २० क. °था गन्धर्वकिंनराः । क्री° । २१ ग. वराहः । २२ ख. °षः । न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै । कृ° । ग. °षः । न तेषु वर्तते देवो भौमान्यम्भांसि तेषु वै । कृ° ।

कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना । सर्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः ॥
नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तमाः ॥ ६२

इति श्रीमहापुराणे आदिब्राह्मे भुवनकोशद्वीपवर्णनं नामाष्टादशोऽध्यायः ॥ १८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३८८

अथैकोनविंशोऽध्यायः ।

---

*लोमहर्षण उवाच—

उत्तरेण समुद्रस्य हिमाद्रेश्चैव दक्षिणे । वर्षं तद्भारतं नाम भारती यत्र संततिः ॥ १
नवयोजनसाहस्रो विस्तारश्च द्विजोत्तमाः । कर्मभूमिरियं स्वर्गमपवर्गं च पृ(इ)च्छताम् ॥ २
महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः ॥ ३
अतः संप्राप्यते स्वर्गो मुक्तिमस्मात्प्रयाति वै । तिर्यक्त्वं नरकं चापि यान्त्यतः पुरुषा द्विजाः ४
इतः स्वर्गश्च मोक्षश्च मध्यं चान्ते च गच्छति । न खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते ॥ ५
भारतस्यास्य वर्षस्य नव भेदान्निशामय । इन्द्रद्वीपः कसेतुमांस्ताम्रपर्णो गभस्तिमान् ॥ ६
नागद्वीपस्तथा सौम्यो गन्धर्वस्त्वथ वारुणः । अयं तु नवमस्तेषां द्वीपः सागरसंवृतः ॥ ७
योजनानां सहस्रं च द्वीपोऽयं दक्षिणोत्तरात् । पूर्वे किरातास्तिष्ठन्ति पश्चिमे यवनाः स्थिताः ८
ब्राह्मणाः क्षत्रिया वैश्या मध्ये शूद्राश्च भागशः । इज्यायुद्धवणिज्याद्यवृत्तिमन्तो व्यवस्थिताः ९
शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृताः । वेदस्मृतिमुखाश्चान्याः पारियात्रोद्भवा मुने ॥ १०
नर्मदासुरमाद्याश्च नद्यो विन्ध्यविनिःसृताः । तापीपयोष्णीनिर्विन्ध्याकावेरीप्रमुखा नदीः(श्च ताः)
ऋक्षपादोद्भवा ह्येताः श्रुताः पापं हरन्ति याः । गोदावरीभीमरथीकृष्णवेण्यादिकास्तथा ॥ १२
सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः । कृतमालाताम्रपर्णीप्रमुखा मलयोद्भवाः ॥ १३
त्रिसांध्यऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः । ऋषिकुल्याकुमाराद्याः शुक्तिमत्पादसंभवाः १४
आसां नद्युपनद्यश्च सन्त्यन्यास्तु सहस्रशः । तास्विमे कुरुपश्चालमध्यदेशादयो जनाः ॥ १५
पूर्वदेशादिकाश्चैव कामरूपनिवासिनः । पौण्ड्राः कालिङ्गा मगधा दाक्षिणात्याश्च सर्वशः ॥ १६
तथा परान्त्याः सौराष्ट्राः शूद्राभीरास्तथाऽर्बुदाः । मारुका मालवाश्चैव पारियात्रनिवासिनः १७
सौवीराः सैन्धवापन्नाः शाल्वाः शाकलवासिनः । मद्रारामास्तथाऽम्बष्ठाः पारसीकादयस्तथा॥
आसां पिबन्ति सलिलं वसन्ति सरितां सदा । समोपेता महाभाग(गा) हृष्टपुष्टजनाकुलाः ॥ १९
वसन्ति भारते वर्षे युगान्यत्र महामुने । कृतं त्रेता द्वापरं च कलिश्चान्य(न्य)त्र न क्वचित् ॥ २०
तपस्तप्यन्ति यतयो जुह्वते चात्र यज्विनः । दानानि चात्र दीयन्ते परलोकार्थमादरात् ॥ २१
पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते । यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा ॥ २२
अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने । यतो हि कर्मभूरेषा यतोऽन्या भोगभूमयः ॥ २३
अत्र जन्मसहस्राणां सहस्रैरपि सत्तम । कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसंचयन्(यात्) ॥ २४

---

* अयमध्यायः क. ग. पुस्तकयोर्नास्ति ।

---

१ ख. प्रसृता ।

गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषा मनुष्याः ॥ २५
कर्माण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्ममहीमनन्ते तस्मिल्लँयं ये त्वमलाः प्रयान्ति ॥ २६
जानीम नो तत्कूवयं (?) विलीने स्वर्गप्रदे कर्मणि देहबन्धम् ।
प्राप्स्यन्ति धन्याः खलु ते मनुष्या ये भारतेनेन्द्रियविप्रहीनाः ॥ २७

नववर्षं च भो विप्रा जम्बूद्वीपमिदं मया । लक्षयोजनविस्तारं संक्षेपात्कथितं द्विजाः ॥ २८
जम्बूद्वीपं समावृत्य लक्षयोजनविस्तरः । भो द्विजा वलयाकारः स्थितः क्षी(क्षा)रोदधिर्बहिः २९

इति श्रीमहापुराणे आदिब्राह्मे भुवनकोशे जम्बूद्वीपनिरूपणं नामैकोनविंशोऽध्यायः ॥ १९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१४१६

अथ विंशोऽध्यायः ।

लोमहर्षण उवाच—

क्षारोदेन यथा द्वीपो जम्बूसंज्ञोऽभिवेष्टितः । संवेष्ट्य क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः ॥ १
जम्बूद्वीपस्य विस्तारः शतसाहस्रसंमितः । स एव द्विगुणो विप्राः प्लक्षद्वीपेऽप्युदाहृतः ॥ २
सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै । श्रेष्ठः शान्तभयो नाम शिशिरस्तदनन्तरम् ॥ ३
सुखोदयस्तथाऽऽनन्दः शिवः क्षेमक एव च । ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा हि ते ॥ ४
पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा । आनन्दं च शिवं चैव क्षेमकं ध्रुवमेव च ॥ ५
मर्यादाकारकास्तेषां तथाऽन्ये वर्षपर्वताः । सप्तैव तेषां नामानि शृणुध्वं मुनिसत्तमाः ॥ ६
गोमेदश्चैव चन्द्रश्च नारदो दन्दुभिस्तथा । सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः ॥ ७
वर्षाचलेषु रम्येषु वर्षेष्वेतेषु चानघाः । वसन्ति देवगन्धर्वसहिताः संहितं प्रजाः ॥ ८
तेषु पुण्या जनपदाँ वीरा न म्रियते जनः । नाऽऽधयो व्याधयो वाऽपि सर्वकालसुखं हि तत्
तेषां नद्यश्च सप्तैव वर्षाणां तु समुद्रगाः । नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः ॥ १०
अनुतप्ता शिखा चैव विपाशा त्रिदिवा क्रमुः । अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः ॥ ११
एते शैलास्तथा नद्यः प्रधानाः कथिता द्विजाः । क्षुद्रनद्यस्तथा शैलास्तत्र सन्ति सहस्रशः ॥ १२
ताः पिबन्ति सदा हृष्टा नदीर्जनपदास्तु ते । अवसर्पिणी नदी तेषां न चैवोत्सर्पिणी द्विजाः १३
न तेष्वस्ति युगावस्था तेषु स्थानेषु सप्तसु । त्रेतायुगसमः कालः सर्वदैव द्विजोत्तमाः ॥ १४
प्लक्षद्वीपादिके विप्राः शाकद्वीपान्तिकेषु वै । पञ्चवर्षसहस्राणि जना जीवन्त्यनामयाः ॥ १५
धर्मश्चतुर्विधस्तेषु वर्णाश्रमविभागजः । वर्णाश्च तत्र चत्वारस्तान्बुधाः प्रवदामि वः ॥ १६

---

१ ख. क्षीरोदेन । २ क. जम्बुसं । ३ ख. °ज्ञो निवे° । ४ क. ग. जम्बुद्वी° । ५ ख. °मे चाति° । ६ ख. सततं । ७ क. °दा चिरादुम्रियते । ख. °दाश्चिरावम्रिय° । ८ ख. °कालं सु° । ९ ग. प्रसूना । १० ग. °ते । आस° । ११ ग. न तेषां वै न । १२ क. ख. तिष्ठति ।

आर्यकाः कुरवश्चैव [1] वि[2]वि[3]श्वा भाविनश्च ये । विप्रक्षत्रियवैश्यास्ते शूद्राश्च मुनिसत्तमाः ॥ १७
जम्बूवृक्षप्रमाणस्तु तन्मध्ये सुमहातरुः । प्लक्षस्तन्नामसंज्ञोऽयं प्लक्षद्वीपो द्विजोत्तमाः ॥ १८
इज्यते तत्र भगवांस्तै[4]र्वर्णैरार्यकादिभिः । सोमरूपी जगत्स्रष्टा [5] सर्वः सर्वेश्वरो हरिः ॥ १९
प्लक्षद्वीपप्रमाणेन प्लक्षद्वीपः समावृतः । तथैवेक्षुरसोदेन परिवेषानुकारिणा ॥ २०
इत्येतद्वो मुनिश्रेष्ठाः प्लक्षद्वीप उदाहृतः । संक्षेपेण मया भूयः शाल्मलं तं निबोधत ॥ २१
शाल्मलस्येश्वरो वीरो वपुष्मांस्तत्[6]सुता[7] द्विजाः । [*तेषां तु नाम संज्ञानि(?)[8] सप्तवर्षाणि तानि वै
श्वेतोऽथ[9] हरितश्चैव जीमूतो[10] रोहितस्तथा । वैद्युतो मानसश्चैव सुप्रभश्च द्विजोत्तमाः] ॥ २३
शाल्मन(श्व) समुद्रोऽसौ द्वीपेनेक्षुरसोदकः । विस्ता[11]राद्द्विगुणेनाथ सर्वतः संवृतः स्थितः ॥ २४
तत्रापि पर्वताः सप्त विज्ञेया रत्नयोनयः । वर्षाभिव्यञ्जका[12]स्ते तु तथा सप्तैव निम्नगाः ॥ २५
कु[13]मुदश्चोन्नतश्चैव तृतीयस्तु बलाहकः । द्रोणो यत्र महौषध्यः स च[14]तुर्थो महीधरः ॥ २६
कङ्कस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा । ककुद्मान्पर्वतवरः सरिन्नामा[15]न्यतो द्विजाः[16] ॥ २७
श्रोणी तोया वि[17]तृष्णा च च[18]न्द्रा शुक्रा विमोचनी । निवृत्तिः सप्तमी तासां स्मृतास्ताः पापशान्तिदाः
श्वेतं च लोहितं चैव जीमूतं हरितं तथा । वैद्युत मानसं चैव सुप्रभं नाम सप्तमम् ॥ २९
सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि च । वर्णाश्च शाल्मलेये च वसन्त्येषु द्विजोत्तमाः ॥ ३०
कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक्पृथक् । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव य[19]जन्ति तम्
भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम् । वायुभूतं मखश्रेष्ठै[20]र्यज्वानो[21] यज्ञसंस्थितम् ॥ ३२
देवानामत्र सांनिध्यमतीव सुमनोहरे । शाल्मलिश्च महावृक्षो ना[22]म[23]निर्वृत्तिकारकः ॥ ३३
एष द्वीपः समुद्रेण सु[24]रोदेन समावृतः । विस्ताराच्छाल्मलेश्चैव समेन तु समन्ततः ॥ ३४
सुरोदकः परिवृतः कुशद्वीपेन सर्वतः । शाल्मलस्य तु विस्ताराद्द्विगुणेन समन्ततः ॥ ३५
ज्योतिष्मतः कुशद्वीपे[25] शृणुध्वं तस्य पुत्रकान् । उद्भिदो वेणुमांश्चैव स्वैरथो[26] र[27]न्धनो धृतिः ॥ ३६
प्रभाकरोऽथ क[28]पिलस्तन्नाम्ना वर्षपद्धतिः । तस्यां वसन्ति मनुजैः सह दैतेयदानवाः ॥ ३७
तथैव देवगन्धर्वा यक्षकिंपुरुषादयः । वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः ॥ ३८
द[29]मिनः शुष्मिण[30]ः स्नेहा मान्दहाश्च[?] द्विजोत्तमाः । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः
यथोक्तकर्मकर्तृत्वात्स्वा[31]धिकारक्षयाय ते । तत्र ते तु कुशद्वीपे ब्रह्मरूपं जनार्दनम् ॥ ४०
य[32]जन्तः क्षपयन्त्युग्र[33]मधिकारफलप्रदम् । वि[34]द्रुमो हेमशैलश्च द्युतिमान्पुष्टिमांस्तथा ॥ ४१

---

* एतदादिः सार्धः श्लोको नास्ति क. पुस्तके ।

---

१ क. °रराश्चै° । २ क. विशा भोजवि° । ३ ग. °विशा भा° । ४ ग. °वांस्त्रैवर्ण्यैरा° । ५ ग. जगच्छ्रेष्ठः । ६ ख. °ष्मांस्तु ततो द्वि° । ७ ख. ग. °त्सुतो द्वि° । ८ ग. °ज्ञामस° । ९ ख. °थ लोहित° । १० ख. °तो हरित° । ११ ग. °स्तारा द्विगु° । १२ क. ख. °कास्तत्र त° । १३ क. कुशदा वानदा चैव । १४ ख. वरूथो । १५ ग. °मानि भो द्वि° । १६ क. ग. °जाः । योनितो° । १७ ख. विप्रतृष्णा चन्द्रा । ग. निरस्रा । १८ ख. चङ्क्रा । १९ ग. प्रयन्ति । २० ख. ग. °र्यज्विनो । २१ क. °संमित° । २२ क. नानावृत्ति° । २३ ख. °मवृत्तिप्रका° । २४ क. घृतोदेन । २५ ख. °पे सह्यपुत्रान्निबोधत । उ° । ग. °पे सप्त द्वीपाञ्शृणुष्व तान् । २६ ग. सुरथो । २७ क. लम्बनो । ग. नत्यलो । २८ ख. कम्पिल° । २९ क. दयिनः । ख. देमिनः । ३० ख. °णः संघा मंदेहाश्च महामुनेः । ब्रा° । ३१ क. °त्स्वाभिचारक्रिया हि ते । ३२ ख. पर्वतः । ३३ ख. °मविका° । ३४ क. विक्रमो ।

कुशेशयो हरिश्चैव सप्तमो मन्दराचलः । वर्षाचलास्तु सप्तैते द्वीपे तत्र द्विजोत्तमाः ॥ ४२
नद्यश्च सप्त तासां तु [1]वक्ष्ये नामान्यनुक्रमात् । धूतपापा शिवा चैव पवि[2]त्रा संमतिस्तथा ॥ ४३
विद्यु[3]दम्भो [4]मही चान्या सर्वपापहरास्त्विमाः । अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाऽचलाः ॥ ४४
कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत्स्मृतम् । तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः ॥ ४५
घृतोदश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः । क्रौञ्चद्वीपो मुनिश्रेष्ठाः श्रूयतां चापरो महान् ॥ ४६
कुशद्वीपस्य विस्ताराद्द्विगुणो यस्य *विस्तरः । क्रौञ्चद्वीपे द्युतिमतः [5]पुत्राः सप्त महात्मनः॥ ४७
तन्नामानि च वर्षाणि [6]तेषां चक्रे [7]महामनाः । [8]कु[9]शंगो मन्दगश्चोष्णः पीवरोऽथान्धकारकः ॥ ४८
मुनिश्च दुन्दुभिश्चैव सप्तैते तत्सुता [10]द्विजाः । तत्रापि देवगन्[11]धर्वसेविताः सुमनोरमाः ॥ ४९
वर्षाचला मुनिश्रेष्ठास्तेषां नामानि भो द्विजाः । क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः ॥ ५०
[12]देवव्रतो धमश्चैव तथाऽन्यः पुण्डरीकवान् । दुन्दुभिश्च महाशैलो द्विगुणास्ते परस्परम् ॥ ५१
[13]द्वीपा[14]द्विपेषु ये [15]शै[16]लास्तथा द्वीपानि ते तथा । वर्षेष्वेतेषु रम्येषु[17] वर्षशैलै[18]र्वरेषु च ॥ ५२
निवसन्ति निरातङ्काः सह देवगणैः प्रजाः । पुष्कला पुष्करा धन्[19]यास्ते ख्याताश्च द्विजोत्तमाः॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः । तत्र नद्यो मुनिश्रेष्ठा याः पिबन्ति तु ते सदा॥
सप्त प्रधानाः शतशस्तथाऽन्याः क्षुद्रनिम्नगाः । गौरी कुमुद्वती चैव संध्या रात्रिर्मनोजवा ॥ ५५
ख्यातिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः । तत्रापि [20]वर्णैर्भगवान्पुष्कराद्यैर्जनार्दनः ॥ ५६
ध्यानयोगै रुद्ररूप ई(इ)ज्यते यज्ञसंनिधौ । क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन तु ॥ ५७
आवृतः सर्वतः क्रौञ्चद्वी[21]पतुल्येन मानतः । दधिमण्डोदकश्चापि शाकद्वीपेन संवृतः ॥ ५८
क्रौञ्चद्वीपस्य वि[22]स्तारद्विगुणेन द्विजोत्तमाः । शाकद्वीपेश्वरस्यापि [23]भव्यस्य सुमहात्मनः ॥ ५९
सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः । जलदश्च कुमारश्च सुकुमारो [24]मनीर[25]कः ॥ ६०
[26]कुसमोदश्च मोदाकिः सप्तमश्च महाद्रुमः । तत्संज्ञान्येव तत्रापि सप्त वर्षाण्यनुक्रमात् ॥ ६१
तत्रापि पर्वताः सप्त वर्षविच्छेदकारकाः । पूर्वस्तत्रोदयगिरिर्जलधारस्तथाऽपरः ॥ ६२
तथा रैवतकः श्यामस्तथैवाम्भोगिरिर्द्विजाः । आस्तिकेयस्तथा रम्यः केसरी पर्वतोत्तमः ॥ ६३
शाकश्चात्र महावृक्षः सिद्धगन्धर्वसेवितः । [27]यत्पत्रवातसंस्पर्शादाह्लादो जायते परः ॥ ६४
तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः । +निवसन्ति महात्मानो निरातङ्का निरामयाः ॥ ६५
नद्यश्चात्र महापुण्याः सर्वपापभयापहाः । सुकुमारी कुमारी च नलिनी [28]रेणुका च या ॥ ६६
इ[29]क्षुश्च [30]धेनुका चैव गभस्ती सप्तमी तथा । [31]अन्यास्त्वयुतशस्तत्र क्षुद्रनद्यो द्विजोत्तमाः ॥ ६७

---

* पुस्तकत्रयेऽप्ययमेव पाठः । × इदमर्धं क. ग. पुस्तकयोर्नास्ति ।

---

१ ख. श्रृणु । २ क °त्रा च सिता तथा । ३ क. °दन्या म° । ग. °दत्वा म° । ४ ख. महा । ५ क. ग. पुत्रास्तस्य म° । ६ क. तेषु । ७ क. ख. महीपतिः । ८ क. कुलवृद्धो वंशधरः पावनो धन्वका° । ९ ख. °शलो मनुगृश्चोच्छः पी° । १० ख. मुने । ११ ख. °न्धर्वाः सर्वे ते सु° । १२ क. देवावृद्धो महातेजास्त° । १३ क. द्वीपद्वीपे° । १४ ग. °पा द्वीपे° । १५ ख. वै । १६ क. °ला यथा द्वीपेन ते । १७ क. °षु शैलारण्येषु भो द्विजाः । नि° । १८ ख. °वनेषु । १९ ख. °न्यास्तिष्याख्याश्च । २० ख. वर्षे भग° । २१ ख. °पकल्पेन । २२ क. ख. °स्ताराद्द्विगु° । २३ क. ख. भविष्यस्य म° । २४ क. मरीचिकः । ख. मणीवकः। २५ क. °कः । कुशोदरः समोदा° । २६ ख. कुसुमोदः समो° । २७ क. यत्र तद्वात° । २८ क. वेणुका । ख. धेनुका । २९ ख. °श्च मधुकश्चैव । ३० क. विभ्रुता । ३१ ख. °न्यास्तु शतश° ।

महीधरास्तथा सन्ति शतशोऽथ सहस्रशः । ताः पिबन्ति मुदा युक्ता जलदादिषु ये स्थिताः ६८
[*वर्षेषु ये जनपदा[1]श्चतुर्वर्थसमन्विताः । नद्यश्चात्र महापुण्याः स्वर्गादभ्येत्य मेदिनीम् ॥ ६९
धर्महानिर्न तेष्वस्ति न संहर्षो[2] न शुक्तथा । मर्यादाव्युत्क्रमश्चापि तेषु देशेषु सप्तसु] ॥ ७०
मगाश्च मागधाश्चैव मानसा मन्दगास्तथा । मगा ब्राह्मणभूयिष्ठा मागधाः क्षत्रियास्तु ते ॥ ७१
वैश्यास्तु मानसास्तेषां शूद्रा ज्ञेयास्तु मन्दगाः । शाकद्वीपे[3] स्थितैर्विष्णुः सूर्यरूपधरो हरिः ॥७२
यथोक्तै[4]रिज्यते सम्यक्कर्मभिर्नियतात्मभिः । शाकद्वीपस्ततो विप्राः क्षीरोदेन समन्ततः ॥ ७३
शाकद्वीपप्रमाणेन वलयेनेव वेष्टितः । [5]क्षीराब्धिः सर्वतो विप्राः पुष्कराख्येन वेष्टितः ॥ ७४
द्वीपेन शाकद्वीपात्तु द्विगुणेन समन्ततः । पुष्करे सवनस्यापि महावीतो[6]ऽभवत्सुतः ॥ ७५
धातकिश्च तयोस्तद्वद्द्वे वर्षे नामसंज्ञिते । [7]महावीतं तथैवान्यद्धातकीखण्डसंज्ञितम् ॥ ७६
एकश्चात्र महाभागाः प्रख्यातो वर्षपर्वतः । मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः ॥ ७७
योजनानां सहस्राणि ऊर्ध्वं पञ्चाशदुच्छ्रितः[8] । तावदेव च विस्तीर्णः सर्वतःपरिमण्डलः ॥ ७८
पुष्करद्वीपवलयं मध्येन विभजन्निव । स्थितोऽसौ तेन विच्छिन्नं जातं[9] वर्षद्वयं हि तत् ॥ ७९
वलयाकारमेकैकं तयोर्मध्ये महागिरिः । दशवर्षसहस्राणि तत्र जीवन्ति मानवाः ॥ ८०
निरामया विशोकाश्च रागद्वेषविवर्जिताः । अधमोत्तमौ न तेष्वास्तां न वध्यवधकौ द्विजाः ॥८१
नेर्ष्या[10]ऽसूया भयं रोषो दोषो लोभादिकं न च । महावीतं बहिर्वर्षं धातकीखण्डमन्ततः ॥ ८२
मानसोत्तरशैलस्य देवदैत्यादिसेवितम् । सत्यानृते न तत्राऽऽस्तां द्वीपे पुष्करसंज्ञिते ॥ ८३
*न तत्र[11] नद्यः शैला वा द्वीपे वर्षद्वयान्विते । तुल्यवेषास्तु मनुजा देवैस्तत्रैकरूपिणः ॥ ८४
वर्णाश्रमाचारहीनं धर्मा[12]हरण[13]वर्जितम् । त्रयीवार्तादण्डनीति[14]शुश्रूषारहितं च तत् ॥ ८५
वर्षद्वयं ततो विप्रा भौमस्वर्गोऽयमुत्तमः । सर्वस्य सुखदः कालो जरारोगविवर्जितः ॥ ८६
पुष्करे धातकीखण्डे महावीते च वै द्विजाः । न्यग्रोधः पुष्करद्वीपे ब्रह्मणः स्थानमुत्तमम् ॥ ८७
तस्मिन्निवसति ब्रह्मा पूज्यमानः सुरासुरैः । स्वादूद[15]केनोदधिना पुष्करः परिवेष्टितः ॥ ८८
समेन पुष्करस्यैव विस्तारान्म[16]ण्डलात्तथा । एवं द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः ॥ ८९
द्वीपश्चैव समुद्रश्च समानौ द्विगुणौ परौ । पयांसि सर्वदा सर्वसमुद्रेषु समानि वै ॥ ९०
न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते । स्थालीस्थमग्निसंयोगादुद्रेकि सलिलं यथा ॥ ९१
तथेन्दुवृद्धौ सलिलमम्भोधौ मुनिसत्तमाः । अन्यूनानतिरिक्ताश्च वर्धन्त्यापो ह्रसन्ति च ॥ ९२
उदयास्तमने त्विन्दोः पक्षयोः शुक्लकृष्णयोः । दशोत्तराणि पञ्चैव अङ्गुलानां शतानि च ॥ ९३
अपां वृद्धिक्षयौ दृष्टौ [17]समुद्राणां द्विजोत्तमाः । भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितम् ॥ ९४
भुञ्जन्ति षड्रसं विप्राः प्रजाः सर्वाः सदैव हि । स्वादूदकस्य [18]परितो दृश्यते लोकसंस्थितिः ९५

* एतदादिश्लोकद्वयं नास्ति ख. पुस्तके । * इदमर्धं नास्ति ख. पुस्तके ।

१ ग. °पदाः स्व° । २ ग. संघर्षः परस्परम् । म° । ३ ग. °पे स्थितो विष्णुः । ४ ग. °क्तैर्विद्यते । ५ ख. क्षीरोदः ६ ख. °वीरोऽभ° । ७ ख. महावीरं । ८ ख. °दुच्छ्रयः । ता° । ९ ख. °तं तद्वर्षकद्वयम् । व° । १० क. °र्ष्याऽऽमयभयद्वेषलो° । ११ क. °त्र धर्मः शीलं वा द्वी° । १२ ख. ग. धर्म्याह° । १३ क. °र्माहारविव° । १४ क. °तिक्षुत्तृषार° । १५ क. °केन द° । १६ क. °ण्डलस्य च । द्वी° । १७ क. ख. समुद्राणां । १८ ख. ग. पुरतो ।

द्विगुणा काञ्चनी भूमिः सर्वे[2]जन्तुविवर्जिता । लोकालोकस्ततः शैलो योजनायुतविस्तृतः ॥ ९६
उच्छ्रयेणापि तावन्ति सहस्रा[3]ण्यावलोहि (?) सः । ततस्तमः समावृत्य तं शैलं सर्वतः स्थितम् ॥
तमश्चाण्डकटाहेन[4] समन्तात्परिवेष्टितम् । पञ्चाशत्[5]कोटिविस्तारा सेयमुर्वी द्विजोत्तमाः ॥ ९८
सहैवाण्डकटाहेन सद्वीपा समहीधरा । सेयं धात्री विधात्री च सर्वभूतगुणाधिका ॥
आधारभूता जगतां सर्वेषां सा द्विजोत्तमाः ॥ ९९

इति श्रीमहापुराणे आदिब्राह्मे समुद्रद्वीपपरिमाणवर्णनं नाम विंशोऽध्यायः ॥ २० ॥

श्लोकानामादितः समष्ट्यङ्काः—१५१५

अथैकविंशोऽध्यायः ।

लोमहर्षण उवाच—

विस्तार एष कथितः पृथिव्या मुनिसत्तमाः । सप्ततिस्तु सहस्राणि तद्[6]उच्छ्रायोऽपि कथ्यते ॥ १
दशसाहस्रमेकैकं पातालं मुनिसत्तमाः । अतलं वितलं चैवं[7] नितलं[8] सुतलं तथा ॥ २
तलातलं रसातलं पातालं चापि सप्तमम् । कृष्णा शुक्ला[9]ऽरुणा पीता शर्करा शैलकाञ्चनी ॥ ३
भूमयो[10] यत्र विप्रेन्द्रा वरप्रासादशोभिताः । तेषु दानवदैतेयजातयः[11] शतशः[12] स्थिताः[13] ॥ ४
नागानां च महाङ्गानां ज्ञातयश्च द्विजोत्तमाः । स्वर्लोकादपि रम्याणि पातालानीति[14] नारदः ५
प्राह स्वर्गसदोमध्ये पातालेभ्यो गतो दिवम्[15] । आह्लादकारिणः[16] शुभ्रा मणयो यत्र सुप्रभाः ६
नागाभरणभूषाश्च पातालं केन तत्समम् । दैत्यदानवकन्याभिरितिश्चेतश्च[17] शोभिते ॥ ७
पाताले कस्य न प्रीतिर्विमुक्तस्यापि जायते । दिवाऽर्करश्मयो यत्र प्रभास्तन्वन्ति नाऽऽतपम् ८
शशिनश्च न शीताय निशि द्योताय केवलम् । भक्ष्यभोज्यमहापानमदमत्तैश्च भोगिभिः ॥ ९
यत्र न ज्ञायते कालो गतोऽपि दनुजादिभिः । वनानि नद्यो रम्याणि सरांसि कमलाकराः १०
पुंस्कोकिला[18]दिलापाश्च मनोज्ञान्यम्बराणि च । भूषणान्यतिरम्याणि गन्धाढ्यं[19] चानुलेपनम् ॥ ११
वीणावेणुमृदङ्गानां निःस्वनाश्च सदा द्विजाः । एतान्यन्यानि रम्याणि भाग्यभोग्यानि दानवैः ॥
दैत्योरगैश्च भुज्यन्ते पातालान्तरगोचरैः । पातालानामधश्चाऽऽस्ते विष्णोर्या तामसी तनुः ॥ १३
शेषाख्या यद्गुणान्वक्तुं न शक्ता दैत्यदानवाः । योऽनन्तः पठ्यते सिद्धैर्देव[20]देवर्षिपूजितः[21] ॥ १४
सहस्रशिरसा व्यक्तः स्वस्तिकामलभूषणः । फणामणिसहस्रेण यः स विद्योतयन्दिशः ॥ १५
सर्वान्करोति निर्वीर्यान्हिताय जगतोऽसुरान् । मदाघूर्णितनेत्रोऽसौ यः सदैवैककुण्डलः ॥ १६
किरीटी स्रग्धरो भाति साग्निश्वेत इवाचलः । नीलवासा मदोत्सिक्तः श्वेतहारोपशोभितः ॥ १७

---

१ क. तावती । २ ख. °र्वेशत्रुवि° । ३ क. °स्राण्यव° । ग. °स्रानाव° । ४ क. तमःखण्ड° । ५ क. °त्री च सर्वेषां स° । ६ क °दुत्कर्षोऽपि । ७ ख. °व तलातलं गभस्तिमत् । महातलाख्यं सुतलं पा° । ८ ग. °लं च गभस्तिमत् । महाख्यं सुतलं चाग्र्यं पा° । ९ क. ख. °रा चैव का° । १० क. °दैत्यानां ज्ञात° । ख. °दैत्यानां जात° । ११ ख. °तयस्तु सहस्रशः । ना° । १२ ग. शतसंघशः । ना° । १३ ख. °ताः । निवसन्ति महाभागाः पत° । ग. °ताः । निवसन्ति महाभागा जात° । १४ ग. °लादीनि ना° । १५ क. ख. दिवि । १६ क. °णः सर्वा भूमयोऽत्र मनोहराः । नानाभ° । १७ ख. °तश्च शतशो° । १८ क. °किलविरावैश्च म° । १९ ग. गन्धाढ्यं । २० ग. °दैवैर्देवर्षि° । २१ ग. °जितैः । स° ।

साभ्रगङ्गाप्रपातोऽसौ कैलासाद्रिरि[1]वोत्तमः । लाङ्गलासक्तहस्ताग्रो बिभ्रन्मुशलमुत्तमम् ॥ १८
उपास्यते स्वयं कान्त्या यो वारुण्या च मूर्तया । कल्पान्ते यस्य वक्त्रेभ्यो विषानलशिखोज्ज्वलः
संकर्षणात्मको रु[2]द्रो निष्क्रम्यात्ति जगत्त्रयम् । स बिभ्रच्छिखरीभूतमशेषं क्षितिमण्डलम् ॥ २०
आस्ते पातालमूलस्थः शेषोऽशेषसुरार्चितः । तस्य वीर्यं प्रभावश्च स्वरूपं रूपमेव च ॥ २१
न हि वर्णयितुं शक्यं ज्ञातुं वा त्रिदशैरपि । यस्यैषा सकला पृथ्वी फणामणिशिखारुणा ॥ २२
आस्ते कुसुममालेव कस्तद्वीर्यं वदिष्यति । यदा विजृम्भतेऽनन्तो मदाघूर्णितलोचनः ॥ २३
तदा चलति भूरेषा साद्रितोयाधिकानना । गन्धर्वाप्सरसः सिद्धाः किंनरोर[3]गचारणाः ॥ २४
नान्तं गुणानां गच्छन्ति ततोऽनन्तोऽय[4]मव्ययः । यस्य नागवधूह[5]स्तैर्लापितं हरिचन्दनम् ॥ २५
मुहुः श्वासानिलायस्तं याति दिक्पटवासताम् । यमाराध्य पुराणर्षिर्गर्गो ज्योतींषि तत्त्वतः॥२६
ज्ञातवान्सकलं चैव निमि[6]त्तपठितं [7]फलम् । तेनेयं [8]नागवर्येण शिरसा विधृता मही ॥
बिभर्ति सकलाँल्लोकान्सदेवासुरमानुषान् ॥ २७

इति श्रीमहापुराणे आदिब्राह्मे पातालप्रमाणकीर्तनं नामैकविंशोऽध्यायः ॥ २१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१५४२

अथ द्वाविंशोऽध्यायः ।

लोमहर्षण उवाच—

ततश्चानन्तरं विप्रा नरका रौरवादयः । पापिनो येषु [9]पात्यन्ते ताञ्शृणुध्वं द्विजोत्तमाः ॥ १
रौरवः [10]शौकरो [11]रोध[12]स्तानो वि[13]शसनस्तथा । महाज्वालस्त[14]प्तकुड्यो महालोभो विमोहनः ॥ २
रुधिरा[15]न्धो वसातप्तः [16]कृमीशः कृमिभोजनः । असिपत्रवनं कृष्णो लालाभ[17]क्षश्च दारुणः ॥ ३
[*तथा पूयवहः पापो [18]वह्निज्वालो ह्यधःशिराः । सदंशः कृष्णसूत्रश्च तम[19]श्चावीचिरेव च ॥ ४
श्वभोजनोऽथाप्रतिष्ठोमावीचिश्च तथाऽपरः । इत्येवमादयश्चान्ये नरका भृशदारुणाः] ॥ ५
यमस्य विषये घोराः शस्त्राग्निविषदर्शिनः । पतन्ति येषु पुरुषाः पापकर्मरताश्च ये ॥ ६
कूटसाक्षी तथा सम्यक्पक्षपातेन यो वदेत् । [20]यश्चान्यदनृतं वक्ति स नरो याति रौरवम् ॥ ७
भ्रूणहा [21]पुरहन्ता च गोघ्नश्च मुनिसत्तमाः । यान्ति ते [22]रौरवं घोरं [23]यश्चोच्छ्वासनिरोधकः ॥ ८
सुरापो ब्र[24]ह्महा हर्ता सुवर्णस्य च [25]शूकरे । प्रयाति [26]नरके यश्च तैः संसर्गमुपैति वै ॥ ९
राजन्यवैश्यहा चैव तथैव गुरुतल्प[27]गः । तप्तकुम्भे [28]स्वसृगामी हन्ति राजभटं च यः ॥ १०

---

* एतदादि श्लोकद्वयं नास्ति ग. पुस्तके ।

---

१ ख. ग. °वोन्नतः । ला° । २ क. °द्रो भ्रमन्याति ज° । ३ क. °गराक्षसाः । ना° । ४ ख. °मप्यजः । य° । ५ ग. °स्तैर्गालितं । ६ ख. °मित्तं प° । ७ ग. फली । ८ क. नाम विधृता शिरसा सकला म° । ९ क. पच्यन्ते । १० क. ख. शूकरो । ११ ख. रोधः शीलो विश्वस° । १२ क. °स्तालो वि° । १३ ग. °शनसस्त° । १४ ख. °सकुम्भो म° । १५ ख. ग. °न्धो वैतरणी कृ° । १६ क. कृमिशः । ख. कृमाशः । १७ क. °क्षः सुदा° । १८ क. वह्नितप्तोऽप्यधः° । १९ क. °श्चाशुचि° । २० क. यस्तावद° । २१ ख. गुरुहन्ता । २२ क. निरयं । २३ ख. यश्च श्वास° । २४ क. °ह्महत्यावान्सुव° । २५ क. सूपकः । २६ क. नरकं । २७ क. °गः । ये कुञ्जेषु मृगानन्यान्घ्नन्ति राजभटाश्च ये । सर्वविक्रयकर्ता वै पापः के° । २८ ख. स्वसागा° ।

माध्वीविक्रयकृद्वध्यपालः केसरविक्रयी । तप्तलोहे पतन्त्येते यश्च भक्तं परित्यजेत् ॥ ११
सुतां स्नुषां चापि गत्वा महाज्वाले निपात्यते । अवमन्ता गुरूणां यो यश्चाऽऽक्रोष्टा नराधमः॥
वेददूषयिता यश्च वेदविक्रयकश्च यः । अगम्यगामी यश्च स्यात्ते यान्ति शबलं द्विजाः ॥ १३
चौरो विमोहे पतति मर्यादादूषकस्तथा । देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः ॥ १४
स याति कृमिभक्ष्ये वै कृमीशे तु दुरिष्टिकृत् । पितृदेवातिथीन्यस्तु पर्यश्नाति नराधमः ॥ १५
लालाभक्ष्ये स यात्युग्रे शरकर्ता च वेधके । करोति कर्णिनो यश्च यश्च खड्गादिकृन्नरः ॥ १६
प्रयान्त्येते विशसने नरके भृशदारुणे । असत्प्रतिग्रहीता च नरके यात्यधोमुखे ॥ १७
अयाज्ययाजकस्तत्र तथा नक्षत्रसूचकः । कृमिपूये नरश्चैको याति मिष्टान्नभुक्सदा ॥ १८
लाक्षामांसरसानां च तिलानां लवणस्य च । विक्रेता ब्राह्मणो याति तमेव नरकं द्विजाः ॥१९
मार्जारकुक्कुटच्छागांश्ववराहविहंगमान् । पोषयन्नरकं याति तमेव द्विजसत्तमाः ॥ २०
रङ्गोपजीवी कैवर्तः कुण्डाशी गरदस्तथा । सूची माहिषिकश्चैव पर्वगामी च यो द्विजः ॥ २१
अगारदाही मित्रघ्नः शकुनिग्रामयाजकः । रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये ॥ २२
मधुहा ग्रामहन्ता च याति वैतरणीं नरः । रेतःपानादिकर्तारो मर्यादाभेदिनश्च ये ॥ २३
*ते कृच्छ्रे यान्त्यशौचाश्च कुहकाजीविनश्च ये । असिपत्रवनं याति वनच्छेदी वृथैव यः ॥ २४
औरभ्रिका मृगव्याधा वह्निज्वाले पतन्ति वै । यान्ति तत्रैव ते विप्रा यश्चापाकेषु वह्निदः ॥ २५
व्रतोपलोपको यश्च स्वाश्रमाद्विच्युतश्च यः । संदंशयातनामध्ये पततस्तावुभावपि ॥ २६
दिवा स्वप्नेषु स्यन्दन्ते ये नरा ब्रह्मचारिणः । पुत्रैरध्यापिता ये तु ते पतन्ति श्वभोजने ॥ २७
एते चान्ये च नरकाः शतशोऽथ सहस्रशः । येषु दुष्कृतकर्माणः पच्यन्ते यातनागताः ॥ २८
तथैव पापान्येतानि तथाऽन्यानि सहस्रशः । भुज्यन्ते जातिपुरुषैर्नरकान्तरगोचरैः ॥ २९
वर्णाश्रमविरुद्धं च कर्म कुर्वन्ति ये नराः । कर्मणा मनसा वाचा निरयेषु पतन्ति ते ॥ ३०
अधःशिरोभिर्दृश्यन्ते नारकैर्दिवि देवताः । देवाश्चाधोमुखान्सर्वानधः पश्यन्ति नारकान् ॥ ३१
स्थावराः कृमयोऽब्जा(ज्जा)श्च पक्षिणः पशवो नराः । धार्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम्
सहस्रभागः प्रथमाद्द्वितीयोऽनुक्रमात्तथा । सर्वे ह्येते महाभागा यावन्मुक्तिसमाश्रयाः ॥ ३३
यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः । पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः ॥ ३४
+पापानामनुरूपाणि प्रायश्चित्तानि यद्यथा । तथा तथैव संस्मृत्य प्रोक्तानि परमर्षिभिः ॥ ३५

---

* इदमर्धं ख. पुस्तके नास्ति । + एतदर्धं नास्ति ख. पुस्तके ।

---

१ ख. °कृयो वै पापः के° । २ ग. °सरिवि° । ३ क. °यी । ते मोहेषु प° । ४ ग. °षां च भगिनीं ग° । ५ क. °राधिपम् । वे° । ६ क. ख. °जनृपद्वेषी र° । ७ क. °र्मान्यश्च निहन्ति वै । पि° । ८ क. °श्च कारयिता नरः । ९ क °कः वेगीपूतिमयं चैको । ग. °कः । वेगिपूयवहश्चैको । १० क. ग. °भुङ्नरः । ला° । ११ क. ख. °गवराहांश्च वि° । १२ क. ग्रामघ्नः । १३ ख. ग. °निर्ग्राम° । १४ क. बन्धुहा । १५ क. °र्णीं द्विजाः । मूल्येन संध्याक° । १६ क. °दानिन्दिताश्च । १७ ग. ये । ये कृष्णे या° । १८ ख. यान्ति । १९ क. °प्रा यः श्वपा° । २० क. यः । सदृशं पापमाश्रित्य व्रजतस्ता° । २१ क. स्पन्दन्ते । ग. स्कन्दन्ते । २२ क. ख. °कार्णवगो° । २३ क. °मयः ख्याताः प° । २४ क. °समार्गात्प्रथमाद्द्वितीयात्क्रमशस्तथा । ख. °सभागात्प्रथमा द्वितीया तु क्रमास्तथा ।

पापे गुरूणि गुरुणि स्वल्पान्यल्पे च तद्विदः। *प्रायश्चित्ता[१]नि विप्रेन्द्रा जगुः स्वायंभुवादयः ३६
प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै। यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥ ३७
कृते पापे[२]ऽनुतापो वै यस्य पुंसः प्रजायते। प्रायश्चित्तं तु तस्यैकं [३]हरिसंस्मरणं परम् ॥ ३८
प्रातर्निशि तथा संध्यामध्याह्नादिषु संस्मरन्। नारायणमवाप्नोति सद्यः पापक्ष[४]यान्नरः ॥ ३९
विष्णुसंस्मरणात्क्षीणसमस्तक्लेशसंचयः। मुक्तिं प्रया[५]ति भो विप्रा विष्णोस्तस्यानुकीर्तनात् ॥ ४०
वासुदेवे मनो यस्य जपहोमार्चनादिषु। तस्यान्तरायो विप्रेन्द्रा देवेन्द्रत्वादिकं फलम्[६] ॥ ४१
क्व नाकपृष्ठगमनं पुनरावृत्तिलक्षणम्। क्व जपो वासुदेवेति मुक्तिबीजमनुत्तमम् ॥ ४२
तस्मादहर्निशं विष्णुं संस्मरन्पुरुषो द्विजः। न याति नरकं शुद्धः संक्षीणा[७]खिलपातकः ॥ ४३
मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्ययः। नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तमाः ॥ ४४
वस्त्वेकमेव दुःखाय सुखायेर्ष्योदयाय च। कोपाय च यतस्तस्माद्वस्तु दुःखात्मकं कुतः ॥ ४५
[+तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते। तदेव कोपाल(य) यतः प्रसादाय च जायते ॥ ४६
तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकम्]। मनसः परिणामोऽयं सुखदुःखादिलक्ष[८]णः॥
ज्ञानमेव परं [९]ब्रह्माज्ञानं बन्धा[१०]यं चेष्यते। [११]ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परम् ॥ ४८
विद्याविद्ये [१२]हि भो विप्रा ज्ञानमेवावधार्यताम्। एवमेतन्मयाऽऽख्यातं भवतां मण्डलं भुवः ॥ ४९
पातालानि च सर्वाणि तथैव नरका द्विजाः। समुद्राः पर्वताश्चैव द्वीपा वर्षाणि निम्नगाः ॥
संक्षेपात्सर्वमाख्यातं किं भूयः श्रोतुमिच्छ[१३]थ ॥ ५०

इति श्रीमहापुराणे आदिब्राह्मे पातालनरककीर्तनं नाम द्वाविंशोऽध्यायः ॥ २२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१५९२

अथ त्रयोविंशोऽध्यायः।

मुनय ऊचुः—

कथितं भवता सर्वमस्माकं सकलं तथा। भुवर्लोकादि[१४]काँल्लोकाञ्श्रोतुमिच्छामहे वयम् ॥ १
[१५]तथैव ग्रहसंस्थानं प्रमाणानि यथा तथा। समाचक्ष्व महाभाग यथावल्लोमहर्षण ॥ २

लोमहर्षण उवाच—

रविचन्द्रमसोर्याव[१६]न्मयूखैरवभास्यते। ससमुद्रसरिच्छैला तावती पृथिवी स्मृता ॥ ३
यावत्प्रमाणा पृथिवी विस्तारपरिमण्डला। *नभस्तावत्प्रमाणं हि विस्तारपरिमण्डलम् ॥ ४
भूमेर्योजनलक्षे तु सौरं विप्रास्तु मण्डलम्। लक्षे दिवा[१७]कराच्चापि मण्डलं शशिनः स्थितम् ॥ ५

---

* एतदर्धं नास्ति क. पुस्तके। + एतदादिः सार्धः श्लोको नास्ति ख. पुस्तके। * एतदर्धं क. पुस्तके नास्ति।

---

१ ख. °नि भो विप्रा ज°। २ ख. °पे च ता°। ३ क. कृष्णानुस्मरणं। ४ ख. ग. °क्षयं नरः। ५ ख. ग. °तिं स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते। वा°। ६ क. °म्। नाकपृष्ठादिग°। ग. °म्। आना°। ७ क. °णाशेषपा°। ८ ख. ग. °क्षणम्। ज्ञा°। ९ क. ख. ब्रह्मज्ञा°। १० क. °य नेष्य°। ११ क. ज्ञानमेव परं वि°। ख. ज्ञानं च कामदं वि°। १२ क. हि ये विप्रा ज्ञानं तेषां परं मतम्। १३ क. ख. °च्छत। इ°। १४ क. °दिसर्वांस्ताञ्श्रो°। १५ क. तत्र ग्रहाणां सं°। १६ क. °वत्किरणैर°। १७ ख. ग. °करस्यापि।

पूर्णे शतसहस्रे तु योजनानां निशाकरात् । नक्षत्रमण्डलं कृत्स्नमुपरिष्टात्प्रकाशते ॥ ६
द्विलक्षे चोत्तरे विप्रा बुधो नक्षत्रमण्डलात् । तावत्प्रमाणभागे तु बुधस्याप्युशना स्थितः ॥ ७
अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः । लक्षद्वयेन भौमस्य स्थितो देवपुरोहितः ॥ ८
सौरिर्बृहस्पतेरूर्ध्वं द्विलक्षे समवस्थितः । सप्तर्षिमण्डलं तस्माल्लक्षमेकं द्विजोत्तमाः ॥ ९
ऋषिभ्यस्तु सहस्राणां शतादूर्ध्वं व्यवस्थितः । [1]मेढीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः १०
त्रैलोक्यमेतत्कथितं संक्षेपेण द्विजोत्तमाः । ई[2]ज्याफलस्य भू[3]रेषा ई[4]ज्या चात्र प्रतिष्ठिता[5] ॥ ११
ध्रुवादूर्ध्वं महर्लोको यत्र ते कल्पवासिनः । एकयोजनको[6]टी तु[7] महर्लोको विधीयते ॥ १२
द्वे कोट्यौ तु जनो लोको यत्र ते ब्रह्मणः सुताः । सनन्दनाद्याः [8]कथि[9]ता विप्राश्चामलं[10]चेतसः १३
चतुर्गुणोत्त[11]रं चोर्ध्वं जनलोकात्तपः [12]स्मृतम् । वैराजा यत्र ते देवाः स्थिता देहविवर्जिताः ॥ १४
षड्गुणेन तपोलोकात्सत्यलोको विराजते । अपुनर्मा[13][14]रकं यत्र सिद्धादिमुनिसेवितम् ॥ १५
पादगम्यं तु यत्किंचिद्वस्त्वस्ति पृथिवीमयम् । स भूर्लोकः समाख्यातो विस्तारोऽस्य मयोदितः
भूमिसूर्यान्तरं यत्तु सिद्धादिमुनिसेवितम् । भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तमाः ॥ १७
ध्रु[15]वसूर्यान्तरं यत्तु नियुतानि चतुर्दश । स्वर्लोकः सोऽपि कथितो[16] लो[17]कसंस्थानचिन्तकैः[18] ॥ १८
त्रैलोक्यमेतत्कृतकं विप्रैश्च परिपठ्यते । जनस्तपस्तथा सत्यमिति चाकृतकं त्रयम् ॥ १९
कृतकाकृत[19]को मध्ये महर्लोक इति स्मृतः । शून्यो भवति कल्पान्ते [20]योऽन्तं न च विनश्यति २०
एते सप्त महालोका मया वः कथिता द्विजाः । पातालानि च सप्तैव ब्रह्माण्डस्यैष विस्तरः॥२१
एतदण्डकटाहेन तिर्यगूर्ध्वमधस्तथा । कपित्थस्य यथा बीजं सर्वतो वै समावृतम् ॥ २२
दशोत्तरेण पयसा द्विजाश्चाण्डं च त[21]द्वृतम् । स चाम्बुपरिवारोऽसौ वह्निना वेष्टितो बहिः ॥ २३
वह्निस्तु वायुना वायुर्विप्रास्तु नभसाऽऽवृतः[22] । आकाशोऽपि मुनिश्रेष्ठा महता परिवेष्टितः ॥ २४
दशोत्तराण्यशेषाणि विप्राश्चैतानि सप्त वै । महान्तं च समावृत्य प्रधानं समवस्थितम् ॥ २५
अनन्तस्य न तस्यान्तः संख्यानं चापि विद्यते । तदनन्तमसंख्यातं प्रमाणेनापि वै यतः ॥ २६
हेतुभूतमशेषस्य प्रकृतिः सा परा[23] द्विजाः । अण्डानां तु सहस्राणां सहस्राण्ययुतानि च ॥ २७
ईदृशानां तथा तत्र कोटिकोटिशतानि च । दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमा[24]निह ॥ २८
प्रधाने[25]ऽवस्थितो व्यापी चेतनात्मनिवेदनः । प्रधानं च पुमांश्चैव सर्वभूता[26]नुभूतया ॥ २९
विष्णुशक्त्या द्विजश्रेष्ठा[27] धृतौ संश्रयधर्मिणौ । तयोः सैव पृथग्भावे कारणं संश्रयस्य च ॥ ३०
क्षोभकारणभूता च सर्गकाले द्विजोत्तमाः । यथा शैत्यं जले वातो बिभर्ति कणिकागतम् ॥ ३१
जगच्छक्तिस्तथा विष्णोः प्रधानपुरुषात्मकम् । यथा च पादपो मूलस्कन्धशाखादिसंयुतः ॥ ३२

---

१ ग. मेथ्वीभूतं स° । २ क. इष्टाफ° । ३ क. भूम्येषा । ४ क. इष्टा साऽत्र । ५ क °ता । नवकोटिषु यत्रैते कल्प्यन्ते मुनिसत्तमाः । यान्ति चैते महर्लोकं यत्र क° । ६ क. °कोटिस्तु यत्र ते कल्पवासिनः । द्वे । ७ ख. तु यत्र ते कल्पवासिनः । द्वे । ८ क. कवयो । ९ ग. °थिताः प्रियाश्चा° । १० क. °लतेजसः । ११ क. ख. °त्तरादूर्ध्वं । १२ क. ख. स्मृतः । १३ ख. °नर्नारका सूर्या ब्रह्मलोको हि स स्मृतः । पा° । १४ ग. °रका यत्र ब्रह्मलोको हि स स्मृतः । पा° । १५ ग. °वपूर्वोत्तरं । १६ क. °तो द्विजास्तत्त्वाविचि° । १७ ख °कस्थानविचि° । १८ क. °कैः । लोकत्रयं च कृतकं । १९ क. °तकयोर्मध्ये । २० ग. यो ह्यन्ते न । २१ ख. तत्स्मृत° । २२ ग. °तः । भूतादिना नभः सोऽपि म° । २३ ख. °राजिना । अ । २४ ख. मानपि । प्र । २५ क. °नेन स्थि° । २६ क. ख. °तात्मभू° । २७ क. °ष्ठाः प्रकृत्या त्र° ।

आद्य[1]बीजात्प्रभवति बीजान्यन्यानि वै ततः । प्रभवन्ति ततस्तेभ्यो भवन्त्यन्ये परे द्रुमाः ॥ ३३
तेऽपि तल्लक्षणद्रव्यकारणानुगता द्विजाः । एवमव्याकृतात्पूर्वं जायन्ते महदादयः ॥ ३४
वि[2]शेषान्तास्ततस्तेभ्यः संभवन्ति सुरादयः । तेभ्यश्च पुत्रास्तेषां तु पुत्राणां परमे सुताः ॥ ३५
बीजाद्वृक्षप्ररोहेण यथा नापचयस्तरोः । भूतानां भूतसर्गेण नैवास्त्यपचयस्तथा ॥ ३६
संनिधानाद्यथाऽऽकाशकालाद्याः कारणं तरोः । तथैवापरिणा[3]मेन विश्वस्य भगवान्हरिः ॥ ३७
व्रीहिबीजे यथा मूलं[4] नालं पत्राङ्कुरौ तथा । काण्डकोषास्तथा पुष्पं क्षीरं तद्वच्च तण्डुलः ॥३८
तुषाः कणाश्च सन्तो वै यान्त्याविर्भावमात्मनः । प्ररोहहेतुसामग्र्यमासाद्य मुनिसत्तमाः ॥ ३९
तथा कर्म[5]स्वनेकेषु देवाद्यास्तनवः स्थिताः । विष्णुशक्तिं समासाद्य प्ररोहमुपयान्ति वै ॥ ४०
स च विष्णुः परं ब्रह्म यतः सर्वमिदं जगत् । जगच्च यो यत्र चेदं [6]यस्मिन्विलयमेष्यति ॥ ४१
तद्ब्रह्म परमं धाम सदसत्परमं पदम् । यस्य सर्वमभेदेन जगदेतच्चराचरम् ॥ ४२
स एव मूलप्रकृतिर्व्यक्तरूपी जगच्च सः । तस्मिन्नेव लयं सर्वं याति तत्र च तिष्ठति ॥ ४३

कर्ता क्रिया[7]णां स च इज्यते क्रतुः स एव तत्कर्मफलं च तस्य यत् ।
युगादि[8] यस्माच्च भवेदशेषतो हरेर्न किंचिद्व्यतिरिक्तमस्ति तत् ॥ ४४

इति श्रीमहापुराणे आदिब्राह्मे भूर्भुवःस्वरादिकीर्तनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१६३६

अथ चतुर्विंशोऽध्यायः ।

लोमहर्षण उवाच—

तारामयं भगवतः शिशुमाराकृति प्रभोः । दिवि रूपं हरेर्य[9]त्तु तस्य पुच्छे स्थितो ध्रुवः ॥ १
सैष भ्रमन्भ्रामयति चन्द्रादित्यादिकान्ग्रहान् । भ्रमन्तमनु तं यान्ति नक्षत्राणि च चक्रवत् ॥२
सूर्याचन्द्रमसौ तारा नक्षत्राणि ग्रहैः सह । वातानीक[10]मयैर्बन्धैर्ध्रुवे बद्धानि तानि वै ॥ ३
शिशुमाराकृति प्रोक्तं यद्रूपं ज्योतिषां दिवि । नारायणः परं धाम तस्याऽऽधारः स्वयं हृदि॥४
उत्तानपादतनयस्तमाराध्य प्रजापतिम् । स ताराशिशुमारस्य ध्रुवः पुच्छे व्यवस्थितः ॥ ५
[*आधारः शिशुमारस्य सर्वाध्यक्षो जनार्दनः । ध्रुवस्य शिशुमारश्च [11]ध्रुवे भानुर्व्यवस्थितः]॥ ६
तदाधारं जगच्चेदं सदेवासुरमानुषम् । येन विप्रा विधानेन तन्मे शृणुत सांप्रतम् ॥ ७
विवस्वानष्टभिर्मासैर्ग्र[12]सत्यपो [13]रसात्मिकाः । व[14]र्षत्य[15]म्बु ततश्चान्नमन्नादमखिलं जगत् ॥ ८
विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलम् । [16]सोमं पुष्य[17]त्यथेन्दु(न्दो) श्च वायुनाडीमयैर्दिवि[18] ९

---

* अयं श्लोको नास्ति क. पुस्तके ।

---

१ ग. आदिबी° । २ क. °शेषश्च तत° । ३ क. °मे तु वि° । ४ ख. °लं पत्राङ्कुरतयाऽपरे । का° । ५ ग. °मेसु लोके° । ६ ग. यस्मिंश्च लय° । ७ ग. °या वै स । ८ ख. °दि यत्साधनमप्यशे° । ग. °दि तत्साधनमप्यशे° । ९ क. °र्यैश्च त° । १० क. °मयैः पाशैर्ध्रु° । ११ ख. ध्रुवपुच्छे व्यव° । १२ क. °सत्येको र° । १३ क. रसात्मकम् । १४ क. °र्षतेऽम्बुरसं तस्मादन्नादाप्यायते ज° । १५ ग. °म्बुरसं तस्मादन्नादप्यखि° । १६ क. सोमेऽमुं पुष्यते चेन्दुर्वायु° । १७ ख. °ष्यत्यथेन्द्रश्च । १८ ख. °वि । नालैर्विक्षिप्तमेघेषु ।

जलैर्विक्षिप्य[1]तेऽभ्रेषु धूमाग्न्यनिलमूर्तिषु । न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः ॥१०
अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः । संस्कारं कालजनितं विप्राश्चाऽऽसाद्य निर्मलाः॥
[2]सरित्समु[3]द्रा भौमास्तु तथाऽऽपः प्राणिसंभवाः । चतुष्प्रकारा भगवानादत्ते सविता द्विजाः १२
आकाशगङ्गासलिलं तथाऽऽहृत्य गभस्तिमान् । अनभ्रगतमेवोर्व्यां सद्यः क्षिपति रश्मिभिः १३
तस्य संस्पर्शनिर्धूतपापपङ्को द्विजो[4]त्तमाः । न याति नरकं मर्त्यो दिव्यं स्नानं हि तत्स्मृतम्॥१४
[5]दृष्टसूर्यं हि तद्वारि पतत्यभ्रैर्विना दिवः । आकाशगङ्गासलिलं तद्गोभिः क्षिप्यते रवेः ॥ १५
कृत्तिकादिषु ऋक्षे[6]षु विषमेष्वम्बु यद्दिवः । दृष्टाऽर्के पतितं ज्ञेयं तद्गाङ्गं दिग्गजोह्वि(द्धृ)तम् ॥१६
युग्मर्क्षेषु तु यत्तोयं पतत्यर्कोह्वि(द्धृ)तं दिवः । तत्सूर्यरश्मिभिः सद्यः समादाय निरस्यते ॥ १७
उभयं पुण्यमत्यर्थं नृणां [7]पापहरं द्विजाः । आकाशगङ्गासलिलं दिव्यं [8]स्नानं द्विजोत्तमाः ॥ १८
यत्तु मेघैः समुत्सृष्टं वारि तत्प्राणिनां द्विजाः । पुष्णात्योषधयः सर्वा जीवनायामृतं हि तत् १९
तेन वृद्धिं परां नीतः [9]सकलश्चौषधीगणः । साधकः फलपाका[10]न्तः प्रजानां तु प्रजायते ॥ २०
[11]तेन यज्ञान्यथाप्रोक्तान्मानवाः शास्त्रचक्षुषः । कु[12]र्वतेऽहरह[13]श्चैव देवानाप्याययन्ति ते ॥ २१
एवं यज्ञाश्च वेदाश्च व[14]र्णाश्च द्विजपूर्वकाः । सर्वदेवनिकाया[15]श्च पशुभूतगणाश्च ये ॥ २२
वृष्ट्या धृतमिदं [16]सर्वं जगत्स्थावरजङ्गमम्[17] । साऽपि निष्पाद्यते वृष्टिः सवित्रा मुनिसत्तमाः ॥ २३
आधारभूतः सवितुर्ध्रुवो मुनिवरोत्तमाः । [18]ध्रुवस्य शिशुमारोऽसौ सोऽपि नारायणाश्रयः ॥ २४
हृदि नारायणस्तस्य शिशुमारस्य संस्थितः । विभर्ता सर्वभूतानामादिभूतः सनातनः ॥ २५
एवं मया मुनिश्रेष्ठा ब्रह्माण्डं समुदाहृतम् । भूसमुद्रादिभिर्युक्तं किमन्यच्छ्रोतुमिच्छथ ॥ २६

इति श्रीमहापुराणे आदिब्राह्मे ध्रुवसंस्थितिनिरूपणं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१६६२

अथ पञ्चविंशोऽध्यायः ।

मुनय ऊचुः—

पृथिव्यां यानि तीर्थानि[19] पुण्यान्यायतनानि च । वक्तुमर्हसि धर्मज्ञ श्रोतुं नो वर्तते मनः ॥ १

लोमहर्षण उवाच—

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम्[20] । विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ २

मनो विशुद्धं पुरुषस्य तीर्थं वा[21]चां त(चस्त)था चेन्द्रियनिग्र[22]हश्च ।
एतानि तीर्थानि शरीरजानि स्वर्गस्य मार्गं प्रतिबोधयन्ति ॥ ३

---

१ क. °प्य मेघेषु । २ क. °रितः समु° । ३ क. °मुन्द्रं भूमिं च त° । ४ ग. °त्तमः । न° । ५ ख. दृष्ट्वा सू° । ६ क. °षु निपतत्यम्बु । ७ क. पापापहं । ८ क. स्थानं । ९ ख. सफल° । १० क. °कान्तस्तस्मादेतत्प्रजाय° । ११ क. येन । १२ क. ख. °वन्त्यह° । १३ ख. °हस्तैश्च दे° । १४ ग. ऋषयो । १५ क. °श्च सर्वभू° । १६ ग. सर्वमन्नं निष्पाद्यते यया । साऽ° । १७ क. °म् । एवं निष्पाद्यते वृष्ट्या सावित्र्या मु° । १८ क. ध्रुवोऽपि शिं° । १९ ख. °नि धान्यान्या° । ग. °नि वनान्या° । २० ख. °संयुत° । २१ ख. वाचो मनस्त्विन्द्रि° । ग. वाच्यं मनस्त्विन्द्रि° । २२ ख. ग. °ग्रहं तपः । ए° ।

चित्तमन्तर्गतं दुष्टं तीर्थ[1]स्नानैर्न शुध्यति । शतशोऽपि जलैर्धौतं सुराभा[2]ण्डमिवाशुचि ॥ ४
न तीर्थानि न दानानि न व्रतानि न चाऽऽश्रमाः । [3]दुष्टाशयं दम्भरु[4]चिं पु[5]नन्ति व्युत्थितेन्द्रियम्
इन्द्रियाणि वशे कृत्वा यत्र [6]यत्र वसेन्नरः । तत्र [7]तत्र कुरुक्षेत्रं प्रयागं पुष्करं तथा ॥ ६
[8]तस्माच्छृणुध्वं वक्ष्यामि तीर्थान्यायतनानि च । [*संक्षेपेण मुनिश्रेष्ठाः पृथिव्यां यानि कानि वै
विस्तरेण न शक्यन्ते वक्तुं वर्षशतैरपि । प्रथमं पुष्करं तीर्थं नैमिषारण्यमेव च ॥ ८
प्रयागं च प्रवक्ष्यामि धर्मारण्यं द्विजोत्तमाः । [9]धेनुकं चम्पकारण्यं सैन्धवारण्यमेव च ॥ ९
पुण्यं च मगधारण्यं दण्डकारण्यमेव च] । गया प्र[10]भासं श्रीतीर्थं दिव्यं कनखलं तथा ॥ १०
भृगुतुङ्गं हिरण्याक्षं [11]भीमारण्यं कुशस्थलीम् । लो[12]हाकुलं सकेदारं मन्दरारण्यमेव च ॥ ११
[13]महाबलं कोटितीर्थं सर्वपापहरं तथा । [14]रूपतीर्थं [15]शूकरवं चक्रतीर्थं महाफलम् ॥ १२
[16]योगतीर्थं सोमतीर्थं तीर्थं [17]साहोटकं तथा । तीर्थं कोकामुखं पुण्यं बदरीशैलमेव च ॥ १३
सोमतीर्थं [18]तुङ्गकूटं तीर्थं [19]स्कन्दाश्रमं [20]तथा । कोटितीर्थं चाग्निपदं तीर्थं पञ्चशिखं तथा ॥ १४
धर्मोद्भवं कोटितीर्थं[21] तीर्थं बाधप्रमोचनम् । [22]गङ्गाद्वारं पञ्चकूटं मध्यकेसरमेव च ॥ १५
चक्रप्रभं मतङ्गं च [23]कुशदण्डं च विश्रुतम् । [24]दंष्ट्राकुण्डं [25]विष्णुतीर्थं सार्वकामिकमेव च ॥ १६
तीर्थं मत्स्यतिलं चैव बदरी सुप्रभं तथा । ब्रह्मकुण्डं वह्निकुण्डं तीर्थं सत्यपदं तथा ॥ १७
चतुःस्रोतश्चतुःशृङ्गं शैलं द्वाद[26]शधारकम् । मानसं [27]स्थूलशृङ्गं च [28]स्थूलदण्डं तथोर्वशी ॥ १८
लोकपालं [29]मनुवरं सो[30]माह्वशैलमेव च[31] । सदाप्रभं मेरुकुण्डं तीर्थं सोमाभिषेचनम् ॥ १९
[32]महास्रोतं कोटरकं पञ्चधारं त्रिधारकम् । स[33]प्तधारैकधारं च तीर्थं चामरकण्टकम् ॥ २०
[34]शालग्रामं च[35]क्रतीर्थं[36] कोटिद्रुममनुत्तम[37]म् । बिल्वप्रभं देवह्रदं तीर्थं [38]विष्णुह्रदं तथा ॥ २१
शङ्खप्रभं देवकुण्डं तीर्थं वज्रायुधं तथा । अग्निप्रभं च पुंनागं देवप्रभमनुत्तमम् ॥ २२
विद्याधरं सगान्धर्वं श्रीतीर्थं ब्रह्मणो ह्रदम् । सातीर्थं लोकपालाख्यं मणिपूरगिरिं तथा ॥ २३
तीर्थं पञ्चह्रदं चैव पुण्यं पिण्डारकं तथा । मलव्यं गोप्रभावं च गोवरं वटमूलकम् ॥ २४
स्नानदण्डं प्रयागं च गुह्यं विष्णुपदं तथा । कन्याश्रमं वायुकुण्डं जम्बूमार्गं तथोत्तमम् ॥ २५
गभस्तितीर्थं च तथा ययातिपतनं शुचि । कोटितीर्थं भद्रवटं महाकालवनं तथा ॥ २६
नर्मदातीर्थमपरं तीर्थवज्रं तथाऽर्बुदम् । पिङ्गुतीर्थं सवासिष्ठं तीर्थं च पृथ(?)संगमम् ॥ २७

---

* एतदादिः सार्धः श्लोको नास्ति क. पुस्तके, ख. पुस्तके चैतदादि श्लोकत्रयं नास्ति ।

---

१ ग. °स्नानान्न शु° । २ क. °ण्डमथाशु° । ३ क. दुष्टबुद्धि । ४ ख. °चिं न पु° । ५ क. °नन्तीह द्विजोत्तमाः । इ° । ख. °नन्त्यजिते° । ६ क. ग. तत्र । ७ ख.ग. तस्य । ८ ख. तस्य शृणु° । ९ ख. वेणुकं । १० क °भासतीर्थं च दि° । ११ क. हिमारण्यं । १२ क. °हार्गलं च के° । १३ क हिमालयं । ख. महालयं । १४ क. सूर्यतीर्थं । १५ क. शुद्धिकरं । ख. शूकरं च च° । १६ क. घोरतीर्थं । ख. व्यासतीर्थं । १७ क. साकोट° । ख. साखोट° । १८ क. शंभुतीर्थं । १९ ग. स्कन्धाश्र° । २० क. ख. °था । सूर्यप्रभं धेनुसरः सप्तमायुषिकं तथा । ध° । २१ क. °र्थं सर्वपापप्र° । ख. °र्थं सार्वकामिकमेव च । सूर्यप्रभं महाकुण्डं तीर्थं सो° । २२ क. गङ्गाधरं । २३ ग. शत्रुकुण्डं । २४ क. दृष्टकुण्डं । २५ क. विष्णुकुण्डं । २६ ग. °शवार° । २७ क. स्थलशृङ्गं । २८ क. स्थूलकूटं । २९ ग. मेसधरं । ३० ग. °मात्रि शै° । ३१ क. च । सूर्यप्रभं मधुकु° । ३२ क. °हाश्रोत्रं कोकनदं प° । ख. °हासूत्रं कारकं च प° । ३३ ख. °प्तवीरै° । ३४ क. शालिग्रा° । ३५ क. वज्रतीर्थं । ३६ क. °र्थं कदलीह्रदमेव च । वि° । ख. °र्थं कदलीह्रदमुत्त° । ३७ ख. °म् । विम्बप्र° । ३८ क. ख. विष्णुप्रभं ।

तीर्थं दौर्वासिकं नाम तथा पिञ्जरकं शुभम् । ऋषितीर्थं ब्रह्मतुङ्गं वसुतीर्थं कुमारिकम् ॥ २८
शक्रतीर्थं पञ्चनदं रेणुकातीर्थमेव च । पैतामहं च विमलं रुद्रपादं तथोत्तमम् ॥ २९
मणिमत्तं च कामाख्यं कृष्णतीर्थं कुशाविलम् । यजनं याजनं चैव तथैव ब्रह्मवालुकम् ॥ ३०
पुष्पन्यासं पुण्डरीकं मणिपूरं तथोत्तरम् । दीर्घसत्रं हयपदं तीर्थं चानशनं तथा ॥ ३१
गङ्गोद्भेदं शिवोद्भेदं नर्मदोद्भेदमेव च । वस्त्रापदं दारुवलं छायारोहणमेव च ॥ ३२
सिद्धेश्वरं मित्रवलं कालिकाश्रममेव च । वटावटं भद्रवटं कौशाम्बी च दिवाकरम् ॥ ३३
द्वीपं सारस्वतं चैव विजयं कामदं तथा । रुद्रकोटिं सुमनसं तीर्थं सद्रावनामितम् ॥ ३४
स्यमन्तपञ्चकं तीर्थं ब्रह्मतीर्थं सुदर्शनम् । सततं पृथिवीसर्वं पारिप्लवपृथूदकौ ॥ ३५
दशाश्वमेधिकं तीर्थं सर्पिजं विषयान्तिकम् । कोटितीर्थं पञ्चनदं वाराहं यक्षिणीह्रदम् ॥ ३६
पुण्डरीकं सोमतीर्थं मुञ्जवटं तथोत्तमम् । बदरीवनमासीनं रत्नमूलकमेव च ॥ ३७
लोकद्वारं पञ्चतीर्थं कपिलातीर्थमेव च । सूर्यतीर्थं शङ्खिनी च गवां भवनमेव च ॥ ३८
तीर्थं च यक्षराजस्य ब्रह्मावर्तं सुतीर्थकम् । कामेश्वरं मात्रितीर्थं(?) तीर्थं शीतवनं तथा ॥ ३९
स्नानलोमापहं चैव माससंसरकं तथा । दशाश्वमेधं केदारं ब्रह्मोदुम्बरमेव च ॥ ४०
सप्तर्षिकुण्डं च तथा तीर्थं देव्याः सुजम्बुकम् । ईटा(हा)स्पदं कोटिकूटं किंदानं किंजपं तथा ४१
कारण्डवं चावेध्यं च त्रिविष्टपमथापरम् । पाणिषा(खा)तं मिश्रकं च मधूवटमनोजवौ ॥ ४२
कौशिकी देवतीर्थं च तीर्थं च ऋणमोचनम् । दिव्यं च नृगधूमाख्यं तीर्थं विष्णुपदं तथा ॥ ४३
अमराणां ह्रदं पुण्यं कोटितीर्थं तथाऽपरम् । श्रीकुञ्जं शालितीर्थं च नैमिषेयं च विश्रुतम् ॥ ४४
ब्रह्मस्थानं सोमतीर्थं कन्यातीर्थं तथैव च । ब्रह्मतीर्थं मनस्तीर्थं तीर्थं वै कारुपावनम् ॥ ४५
सौगन्धिकवनं चैव मणितीर्थं सरस्वती । ईशानतीर्थं प्रवरं पावनं पाञ्चयज्ञिकम् ॥ ४६
त्रिशूलधारं माहेन्द्रं देवस्थानं कृतालयम् । शाकंभरी देवतीर्थं सुवर्णाख्यं कलिं ह्रदम् ॥ ४७
क्षीरश्रवं विरूपाक्षं भृगुतीर्थं कुशोद्भवम् । ब्रह्मतीर्थं ब्रह्मयोनिं नीलपर्वतमेव च ॥ ४८
कुब्जाम्बकं भद्रवटं वसिष्ठपदमेव च । स्वर्गद्वारं प्रजाद्वारं कालिकाश्रममेव च ॥ ४९
रुद्रावर्तं सुगन्धाश्वं कपिलावनमेव च । भद्रकर्णह्रदं चैव शङ्कुकर्णह्रदं तथा ॥ ५०
सप्तसारस्वतं चैव तीर्थमौशनसं तथा । कपालमोचनं चैव अवकीर्णं च काम्यकम् ॥ ५१
चतुःसामुद्रिकं चैव शतकिं(?)च सहस्रिकम्(?) । रेणुकं पञ्चवटकं विमोचनमथौजसम् ॥ ५२
स्थाणुतीर्थं कुरोस्तीर्थं स्वर्गद्वारं कुशध्वजम् । विश्वेश्वरं मानवकं कूपं नारायणाश्रयम् ॥ ५३
गङ्गाह्रदं वटं चैव बदरीपाटनं तथा । इन्द्रमार्गमेकरात्रं क्षीरकावासमेव च ॥ ५४
सोमतीर्थं दधीचं च श्रुततीर्थं च भो द्विजाः । कोटितीर्थस्थलीं चैव भद्रकालीह्रदं तथा ॥ ५५
अरुन्धतीवनं चैव ब्रह्मावर्तं तथोत्तमम् । अश्ववेदी कुब्जावनं यमुनाप्रभवं तथा ॥ ५६
वीरं प्रमोक्षं सिन्धूत्थमृप(षि)कुल्या सकृत्तिकम् । उर्वीसंक्रमणं चैव मायाविद्योद्भवं तथा ॥ ५७
महाश्रमो वैतसिकारूपं सुन्दरिकाश्रमम् । बाहुतीर्थं चारुनदीं विमलाशोकमेव च ॥ ५८
तीर्थं पञ्चनदं चैव मार्कण्डेयस्य धीमतः । सोमतीर्थं सितोदं च तीर्थं मत्स्योदरीं तथा ॥ ५९
सूर्यप्रभं सूर्यतीर्थमशोकवनमेव च । अरुणास्पदं कामदं च शुक्रतीर्थं सवालुकम् ॥ ६०
पिशाचमोचनं चैव सुभद्राह्रदमेव च । कुण्डं विमलदण्डस्य तीर्थं चण्डेश्वरस्य च ॥ ६१

ज्येष्ठस्थानह्रदं चैव पुण्यं ब्रह्मसरं तथा । जैगीषव्यगुहा चैव हरिकेशवनं तथा ॥ ६२
अजामुखसरं चैव घण्टाकर्णह्रदं तथा । पुण्डरीकह्रदं चैव वापी कर्कोटकस्य च ॥ ६३
सुवर्णास्योदपानं च श्वेततीर्थह्रदं तथा । कुण्डं घर्घरिकायाश्च श्यामाकूपं च चन्द्रिका ॥ ६४
श्मशानस्तम्भकूपं च विनायकह्रदं तथा । कूपं सिन्धूद्भवं चैव पुण्यं ब्रह्मसरं तथा ॥ ६५
रुद्रावासं तथा तीर्थं नागतीर्थं पुलोमकम् । भक्तह्रदं क्षीरसरः प्रेताधारं कुमारकम् ॥ ६६
ब्रह्मावर्तं कुशावर्तं दधिकर्णोदपानकम् । शृङ्गतीर्थं महातीर्थं तीर्थश्रेष्ठा महानदी ॥ ६७
दिव्यं ब्रह्मसरं पुण्यं गयाशीर्षाक्षयं वटम् । दक्षिणं चोत्तरं चैव गोमयं रूपशीतिकम् ॥ ६८
कपिलाह्रदं गृध्रवटं सावित्रीह्रदमेव च । प्रभासनं सीतवनं योनिद्वारं च धेनुकम् ॥ ६९
धन्यकं कोकिलाख्यं च मतङ्गह्रदमेव च । पितृकूपं रुद्रतीर्थं शक्रतीर्थं सुमालिनम् ॥ ७०
ब्रह्मस्थानं सप्तकुण्डं मणिरत्नह्रदं तथा । कौशिक्यं भरतं चैव तीर्थं ज्येष्ठालिका तथा ॥ ७१
विश्वेश्वरं कल्पसरः कन्यासंवेत्य[?]मेव च । निश्चीवा(?)प्रभवश्चैव वसिष्ठाश्रममेव च ॥ ७२
देवकूटं च कूपं च वसिष्ठाश्रममेव च । वीराश्रमं ब्रह्मसरो ब्रह्मवीरावकापिली ॥ ७३
कुमारधारा श्रीधारा गौरीशिखरमेव च । शुनः कुण्डोऽथ तीर्थं च नन्दितीर्थं तथैव च ॥ ७४
कुमारवासं श्रीवासमौर्वीशीता[?]र्थमेव च । कुम्भकर्णह्रदं चैव कौशिकीह्रदमेव च ॥ ७५
धर्मतीर्थं कामतीर्थं तीर्थमुद्दालकं तथा । संध्यातीर्थं कारतोयं कपिलं लोहितार्णवम् ॥ ७६
शोणोद्भवं वंशगुल्ममृषभं कलतीर्थकम् । पुण्यावतीह्रदं तीर्थं तीर्थं बदरिकाश्रमम् ॥ ७७
रामतीर्थं पितृवनं विरजातीर्थमेव च । मार्कण्डेयवनं चैव कृष्णतीर्थं तथा वटम् ॥ ७८
रोहिणीकूपप्रवरमिन्द्रद्युम्नसरं च यत् । सानुगर्तं समाहेन्द्रं श्रीतीर्थं श्रीनदं तथा ॥ ७९
इषुतीर्थं वार्षभं च कावेरीह्रदमेव च । कन्यातीर्थं च गोकर्णं गायत्रीस्थानमेव च ॥ ८०
बदरीह्रदमन्यच्च मध्यस्थानं विकर्णकम् । जातीह्रदं देवकूपं कुशप्रवणमेव च ॥ ८१
सर्वदेवव्रतं चैव कन्याश्रमह्रदं तथा । तथाऽन्यद्वालखिल्यानां सप्तर्षीणां तथाऽपरम् ॥ ८२
तथाऽन्यच्च महर्षीणामखण्डितह्रदं तथा । तीर्थेष्वेतेषु विधिवत्सम्यक्श्रद्धासमन्वितः ॥ ८३
स्नानं करोति यो मर्त्यः सोपवासो जितेन्द्रियः । देवानृषीन्मनुष्यांश्च पितॄन्संतर्प्य च क्रमात् ८४
अभ्यर्च्य देवतास्तत्र स्थित्वा च रजनीत्रयम् । पृथक्पृथक्फलं तेषु प्रतितीर्थेषु भो द्विजाः ॥८५
प्राप्नोति हयमेधस्य नरो नास्त्यत्र संशयः । यस्त्विदं शृणुयान्नित्यं तीर्थमाहात्म्यमुत्तमम् ॥
पठेच्च श्रावयेद्वाऽपि सर्वपापैः प्रमुच्यते ॥ ८६

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्यवर्णनं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१७४८

अथ षड्विंशोऽध्यायः ।

मुनय ऊचुः—

पृथिव्यामुत्तमां[1] भूमिं धर्मकामार्थमोक्षदाम्[2] । तीर्थानामुत्तमं तीर्थं ब्रूहि नो वदतां वर ॥ १

---

१ क. °त्तमं भूरि ध° । २ क. °क्षदम् ।

लोमहर्षण उवाच—

इमं प्रश्नं मम गुरुं पप्रच्छुर्मुनयः पुरा । तमहं संप्रवक्ष्यामि यत्पृच्छध्वं द्विजोत्तमाः ॥ २
स्वाश्रमे सुमहापुण्ये नानापुष्पोपशोभिते । नानाद्रुमलताकीर्णे नाना[1]मृगगणैर्युते ॥ ३
[*पुंनागैः कर्णिकारैश्च सर[2]लैर्देवदारुभिः । शालैस्तालैस्तमालैश्च पनसैर्धवखादिरैः ॥ ४
पाटलाशोकबकुलैः करवीरैः सचम्पकैः । अन्यैश्च विविधैर्वृक्षैर्नानापुष्पोपशोभितैः] ॥ ५
कुरुक्षेत्रे समासीनं व्यासं मतिमतां वरम् । महाभारतकर्तारं[3] सर्वशास्त्रविशारदम् ॥ ६
[+अध्यात्मनिष्ठं सर्वज्ञं सर्वभूतहिते रतम् । पुराणागमवक्तारं वेदवेदाङ्गपारगम्] ॥ ७
पराशरसुतं शान्तं पद्मपत्रायतेक्षणम् । द्रष्टुमभ्याययुः प्रीत्या मुनयः संशितव्रताः ॥ ८
[4]कश्यपो जमदग्निश्[5]च भरद्वाजोऽथ गौतमः । वसिष्ठो जैमिनिर्धौम्यो मार्कण्डेयोऽथ वाल्मिकिः ॥ ९
[*विश्वामित्रः शतानन्दो वात्स्यो गार्ग्योऽथ [6]आसुरिः । सुमन्तुर्भार्गवो [7]नाम कण्वो मेधातिथिर्गुरुः[8]
माण्डव्यश्च्यवनो धूम्रो[9] ह्यसितो देवलस्तथा । मौद्गल्य[10]स्तृणयज्ञश्च पिप्पलादोऽकृतव्रणः ॥ ११
संवर्तः कौशिको रैभ्यो मैत्रेयो हरितस्तथा । शाण्डिल्यश्च विभाण्डश्च दुर्वासा लोमशस्तथा १२
नारदः पर्वतश्चैव वैशंपायन[11]गालवौ । भास्करिः[12] पूरणः[13] सूतः पुलस्त्यः कपिलस्तथा ॥ १३
उलूकः पुलहो वायुर्देवस्थानश्च[14]तुर्भुजः[15] । सनत्कुमारः पैलश्च कृष्णः कृष्णानुभौतिकः] ॥ १४
एतैर्मुनिवरैश्चान्यैर्वृतः सत्यवतीसुतः । रराज स [16]मुनिः श्रीमान्नक्षत्रैरिव चन्द्रमाः ॥ १५
[†तानागतान्मुनीन्सर्वान्पूजयामास वेदवित् । तेऽपि तं प्रतिपूज्यैव कथां चक्रुः परस्परम्] १६
कथान्ते ते मुनिश्रेष्ठाः कृष्णं सत्यवतीसुतम् । पप्रच्छुः संशयं सर्वे तपोवननिवासिनः ॥ १७

मुनय ऊचुः[17]—

मुने वेदांश्च शास्त्राणि पुराणागमभारतम् । भूतं भव्यं भविष्यं च सर्वं जानासि वाङ्मयम् ॥ १८
कष्टेऽस्मिन्दुःखबहुले निःसारे भवसागरे[18] । रागग्राहाकुले रौद्रे विषयोदकसंप्लवे ॥ १९
इन्द्रियावर्तकलिले दृष्टोर्मिशतसंकुले । मोह[19]पङ्काविले दुर्गे [20]लोभगम्भीरदुस्तरे ॥ २०
निमज्जज्जगदालोक्य निरालम्बमचेतनम् । पृच्छामस्त्वां महाभागं ब्रूहि नो [21]मुनिसत्तम ॥ २१
श्रेयः किमत्र संसारे [22]भैरवे लोमहर्षणे । उपदेशप्रदानेन लोकानुद्धर्तुमर्हसि ॥ २२
दुर्लभं परमं क्षेत्रं वक्तुमर्हसि मोक्षदम् । पृथिव्यां [23]कर्मभूमिं च श्रोतुमिच्छामहे वयम् ॥ २३
कृत्वा किल नरः सम्यक्कर्म भूमौ [24]यथोदितम् । प्राप्नोति परमां सिद्धिं नरकं [25]च विकर्मतः ॥ २४
मोक्षक्षेत्रे तथा मोक्षं प्राप्नोति [26]पुरुषः [27]सुधीः । तस्माद्ब्रूहि महाप्राज्ञ यत्पृष्टोऽसि द्विजोत्तम ॥ २५

* एतदादिश्लोकद्वयं नास्ति ख, पुस्तके । + अयं श्लोको नास्ति ख. पुस्तके । * एतदादिश्लोकपञ्चकं नास्ति ख. पुस्तके । † ख. पुस्तके नायं श्लोकः ।

१ क. °नामुनिग° । २ क. °रसैर्दे° । ३ क. ख °रं नानाशा° । ४ ग. काश्यपो । ५ ग. °श्च भारद्वा° । ६ क. गालवः । ७ ग. रामः । ८ ग °णजहनुश्च । ९ क. रैभ्य आत्रे° । १० क. °ण्डिल्यः श्वेतकेतुश्च । ११ क. °नकाण्डवौ । १२ क. °स्करः पू° । १३ क. °रणश्चैव पु° । १४ ग. °श्च तम्बुरः । स° । १५ क. °जः । कृष्णः पैलश्च भो विप्राः कृष्णात्रेयो नभोगतिः । ए° । १६ क. मुनिर्धीमा° । ख. मुनिर्धीमान्त्रा नक्ष° । १७ ख. °चुः—पृ° । १८ क. °रे रोग° । १९ क. °हशोकाचले । २० ग. लोहग° । २१ क. ख. द्विजसत्तम । २२ क. प्राणिनां । २३ ख. °मैभिश्चैव श्रो° । २४ क. यदीरित° । २५ ख. वा । २६ क. ख. परमं । २७ क. शुचिः ।

श्रुत्वा तु वचनं तेषां मुनीनां भावितात्मनाम् । व्यासः प्रोवाच[1] भगवान्भूतभव्यभविष्यवित् २६

व्यास उवाच—

शृणुध्वं मुनयः सर्वे वक्ष्यामि यदि पृच्छथ[2] । यः संवादोऽभवत्पूर्वमृषीणां ब्रह्मणा सह ॥ २७
मेरुपृष्ठे[3] तु विस्तीर्णे नानारत्नविभूषिते । नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥ २८
[*नानापक्षिरुते रम्ये नानाप्र[4]स्रवनाकुले । नानासत्त्वसमाकीर्णे नानाश्चर्यसमन्विते ॥ २९
+नानावर्णशिलाकीर्णे नानाधातुविभूषिते । नानामुनिजनाकीर्णे नानाश्रमसमन्विते] ॥ ३०
तत्राऽऽसीनं जगन्नाथं जगद्योनिं चतुर्मुखम्[5] । जगत्पतिं जगद्वन्द्यं जगदाधारमीश्वरम् ॥ ३१
देवदानवगन्धर्वैर्यक्षविद्याधरोरगैः । मुनिसिद्धाप्सरोभिश्च वृतमन्यैर्दिवालयैः ॥ ३२
केचित्[6]स्तुवन्ति तं देवं केचिद्गायन्ति चाग्रतः[7] । केचि(कैश्चि)द्वाद्यानि वाद्यन्ते केचिन्नृत्यन्ति चापरे
एवं प्रमुदिते काले[8] सर्वभूतसमागमे । नानाकुसुमगन्धाढ्ये दक्षिणानिलसेविते ॥ ३४
भृग्वाद्या[9]स्तं तदा देवं प्रणिपत्य पितामहम् । इममर्थ[10]मृषिवराः पप्रच्छुः पितरं द्विजाः[11] ॥ ३५

ऋषय ऊचुः—

भगवञ्श्रोतुमिच्छामः कर्मभूमिं महीतले । वक्तुमर्हसि देवेश मोक्षक्षेत्रं च दुर्लभम् ॥ ३६

व्यास उवाच—

तेषां वचनमाकर्ण्य प्राह ब्रह्मा सुरेश्वरः । पप्रच्छुस्ते यथा प्रश्नं तत्सर्वं मुनिसत्तमाः ॥ ३७

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभूब्रह्मर्षिसंवादे प्रश्ननिरूपणं नाम षड्विंशोऽध्यायः ॥ २६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१७८५

अथ सप्तविंशोऽध्यायः ।

ब्रह्मोवाच—

शृणुध्वं मुनयः सर्वे यद्वो[12] वक्ष्यामि सांप्रतम् । पुराणं वेदसंबद्धं भुक्तिमुक्तिप्रदं शुभम् ॥ १
पृथिव्यां भारतं वर्षं कर्मभूमिरुदाहृता[13] । कर्मणः फलभूमि[14]श्च स्वर्गं च नरकं तथा ॥ २
तस्मिन्वर्षे नरः पापं कृत्वा [15]धर्मं च भो द्विजाः । अवश्यं फलमाप्नोति अशुभस्य शुभस्य च ॥ ३
ब्राह्मणा[16]द्याः स्वकं कर्म कृत्वा सम्यक्सुसंयताः । प्राप्नुवन्ति परां सिद्धिं तस्मिन्वर्षे न संशयः ४
धर्मं चार्थं च कामं च मोक्षं च द्विजसत्तमाः । प्राप्नोति पुरुषः सर्वं तस्मिन्वर्षे सुसंयतः ॥ ५
इन्द्राद्याश्च सुराः सर्वे तस्मिन्वर्षे द्विजोत्तमाः । कृत्वा[17] सुशोभनं कर्म देवत्वं प्रतिपेदिरे ॥ ६

---

* इतः प्रभृति श्लोकद्वयं नास्ति ख. पुस्तके । + अयं श्लोकः क. पुस्तके नास्ति ।

---

१ ख. °च मतिमान्भू° । २ क. °थ । यत्संवा° । ३ क. ख. °ष्ठे सुवि° । ४ क. °प्रश्रवणान्विते । ना° । ५ क. °निभिश्चाप्स° । ६ क. °चित्तु नर्तनैर्देवं । ७ क. तत्त्वतः । ८ ख. लोके । ९ °द्या मुनयो देवाः प्र° । १० क. °मर्थं तदा देवाः प° । ११ क. ख. °जाः । भ° । १२ ख. यद्वै । १३ क. °हृतम् । क° । १४ ख. °मिर्हि स्व° । १५ ख. कर्म । १६ ख. °णाद्यास्तु यत्कर्म° । १७ क. °त्वा तु शो° ।

अन्येऽपि लेभिरे मोक्षं [1]पुरुषाः [2]संयतेन्द्रियाः । तस्मिन्वर्षे बुधाः शान्ता वीतरागा विमत्सराः[3]॥७
ये चापि स्वर्गे तिष्ठन्ति [4]विमानेन गतज्वराः । [5]तेऽपि कृत्वा [6]शुभं कर्म तस्मिन्वर्षे दिवं गताः॥८
निवासं भारते वर्षे आकाङ्क्षन्ति सदा सुराः । स्वर्गापवर्गफलदे [7]तत्पश्यामः कदा वयम् ॥ ९

मुनय ऊचुः—

यदेतद्भवता प्रोक्तं [8]कर्म नान्यत्र पुण्यदम् । [9]पापाय वा सुरश्रेष्ठ [10]वर्जयित्वा च भारतम् ॥ १०
ततः स्वर्गश्च मोक्षश्च [11]मध्यमं तच्च गम्यते[12] । [13]न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते ॥ ११
तस्माद्विस्तरतो ब्रह्मन्नस्माकं भारतं वद । यदि [14]तेऽस्ति दयाऽस्मासु यथावस्थितिरेव च ॥१२
तस्माद्वर्षमिदं[15] नाथ ये वाऽस्मिन्वर्षपर्वताः । भेदाश्च तस्य वर्षस्य ब्रूहि सर्वानशेषतः ॥ १३

ब्रह्मोवाच—

शृणुध्वं भारतं वर्षं नवभेदेन भो द्विजाः । समुद्रान्तरिता ज्ञेयास्ते[16] समाश्च परस्परम् ॥ १४
[17]इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो [18]गान्धर्वो वारुणस्तथा॥ १५
अयं तु नवमस्तेषां द्वीपः सागरसंवृतः । योजनानां सहस्रं वै द्वीपोऽयं[19] दक्षिणोत्तरः ॥ १६
पूर्वे किराता यस्याऽऽसन्पश्चिमे [20]यवनास्तथा । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्ते स्थिता द्विजाः
इज्यायुद्धवणिज्याद्यैः कर्मभिः कृतपावनाः । तेषां संव्यवहारश्च एभिः [21]कर्मभिरिष्यते ॥ १८
[22]स्वर्गापवर्गहेतुश्च पुण्यं पापं [23]च वै तथा । महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः ॥ १९
विन्ध्यश्च पारियात्रश्च सप्तैवात्र कुलाचलाः । तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः ॥ २०
विस्तारोच्छ्रयिणो रम्या विपुलाश्चित्रसानवः । कोलाहलः स वैभ्राजो मन्दरो [24]दर्दलाचलः २१
[25]वातंधयो वैद्युतश्च [26]मैनाकः सुरसस्तथा । तुङ्गप्रस्थो नागगिरिर्गोधनः [27]पाण्डराचलः ॥ २२
[28]पुष्पगिरिर्वैजयन्तो [29]रैवतोऽर्बुद एव च । ऋष्यमूकः स [30][31]गोमन्थः कृतशैलः कृताचलः ॥ २३
श्रीपार्वतश्चकोरश्च शतशोऽन्ये च [32]पर्वताः । तैर्विमिश्रा [33]जनपदा म्लेच्छाद्याश्चैव भागशः ॥ २४
तैः पीयन्ते सरिच्छ्रेष्ठास्ता बुध्यध्वं द्विजोत्तमाः । गङ्गा सरस्वती सिन्धुश्चन्द्रभागा तथाऽपरा २५
यमुना शतद्रुर्विपाशा वितस्तैरावती [34]कुहूः । गोमती [35]धूतपापा च बाहुदा च दृषद्वती ॥ २६
विपाशा देविका चक्षुर्निष्ठीवा गण्डकी तथा । कौशिकी चाऽऽपगा चैव हिमवत्पादनिःसृताः ॥
देवस्मृतिर्देववती वातघ्नी सिन्धुरेव च । वेण्या तु [36]चन्दना चैव [37]सदानीरा मही [38]तथा ॥ २८
चर्मण्वती [39]वृषी चैव विदिशा [40]वेदवत्यपि । [41]सिप्रा ह्यवन्ती च तथा पारियात्रानुगाः स्मृताः२९

---

१ क. ख. संयताः । २ क. संजिते° । ३ क. °राः । देवाः स्व° । ४ ख. °ने विग° । ५ ख. ते कृ° । ६ ख. सुशुभं । ७ क. उत्पत्स्यामः । ८ क. °र्मे चान्य° । ९ ख. पापदं । १० ख. वर्णयित्वा । ११ ख. °ध्यश्चान्तश्च ग° । १२ क. °ते । ततश्चान्यत्र । १३ ख. न चाल्पं चात्र । १४ क. ते स्निग्धताऽस्मा° । १५ क. °दं यावद्येऽप्यस्मि° । १६ ख. °स्ते च गम्याः प° । ग. °स्ते दुर्गम्याः प° । १७ क. इन्द्रपङ्कः । १८ क. ख. गन्धर्वो । १९ क. °यं च दशोत्त° । २० क. °वनाः स्मृताः । ब्रा° । २१ क. °भिरुच्यते । २२ ग. °र्गप्राप्तिश्च । २३ क. च नो द्विजाः । म° । २४ क. मन्दराचलः । ख. मन्दगाचलः । २५ क. वाताचयो नैकशिरा मै° । ख. वाताम्वयो वै पशुश्च । २६ क. °कः सर° । २७ क. °ण्डवाच° । २८ क. पुण्यगि° । ख. पुण्यागिरिर्दुर्जय° । २९ ख. °तोऽम्बुद । ३० क. °मन्तः कृ° । ३१ ग. °न्थः कूटशैलकृतः सरः । श्री° । ३२ ख. °र्ताः । नैते मिश्रा° । ३३ क. °दा विप्राद्या° । ३४ ख. कुहः । ३५ ख. हतपापा । ३६ क. ग. वदना । ३७ ख. °दापारा-मकी त° । ३८ ग. °था । परा चर्मण्वती चै° । ३९ ख. नृपी । ग. भूपा । ४० ख. वेत्रव° । ४१ क. °क्षिप्रा ख. शीघ्रा ।

[१]शोणा महानदी चैव नर्मदा सुरथा [२]क्रिया । मन्दाकिनी दशार्णा च [३]चित्रकूटा तथाऽपरा ॥ ३०
चित्रोत्पला [४]वेत्रवती करमोदा पिशाचिका । तथाऽन्याऽतिलघुश्रोणी [५]विपाप्मा [६]शैवला नदी ३१
[७]सँधेरुजा [८]शक्तिमती शकुनी त्रिदिवा [९]क्रमुः । ऋक्षपादप्रसूता वै [१०]तथाऽन्या वेगवाहिनी ॥ ३२
[११]सिप्रा पयोष्णी [१२]निर्विन्ध्या तापी चैव सरिद्वरा । वेणा वैतरणी चैव सिनी[१३]वाली कुमुद्वती ॥ ३३
[१४]तोया चैव महागौरी दुर्गा चान्तःशिला तथा । विन्ध्यपादप्रसूतास्ता नद्यः पुण्यजलाः शुभाः ॥
गोदावरी भीमरथी कृष्णवेणा तथाऽऽपगा । तुङ्गभद्रा सुप्रयोगा तथाऽन्या पापनाशिनी ॥ ३५
सह्यपादविनिष्क्रान्ता इत्येताः सरितां वराः । [१५]कृतमाला ताम्रपर्णी पुष्य[१६]जा प्रत्यलावती ॥ ३६
मलयाद्रिसमुद्भूताः पुण्याः शीतजलास्त्विमाः । पितृसोमर्षिकुल्या [१७]च [१८]वञ्जुला त्रिदिवा च या ३७
[१९]लाङ्गुलिनी वंशकरा महेन्द्रप्रभवाः स्मृताः । [*सुविकाला कुमारी च मनूगा मन्दगामिनी ॥ ३८
क्षयापलासिनी चैव शुक्तिमत्प्रभवाः स्मृताः]। सर्वाः पुण्याः सरस्वत्यः सर्वा गङ्गाः समुद्रगाः ३९
विश्वस्य मातरः सर्वाः [२०]सर्वाः पापहराः स्मृताः । अन्याः सहस्रशः प्रोक्ताः क्षुद्रनद्यो द्विजोत्तमाः
प्रावृट्कालवहाः सन्ति सदा कालवहाश्च [२१]याः । मत्स्या मुकुटकुल्याश्च [२२]कुन्तलाः काशिकोशलाः
[२३]अन्ध्रकाश्च कलिङ्गाश्च शमकाश्च [२४]वृकैः सह । मध्यदेशा जनपदाः प्रायशोऽमी प्रकीर्तिताः ॥ ४२
[२५]सह्यस्य चोत्तरे यस्तु यत्र गोदावरी नदी । पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः ॥ ४३
गोवर्धनपुरं रम्यं भार्गवस्य महात्मनः । [२६]वाहीकरा(का वा)टधानाश्च सुतीराः कालतोयदाः ॥ ४४
अपरान्ताश्च शूद्रा[२७]श्च वाह्लिकाश्च सकेरलाः । गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ॥ ४५
[२८]शतद्रुहाः कलिङ्गाश्च पारदा हार[२९]भूषिकाः । माठराश्चैव [३०]कनकाः कैकेया दम्भमालिकाः ॥ ४६
क्षत्रियोपमदेशाश्च वैश्यशूद्रकुलानि च । काम्बोजाश्चैव विप्रेन्द्रा बर्बराश्च सलौकि[३१]काः ॥ ४७
वीराश्चैव तुषारा[३२]श्च [३३]पह्लवाधायता नराः । आत्रेयाश्च भरद्वाजाः पु[३४]ष्कलाश्च दशेरकाः ॥ ४८
लम्पकाः शुनशोकाश्च कुलिका जाङ्गलैः सह । औषध्यश्चलचन्द्रा च(श्च) किरातानां च जातयः
तोमरा हंसमार्गाश्च काश्मीराः करुणास्तथा । शूलिकाः कुहकाश्चैव मागधाश्च तथैव च ॥ ५०
[३५]एते देशा उदीच्यास्तु [३६]प्राच्यान्देशान्निबोधत । [३७]अन्धा वामङ्कुराकाश्च वल्लकाश्च मखान्तकाः ५१
[३८]तथाऽपरेऽङ्गा व[३९]ङ्गाश्च मलदा मालवर्तिकाः । [४०]भद्रतुङ्गाः प्रतिजया भार्याङ्गाश्चापमर्दकाः ॥ ५२

---

* अयं श्लोको नास्ति क. ख. पुस्तकयोः ।

---

१ ख. ग. शोणो । २ क. कृपा । ३ ख. वेत्रकूपा । ४ क. चैत्रवती । ५ क. ख. विपाशा । ६ ग. चैवला । ७ क. समेरजा । ख. ससेरजा । ८ ख. शुक्तिमती । ९ क. क्रतुः । ख. कुरुः । १० क. °था भद्राकवादिनी । ११ क. चित्रा । १२ क. विन्ध्यान्ता । १३ ख. °वालार्कमुद्रता । तो° । ग. °वाला कु° । १४ क. वापी । १५ क. शतमाला । १६ क. °जात्युत्पला° । १७ क. च चन्द्रमाला दि° । १८ ग. इक्षुना । १९ क. लाङ्गली चैव श° । २० क. ख. सर्वपा° । २१ ख. °याः । मान्याः कुमुदमान्याश्च चक्रलाः का° । २२ क. क्रतुगाः । २३ क. अथर्वाश्च । २४ क. वृषैः । २५ क. °ह्यश्चैवोत्त° । २६ क. वाधिकाश्चावधान्यश्च मुनिराकालतो° । २७ ख. °श्च पादपाश्चर्मखण्डिकाः । गा° । २८ क. शतदुर्गाः । ख. शतद्रुकाः । २९ ग. °रमूषि । ३० क. करकाश्चैकपादाः सुनासिकाः । ३१ क °काः । चीनाश्चै° । ३२ °श्च ऊर्णा दीर्घास्तथैव च । ए° । ३३ क. पञ्चवालायतीन° । ३४ क. °ष्कराश्च । ३५ क. एवं । ३६ क. प्राच्यां दिशि निबो° । ३७ ख. अन्धका मुहुकाराश्च कस्मीराः करुणास्तथा । शूलिकाः कुहकाश्चैव समग्निरबहिर्गिराः । त° । ३८ ख. °था प्रचरगा ब° । ३९ ख. °ङ्गा म° । ४० क. ब्रह्मतुङ्गाः ।

प्राग्ज्योतिपाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः । मल्ला मगधका नन्दाः प्राच्या जनपदास्तथा ५३
अथापरे जनपदा दक्षिणापथवासिनः । [1]पूर्णाश्च केवलाश्चैव गोलाङ्गूलास्तथैव च ॥ ५४
[2]ऋषिका मुषिकाश्चैव कुमारा[3] रामठाः शकाः । महाराष्ट्रा [4]माहिषकाः कलिङ्गाचैव सर्वशः[5] ॥ ५५
आभीराः सह वैशिक्या[6] अटव्याः [7]सरवाश्च[8] ये । पुलिन्दाश्चैव मौलेया वैदर्भा दण्डकैः सह ५६
[9]पौलिका मौलिकाश्चैव अश्मका भोजवर्धनाः । [10]कौलिकाः कुन्तलाश्चैव द[11]म्भका नीलकालकाः ॥
दाक्षिणात्यास्त्वमी देशा अपरान्तान्निबोधत । शूर्पारकाः का[12]लिधना[13] लोलास्तालकटैः सह ५८
इत्येते ह्यपरान्ताश्च शृणुध्वं विन्ध्यवासिनः । मल[14]जाः कर्कशाश्चैव मेलकाश्चो[15]लकैः सह ॥ ५९
उत्तमार्णा दशार्णाश्च भोजाः किष्किन्धकैः सह । [16]तोषलाः कोशलाश्चैव त्रैपुरा वैदिशास्तथा ॥
तुम्बुरास्तु चराश्चैव यवनाः पवनैः सह । अभया[17] रुण्डिकेराश्च चर्चरा होत्रधर्तयः ॥ ६१
एते जनपदाः सर्वे तत्र विन्ध्यनिवासिनः । अतो देशान्प्रवक्ष्यामि पर्वता[18]श्र[19]यिणश्च ये ॥ ६२
नीहारास्तुषमार्गाश्च कुरवस्तु(स्त)ङ्गणा[20]ः खसाः । कर्णप्रावरणाश्चैव[21] ऊर्णा दर्घाः सकुन्तकाः ६३
चित्रमार्गा मालवाश्च किरातास्तोमरैः सह । कृतत्रेतादिकश्चात्र चतुर्युगकृतो विधिः ॥ ६४
एवं तु भारतं वर्षं नवसंस्थानसंस्थितम् । दक्षिणे[22] परतो यस्य पूर्वे चैव महोदधिः ॥ ६५
हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः । तदेतद्भारतं वर्षं सर्वबीजं द्विजोत्तमाः ॥ ६६
ब्रह्मत्वममरेशत्वं देवत्वं मरुतां तथा । मृग[23]यक्षाप्सरोयोनिं तद्वत्सर्पसरीसृपाः ॥ ६७
स्थावराणां च सर्वेषां मितो विप्राः शुभाशुभैः । प्रयान्ति कर्मभूर्विप्रा नान्या लोकेषु विद्यते ६८
देवानामपि भो विप्राः सदैवैष मनोरथः । अपि मानुष्यमाप्स्यामो देवत्वात्प्रच्युताः क्षितौ॥६९
मनुष्यः कुरुते यत्तु तन्न शक्यं सुरासुरैः । तत्कर्म निगडग्रस्तैस्तत्कर्मक्षपणोन्मुखैः ॥ ७०
न भारतसमं वर्षं पृथिव्यामस्ति भो द्विजाः । यत्र विप्रादयो वर्णाः प्राप्नुवन्त्यभिवाञ्छितम् ७१
धन्यास्ते भारते वर्षे जायन्ते ये नरोत्तमाः । धर्मार्थकाममोक्षाणां प्राप्नुवन्ति महाफलम् ॥ ७२
प्राप्यते यत्र तपसः फलं परमदुर्लभम् । सर्वदानफलं चैव सर्वयज्ञफलं तथा ॥ ७३
तीर्थयात्राफलं चैव गुरुसेवाफलं तथा । देवताराधनफलं स्वाध्यायस्य फलं द्विजा[24]ः ॥ ७४
यत्र देवाः सदा हृष्टा जन्म वाञ्छन्ति शोभनम् । नानाव्रतफलं चैव नानाशास्त्रफलं तथा ॥७५
अहिंसादिफलं सम्यक्फलं सर्वाभिवाञ्छितम् । ब्रह्मचर्यफलं चैव गार्हस्थ्येन च यत्फलम्॥७६
यत्फलं वनवासेन संन्यासेन च यत्फलम् । इष्टापूर्तफलं चैव तथाऽन्यच्छुभकर्मणाम् ॥ ७७
प्राप्यते भारते वर्षे न चान्यत्र द्विजोत्तमाः । कः शक्नोति गुणान्वक्तुं भारतस्याखिलान्द्विजाः ॥
एवं सम्यङ्मया प्रोक्तं भारतं वर्षमुत्तमम् । सर्वपापहरं पुण्यं ध[25]न्यं बुद्धिविवर्धनम् ॥ ७९

---

१ क. पूरणाः केरला॰ । २ ख. रुष्टिका । ग. तूषिका । ३ ग. ॰रा नाम वासकाः । ४ क. माहिषिकाः । ५ क. ॰शः । स॰ । ६ क. ॰शिका अपांख्याश्च शबराश्च सहस्रशः । पुण्ड्रका विन्ध्यलेखाश्च वै॰ । ७ ख. आपाश्च । ८ ख. श्रवराश्च । ९ ग. पालिका । १० क. कालिका । ११ ख.॰म्भवानलका॰। १२ क. ॰लिवना॰ । १३ ग ॰नादूर्णास्थालटिकैः स॰ । १४ ख. ॰लश्चना सकेशाश्च मे॰ । १५ ख. ग. ॰श्चोत्कलैः स॰ । १६ क. उल्लापाः । ख. अपलाः । १७ क. ॰यास्तुङ्गराः सर्वे सवरा होत्रवर्तकाः । ए॰ । १८ क. ॰तानाश्रिताश्च । १९ ख. ॰श्रमिण॰ । २० ख. ॰णास्तथा । कुण्डप्रा॰ । २१ ख. ॰व उल्लाटच्यः सकुब्रकाः । २२ क. ॰णे वै पुराभासा पू॰ । ख. ॰णे च पुरी चास्य पू॰ । २३ ख. ॰गपक्षा॰ । २४ क. ॰जाः । नानातत्त्वफ॰ । २५ क. धनधान्यवि॰ । ख. धनवु॰ ।

य इदं शृणुयान्नित्यं पठेद्वा[1] नियतेन्द्रियः । सर्वपापैर्विनिर्मुक्तो[2] विष्णुलोकं स गच्छति ॥ ८०

इति श्रीमहापुराणे आदिब्राह्मे स्वयंम्भृषिसंवादे भारतवर्षानुकीर्तनं नाम सप्तविंशोऽध्यायः ॥ २७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१८६५

अथाष्टाविंशोऽध्यायः ।

ब्रह्मोवाच—

तत्राऽऽस्ते भारते वर्षे दक्षिणोदधिसंस्थितः[3] । ओण्ड्रदेश इति ख्यातः स्वर्गमोक्षप्रदायकः ॥ १
समुद्रादुत्तरं[4] तावद्यावद्विरजमण्डलम् । देशोऽसौ[5] पुण्यशीलानां गुणैः सर्वैरलंकृतः ॥ २
तत्र देशप्रसूता ये ब्राह्मणाः संयतेन्द्रियाः । तपःस्वाध्यायनिरता वन्द्याः पूज्याश्च ते सदा ॥ ३
श्राद्धे[6] दाने विवाहे च[7] यज्ञे वाऽऽचार्यकर्मणि । प्रशस्ताः सर्वकार्येषु[8] तत्रदेशोद्भवा द्विजाः ॥ ४
षट्कर्मनिरतास्तत्र ब्राह्मणा वेदपारगाः । इतिहासविदश्चैव पुराणार्थविशारदाः ॥ ५
सर्वशास्त्रार्थकुशला यज्वानो[9] वीतमत्सराः । अग्निहोत्ररताः केचित्केचित्स्मार्ताग्नितत्पराः ॥ ६
पुत्रदारधनैर्युक्ता दांतारः[10] सत्यवादिनः । निवसन्त्युत्कले पुण्ये यज्ञोत्सवविभूषिते ॥ ७
इतरेऽपि त्रयो वर्णाः क्षत्रियाद्याः सुसंयताः । स्वकर्मनिरताः[11] शान्तास्तत्र तिष्ठन्ति धार्मिकाः[12] ॥ ८
कोणादित्य इति ख्यातस्तस्मिन्देशे[13] ऽव्यवस्थितः[14] । यं दृष्ट्वा भास्करं मर्त्यः सर्वपापैः प्रमुच्यते ॥ ९

मुनय ऊचुः—

श्रोतुमिच्छाम तद्ब्रूहि क्षेत्रं सूर्यस्य सांप्रतम् । तस्मिन्देशे सुरश्रेष्ठ यत्राऽऽस्ते स दिवाकरः ॥ १०

ब्रह्मोवाच—

लवणस्योदधेस्तीरे पवित्रे सुमनोहरे । सर्वत्र वालुकाकीर्णे देशे सर्वगुणान्विते ॥ ११
चम्पकाशोकबकुलैः करवीरैः सपाटलैः । पुंनागैः कर्णिकारैश्च बकुलैर्नागकेसरैः ॥ १२
तगरैर्धवबाणैश्च अतिमुक्तैः सकुब्जकैः । मालतीकुन्दपुष्पैश्च तथाऽन्यैर्मल्लिकादिभिः ॥ १३
केतकी[15]वनखण्डैश्च[16] सर्वर्तु[17]कुसुमोज्ज्वलैः । कदम्बै[18]र्लकुचैः शालैः पनसैर्देवदारुभिः ॥ १४
सरलैर्मुचुकुन्दैश्च[19] चन्दनैश्च सितेतरैः । अश्वत्थैः सप्तपर्णैश्च आम्रैराम्रातकैस्तथा ॥ १५
तालैः पूगफलैश्चैव नारिकेरैः कपित्थकैः । अन्यैश्च विविधैर्वृक्षैः सर्वतः समलंकृतम्[20] ॥ १६
क्षेत्रं तत्र रवेः पुण्यमास्ते जगति विश्रुतम् । समन्ताद्योजनं साग्रं भुक्तिमुक्तिफलप्रदम् ॥ १७
आस्ते तत्र स्वयं देवः सहस्रांशुर्दिवाकरः । कोणादित्य इति ख्यातो भुक्तिमुक्तिफलप्रदः[21] ॥ १८
माघे मासि सिते पक्षे सप्तम्यां संयतेन्द्रियः । कृतोपवासो यत्रेत्य स्नात्वा तु मकरालये ॥ १९
कृतशौचो विशुद्धात्मा स्मरन्देवं दिवाकरम् । सागरे विधिवत्स्नात्वा[22] शर्वर्यन्ते समाहितः ॥ २०

---

१ क. ख. जपेद्वा । २ क. °पापविनि । ३ क. °तः । भद्रदे° । ४ क. °रं यावद्भद्रेति जयम° । ख. °रं यावद्रम्यं विर° । ५ ख. °सौ गुणशी° । ६ क. श्राद्धकाले वि° । ७ क. च ये ज्ञेयाः पुण्यक° । ८ क. °वैयज्ञेषु । ९ क. ज्ञानिनो । १० ख. होतारः । ११ क. ख. स्वधर्म° । १२ क. °काः । कर्णादि° । १३ ख. °न्देवो दिवाकरः । यं । १४ क. मुनीश्वराः । १५ ख. °कीबाणख° । १६ ख. °श्च बकुलैर्नागकेसरैः । क° । १७ क. °र्वत्र कु° । १८ क. कदम्बबकुलाशोकैः प° । १९ क. °श्च मुक्तकैरसितैः परैः । अ° । २० क. °कृते । क्षे° । २१ क. ख. °क्तिप्रदायकः । मा° । २२ क. ख. °त्वा सर्वेन्द्रियस° ।

देवानृषीन्मनुष्यांश्च पितॄन्संतर्प्य च द्विजाः । उत्तीर्य वाससी धौते परिधाय सुनिर्मले[1] ॥ २१
आचम्य प्रयतो भूत्वा तीरे तस्य महोदधेः । उपविश्योदये काले प्राङ्मुखः सवितुस्तदा ॥ २२
विलिख्य पद्मं मेधावी रक्तचन्दनवारिणा । अष्टपत्रं केसराढ्यं व[2]र्तुलं[3] चोर्ध्वकर्णिकम् ॥ २३
तिलतण्डुलतोयं च रक्तचन्दनसंयुतम् । रक्तपु[4]ष्पं सदर्भं च प्रक्षिपेत्ताम्रभाजने ॥ २४
ताम्राभावेऽर्कपत्रस्य पुटे कृत्वा तिलादिकम् । पिधाय तन्मुनिश्रेष्ठाः पात्रं पात्रेण विन्यसेत्[5]॥२५
करन्यासाङ्गविन्यासं कृत्वाऽङ्गैर्हृदयादिभिः । आत्मानं भास्करं[6] ध्यात्वा सम्यक्श्रद्धा[7]समन्वितः[8]
मध्ये चाग्निदले धीमान्नैर्ऋते श्व(श्वा)सने दले । कामारिगोचरे चैव पुनर्मध्ये च पूजयेत् ॥ २७
प्रभूतं विमलं सारमाराध्यं परमं सु[9]खम् । संपूज्य पद्ममावाह्य गगनात्तत्र भास्करम् ॥ २८
कर्णिकोपरि संस्थाप्य ततो मु[10]द्रां प्र[11]दर्शयेत् । कृत्वा स्नानादिकं सर्वं ध्यात्वा तं सुसमाहितः २९
सितपद्मोपरि र[12]विं ते[13]जोबिम्बे व्यवस्थितम् । पिङ्गाक्षं द्विभुजं रक्तं प[14]द्मपत्रा[15]रुणाम्बरम् ॥ ३०
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् । सुरूपं वरदं शान्तं प्रभामण्डलमण्डितम् ॥ ३१
[16]उद्यन्तं भास्करं दृष्ट्वा सान्द्रसिन्दूरसंनिभम् । ततस्त[17]त्पात्रमादाय जानुभ्यां धरणीं गतः ॥ ३२
कृत्वा शिरसि तत्पात्रमेकचित्तस्तु वाग्य[18]तः । त्र्यक्षरेण तु मन्त्रेण सूर्यायार्घ्यं निवेदयेत् ॥ ३३
अदीक्षितस्तु तस्यैव ना[19]म्नैवार्घं(र्घ्यं) प्रयच्छति । श्रद्धया भावयुक्तेन भक्तिग्राह्यो रविर्यतः ॥ ३४
अग्निनिर्ऋतिवाय्वीशमध्यपूर्वादिदिक्षु च* । हृच्छिरश्च शिखावर्मनेत्राण्यस्त्रं च पूजयेत् ॥ ३५
दत्त्वाऽर्घ्यं गन्धधूपं च दीपं नैवेद्यमेव च । ज[20]प्त्वा स्तुत्वा नमस्कृत्वा मुद्रां बद्ध्वा विसर्जयेत् ॥
ये वाऽर्घ्यं संप्रयच्छन्ति सूर्याय नियतेन्द्रियाः । ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शू[21]द्राश्च संयताः
भक्तिभावेन सततं विशुद्धेनान्तरात्मना । ते भुक्त्वाऽभिमतान्कामान्प्राप्नुवन्ति परां गतिम् ॥ ३८
त्रैलोक्यदीपकं देवं भास्करं गगनेचरम् । ये[22] [23]संश्रयन्ति मनुजास्ते[24] स्युः [25]सु[26]खस्य भाजनम्
यावन्न दीयते[27] चार्घ्यं भास्करा[28]य य[29]थोदितम् । तावन्न पूजयेद्विष्णुं शंकरं वा सुरेश्वरम् ॥ ४०
तस्मात्प्रयत्नमास्थाय दद्यादर्घ्यं दिने दिने । आदित्याय शु[30]चिर्भूत्वा पुष्पैर्गन्धैर्मनोरमैः ॥ ४१
एवं ददाति यश्चार्घ्यं सप्तम्यां सुसमाहितः । आदित्याय शुचिः स्नातः स लभेदीप्सितं फलम् ॥
रोगाद्विमुच्यते रोगी वित्तार्थी लभते धनम् । विद्यां प्राप्नोति विद्यार्थी सुतार्थी पुत्रवान्भवेत् ४३
यं यं काममभिध्यायन्सूर्यायार्घ्यं प्रयच्छति । तस्य तस्य फलं सम्यक्प्राप्नोति पुरुषः सु[31]धीः ४४

---

* ग. पुस्तके प्रक्षिप्तपाठः––"ह्रां हृदयाय नमः, आग्निकोणे । ह्रीं शिरसे नमः, नैर्ऋते । ह्रूं शिखायै नमः, वायवे । ह्रैं कवचाय नमः, ऐशाने । ह्रौं नेत्रत्रयाय नमः, आग्नेये । ह्रः अस्त्राय नमः, चतुर्दिक्षु" इति ।

---

१ क. विनिर्मले । २ ग. बहुलं । ३ क. °लं चैकक° । ४ ग. °ष्पं च द° । ५ ख. °त् । अङ्गन्यासं करन्यासं । ६ क. ख. °रं स° । ७ क. ख. °द्धाभावस° । ८ क. °तः । अर्चयेदग्निसांनिध्ये ग्रहांश्चैव सभास्करान् । ईशानकोणगं तं च पु° । ९ क. विभुम् । १० क. मुद्राः । ११ ख. प्रदापयन् । १२ ख. °विं तोये तत्र व्य° । १३ क. °जोमूर्तै सनातनम् । १४ ख. ग. °द्महस्तारु° । १५ ख. °रुणं रविम् । १६ ख. ऊर्ध्वगं । १७ ख. °स्तत्प्रार्घ्यमा° । १८ क. °तः । षडक्षरेण म° । १९ क. नाम्नाऽऽवाह्य प्रपूजयेत् । श्र° । २० ख. जपित्वा । २१ क. °द्राः सुसं° । २२ ख. ये च स्मरन्ति । २३ ग. पूजयन्ति । २४ ग. °स्ते सर्वे गु° । २५ क. सुखभागिनः । २६ ग. °खभागिनः । या° । २७ क. °ते भक्त्या भा° । २८ क. °रायार्घ उत्तमः । ता° । २९ ख. निवेदितम् । ३० क. ख. शुचिः स्ना° । ३१ ख. परम् ।

[1]स्नात्वा वै सागरे दत्त्वा सूर्यायो[2]र्घ्यं प्रणम्य च । नरो वा यदि वा नारी सर्वकामफलं लभेत्[3] ॥
ततः सूर्यालयं गच्छेत्पुष्पमादाय [4]वाग्यतः । प्रविश्य पूजयेद्भानुं कृत्वा [5]तु त्रिः प्रदक्षिणम् ॥ ४६
पूजयेत्परया भक्त्या कोणार्कं मुनिसत्तमाः । गन्धैः पुष्पैस्तथा[6] दीपै[7]र्धूपै[8]र्नैवे[9]द्यकैरपि ॥ ४७
दण्डवत्प्रणिपातैश्च जयशब्दैस्तथा [10]स्तवैः । एवं संपूज्य तं देवं सहस्रांशुं [11]जगत्पतिम् ॥ ४८
दशानामश्वमेधानां फलं प्राप्नोति मानवः । सर्वपापविनिर्मुक्तो युवा दि[12]व्यवपुर्नरः ॥ ४९
स[13]प्तावरान्सं[14]प्त परान्वंशानुद्धृत्य भो द्विजाः । विमानेनार्कवर्णेन कामगेन सुवर्चसा ॥ ५०
उपगीयमानो गन्धर्वैः सूर्यलोकं स गच्छति । भुक्त्वा तत्र वरान्भोगान्यावदाभूतसंप्लवम् ॥ ५१
पुण्यक्षयादिहाऽऽयातः प्रवरे योगिनां कुले । चतु[15]र्वेदो भवे[16]द्विप्रः स्वध[17]र्मनिरतः शुचिः ॥ ५२
योगं वि[18]वस्वतः प्राप्य ततो मोक्षमवाप्नुयात् । चैत्रे मासि सिते पक्षे यात्रां दमनभञ्जिकाम् ॥ ५३
यः करोति नरस्तत्र पूर्वोक्तं स फलं लभेत् । शयनोत्थापने भानोः संक्रान्त्यां विषुवायने ॥ ५४
वारे [19]रवेस्तिथौ चैव पर्वकालेऽथवा द्विजाः । ये तत्र यात्रां कुर्वन्ति श्रद्धया संयतेन्द्रियाः ॥ ५५
विमानेनार्कवर्णेन सूर्यलोकं व्रजन्ति ते । आस्ते तत्र महादेवस्तीरे[20] नदनदीपतेः ॥ ५६
रामेश्वर इति ख्यातः सर्वकामफलप्रदः । ये[21] तं पश्यन्ति कामारिं स्नात्वा सम्यङ्महोदधौ ५७
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैर्वरैः । प्रणिपातैस्तथा स्तोत्रै[22]र्गीतैर्वाद्यैर्म[23]नोहरैः ॥ ५८
राजसूयफलं सम्यग्वाजिमेधफलं तथा । प्राप्नुवन्ति महात्मा[24]नः संसिद्धिं परमां तथा ॥ ५९
कामगेन विमानेन किङ्किणीजालमालिना । उपगीयमाना गन्धर्वैः शिवलोकं व्रजन्ति ते ॥ ६०
आहू(भू)तसंप्लवं यावद्भुक्त्वा भोगान्मनोरमान् । पुण्यक्षयादि[25]हाऽऽगत्य चातुर्वेदा भवन्ति ते ६१
शांकरं योगमास्थाय ततो मोक्षं व्रजन्ति ते । [26]यस्तत्र सवितुः क्षेत्रे प्राणांस्त्यजति मानवः ॥ ६२
स सूर्यलोकमा[27]स्थाय देववन्मोदते [28]दिवि । [*पुनर्मा[29]नुषतां प्राप्य राजा भवति धार्मिकः ॥ ६३
योगं रवेः समासाद्य ततो मोक्षमवाप्नुयात् । एवं मया मुनिश्रे[30]ष्ठाः प्रोक्तं क्षेत्रं सुदुर्लभम् ॥ ६४
कोणार्कस्योदधेस्तीरे[31] भुक्तिमुक्तिफलप्रदः(दम्)] ॥ ६५

इति श्रीमहापुराण आदिब्राह्मे स्वयंभ्वृषिसंवादे कोणादित्यमाहात्म्यवर्णनं
नामाष्टाविंशोऽध्यायः ॥ २८ ॥

श्लोकानामादितः समष्ट्यङ्काः—१९३०

———

* एतदादि श्लोकद्वयं नास्ति ख. पुस्तके ।

१ क. स्नात्वैवं सा° । ख. स्नात्वैव सा° । २ क. ख. °यार्घं प्र° । ३ क. ख. °त् । पूर्वं गङ्गाम्भसा स्नात्वा कुशैर्वाऽऽसिच्य मूर्धनि । सर्वपापविनिर्मुक्तो नरो याति त्रिविष्टपम् । त° । ४ क. सत्वरः । ५ क. तं । ६ ख. °था धू° । ७ क. °पैर्नै° । ८ ख. °पैर्दीपैर्नैवेद्यकैर्द्विजाः । द° । ९ क. °वेद्यैर्विविधैस्तथा । द° । १० क. ख. परैः । ११ क. दिवाकरम् । १२ ख. °व्यरुचिर्न° । १३ ग. °प्तापरा° । १४ क. °प्तपूर्वान्वं° । १५ ख. ग. °र्वेदी भ° । १६ क. ख. °प्रः सर्वध° । १७ क. °र्मवहः शु° । १८ ख. दिवापतेः । १९ क. ख. रवेः स्थितश्चैव । २० ख. °रे नद्याः सुखेन वै °रा° । २१ ख. ये पूजयन्ति देवेशं स्ना° । २२ ख. °त्रैर्गानैर्वा° । २३ ख. °नोरमैः । रा° । २४ क. °नः सिध्यन्ति नियमास्तथा । २५ क. °हाऽऽयाताः शिवलोकं व्रजन्ति । २६ क. यश्चात्र । २७ क. ख. °मासाद्य दे° । २८ क. ख. चिरम् । २९ क. °नुष्यके प्रा° । ३० क. °श्रेष्ठा यथावद्गदितं हितम् । ३१ क. °रे माहात्म्यं मुक्तिदं नृणाम् ।

अथैकोनत्रिंशोऽध्यायः ।

मुनय ऊचुः—

श्रुतोऽस्माभिः सुरश्रेष्ठ भवता यदुदाहृतम् । भास्करस्य परं क्षेत्रं भुक्तिमुक्तिफलप्रदम् ॥ १
न तृप्तिमधिगच्छामः शृण्वन्तः सुखदां कथाम् । तव वक्त्रोद्भवां पुण्यामादित्यस्याघनाशिनीम् २
अतः परं सुरश्रेष्ठ ब्रूहि नो वदतां वर । देवपूजाफलं यच्च यच्च दानफलं प्रभो ॥ ३
प्रणिपाते नमस्कारे तथा चैव प्रदक्षिणे । दीपधूपप्रदाने च संमार्जनविधौ च यत् ॥ ४
उपवासे च यत्पुण्यं यत्पुण्यं नक्तभोजने[1] । अर्घ(र्घ्य)श्च कीदृशः प्रोक्तः[2] कुत्र वा संप्रदीयते ॥ ५
कथं च क्रियते भक्तिः कथं देवः प्रसीदति । एतत्सर्वं सुरश्रेष्ठ श्रोतुमिच्छामहे वयम् ॥ ६

ब्रह्मोवाच—

अर्घ्यं पूजादिकं सर्वं भास्करस्य द्विजोत्तमाः । भक्तिं [3]श्रद्धां समाधिं च कथ्यमानं निबोधत ॥७
मनसा भावना [4]भक्तिरिष्टा श्रद्धा च कीर्त्यते । ध्यानं समाधिरित्युक्तं शृणुध्वं सुसमाहिताः ॥ ८
तत्कथां श्रावयेद्यस्तु तद्भक्ता[5]न्पूजयी(ये)त वा । अग्निशुश्रूषकश्चैव स वै भक्तः सनातनः ॥ ९
तच्चित्तस्तन्मनाश्चैव देवपूजारतः सदा । तत्कर्मकृद्भवेद्यस्तु स वै भक्तः सनातनः ॥ १०
[6]देवार्थे क्रियमाणानि यः कर्माण्यनुमन्यते । कीर्तनाद्वा परो विप्राः स वै भक्ततरो नरः ॥ ११
नाभ्यसूयेत तद्भक्तान्न नि[7]न्द्याँश्चान्यदे[8]वताम् । आदित्यव्रतचारी च स वै भक्त[9]तरो नरः ॥ १२
गच्छंस्तिष्ठन्स्वपञ्जिघ्रन्नुन्मिषन्निमिषन्नपि । यः स्मरेद्भास्करं नित्यं स वै भक्ततरो नरः ॥ १३
एवंविधा त्वियं भक्तिः सदा कार्या विजानता । भक्त्या समाधिना चैव [10]स्तवेन मनसा तथा[11] ॥
क्रियते नियमो यस्तु दानं विप्राय दीयते । प्रतिगृह्णन्ति तं देवा मनुष्याः पितरस्तथा ॥ १५
पत्रं पुष्पं फलं तोयं[12] यद्भक्त्या समुपाहृतम् । प्रतिगृह्णन्ति तद्देवा नास्तिकान्वर्जयन्ति च ॥ १६
*भावशुद्धिः प्रयोक्तव्या नियमाचारसंयुता । [13]भावशुद्ध्या क्रियते यत्तत्सर्वं सफलं भवेत्[14] ॥ १७
स्तुतिजप्योपहारेण पूजयाऽपि विवस्वतः । उपवासेन [15]भक्त्या वै सर्वपापैः प्रमुच्यते ॥ १८
प्रणिधाय शिरो भूम्यां नमस्कारं करोति यः । तत्क्षणात्सर्वपापेभ्यो मुच्यते नात्र संशयः ॥१९
भक्तियुक्तो नरो योऽसौ रवेः कुर्यात्प्रदक्षिणाम् । प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा ॥ २०
सूर्यं मनसि यः कृत्वा कुर्याद्व्योमप्रदक्षिणाम् । प्रदक्षिणीकृतास्तेन सर्वे देवा भवन्ति हि ॥ २१
एकाहारो नरो भूत्वा षष्ठ्यां योऽर्चयते रविम् । नियमव्रतचारी च[16] भवेद्भक्तिसमन्वितः[17] ॥ २२
सप्तम्यां वा महाभागाः सोऽश्वमेधफलं लभेत् । अहोरात्रोपवासेन पूजयेद्यस्तु भास्करम् ॥ २३
सप्तम्यामथवा षष्ठ्यां स याति परमां गतिम् । कृष्णपक्षस्य सप्तम्यां[18] सोपवासो जितेन्द्रियः २४
सर्व[19]रत्नोपहारेण पूजयेद्यस्तु भास्करम् । पद्मप्रभेण यानेन सूर्यलोकं स गच्छति ॥ २५

---

* इदमर्धं ग. पुस्तके नास्ति ।

---

१ ख. °ने । देवस्नानं कथं प्रोक्तं किं च वासः प्र° । २ क. °क्तः कीदृग्वासः प्र° । ३ क. स्तवं । ४ क. भक्तिः सदा । ५ ख. °क्ताञ्श्रयतस्तदा । अ° । ६ ख. वेदार्थे । ७ ख. °न्द्याद्वाऽन्य° । ८ ख. °वताः । आ° । ९ ख. °क्तवरो जनः । ग° । १० ख. शुद्धेन । ११ ख. °था । देवमुद्दिश्य भास्वन्तं दा° । १२ ख. °यं तत्सर्वं । १३ क. भावेन हि कृतं यच्च तत्स° । १४ क. °त् । तनुनाऽप्युपचारे° । १५ ग. षष्ठ्यां । १६ क. ख. च रवेर्भक्ति° । १७ क. °तः । कृष्ण° । १८ क. °म्यां पूजयेद्यो जि° । १९ क. °रत्नोप° ।

शुक्लपक्षस्य सप्तम्यामुपवासपरो नरः । सर्वशुक्लोपहारेण पूजयेद्यस्तु भास्करम् ॥ २६
सर्वपापविनिर्मुक्तः सूर्यलोकं स गच्छति । अर्कसंपुटसंयुक्तमुदकं प्रसृतं पिबेत् ॥ २७
क्रमवृद्ध्या चतुर्विंशमेकैकं क्षपयेत्पुनः । द्वाभ्यां संवत्सराभ्यां तु समाप्तनियमो भवेत् ॥ २८
सर्वकामप्रदा ह्येषा प्रशस्ता ह्यर्कसप्तमी । शुक्लपक्षस्य सप्तम्यां यदाऽऽदित्यदिनं भवेत् ॥ २९
सप्तमी विजया नाम तत्र दत्तं महत्फलम् । स्नानं दानं तपो होम उपवासस्तथैव च ॥ ३०
सर्वं विजयसप्तम्यां महापातकनाशनम् । ये चाऽऽदित्यदिने प्राप्ते श्राद्धं कुर्वन्ति मानवाः ॥ ३१
यजन्ति च महाश्वेतं ते लभन्ते यथेप्सितम् । येषां धर्म्याः क्रियाः सर्वाः सदैवोद्दिश्य भास्करम्
न कुले जायते तेषां दरिद्रो व्याधितोऽपि वा । श्वेतया रक्तया वाऽपि पीतमृत्तिकयाऽपि वा ३३
उपलेपनकर्ता तु चिन्तितं लभते फलम् । चित्रभानुं विचित्रैस्तु कुसुमैश्च सुगन्धिभिः ॥ ३४
पूजयेत्सोपवासो यः स कामानीप्सिताँल्लभेत् । घृतेन दीपं प्रज्वाल्य तिलतैलेन वा पुनः ॥ ३५
आदित्यं पूजयेद्यस्तु चक्षुषा न स हीयते । दीपदाता नरो नित्यं ज्ञानदीपेन दीप्यते ॥ ३६
तिलाः पवित्रं तैलं वा तिलगोदानमुत्तमम् । अग्निकार्ये च दीपे च महापातकनाशनम् ॥ ३७
दीपं ददाति यो नित्यं देवतायतनेषु च । चतुष्पथेषु रथ्यासु रूपवान्सुभगो भवेत् ॥ ३८
हविर्भिः प्रथमः कल्पो द्वितीयश्चौषधीरसैः । वसामेदोस्थिनिर्यासैर्न तु देयः कथंचन ॥ ३९
भवेदूर्ध्वगतिर्दीपो न कदाचिदधोगतिः । दाता दीप्यति चाप्येवं न तिर्यग्गतिमाप्नुयात् ॥ ४०
ज्वलमानं सदा दीपं न हरेन्नापि नाशयेत् । दीपहर्ता नरो बन्धं नाशं क्रोधं तमो व्रजेत् ॥ ४१
दीपदाता स्वर्गलोके दीपमालेव राजते । यः समालभते नित्यं कुङ्कुमागुरुचन्दनैः ॥ ४२
संपद्यते नरः प्रेत्य धनेन यशसा श्रिया । रक्तचन्दनसंमिश्रै रक्तपुष्पैः शुचिर्नरः ॥ ४३
उदयेऽर्घ्यं सदा दत्त्वा सिद्धिं संवत्सराल्लभेत् । उदयात्परिवर्तेत यावदस्तमने स्थितः ॥ ४४
जपन्नभिमुखः किंचिन्मन्त्रं स्तोत्रमथापि वा । आदित्यव्रतमेतत्तु महापातकनाशनम् ॥ ४५
अर्घ्येण संहितं चैव सर्वं साङ्गं प्रदापयेत् । उदये श्रद्धया युक्तः सर्वपापैः प्रमुच्यते ॥ ४६
सुवर्णधेनु[न्व] नड्वा[डु] हवसुधावस्त्रसंयुतम् । अर्घ्यप्रदाता लभते सप्तजन्मानुगं फलम् ॥ ४७
अग्नौ तोयेऽन्तरिक्षे च शुचौ भूम्यां तथैव च । प्रतिमायां तथा पिण्ड्यां देयमर्घ्यं प्रयत्नतः ४८
नापसव्यं न सव्यं च दद्यादभिमुखः सदा । सघृतं गुग्गुलं वाऽपि रवेर्भक्तिसमन्वितः ॥ ४९
तत्क्षणात्सर्वपापेभ्यो मुच्यते नात्र संशयः । श्रीवासं चतुरस्रं च देवदारुं तथैव च ॥ ५०
कर्पूरागरुधूपानि दत्त्वा वै स्वर्गगामिनः । अयने तूत्तरे सूर्यमथवा दक्षिणायने ॥ ५१
पूजयित्वा विशेषेण सर्वपापैः प्रमुच्यते । [+विषुवेषूपरागेषु षडशीतिमुखेषु च ॥ ५२
पूजयित्वा विशेषेण सर्वपापैः प्रमुच्यते] । एवं वेलासु सर्वासु सर्वकालं च मानवः ॥ ५३

+ अयं श्लोको नास्ति क. ख. पुस्तकयोः ।

१ क. °येद्यो दिवाकर° । २ ग. °त् । ह्रासवृ° । ३ ख. ग. °शदेकै° । ४ क. प्रसिद्धा । ५ क. शर्वरी । ६ क. °म् । प्रदानं जपहोमौ च उ° । ७ क. °सम्यामनन्तफलदं स्मृतम् । ८ ग. जपन्ति । ९ ग. धर्माः । १० ख. ग. तिलं प° । ११ ख. °त्रं परमं ति° ग. °त्रं परमं तिलानां दा° । १२ ख. °तिः । दद्यादेतादृशं दीपं न । १३ क. दीपेन चात्यन्तं न । १४ क. °र्यग्योनिमा° । १५ क. दीपदाता । १६ क. ख. °नैः । स पूज्यते । १७ क. °न च परश्रि° । १८ क. °भिमतं किं° । १९ क. °चित्पात्रहस्तो नरः शुचिः । आ° । २० ख. सहितां । २१ ख. सर्वेषां गां प्र° । ग. सवत्सां गां प्र° । २२ ख. पुण्यं । २३ क. देयो अर्घः प्र° । २४ ख. °सु भक्तिमान्मानवोत्तमः । भ° । २५ ग. सुवेलासु ।

भक्त्या[1] पूजयते योऽर्कं सोऽर्कलोके महीयते । कृसरैः पायसैः पूपैः[2] फलमूलघृतौदनैः ॥ ५४
बलिं कृत्वा[3] तु सूर्याय सर्वान्कामानवाप्नुयात् । घृतेन तर्पणं कृत्वा[4] सर्वासिद्धो भवेन्नरः ॥ ५५
क्षीरेण तर्पणं कृत्वा मनस्तापैर्न युज्यते । दध्ना तु तर्पणं कृत्वा कार्यसिद्धिं लभेन्नरः ॥ ५६
स्नानार्थमाहरेद्यस्तु जलं भानोः समाहितः । तीर्थेषु[5] शुचितापन्नः[6] स याति परमां गतिम् ॥ ५७
छत्रं ध्वजं वितानं वा पताकां चामराणि च । श्रद्धया भानवे दत्त्वा गतिमिष्टामवाप्नुयात् ॥ ५८
यद्यद्द्रव्यं नरो भक्त्या आदित्याय प्रयच्छति । तत्तस्य शतसाहस्रमुत्पादयति भास्करः ॥ ५९
मानसं वाचिकं वाऽपि[7] कायजं यच्च दुष्कृतम् । सर्वं सूर्यप्रसादेन[8] तदशेषं व्यपोहति ॥ ६०
एकाहेनापि यद्भानोः पूजायाः प्राप्यते फलम् । यथोक्तदक्षिणैर्विप्रैर्न तत्क्रतुशतैरपि ॥ ६१

इति श्रीमहापुराणे ब्राह्मे स्वयंभ्वृषिसंवादे सूर्यपूजानियमभक्तिमाहात्म्यवर्णनं नामैकोनात्रिंशत्तमोऽध्यायः ॥ २९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१९९१

अथ त्रिंशत्तमोऽध्यायः ।

मुनय ऊचुः—

अहो देवस्य माहात्म्यं श्रुतमेतं जगत्पते । भास्करस्य सुरश्रेष्ठ वदतस्तेषु दुर्लभम् ॥ १
भूयः प्रब्रूहि देवेश यत्पृच्छामो[10] जगत्पते । श्रोतुमिच्छामहे ब्रह्मन्परं कौतूहलं हि नः ॥ २
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः । य इच्छेन्मोक्षमास्थातुं देवतां कां यजेत सः ॥ ३
कुतो ह्यस्याक्षयः स्वर्गः कुतो निःश्रेयसं परम् । स्वर्गतश्चैव किं कुर्याद्येन न च्यवते पुनः ॥ ४
देवानां चात्र को देवः पितॄणां चैव कः पिता । यस्मात्परतरं नास्ति तन्मे ब्रूहि सुरेश्वर ॥ ५
कुतः सृष्टमिदं विश्वं[11] सर्वं स्थावरजङ्गमम् । प्रलये च कमभ्येति तद्भवान्वक्तुमर्हति ॥ ६

ब्रह्मोवाच—

उद्यन्नेवैष[12] कुरुते जगद्वितिमिरं करैः । नातः परतरो देवः कश्चिदन्यो द्विजोत्तमाः ॥ ७
अनादिनिधनो[13] ह्येष पुरुषः शाश्वतोऽव्ययः । तापयत्येष[14] त्रीँल्लोकान्भवन्रश्मिभिरुल्बणः ॥ ८
[*सर्वदेवमयो ह्येष तपतां[15] तपनो वरः । सर्वस्य जगतो नाथः सर्वसाक्षी जगत्पतिः[16] ॥ ९
संक्षिपत्येष भूतानि तथा विसृजते पुनः । एष भाति तपत्येष[17] वर्षत्येष गभस्तिभिः ॥ १०
एष धाता विधाता च भूतादिर्भूतभावनः । न ह्येष क्षयमायाति नित्यमक्षयमण्डलः ॥] ११
पितॄणां च पिता ह्येष देवतानां हि देवता । ध्रुवं स्थानं[18] स्मृतं[19] ह्येतद्यस्मान्न च्यवते पुनः ॥ १२

---

* एतदादि श्लोकत्रयं ख. पुस्तके नास्ति ।

---

१ क. °क्त्या संपूज्य तरणिं सूर्यलो° । २ क. ख. पललैर्मिश्रितौदनैः । ३ ख. °त्वा तर्पयेच्च स° । ४ क. त्वा म° । ५ क. तीर्थाद्वा शु° । ६ क. °चितः स्थानात्स या° । ७ ख. °पि कर्मणाऽघं च यत्कृत° । ८ क. ख. °प्रणामेन । ९ ख. °तमस्य ज° । १० ख. संपृच्छामो । ११ ख. °श्वं ब्रह्मन्स्थाव° । १२ ग. उदयन्नेव कु° । १३ क. देवः । १४ क. °ष लोकांस्त्रीन्गभस्तिभिरनुल्बणैः । स° । १५ ग. °तां वाऽऽशुभावनः । स° । १६ ग. शुभाशुभे । १७ क. °ष त्रैलोक्यं स्व-र्ग° । १८ ख. स्थलं । १९ ख. °तं ह्यस्य यस्मा° ।

सर्गकाले जगत्कृत्स्नमादित्यात्संप्रसूयते[1] । प्रलये च तमभ्येति भास्करं दीप्ततेजसम् ॥ १३
योगिनश्चाप्यसंख्याता[2][3]स्त्यक्त्वा गृहकलेवरम्[4] । वायुर्भूत्वा विशन्त्यस्मिं[5]स्तेजोराशौ दिवाकरे ॥
अस्य रश्मिसहस्राणि शाखा इव विहंगमाः । वसन्त्याश्रित्य मुनयः संसिद्धा दैवतैः सह ॥ १५
गृहस्था जनकाद्याश्च राजानो[6] योगधर्मिणः । वालखिल्यादयश्चैव ऋषयो ब्रह्मवादिनः[7] ॥ १६
वानप्रस्थाश्च ये चान्ये व्यासाद्या[8] भिक्षवस्तथा । योगमास्थाय सर्वे ते प्रविष्टाः सूर्यमण्डलम् १७
शुको व्याससुतः श्रीमान्योगधर्ममवाप्य सः । आदित्यकिरणान्गत्वा ह्यपुनर्भावमास्थितः ॥ १८
शब्दमात्रश्रुतिमुखा ब्रह्मविष्णुशिवादयः । प्रत्यक्षोऽयं परो देवः सूर्यस्तिमिरनाशनः ॥ १९
तस्मादन्यत्र भक्तिर्हि न कार्या शुभमिच्छतां[9] । यस्माद्दृष्टेरगम्यास्ते देवा विष्णुपुरोगमाः ॥ २०
अतो भवद्भिः सततमभ्यर्च्यो भगवान्रविः । स हि माता पिता चैव कृत्स्नस्य जगतो गुरुः २१
अनाद्यो लोकनाथोऽसौ रश्मिमाली जगत्पतिः । मित्रत्वे च स्थितो यस्मात्तपस्तेपे द्विजोत्तमाः॥
अनादिनिधनो ब्रह्मा नित्यश्चाक्षय एव च । [+सृष्ट्वा ससागरान्द्वीपान्भुवनानि चतुर्दश ॥ २३
लोकानां स हितार्थाय स्थितश्चन्द्रसरित्तटे] । सृष्ट्वा प्रजापतीन्सर्वान्सृष्ट्वा च विविधाः प्रजाः २४
ततः शतसहस्रांशुरव्यक्तश्च पुनः स्वयम् । कृत्वा द्वादशधाऽऽत्मानमादित्यमुपपद्यते ॥ २५
इन्द्रो धाता[10]ऽथ पर्जन्यस्त्वष्टा पूषाऽर्यमा भगः । विवस्वान्विष्णुरंशश्च[11] व(शुमान्व)रुणो मित्र एव च
आभिर्द्वादशभिस्तेन सूर्येण परमात्मना । कृत्स्नं जगदिदं व्याप्तं मूर्तिभिश्च द्विजोत्तमाः ॥ २७
तस्य या प्रथमा मूर्तिरादित्यस्येन्द्रसंज्ञिता । स्थिता सा देवराजत्वे देवानां रिपुनाशिनी ॥ २८
द्वितीया तस्य या मूर्तिर्नाम्ना धातेति कीर्तिता । स्थिता प्रजापतित्वेन विविधाः[12] सृजते प्रजाः ॥
तृतीयाऽर्कस्य या मूर्तिः पर्जन्य इति विश्रुता । मेघेष्वे(ष्व)व स्थिता सा तु वर्षते च गभस्तिभिः
चतुर्थी तस्य या मूर्तिर्नाम्ना त्वष्टेति विश्रुता । [*स्थिता वनस्पतौ सा तु ओषधीषु च सर्वतः ॥
पञ्चमी तस्य या मूर्तिर्नाम्ना पूषेति विश्रुता । अन्ने व्यवस्थिता सा तु प्रजां पुष्णाति नित्यशः ॥
मूर्तिः षष्ठी[13] रवेर्या तु अर्यमा इति विश्रुता । वायोः संसरणा सा तु देवेष्वेव समाश्रिता ॥ ३३
भानोर्या सप्तमी मूर्तिर्नाम्ना भगेति विश्रुता । भूयि(ति)ष्ववस्थिता सा तु शरीरेषु च देहिनाम्] ३४
मूर्तिर्या त्वष्टमी तस्य विवस्वानिति विश्रुता । अग्नौ प्रतिष्ठिता[14] सा तु पचत्यन्नं शरीरिणाम् ३५
नवमी चित्रभानोर्या मूर्तिर्विष्णुश्च नामतः । प्रादुर्भवति सा नित्यं देवानामरिसूदनी ॥ ३६
दशमी तस्य या मूर्तिरंशुमानिति विश्रुता । वायौ प्रतिष्ठिता सा तु प्रह्लादयति वै प्रजाः ॥ ३७

+ अयं श्लोको ग. पुस्तके न ।

* इत आरभ्याग्रे देहिनामित्येतदन्तग्रन्थस्थाने ख. पुस्तके पाठविशेषो दृश्यते स यथा—

" भूमौ चावस्थिता तत्र शरीरेषु च देहिनाम् । मूर्तिर्या पञ्चमी तस्य आकाशे समवस्थिता ॥
अवकाशं च भूतानां जीवनाय ददाति च । षष्ठी च तस्य या मूर्तिर्दीक्षितेषु समाश्रिता ॥
यज्ञनिष्पत्तिहेतुश्च भवति प्रत्यहं द्विजाः । सप्तमी तस्य या मूर्तिः स्मृता दानसमासतः ॥
दानैर्भिक्षून्प्रीणयति सदा लोकोपकारतः " इति ॥

---

१ ख. °प्रजाय° । २ क. ग. °श्चात्र सं° । ३ क. ग. °ख्याश्च त्यक्त्वा । ४ ख. °म् । एकीभूता वि° । ५ क. °शन्त्येनं तेजोमूर्तिं दिवाकरम् । अ° । ६ क. °नो ये च धार्मिकाः । वा° । ७ क. ब्रह्मचारिणः । ८ ख. °द्या वसव° । ९ ख. °ता । दृष्टरोगापहो यस्माददृष्टं नित्यमेव हि । अ° । ग. °ता । दृष्टं न बाधते यस्माददृष्टं नित्यमेव हि । अ । १० क. धाता । ११ क. °रंशुश्च । १२ ख. विधाता । १३ क. °ष्ठी तथा भानोरर्यमेत्यभिवि° । १४ क. ख. व्यवस्थिता ।

मूर्तिस्त्वेकादशी[1] भानोर्नाम्ना वरुणसंज्ञिता[2] । जलेष्ववस्थिता सा तु प्रजां पुष्णाति नित्यशः ३८
मूर्तिर्या द्वादशी भानोर्नाम्ना मित्रेति संज्ञिता । लोकानां सा हितार्थाय स्थिता[3] चन्द्रसरित्तटे[4] ३९
वायु[5]भक्षस्तपस्तेपे स्थित्वा मैत्रेण चक्षुषा । अनुगृह्णन्सदा भक्तान्वरैर्नानाविधैस्तु सः ॥ ४०
एवं[6] सा जगतां मूर्तिर्हिता[य] विहिता पुरा । तत्र मित्रः स्थितो यस्मात्तस्मान्मित्रं परं स्मृतम् ॥
आभिर्द्वादशभिस्तेन सवित्रा परमात्मना । कृत्स्नं जगदिदं व्याप्तं मूर्तिभिश्च द्विजोत्तमाः ॥ ४२
तस्माद्ध्येयो नमस्यश्च द्वादशस्थासु मूर्तिषु । भक्तिमद्भिर्नरैर्नित्यं तद्गतेनान्तरात्मना ॥ ४३
इत्येवं द्वादशाऽऽदित्यान्नमस्कृत्वा तु मानवः । नित्यं[7] श्रुत्वा पठित्वा च सूर्यलोके महीयते ४४

मुनय ऊचुः—

यदि तावदयं सूर्यश्चा[8]ऽऽदिदेवः सनातनः । ततः कस्मात्तपस्तेपे वरेप्सुः[9] प्राकृतो यथा ॥ ४५

ब्रह्मोवाच—

एतद्वः संप्रवक्ष्यामि परं गुह्यं विभावसोः । पृष्टं मित्रेण[10] यत्पूर्वं नारदाय महात्मने ॥ ४६
प्राज्ञयोक्तास्तु युष्मभ्यं रवेर्द्वादश मूर्तयः । मित्रश्च वरुणश्चोभौ तासां तपसि संस्थितौ ॥ ४७
अब्भक्षो[11] वरुणस्तासां तस्थौ पश्चिमसागरे । मित्रो मित्रवने चास्मिन्वायुभक्षो[12]ऽभवत्तदा ॥ ४८
अथ मेरुगिरेः शृङ्गात्प्रच्युतो गन्धमादनात् । नारदस्तु महायोगी सर्वाँल्लोकांश्चरन्वशी ॥ ४९
आजगामाथ तत्रैव यत्र[13] मित्रोऽचरत्तपः । तं दृष्ट्वा तु तपस्यन्तं तस्य कौतूहलं ह्यभूत् ॥ ५०
योऽक्षयश्चाव्ययश्चैव व्यक्ताव्यक्तः सनातनः । धृतमेकात्मकं येन त्रैलोक्यं[14] सुमहात्मना ॥ ५१
यः पिता सर्वदेवानां पराणा[15]मपि यः परः[16] । अयजद्देवताः[17] कास्तु पितॄन्वा कानसौ यजेत् ॥
इति संचिन्त्य मनसा तं देवं नारदोऽब्रवीत् ॥ ५२

नारद उवाच—

वेदेषु सपुराणेषु साङ्गोपाङ्गेषु गीयसे । त्वमजः शाश्वतो धाता त्वं निधानमनुत्तमम् ॥ ५३
भूतं भव्यं भवच्चैव त्वयि सर्वं प्रतिष्ठितम् । चत्वारश्चाऽऽश्रमा देव गृहस्थाद्यास्तथैव हि ॥ ५४
यजन्ति त्वामहरहस्त्वां मूर्तित्वं समाश्रितम् । पिता माता च सर्वस्य दैवतं त्वं हि शाश्वतम् ॥
यजसे पितरं कं त्वं देवं वाऽपि न विद्महे ॥ ५६

मित्र उवाच—

अवाच्यमेतद्वक्तव्यं परं गुह्यं[18] सनातनम् । त्वयि भक्तिमति ब्रह्मन्प्रवक्ष्यामि यथातथम् ॥ ५७
यत्तत्सूक्ष्ममविज्ञेयमव्यक्त[19]मचलं ध्रुवम् । इन्द्रियैरिन्द्रियार्थैश्च सर्वभूतैर्विवर्जितम् ॥ ५८
स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चैव कथ्यते । त्रिगुणाद्व्यतिरिक्तोऽसौ पुरुषश्चैव कल्पितः ॥ ५९
हिरण्यगर्भो भगवान्सैव बुद्धिरिति स्मृतः । महानिति च योगेषु प्रधानमिति कथ्यते ॥ ६०

---

१ म. ख. °शी या तु भानोर्वरु° । २ क. ख. °ता । सा जीवयति वै कृत्स्नं जगदप्सु प्रतिष्ठितम् । मू° । ३ क. °ता मूर्तिः स° । ४ ख. °न्द्रस्य मण्डले । बहुकालं तपस्तेपे स्थितः स तु सरित्तटे । वा । ५ ग. °युभृतः सदा । ६ ख. एवमास्तं हितं स्थानं यश्चाश्चाध्वनयापिता । त° । ग. एवमाद्यं हि तत्स्थानं यश्चाच्छाश्वेन चाऽऽस्थितम् । त° । ७ क. °त्यं समाहितो भूत्वा सू° । ८ ख. पवित्रो यः सू° । ९ ख. धरायां । १० क. ख. मैत्रेण । ११ क. अध्यक्षो । ख. अव्यक्तो । १२ ख. ग. °भक्षश्चरंस्तपः । अ° । १३ क. °त्र देवोऽच° । १४ क. ख. °लोक्यमिदमात्म° । १५ क. °रादपि च यः । १६ क. °रः । सोऽय° । १७ °वतां कां तु कं पूजयति नित्यशः । इ° । १८ ख. गुप्तं । १९ क. °मजरं मुने । इ° ।

सांख्ये च कथ्यते योगे नामभिर्बहुधात्मकः[1] । स[2] च त्रिरूपो विश्वात्मा शर्वोऽक्षर इति स्मृतः॥
धृतमेकात्मकं तेन त्रैलोक्यमिदमात्मना । अशरीरः शरीरेषु सर्वेषु निवसत्यसौ ॥ ६२
वसन्नपि शरीरेषु न स [3]लिप्येत कर्मभिः । ममान्तरात्मा तव च ये चान्ये देहसंस्थिताः ॥ ६३
सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित्कचित् । सगुणो निर्गुणो विश्वो ज्ञानगम्यो ह्यसौ स्मृतः[4]
सर्वतःपाणिपादान्तः सर्वतोक्षिशिरोमुखः । सर्वतःश्रुतिमाल्लोके सर्वमावृत्य तिष्ठति ॥ ६५
विश्वमूर्धा विश्वभुजो विश्वपादाक्षिनासिकः । एकश्चरति वै क्षेत्रे स्वैरचारी यथासुखम् ॥ ६६
क्षेत्राणीह शरीराणि तेषां चैव यथासुखम् । तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते ॥ ६७
अव्यक्ते[5] च पुरे शेते पुरुषस्तेन चोच्यते । विश्वं बहुविधं ज्ञेयं स च सर्वत्र उच्यते ॥ ६८
तस्मात्स बहुरूपत्वाद्विश्वरूप इति स्मृतः । तस्यैकस्य महत्त्वं[6] हि स चैकः पुरुषः स्मृतः ॥ ६९
महापुरुषशब्दं हि बिभर्त्येकः सनातनः । स[7] तु विधिक्रियायत्तः[8] सृजत्यात्मानमात्मना ॥ ७०
शतधा सहस्रधा चैव तथा शतसहस्रधा । कोटिशश्च करोत्येष[9] प्रत्यगात्मानमात्मना ॥ ७१
आकाशात्पतितं तोयं याति स्वाद्वन्तरं यथा । भूमे[10] रसविशेषेण तथा[11] गुणै[12]रसाच्च सः ॥ ७२
एक एव यथा वायुर्देहेष्वेव हि पञ्चधा । एकत्वं च पृथक्त्वं च तथा तस्य न संशयः ॥ ७३
स्थानान्तरविशेषाच्च यथाऽग्निर्लभते पराम् । संज्ञां[13] तथा मुने सोऽयं ब्रह्मादिषु तथाऽऽप्नुयात्॥
यथा दीपसहस्राणि दीप एकः प्रसूयते । तथा रूपसहस्राणि स एकः संप्रसूयते ॥ ७५
यदा स बुध्यत्यात्मानं तदा भवति केवलः । एकत्वं[14] प्रलये[15] चास्य बहुत्वं च[16] प्रवर्तते[17] ॥ ७६
नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् । अक्षयश्चाप्रमेयश्च सर्वगश्च स उच्यते ॥ ७७
तस्मादव्यक्तमुत्पन्नं [18]त्रिगुणं द्विजसत्तमाः । अव्यक्ताव्यक्तभावस्था या सा प्रकृतिरुच्यते ॥७८
तां योनिं ब्रह्मणो विद्धि योऽसौ सदसदात्मकः । लोके च पूज्यते योऽसौ दैवे पित्र्ये च कर्मणि
नास्ति तस्मात्परो ह्यन्यः पिता देवोऽपि वा द्विजाः । आत्मना स तु विज्ञेयस्ततस्तं पूजयाम्यहम् ॥ ८०
स्वर्गेष्वपि हि ये केचित्तं नमस्यन्ति देहिनः । तेन(च) गच्छन्ति देवर्षे तेनोद्दिष्टफलां गतिम् ८१
[19]तं देवाः स्वाश्रमस्थाश्च नानामूर्तिसमाश्रिताः । भक्त्या संपूजयन्त्याद्यं गतिश्चैषां ददाति सः ॥
स हि सर्वगतश्चैवं[20] निर्गुणश्चैव कथ्यते । एवं मत्वा यथाज्ञानं पूजयामि दिवाकरम् ॥ ८३
ये च तद्भाविता लोक एकतत्त्वं समाश्रिताः । एतदप्यधिकं तेषां यदेकं[21] प्रविशन्त्युत ॥ ८४
इति गुह्यसमुद्देशस्तव नारद कीर्तितः । अस्मद्भक्त्याऽपि देवर्षे त्वयाऽपि परमं स्मृतम् ॥ ८५
सुरैर्वा मुनिभिर्वाऽपि पुराणैर्वरदं स्मृतम् । सर्वे च परमात्मानं पूजयन्ति दिवाकरम् ॥ ८६

ब्रह्मोवाच—

एवमेतत्पुराऽऽख्यातं नारदाय तु भानुना । मयाऽपि च समाख्याता कथा भानोर्द्विजोत्तमाः८७

---

१ ख. °क. । पवित्ररू° । २ क. सत्त्वरूपेण वि° । ३ ख. ग. लिप्यति । ४ क. मतः । ५ ख. °व्यक्तिके पु° । ६ क. ममत्वं । ख. समत्वं । ७ क. ख. स त्वं वि° । ८ क. ख. °यापन्नः सृ° । ९ क. °ष पृथगा° । १० क. भूमी र° । ११ क. °थाऽयं शाश्वतो महान् । ए° । १२ ख. °णवशानुगः । ए° । १३ ग. °ज्ञां यथाऽध्वरा ह्येषु ब्रह्माद्येषु तथा ह्यसौ । य° । १४ क. ख. °कत्वं प्र° । १५ क. °प्रलयं च° । १६ ख. च ततो भवेत् । नि° । १७ क. प्रपद्यते । १८ क. द्विगुणं । १९ क. ख. ते । २० क. ख. °व कथ्यते स्थाणुजङ्गमे । ए° । २१ क. °कं ह्यधिकं पुनः । इ° ।

इदमाख्यान[1]माख्येयं मयाऽऽख्यातं द्विजोत्तमाः[2] । न ह्यनादित्यभक्ताय इदं देयं कदाचन ॥ ८८
यश्चैतच्छ्रावये[3]न्नित्यं यश्चैव शृणुयान्नरः । स[4] सहस्रार्चिषं देवं प्रविशेन्नात्र संशयः ॥ ८९
मुच्येताऽऽर्तस्तथा रोगाच्छ्रुत्वेमामादितः कथाम् । जिज्ञासुर्लभते ज्ञानं गतिमिष्टां तथैव च ॥ ९०
क्षणेन लभतेऽध्वानमिदं यः पठते मुने । यो यं कामयते कामं स तं प्राप्नोत्यसंशयम् ॥ ९१
*तस्माद्भवद्भिः सततं स्मर्तव्यो भगवान्रविः । स च धाता विधाता च सर्वस्य जगतः प्रभुः ९२

इति श्रीमहापुराणे स्वयंभुऋषिसंवाद आदित्यमाहात्म्यवर्णनं नाम त्रिंशत्तमोऽध्यायः ॥ ३० ॥

आदितः श्लोकानां समष्ट्यङ्काः—२०८३

अथैकत्रिंशोऽध्यायः ।

ब्रह्मोवाच—

आदित्य[6]मूलमखिलं त्रैलोक्यं मुनिसत्तमाः । भवत्यस्माज्जगत्सर्वं सदेवासुरमानुषम् ॥ १
रुद्रोपेन्द्रमहेन्द्राणां विप्रेन्द्र त्रिदिवौकसाम् । महाद्युतिमतां चैव तेजोऽयं सार्वलौकिकम् ॥ २
सर्वात्मा सर्वलोकेशो देवदेवः प्रजापतिः । सूर्य एव त्रिलोकस्य मूलं परमदैवतम् ॥ ३
अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपति[7]ष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ ४
सूर्यात्प्रसूयते सर्वं तत्र चैव प्रलीयते । भावाभावौ हि लोकानामादित्यान्निःसृतौ पुरा ॥ ५
एत[8]त्तु ध्यानिनां ध्यानं मोक्षश्चाप्येष मोक्षिणाम् । तत्र गच्छन्ति निर्वाणं जायन्तेऽस्मात्पुनः पुनः
क्षणा मुहूर्ता दिवसा निशा पक्षाश्च नित्यशः । मासाः संवत्सराश्चैव ऋतवश्च युगानि च ॥ ७
अथाऽऽदित्यादृते ह्येषां कालसंख्या न विद्यते । कालादृते न नियमो नाग्नौ विहरणक्रिया[9] ॥ ८
ऋतूनामविभागश्च[10] ततः पुष्प[11]फलं कुतः । कुतो वै सस्यनिष्पत्तिस्तृणौषधिगणः कुतः ॥ ९
अभावो व्यवहाराणां जन्तूनां दिवि चेह च । जगत्प्र[12]भावाद्विशते भास्क[13]राद्वारितस्क[14]रात् ॥ १०
नावृष्ट्या तपते सूर्यो नावृष्ट्या [15]परिशुष्यति । नावृष्ट्या परिधिं धत्ते वारिणा दीप्यते रविः ११
वसन्ते कपिलः सूर्यो ग्रीष्मे काञ्चनसंनिभः । श्वेतो वर्षासु वर्णेन[16] पाण्डुः शरदि[17] भास्करः १२
हेमन्ते ताम्रवर्णाभः शिशिरे लोहितो रविः । इति वर्णाः समाख्याताः सूर्यस्य ऋतुसंभवाः १३
ऋतुस्वभाववर्णैश्च सूर्यः क्षेमसुभिक्षकृत् । अथाऽऽदित्यस्य नामानि सामान्यानि द्विजोत्तमाः १४
द्वादशैव पृथक्त्वेन तानि वक्ष्याम्यशेषतः । आदित्यः सविता सूर्यो मिहिरोऽर्कः प्रभाकरः ॥१५
मार्तण्डो भास्करो भानुश्चित्रभानुर्दिवाकरः । रविर्द्वादशभिस्तेषां ज्ञेयः सामान्यनामभिः ॥ १६
विष्णुर्धाता भगः पूषा मित्रेन्द्रौ वरुणोऽर्यमा । विवस्वानंशुमांस्त्वष्टा पर्जन्यो द्वाद[18]शः स्मृतः ॥१७

---

* अयं श्लोको नास्ति क. पुस्तके ।

---

१ ख. °मार्यं च म° । २ ख. °माः । अभक्ताय न देयं वै शठायापि कथंचन । ३ क. °येच्छ्राद्धे य° । ४ क. स वै दिवाकरं दे° । ५ ख. °गतो गुरुः । ६ क. °त्यभूतम° । ७ ख. ग. °ष्ठति । आ° । ८ ख. °तद्वराणां श्राद्धानां मोक्षदोऽप्ये° । ९ क. ख. °या । धातूना° । १० क. ख. °श्च पु° । ११ क. ख. °ष्पमूलफ° । १२ ख. °त्प्रमाणं हि कृते । १३ ख. °स्करो वारि° । १४ ख. °स्करः । ना° । १५ क. परिविद्यते । १६ ख. °न श° । १७ ख. °दि श्यामवर्णकः । हे° । १८ क. °दशो मतः ।

इत्येते द्वादशाऽऽदित्याः पृथक्त्वेन व्यवस्थिताः । उत्तिष्ठन्ति सदा ह्येते मासैर्द्वादशभिः क्रमात्॥
विष्णुस्तपति चैत्रे तु वैशाखे चार्यमा तथा । विवस्वाञ्ज्येष्ठमासे तु आषाढे चांशुमान्स्मृतः॥ १९
पर्जन्यः श्रावणे मासि वरुणः प्रौष्ठसंज्ञके । इन्द्र आश्वयुजे मासि धाता तपति कार्तिके ॥ २०
मार्गशीर्षे तथा मित्रः पौषे पूषा दिवाकरः । माघे भगस्तु विज्ञेयस्त्वष्टा तपति फाल्गुने ॥ २१
शतैर्द्वादशभिर्विष्णू रश्मिभिर्दीप्यते सदा । दीप्यते गोसहस्रेण शतैश्च त्रिभिरर्यमा ॥ २२
द्विःसप्तकैर्विवस्वांस्तु अंशुमान्पञ्चभिस्त्रिभिः । विवस्वानिव पर्जन्यो वरुणश्चार्यमा तथा ॥ २३
+ मित्रवद्भगवांस्त्वष्टा सहस्रेण शतेन च । इन्द्रस्तु द्विगुणैः षड्भिर्धातैकादशभिः शतैः ॥ २४
*सहस्रेण तु मित्रो वै पूषा तु नवभिः शतैः । उत्तरोपक्रमेऽर्कस्य वर्धन्ते रश्मयस्तथा ॥ २५
दक्षिणोपक्रमे भूयो ह्रसन्ते सूर्यरश्मयः । एवं रश्मिसहस्रं तु सूर्यलोकादनुग्रहम् ॥ २६
एवं नाम्नां चतुर्विंशदेक एषां प्रकीर्तितः । विस्तरेण सहस्रं तु पुनरन्यत्प्रकीर्तितम् ॥ २७

मुनय ऊचुः—

ये तन्नामसहस्रेण स्तुवन्त्यर्कं प्रजापते । तेषां भवति किं पुण्यं गतिश्च परमेश्वर ॥ २८

ब्रह्मोवाच—

शृणुध्वं मुनिशार्दूलाः सारभूतं सनातनम् । अलं नामसहस्रेण पठन्नेवं स्तवं शुभम्(?) ॥ २९
यानि नामानि गुह्यानि पवित्राणि शुभानि च । तानि वः कीर्तयिष्यामि शृणुध्वं भास्करस्य वै
विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः । लोकप्रकाशकः श्रीमाँल्लोकचक्षुर्महेश्वरः ॥ ३१
लोकसाक्षी त्रिलोकेशः कर्ता हर्ता तमिस्रहा । तपनस्तापनश्चैव शुचिः सप्ताश्ववाहनः ॥ ३२
गभस्तिहस्तो ब्रह्मा च सर्वदेवनमस्कृतः । +एकविंशति(क) इत्येष स्तव इष्टः सदा रवेः ॥ ३३
शरीरारोग्यदश्चैव धनवृद्धियशस्करः । स्तवराज इति ख्यातस्त्रिषु लोकेषु विश्रुतः ॥ ३४
य एतेन द्विजश्रेष्ठा द्विसंध्येऽस्तमनोदये । स्तौति सूर्यं शुचिर्भूत्वा सर्वपापैः प्रमुच्यते ॥ ३५
मानसं वाचिकं वाऽपि देहजं कर्मजं तथा । एकजप्येन तत्सर्वं नश्यत्यर्कस्य संनिधौ ॥ ३६
एकजप्यश्च होमश्च संध्योपासनमेव च । धूपमन्त्रोऽर्घ्यमन्त्रश्च बलिमन्त्रस्तथैव च ॥ ३७
अन्नप्रदाने दाने च प्रणिपाते प्रदक्षिणे । पूजितोऽयं महामन्त्रः सर्वपापहरः शुभः ॥ ३८
तस्माद्यूयं प्रयत्नेन स्तवेनानेन वै द्विजाः । स्तुवीध्वं वरदं देवं सर्वकामफलप्रदम् ॥ ३९

इति श्रीमहापुराण आदिब्राह्मे स्वयंभुऋषिसंवादे मार्तण्डस्यैकविंशतिनामानुकीर्तनं नामैकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—२१२२

+ इदमर्धं ग. पुस्तके नास्ति । * इदमर्धं नास्ति क. ख. पुस्तकयोः । + इदमर्धं नास्ति क. पुस्तके ।

---

१ क. °शुमांस्तथा । प° । २ क. °लोके च सप्र° । ३ ग. °कानुसंग्रहः । ए° । ४ ख. नाम्ना । ५ ख. °देवतैषां प्र° । ६ क. एवं । ७ क. पठित्वेमं स्त° । ८ ख. °ठतीदंस्त° । ९ क. °शनः श्री° । १० क. °केशो दस्युह° । ख. °केशो लोककर्ता त° । ११ ख. ब्रह्मण्यः स° । १२ क. °र्वलोकन° । १३ ख. ग. °वेः । श्रीदारोग्यकरश्चै° । १४ ख. °तः । पठन्नेव द्वि° । १५ ख. °श्रेष्ठो द्वि° । १६ ख. याति । १७ क. ख. °न्त्रार्घम° । १८ ख. °दानमन्त्रश्च प्राप्तिमन्त्रस्तथैव च । पू° । १९ क. स्नाने । २० क. ख. °स्मात्पूज्यः प्र° ।

अथ द्वात्रिंशोऽध्यायः ।

मुनय ऊचुः—

निर्गुणः शाश्वतो देवस्त्वया प्रोक्तो दिवाकरः । पुनर्[1]द्वादशधा जातः श्रुतोऽस्माभिस्त्वयोदितः १
स कथं तेजसो[2] राशिः स्त्रिया गर्भे महाद्युतिः । संभूतो भास्करो[3] जातस्तत्र नः संशयो महान् ॥

ब्रह्मोवाच—

द[4]क्षस्य हि सुताः श्रेष्ठा बभूवुः षष्टिः शोभनाः । अदितिर्दितिर्दनुश्चैव विनताद्यास्तथैव च ॥ ३
दक्षस्ताः प्रददौ कन्याः कश्यपाय त्रयोदश । अदितिर्जनयामास देवांस्त्रिभुवनेश्वरान् ॥ ४
दै[5]त्यान्दितिर्दनुश्चोग्रान्दानवान्बलदर्पितान् । विनताद्यास्तथा चान्याः सुषुवुः स्थाणुजङ्गमान् ॥५
तस्याथ पुत्रदौहित्रैः पौत्रदौहित्रकादिभिः । व्याप्तमेतज्जगत्सर्वं तेषां तासां च वै मुने ॥ ६
तेषां कश्यपपुत्राणां प्रधाना देवतागणाः । सात्त्विका राजसाश्चान्ये तामसाश्च गणाः[6] स्मृताः ॥७
देवान्यज्ञभुजश्चक्रे तथा त्रिभुवनेश्वरान् । स्रष्टा ब्रह्मविदां श्रेष्ठः परमेष्ठी प्रजापतिः ॥ ८
तानबाधन्त सहिताः सापत्न्याद्दैत्यदानवाः । ततो निराकृतान्पुत्रान्दैतेयैर्दानवैस्तथा ॥ ९
हृतं त्रिभुवनं दृष्ट्वा अदितिर्मुनिसत्तमा[7]ः । आच्छिन्नयज्ञभागांश्च क्षुधा संपीडितान्भृशम् ॥ १०
आराधनाय सवितुः परं यत्नं प्रचक्रमे[8] । एकाग्रा नियताहारा परं नियममास्थिता ॥
तुष्टाव तेजसां राशिं गगनस्थं दिवाकरम् ॥ ११

अदितिरुवाच—

नमस्तुभ्यं परं सूक्ष्मं सुपुण्यं बिभ्रते[9]ऽतुलम् । धाम धामवतामीशं धामाधारं[10] च शाश्वतम् ॥ १२
जगतामुपकाराय[11] त्वामहं स्तौमि गोपते[12] । आददानस्य यद्रूपं तीव्रं तस्मै नमाम्यहम् ॥ १३
ग्रहीतुमष्टमासेन काले[13]नाम्बुमयं रसम् । बिभ्रतस्तव यद्रूपमतितीव्रं नताऽस्मि तत् ॥ १४
समेतमग्निसोमाभ्यां नमस्तस्मै गुणात्मने । यद्रूपमृग्यजुःसाम्नामैक्येन तपते तव ॥ १५
विश्वमेतत्त्रयीसंज्ञं नमस्तस्मै विभावसो । यत्तु तस्मात्परं रूपमोमित्युक्त्वाऽभिसंहितम् ॥
अस्थूलं स्थूलममलं नमस्तस्मै सनातन ॥ १६

ब्रह्मोवाच—

एवं सा नियता देवी चक्रे स्तोत्रमहर्निशम् । निराहारा विवस्वन्तमारिराधयिषुर्द्विजाः ॥ १७
ततः कालेन महता भगवांस्तपनो द्विजाः । प्रत्यक्षतामगात्तस्या दाक्षायण्या द्विजोत्तमाः ॥ १८
सा ददर्श महाकूटं तेजसोऽम्बरसंवृतम् । भूमौ च संस्थितं भास्वज्ज्वालाभिरतिदुर्दृशम् ॥
तं दृष्ट्वा च[उवाचाथ]ततो देवी साध्वसं परमं गता ॥ १९

अदितिरुवाच—

[14]जगदाद्य प्रसीदेति न त्वां पश्यामि गोपते । प्रसादं कुरु पश्येयं यद्रूपं ते दिवाकर ॥
भक्तानुकम्पक विभो त्वद्भक्तान्पाहि मे सुतान् ॥ २१

---

१ ख. °नश्च कश्यपाज्जातः । २ ख. °सो राशिस्तिग्मतेजा म° । ३ ख. °रो देवस्त° । ४ ग °क्षदुहितरः सर्वा ब° । ५ क. °तिः । दानवा यक्षसहिताः सपत्ना दैत्यदानवाः । राक्षसाश्च ततो युद्धं तेषामासीत्सुदारुणम् । दिव्यं वर्षसहस्रं तु तत्राजीयन्त देवताः । जयवन्तोऽभवंस्तत्र बलिनो दैत्यदानवाः । त° । ६ क. °माः । विच्छि° । ७ ख. यत्नमुपस्थिता । ए° । ८ क. °मे । जिताहारा तन्मनस्का प° । ९ क. °ते पुनः । धा° । १० क. °धार जगत्पते । ज° । ११ ग. °य तथाऽहं । १२ क. °ते । अदर्शन° । १३ ग. °लेनेन्दुम° । १४ क. जगन्नाथ ।

ब्रह्मोवाच—

ततः स तेजसस्तस्मादाविर्भूतो विभावसुः । अदृश्यत तदाऽऽदित्यस्तप्तताम्रोपमः प्रभुः ॥ २२

ततस्तां प्रणतां देवीं तस्यासंदर्शने द्विजाः । प्रांहं भास्वान्वृणुष्वैकं वरं मत्तो यमिच्छसि ॥ २३

प्रणता शिरसा सा तु जानुपीडितमेदिनी । प्रत्युवाच विवस्वन्तं वरदं समुपस्थितम् ॥ २४

अदितिरुवाच—

देव प्रसीद पुत्राणां हृतं त्रिभुवनं मम । यज्ञभागाश्च दैतेयैर्दानवैश्च बलाधिकैः ॥ २५

तन्निमित्तं प्रसादं त्वं कुरुष्व मम गोपते । अंशेन तेषां भ्रातृत्वं गत्वा तान्नाशये रिपून् ॥ २६

यथा मे तनया भूयो यज्ञभागभुजः प्रभो । भवेयुरधिपाश्चैव त्रैलोक्यस्य दिवाकर ॥ २७

तथाऽनुकल्पं पुत्राणां सुप्रसन्नो रवे मम । कुरु प्रसन्नार्तिहर कार्यं कर्ता त्वं[2]मुच्यते ॥ २८

ब्रह्मोवाच—

ततस्तामाह भगवान्भास्करो वारितस्करः । प्रणतामदितिं विप्राः प्रसादसुमुखो विभुः ॥ २९

सूर्य उवाच—

सहस्रांशेन ते गर्भः संभूयाहमशेषतः । त्वत्पुत्रशत्रून्दक्षोऽहं नाशयाम्याशु निर्वृतः ॥ ३०

ब्रह्मोवाच—

इत्युक्त्वा भगवान्भास्वानन्तर्धानमुपागतः । निवृत्ता साऽपि तपसः संप्राप्ताखिलवाञ्छिता ॥ ३१

ततो रश्मिसहस्रात्तु सुषुम्नाख्यो रवेः करैः[3] । ततः संवत्सरस्यान्ते तत्कामपूरणाय सः ॥ ३२

निवासं सविता चक्रे देवमातुस्तदोदरे । कृ[4]च्छ्रचान्द्रायणादींश्च सा चक्रे सुसमाहिता ॥ ३३

शुचिना धारयाम्येनं दिव्यं गर्भमिति द्विजाः । ततस्तां कश्यपः प्राह किंचित्कोपप्लुताक्षरम् ३४

कश्यप उवाच—

किं मारयसि गर्[5]भाण्डमिति नित्योपवासिनी ॥

ब्रह्मोवाच—

सा च तं प्राह गर्भाण्डमेतत्पश्येति कोपना । न मारितं विपक्षाणां मृत्युरेव भविष्यति ॥ ३५

इत्युक्त्वा तं तदा गर्[6]भमुत्ससर्ज सुरारणिः । जाज्वल्यमानं तेजोभिः पत्युर्वचनकोपिता ॥ ३६

तं दृष्ट्वा कश्यपो गर्भमुद्यद्भास्करवर्चसम् । तुष्टाव प्रणतो भूत्वा वाग्भि[7]राद्याभिरादरात् ॥ ३७

संस्तूयमानः स तदा गर्भाण्डात्प्रकटोऽभवत् । पद्मपत्र[8]सवर्णाभस्तेजसा व्याप्तदिङ्मुखः ॥ ३८

अथान्तरिक्षादाभाष्य कश्यपं मुनिसत्तमम् । सतोयमेघगम्भीरा वागुवाचाशरीरिणी ॥ ३९

वागुवाच—

मा[9]रितंपतः प्रो(तमिति यत्प्रो)क्तमेतदण्डं त्वं[10]याऽदितेः । तस्मान्मुने सुतस्तेऽयं मार्तण्डाख्यो भविष्यति

हनिष्यत्यसुरांश्चायं यज्ञभागहरानरीन् । देवा निशम्येति वचो गगनात्समुपागतम् ॥ ४१

प्रहर्षमतुलं याता दानवाश्च हतौजसः । ततो युद्धाय दैतेयानाजुहाव शतक्रतुः ॥ ४२

सह देवैर्मुदा युक्तो दानवाश्च तमभ्ययुः । तेषां युद्धमभूद्घोरं देवानामसुरैः सह ॥ ४३

शस्त्रास्त्रवृष्टिसंदीप्तसमस्तभुवनान्तरम् । तस्मिन्युद्धे भगवता मार्तण्डेन निरीक्षिताः ॥ ४४

---

१ ख. °ह बाढं वृणु° । २ ख. त्वमच्युतः । त° । ३ ग. °रः । विप्रावतारं संचक्रे दे° । ४ ख. कृच्छ्रात्सुधारणं तस्य सा । ५ ख. गर्भेऽण्ड° । ६ ख. °र्भमासस° । ७ ख. °ग्भिरीड्याभि° । ८ ग. °त्रसुव° । ९ ख. °रितंस्ते यतः प्रो° । १० ख. त्वयोदितम् । त° । ग. त्वयोदितेः । त° ।

तेजसा दह्यमानास्ते भस्मीभूता महासुराः । ततः प्रहर्षमतुलं प्राप्ताः सर्वे दिवौकसः ॥ ४५
तुष्टुवुस्तेजसां योनिं मार्तण्डमदितिं तथा । स्वाधिकारांस्ततः प्राप्ता यज्ञभागांश्च पूर्ववत् ॥ ४६
भगवानपि मार्तण्डः स्वाधिकारमथाकरोत् । कदम्बपुष्पवद्भास्वानधश्चोर्ध्वं च रश्मिभिः ॥
वृतो[1]ऽग्निपिण्डसदृशो दध्रे नातिस्फुटं वपुः ॥ ४७

मुनय ऊचुः—

कथं कान्ततरं पश्चाद्रूपं संलब्धवान्रविः । कदम्बगोलकाकारं तन्मे ब्रूहि जगत्पते ॥ ४८

ब्रह्मोवाच—

त्वष्टा[2] तस्मै ददौ कन्यां संज्ञां नाम विवस्वते । प्रसाद्य प्रणतो भूत्वा विश्वकर्मा प्रजापतिः ॥४९
त्रीण्यपत्यान्यसौ तस्यां[3] जनयामास गोपतिः । द्वौ पुत्रौ सुमहाभागौ कन्यां च यमुनां तथा॥५०
यत्तेजोऽभ्यधिकं तस्य मार्तण्डस्य विवस्वतः । तेनातितापयामास त्रींल्लोकान्सचराचरान् ॥ ५१
तद्रूपं गोलकाकारं दृष्ट्वा संज्ञा विवस्वतः । असहन्ती[4] महत्तेजः स्वां छायां वाक्यमब्रवीत् ॥ ५२

संज्ञोवाच—

अहं यास्यामि भद्रं ते स्वमेव भवनं पितुः । निर्विकारं त्वया[5]ऽत्रैव स्थेयं मच्छासनाच्छुभे ॥ ५३
इमौ च बालकौ मह्यं कन्या च वरवर्णिनी । संभाव्या नैव चाऽऽख्येयमिदं भगवते त्वया ॥५४

छायोवाच—

आ[6] कचग्रहणादेवि आ शापान्नैव कर्हिचित् । आख्यास्यामि मतं तुभ्यं गम्यतां यत्र वाञ्छितम्
इत्युक्ता व्रीडिता संज्ञा जगाम पितृमन्दिरम् । वत्सराणां सहस्रं तु वसमाना पितुर्गृहे ॥ ५६
भर्तुः समीपं याहीति पित्रोक्ता सा[7] पुनः पुनः । आगच्छद्वडवा भूत्वा कुरूनथोत्तरां[8]स्ततः ॥ ५७
तत्र तेपे तपः साध्वी निराहारा द्विजोत्तमाः । पितुः समीपं यातायां संज्ञायां वाक्यतत्परा ५८
तद्रूपधारिणी छाया भास्करं समुपस्थिता । तस्यां[9] च भगवान्सूर्यः संज्ञेयमिति चिन्तयन् ॥ ५९
तथैव जनयामास द्वौ पुत्रौ[10] कन्यकां तथा । संज्ञा तु पार्थिवी तेषामात्मजानां तथाऽकरोत् ॥६०
स्नेहं न पूर्वजातानां तथा[11] कृतवती[12] तु सा । मनुस्तत्क्षान्तवांस्तस्या यमस्तस्या न चक्षमे ॥ ६१
बहुधा पीड्यमानस्तु पितुः पत्न्या सुदुःखितः । स वै कोपाच्च बाल्याच्च भाविनोऽर्थस्य वै बलात्[13]
पदा संतर्जयामास न तु देहे न्यपातयत् ॥ ६२

छायोवाच—

पदा तर्जयसे यस्मात्पितुर्भार्यां गरीयसीम् । तस्मात्तवैष चरणः पतिष्यति न संशयः ॥ ६३

ब्रह्मोवाच—

यमस्तु तेन शापेन भृशं पीडितमानसः । मनुना सह धर्मात्मा पित्रे सर्वं न्यवेदयत् ॥ ६४

यम उवाच—

स्नेहेन तुल्यमस्मासु[14] माता देव न वर्तते । विसृज्य ज्यायसं भक्त्या कनीयांसं बुभूषति ॥ ६५
तस्यां मयोद्यतः पादो न तु देहे निपातितः । बाल्याद्वा यदि वा मोहात्तद्भवान्क्षन्तुमर्हसि ॥ ६६

---

१ ख. °तोऽपि पि° । २ क. ग. अथ । ३ ख. तत्र । ४ क. °न्ती तदा तेजः । ५ ग. °याऽप्यत्र स्थे° । ६ ख. आ केशग्र° । ७ ख. तु । ८ ख. °रूनेवोत्त° । ९ ख. तदा स भ° । १० ख. सुतौ । ११ क. यथा । १२ क. °ती पुरा । म° । १३ क. वशात् । १४ ख. °सु आत्मजेषु न ।

शप्तोऽहं तात कोपेन जनन्या तनयो यतः । ततो मन्ये न जननीमिमां वै तपतां वर ॥ ६७
तव प्रसादाच्चरणो भगवन्न पतेद्यथा । मातृशापादयं मेऽद्य तथा चिन्तय गोपते ॥ ६८

रविरुवाच—

असंशयं महत्पुत्र भविष्यत्यत्र कारणम् । येन त्वामाविशत्क्रोधो धर्मज्ञं[1] धर्मशीलिनम् ॥ ६९
सर्वेषामेव शापानां प्रतिघातो हि विद्यते । न तु मात्राभिशप्तानां क्वचिच्छाप[2]निवर्तनम् ॥ ७०
न शक्यमेतन्मिथ्या तु कर्तुं मातुर्वचस्त्व[3] । किंचित्तेऽहं विधास्यामि[4] पुत्रस्नेहादनुग्रहम् ॥ ७१
कृमयो मांसमादाय प्रयास्यन्ति महीतलम् । कृतं[5] तस्या वचः सत्यं[6] त्वं च त्रातो भविष्यसि ७२

ब्रह्मोवाच—

आदित्यस्त्वब्रवीच्छायां किमर्थं तनयेषु वै[7] । तुल्येष्वप्यधिकः स्नेह एकं प्रति कृतस्त्वया ॥ ७३
नूनं नैषां त्वं जननी संज्ञा काऽपि त्वमागता । निर्गुणेष्वप्यपत्येषु माता शापं न दास्यति ॥७४
सा तत्परिहरन्ती[8] च शापाद्भीता तदा रवेः । कथयामास वृत्तान्तं स श्रुत्वा श्वशुरं ययौ ॥ ७५
स चापि तं यथान्यायमर्चयित्वा तदा रविम् । निर्दग्धुकामं रोषेण सान्त्वयानस्तमब्रवीत् ॥७६

विश्वकर्मोवाच—

तवातितेजसा व्याप्तमिदं रूपं सुदुःसहम् । असहन्ती तु तत्संज्ञा वने चरति वै तपः ॥ ७७
द्रक्ष्यते तां भवानद्य स्वां भार्यां शुभचारिणीम् । रूपार्थं भवतोऽरण्ये चरन्तीं सुमहत्तपः ॥ ७८
श्रुतं मे ब्रह्मणो वाक्यं[9] तव तेजोवरोधने । रूपं निर्वर्तयाम्यद्य तव कान्तं दिवस्पते ॥ ७९

ब्रह्मोवाच—

ततस्तथेति तं प्राह त्वष्टारं भगवान्रविः । ततो विवस्वतो रूपं प्रागासीत्परिमण्डलम् ॥ ८०
विश्वकर्मा त्वनुज्ञातः शाकद्वीपे विवस्वता । भ्रमिमारोप्य तत्तेजःशातनायोपचक्रमे ॥ ८१
भ्रमताऽशेषजगतां नाभिभूतेन भास्वता । समुद्राद्रिवनोपेता त्वारुरोह मही नभः ॥ ८२
गगनं चाखिलं विप्राः सचन्द्रग्रहतारकम् । अधो गतं महाभागा बभूवाऽऽक्षिप्तमाकुलम् ॥ ८३
विक्षिप्तसलिलाः सर्वे बभूवुश्च तथाऽर्णवाः[10] । व्यभिद्यन्त महाशैलाः शीर्णसानुनिबन्धनाः[11] ॥ ८४
ध्रुवाधाराण्यशेषाणि धिष्ण्यानि मुनिसत्तमाः । त्रुट्यद्रश्मिनिबन्धीनि बन्धनानि अधो ययुः ८५
वेगभ्रमणसंपातवायुक्षिप्ताः सहस्रशः । व्यशीर्यन्त महामेघा घोरारावविराविणः ॥ ८६
भास्वद्भ्रमणविभ्रान्तभूम्याकाशरसातलम् । जगदाकुलमत्यर्थं तदा[12]ऽऽसीन्मुनिसत्तमाः ॥ ८७
त्रैलोक्यमाकुलं वीक्ष्य भ्रममाणं सुरर्षयः । देवाश्च ब्रह्मणा सार्धं भास्वन्तमभितुष्टुवुः ॥ ८८
आदिदेवोऽसि देवानां जातस्त्वं भूतये भुवः । सर्गस्थित्यन्तकालेषु त्रिधा भेदेन तिष्ठसि ॥ ८९
स्वस्ति तेऽस्तु जगन्नाथ[13] घर्मवर्ष दिवाकर । इन्द्रादयस्तदा देवा लिख्यमानमर्थास्तुवन्[14] ॥ ९०
जय देव जगत्स्वामि[15]ञ्जयाशेषजगत्पते । ऋषयश्च ततः सप्त वसिष्ठात्रिपुरोगमाः ॥ ९१
तुष्टुवुर्विविधैः स्तोत्रैः स्वस्ति स्वस्तीतिवादिनः । वेदोक्तिभिरथाग्र्याभिर्वालखिल्याश्च तुष्टुवुः[16] ॥
अग्निराद्याश्च (?) भास्वन्तं लिख्यमानं मुदा युताः[17] । त्वं नाथ मोक्षिणां मोक्षो ध्येयस्त्वं ध्यानिनां परः

---

१ ख. °र्मशाश्वतम् । २ ग. °चित्ताप° । ३ क. मातृवच° । ४ ख. प्रदास्यामि । ५ ख. एवं । ६ ख. °त्यं त्वयि पुत्र भ° । ७ क. च । ८ क. ख. °न्तीव शा° । ९ क. ग. °क्यं यदि ते देव रोचते । रू° । १० ख. °वाः । भिद्यन्ते स्म म° । ११ ख. °नाः । ब्रह्मलोकावशे° । १२ क. °दाप्रभृति स° । १३ क. °थ त्वमर्हसि दि° । १४ क. °थाब्रुव° । १५ क. °गन्नाथापितेजोधाम ज° । १६ क. ग. °वुः । कृमि° । १७ क. °ताः । त्वन्नामस्मरणान्मोक्षो ।

त्वं गतिः सर्वभूतानां कर्मकाण्डविवर्तिनाम् । संपूज्यस्त्वं तु देवेश शं नोऽस्तु जगतां पते ॥ ९४
शं नोऽस्तु द्विपदे नित्यं शं नश्चास्तु चतुष्पदे । ततो विद्याधरगणा यक्षराक्षसपन्नगाः ॥ ९५
कृताञ्जलिपुटाः सर्वे शिरोभिः प्रणता रविम् । ऊचुस्ते विविधा वाचो मनःश्रोत्रसुखावहाः ९६
सह्यं भवतु तेजस्ते भूतानां भूतभावन । ततो हाहाहूहूश्चैव नारदस्तुम्बुरुस्तथा ॥ ९७
उपगायितुमारब्धा गान्धर्वकुशला रविम् । षड्जमध्यमगान्धारगानत्रयविशारदाः ॥ ९८
मूर्छनाभिश्च तालैश्च संप्रयोगैः सुखप्रदम् । विश्वाची च घृताची च उर्वश्यथ तिलोत्तमाः ॥ ९९
मेनका सहजन्या च रम्भा चाप्सरसां वरा । ननृतुर्जगतामीशे लिख्यमाने विभावसौ ॥ १००
भावहावविलासाद्यान्कुर्वत्योऽभिनयान्बहून् । प्रावाद्यन्त ततस्तत्र वीणा वेण्वादिझर्झराः ॥१०१
पणवाः पुष्कराश्चैव मृदङ्गाः पटहानकाः । देवदुन्दुभयः शङ्खाः शतशोऽथ सहस्रशः ॥ १०२
गायद्भिश्चैव नृत्यद्भिर्गन्धर्वैरप्सरोगणैः । तूर्यवादित्रघोषैश्च सर्वं कोलाहलीकृतम् ॥ १०३
ततः कृताञ्जलिपुटा भक्तिनम्रात्ममूर्तयः । लिख्यमानं सहस्रांशुं प्रणेमुः सर्वदेवताः ॥ १०४
ततः कोलाहले तस्मिन्सर्वदेवसमागमे । तेजसः शातनं चक्रे विश्वकर्मा शनैः शनैः ॥ १०५
आजानुलिखितश्चासौ निपुणं विश्वकर्मणा । नाभ्यनन्दत्तु लिखनं ततस्तेनावतारितः ॥ १०६
न तु निर्भर्त्सितं रूपं तेजसो हननेन तु । कान्तात्कान्ततरं रूपमधिकं शुशुभे ततः ॥ १०७

इति हिमजलघर्मकालहेतोर्हरकमलासनविष्णुसंस्तुतस्य ।
तदुपरि लिखनं निशम्य भानोर्व्रजति दिवाकरलोकमायुषोऽन्ते ॥ १०८

एवं जन्म रवेः पूर्वं बभूव मुनिसत्तमाः । रूपं च परमं तस्य मया संपरिकीर्तितम् ॥ १०९

इति श्रीमहापुराण आदिब्राह्मे स्वयंभ्वृषिसंवादे मार्तण्डस्य जन्मशरीरलिखनं नाम
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—२२३०

अथ त्रयस्त्रिंशोऽध्यायः ।

मुनय ऊचुः—
भूयोऽपि कथयास्माकं कथां सूर्यसमाश्रिताम् । न तृप्तिमधिगच्छामः शृण्वन्तस्तां कथां शुभाम्॥
योऽयं दीप्तो महातेजा वह्निराशिसमप्रभः । एतद्वेदितुमिच्छामः प्रभावोऽस्य कुतः प्रभो ॥ २
ब्रह्मोवाच—
तमोभूतेषु लोकेषु नष्टे स्थावरजङ्गमे । प्रकृतेर्गुणहेतुस्तु पूर्वं बुद्धिरजायत ॥ ३
अहंकारस्ततो जातो महाभूतप्रवर्तकः । वाय्वग्निरापः खं भूमिस्ततस्त्वण्डमजायत ॥ ४
तस्मिन्नण्डे त्विमे लोकाः सप्त चैव प्रतिष्ठिताः । पृथिवी सप्तभिर्द्वीपैः समुद्रैश्चैव सप्तभिः ॥ ५
तत्रैवावस्थितो ह्यासीदहं विष्णुर्महेश्वरः । विमूढास्तामसाः सर्वे प्रध्यायन्ति तमीश्वरम् ॥ ६
ततो वै सुमहातेजाः प्रादुर्भूतस्तमोनुदः । ध्यानयोगेन चास्माभिर्विज्ञातः सविता तदा ॥ ७

---

१ क. °ण्डप्रव° । २ क. °श्च सुप्र° । ३ क. °योगसु° । ४ क. °रा । तुष्टुवुर्जे° । ५ क. °मीशं लि° । ६ ख. °णवादीनि वाद्यानि मृ° । ७ ख. शमनं । ८ ख. °नैः । अथाऽऽसील्लिखि° । ९ ग. प्रवृत्ते गुण° । १० ग. °तुल्वे प° । ११ क. जज्ञे । १२ क. सर्वदैव ।

ज्ञात्वा च परमात्मानं सर्वे एव पृथक्पृथक् । दिव्याभिस्तुतिभिर्देवः स्तुतोऽस्माभिस्तदेश्वरः ॥८
आदिदेवोऽसि देवानामैश्वर्याच्च त्वमीश्वरः । आदिकर्ताऽसि भूतानां देवदेवो दिवाकरः ॥ ९
जीवनः सर्वभूतानां देवगन्धर्वरक्षसाम् । मुनिकिंनरसिद्धानां तथैवोरगपक्षिणाम् ॥ १०
त्वं ब्रह्मा त्वं महादेवस्त्वं विष्णुस्त्वं प्रजापतिः । वायुरिन्द्रश्च सोमश्च विवस्वान्वरुणस्तथा ॥११
त्वं कालः सृष्टिकर्ता च हर्ता भर्ता तथा प्रभुः । सरितः सागराः शैला विद्युदिन्द्रधनूंषि च १२
प्रलयः प्रभवश्चैव व्यक्ताव्यक्तः सनातनः । ईश्वरात्परतो विद्या विद्यायाः परतः शिवः ॥ १३
शिवात्परतरो देवस्त्वमेव परमेश्वरः । सर्वतःपाणिपादान्तः सर्वतोक्षिशिरोमुखः ॥ १४
सहस्रांशुः सहस्रास्यः सहस्रचरणेक्षणः । भूतादिर्भूर्भुवः स्वश्च महः सत्यं तपो जनः ॥ १५
प्रदीप्तं दीपनं दिव्यं सर्वलोकप्रकाशकम् । दुर्निरीक्षं सुरेन्द्राणां यद्रूपं तस्य ते नमः ॥ १६
सुरसिद्धगणैर्जुष्टं भृग्वत्रिपुलहादिभिः । स्तुतं परममव्यक्तं यद्रूपं तस्य ते नमः ॥ १७
वेद्यं वेदविदां नित्यं सर्वज्ञानसमन्वितम् । सर्वदेवातिदेवस्य यद्रूपं तस्य ते नमः ॥ १८
विश्वकृद्विश्वभूतं च वैश्वानरसुरार्चितम् । विश्वस्थितमचिन्त्यं च यद्रूपं तस्य ते नमः ॥ १९
परं यज्ञात्परं वेदात्परं लोकात्परं दिवः । परमात्मेत्यभिख्यातं यद्रूपं तस्य ते नमः ॥ २०
अविज्ञेयमनालक्ष्यमध्यानगतमव्ययम् । अनादिनिधनं चैव यद्रूपं तस्य ते नमः ॥ २१

नमो नमः कारणकारणाय नमो नमः पाप[1]विमोचनाय ।
नमो नमस्ते दितिजार्दनाय नमो नमो रोग[2]विमोचनाय ॥ २२
नमो नमः सर्ववरप्रदाय नमो नमः[3] सर्वसुखप्रदाय ।
नमो नमः सर्वधनप्रदाय नमो नमः सर्वमतिप्रदाय ॥ २३

स्तुतः स भगवानेवं तैजसं रूपमास्थितः । उवाच वाचा कल्याण्या को वरो वः प्रदीयताम् २४

देवा ऊचुः—

तवातितैजसं रूपं न कश्चित्सोढुमुत्सहेत् । सहनीयं तद्भवतु हिताय जगतः प्रभो ॥ २५
एवमस्त्विति सोऽ[4]प्युक्त्वा(?) भगवानादिकृत्प्रभुः । लोकानां कार्यसिद्ध्यर्थं घर्मवर्षहिम[5]प्रदः ॥
ततः सांख्याश्च योगाश्च ये चान्ये मोक्षकाङ्क्षिणः । [6]ध्यायन्ति ध्यायिनो देवं हृदयस्थं दिवाकरम्
सर्वलक्षणहीनोऽपि [7]युक्तो वा सर्वपातकैः । सर्वं च तरते [8]पापं दे[9]वमर्कं समाश्रितः ॥ २८
अग्नि[10]होत्रं च वेदाश्च यज्ञाश्च बहुदक्षिणाः । भानोर्भक्तिनमस्कारकलां नार्हन्ति षोडशीम् ॥ २९
तीर्थानां परमं तीर्थं मङ्गलानां च मङ्गलम् । पवित्रं च पवित्राणां प्रपद्यन्ते दिवाकरम् ॥ ३०
शक्राद्यैः संस्तुतं [12]देवं ये नमस्यन्ति भास्करम् । सर्वकिल्बिषनिर्मुक्ताः सूर्यलोकं [13]व्रजन्ति ते ३१

मुनय ऊचुः—

चिरात्प्रभृति नो ब्रह्मञ्श्रोतुमिच्छा प्रवर्तते । नाम्नामष्टशतं ब्रूहि यत्त्वयोक्तं पुरा रवेः ॥ ३२

ब्रह्मोवाच—

अष्टोत्तरशतं नाम्नां शृणुध्वं गदतो मम । भास्करस्य परं गुह्यं स्वर्गमोक्षप्रदं द्विजाः ॥ ३३
ॐ सूर्योऽर्यमा भगस्त्वष्टा पूषाऽर्कः सविता रविः । गभस्तिमानजः कालो मृत्युर्धाता प्रभाकरः

१ क. ख. °विनाशना° । २ क. ख. °विनाशना° । ३ क °मः स्वर्गगतिप्र° । ४ ग. °प्युक्तो भ° । ५ क. ख. °प्रभुः । त° । ६ ख. मनसा । ७ ग. मुक्तो । ८ ख. दुःखं । ९ ख. °वमाश्रित्य मानवः । अ° । १० ख. ग. °होत्राश्च वे° । ११ ग. °यध्वं दि° । १२ ख. देवैर्ये न° । १३ ख. प्रयान्ति ।

पृथिव्यापश्च तेजश्च खं वायुश्च परायणम् । सोमो बृहस्पतिः शुक्रो बुधोऽङ्गारक एव च ॥ ३५
इन्द्रो विवस्वान्दीप्तांशुः शुचिः शौरिः शनैश्चरः । ब्रह्मा विष्णुश्च रुद्रश्च स्कन्दो वैश्रवणो यमः[3]॥
वैद्युतो जाठरश्चाग्निरैन्धनस्तेजसां पतिः । धर्मध्वजो वेदकर्ता वेदाङ्गो वेदवाहनः ॥ ३७
कृतं त्रेता द्वापरश्च कलिः सर्वामराश्रयः । कलाकाष्ठामुहूर्ताश्च क्षपा यामास्तथा क्षणाः ॥ ३८
संवत्सरकरोऽश्वत्थः कालचक्रो विभावसुः । पुरुषः शाश्वतो योगी व्यक्ताव्यक्तः सनातनः ३९
कालाध्यक्षः प्रजाध्यक्षो विश्वकर्मा तमोनुदः । वरुणः सागरोंऽशश्च[8][9] जीमूतो जिवनोऽरिहा ॥४०
भूताश्रयो भूतपतिः सर्वलोकनमस्कृतः । स्रष्टा संवर्तको वह्निः सर्वस्याऽऽदिरलोलुपः ॥ ४१
अनन्तः[10] कपिलो भानुः कामदः सर्वतोमुखः । जयो विशालो वरदः सर्व[11]भूतनिषेवितः ॥ ४२
मनः सुपर्णो[12] भूतादिः शीघ्रगः प्राणधारणः । धन्वन्तरिर्धूमकेतुरादिदेवोऽदितेः सुतः ॥ ४३
द्वादशात्मा रविर्दक्षः[13] पिता माता पितामहः । स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम् ॥ ४४
देहकर्ता प्रशान्तात्मा[14] विश्वात्मा विश्वतोमुखः । चराचरात्मा सूक्ष्मात्मा[15] मैत्रेयः करुणान्वितः ॥
एतद्वै कीर्तनीयस्य सूर्यस्यामिततेजसः । नाम्नामष्टशतं रम्यं मया प्रोक्तं द्विजोत्तमाः ॥ ४६

सुरगणपितृयक्षसेवितं ह्यसुरनिशाकरसिद्धवन्दितम् ।
वरकनकहुताशनप्रभं प्रणिपतितोऽस्मि हिताय भास्करम् ॥ ४७

सूर्योदये यः सुसमाहितः पठेत्स पुत्रदारान्धनरत्नसंचयान् ।
लभेत जातिस्मरतां नरः स तु स्मृतिं च मेधां च स विन्दते पराम् ॥ ४८

इमं स्तवं देववरस्य यो नरः प्रकीर्तये[16]च्छुद्धमनाः समाहितः ।
विमुच्यते शोकदवाग्निसागराल्लभेत कामान्मनसा[17] यथेप्सितान् ॥ ४९

इति श्रीमहापुराण आदिब्राह्मे स्वयंभ्वृषिसंवादे सूर्यनामाष्टोत्तरशतं नाम
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—२२७९

अथ चतुस्त्रिंशोऽध्यायः ।

ब्रह्मोवाच—

योऽसौ सर्वगतो देवस्त्रिपुरारिस्त्रिलोचनः । उमाप्रियकरो रुद्रश्चन्द्रार्धकृतशेखरः ॥ १
विद्राव्य विबुधान्सर्वान्सिद्धविद्याधरानृषीन् । गन्धर्वयक्षनागांश्च तथाऽन्यांश्च[18] समागतान् ॥ २
जघान पूर्वं दक्षस्य यजतो धरणीतले । यज्ञं समृद्धं रत्नाढ्यं सर्वसंभारसंभृतम् ॥ ३
यस्य प्रतापसंत्रस्ताः शक्राद्यास्त्रिदिवौकसः[19] । शान्तिं न लेभिरे विप्राः कैलासं[20] शरणं गताः[21] ॥४
स आस्ते तत्र वरदः शूलपाणिर्वृषध्वजः । पिनाकपाणिर्भगवान्दक्ष[22]यज्ञविनाशनः ॥ ५
महादेवो[23]ऽकले देशे कृत्तिवासा वृषध्वजः । एकाम्रके मुनिश्रेष्ठाः सर्वकामप्रदो हरः ॥ ६

---

१ क. सोमश्च । २ ग. °णोपमः । ३ ख. °मः । विकर्तनश्च ब्रध्नश्च त्वीश्वरस्ते° । ४ क. सत्यं । ५ ख. कल्किः । ६ ख. °श्च पक्षा मासास्त° । ७ क. °पा मासास्त° । ८ ग. °गरांश° । ९ ख. °रोऽम्भश्च । १० क. अन्तकः । ११ ग. °र्वधानुनि° । १२ क. सुवर्णो । १३ ग. °विर्दाक्षः । १४ क. ख. प्रसन्नात्मा । १५ क. ख. °त्रेण वपुषाऽन्वि° । १६ क. °येच्छान्तम° । १७ क. °सा सदेप्सि° । १८ ख. °त्रैलोक्यैश्च संस्तुत° । १९ क. °सः । न शर्म ले° । २० क. ग. पुनस्तं । २१ क. °ताः । यत्राऽऽस्ते वरदो देवः शू° । २२ क. ख. °क्षक्रतुवि° । २३ क. ख. °वोत्कले ।

मुनय ऊचुः—

किम[1]र्थं स भवो देवः सर्वभूतहिते रतः । जघान यज्ञं दक्षस्य देवैः सर्वैरलंकृतम् ॥ ७
न ह्यल्पं कारणं तत्र प्रभो मन्यामहे वयम् । श्रोतुमिच्छाम[2]हे ब्रूहि परं कौतूहलं हि नः ॥ ८

ब्रह्मोवाच—

दक्षस्याऽऽसन्नष्ट कन्या याश्चैवं प[3]तिसंगताः । स्वेभ्यो गृहेभ्यश्चाऽऽनीय ताः पिताऽभ्यर्चयद्गृहे ॥
ततस्त्वभ्य[4]र्चिता विप्रा न्यवसंस्ताः पितुर्गृहे । तासां ज्येष्ठा सती नाम पत्नी या [5]त्र्यम्बकस्य वै
नाऽऽजुहावाऽऽत्मजां तां वै दक्षो रुद्रमभिद्विषन्। अकरोत्संनतिं [6]दक्षे न च कांचिन्महे[7]श्वरः ११
जामाता श्वशुरे तस्मिन्स्वभावात्तेजसि स्थितः । ततो ज्ञात्वा सती सर्वास्तास्तु प्राप्ताः पितुर्गृहम्[8]
जगाम साऽप्यनाहूता सती तु स्वपितुर्गृहम् । ताभ्यो हीनां पिता चक्रे सत्याः पूजामसंमताम्
ततोऽब्रवीत्सा पितरं देवी क्रोधसमाकुला ॥ १३

सत्युवाच—

यवीयसीभ्यः श्रेष्ठाऽहं किं न पूजसि मां प्रभो । असत्कृतामवस्थां यः कृतवानसि गर्हिताम् ॥
अहं ज्येष्ठा वरिष्ठा च मां त्वं सत्कर्तुमर्हसि ॥ १४

ब्रह्मोवाच—

एवमुक्तोऽब्रवीदेनां दक्षः संरक्तलोचनः ॥ १५

दक्ष उवाच—

त्वत्तः श्रेष्ठा वरिष्ठाश्च पूज्या बालाः सुता मम। तासां ये चैव भर्तारस्ते मे बहुमताः सति॥१६
ब्रह्मिष्ठाश्च [10]व्रतस्थाश्च महायोगाः सुधार्मिकाः । गुणैश्चैवाधिकाः श्लाघ्याः सर्वे ते त्र्यम्ब[11]कात्सति
वसिष्ठोऽत्रिः पुलस्त्यश्च अङ्गिराः पुलहः क्रतुः । भृगुर्मरीचिश्च तथा श्रेष्ठा जामातरो मम ॥ १८
तैश्चापि स्पर्धते शर्वः सर्वे ते चैव तं प्रति । तेन त्वां न बुभूषामि प्रतिकूलो हि मे भवः ॥ १९
इत्युक्तवांस्तदा दक्षः संप्रमूढेन चेतसा । शापार्थमात्मनश्चैव येनोक्ता वै महर्षयः ॥
तथोक्ता पितरं सा वै क्रुद्धा देवी तमब्रवीत् ॥ २०

सत्युवाच—

वाङ्मनःकर्मभिर्यस्माददुष्टां मां विगर्हसि । तस्मात्त्यजाम्यहं देहमिमं तात तवाऽऽत्मजम् ॥ २१

ब्रह्मोवाच—

ततस्तेनापमानेन सती दुःखादमर्षिता । अब्रवीद्वचनं देवी नमस्कृत्य स्वयंभुवे ॥ २२

सत्युवाच—

येनाहमपदेहा वै पुनर्देहेन भास्वता । तत्राप्यहमसंमूढा संभूता धार्मिकी पुनः ॥
गच्छेयं धर्मपत्नीत्वं त्र्यम्बकस्यैव धीमतः ॥ २३

ब्रह्मोवाच—

तत्रैवाथ समासीना रुष्टाऽऽत्मानं समादधे । धारयामास चाऽऽग्नेयीं धारणामात्मनाऽऽत्मनि२४

---

१ क. ख. °र्थं भगवान्देवः । २ क. °हे ब्रह्मन्परं । ३ ग. °संमताः । ४ क. ख. °र्चिताः सर्वा निवसन्ति पि° । ५ क. शंकरस्य । ६ ख. दक्षो । ७ ख. °श्वरे । आजगामाप्यनाहू° । ८ क. ख. °संगता° । ९ क. °ष्ठा च पूज्या च । १० ख. श्रुतज्ञाश्च । ११ ख. °कादपि । व° ।

ततः स्वात्मानमुत्थाप्य वायुना समुदीरितः । सर्वाङ्गेभ्यो विनिःसृत्य वह्निर्भस्म चकार ताम् २५
तदुपश्रुत्य निधनं सत्या देव्याः स शूलधृक् । संवादं च तयोर्बुद्ध्वा याथातथ्येन शंकरः ॥
दक्षस्य च विनाशाय चुकोप भगवान्प्रभुः ॥ २६

श्रीशंकर उवाच—

यस्मादवमता दक्ष सहसैवाऽऽगता सती । प्रशस्ताश्चेतराः सर्वास्त्वत्सुता भर्तृभिः सह ॥ २७
तस्माद्वैवस्वते प्राप्ते पुनरेते महर्षयः । उत्पत्[2]स्यन्ति द्वितीये वै तव यज्ञे ह्ययोनिजाः ॥ २८
हुते वै ब्रह्मणः सत्रे चाक्षुषस्यान्तरे मनोः । अभिव्याहृत्य सप्तर्षीन्दक्षं सोऽभ्यशपत्पुनः ॥ २९
भविता मानुषो राजा चाक्षुषस्यान्तरे मनोः । प्राचीनबर्हिषः पौत्रः पुत्रश्चापि प्रचेतसः ॥ ३०
दक्ष इत्येव नाम्ना त्वं मारिषायां जनिष्यसि । कन्यायां[3] शाखिनां चैव प्राप्ते वै चाक्षुषान्तरे ३१
अहं तत्रापि ते विघ्नमाचरिष्यामि दुर्मते । धर्मकामार्थयुक्तेषु कर्मस्विह पुनः पुनः ॥ ३२
ततो वै व्याहृतो दक्षो रुद्रं सोऽभ्यशपत्पुनः ॥ ३३

दक्ष उवाच—

यस्मात्त्वं मत्कृते क्रूर ऋषीन्व्याहृतवानसि । तस्मात्सार्धं सुरैर्यज्ञे न त्वां यक्ष्यन्ति वै द्विजाः ३४
कृत्वाऽऽहुतिं तव क्रूर अपः स्पृशन्ति कर्मसु । इहैव वत्स्यसे लोके दिवं हित्वाऽऽयुगक्षयात् ॥
ततो देवैस्तु ते सार्धं न तु पूजा भविष्यति ॥ ३५

रुद्र उवाच—

चातुर्वर्ण्यं तु देवानां ते चाप्येकत्र भुञ्जते । न भोक्ष्ये सहितस्तैस्तु ततो भोक्ष्याम्यहं पृथक् ॥ ३६
सर्वेषां चैव लोकानामादिर्भूर्लोक उच्यते । तमहं धारयाम्येकः स्वेच्छया न तवाऽऽज्ञया ॥ ३७
तस्मिन्धृते सर्व(स्वर्ग)लोकाः सर्वे तिष्ठन्ति शाश्वताः । तस्मादहं वसामीह सततं न तवाऽऽज्ञया॥

ब्रह्मोवाच—

ततोऽभिव्याहृतो दक्षो रुद्रेणामिततेजसा । स्वायंभुवीं तनुं त्यक्त्वा उत्पन्नो मानुषेष्विह ॥ ३९
[*यदा गृहपतिर्दक्षो यज्ञानामीश्वरः प्रभुः । समस्तेनेह यज्ञेन सोऽयजद्दैवतैः सह ॥ ४०
अथ देवी सती यत्ते(जज्ञे) प्राप्ते वैवस्वतेऽन्तरे । मेनायां तामुमां देवीं जनयामास शैलराट् ॥ ४१
सा तु देवी सती पूर्वमासीत्पश्चादुमाऽभवत् । सहव्रता भवस्यैषा नैतया मुच्यते भवः ॥ ४२
यावदिच्छति संस्थानं प्रभुर्मन्वन्तरेष्विह] । मारीचं कश्यपं देवी यथाऽदितिरनुव्रता ॥ ४३
साऽर्थं नारायणं श्रीस्तु मघवन्तं शची यथा । विष्णुं कीर्तिरुषा सूर्यं वसिष्ठं चाप्यरुन्धती ॥ ४४
नैतांस्तु विजहत्येता भर्तॄन्देव्यः कथंचन । एवं प्राचेतसो दक्षो जज्ञे वै चाक्षुषेऽन्तरे ॥ ४५
प्राचीनबर्हिषः पौत्रः पुत्रश्चापि प्रचेतसाम् । दशभ्यस्तु प्रचेतोभ्यो मारिषायां पुनर्नृप ॥ ४६
जज्ञे रुद्राभिशापेन द्वितीयमिति नः श्रुतम् । भृग्वादयस्तु ते सर्वे जज्ञिरे वै महर्षयः ॥ ४७
आद्ये त्रेतायुगे पूर्वं मनोर्वैवस्वतस्य ह । देवस्य महतो यज्ञे वारुणीं बिभ्रतस्तनुम् ॥ ४८
इत्येषोऽनुशयो ह्यासी[4]त्तयोर्जात्यन्तरे गतः । प्रजापतेश्च दक्षस्य त्र्यम्बकस्य च धीमतः ॥ ४९

* इतःप्रभृति मन्वन्तरेष्विहेत्यन्तं क. ख. पुस्तकयोर्नास्ति ।

१ क. गते । २ क. °नोः । इति व्या° । ३ क. °यां सान्त्विनश्चैव । ख. °यां सात्वताश्चैव । ४ क. °सीत्तेषु तेष्व-न्तराऽन्तरा । प्र° । ५ ख. गते ।

तस्मान्नानुशयः कार्यो वरेष्विह कदाचन । जात्यन्तरगतस्यापि भावितस्य शुभाशुभैः ॥
जन्तोर्न भूतये ख्यातिस्तन्न कार्यं विजानता ॥ ५०

मुनय ऊचुः—

कथं रोषेण सा पूर्वं दक्षस्य दुहिता सती । त्यक्त्वा देहं पुनर्जाता गिरिराजगृहे प्रभो ॥ ५१
देहान्तरे कथं तस्याः पूर्वदेहो बभूव ह । भवेन सह संयोगः संवादश्च तयोः कथम् ॥ ५२
स्वयंवरः कथं वृत्तस्तस्मिन्महति जन्मनि । विवाहश्च जगन्नाथ सर्वाश्चर्यसमन्वितः ॥ ५३
तत्सर्वं विस्तराद्ब्रह्मन्वक्तुमर्हसि सांप्रतम् । श्रोतुमिच्छामहे पुण्यां कथां चातिमनोहराम् ॥ ५४

ब्रह्मोवाच—

शृणुध्वं मुनिशार्दूलाः कथां पापप्रणाशिनीम् । उमाशंकरयोः पुण्यां सर्वकामफलप्रदाम् ॥ ५५
कदाचित्स्वगृहात्प्राप्तं कश्यपं द्विपदां वरम् । अपृच्छद्धिमवान्वृत्तं लोके ख्यातिकरं हितम् ॥ ५६
केनाक्षयाश्च लोकाः स्युः ख्यातिश्च परमा मुने । तथैव चार्चनीयत्वं सत्सु तत्कथयस्व मे ॥ ५७

कश्यप उवाच—

अपत्येन महाबाहो सर्वमेतदवाप्यते । ममाऽऽख्यातिरपत्येन ब्रह्मणा ऋषिभिः सह ॥ ५८
किं न पश्यसि शैलेन्द्र यतो मां परिपृच्छसि । वर्तयिष्यामि यच्चापि यथादृष्टं पुराऽचल ॥ ५९
वाराणसीमहं गच्छन्नपश्यं संस्थितं दिवि । विमानं सुनवं दिव्यमनौपम्यं महर्धिमत् ॥ ६०
तस्याधस्तादार्तनादं गर्तस्थाने शृणोम्यहम् । तमहं तपसा ज्ञात्वा तत्रैवान्तर्हितः स्थितः ॥ ६१
अथागात्तत्र शैलेन्द्रे विप्रो नियमवाञ्शुचिः । तीर्थाभिषेकपूतात्मा परे तपसि संस्थितः ॥ ६२
अथ स व्रजमानस्तु व्याघ्रेणाऽऽभीषितो द्विजः । विवेश तं तदा देशं स गर्तो यत्र भूधर ॥ ६३
गर्तायां वीरणस्तम्बे लम्बमानांस्तदा मुनीन् । अपश्यदार्तो दुःखार्तांस्तानपृच्छच्च स द्विजः ॥ ६४

द्विज उवाच—

के यूयं वीरणस्तम्बे लम्बमाना ह्यधोमुखाः । दुःखिताः केन मोक्षश्च युष्माकं भविताऽनघाः ६५

पितर ऊचुः—

वयं ते कृतपुण्यस्य पितरः सपितामहाः । प्रपितामहाश्च क्लिश्यामस्तव दुष्टेन कर्मणा ॥ ६६
नरकोऽयं महाभाग गर्तरूपेण संस्थितः । त्वं चापि वीरणस्तम्बस्त्वयि लम्बामहे वयम् ॥ ६७
यावत्त्वं जीवसे विप्र तावदेव वयं स्थिताः । मृते त्वयि गमिष्यामो नरकं पापचेतसः ॥ ६८
यदि त्वं दारसंयोगं कृत्वाऽपत्यं गुणोत्तरम् । उत्पादयसि तेनास्मान्मुच्येम वयमेनसः ॥ ६९
नान्येन तपसा पुत्र तीर्थानां च फलेन च । एतत्कुरु महाबुद्धे तारयस्व पितॄन्भयात् ॥ ७०

कश्यप उवाच—

स तथेति प्रतिज्ञाय आराध्य वृषभध्वजम् । पितॄन्गर्तात्समुद्धृत्य गणपान्प्रचकार ह ॥ ७१
स्वयं रुद्रस्य दयितः सुवेशो नाम नामतः । संमतो बलवांश्चैव रुद्रस्य गणपोऽभवत् ॥ ७२
तस्मात्कृत्वा तपो घोरमपत्यं गुणवद्दृशम् । उत्पादयस्व शैलेन्द्र सुतां त्वं वरवर्णिनीम् ॥ ७३

---

१ क. °स्मान्न संश° । २ ख. °र्यो धीरे° । ३ क. °स्य सुरैरपि । ज° । ४ ख. °भैः । देहान्तरे कथं तस्य पुनर्देहं न मुञ्चति । वासना न जहात्येव देहान्तरगतेऽपि वा । दुःखं त्वनुशयात्यन्तस्तत्र कार्या विजानता । मु° । ५ क. पूर्णा । ६ ग. °रे पुनस्तस्याः कथं दे° । ७ ख. °स्याः पुनर्देहो । ८ ख. तपसैव । ९ क. °ख्यातिः परा तेन । १० ख. °नं स्वस्तिमद्दिव्यं मनोवेगं म° । ११ ख. °द्र वसिष्ठो नियमस्थितः । ती° ।

ब्रह्मोवाच—

स एवमुक्त्वा(क्त) ऋषिणा शैलेन्द्रो नियमस्थितः । तपश्चकाराप्यतुलं येन तुष्टिरभून्मम ॥ ७४
तदा तमुत्पपाताहं वरदोऽस्मीति चाब्रवम् । ब्रूहि तुष्टोऽस्मि शैलेन्द्र तपसाऽनेन सुव्रत ॥ ७५

हिमवानुवाच—

भगवन्पुत्रमिच्छामि गुणैः सर्वैरलंकृतम् । एवं वरं प्रयच्छस्व यदि तुष्टोऽसि मे[1] प्रभो ॥ ७६

ब्रह्मोवाच—

तस्य तद्वचनं श्रुत्वा गिरिराजस्य[2] भो द्विजाः । तदा तस्मै वरं चाहं दत्तवान्[3]मनसेप्सितम् ७७
कन्या भ[4]वित्री शैलेन्द्र[5] तपसाऽनेन सुव्रत । यस्याः प्रभावात्सर्वत्र कीर्तिमाप्स्यसि [6]शोभनाम् ७८
अर्चितः सर्वदेवानां तीर्थकोटिसमावृतः । पावनश्चैव[7] पुण्येन देवानामपि सर्वतः ॥ ७९
ज्येष्ठा च सा भवित्री ते [8]अन्ये चात्र ततः [9]शुभे ॥ ८०
*सोऽपि कालेन शैलेन्द्रो मेनायामुदपादयत् । अपर्णामेकपर्णां च तथा चैवैकपाटलाम् ॥ ८१
न्यग्रो[10]धमेकपर्णं तु [11]पाटलं चैकपाटलाम् । अशित्वा त्वेकप[12]र्णां तु अनिकेतस्तपोऽचरत् ॥ ८२
शतं वर्षसहस्राणां [13]दुश्चरं देवदानवैः । आहारमेकपर्णं तु एकपर्णा समाचरत् ॥ ८३
पाटलेन तथैकेन विदधे चैकपाटला । पूर्णे वर्षसहस्रे तु आहारं ताः प्रचक्रतुः ॥ ८४
अपर्णा तु निराहारा तां माता प्रत्यभाषत । निषेधयन्ती चोमेति मातृस्नेहेन दुःखिता ॥ ८५
सा तथोक्ता तया मात्रा देवी दुश्चरचारिणी । तेनैव नाम्ना लोकेषु विख्याता सुरपूजिता ॥ ८६
एत[14]त्तु त्रिकुमारीकं जगत्स्थावरजङ्गमम् । एतासां त[15]पसां वृत्तं यावद्भूमिर्धरिष्यति ॥ ८७
तपःशरीरास्ताः सर्वास्तिस्रो योगं समाश्रिताः । सर्वाश्चैव महाभागास्तथा च स्थिरयौवना[16]ः ८८
ता लोकमातरश्चैव ब्रह्मचारिण्य एव च । अनुगृह्णन्ति लोकांश्च तपसा [17]स्वेन सर्वदा ॥ ८९
उमा तासां वरिष्ठा च ज्येष्ठा च वरवर्णिनी । महायोगबलोपेता महादेवमुपस्थिता ॥ ९०
दत्तकश्चोशना तस्य पुत्रः स भृगुनन्दनः । आसीत्तस्यैकपर्णा तु देवलं सुषुवे सुतम् ॥ ९१
या तु तासां कुमारीणां तृतीया ह्येकपाटला । पुत्रं[18] सा तमलर्कस्य जैगीषव्यमुपस्थिता ॥ ९२
तस्याश्च शङ्खलिखितौ स्मृतौ पुत्रावयोनिजौ । उमा तु या मया तुभ्यं कीर्तिता वरवर्णिनी ॥ ९३
अथ तस्यास्तपोयोगात्त्रैलोक्यमखिलं तदा । प्रधूपितमिहाऽऽलक्ष्य वचस्तामहमब्रवम् ॥ ९४
देवि किं तपसा लोकांस्तापयिष्यसि शोभने । त्वया सृष्टमिदं सर्वं मा कृत्वा तद्विनाशय ॥ ९५
त्वं हि धारयसे लोकानिमान्सर्वान्स्वतेजसा । ब्रूहि किं ते जगन्मातः प्रार्थितं संप्रतीह नः ॥ ९६

देव्युवाच—

यदर्थं तपसो ह्यस्य चरणं मे पितामह । त्वमेव तद्विजानीषे ततः पृच्छसि किं पुनः ॥ ९७

ब्रह्मोवाच—

ततस्तामब्रवं चाहं यदर्थं तप्यसे शुभे । स त्वां स्वयमुपागम्य इहैव वरयिष्यति ॥ ९८

---

* एतस्मात्प्राक् 'एवमुक्त्वा ततश्चाहं तत्रैवान्तरधीयत' इत्यर्धमधिकं ग. पुस्तके ।

---

१ ख. नः । २ क. °स्य सुव्रताः । त° । ३ ख. °वान्मान° । ४ क. ख. भवतु । ५ क. ख. °न्द्र सुता ते वरवर्णिनी । य° । ६ क. ख. °ुष्कलाम् । ७ ख. °व देवानामृषीणाम° । ८ क. ख. अन्या चानु त° । ९ क. ख. प्रभो । १० क. °ग्रोधां चैकपर्णां तु । ११ क. ख. पाटलां । १२ ग. °पर्णं तु । १३ क. ख. दुष्करं । १४ ख. °तत्रिकुकु° । १५ क. ख. °पसा व्याप्तं या° । १६ क. ख. °नाः । त्रैलोक्यमा° । १७ ख. तेन । १८ क. ख. °त्रं शान्तमशोकस्य ।

शर्व एव पतिः श्रेष्ठः सर्वलोकेश्वरेश्वरः । वयं सदैव यस्येमे वश्या वै किंकराः शुभे ॥ ९९
स देवदेवः परमेश्वरः स्वयं स्वयंभुरायास्यति देवि तेऽन्तिकम् ।
उदाररूपो विकृता[1]दिरूपः समानरूपोऽपि न यस्य[2] कस्यचित् ॥ १००
महेश्वरः पर्वतलोकवासी चराचरेशः प्रथमोऽप्रमेयः ।
विनेन्दुना हीन्द्रसमानवर्चसा [3]विभीषणं रूपमिवाऽऽस्थितो यः ॥ १०१

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—२३८०

अथ पञ्चत्रिंशोऽध्यायः ।

ब्रह्मोवाच—

ततस्तामब्रुवन्देवास्तदा गत्वा तु सुन्दरीम् । देवि शीघ्रेण कालेन धूर्जटिर्नीललोहितः ॥ १
स भर्ता तव देवेशो भविता मा तपः कृथाः । ततः प्रदक्षिणीकृत्य देवा विप्रा गिरेः सुताम् ॥२
जग्मुश्चादर्शनं तस्याः सा चापि विरराम ह । सा देवी सूक्तमित्येवमुक्त्वा स्वस्याऽऽश्रमे शुभे ३
द्वारि जातमशोकं च समुपाश्रित्य चाऽऽस्थिता । अथागाचन्द्रतिलकस्त्रिदशार्तिहरो हरः ॥ ४
विकृतं रूपमास्थाय ह्रस्वो बाहुक एव च । विभग्ननासिको भूत्वा कुब्जः केशान्तपिङ्गलः ॥ ५
उवाच विकृतास्यश्च देवि त्वां वरयाम्यहम् । अथोमा योगसंसिद्धा ज्ञात्वा शंकरमागतम् ॥ ६
अन्तर्भावविशुद्धात्मा कृपानुष्ठानलिप्सया । तमुवाचार्घपाद्याभ्यां मधुपर्केण चैव ह ॥ ७
संपूज्य सुमनोभिस्तं ब्राह्मणं ब्राह्मणप्रिया ॥ ८

देव्युवाच—

भगवन्न स्वतन्त्राऽहं पिता मे त्वग्रणीर्गृहे । स प्रभुर्मम दाने वै कन्याऽहं द्विजपुंगव ॥ ९
गत्वा याचस्व पितरं मम शैलेन्द्रमव्ययम् । स चेद्ददाति मां विप्र तुभ्यं तदुचितं मम ॥ १०

ब्रह्मोवाच—

ततः स भगवान्देवस्तथैव विकृतः प्रभुः । उवाच शैलराजानं सुतां मे यच्छ शैलराट् ॥ ११
स तं विकृतरूपेण ज्ञात्वा रुद्रमथाव्ययम् । भीतः शापाच्च विमना इदं वचनमब्रवीत् ॥ १२

शैलेन्द्र उवाच—

भगवन्नावमन्येऽहं ब्राह्मणान्भुवि देवताः । मनीषितं तु यत्पूर्वं तच्छृणुष्व महामते ॥ १३
स्वयंवरो मे दुहितुर्भविता विप्रपूजितः । वरयेद्यं स्वयं तत्र स भर्ताऽस्या भविष्यति ॥ १४
तच्छ्रुत्वा शैलवचनं भगवान्वृषभध्वजः । देव्याः समीपमागत्य इदमाह महामनाः ॥ १५

शिव उवाच—

देवि पित्रा त्वनुज्ञातः स्वयंवर इति श्रुतिः । तत्र त्वं वरयित्री यं स ते भर्ता भवेदिति ॥ १६
तदापृच्छ्य गमिष्यामि दु[10]र्लभां त्वां वरानने । रूपवन्तं समुत्सृज्य वृणोष्यसदृशं कथम् ॥ १७

---

१ क. ख. °तातिरू°। २ ख. °स्य कुत्रचि°। ३ ग. विभूषणं। ४ ख. °ता तपसः क्षये । त° । ५ क. °त्मा क्रियानु°। ६ क. °यः । स । ७ ख. °व कृतवान्प्रभुः । ८ क. °णान्भूमिदे° । ९ क. ख. °र्ता किलानघे । त°। १० ख. °र्लभाऽसि व°।

ब्रह्मोवाच—

तेनोक्ता सा तदा तत्र भावयन्ती तदीरितम् । भावं च रुद्रनिहितं प्रसादं मनसस्तथा[1] ॥ १८

संप्राप्योवाच देवेशं मा तेऽभूद्[2]बुद्धिरन्यथा । अहं त्वां वरयिष्यामि नाद्भुतं[3] तु कथंचन ॥ १९

अथवा तेऽस्ति संदेहो मयि विप्र कथंचन । इहैव त्वां महाभाग वरयामि मनोगतम् ॥ २०

ब्रह्मोवाच—

गृहीत्वा स्तबकं सा तु हस्ताभ्यां तत्र संस्थिता । स्कन्धे शंभोः समाधाय देवी प्राह वृतोऽसि मे

ततः स भगवान्देवस्तया देव्या वृतस्तदा । उवाच तमशोकं वै वाचा संजीवयन्निव ॥ २२

शिव उवाच—

यस्मात्तव सुपुण्येण स्तबकेन वृतोऽस्म्यहम् । तस्मात्त्वं जरया त्यक्तस्त्वमरः संभविष्यसि ॥ २३

कामरूपी कामपुष्पः कामदो दयितो मम । सर्वाभरणपुष्पाढ्यः सर्व[4]पुष्पफलोपगः[5] ॥ २४

सर्वान्नभक्षकश्चैव अमृत[6]स्वाद एव च । सर्वगन्धश्च देवानां भविष्यसि दृढप्रियः ॥ २५

[*निर्भयः सर्वलोकेषु[7] भविष्यसि सुनिर्वृतः । आश्रमं वेद(चेम)मत्यर्थं चित्रकूटेति विश्रुतम्॥२६

यो हि यास्यति [8]पुण्यार्थी सोऽश्वमेधमवाप्स्यति । यस्तु तत्र मृतश्चापि ब्रह्मलोकं स गच्छति २७

यश्चात्र नियमै[9]र्युक्तः प्राणान्सम्यक्परित्यजेत्] । स [10]देव्यास्तपसा युक्तो महागणपतिर्भवेत् ॥२८

ब्रह्मोवाच—

एवमुक्त्वा[10] तदा देव आपृच्छ्य[11] हिमवत्सुताम् । अन्तर्दधे जगत्स्रष्टा सर्वभूतप[12] ईश्वरः ॥ २९

साऽपि देवी गते तस्मिन्भगवत्य[13]मितात्मनि । तत[14] एवोन्मुखी भूत्वा शिलायां संबभूव ह ॥ ३०

उन्मुखी सा भवे तस्मिन्महेशे जगतां प्रभौ । निशेव चन्द्ररहिता [15]न बभौ विमनास्तदा ॥ ३१

अथ शुश्राव शब्दं च बालस्याऽऽर्तस्य शैलजा । सरस्युदकसंपूर्णे समीपे चाऽऽश्रमस्य च॥ ३२

स कृत्वा बालरूपं तु देवदेवः स्वयं शिवः । क्रीडाहेतोः सरोमध्ये ग्राहग्रस्तोऽभवत्तदा ॥ ३३

योगमायां समास्थाय प्रपञ्चोद्भवकारणम् । तद्रूपं सरसो मध्ये कृत्वैवं समभाषत ॥ ३४

बाल उवाच—

त्रातु मां कश्चिदित्याह ग्राहेण हृतचेतसम् । धिक्कष्टं बाल एवाहमप्राप्तार्थमनोरथः ॥ ३५

प्रयामि निधनं वक्त्रे ग्राहस्यास्य दुरात्मनः । शोचामि न स्वकं देहं ग्राहग्रस्तः सुदुःखितः ॥३६

यथा शोचामि पितरं मातरं च त[16]पस्विनीम् । ग्राहगृहीतं मां श्रुत्वा प्राप्तं निधनमुत्सुकौ ॥ ३७

प्रियपुत्रा[17]वेकपुत्रौ प्राणान्नूनं त्यजिष्य[18]तः । अहो बत सुकष्टं वै योऽहं बालोऽकृताश्रमः ॥

अन्तर्ग्राहेण ग्रस्तस्तु यास्यामि निधनं किल ॥ ३८

ब्रह्मोवाच—

श्रुत्वा तु देवी तं नादं[19] विप्रस्याऽऽर्तस्य शोभना । उत्थाय प्रस्थिता तत्र यत्र तिष्ठत्यसौ द्विजः[20]॥

---

* धनुश्चिह्नान्तर्गतः पाठो नास्ति ख. पुस्तके ।

---

१ क. °था । देवी प्रोवा° । २ क. °द्धिरीदृशी । अ° । ३ ग. नान्यद्भुतं क° । ४ क. °वैरत्नफ° । ५ ख. °पुण्यफलोपमः । स° । ६ क. °तद्यव ए° । ग. °तस्वर ए° । ७ ख. °षु सर्वत्र चारिष्य° । ग. °षु चरिष्य° । ८ ख. यात्रार्थं । ९ ग. देवस्त° । १० ख. °क्त्वा वृक्षगजमशोकं हि° । ११ क. °च्छय गिरिजां द्रुतम् । १२ क. °तगणेश्व° । ख. °तमहेश्व° । १३ ख. °त्यमलात्म° । १४ ख. तदैव दुःखी भूत्वा सा सभायां संविवेश ह । १५ ख. सा । १६ क. मनस्विनीम् । १७ क. °त्रा तु सा नूनमद्य प्राणांस्त्यजि° । १८ क. °ष्यति । अ° । १९ ख. °दं बालस्याऽऽ° । २० ख. शिशुः ।

साऽपश्यदिन्दुवदना बालकं चारुरूपिणम् । ग्राहस्य मुखमापन्नं वेपमानमवस्थितम् ॥ ४०
सोऽपि ग्राहवरः श्रीमान्दृष्ट्वा देवीमुपागताम् । तं गृहीत्वा द्रुतं यातो मध्यं सरस एव हि ॥ ४१
स कृष्यमाणस्तेजस्वी नादमार्तं तदाऽकरोत् । अथाऽऽह देवी दुःखार्ता[1] बालं दृष्ट्वा ग्रहावृतम् ४२

पार्वत्युवाच—

ग्राहराज महासत्त्व बालकं ह्येकपुत्रकम् । विमुञ्चेमं महादंष्ट्र क्षिप्रं भीमपराक्रम ॥ ४३

ग्राह उवाच—

यो देवि दिवसे षष्ठे[2] प्रथमं समुपैति माम् । स आहारो मम पुरा विहितो लोककर्तृभिः ॥ ४४
सोऽयं मम महाभागे षष्ठेऽहनि गिरीन्द्रजे । ब्रह्मणा प्रेरितो नूनं नैनं मोक्ष्ये कथंचन ॥ ४५

देव्युवाच—

यन्मया हिमवच्छृङ्गे[3] चरितं तप उत्तमम् । तेन बालमिमं मुञ्च ग्राहराज नमोऽस्तु ते ॥ ४६

ग्राह उवाच—

मा व्ययस्तपसो देवि[4] भृशं बाले शुभानने । यद्ब्रवीमि कुरु श्रेष्ठे तथा मोक्षमवाप्स्यति ॥ ४७

देव्युवाच—

ग्राहाधिप वदस्वाऽऽशु यत्सतामविगर्हितम् । तत्कृतं नात्र संदेहो यतो मे ब्राह्मणाः प्रियाः ॥४८

ग्राह उवाच—

यत्कृतं वै तपः किंचिद्भवत्या स्वल्पमुत्तमम् । तत्सर्वं मे प्रयच्छाऽऽशु ततो मोक्षमवाप्स्यति ॥४९

देव्युवाच—

जन्मप्रभृति यत्पुण्यं महाग्राह कृतं मया । तत्ते सर्वं मया दत्तं बालं मुञ्च महाग्रह ॥ ५०

ब्रह्मोवाच—

प्रजज्वाल ततो ग्राहस्तपसा तेन भूषितः । आदित्य इव मध्याह्ने दुर्निरीक्षस्तदाऽभवत् ॥
उवाच चैवं तुष्टात्मा[5] देवीं लोकस्य धारिणीम् ॥ ५१

ग्राह उवाच—

देवि किं कृत्यमेतत्ते[6] सुनिश्चित्य महाव्रते । तपसोऽप्यर्जनं दुःखं तस्य त्यागो न शस्यते ॥ ५२
गृहाण तप एव त्वं बालं चेमं सुमध्यमे[7] । [*तुष्टोऽस्मि ते विप्रभक्त्या वरं तस्माद्ददामि ते ॥
सा त्वेवमुक्ता ग्राहेण[8] उवाचेदं महाव्रता] ॥ ५३

देव्युवाच—

[+देहेनापि मया ग्राह रक्ष्यो विप्रः प्रयत्नतः । तपः पुनर्मया प्राप्यं न प्राप्यो ब्राह्मणः पुनः]५४
सुनिश्चित्य महाग्राह कृतं बालस्य मोक्षणम् । न विप्रेभ्यस्तपः श्रेष्ठं श्रेष्ठा मे ब्राह्मणा मताः॥५५
दत्त्वा चाहं न गृह्णामि ग्राहेन्द्र विहितं हि ते । न हि कश्चिन्नरो ग्राह प्रदत्तं पुनराहरेत् ॥ ५६
दत्तमेतन्मया तुभ्यं नाऽऽददानि हि तत्पुनः । त्वय्येव रमतामेतद्बालश्चायं विमुच्यताम् ॥ ५७

---

* अयं श्लोको ग. पुस्तके नास्ति । + अयं श्लोको नास्ति क. ग. पुस्तकयोः ।

---

१ ख. दुःखार्ते । २ क. प्राप्ते । ३ क. °ङ्गे चीर्णं वै त° । ४ ख. °वि व्यर्थं भवतु शोभने । ५ क. ख. दुष्टात्मा । ६ क. °त्ते अनि° । ७ ग. °ध्यमम् । तु° । ८ क. °ण प्रत्युवाच म° ।

ब्रह्मोवाच—

तथोक्तस्तां प्रशस्याथ मुक्त्वा बालं *नमस्य च । देवीमादित्यावभासस्तत्रैवान्तरधीयत ॥ ५८
बालोऽपि सरसस्तीरे मुक्तो ग्राहेण वै तदा । स्वप्नलब्ध इवार्थौघस्तत्रैवान्तरधीयत ॥ ५९
तपसोऽपचयं मत्वा देवी हिमगिरीन्द्रजा । भूय एव तपः कर्तुमारेभे नियमास्थिता ॥ ६०
कर्तुकामां तपो भूयो ज्ञात्वा तां शंकरः स्वयम् । प्रोवाच वचनं [1]विप्रा मा कृथास्तप इत्युत ६१
मह्यमेतत्तपो देवि त्वया दत्तं महाव्रते । तत्तेनैवाक्षयं तुभ्यं भविष्यति सहस्रधा ॥ ६२
इति लब्ध्वा वरं देवी तपसोऽक्षयमुत्तमम् । स्वयंवरमुदीक्षन्ती तस्थौ प्रीता मुदा युता ॥ ६३
इदं पठेद्यो हि नरः सदैव बालानुभावाचरणं हि शंभोः ।
स [2]देहभेदं समवाप्य [3]पूतो भवेद्गणेशस्तु कुमारतुल्यः ॥ ६४

इति श्रीमहापुराणे ब्राह्मे स्वयंभ्वृषिसंवादे पार्वत्याः सत्त्वदर्शनं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

श्लोकानामादितः समष्ट्यङ्काः—२४४३

अथ षट्त्रिंशोऽध्यायः ।

ब्रह्मोवाच—

विस्तृते हिमवत्पृष्ठे विमानशतसंकुले । अभवत्स तु कालेन शैलपुत्र्याः स्वयंवरः ॥ १
अथ पर्वतराजोऽसौ हिमवान्[4]ध्यानकोविदः । दुहितुर्देवदेवेन ज्ञात्वा तदभिमन्त्रितम् ॥ २
जानन्नपि महाशैलः समयारक्षणेप्सया । स्वयंवरं ततो देव्याः सर्वलोकेष्ववघोषयत् ॥ ३
देवदानवसिद्धानां सर्वलोकनिवासिनाम् । वृणुयात्परमेशानं समक्षं यदि मे सुता ॥ ४
तदेव सुकृतं श्लाघ्यं ममाभ्युदयसंमतम् । इति संचिन्त्य शैलेन्द्रः कृत्वा हृदि महेश्वरम् ॥ ५
आब्रह्मकेषु देवेषु देव्याः शैलेन्द्रसत्तमः । कृत्वा रत्नाकुलं देशं स्वयंवरमचीकरत् ॥ ६
अथैवमाघोषितमात्र एव स्वयंवरे तत्र नगेन्द्रपुत्र्याः ।
देवादयः सर्वजगन्निवासाः समाययुस्तत्र गृहीतवेशाः ॥ ७
प्रफुल्लपद्मासनसंनिविष्टः सिद्धैर्वृतो योगिभिरप्रमेयैः ।
विज्ञापितस्तेन महीध्रराज्ञाऽऽगतस्तदाऽहं त्रिदिवैरुपेतः ॥ ८
अक्ष्णां सहस्रं सुरराट्स बिभ्रद्दिव्याङ्गहारस्रगुदाररूपः ।
ऐरावतं सर्वगजेन्द्रमुख्यं स्रवन्मदासारकृतप्रवाहम् ॥ ९
[5]आरुह्य सर्वामरराट्स वज्रं बिभ्रत्समागात्पुरतः सुराणाम् ।
तेजःप्रभावाधिकतुल्यरूपी प्रोद्भासयन्सर्वदिशो विवस्वान् ॥ १०
हैमं विमानं सवलत्पताकमारूढ आगात्त्वरितं जवेन ।
मणिप्रदीप्तोज्ज्वलकुण्डलश्च वह्न्यर्कतेजःप्रतिमे विमाने ॥ ११

---

* आर्षत्वात्कथंचित्साध्यम् ।

---

१ क. भूयो । २ क. देवपूज्यः स॰ । ३ क. मार्त्ति । ४ क. ॰वाञ्ज्ञानिको॰ । ५ क. आरुढके॰ ।

समभ्यगात्कश्यपसूनुरेक आदित्यमध्याद्भगनामधारी ।
पीनाङ्गयष्टिः सुकृताङ्गहारतेजोबलाज्ञासदृशप्रभावः ॥ १२
दण्डं समागृह्य कृतान्त आगादारुह्य भीमं महिषं जवेन ।
महामही[1]ध्रोच्छ्रयपीनगात्रः स्वर्णादिरत्नाञ्चितचारुवेशः ॥ १३
समीरणः सर्वजगद्विभर्ता विमानमारुह्य समभ्यगाद्धि ।
संतापयन्सर्वसुरासुरेशांस्तेजोधिकस्तेजसि संनिविष्टः ॥ १४
वह्निः समभ्येत्य सुरेन्द्रमध्ये ज्वलन्प्रतस्थौ वरवेशधारी ।
नानामणिप्रज्वलिताङ्गयष्टिर्जगद्वरं दिव्यविमानमग्र्यम् ॥ १५
आरुह्य सर्वद्रविणाधिपेशः स राजराजस्त्वरितोऽभ्यगाच्च ।
आप्याययन्सर्वसुरासुरेशान्कान्त्या च वेशेन च चारुरूपः ॥ १६
ज्वलन्महारत्नविचित्ररूपं विमानमारुह्य शशी समायात् ।
श्यामाङ्गयष्टिः सुविचित्रवेशः सर्वाङ्ग आबद्धसुगन्धिमाल्यः ॥ १७
तार्क्ष्यं समारुह्य महीध्रकल्पं गदाधरोऽसौ त्वरितः समेतः ।
अथाश्विनौ चापि भिषग्वरौ द्वावेकं विमानं त्वरयाऽधिरुह्य ॥ १८
मनोहरौ प्रज्वलचारुवेशौ आजग्मतुर्देववरौ सुवीरौ ।
सहस्रनागः स्फुरदग्निवर्णं बिभ्रत्तदानीं ज्वलनार्कतेजाः ॥ १९
सार्धं स नागैरपरैर्महात्मा विमानमारुह्य समभ्यगाच्च ।
दितेः सुतानां च महासुराणां वह्न्यर्कशक्रानिलतुल्यभासाम् ॥ २०
वरानुरूपं प्रविधाय वेशं वृन्दं समागात्पुरतः सुराणाम् ।
गन्धर्वराजः स च चारुरूपी दिव्याङ्गदो दिव्यविमानचारी ॥ २१
गन्धर्वसंघैः सहितोऽप्सरोभिः शक्राज्ञया तत्र समाजगाम ।
अन्ये च देवास्त्रिदिवात्तदानीं पृथक्पृथक्चारुगृहीतवेशाः ॥ २२
आजग्मुरारुह्य विमानपृष्ठं गन्धर्वयक्षोरगकिंनराश्च ।
शचीपतिस्तत्र सुरेन्द्रमध्ये रराज राजाऽधिकलक्ष्यमूर्तिः ॥ २३
आज्ञाबलैश्वर्यकृतप्र[3]मोदः स्वयंवरं तं समलंचकार ।
हेतुस्त्रिलोकस्य जगत्प्रसूतेर्माता च तेषां ससुरासुराणाम् ॥ २४
पत्नी च शंभोः पुरुषस्य धीमतो गीता पुराणे प्रकृतिः परा या ।
दक्षस्य कोपाद्धिमवद्गृहं सा कार्यार्थमायात्त्रिदिवौकसां हि ॥ २५
विमानै[4]पृष्ठे मणिहेमै[5]जुष्टे स्थिता वलच्चामरवीजिताङ्गी ।
[6]सर्वर्तुपुष्पां [7]सुसुगन्धमालां प्रगृह्य देवी प्रसभं प्रत[8]स्थे ॥ २६

ब्रह्मोवाच—

मालां प्रगृह्य देव्यां तु स्थितायां देवसंसदि । शक्राद्यैरागतैर्देवैः स्वयंवर उपागते ॥ २७

---

१ क. °ध्रोच्छ्रितपी° । २ क. तदानीम् । ३ ग. °मोहो वृथाऽधिकं यत्नममां च° । ४ क. °नत्रयें म° । ५ क. °मपृष्ठे स्थि° । ६ क. सुगन्धपुष्पां । ख. अनर्घ्यपुष्पां । ७ ख. वरगन्धमालां । ८ क. °स्थे । मा° ।

देव्या जिज्ञासया शंभुर्भूत्वा पञ्चशिखः शिशुः । उत्सङ्गतलसंसुप्तो बभूव सहसा विभुः[1] ॥ २८
ततो ददर्श तं देवी शिशुं पञ्चशिखं स्थितम् । ज्ञात्वा तं समवध्यानाज्जगृहे[2] प्रीतिसंयुता[3] ॥ २९
अथ सा शुद्धसंकल्पा काङ्क्षितं प्राप्य सत्पतिम्[4] । निवृत्ता च तदा तस्थौ कृत्वा सा हृदि तं विभुम्
ततो दृष्ट्वा शिशुं देवा देव्या उत्सङ्गवर्तिनम् । कोऽयमत्रेति संमन्त्र्य चुक्रुशुर्भृशमोहिताः[5] ॥ ३१
वज्रमाहारयत्तस्य बाहुमुत्क्षिप्य वृत्रहा । स बाहुरुत्थितस्तस्य[6] तथैव समतिष्ठत ॥ ३२
स्तम्भितः शिशुरूपेण[7] देवदेवेन शंभुना । वज्रं[8] क्षेप्तुं न शशाक वृत्रहा चलितुं न च ॥ ३३
भगो नाम ततो देव आदित्यः काश्यपो बली । उत्क्षिप्य (चिक्षेप) आयुधं दीप्तं छेत्तुमिच्छन्विमोहितः
तस्यापि भगवान्बाहुं तथैवास्तम्भयत्तदा । बलं तेजश्च योगश्च तथैवास्तम्भयद्विभुः ॥ ३५
शिरः प्रकम्पयन्विष्णुः शंकरं समवैक्षत । अथ तेषु स्थितेष्वेवं मन्युमत्सु सुरेषु च ॥ ३६
अहं परमसंविग्नो ध्यानमास्थाय सादरम् । बुद्धवान्देवदेवेशमुमोत्सङ्गे समास्थितम् ॥ ३७
ज्ञात्वाऽहं परमेशानं शीघ्रमुत्थाय सादरम् । ववन्दे चरणं शंभोः स्तुतवांस्तमहं द्विजाः ॥ ३८
पुराणैः सामसंगीतैः[9] पुण्याख्यैर्गुह्यनामभिः । अजस्त्वमजरो देवः स्रष्टा विभुः पराऽपरम्[10] ॥ ३९
प्रधानं पुरुषो यस्त्वं ब्रह्म ध्येयं तदक्षरम्[11] । अमृतं परमात्मा च ईश्वरः कारणं महत् ॥ ४०
ब्रह्मसृक्प्रकृतेः स्रष्टा सर्वकृत्प्रकृतेः परः । इयं च प्रकृतिर्देवी सदा ते सृष्टिकारणम् ॥ ४१
पत्नीरूपं समास्थाय जगत्कारणमागता । नमस्तुभ्यं महादेव देव्या वै सहिताय च ॥ ४२
प्रसादात्तव देवेश नियोगाच्च मया प्रजाः । देवाद्यास्तु इमाः सृष्टा मूढास्त्वद्योगमायया ॥ ४३
कुरु प्रसादमेतेषां यथापूर्वं भवन्त्विमे । तत एवमहं विप्रा विज्ञाप्य परमेश्वरम् ॥ ४४
स्तम्भितान्सर्वदेवांस्तानिदं चाहं तदोक्तवान् । मूढाश्च देवताः सर्वा नैनं बुध्यत शंकरम् ॥ ४५
गच्छध्वं शरणं शीघ्रमेनमेव[12] महेश्वरम् । सार्धं मयैव देवेशं परमात्मानमव्ययम् ॥ ४६
ततस्ते स्तम्भिताः सर्वे तथैव त्रिदिवौकसः । प्रणेमुर्मनसा सर्वं भावशुद्धेन चेतसा ॥ ४७
अथ तेषां प्रसन्नोऽभूद्देवदेवो महेश्वरः । यथापूर्वं चकाराऽऽशु देवतानां तनूस्तदा ॥ ४८
तत एवं प्रवृत्ते तु सर्वदेवनिवारणे । वपुश्चकार देवेशस्त्र्यक्षं परममद्भुतम् ॥ ४९
तेजसा तस्य ते ध्वस्ताश्चक्षुः सर्वे न्यमीलयन् । तेभ्यः स परमं चक्षुः स्ववपुर्दृष्टिशक्तिमत् ॥ ५०
प्रादात्परमदेवेशमपश्यंस्ते तदा विभुम् । ते दृष्ट्वा परमेशानं तृतीयेक्षणधारिणम् ॥ ५१
शक्राद्या मेनिरे देवाः सर्व एव सुरेश्वराः । तस्य देवी तदा हृष्टा समक्षं त्रिदिवौकसाम् ॥ ५२
पादयोः स्थापयामास स्रज्बालाममितद्युतिः[13] । साधु साध्विति ते होचुः सर्वे देवाः पुनर्विभुम् ५३
सह देव्या नमश्चक्रुः शिरोभिर्भूतलाश्रितैः । अथास्मिन्नन्तरे विप्रास्तमहं दैवतैः सह ॥ ५४
हिमवन्तं महाशैलमुक्तवांश्च महाद्युतिम् । श्लाघ्यः पूज्यश्च वन्द्यश्च सर्वेषां त्वं महानसि ॥ ५५
शर्वेण सह संबन्धो यस्य तेऽभ्युदयो महान् । क्रियतां चारुरुद्वाहः किमर्थं स्थीयते[14] परम् ॥
ततः प्रणम्य हिमवांस्तदा मां प्रत्यभाषत ॥ ५६

---

१ क. ख. °भुः । अकस्मादेव तं । २ ग. °ज्जहृषे प्री° । ३ क. °ता । तपसः शु° । ४ क. सत्कृतम् । ५ ग. °शमा-न्विताः । ६ क. °हुस्तस्य चोत्क्षिप्तस्तथै° । ७ ख. शिशुवेशेन । ८ ग. रुद्रं । ९ क. ख. °मगैर्मन्त्रैः पु° । १० क. परावरः । ११ क. चराचरम् । १२ क. शीघ्रं देवेशं शूलपाणिनम् । १३ क. °तैः । एतस्मि° । १४ क. म्लायते ।

हिमवानुवाच—

त्वमेव कारणं देव यस्य सर्वोदये मम । प्रसादः सहसोत्पन्नो हेतुश्चापि त्वमेव हि ॥
उद्वाहस्तु यदा यादृक्तद्वि(क्तं वि)धत्स्व पितामह ॥ ५७

ब्रह्मोवाच—

तत एवं वचः श्रुत्वा गिरिराजस्य भो द्विजाः । उद्वाहः क्रियतां देव इत्यहं चोक्तवान्विभुम् ५८
मामाह शंकरो देवो यथेष्टमिति लोकपः । तत्क्षणाच्च ततो विप्रा अस्माभिर्निर्मितं पुरम् ॥ ५९
उद्वाहार्थं महेशस्य नानारत्नोपशोभितम् । रत्नानि मणयश्चित्रा हेममौक्तिकमेव च ॥ ६०
मूर्तिमन्त उपागम्य अलंचक्रुः पुरोत्तमम् । चित्रा मारकती भूमिः सुवर्णस्तम्भशोभिता ॥ ६१
भास्वत्स्फटिकभित्तिश्च मुक्ताहारप्रलम्बिता । तस्मिन्द्वारि पुरे रम्य उद्वाहार्थं विनिर्मिता ॥ ६२
शुशुभे देवदेवस्य महेशस्य महात्मनः । सोमादित्यौ समं तत्र तापयन्तौ महामणी ॥ ६३
सौरभेयं मनोरम्यं गन्धमादाय मारुतः । प्रववौ सुखसंस्पर्शो भवभक्तिं प्रदर्शयन् ॥ ६४
समुद्रास्तत्र चत्वारः शक्राद्याश्च सुरोत्तमाः । देवनद्यो महानद्यः सिद्धा मुनय एव च ॥ ६५
गन्धर्वाप्सरसः सर्वे नागा यक्षाः सराक्षसाः । औदकाः खेचराश्चान्ये किंनरा देवचारणाः ६६
तुम्बुरुर्नारदो हाहा हूहूश्चैव तु सामगाः । रम्याण्यादाय वाद्यानि तत्राऽऽजग्मुस्तदा पुरम् ॥ ६७
ऋषयस्तु कथास्तत्र वेदगीतास्तपोधनाः । पुण्यान्वैवाहिकान्मन्त्राञ्जेपुः संहृष्टमानसाः ॥ ६८
जगतो मातरः सर्वा देवकन्याश्च कृत्स्नशः । गायन्ति हर्षिताः सर्वा उद्वाहे परमेष्ठिनः ॥ ६९
ऋतवः षट्समं तत्र नानागन्धसुखावहाः । उद्वाहः शंकरस्येति मूर्तिमन्त उपस्थिताः ॥ ७०
नीलजीमूतसंकाशैर्मन्द्रध्वनिप्रहर्षिभिः । केकायमानैः शिखिभिर्नृत्यमानैश्च सर्वशः ॥ ७१
विलोलपिङ्गलस्पष्टविद्युल्लेखाविहासिता । कुमुदापीडशुक्लाभिर्बलाकाभिश्च शोभिता ॥ ७२

प्रत्यग्रसंजातशिलीन्ध्रकन्दलीलताद्रुमाद्युद्गतपल्लवा शुभा ।
शुभाम्बुधाराप्रणयप्रबोधितैर्महालसैर्भेकगणैश्च नादिता ॥ ७३
प्रियेषु मानोद्धतमानसानां मनस्विनीनामपि कामिनीनाम् ।
मयूरकेकाभिरुतैः क्षणेन मनोहरैर्मानविभङ्गहेतुभिः ॥ ७४
[*तथा विवर्णोज्ज्वलचारुमूर्तिना शशाङ्कलेखाकुटिलेन सर्वतः ।
पयोदसंघातसमीपवर्तिना महेन्द्रचापेन भृशं विराजिता] ॥ ७५
विचित्रपुष्पाम्बुभवैः सुगन्धिभिर्घनाम्बुसंपर्कतया सुशीतलैः ।
विकम्पयन्ती पवनैर्मनोहरैः सुराङ्गनानामलकावलीः शुभाः ॥ ७६
[+ गर्जत्पयोदस्थगितेन्दुबिम्बा नवाम्बुसिक्तोदकचारुदूर्वा ।
निरीक्षिता सादरमुत्सुकाभिर्निश्वासधूम्रं पथिकाङ्गनाभिः] ॥ ७७

---

* अयं श्लोको नास्ति ख. पुस्तके । + अयं श्लोकः ख. पुस्तके नास्ति ।

---

१ ख. °म् । विरराज तदा भू° । २ क. °न्धर्वाः किंनराः स° । ३ क. खादकाः । ख. भूधराः । ४ क. °ग्मुर्गिरेः पु° । ५ क. °कन्याः सहस्रशः । ६ क. ख. उद्वाहे । ७ क. °रस्येह मू° । ८ ख. °शैरक्ताकारैः प्रदर्शितैः । के° । ९ क. °विनासिता । १० क. कुसुमापी° । ११ ख. °दाकरशु° । १२ ग. °था ।त्रिव° । १३ क. °पुष्पाभरणैः सु° । ग. °पुष्पस्य रसैः सु° ।

हंसनूपुरशब्दाढ्या समुन्नतपयोधरा । चलद्विद्युल्लताहारा स्पष्टपद्मविलोचना ॥ ७८

अलितजलदधीरध्वानवित्रस्तहंसा
विमलसलिलधारोत्पातनम्रोत्पलाग्रा ।
सुरभिकुसुमरेणुक्लृप्तसर्वाङ्गशोभा
गिरिदुहितृविवाहे प्रावृडाविर्बभूव ॥ ७९

मेघकञ्चुकनिर्मुक्ता पद्मकोशोद्भवस्तनी[4] । हंसनूपुरनिह्रादा सर्वसस्यदिगन्तरा[5] ॥ ८०
विस्तीर्णपुलिनश्रोणी कूजत्सारसमेखला । प्रफुल्लेन्दीवरश्यामविलोचनमनोहरा ॥ ८१
पक्वबिम्बाधरपुटा कुन्ददन्तप्रहासिनी । [*नवश्यामलताश्यामरोमराजिगुरस्कृता ॥ ८२
चन्द्रांशुहारवर्गेण कण्ठोरस्थलगामिना] । प्रह्लादयन्ती चेतांसि सर्वेषां त्रिदिवौकसाम् ॥ ८३
समदालिकुलोद्गीतमधुरस्वरभाषिणी । चलत्कुमुदसंघातचारुकुण्डलशोभिनी ॥ ८४
रक्ताशोकप्रशाखोत्थपल्लवाङ्गुलिधारिणी । तत्पुष्पसंचयमयैर्वासोभिः समलंकृता ॥ ८५
रक्तोत्पलाग्रचरणा जातीपुष्पनखावली । कदलीस्तम्भवामोरूः शशाङ्कवदना तथा ॥ ८६
सर्वलक्षणसंपन्ना सर्वालंकारभूषिता । प्रेम्णा स्पृशति कान्तेव सानुरागा मनोरमा ॥ ८७

निर्मुक्तासितमेघकञ्चुकपटा पुर्णेन्दुबिम्बानना
नीलाम्भोजविलोचना रविकरप्रोद्भिन्नपद्मस्तनी ।
नानापुष्परजःसुगन्धिपवनप्रह्लादनी चेतसां
तत्राऽऽसीत्कलहंसनूपुररवा देव्या विवाहे शरत् ॥ ८८

अत्यर्थशीतलाम्भोभिः प्लावयन्तौ दिशः सदा । ऋतू हेमन्तशिशिरौ आजग्मतुरतिद्युती ॥ ८९
ताभ्यामृतुभ्यां संप्राप्तो[10] [+हिमवान्स नगोत्तमः । प्रालेयचूर्णवर्षिभ्यां क्षिप्रं रौप्यहरो बभौ[11] ॥ ९०
तेन प्रालेयवर्षेण घनेनैव हिमालयः । अगाधेन तदा रेजे क्षीरोद इव सागरः ॥ ९१
ऋतुपर्यायसंप्राप्तो] बभूव स महागिरिः । साधूपचारात्सहसा कृतार्थ[12] इव दुर्जनः ॥ ९२
प्रालेयपटलच्छन्नैः शृङ्गैस्तु शुशुभे नगः । छत्रैरिव महाभागैः पाण्डरैः पृथिवीपतिः ॥ ९३

मनोभवोद्रेककराः[13] सुराणां[14] सुराङ्गनानां च मुहुः समीराः[15] ।
स्वच्छाम्बुपूर्णाश्च[16] तथा नलिन्यः पद्मोत्पलानां कुसुमैरुपेताः ॥ ९४

विवाहे गुरुकन्याया वसन्तः समगादृतुः ॥ ९५

ईषत्समुद्भिन्नपयोधराग्रा नार्यो यथा रम्यतरा बभूवुः ।
नात्युष्णशीतानि[17] पयःसरांसि[18] किञ्जल्कचूर्णैः कपिलीकृतानि ॥
चक्राह्वयुग्मैरुपनादितानि[19] ययुः प्रहृष्टाः सुरदन्तिमुख्याः ॥ ९६

प्रियङ्गूश्चूततरवश्चूतांश्चापि प्रियंगवः । तर्जयन्त इवान्योन्यं मञ्जरीभिश्चकाशिरे ॥ ९७

---

* अयं श्लोकः ख. पुस्तके नास्ति । + धनुश्चिह्नान्तर्गतं नास्ति क. पुस्तके ।

---

१ ख. °रा त्वतिश्यामत्रि° । २ ख. °लाक्षी । मु° । ३ क. °णुक्लिन्नस° । ४ क. °कोशे वपुःस्त° । ५ ग. °दा शरद्रम्य- दि° । ६ ख. °गम्बरा । ७ क. °लशालिनी । ८ ख. °त्पलप्रावर° । ९ ग. °ना लीला° । १० क. संत्राप्तो । ११ ख. °भौ । हिमसंघप्रव° । १२ ग. हृतार्थ । १३ ग. °वोद्वेगक° । १४ ख. °णां नगाङ्ग° । १५ क. समीरणाः । ख. सुचित्राः । १६ ग. °म्बुपर्णा° । १७ ख. °नि दिवः पयांसि । १८ ख. सरःपयांसि । १९ क. °पलाञ्छिता° ।

हिमशृङ्गेषु शुक्लेषु तिलकाः कुसुमोत्कराः । शुशुभुः कार्यमुद्दिश्य वृद्धा इव समागताः ॥ ९८
फुल्लाशोकलतास्तत्र रेजिरे शालसंश्रिताः । कामिन्य इव कान्तानां कण्ठालम्बितबाहवः ॥ ९९
तस्मिन्नृतौ शुभ्रकदम्बनीपास्तालाः स्तमालाः सरलाः कपित्थाः ॥ १००
अशोकसर्जार्जुनकोविदाराः पुंनागनागेश्वरकार्णिकाराः ।
लवङ्गतालागुरुसप्तपर्णा न्यग्रोधशोभाञ्जननारिकेलाः ॥ १०१
वृक्षास्तथाऽन्ये फलपुष्पवन्तो दृश्या बभूवुः सुमनोहराङ्गाः ।
जलाशयाश्चैव सुवर्णतोयाश्चक्राङ्ककारण्डवहंसजुष्टाः ॥ १०२
कोयष्टिदात्यूहबलाकयुक्ता दृश्यास्तु पद्मोत्पलमीनपूर्णाः ।
खगाश्च नानाविधभूषिताङ्गा दृश्यास्तु वृक्षेषु सुचित्रपक्षाः ॥ १०३
क्रीडासु युक्तानथ तर्जयन्तः कुर्वन्ति शब्दं मदनेरिताङ्गाः ।
तस्मिन्गिरावद्रिसुताविवाहे ववुश्च वाताः सुखशीतलाङ्गाः ॥ १०४
पुष्पाणि शुभ्राण्यपि पातयन्तः शनैर्नगेभ्यो मलयाद्रिजाताः ।
तथैव सर्वे ऋतवश्च पुण्याश्चकाशिरेऽन्योन्यविमिश्रिताङ्गाः ॥ १०५
येषां सुलिङ्गानि च कीर्तितानि ते तत्र आसन्सुमनोज्ञरूपाः ॥ १०६
[*समदालिकुलोद्गीतशिलाकुसुमसंचयैः । परस्परं हि मालत्यो भावयन्त्यो विरेजिरे] ॥ १०७
नीलानि नीलाम्बुरुहैः पयांसि गौराणि गौरैश्च मृणालदण्डैः ।
रक्तैश्च रक्तानि भृशं कृतानि मत्तद्विरेफावलिजुष्टपत्रैः ॥ १०८
हैमानि विस्तीर्णजलेषु केषुचिन्निरन्तरं चारुतराणि केषुचित् ।
वैदूर्यनालानि सरःसु केषुचित्प्रजज्ञिरे पद्मवनानि सर्वतः ॥ १०९
वाप्यस्तत्राभवन्रम्याः कमलोत्पलपुष्पिताः । नानाविहङ्गसंजुष्टा हैमसोपानपङ्क्तयः ॥ ११०
शृङ्गाणि तस्य तु गिरेः कर्णिकारैः सुपुष्पितैः । समुच्छ्रितान्यविरलैर्हैमानीव बभुर्द्विजाः ॥ १११
ईषद्विभिन्नकुसुमैः पाटलैश्चापि पाटलाः । संबभूवुर्दिशः सर्वाः पवनाकम्पिमूर्तिभिः ॥ ११२
[+कृष्णार्जुना दशगुणा नीलाशोकमहीरुहाः । गिरौ ववृधिरे फुल्लाः स्पर्धयन्तः परस्परम् ११३
चारुरावविजुष्टानि किंशुकानां वनानि च । पर्वतस्य नितम्बेषु सर्वेषु च विरेजिरे] ॥ ११४
*तमालगुल्मैस्तस्याऽऽसीच्छोभा हिमवतस्तदा । नीलजीमूतसंघातैर्निलीनैरिव संधिषु ॥ ११५
निकामपुष्पैः सुविशालशाखैः समुच्छ्रितैश्चन्दनचम्पकैश्च ।
प्रमत्तपुंस्कोकिलसंप्रलापैर्हिमाचलोऽतीव तदा रराज ॥ ११६

---

* अयं श्लोको ग. पुस्तके नास्ति । + इतोऽग्रेतनं श्लोकद्वयं नास्ति ग. पुस्तके । * अत्र 'तमालवृक्षनिवहैरशोभत हिमाद्रिभूः' इत्यर्धमधिकं ख. पुस्तके ।

---

१ क. हिमालयस्य शृङ्गेषु । २ ख. कुसुमाकराः । ३ क. करालᐤ । ४ ग. ᐤतमूर्तयः । तᐤ । ५ क. ग. दृश्यन्ति सर्वत्र मᐤ । ६ क. ग. दृश्यन्ति । ७ क. ग. दृश्यान्ति । ८ ख. ᐤडाप्रयुक्तास्त्वथ । ९ ग. ᐤक्तास्त्वथ । १० ख. पत्राण्यथ । ११ क. ᐤङ्गमयुता हैᐤ । १२ ग. ᐤसंघुष्टा । १३ क. ᐤषद्भिन्नᐤ । १४ क. ᐤवतः शुभा । नीᐤ । १५ ख. सानुषु ।

श्रुत्वा शब्दं[1] मृदुमदकलं सर्वतः कोकिलानां
चञ्चत्पक्षाः समधुरतरं नीलकण्ठा विनेदुः ।
तेषां शब्दैरुपचितबलः [2]पुष्पचापेषुहस्तः
सज्जीभूतस्त्रिदशवनिता वेद्धुमङ्गेष्वनङ्गः ॥ ११७

पटुः सूर्यातपश्चापि प्रायशोऽल्प(ल्पो) जलाशयः । देवीविवाहसमये ग्रीष्म आगाद्धिमाचलम् ॥
स चापि तरुभिस्तत्र बहुभिः कुसुमोत्करैः । शोभयामास शृङ्गाणि प्रालेयाद्रेः समन्ततः ॥ ११९
तथाऽपि च गिरौ तत्र वायवः सुमनोहराः । ववुः[3] पाटलविस्तीर्णकदम्बार्जुनगन्धिनः ॥ १२०
वाप्यः प्रफुल्लपद्मौघकेसरारुणमूर्तयः । अभवंस्तटसंघु(जु)ष्टफलहंसकदम्बकाः ॥ १२१
तथा कुरबकाश्चापि कुसुमापाण्डुमूर्तयः । सर्वेषु नगशृङ्गेषु भ्रमरावलिसेविताः ॥ १२२
बकुलाश्च नितम्बेषु विशालेषु महीभृतः । उत्ससर्ज मनोज्ञानि कुसुमानि समन्ततः ॥ १२३

इति कुसुमविचित्रसर्ववृक्षा विविधविहङ्गमनादरम्यदेशाः ।
हिमगिरितनयाविवाहभूत्यै[4] षडुपययुर्ऋतवो मुनिप्रवीराः ॥ १२४

तत एवं प्रवृत्ते तु सर्वभूतसमागमे । नानावाद्यसमाकीर्णे[5][6] अहं तत्र द्विजातयः ॥ १२५
शैलपुत्रीमलंकृत्य योग्याभरणसंपदा[7] । पुरं प्रवेशितवांस्तां स्वयमादाय भो द्विजाः ॥ १२६
ततस्तु पुनरेवेशमहं चैवोक्तवान्विभुम्[8] । हविर्जुहोमि[9] वह्नौ ते उपाध्यायपदे स्थितः[10] ॥ १२७
ददासि मह्यं यद्याज्ञां कर्तव्योऽयं क्रियाविधिः । मामाह शंकरश्चैवं देवदेवो जगत्पतिः ॥ १२८

शिव उवाच—

यदुदिष्टं[11] सुरेशान तत्कुरुष्व यथेप्सितम् । कर्ताऽस्मि वचनं सर्वं ब्रह्मंस्तव जगद्विभो ॥ १२९

ब्रह्मोवाच—

ततश्चाहं प्रहृष्टात्मा कुशानादाय सत्वरम् । हस्तं[12] देवस्य देव्याश्च योगबन्धेन युक्तवान् ॥ १३०
ज्वलनश्च स्वयं तत्र कृताञ्जलिपुटः स्थितः । श्रुतिगीतैर्महामन्त्रैर्मूर्तिमद्भिरुपस्थितैः ॥ १३१
यथोक्तविधिना हुत्वा सर्पिस्तदमृतं हविः । ततस्तं ज्वलनं सर्वं कारयित्वा प्रदक्षिणम् ॥ १३२
मुक्त्वा हस्तसमायोगं सहितः सर्वदैवतैः । पुत्रैश्च मानसैः सिद्धैः प्रहृष्टेनान्तरात्मना ॥ १३३
वृत्त उद्वाहकाले तु प्रणम्य च वृषध्वजम् । योगेनैव[13] तयोर्विप्रास्तदुमापरमेशयोः ॥ १३४
उद्वाहः स परो वृत्तो यं देवा न विदुः क्वचित् । इति वः सर्वमाख्यातं स्वयंवरमिदं शुभम्[14] ॥
उद्वाहश्चैव देवस्य शृणुध्वं[15] परमाद्भुतम् ॥ १३५

इति श्रीमहापुराण आदिब्राह्मे स्वयंभुऋषिसंवादे उमामहेश्वरयोर्विवाहनिरूपणं नाम
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्लोकानामादितः समष्ट्यङ्काः—२५७८

---

१ क. शब्दमृतुम॰ । २ ग. ॰नितां वे॰ । ३ क. ॰संघृष्ट॰ । ४ क. ॰हभूत्यै । ५ ग. ॰द्यशताकी॰ । ६ ख. ॰र्णे देवास्तत्र द्विजाः स्वयम् । शै॰ । ७ ख. ॰दा । सभ्यां च वेशयामासुः स्व॰ । ८ क. ॰म् । वह्निं जुहो॰ । ९ क. ॰मि विधिवदुपा॰ । १० क. ॰तः । इति सत्यं यद्यदन्यत्कर्ताऽहं स्यां क्रियाविधौ । मा॰ । ११ ख. यद्यदिष्टं । १२ ख. ॰तिगतै॰ । १३ क. ॰गेनानेन विप्रास्तु तुष्टुवुः परमेश्वरौ । उ॰ । १४ ख. कृतम् । १५ क. शृण्वतः ।

अथ सप्तत्रिंशोऽध्यायः ।

ब्रह्मोवाच—

अथ वृत्ते विवाहे तु[1] भवस्यामिततेजसः । प्रहर्षमतुलं गत्वा देवाः शक्रपुरोगमाः ॥
तुष्टुवुर्वाग्भि[2]राद्याभिः[3] प्रणेमुस्ते महेश्वरम् ॥ १

देवा ऊचुः—

नमः पर्वत[4]लिङ्गाय पर्वतेशाय वै नमः । नमः पवन[5]वेगाय विरूपायाजिताय च ॥
नमः क्लेशविनाशाय दात्रे च[6] शुभसंपदाम् ॥ २
नमो नीलशिखण्डाय अम्बिकापतये नमः । नमः पवन[7]रूपाय शत[8]रूपाय वै नमः ॥ ३
[*नमो भैरवरूपाय विरूपनयनाय च[9] । नमः सहस्रनेत्राय सहस्रचरणाय च ॥ ४
नमो देववयस्याय वेदाङ्गाय नमो नमः । विष्टम्भनाय शक्रस्य बाह्वोर्वेदाङ्कुराय च ॥ ५
चराचराधिपतये] शमनाय नमो नमः । +सलिलाशयलिङ्गाय युगान्ताय नमो नमः ॥ ६
नमः कपालमालाय कपालसूत्रधारिणे । नमः कपालहस्ताय दण्डिने[10] गदिने नमः ॥ ७
नमस्त्रैलोक्यनाथाय पशुलोकरताय च । नमः खट्वाङ्गहस्ताय प्रमथार्तिहराय च ॥ ८
नमो यज्ञशिरोहन्त्रे कृष्णकेशा[11]पहारिणे । भगनेत्रनिपाताय पूष्णो दन्तहराय च ॥ ९
नमः पिनाकशूलासिखड्गमुद्गरधारिणे । नमोऽस्तु कालकालाय तृतीयनयनाय च ॥ १०
अन्तकान्तकृते चैव नमः पर्वत[12]वासिने । सुवर्णरेतसे चैव नमः कुण्डलधारिणे ॥ ११
दैत्यानां[13] योगनाशाय योगिनां गुरवे नमः । शशाङ्कादित्यनेत्राय ललाटनयनाय च ॥ १२
नमः श्मशानरतये श्मशानवरदाय च । नमो[14] दैवतनाथाय त्र्यम्बकाय नमो नमः ॥ १३
गृहस्थसाधवे नित्यं जटिले(ने) ब्रह्मचारिणे । नमो मुण्डार्धमुण्डाय पशूनां पतये नमः[15] ॥ १४
सलिले तप्यमानाय योगैश्वर्यप्रदाय च । नमः शान्ताय दान्ताय प्रलयोत्पत्तिकारिणे ॥ १५
नमोऽनुग्रहकर्त्रे च स्थितिकर्त्रे नमो नमः । नमो रुद्राय वसव आदित्यायाश्विने नमः[16] ॥ १६
नमः पित्रेऽथ सांख्याय विश्वेदेवाय वै नमः । नमः शर्वाय उग्राय शिवाय वरदाय च ॥ १७
नमो भीमाय सेनान्ये पशूनां पतये नमः । शुचये वैरिहानाय सद्योजाताय वै नमः ॥ १८
महादेवाय चित्राय[17] विचित्राय च वै नमः । प्रधानायाप्रमेयाय कार्याय कारणाय च ॥ १९
पुरुषाय नमस्तेऽस्तु पुरुषेच्छाकराय च । नमः पुरुषसंयोगप्रधानगुणकारिणे ॥ २०
प्रवर्तकाय प्रकृतेः पुरुषस्य च सर्वशः । कृताकृतस्य सत्कर्त्रे[18] फलसंयोगदाय च ॥ २१
कालज्ञाय च सर्वेषां[19] नमो नियमकारिणे । नमो वैषम्यकर्त्रे च गुणानां वृत्तिदाय च ॥ २२

---

* एतदादिसपादश्लोकद्वयं नास्ति ग. पुस्तके । + इदमर्धं ख. पुस्तके न ।

---

१ क. तु शिव° । २ क. °गिभरर्थ्याभिः° । ख. °गिभरिष्टाभिः° । ३ क. °द्याभिरुमया सह शंकर° । ४ ख. °तवासाय नमः पर्वतचारिणे । न° । ५ ख. पर्वतजामात्रे । ६ ग. च सुतसं° । ७ क. पर्वतरूपाय । ख. पर्वतनाथाय । ८ क. श्वेतरूपाय । ९ क. च । सहस्रनेत्रशीर्षाय । १० ग. दंष्ट्रिणे । ११ ख. °शाय हा° । १२ क. वृषभगामिने । १३ क. राहवे । १४ ख. °मोऽवनतना° । १५ ख. °मः । मुनिकृतसुमा° । १६ ख. °मः । साध्याय विश्वपतये वि° । १७ ख. °य शूलिने च नमो न° । १८ ख. संकर्त्रे । १९ ग. सर्वत्र ।

नमस्ते देवदेवेश नमस्ते भूतभावन । शिव सौम्यमुखो द्रष्टुं भव सौम्यो हि नः प्रभो ॥ २३

ब्रह्मोवाच—

एवं स भगवान्देवो जगत्पतिरुमापतिः । स्तूयमानः सुरैः सर्वैरमरानिदमब्रवीत् ॥ २४

श्रीशंकर उवाच—

द्रष्टुं सुखश्च सौम्यश्च देवानामस्मि भोः सुराः । वरं[1] वरयत क्षिप्रं दाताऽस्मि तमसंशयम् ॥ २५

ब्रह्मोवाच—

ततस्ते प्रणताः सर्वे सुरा ऊचुस्त्रिलोचनम् ॥ २६

देवा ऊचुः—

तवैव भगवन्हस्ते वर एषोऽवतिष्ठताम् । यदा कार्यं तदा नस्त्वं दास्यसे वरमीप्सितम् ॥ २७

ब्रह्मोवाच—

एवमस्त्विति तानुक्त्वा विसृज्य च सुरान्हरः । लोकांश्च प्रमथैः[2] सार्धं विवेश भवनं[3] स्वकम् ॥

यस्तु हरोत्सवमद्भुतमेनं गायति दैवतविप्रसमक्षम् ।
सोऽप्रतिरूपगणेशसमानो देहविपर्ययमेत्य सुखी स्यात् ॥ २९

ब्रह्मोवाच—

विप्रवर्याः स्तवं हीमं शृणुयाद्वा पठेच्च यः । स सर्वलोकगो देवैः पूज्यतेऽमरराडिव ॥ ३०

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे शिवस्तुतिनिरूपणं नाम सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्लोकानामादितः समष्ट्यङ्काः—२६२९

अथाष्टात्रिंशोऽध्यायः ।

ब्रह्मोवाच—

प्रविष्टे भवनं देवे सूपविष्टे वरासने । स वक्रो मन्मथः क्रूरो देवं वेद्धुमना *भवत् ॥ १

तमनाचारसंयुक्तं दुरात्मानं कुलाधमम् । लोकान्सर्वान्पीडयन्तं सर्वाङ्गावरणात्मकम् ॥ २

ऋषीणां विघ्नकर्तारं नियमानां व्रतैः सह । चक्राह्वयस्य रूपेण रत्या सह समागतम् ॥ ३

अथाऽऽततायिनं विप्रा वेद्धुकामं सुरेश्वरः । नयनेन तृतीयेन सावज्ञं समवैक्षत ॥ ४

ततोऽस्य नेत्रजो वह्निर्ज्वालामालासहस्रवान् । सहसा रतिभर्तारमदहत्सपरिच्छदम् ॥ ५

स दह्यमानः करुणमार्तोऽक्रोशत विस्वरम् । प्रसादयंश्च तं देवं पपात धरणीतले ॥ ६

अथ सोऽग्निपरीताङ्गो मन्मथो लोकतापनः । पपात सहसा मूर्छा क्षणेन समपद्यत ॥ ७

पत्नी तु[6] करुणं तस्य विललाप सुदुःखिता । देवीं देवं च दुःखार्ता अयाचत्करुणावती ॥ ८

तस्याश्च करुणां ज्ञात्वा देवौ तौ करुणात्मकौ । ऊचतुस्तां समालोक्य समाश्वास्य च दुःखिताम्

---

* अडभाव आर्षः ।

---

१ ग. °रं वृत यथेष्टं च दा° । २ ख. स्वगणैः । ३ क. ग. भगवांस्ततः । य° । ४ क. सर्वसंभर° । ५ ख. °ङ्गाभर° । ६ ख. तु ज्वलतस्तस्य ।

उमामहेश्वरावूचतुः—

दग्ध एव ध्रुवं भद्रे नास्योत्पत्तिरिहेष्यते । अशरीरोऽपि ते भद्रे कार्यं सर्वं करिष्यति ॥ १०
यदा तु विष्णुर्भगवान्वसुदेवसुतः शुभे । तदा तस्य सुतो यश्च पतिस्ते संभविष्यति ॥ ११

ब्रह्मोवाच—

ततः सा तु वरं लब्ध्वा कामपत्नी शुभानना । जगामेष्टं तदा देशं प्रीतियुक्ता गतक्लमा ॥ १२
दग्ध्वा कामं ततो विप्राः स तु देवो वृषध्वजः । रेमे तत्रोमया सार्धं प्रहृष्टस्तु हिमाचले ॥ १३
कन्दरेषु च रम्येषु पद्मिनीषु गुहासु च । निर्झरेषु च रम्येषु कर्णिकारवनेषु च ॥ १४
नदीतीरेषु कान्तेषु किंनराचरितेषु च । शृङ्गेषु शैलराजस्य तडागेषु सरःसु च ॥ १५
वनराजिषु रम्यासु नानापक्षिरुतेषु च । तीर्थेषु पुण्यतोयेषु मुनीनामाश्रमेषु च ॥ १६

एतेषु पुण्येषु मनोहरेषु देशेषु विद्याधरभूषितेषु ।
गन्धर्वयक्षामरसेवितेषु रेमे स देव्या सहितस्त्रिनेत्रः ॥ १७
देवैः सहेन्द्रैर्मुनियक्षसिद्धैर्गन्धर्वविद्याधरदैत्यमुख्यैः ।
अन्यैश्च सर्वैर्विविधैर्वृतोऽसौ तस्मिन्नगे हर्षमवाप शंभुः ॥ १८
नृत्यन्ति तत्राप्सरसः सुरेशा गायन्ति गन्धर्वगणाः प्रहृष्टाः ।
दिव्यानि वाद्यान्यथ वादयन्ति केचिद्द्रुतं देववरं स्तुवन्ति ॥ १९
एवं स देवः स्वगणैरुपेतो महाबलैः शक्रयमाग्नितुल्यैः ।
देव्याः प्रियार्थं भगनेत्रहन्ता गिरिं न तत्याज तदा महात्मा ॥ २०

ऋषय ऊचुः—

देव्याः समं तु भगवांस्तिष्ठंस्तत्र स कामहा । अकरोत्किं महादेव एतदिच्छाम वेदितुम् ॥ २१

ब्रह्मोवाच—

भगवान्हिमवच्छृङ्गे स हि देव्याः प्रियेच्छया । गणेशैर्विविधाकारैर्हासं संजनयन्मुहुः ॥ २२
देवीं बालेन्दुतिलको रमयंश्च रराम च । महानुभावैः सर्वज्ञैः कामरूपधरैः शुभैः ॥ २३
अथ देव्याससादैका मातरं परमेश्वरी । आसीनां काञ्चने शुभ्र आसने परमाद्भुते ॥ २४
अथ दृष्ट्वा सतीं देवीमागतां सुररूपिणीम् । आसनेन महार्हेणासंपादयदनिन्दिताम् ॥
आसीनां तामथोवाच मेना हिमवतः प्रिया ॥ २५

मेनोवाच—

चिरस्याऽऽगमनं तेऽद्य वद पुत्रि शुभेक्षणे । दरिद्रा क्रीडनैस्त्वं हि भर्त्रा क्रीडसि संगता ॥ २६
ये दरिद्रा भवन्ति स्म तथैव च निराश्रयाः । उमे त एवं क्रीडन्ति यथा तव पतिः शुभे ॥ २७

ब्रह्मोवाच—

सैवमुक्ताऽथ मात्रा तु नातिहृष्टमना *भवत् । महत्या क्षमया युक्ता न किंचित्तामुवाच ह ॥
विसृष्टा च तदा मात्रा गत्वा देवमुवाच ह ॥ २८

---

* पूर्ववदार्षम् ।

---

१ क. वराङ्गना । २ क. मनस्विनी । ३ ख. °मा । तदाऽऽश्वास्य रतिं वि° । ४ क. हिमालये । ५ ख. सरःसु । ६ ख. योग्येषु । ७ क. ख. °चित्तु तं । ८ क. स्मरन्ति । ९ क. देवो ।

पार्वत्युवाच—

भगवन्देवदेवेश नेह वत्स्यामि भूधरे । अन्यं कु[1]रु ममाऽऽवासं भुवनेषु महाद्युते ॥ २९

देव उवाच—

सदा त्वमुच्यमाना वै मया वासार्थमीश्वरि । अन्यं न रोचितवती वासं वै देवि कर्हिचित् ॥ ३०

इदानीं स्वयमेव त्वं वासमन्यत्र शोभने । कस्मान्मृगयसे देवि ब्रूहि तन्मे शुचिस्मिते ॥ ३१

देव्युवाच—

गृहं गताऽस्मि देवेश पितुरद्य महात्मनः । दृष्ट्वा च तत्र मे माता विजने लोकभावने ॥ ३२

आसनादिभिरभ्यर्च्य सा मामेवमभाषत । उमे तव सदा भर्ता दरिद्रः क्रीडनैः शुभे ॥ ३३

+क्रीडते न हि देवानां क्रीडा भवति तादृशी । यत्किल त्वं महादेव गणैश्च विविधैस्तथा ॥

रमसे तदनिष्टं हि मम मातुर्वृषध्वज ॥ ३४

ब्रह्मोवाच—

ततो देवः प्रहस्याऽऽह देवीं हासयितुं प्रभुः ॥ ३५

देव उवाच—

एवमेव न संदेहः कस्मान्मन्युरभूत्तव । कृत्तिवासा ह्यवासाश्च श्मशाननिलयश्च ह ॥ ३६

अनिकेतो ह्यरण्येषु पर्वतानां गुहासु च । विचरामि गणैर्नग्नैर्[2]वृतोऽम्भोजविलोचने ॥ ३७

मा क्रुधो देवि मात्रे त्वं तथ्यं माताऽवदत्तव । न हि मातृसमो बन्धुर्जन्तूनामस्ति भूतले ॥ ३८

देव्युवाच—

*न मेऽस्ति बन्धुभिः किंचित्कृत्यं सुरवरेश्वर । तथा कुरु महादेव यथा[3]ऽहं सुखमाप्नुयाम् ॥ ३९

ब्रह्मोवाच—

श्रुत्वा स देव्या वचनं सुरेशस्तस्याः प्रियार्थं स्व[4]गिरिं विहाय ।
जगाम मेरुं सुरसिद्धसेवितं[5] भार्यासहायः स्वगणैश्च युक्तः ॥ ४०

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवाद उमामहेश्वरयोर्हिमवत्परित्यागनिरूपणं नामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥

श्लोकानामादितः समष्ट्यङ्काः—२६४९

अथैकोनचत्वारिंशोऽध्यायः ।

ऋषय ऊचुः—

प्राचेतसस्य दक्षस्य कथं वैवस्वतेऽन्तरे । विना[6]श[7]मगमद्ब्रह्मन्हयमे[8]धः प्रजापतेः ॥ १

+ आर्षस्तङ् । * क. पुस्तक एतत्पद्यस्थाने ' अलं वाचः प्रपञ्चेन कर्णयोः कटुकारिणा । कृपां कुरु महादेव यथाऽन्यत्र व्रजामहे ' इति पद्यं दृश्यते ।

---

१ क. ग. वृणु । २ ख. °वृतस्तोयजलो° । ३ ग. °थाऽन्यत्र वसामहे । ब्र° । ४ क. ग. स्वपुरं । ५ क. °तं हृष्टाशयः सर्वग° । ६ क. °नाशो ह्यभवद्ब्र° । ७ ख. °शश्चाभवद्ब्र° । ८ क. ख. °मेधे प्र° ।

देव्या मन्युकृतं[1] बुद्ध्वा क्रुद्धः सर्वात्मकः प्रभुः । कथं विनाशितो यज्ञो दक्षस्यामिततेजसः ॥
महादेवेन रोषाद्वै तन्नः प्रब्रूहि विस्तरात् ॥ २

ब्रह्मोवाच—

वर्णयिष्यामि वो विप्रा महादेवेन वै यथा । क्रोधाद्विध्वंसितो यज्ञो देव्याः प्रियचिकीर्षया ॥ ३
पुरा मेरोर्द्विजश्रेष्ठाः शृङ्गं त्रैलोक्यपूजितम्[2] । ज्योतिःस्थलं नाम[3] चित्रं सर्वरत्नविभूषितम् ॥ ४
अप्रमेयमनाधृष्यं सर्वलोकनमस्कृतम् । तत्र देवो गिरितटे सर्वधातुविचित्रिते ॥ ५
पर्यङ्क इव विस्तीर्ण[4] उपविष्टो बभूव ह । शैलराजसुता चास्य नित्यं पार्श्वस्थिताऽभवत् ॥ ६
आदित्याश्च महात्मानो वसवश्च महौजसः । तथैव च महात्मानावश्विनौ भिषजां वरौ ॥ ७
तथा वैश्रवणो राजा गुह्यकैः परिवारितः । यक्षाणामीश्वरः श्रीमान्कैलासनिलयः प्रभुः ॥ ८
उपासते महात्मानमुशना च महामुनिः । सनत्कुमारप्रमुखास्तथैव परमर्षयः ॥ ९
अङ्गिरःप्रमुखाश्चैव तथा देवर्षयोऽपि च । विश्वावसुश्च गन्धर्वस्तथा नारदपर्वतौ ॥ १०
अप्सरोगणसंघाश्च समाजग्मुरनेकशः । ववौ सुखशिवो वायुर्नानागन्धवहः शुचिः ॥ ११
सर्वर्तुकुसुमोपेतः पुष्पवन्तो[5]ऽभवन्द्रुमाः । तथा विद्याधराः साध्याः सिद्धाश्चैव तपोधनाः ॥ १२
महादेवं पशुपतिं पर्युपासत तत्र वै । भूतानि च तथाऽन्यानि नानारूपधराण्यथ ॥ १३
राक्षसाश्च महारौद्राः पिशाचाश्च महाबलाः । बहुरूपधरा धृष्टा[6] नानाप्रहरणायुधाः ॥ १४
देवस्यानुचरास्तत्र तस्थु[7]र्वैश्वानरोपमाः । नन्दीश्वरश्च भगवान्देवस्यानुमते स्थितः ॥ १५
प्रगृह्य ज्वलितं शूलं दीप्यमानं स्वतेजसा । गङ्गा च सरितां श्रेष्ठा सर्वतीर्थजलोद्भवा ॥ १६
पर्युपासत तं देवं रूपिणी द्विजसत्तमाः । एवं स भगवांस्तत्र पूज्यमानः सुरर्षिभिः ॥ १७
देवैश्च[8] सुमहाभागैर्महादेवो व्यतिष्ठत । कस्यचित्त्वथ कालस्य दक्षो नाम प्रजापतिः ॥ १८
पूर्वोक्तेन विधानेन यक्ष्यमाणो[9]ऽभ्यपद्यत । ततस्तस्य मखे[10] देवाः सर्वे शक्रपुरोगमाः[11] ॥ १९
स्वर्गस्थानादथाऽऽगम्य[12] दक्षमापेदिरे तथा । ते विमानैर्महात्मानो[13] ज्वलद्भिर्ज्वलनप्रभाः ॥ २०
देवस्यानुमतेऽगच्छन्गङ्गाद्वारमिति श्रुतिः । गन्धर्वाप्सरसाकीर्णं नानाद्रुमलतावृतम् ॥ २१
ऋषिसिद्धैः[14] परिवृतं[15] दक्षं धर्मभृतां वरम् । पृथिव्यामन्तरिक्षे च[16] ये च स्वर्लोकवासिनः ॥ २२
सर्वे प्राञ्जलयो भूत्वा उपतस्थुः प्रजापतिम् । आदित्या वसवो रुद्राः साध्याः[17] सर्वे मरुद्गणाः २३
विष्णुना सहिताः सर्व आगता यज्ञभागिनः[18] । ऊष्मपा धूमपाश्चैव आज्यपाः सोमपास्तथा ॥ २४
अश्विनौ मरुतश्चैव नानादेवगणैः[19] सह । एते चान्ये च बहवो भूतग्रामास्तथैव च ॥ २५
जरायुजाण्डजाश्चैव तथैव स्वेदजोद्भिदः । आगताः[20] सत्रिणः[21] सर्वे देवाः[22] स्त्रीभिः सहर्षिभिः ॥ २६
विराजन्ते विमानस्था दीप्यमाना इवाग्नयः[23] । तान्दृष्ट्वा मन्युनाऽऽविष्टो दधीचिर्वाक्यमब्रवीत् २७

---

१ ख. °कृते तत्र कु° । २ ख. °म् । वित्तं ज्यो° । ३ ख. °म स° । ४ क. ग. विभ्राजन्नुप° । ५ ख. पुण्यव° । ६ क. ग हृष्टा । ७ ख. °श्च स म° । ८ ख. °भागैः सेव्यमानो व्य° । ९ ग. °णोऽन्वप° । १० ख. ग. मखं । ११ ख. °माः । अन्तरिक्षाद° । ग. °माः । गमनाय समाग° । १२ क. °म्य वृद्धिमा° । ग. °म्य बुद्धिमादधिरे । १३ क. °त्मानः कूजद्भि° । १४ क. ख. °षिसंघैः प° । १५ ग. परिवृढं । १६ क. ख. च स्वर्गलोक° । १७ ख. ग. साध्या रुद्रा म° । १८ क. °नः । तत्र मासोपवासाश्च अम्बुपाः सो° । १९ क. ख. °गणास्तथा । ए° । २० ग. आहूता मन्त्रिणः स° । २१ क. मन्त्रिताः । २२ क. ख. °वाः सह महर्षि° । २३ ख. °यः । दधीचिस्तु महांस्तत्र ऋषिस्तं यज्ञमण्डपम् । रुद्रेण रहितं दृष्ट्वा ऋषीन्वाक्यमभाषत । ऋषयोऽस्मिन्महायज्ञे शंकरः सर्वनायकः । न दृश्यते विना तेन यज्ञोऽयं नैव शोभते । ए° ।

दधीचिरुवाच—

अपूज्यपूजने चैव पूज्यानां चाप्यपूजने । नरः पापमवाप्नोति महद्वै नात्र संशयः ॥ २८

ब्रह्मोवाच—

एवमुक्त्वा[1] तु विप्रर्षिः पुनर्दक्षमभाषत ॥ २९

दधीचिरुवाच—

पूज्यं च पशुभर्तारं कस्मान्नार्चयसे प्रभुम्[2] ॥ ३०

दक्ष उवाच—

सन्ति[3] मे बहवो रुद्राः शूलहस्ताः कपर्दिनः । एकादश[4]स्थानगता नान्यं विद्मो महेश्वरम् ॥ ३१

दधीचिरुवाच—

*सर्वेषामेकमन्त्रोऽयं ममेशो न निमन्त्रितः । यथाऽहं शंकरादूर्ध्वं नान्यं पश्यामि दैवतम् ॥
तथा दक्षस्य विपुलो यज्ञोऽयं न भविष्यति ॥ ३२

दक्ष उवाच[5]—

विष्णोश्च भागा विविधाः प्रदत्तास्तथा च रुद्रेभ्य उत प्रदत्ताः ।
अन्येऽपि देवा निजभागयुक्ता ददामि भागं न तु शंकराय ॥ ३३

ब्रह्मोवाच—

गतास्तु देवता ज्ञात्वा शैलराजसुता[6] तदा । उवाच वचनं शर्वं देवं पशुपतिं पतिम् ॥ ३४

उमोवाच—

भगवन्कुत्र यान्त्येते देवाः शक्रपुरोगमाः । ब्रूहि तत्त्वेन तत्त्वज्ञ संशयो मे महानयम् ॥ ३५

महेश्वर उवाच—

दक्षो नाम महाभागे प्रजानां पतिरुत्तमः । हयमेधेन यजते तत्र यान्ति दिवौकसः ॥ ३६

देव्युवाच—

यज्ञमेतं महाभाग[7] किमर्थं नानुगच्छसि । केन वा प्रतिषेधेन गमनं ते न विद्यते ॥ ३७

महेश्वर उवाच—

सुरै[8]रेव महाभागे सर्वमेतदनुष्ठितम् । यज्ञेषु मम सर्वेषु न भाग उपकल्पितः ॥ ३८
पूर्वागतेन गन्तव्यं मार्गेण वरवर्णिनि । न मे सुराः प्रयच्छन्ति भागं यज्ञस्य धर्मतः ॥ ३९

उमोवाच—

भगवन्सर्वदेवेषु प्रभावाभ्यधिको गुणैः । अजेयश्चा[9]प्यधृष्यश्च तेजसा यशसा श्रिया ॥ ४०
अनेन तु महाभाग प्रतिषेधेन भागतः । अतीव दुःखमापन्ना वेपथुश्च महानयम् ॥ ४१

---

* इदमर्धं क. ख. पुस्तकयोर्न ।

---

१ ग. °क्त्वा मुनिर्विप्रान्पुनर्वाक्यम° । २ ख. विभुम् । ३ ख. सन्तीह ब° । ४ ख. °श तथा चान्ये विद्महे न म° । ५ क. ग. °च । एतन्महेशाय सुवर्णपात्रे हविः समस्तं विधिमन्त्रपूतम् । विष्णोश्च यस्याप्रतिवेश्य भागं न यज्ञभागं तु महेश्वराय । जगत्प्रभोस्तस्य दधीच भागं विष्णोश्च नित्यं विबुधैः प्रदत्तम् । तस्मादहं देववराय दद्यां यज्ञस्य भागं । ६ ख. साध्वी । ७ ख. महादेव । ८ क. °रेवं म° । ९ क. ख. °श्चाप्रमेयश्च ।

किं नाम दानं नियमं तपो वा कुर्यामहं[1] येन पतिर्ममाद्य ।
लभेत भागं भगवानचिन्त्यो यज्ञस्य[2] चेन्द्राद्यमरैर्विचित्र(भक्त)म् ॥ ४२

ब्रह्मोवाच—

एवं ब्रुवाणां भगवान्विचिन्त्य पत्नीं प्रहृष्टः क्षुभितामुवाच ।

महेश्वर उवाच—

न वेत्सि मां देवि कृशोदराङ्गि किं नाम युक्तं वचनं तवेदम् ॥ ४३
अहं विजानामि विशालनेत्रे ध्यानेन सर्वे च विदन्ति सन्तः ।
तवाद्य मोहेन[3] सहेन्द्रदेवा लोकत्रयं सर्वमथो विनष्टम् ॥ ४४
मामध्वरेशं नितरां स्तुवन्ति रथंतरं साम गायन्ति मह्यम् ।
मां ब्राह्मणा ब्रह्ममन्त्रैर्यजन्ति ममाध्वर्यवः कल्पयन्ते च भागम् ॥ ४५

देव्युवाच[4]—

विकत्थसे प्राकृतवत्सर्वस्त्रीजनसंसदि । स्तौषि[5] गर्वायसे[6] चापि स्वमात्मानं न संशयः ॥ ४६

भगवानुवाच—

नाऽऽत्मानं स्तौमि देवेशि यथा त्वमनुगच्छसि । [7]संस्रक्ष्यामि वरारोहे भागार्थे वरवर्णिनि ४७

ब्रह्मोवाच—

इत्युक्त्वा भगवान्पत्नीमुमां प्राणैरपि प्रियाम् । सोऽसृजद्भगवान्वक्त्राद्भूतं[8] क्रोधाग्निसंभवम् ॥ ४८
तमुवाच मखं गच्छ दक्षस्य त्वं महेश्वरः । नाशयाऽऽशु क्रतुं तस्य दक्षस्य मदनुज्ञया ॥ ४९

ब्रह्मोवाच—

ततो रुद्रप्रयुक्तेन सिंहवेषेण लीलया । देव्या मन्युकृतं[9] ज्ञात्वा हतो दक्षस्य स क्रतुः ॥ ५०
मन्युना च महाभीमा भद्रकाली महेश्वरी । आत्मनः कर्मसाक्षित्वे[10] तेन सार्धं सहानुगा ॥ ५१
स एष भगवान्क्रोधः प्रेतावासकृतालयः । वीरभद्रेति विख्यातो देव्या मन्युप्रमार्जकः ॥ ५२
सोऽसृजद्रोमकूपेभ्य आत्मनैव[11] गणेश्वरान् । रुद्रानुगान्गणान्रौद्रान्रुद्रवीर्यपराक्रमान् ॥ ५३
रुद्रस्यानुचराः सर्वे सर्वे रुद्रपराक्रमाः । ते निपेतुस्ततस्तूर्णं शतशोऽथ सहस्रशः ॥ ५४
ततः किलकिलाशब्द आकाशं पूरयन्निव । समभूत्सुमहान्विप्राः सर्वरुद्रगणैः कृतः ॥ ५५
तेन शब्देन महता त्रस्ताः सर्वे दिवौकसः । पर्वताश्च व्यशीर्यन्त चकम्पे च वसुंधरा ॥ ५६
मरुतश्च ववुः क्रूराश्चुक्षुभे वरुणालयः । अग्नयो वै न दीप्यन्ते न चादीप्यत भास्करः ॥ ५७
ग्रहा नैव प्रकाशन्ते नक्षत्राणि न तारकाः । ऋषयो न प्रभासन्ते न देवा न च दानवाः ॥ ५८
एवं हि तिमिरीभूते निर्दहन्ति गणेश्वराः । प्रभञ्जन्त्यपरे यूपान्घोरानुत्पाटयन्ति च ॥ ५९
प्रणदन्ति तथा चान्ये विकुर्वन्ति तथा परे । त्वरितं वै प्रधावन्ति वायुवेगा मनोजवाः ॥ ६०
चूर्ण्यन्ते यज्ञपात्राणि यज्ञस्याऽऽयतनानि च । शीर्यमाणान्यदृश्यन्त तारा[12] इव नभस्तलात् ॥ ६१
दिव्यान्नपानभक्ष्याणां राशयः पर्वतोपमाः । क्षीरनद्यस्तथा चान्या घृतपायसकर्दमाः ॥ ६२

---

१ क. कुर्यां मखे येन विभागमद्य । २ ग. °स्य भागं ह्यथवा तृतीयम् । ३ ख. कोपेन । ४ ग. °च–प्राकृतोऽपीह पुरुषः सर्व° । ५ ग. स्तौति । ६ ख. °र्वाभिभूतस्तु त्वमा° । ७ क. ख. प्रवक्ष्यामि । ८ ख.°क्त्राद्दूतं । ९ ख. °कृते ज्ञा° । १० ख. °त्वे बभूव वरवर्णिनी । वीरभद्रो महाक्रूरस्तया सार्धं सहानुगः । स । ११ ख. °त्मनश्च ग° । १२ ग. वाता ।

मधुमण्डोदका दिव्याः खण्डशर्करवालुकाः । षड्रसान्निवहन्त्यन्या गुडकुल्या मनोरमाः ॥ ६३
उच्चावचानि मांसानि भक्ष्याणि विविधानि च[1] । यानि कानि च दिव्यानि लेह्यचोष्याणि यानि च ॥ ६४
भुञ्जन्ति विविधैर्वक्त्रैर्विलुम्पन्ति क्षिपन्ति च । रुद्रकोपा महाकोपाः कालाग्निसदृशोपमाः ॥ ६५
भक्षयन्तोऽथ शैलाभा भीषयन्तश्च सर्वतः । क्रीडन्ति विविधाकाराश्चिक्षिपुः सुरयोषितः ॥ ६६
एवं गणाश्च तैर्युक्तो वीरभद्रः प्रतापवान् । रुद्रकोपप्रयुक्तश्च सर्वदेवैः सुरक्षितम् ॥ ६७
तं यज्ञमदहच्छीघ्रं भद्रकाल्याः समीपतः । चक्रुरन्ये तथा नादान्सर्वभूतभयंकरान् ॥ ६८
छित्त्वा शिरोऽन्ये यज्ञस्य व्यनदन्त भयंकरम् । ततः शक्रादयो देवा दक्षश्चैव प्रजापतिः ॥
ऊचुः प्राञ्जलयो भूत्वा कथ्यतां को भवानिति ॥ ६९

वीरभद्र उवाच—

नाहं देवो न दैत्यो वा न[2] च भोक्तुमिहाऽऽगतः । नैव द्रष्टुं च देवेन्द्रा न च कौतूहलान्विताः ॥
दक्षयज्ञविनाशार्थं संप्राप्तोऽहं सुरोत्तमाः । वीरभद्रेति विख्यातो रुद्रकोपाद्विनिःसृतः ॥ ७१
भद्रकाली च विख्याता[3] देव्याः क्रोधाद्विनिर्गता । प्रेषिता देवदेवेन यज्ञान्तिकमुपागता ॥ ७२
शरणं गच्छ राजेन्द्र देवदेवमुमापतिम् । वरं क्रोधोऽपि देवस्य न वैरः परिचारकैः ॥ ७३

ब्रह्मोवाच—

निखातोत्पाटितैर्यूपैरपविद्धैस्ततस्ततः । उत्पतद्भिः पतद्भिश्च गृध्रैरामिषगृध्नुभिः ॥ ७४
पक्षवातविनिर्धूतैः शिवारुतविनादितैः । स तस्य यज्ञो नृपतेर्बाध्यमानस्तदा गणैः ॥ ७५
आस्थाय मृगरूपं वै खमेवाभ्यपतत्तदा । तं तु यज्ञं तथारूपं गच्छन्तमुपलभ्य सः ॥ ७६
धनुरादाय बाणं च तदर्थमगमत्प्रभुः । ततस्तस्य गणेशस्य क्रोधादमिततेजसः ॥ ७७
ललाटात्प्रसृतो घोरः स्वेदबिन्दुर्बभूव ह । तस्मिन्पतितमात्रे च स्वेदबिन्दौ तदा भुवि ॥ ७८
प्रादुर्भूतो महानग्निर्ज्वलत्कालानलोपमः । तत्रोदपद्यत तदा पुरुषो द्विजसत्तमाः ॥ ७९
ह्रस्वोऽतिमात्रो रक्ताक्षो हरिच्छ्मश्रुर्विभीषणः । ऊर्ध्वकेशोऽतिरोमाङ्गः शोणकर्णस्तथैव च ॥ ८०
करालकृष्णवर्णश्च रक्तवासास्तथैव च । तं यज्ञं स महासत्त्वोऽदहत्कक्षमिवानलः ॥ ८१
देवाश्च प्रद्रुताः सर्वे गता भीता दिशो दश । तेन तस्मिन्विचरता विक्रमेण तदा तु वै ॥ ८२
पृथिवी व्यचलत्सर्वा सप्तद्वीपा समन्ततः । महाभूते प्रवृत्ते तु देवलोकभयंकरे ॥ ८३
तदा चाहं महादेवमब्रवं प्रतिपूजयन् । भवतेऽपि सुराः सर्वे भागं दास्यन्ति वै प्रभो ॥ ८४
क्रियतां प्रतिसंहारः सर्वदेवेश्वर त्वया । इमाश्च देवताः सर्वा ऋषयश्च सहस्रशः ॥ ८५
तव क्रोधान्महादेव न शान्तिमुपलेभिरे । यश्चैष पुरुषो जातः स्वेदजस्ते सुरर्षभ ॥ ८६
ज्वरो नामैष धर्मज्ञ लोकेषु प्रचरिष्यति । एकीभूतस्य न ह्यस्य धारणे तेजसः प्रभो ॥ ८७
समर्था सकला पृथ्वी बहुधा सृज्यतामयम् । इत्युक्तः स मया देवो भागे चापि प्रकल्पिते ८८
भगवान्मां तथेत्याह देवदेवः पिनाकधृक् । परां च प्रीतिमगमत्स स्वयं च पिनाकधृक् ॥ ८९

---

१ ग. च । पानका॰ । २ ख. न यक्षो न च राक्षसः । नै॰ । ३ ख. ॰ता रुद्रकोपाद्वि॰ । ४ क. परं । ५ क ॰रके । नि॰ । ६ क. ग. ॰तैर्वध्य॰ । ७ ख. बाणांश्च त॰ । ८ क. ॰स्य गुणे सम्यक्क्रोधा॰ । ९ क. ॰ग्निर्ज्वालामाली भयंकरः । त॰ । १० क. ॰ङ्गः सेनान्तकस्त॰ । ११ क. महालोके । ख. महीलोके च प्रहते दे॰ । १२ क. ग. ॰वतोऽपि ।

दक्षोऽपि मनसा देवं भवं शरणमन्वगात् । प्राणापानौ समारुध्य[1] चक्षुःस्थाने[2] प्रयत्नतः ॥ ९०
विधार्य[3] सर्वतो दृष्टिं बहुदृष्टिरमित्रजित्[4] । स्मितं कृत्वाऽब्रवीद्वाक्यं ब्रूहि किं करवाणि ते ॥ ९१
*श्राविते च महाख्याने देवानां पितृभिः सह । तमुवाचाञ्जलिं कृत्वा दक्षो देवं प्रजापतिः ॥
भीतः शङ्कितचित्तस्तु सबाष्पवदनेक्षणः ॥ ९२

दक्ष उवाच—

यदि प्रसन्नो भगवान्यदि वाऽहं तव प्रियः । यदि चाहमनुग्राह्यो यदि देयो वरो मम ॥ ९३
यद्भक्ष्यं भक्षितं पीतं त्रासितं यच्च नाशितम् । चूर्णीकृतापविद्धं च यज्ञसंभारमीदृशम् ॥ ९४
दीर्घकालेन महता प्रयत्नेन च संचितम् । न च मिथ्या भवेन्मह्यं त्वत्प्रसादान्महेश्वर ॥ ९५

ब्रह्मोवाच—

तथाऽस्त्वित्याह भगवान्भगनेत्रहरो हरः । धर्माध्यक्षं महादेवं त्र्यम्बकं च प्रजापतिः ॥ ९६
जानुभ्यामवनीं गत्वा दक्षो लब्ध्वा भवाद्वरम्[5] । नाम्नां चाष्टसहस्रेण स्तुतवान्वृषभध्वजम् ॥ ९७

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे दक्षयज्ञविध्वंसनं नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—२७४६

अथ चत्वारिंशोऽध्यायः ।

ब्रह्मोवाच—

एवं दृष्ट्वा तदा दक्षः[6] शंभोर्वीर्यं द्विजोत्तमाः । प्राञ्जलिः प्रणतो भूत्वा संस्तोतुमुपचक्रमे ॥ १

दक्ष उवाच—

नमस्ते देवदेवेश नमस्तेऽन्धकसूदन । देवेन्द्र त्वं बलश्रेष्ठ देवदानवपूजित ॥ २
सहस्राक्ष विरूपाक्ष त्र्यक्ष यक्षाधिपप्रिय । सर्वतःपाणिपादस्त्वं सर्वतोक्षिशिरोमुखः ॥ ३
सर्वतःश्रुतिमाँल्लोके सर्वमावृत्य तिष्ठसि । शङ्कुकर्णो महाकर्णः कुम्भकर्णोऽर्णवालयः ॥ ४
गजेन्द्रकर्णो गोकर्णः शतकर्णो नमोऽस्तु ते । शतोदरः शतावर्तः शतजिह्वः सनातनः[7] ॥ ५
गायन्ति त्वां गायत्रिणो[8] अर्चयन्त्यर्कमर्किणः । देवदानवगोप्ता च ब्रह्मा च त्वं शतक्रतुः ॥ ६
मूर्तिमांस्त्वं महामूर्तिः समुद्रः सरसां निधिः । त्वयि सर्वा देवता हि गावो गोष्ठ इवाऽऽसते ॥७
त्वत्तः शरीरे पश्यामि सोममग्निजलेश्वरम् । आदित्यमथ विष्णुं च ब्रह्माणं सबृहस्पतिम् ॥ ८
क्रिया करणकार्ये च कर्ता कारणमेव च । असच्च सदसच्चैव तथैव प्रभवाव्य(प्य)यौ ॥ ९
नमो भवाय शर्वाय रुद्राय वरदाय च । पशूनां पतये चैव नमोऽस्त्वन्धकघातिने ॥ १०
त्रिजटाय त्रिशीर्षाय त्रिशूलवरधारिणे । त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः ॥ ११

---

* इदमर्धं ख. पुस्तके नास्ति ।

---

१ ख. समाधाय । २ ख. चित्तस्थाने । ३ क. विस्तार्य । ख. विचार्य । ४ क. °रमीवजि° । ५ ख. °म् । तं च नाम्नां स° । ६ ख. °क्षः सद्यो द्वेषफलं द्विजाः । प्रा° । ७ क. ख. शताननः । ८ ख. °यकाश्च तर्कयन्ति च तर्कि° ।

नमश्चण्डाय मुण्डाय विश्वचण्डधराय च । [1]दण्डिने शङ्कुकर्णाय [2]दण्डिदण्डाय वै नमः ॥ १२
*नमोऽर्धदण्डिकेशाय शुष्काय विकृताय च । विलोहिताय [3]धूम्राय नीलग्रीवाय वै नमः ॥ १३
[4]नमोऽस्त्वप्रतिरूपाय विरूपाय शिवाय च । सूर्याय सूर्यपतये सूर्यध्वजपताकिने ॥ १४
नमः प्रमथनाथाय वृषस्कन्धाय[5] वै नमः । नमो हिर[6]ण्यगर्भाय हिरण्यकवचाय च ॥ १५
हिरण्यकृतचूडाय हिरण्यपतये नमः । शत्रुघाताय चण्डाय पर्णसंघशयाय च ॥ १६
नमः [7]स्तुताय स्तुतये स्तूयमानाय वै नमः । सर्वाय सर्वभक्षाय सर्वभूतान्तरात्मने ॥ १७
नमो [8]होमाय मन्त्राय शुक्लध्वजपताकिने । न[9]मोऽनम्याय नम्याय नमः किलकिलाय च ॥ १८
+नमस्त्वां शयमानाय शयितायोत्थिताय च । स्थिताय धावमानाय कुब्जाय कुटिलाय च १९
नमो नर्तनशीलाय मुखवादित्रकारिणे । बाधापहाय लुब्धाय गीतवादित्रकारिणे ॥ २०
नमो ज्येष्ठाय श्रेष्ठाय बलप्रमथनाय च । उग्राय च नमो नित्यं नमश्च दशबाहवे ॥ २१
नमः कपालहस्ताय सितभस्मप्रियाय च । विभीषणाय भीमाय [10]भीष्मव्रतधराय च ॥ २२
नानाविकृतवक्त्राय खड्गजिह्वोग्रदंष्ट्रिणे । पक्षमासलवार्धाय तुम्बीवीणाप्रियाय च ॥ २३
अघोरघोररूपाय घोराघोरतराय च । नमः शिवाय शान्ताय नमः शान्ततमाय च ॥ २४
[11]नमो [12]बुद्धाय [13]शुद्धाय संविभागप्रियाय च । [14]पवनाय पतङ्गाय नमः सांख्यपराय च ॥ २५
नमश्चण्डैकघण्टाय घण्टाजल्पाय घण्टिने । सहस्रशतघण्टा[15]य घण्टामालाप्रियाय च ॥ २६
प्राणदण्डाय नित्याय [16]नमस्ते लोहिताय च । [17]हूंहूंकाराय रुद्राय [18]भगाकारप्रियाय च ॥ २७
नमोऽपारवते नित्यं गिरिवृक्षप्रियाय च । नमो यज्ञाधिपतये [19]भूताय [20]प्रस्तुताय च ॥ २८
यज्ञवाहाय दान्ताय [21]तप्याय च भगाय च । नम[22]स्तटाय तथ्याय तटिनीपतये नमः ॥ २९
अन्नदायान्नपतये नमस्त्वन्नभुजाय च । नमः सहस्रशीर्षाय सहस्रचरणाय च ॥ ३०
सहस्रोद्धतशूलाय सहस्रनयनाय च । नमो बालार्कवर्णाय बालरूपधराय च ॥ ३१
नमो बालार्करूपाय कालक्रीडनकाय च । नमः शुद्धाय बुद्धाय क्षोभणाय क्षयाय च ॥ ३२
तरङ्गाङ्कितकेशाय मुक्तकेशाय वै नमः । नमः षट्कर्मनिष्ठाय त्रिकर्मनियताय च ॥ ३३
वर्णाश्रमाणां विधिवत्पृथग्धर्मप्रवर्तिने । नमः श्रेष्ठाय ज्येष्ठाय नमः कलकलाय च ॥ ३४
श्वेतपिङ्गलनेत्राय कृष्णरक्तेक्षणाय च । धर्मकामार्थमोक्षाय क्रथाय क्रथनाय च ॥ ३५
सांख्याय सांख्यमुख्याय योगाधिपतये नमः । नमो रथ्याधिरथ्याय चतुष्पथपथाय च ॥ ३६
कृष्णाजिनोत्तरीयाय व्यालयज्ञोपवीतिने । ईशा[23]न रुद्रसंघात हरिकेश नमोऽस्तु ते ॥ ३७
त्र्यम्बकायाम्बिकानाथ व्यक्ताव्यक्त नमोऽस्तु ते । कालकामदकाम[24]घ्न दुष्टोद्वृत्तनिषूदन ॥ ३८
सर्वगर्हितसर्वघ्न सद्योजात नमोऽस्तु ते[25] । उन्मादनशतावर्त गङ्गातोयार्द्रमूर्धज ॥ ३९

---

* इदमर्धं क. ग. पुस्तकयोर्न । + इदमर्धं ग. पुस्तके न ।

---

१ ख. चण्डिने । २ ख. चण्डदण्डाय । ३ ख. ताम्राय । ४ ख. °मोऽस्तु प्र° । ५ ख. °य धन्विने । न° । ६ ख. °ण्यवर्णाय । ७ ख. स्तुलायायास्तुल्याय स्तू° । ८ क. ख. होत्राय । ९ क. °मो देवनमस्याय नमः° । १० क. भीमव्र° ख. भस्मप्रहरणाय । ११ ख. °मो नृत्यप्रवीणाय सं° । १२ क. वृद्धाय । १३ क. लुब्धाय । १४ ग. पाञ्चालाय । १५ क. °य खण्डमा° । १६ ग. नमो लोकहि° । १७ क. दण्डकाराय । १८ ख. द्वंद्वाकारप्रियाय । १९ क. हुताय । २० क. प्रहुताय । २१ क. पथ्याय । ख. तथ्याय वितथाय । २२ ख. °स्तडागरन्ध्राय । २३ ख. °न यज्ञसंघात । २४ ख. °घ्न दृप्तोद्दमनिवारण । स° । २५ ख. ते । क्रकमादनश° ।

चन्द्रार्धसंयुगावर्त मेघावर्त नमोऽस्तु ते। नमोऽन्नदानकर्त्रे च अन्नदप्रभवे नमः॥ ४०
अन्नभोक्त्रे च गोप्त्रे च त्वमेव प्रलयानल। जरायुजाण्डजाश्चैव स्वेदजोद्भिज्ज एव च॥ ४१
त्वमेव देवदेवेश भूतग्रामश्चतुर्विधः। चराचरस्य स्रष्टा त्वं प्रतिहर्ता त्वमेव च॥ ४२
त्वमेव ब्रह्मा विश्वेश अप्सु ब्रह्म वदन्ति ते। सर्वस्य परमा योनिः सुधांशो ज्योतिषां निधिः॥
ऋक्सामानि तथोंकारमाहुस्त्वां ब्रह्मवादिनः। हायि हायि हरे हायि हुवाहावेति वाऽसकृत्॥
गायन्ति त्वां सुरश्रेष्ठाः सामगा ब्रह्मवादिनः। यजुर्मय ऋङ्मयश्च सामाथर्वयुतस्तथा॥ ४५
पठ्यसे ब्रह्मविद्भिस्त्वं कल्पोपनिषदां गणैः। ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णाश्रमाश्च ये॥
त्वमेवाऽऽश्रमसंघाश्च विद्युत्स्तनितमेव च। संवत्सरस्त्वमृतवो मासा मासार्धमेव च॥ ४७
कला काष्ठा निमेषाश्च नक्षत्राणि युगानि च। वृषाणां ककुदं त्वं हि गिरीणां शिखराणि च४८
सिंहो मृगाणां पतयस्तक्षकानन्तभोगिनाम्। क्षीरोदो ह्युदधीनां च मन्त्राणां प्रणवस्तथा ॥४९
वज्रं प्रहरणानां च व्रतानां सत्यमेव च। त्वमेवेच्छा च द्वेषश्च रागो मोहः शमः क्षमा॥ ५०
व्यवसायो धृतिर्लोभः कामक्रोधौ जयाजयौ। त्वं गदी त्वं शरी चापी खट्वाङ्गी मुद्गरी तथा॥
छेत्ता भेत्ता प्रहर्ता च नेर्ता मन्ताऽसि नो मतः। दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च॥५२
ईन्दुः समुद्रः सरितः पल्वलानि सरांसि च। लतावल्यस्तृणौषध्यः पशवो मृगपक्षिणः॥ ५३
द्रव्यकर्मगुणारम्भः कालपुष्पफलप्रदः। आदिश्चान्तश्च मध्यश्च गायत्र्योंकार एव च॥ ५४
हरितो लोहितः कृष्णो नीलः पीतस्तथा क्षणः। कद्रुश्च कपिलो बभ्रुः कपोतो मच्छ(त्स्य)कस्तथा
सुवर्णरेता विख्यातः सुवर्णश्चाप्यथो मतः। सुवर्णनामा च तथा सुवर्णप्रिय एव च॥ ५६
त्वमिन्द्रश्च यमश्चैव वरुणो धनदोऽनलः। उत्फुल्लश्चित्रभानुश्च स्वर्भानुर्भानुरेव च॥ ५७
होत्रं होता च होम्यं च हुतं चैव तथा प्रभुः। त्रिसौपर्णस्तथा ब्रह्मन्यजुषां शतरुद्रियम्॥ ५८
पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम्। प्राणश्च त्वं रजश्च त्वं तमः सत्त्वयुतस्तथा॥ ५९
प्राणोऽपानः समानश्च उदानो व्यान एव च। उन्मेषश्च निमेषश्च क्षुत्तृड्जृम्भा तथैव च॥ ६०
लोहिताङ्गश्च दंष्ट्री च महावक्त्रो महोदरः। शुचिरोमा हरिच्छ्मश्रुरूर्ध्वकेशश्चलाचलः॥ ६१
गीतवादित्रनृत्याङ्गो गीतवादनकप्रियः। मत्स्यो जालो जलोऽजय्यो जलव्यालः कुटीचरः॥६२
विकालश्च सुकालश्च दुष्कालः कालनाशनः। मृत्युश्चैवाक्षयोऽन्तश्च क्षमामायाकरोत्करः॥ ६३
संवर्तो वर्तकश्चैव संवर्तकबलाहकौ। घण्टाकी घण्टकी घण्टी चूडालो लवणोदधिः॥ ६४
ब्रह्मा कालाग्निवक्त्रश्च दण्डी मुण्डस्त्रिदण्डधृक्। चतुर्युगश्चतुर्वेदश्चतुर्होत्रश्चतुष्पथः॥ ६५
चातुराश्रम्यनेता च चातुर्वर्ण्यकरश्च ह। क्षराक्षरः प्रियो धूर्तो गणैर्गण्यो गणाधिपः॥ ६६
रक्तमाल्याम्बरधरो गिरीशो गिरिजाप्रियः। शिल्पीशः शिल्पिनः श्रेष्ठः सर्वशिल्पिप्रवर्तकः ६७
भगनेत्रान्तकश्चण्डः पूष्णो दन्तविनाशनः। स्वाहा स्वधा वषट्कारो नमस्कार नमोऽस्तु ते॥ ६८
गूढव्रतश्च गूढश्च गूढव्रतनिषेवितः। तरणस्तारणश्चैव सर्वभूतेषु तारणः॥ ६९
धाता विधाता संधाता निधाता धारणो धरः। तपो ब्रह्म च सत्यं च ब्रह्मचर्यं तथाऽऽर्जवम्॥

---

१ ख. °था। सेव्यस्तु त्र°। २ ख. शूद्रवर्णास्त्रयश्च। ३ ख. °णां च पतिः कञ्चुको योऽस्ति भो°। ४ ख. °ता भर्ताऽभितो गतः। ५ ख. इन्द्रः। ६ ख. °श्चैव क्ष°। ७ ख. °ग्निचक्रश्च।

भूतात्मा भूतकृद्भूतो भूतभव्यभवोद्भवः । भूर्भुवः स्वरितश्चैव भूतो ह्यग्निर्महेश्वरः ॥ * ७१
ब्रह्मावर्तः सुरावर्तः[1] कामावर्त नमोऽस्तु ते । कामबिम्बविनिर्हन्ता[2] कर्णिकारस्रजप्रियः ॥ ७२
गोनेता गोप्रचारश्च गोवृषेश्वरवाहनः । त्रैलोक्यगोप्ता गोविन्दो गोप्ता[3] गोगर्ग (?) एव च ॥ ७३
अखण्डचन्द्राभिमुखः सुमुखो दुर्मुखोऽमुखः । चतुर्मुखो बहुमुखो रणेष्वभिमुखः सदा ॥ ७४
हिरण्यगर्भः शकुनिर्धनदोऽर्थपतिर्विराट् । अधर्महा महादक्षो दण्डधारो रणप्रियः ॥ ७५
तिष्ठन्स्थिरश्च स्थाणुश्च निष्कम्पश्च सुनिश्चलः । दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः ॥ ७६
दुर्धरो दुर्वशो नित्यो दुर्दर्पो विजयो जयः । शर्वः[4] शशाङ्कनयनशीतोष्णः क्षुत्तृषा जरा ॥ ७७
आधयो व्याधयश्चैव व्याधिहा व्याधिपश्च यः । सह्यो यज्ञमृगव्याधो व्याधिनामाकरोऽकरः ७८
शिखण्डी पुण्डरीकश्च पुण्डरीकावलोकनः । दण्डधृक्चक्रदण्डश्च रौद्रभागविनाशनः[5] ॥ ७९
विषपोऽमृतपश्चैव सुरापः क्षीरसोमपः । मधुपश्चाऽऽपपश्चैव सर्वपश्च बलाबलः ॥ ८०
वृषाङ्गराम्भो(?)[6] वृषभस्तथा वृषभलोचनः । वृषभश्चैव विख्यातो लोकानां लोकसंस्कृतः ॥ ८१
चन्द्रादित्यौ चक्षुषी ते हृदयं च पितामहः । अग्निष्टोमस्तथा देहो धर्मकर्मप्रसाधितः ॥ ८२
न ब्रह्मा न च गोविन्दः पुराणऋषयो न च । माहात्म्यं वेदितुं शक्ता याथातथ्येन ते शिव ८३
शिवा या मूर्तयः सूक्ष्मास्ते मह्यं यान्तु दर्शनम् । ताभिर्मां सर्वतो[7] रक्ष पिता पुत्रमिवौरसम् ॥८४
रक्ष मां रक्षणीयोऽहं तवानघ नमोऽस्तु ते । भक्तानुकम्पी भगवान्भक्तश्चाहं सदा त्वयि ॥ ८५
यः सहस्राण्यनेकानि पुंसामावृत्य दुर्दृशाम् । तिष्ठत्येकः समुद्रान्ते स मे गोप्ताऽस्तु नित्यशः॥८६
यं विनिद्रा जितश्वासाः सत्त्वस्थाः समदर्शिनः । ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः
संभक्ष्य सर्वभूतानि युगान्ते समुपस्थिते । यः शेते जलमध्यस्थस्तं प्रपद्येऽम्बुशायिनम् ॥ ८८
प्रविश्य वदनं राहोर्यः सोमं पिबते निशि । ग्रसत्यर्कं च स्वर्भानुर्भूत्वा सोमाग्निरेव[9] च ॥ ८९
अङ्गुष्ठमात्राः पुरुषा देहस्थाः सर्वदेहिनाम् । रक्षन्तु ते च मां नित्यं नित्यं चाऽऽप्याययन्तु माम्
येनाप्युत्पादिता गर्भा अपो भागगताश्च ये । तेषां स्वाहा स्वधा चैव आप्नुवन्ति स्वदन्ति च९१
येन रोहन्ति देहस्थाः प्राणिनो रोदयन्ति च । हर्षयन्ति न कुप्यन्ति[10] नमस्तेभ्यस्तु नित्यशः[11] ९२
ये समुद्रे नदीदुर्गे पर्वतेषु गुहासु च । वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ॥ ९३
चतुष्पथेषु रथ्यासु चत्वरेषु सभासु च । हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च ॥ ९४
येषु पञ्चसु भूतेषु दिशासु विदिशासु च । इन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ॥ ९५
रसातलगता ये च ये च तस्मात्परं गताः । नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यस्तु सर्वशः[12] ॥ ९६
सर्वस्त्वं सर्वगो देवः सर्वभूतपतिर्भवः । सर्वभूतान्तरात्मा च तेन त्वं न निमन्त्रितः ॥ ९७
त्वमेव चेज्यसे देव यज्ञैर्विविधदक्षिणैः । त्वमेव कर्ता सर्वस्य तेन त्वं न निमन्त्रितः ॥ ९८
अथवा मायया देव मोहितः[13] सूक्ष्मया तव । तस्मात्तु कारणाद्वाऽपि त्वं मया न निमन्त्रितः ९९
प्रसीद मम देवेश त्वमेव शरणं मम । त्वं गतिस्त्वं प्रतिष्ठा च न चान्योऽस्तीति मे मतिः॥१००

* एतदग्रे ख. पुस्तके 'ज्ञेक्षणोद्वीक्षणः कान्तो दान्तो दान्तविनाशनः' इत्यर्धमधिकं दृश्यते ।

१ ग. स्वरावर्तः । २ ख. °म्बनिहन्ता च क° । ३ ग. गोमाङ्गो मार्गे । ४ ख. °शः सशोकशयनः प्रतृणश्च तृषा ज्वरः । आ° । ५ ग. °भागावि° । ६ ख. वृषाद्रुधान्यो । ७ ख. सततं । ८ ख.° त्ववश्यं स्व° । ९ ख. सोमं तथा रविम् । अ° । १० ख. हृष्यन्ति । ११ ख. °शः । स्थलीजलनदीदुर्गे । १२ ख. नित्यशः । १३ ख. °तः सर्वरूपया । त° ।

ब्रह्मोवाच—

स्तुत्वैवं स महादेवं विरराम प्रजापतिः । भगवानपि सुप्रीतः पुनर्दक्षमभाषत ॥ १०१

श्रीभगवानुवाच—

परितुष्टोऽस्मि ते दक्ष स्तवेनानेन सुव्रत । बहुना तु किमुक्तेन मत्समीपं गमिष्यसि ॥ १०२

ब्रह्मोवाच—

तथैवमब्रवीद्वाक्यं त्रैलोक्याधिपतिर्भवः । कृत्वाऽऽश्वासकरं वाक्यं सर्वज्ञो वाक्यसंहितम् ॥ १०३

श्रीशिव उवाच—

दक्ष दुःखं न कर्तव्यं यज्ञविध्वंसनं प्रति । अहं यज्ञहनस्तुभ्यं दृष्टमेतत्पुराऽनघ ॥ १०४
भूयश्च त्वं वरमिमं मत्तो गृह्णीष्व सुव्रत । प्रसन्नसुमुखो भूत्वा ममैकाग्रमनाः शृणु ॥ १०५
अश्वमेधसहस्रस्य वाजपेयशतस्य वै । प्रजापते मत्प्रसादात्फलभागी भविष्यसि ॥ १०६
वेदान्षडङ्गान्बुध्यस्व सांख्ययोगांश्च कृत्स्नशः । तपश्च विपुलं तप्त्वा दुश्चरं देवदानवैः ॥ १०७
अब्दैर्द्वादशभिर्युक्तं गूढमप्रज्ञनिन्दितम् । वर्णाश्रमकृतैर्धर्मैर्विनीतं न क्वचित्क्वचित् ॥ १०८
समागतं व्यवसितं पशुपाशविमोक्षणम् । सर्वेषामाश्रमाणां च मया पाशुपतं व्रतम् ॥ १०९
उत्पादितं दक्ष शुभं सर्वपापविमोचनम् । अस्य चीर्णस्य यत्सम्यक्फलं भवति पुष्कलम् ॥
तच्चास्तु सुमहाभाग मानसस्त्यज्यतां ज्वरः ॥ ११०

ब्रह्मोवाच—

एवमुक्त्वा तु देवेशः सपत्नीकः सहानुगः । अदर्शनमनुप्राप्तो दक्षस्यामिततेजसः ॥ १११
अवाप्य च तथा भागं यथोक्तं चोमया भवः । ज्वरं च सर्वधर्मज्ञो बहुधा व्यभजत्तदा ॥ ११२
शान्त्यर्थं सर्वभूतानां शृणुध्वमथ वै द्विजाः । शिखाभितापो नागानां पर्वतानां शिलाजतु ११३
अपां तु नीलिकां विद्यान्निर्मोको भुजगेषु च । खोरकः सौरभेयाणामूखरः पृथिवीतले ॥ ११४
शुनामपि च धर्मज्ञा दृष्टिप्रत्यवरोधनम् । रन्ध्रागतमथाश्वानां शिखोद्भेदश्च बर्हिणाम् ॥ ११५
नेत्ररागः कोकिलानां द्वेषः प्रोक्तो महात्मनाम् । जनानामपि भेदश्च सर्वेषामिति नः श्रुतम् ॥
शुकानामपि सर्वेषां हिक्किका प्रोच्यते ज्वरः । शार्दूलेष्वथ वै विप्राः श्रमो ज्वर इहोच्यते ११७
मानुषेषु च सर्वज्ञा ज्वरो नामैष कीर्तितः । मरणे जन्मनि तथा मध्ये चापि निवेशितः ॥ ११८
एतन्माहेश्वरं तेजो ज्वरो नाम सुदारुणः । नमस्यश्चैव मान्यश्च सर्वप्राणिभिरीश्वरः ॥ ११९

इमां ज्वरोत्पत्तिमदीनमानसः पठेत्सदा यः सुसमाहितो नरः ।
विमुक्तरोगः स नरो मुदायुतो लभेत कामांश्च यथामनीषितान् ॥ १२०

दक्षप्रोक्तं स्तवं चापि कीर्तयेद्यः शृणोति वा । नाशुभं प्राप्नुयात्किंचिद्दीर्घमायुरवाप्नुयात् ॥ १२१
यथा सर्वेषु देवेषु वरिष्ठो भगवान्भवः । तथा स्तवो वरिष्ठोऽयं स्तवानां दक्षनिर्मितः ॥ १२२
यशःस्वर्गसुरैश्वर्यवित्तादिजयकाङ्क्षिभिः । स्तोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः १२३
व्याधितो दुःखितो दीनो नरो ग्रस्तो भयादिभिः । राजकार्यनियुक्तो वा मुच्यते महतो भयात्
अनेनैव च देहेन गणानां च महेश्वरात् । इह लोके सुखं प्राप्य गणराडुपजायते ॥ १२५

---

१ ग. °ज्ञ नमस्तु° । २ ख. लब्ध्वा । ३ ग. °चित्समम् । गतान्तैरव्य° । ४ ख. °मोक्षणम् । ५ ख. यथाप्रोक्तं मखे भ° । ६ ख. घोरकः । ७ ग. ज्वरः । ८ ख. दण्डिका । ९ ख. °प्राः संमोहो ज्वर उच्य° । १० ख. धर्मज्ञा । ११ ख. °वान्हरः । त° ।

न यक्षा न पिशाचा वा न नागा न विनायकाः । कुर्युर्विघ्नं गृहे तस्य यत्र संस्तूयते भवः ॥ १२६
शृणुयाद्वा इदं नारी भक्त्याऽथ भवभाविता । पितृपक्षे भर्तृपक्षे पूज्या भवति चैव हं ॥ १२७
शृणुयाद्वा इदं सर्वं कीर्तयेद्वाऽप्यभीक्ष्णशः । तस्य सर्वाणि कार्याणि सिद्धिं गच्छन्त्यविघ्नतः ॥
मनसा चिन्तितं यच्च यच्च वाचाऽप्युदाहृतम् । सर्वं संपद्यते तस्य स्तवस्यास्यानुकीर्तनात् ॥ १२९
देवस्य सगुहस्याथ देव्या नन्दीश्वरस्य च । बलिं विभज(भाग)तः कृत्वा दमेन नियमेन च ॥
ततः प्रयुक्तो गृह्णीयान्नामान्याशु यथाक्रमम् । ईप्सिताल्लँभतेऽप्यर्थान्कामान्भोगांश्च मानवः १३१
मृतश्च स्वर्गमाप्नोति स्त्रीसहस्रसमावृतः । सर्वकामैसुयुक्तो वा युक्तो वा सर्वपातकैः ॥ १३२
पठन्दक्षकृतं स्तोत्रं सर्वपापैः प्रमुच्यते । मृतश्च गणसायुज्यं पूज्यमानः सुरासुरैः ॥ १३३
वृषेण विनियुक्तेन विमानेन [3]विराजते । आभूतसंप्लवस्थायी रुद्रस्यानुचरो भवेत् ॥ १३४
इत्याह भगवान्व्यासः पराशरसुतः प्रभुः । नैतद्वेदयते कश्चिन्नैतच्छ्राव्यं च [4]कस्यचित् ॥ १३५
श्रुत्वेमं परमं गुह्यं येऽपि स्युः पापयोनयः । वैश्याः स्त्रियश्च शूद्राश्च रुद्रलोकमवाप्नुयुः ॥ १३६
श्रावयेद्यश्च विप्रेभ्यः सदा पर्वसु पर्वसु । रुद्रलोकमवाप्नोति द्विजो वै नात्र संशयः ॥ १३७

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे दक्षस्तवनिरूपणं नाम
चत्वारिंशोऽध्यायः ॥ ४० ॥

आदितः श्लोकानां समष्ट्यङ्काः—२८८३

अथैकचत्वारिंशोऽध्यायः ।

लोमहर्षण उवाच—

श्रुत्वैवं वै मुनिश्रेष्ठाः कथां पापप्रणाशिनीम् । रुद्रक्रोधोद्भवां पुण्यां व्यासस्य वदतो द्विजाः॥ १
पार्वत्याश्च तथा रोषं क्रोधं शंभोश्च दुःसहम् । उत्पत्तिं वीरभद्रस्य भद्रकाल्याश्च संभवम् ॥ २
दक्षयज्ञविनाशं च वीर्यं शंभोस्तथाऽद्भुतम् । पुनः प्रसादं देवस्य दक्षस्य सुमहात्मनः ॥ ३
यज्ञभागं च रुद्रस्य दक्षस्य च फलं क्रतोः । हृष्टा बभूवुः संप्रीता विस्मिताश्च पुनः पुनः ॥ ४
पप्रच्छुश्च पुनर्व्यासं कथाशेषं[5] तथा द्विजाः । पृष्टः प्रोवाच तान्व्यासः क्षेत्रमेकाम्रकं पुनः ॥ ५

व्यास उवाच—

ब्रह्मप्रोक्तां कथां पुण्यां श्रुत्वा तु ऋषिपुंगवाः । प्रशशंसुस्तदा हृष्टा रोमाञ्चिततनूरुहाः ॥ ६

ऋषय ऊचुः—

अहो देवस्य माहात्म्यं त्वया शंभोः प्रकीर्तितम् । दक्षस्य च सुरश्रेष्ठ यज्ञविध्वंसनं तथा ॥ ७
एकाम्रकं क्षेत्रवरं वक्तुमर्हसि सांप्रतम् । श्रोतुमिच्छामहे ब्रह्मन्परं कौतूहलं हि नः ॥ ८

व्यास उवाच—

तेषां तद्वचनं श्रुत्वा लोकनाथश्चतुर्मुखः । प्रोवाच शंभोस्तत्क्षेत्रं भूतले दुष्कृतच्छदम् ॥ ९

ब्रह्मोवाच—

शृणुध्वं मुनिशार्दूलाः प्रवक्ष्यामि समासतः । सर्वपापहरं पुण्यं क्षेत्रं परमदुर्लभम् ॥ १०

---

१ ख. °र्गप्राप्तः स्यात्स्त्रीस° । २ ख. °मप्रयु° । ३ ग. विराजता । ४ ग. कांहचि° । ५ ख. °षं पुनर्द्विजाः ।

लिङ्गकोटिसमायुक्तं वाराणसीसमं शुभम् । एकाम्रकेति विख्यातं तीर्थाष्टकसमन्वितम् ॥ ११
एकाम्रवृक्षस्तत्राऽऽसीत्पुरा कल्पे द्विजोत्तमाः । नाम्ना तस्यैव तत्क्षेत्रमेकाम्रकमिति श्रुतम् ॥ १२
हृष्टपुष्टजनाकीर्णं नरनारीसमन्वितम् । विद्वांसग(द्यावद्व)णभूयिष्ठं धनधान्यादिसंयुतम् ॥ १३
गृहगोपुरसंबाधं त्रिकचाद्वारभूषितम् । नानावणिक्समाकीर्णं नानारत्नोपशोभितम् ॥ १४
पुराट्टालकसंयुक्तं रथिभिः समलंकृतम् । राजहंसनिभैः शुभ्रैः प्रासादैरुपशोभितम् ॥ १५
मार्गगद्वारसंयुक्तं सितप्राकारशोभितम् । रक्षितं शस्त्रसंघैश्च परिखाभिरलंकृतम् ॥ १६
[*सितरक्तैस्तथा पीतैः कृष्णश्यामैश्च वर्णकैः । समीरणोद्धताभिश्च पताकाभिरलंकृतम्] ॥ १७
नित्योत्सवप्रमुदितं नानावादित्रनिस्वनैः । वीणावेणुमृदङ्गैश्च क्षेपणीभिरलंकृतम् ॥ १८
देवतायतनैर्दिव्यैः प्राकारोद्यानमण्डितैः । पूजाविचित्ररचितैः सर्वत्र समलंकृतम् ॥ १९
स्त्रियः प्रमुदितास्तत्र दृश्यन्ते तनुमध्यमाः । हारैरलंकृतग्रीवाः पद्मपत्रायतेक्षणाः ॥ २०
पीनोन्नतकुचाः श्यामाः पूर्णचन्द्रनिभाननाः । स्थिरालकाः सुकपोलाः काञ्चीनूपुरनादिताः २१
सुकेश्यश्चारुजघनाः कर्णान्तायतलोचनाः । सर्वलक्षणसंपन्नाः सर्वाभरणभूषिताः ॥ २२
दिव्यवस्त्रधराः शुभ्राः काश्चित्काञ्चनसंनिभाः । हंसवारणगामिन्यः कुचभारावनामिताः ॥ २३
दिव्यगन्धानुलिप्ताङ्गाः कर्णाभरणभूषिताः । मदालसाश्च सुश्रोण्यो नित्यं प्रहसिताननाः ॥ २४
ईषद्विस्पष्टदशना [६]बिम्बोष्ठा मधुरस्वराः । ताम्बूलराञ्जितमुखा विदग्धाः प्रियदर्शनाः ॥ २५
सुभगाः प्रियवादिन्यो नित्यं यौवनगर्विताः । दिव्यवस्त्रधराः सर्वाः सदा चारित्रमण्डिताः २६
क्रीडन्ति ताः सदा तत्र स्त्रियश्चाप्+सरसोपमाः । स्वे स्वे गृहे प्रमुदिता दिवा रात्रौ वराननाः २७
पुरुषास्तत्र दृश्यन्ते रूपयौवनगर्विताः । सर्वलक्षणसंपन्नाः सुमृष्टमणिकुण्डलाः ॥ २८
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च मुनिसत्तमाः । स्वधर्मनिरतास्तत्र निवसन्ति सुधार्मिकाः॥२९
अन्याश्च तत्र तिष्ठन्ति वारमुख्याः सुलोचनाः । घृताचीमेनकातुल्यास्तथा समतिलोत्तमाः ॥३०
उर्वशीसदृशाश्चैवं विप्रचित्तिनिभास्तथा । विश्वाचीसहजन्याभाः प्रम्लोचासदृशास्तथा ॥ ३१
सर्वास्ताः प्रियवादिन्यः सर्वा विहसिताननाः । कलाकौशलसंयुक्ताः सर्वास्ता गुणसंयुताः ३२
एवं पण्यस्त्रियस्तत्र नृत्यगीतविशारदाः । निवसन्ति मुनिश्रेष्ठाः सर्वस्त्रीगुणगर्विताः ॥ ३३
प्रेक्षणालापकुशलाः सुन्दर्यः प्रियदर्शनाः । †न रूपहीना दुर्वृत्ता न परद्रोहकारिकाः ॥ ३४
यासां कटाक्षपातेन मोहं गच्छन्ति मानवाः । न तत्र निर्धनाः सन्ति न मूर्खा न परद्विषः ॥३५
न रोगिणो न मलिना न कदर्या न मायिनः । न रूपहीना दुर्वृत्ता न परद्रोहकारिणः ॥ ३६
तिष्ठन्ति मानवास्तत्र क्षेत्रे जगति विश्रुते । सर्वत्र सुखसंचारं सर्वसत्त्वसुखावहम् ॥ ३७
नानाजनैःसमाकीर्णं सर्वसस्यसमन्वितम् । कर्णिकारैश्च पनसैश्चम्पकैर्नागकेसरैः ॥ ३८
पाटलाशोकबकुलैः कपित्थैर्बहुलैर्धवैः । चूतनिम्बकदम्बैश्च तथाऽन्यैः पुष्पजातिभिः ॥ ३९
नीपकैर्धवखदिरैर्लताभिश्च विराजितम् । शालैस्तालैस्तमालैश्च नारिकेलैः शुभाञ्जनैः ॥ ४०
अर्जुनैः समपर्णैश्च कोविदारैः सपिप्पलैः । लकुचैः सरलैर्लोध्रैर्हिन्तालैर्देवदारुभिः ॥ ४१

---

* अयं श्लोको नास्ति ग. पुस्तके । + अदन्तमप्सरसशब्दं प्रकल्प्य योज्यमेतत्कथंचित् । † इदमर्धं ग. पुस्तके न ।

---

१ ख. स्मृतम् । २ ग. °त्रवादितम् । वी° । ३ ख. °कारैर्धातुम° । ४ ग. हावभावानत° । ५ ख. °न्द्रसमान° । ६ ख. सुकण्ठ्यो । ७ ग. °व पूर्ववित्तनि° । ८ ख. °वाश्च गु° । ९ ख. मानिनः । १० ग. °नपदाकी° । ११ ख. °वैदरैर्ध° ।

पलाशैर्मुचुकुन्दैश्च पारिजातैः सकुब्जकैः । कदलीवनखण्डैश्च जम्बूपूगफलैस्तथा ॥ ४२
केतकीकरवीरैश्च अतिमुक्तैश्च किंशुकैः । मन्दारकुन्दपुष्पैश्च तथाऽन्यैः पुष्पजातिभिः ॥ ४३
नानापक्षिरुतैः सेव्यैरुद्यानैर्नन्दनोपमैः । फलभारानतैर्वृक्षैः सर्वर्तुकुसुमोत्करैः ॥ ४४
चकोरैः शतपत्रैश्च भृङ्गराजैश्च कोकिलैः । कलविङ्कैर्मयूरैश्च प्रियपुत्रैः शुकैस्तथा ॥ ४५
जीवंजीवकहारीतैश्चातकैर्वनवेष्टितैः । नानापक्षिगणैश्चान्यैः कूजद्भिर्मधुरस्वरैः ॥ ४६
दीर्घिकाभिस्तडागैश्च पुष्करिणीभिश्च वापिभिः । नानाजलाशयैश्चान्यैः पद्मिनीखण्डमण्डितैः ४७
कुमुदैः पुण्डरीकैश्च तथा नीलोत्पलैः शुभैः । कादम्बैश्चक्रवाकैश्च तथैव जलकुक्कुटैः ॥ ४८
कारण्डवैः प्लवैर्हंसैस्तथाऽन्यैर्जलचारिभिः । एवं नानाविधैर्वृक्षैः पुष्पैर्नानाविधैर्वरैः ॥ ४९
नानाजलाशयैः पुण्यैः शोभितं तत्समन्ततः । आस्ते तत्र स्वयं देवः कृत्तिवासा वृषध्वजः ॥५०
हिताय सर्वलोकस्य भुक्तिमुक्तिप्रदः शिवः । पृथिव्यां यानि तीर्थानि सरितश्च सरांसि च॥५१
पुष्करिण्यस्तडागानि वाप्यः कूपाश्च सागराः । तेभ्यः पूर्वं समाहृत्य जलबिन्दून्पृथक्पृथक् ॥५२
सर्वलोकहितार्थाय रुद्रः सर्वसुरैः सह । तीर्थं बिन्दुसरो नाम तस्मिन्क्षेत्रे द्विजोत्तमाः ॥ ५३
चकार ऋषिभिः सार्धं तेन बिन्दुसरः स्मृतम् । अष्टम्यां बहुले पक्षे मार्गशीर्षे द्विजोत्तमाः ॥५४
यस्तत्र यात्रां कुरुते विषुवे विजितेन्द्रियः । विधिवद्बिन्दुसरसि स्नात्वा श्रद्धासमन्वितः ॥ ५५
देवानृषीन्मनुष्यांश्च पितॄन्संतर्प्य वाग्यतः । तिलोदकेन विधिना नामगोत्रविधानवित् ॥ ५६
स्नात्वैवं विधिवत्तत्र सोऽश्वमेधफलं लभेत् । ग्रहोपरागे विषुवे संक्रान्त्यामयने तथा ॥ ५७
युगादिषु षडशीत्यां तथाऽन्यत्र शुभे तिथौ । ये तत्र दानं विप्रेभ्यः प्रयच्छन्ति धनादिकम्॥५८
अन्यतीर्थाच्छतगुणं फलं ते प्राप्नुवन्ति वै । पिण्डं ये संप्रयच्छन्ति पितृभ्यः सरसस्तटे ॥ ५९
पितॄणामक्षयां तृप्तिं ते कुर्वन्ति न संशयः । ततः शंभोर्गृहं गत्वा वाग्यतः संयतेन्द्रियः ॥ ६०
प्रविश्य पूजयेच्छर्वं कृत्वा तं त्रिः प्रदक्षिणम् । घृतक्षीरादिभिः स्नानं कारयित्वा भवं शुचिः६१
चन्दनेन सुगन्धेन विलिप्य कुङ्कुमेन च । ततः संपूजयेद्देवं चन्द्रमौलिमुमापतिम् ॥ ६२
पुष्पैर्नानाविधैर्मेध्यैर्बिल्वार्ककमलादिभिः । आगमोक्तेन मन्त्रेण वेदोक्तेन च शंकरम् ॥ ६३
अदीक्षितस्तु नाम्नैव मूलमन्त्रेण चार्चयेत् । एवं संपूज्य तं देवं गन्धपुष्पानुरागिभिः ॥ ६४
धूपदीपैश्च नैवेद्यैरुपहारैस्तथा स्तवैः । दण्डवत्प्रणिपातैश्च गीतैर्वाद्यैर्मनोहरैः ॥ ६५
नृत्यजप्यनमस्कारैर्जयशब्दैः प्रदक्षिणैः । एवं संपूज्य विधिवद्देवदेवमुमापतिम् ॥ ६६
सर्वपापविनिर्मुक्तो रूपयौवनगर्वितः । कुलैकविंशमुद्धृत्य दिव्याभरणभूषितः ॥ ६७
सौवर्णेन विमानेन किङ्किणीजालमालिना । उपगीयमानो गन्धर्वैरप्सरोभिरलंकृतः ॥ ६८
उद्योतयन्दिशः सर्वाः शिवलोकं स गच्छति । भुक्त्वा तत्र सुखं विप्रा मनसः प्रीतिदायकम्६९
तल्लोकवासिभिः सार्धं यावदाभूतसंप्लवम् । ततस्तस्मादिहाऽऽयातः पृथिव्यां पुण्यसंक्षये ॥ ७०
जायते योगिनां गेहे चतुर्वेदी द्विजोत्तमाः । योगं पाशुपतं प्राप्य ततो मोक्षमवाप्नुयात् ॥ ७१
शयनोत्थापने चैव संक्रान्त्यामयने तथा । अशोकाख्यां तथाऽष्टम्यां पवित्रारोपणे तथा ॥ ७२

---

१ ख. °कुब्जकैः । २ ख. °म्बूकन्दफ° । ३ ख. °सुमाकरैः । ४ ख. °स्वनैः । दी° । ५ ख. °रिण्याश्च राजिभिः । ६ ख. °धैर्जनैः । ना° । ७ ख. सदा । ८ ख. च । ९ ख. ये च प्र° । १० ख. गच्छेद्वाग्य° । ११ ख. वा । १२ ख. °धैर्दिव्यैः पुंनागक° । १३ ख. युगसंक्षये ।

ये च पश्यन्ति तं देवं कृत्तिवाससमुत्तमम् । विमानेनार्कवर्णेन शिवलोकं व्रजन्ति ते ॥ ७३
सर्वकालेऽपि तं देवं ये पश्यन्ति सुमेधसः । तेऽपि पापविनिर्मुक्ताः शिवलोकं व्रजन्ति वै ॥ ७४
देवस्य पश्चिमे पूर्वे दक्षिणे चोत्तरे तथा । योजनद्वितयं सार्धं क्षेत्रं तद्भुक्तिमुक्तिदम् ॥ ७५
तस्मिन्[1]क्षेत्रवरे लिङ्गं भास्करेश्वरसंज्ञितम् । पश्यन्ति ये तु तं देवं स्नात्वा कुण्डे महेश्वरम् ॥ ७६
आदित्येनार्चितं पूर्वं देवदेवं त्रिलोचनम् । सर्वपापविनिर्मुक्ता विमानवरमास्थिताः ॥ ७७
उपगीयमाना गन्धर्वैः शिवलोकं व्रजन्ति ते । तिष्ठन्ति तत्र मुदिताः कल्पमेकं द्विजोत्तमाः ॥ ७८
भुक्त्वा तु विपुलान्भोगाञ्शिवलोके मनोरमान् । पुण्यक्षयादिहाऽऽयाता जायन्ते प्रवरे कुले ७९
अथवा योगिनां गेहे वेदवेदाङ्गपारगाः । उत्पद्यन्ते द्विजवराः सर्वभूतहिते रताः ॥ ८०
मोक्षशास्त्रार्थकुशलाः सर्वत्र समबुद्धयः । योगं शंभोर्वरं प्राप्य ततो मोक्षं व्रजन्ति ते ॥ ८१
तस्मिन्क्षेत्रवरे पुण्ये लिङ्गं यद्दृश्यते द्विजाः । पूज्यापूज्यं च सर्वत्र वने रथ्यान्तरेऽपि वा ॥ ८२
चतुष्पथे श्मशाने वा यत्र कुत्र च तिष्ठति । दृष्ट्वा तल्लिङ्गमव्यग्रः श्रद्धया सुसमाहितः ॥ ८३
स्नापयित्वा तु तं भक्त्या गन्धैः पुष्पैर्मनोहरैः । धूपैर्दीपैः सनैवेद्यैर्नमस्कारैस्तथा स्तवैः ॥ ८४
दण्डवत्प्रणिपातैश्च नृत्यगीतादिभिस्तथा । संपूज्यैवं विधानेन शिवलोकं व्रजेन्नरः ॥ ८५
नारी वा द्विजशार्दूलाः संपूज्य श्रद्धयाऽन्विता । पूर्वोक्तं फलमाप्नोति नात्र कार्या विचारणा ८६
कः शक्नोति गुणान्वक्तुं समग्रान्मुनिसत्तमाः । तस्य क्षेत्रवरस्यार्थ[2] ऋते देवान्महेश्वरात् ॥ ८७
तस्मिन्क्षेत्रोत्तमे गत्वा श्रद्धया[3]ऽश्रद्धयाऽपि वा । [4]माधवादिषु मासेषु नरो वा यदिवाऽङ्गना[5] ॥८८
यस्मिन्यस्मिंस्तिथौ विप्राः स्नात्वा बिन्दुसरोम्भसि । पश्येद्देवं विरूपाक्षं देवीं च वरदां शिवाम्
[6]गणं चण्डं कार्तिकेयं गणेशं वृषभं तथा । कल्पद्रुमं च सावित्रीं शिवलोकं स गच्छति ॥ ९०
स्नात्वा च कापिले तीर्थे विधिवत्पापनाशने । प्राप्नोत्यभिमतान्कामाञ्शिवलोकं स गच्छति ९१
यः स्तम्भं तत्र विधिवत्करोति नियतेन्द्रियः । कुलैकविंशमुद्धृत्य शिवलोकं स गच्छति ॥ ९२
एकाम्रके शिवक्षेत्रे वाराणसीसमे शुभे[7] । स्नानं करोति यस्तत्र मोक्षं स लभते ध्रुवम् ॥ ९३

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवाद एकाम्रक्षेत्रमाहात्म्यवर्णनं
नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—२९७६

अथ द्विचत्वारिंशोऽध्यायः ।

ब्रह्मोवाच—

विरजे विरजा माता ब्रह्माणी संप्रतिष्ठिता । यस्याः संदर्शना[8]न्मर्त्यः पुनात्यासप्तमं कुलम्[9] ॥ १
सकृद्दृष्ट्वा तु तां देवीं भक्त्याऽऽपूज्य प्रणम्य च । नरः स्ववंशमुद्धृत्य मम लोकं स गच्छति ॥२
[10]अन्याश्च तत्र तिष्ठन्ति [11]विरजे लोकमातरः । सर्वपापहरा देव्यो वरदा भक्तिवत्सलाः ॥ ३

---

१ ग. °न्क्षेत्रे व° । २ क. °थ तस्य देवस्य शूलिनः । त° । ३ ख. °या परयाऽ° । ४ ख. माघाद्यादि° । ५ ख. °ना । तस्मिन्क्षेत्रे स्थितो वि° । ६ ख. गणांश्चन्द्रं का° । ७ ख. °भे । कालं नयति । ८ ग. °र्शने मर्त्यः । ९ ख. °म् । तत्र दृष्ट्वा । १० ख. अथान्यास्तत्र । ११ ख. विरजा ।

आस्ते वैतरणी तत्र सर्वपापहरा नदी । यस्यां स्नात्वा नरश्रेष्ठः सर्वपापैः प्रमुच्यते ॥ ४
आस्ते स्वयं[1]भूस्तत्रैवं[2] क्रोडरूपी हरिः स्वयम् । दृष्ट्वा प्रणम्य तं भक्त्या[3] परं विष्णुं व्रजन्ति ते ५
कापिले गोग्रहे सोमे तीर्थे चालाबुसंज्ञिते । [4]मृत्युंजये क्रोडतीर्थे वासुके सिद्धकेश्वरे ॥ ६
तीर्थेष्वेतेषु मतिमान्विरजे संयतेन्द्रियः । गत्वाऽष्टतीर्थं विधिवत्स्नात्वा देवान्प्रणम्य च ॥ ७
सर्वपापविनिर्मुक्तो विमानवरमास्थितः । उपगीयमानो गन्धर्वैर्मम लोके महीयते ॥ ८
विरजे यो मम क्षेत्रे पिण्डदानं करोति वै । स [5]करोत्यक्षयां तृप्तिं पितॄणां नात्र संशयः ॥ ९
मम क्षेत्रे मुनिश्रेष्ठा विरजे ये कलेवरम् । परित्यजन्ति पुरुषास्ते मोक्षं प्राप्नुवन्ति वै ॥ १०
स्नात्वा यः सागरे मर्त्यो दृष्ट्वा च कपिलं हरिम् । पश्येद्देवीं च वाराहीं स याति त्रिदशालयम्
सन्ति चान्यानि तीर्थानि पुण्यान्यायतनानि च । [6]तत्काले तु मुनिश्रेष्ठा वेदितव्यानि तानि वै ॥
समुद्रस्योत्तरे [7]तीरे तस्मिन्देशे द्विजोत्तमाः । [8]आस्ते गुह्यं परं क्षेत्रं मुक्तिदं पापनाशनम् ॥ १३
सर्वत्र वालुकाकीर्णं [9]पवित्रं सर्वकामदम् । दशयोजनविस्तीर्णं क्षेत्रं परमदुर्लभम् ॥ १४
अशोकार्जुनपुंनागैर्बकुलैः सरलद्रुमैः । पनसैर्ना[10]रिकेलैश्च शालैस्तालैः कपित्थकैः ॥ १५
चम्पकैः कर्णिकारैश्च चूतबिल्वैः सपाटलैः । कदम्बैः कोविदारैश्च लकुचैर्नागकेसरैः ॥ १६
प्राचीनामलकैर्लोध्रैर्नारङ्गैर्धवखादिरैः । सर्जभूर्जाश्वकर्णैश्च तमालैर्देवदारुभिः ॥ १७
मन्दारैः पारिजातैश्च न्यग्रोधागुरुचन्दनैः । खर्जूराम्रातकैः सिद्धैर्मुचुकुन्दैः सकिंशुकैः ॥ १८
अश्वत्थैः सप्तपर्णैश्च मधुधारशुभाञ्जनैः[11] । शिंशपामलकैर्नीपैर्निम्बतिन्दुविभीतकैः ॥ १९
सर्वर्तुफलगन्धाढ्यैः सर्वर्तुकुसुमोज्ज्वलैः । मनोह्लादकरैः शुभ्रैर्नानाविहगनादितैः ॥ २०
श्रोत्ररम्यैः सुमधुरै[12]र्बलनिर्मदनेरितैः । मनसः प्रीतिजनकैः शब्दैः खगै[13]र्मुखेरितैः ॥ २१
चकोरैः शतपत्रैश्च भृङ्गराजैस्तथा शुकैः । कोकिलैः कलविङ्कैश्च हारीतैर्जीवजीवकैः ॥ २२
प्रियपुत्रैश्चातकैश्च तथाऽन्यैर्मधुरस्वरैः । श्रोत्ररम्यैः प्रियकरैः कूजद्भिश्चार्वधिष्ठितैः ॥ २३
केतकीवनखण्डैश्च अतिमुक्तैः सकुब्जकैः । मालतीकु[14]न्दैर्बाणैश्च करवीरैः सितेतरैः ॥ २४
जम्बीरकरुणाङ्कोलैर्दाडिमैर्बीजपूरकैः । मातुलुङ्गैः पूगफलैर्हिन्तालैः कदलीवनैः ॥ २५
अन्यैश्च विविधैर्वृक्षैः पुष्पैश्चान्यैर्म[15]नोहरैः । लतावितानगुल्मैश्च विविधैश्च जलाशयैः ॥ २६
दीर्घिकाभिस्तडागै[16]श्च पुष्करिणीभिश्च वापिभिः । नानाजलाशयैः पुण्यैः पद्मिनीखण्डमण्डितैः २७
सरांसि च मनोज्ञानि प्रसन्नसलिलानि च । [17]कुमुदैः पुण्डरीकैश्च तथा नीलोत्पलैः शुभैः ॥ २८
कह्लारैः कमलैश्चापि आचितानि समन्ततः । कादम्बैश्चक्रवाकैश्च तथैव जलकुक्कुटैः ॥ २९
कार[18]ण्डवैः प्लवैर्हंसैः कूर्मैर्मत्स्यैश्च मद्गुभिः । दात्यूहसारसाकीर्णैः कोयष्टिबकशोभितैः ॥ ३०
एतैश्चान्यैश्च [19]कूजद्भिः समन्ताज्जले[20]चारिभिः । खगैर्जलचरैश्चान्यैः कुसुमैश्च जलोद्भवैः ॥ ३१
एवं नानाविधैर्वृक्षैः पुष्पैः स्थलजलोद्भवैः । ब्रह्मचारिगृहस्थैश्च वानप्रस्थैश्च भिक्षुभिः ॥ ३२
स्वधर्मनिरतैर्वर्णैस्तथाऽन्यैः समलंकृतम् । हृष्टपुष्टजनाकीर्णं नरनारीसमाकुलम् ॥ ३३

---

१ ख. °यं तु तत्रै° । २ ख. °व क्रीडन्नपि ह° । ३ ख. °क्त्या नरस्तु मत्पुरं व्रजेत् । का° । ४ ख. मृत्युक्षये । ५ ख. करोति परां तृ° । ६ ग. उत्कले । ७ ख भागे । ८ ख. अस्ति । ९ ख. सावित्रं । १० ख. °र्नालिकेरैश्च । ११ ख. °नैः । शिंशपाम° । १२ ख. °रैर्वर्णालंकारभूषितैः । १३ ख. °मुखोदितैः । १४ ख. °न्दपुष्पैश्च । १५ ख. °नोरमैः । ल° । १६ ख. °श्च कासारैश्च समन्ततः । ना° । १७ ख. क्रमुकैः । १८ ख. °ण्डवैर्बकैर्हं° । १९ ख. कीर्णानि । २० ख. °लवासिभिः ।

अशेषविद्यानिलयं सर्वधर्मगुणाकरम् । एवं सर्वगुणोपेतं क्षेत्रं परमदुर्लभम् ॥ ३४
आस्ते[1] तत्र मुनिश्रेष्ठा विख्यातः पुरुषोत्तमः । यावदुत्कलमर्यादा दिक्क्रमेण प्रकीर्तिता ॥ ३५
तावत्कृष्णप्रसादेन देशः पुण्यतमो हि सः । यत्र तिष्ठति विश्वात्मा देशे स पुरुषोत्तमः[2] ॥ ३६
जगद्व्यापी जगन्नाथस्तत्र सर्वं प्रतिष्ठितम् । अहं रुद्रश्च शक्रश्च देवाश्चाग्निपुरोगमाः ॥ ३७
निवसामो मुनिश्रेष्ठास्तस्मिन्देशे सदा वयम् । गन्धर्वाप्सरसः सर्वाः पितरो देवमानुषाः ॥ ३८
यक्षा विद्याधराः सिद्धा मुनयः संशितव्रताः । ऋषयो वालखिल्याश्च कश्यपाद्याः प्रजेश्वराः ३९
सुपर्णाः किंनरा नागास्तथाऽन्ये स्वर्गवासिनः । साङ्गाश्च चतुरो वेदाः शास्त्राणि विविधानि च
इतिहासपुराणानि यज्ञाश्च वरदक्षिणाः । नद्यश्च विविधाः पुण्यास्तीर्थान्यायतनानि च ॥ ४१
सागराश्च तथा शैलास्तस्मिन्देशे व्यवस्थिताः । एवं पुण्यतमे देशे देवर्षिपितृसेविते ॥ ४२
सर्वोपभोगसहिते वासः कस्य न रोचते । श्रेष्ठत्वं कस्य देशस्य किं चै[3]ान्यदधिकं ततः ॥ ४३
आस्ते यत्र स्वयं देवो मुक्तिदः पुरुषोत्तमः । धन्यास्ते विबुधप्रख्या ये वसन्त्युत्कले नराः[4] ॥ ४४
तीर्थराजजले स्नात्वा पश्यन्ति पुरुषोत्तमम् । स्वर्गे वसन्ति ते मर्त्या न ते यान्ति यमालये ॥ ४५
ये वसन्त्युत्कले क्षेत्रे पुण्ये श्रीपुरुषोत्तमे । सफलं जीवितं तेषामुत्कलानां सुमेधसाम् ॥ ४६
ये पश्यन्ति सुरश्रेष्ठं प्रसन्नायतलोचनम्[5] । चारुभ्रूकेशमुकुटं चारुकर्णावतंसकम् ॥ ४७
चारुस्मितं चारुदन्तं चारु[7]कुण्डलमण्डितम् । सुनासं सुकपोलं च सुललाटं सुलक्षणम् ॥ ४८
त्रैलोक्यानन्दजननं कृष्णस्य मुखपङ्कजम् ॥ ४९

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवाद उत्कलक्षेत्रवर्णनं नाम
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३०२४

अथ त्रिचत्वारिंशोऽध्यायः ।

ब्रह्मोवाच—
पुरा कृतयुगे विप्राः शक्रतुल्यपराक्रमः । बभूव नृपतिः श्रीमानिन्द्रद्युम्न इति श्रुतः ॥ १
सत्यवादी शुचिर्दक्षः सर्वशास्त्रविशारदः । रूपवान्सुभगः शूरो दाता भोक्ता प्रियंवदः ॥ २
यष्टा समस्तयज्ञानां ब्रह्मण्यः सत्यसंगरः । धनुर्वेदे च वेदे च शास्त्रे च निपुणः कृती ॥ ३
वल्लभो[10] नरनारीणां पौर्णमास्यां यथा शशी । आदित्य इव दुष्प्रेक्ष्यः शत्रुसंघभयंकरः ॥ ४
वैष्णवः सत्त्वसंपन्नो[11] जितक्रोधो जितेन्द्रियः । अध्येता योगसांख्यानां मुमुक्षुर्धर्मतत्परः ॥ ५
एवं स पालयन्पृथ्वीं राजा सर्वगुणाकरः । तस्य बुद्धिः समुत्पन्ना हरेराराधनं प्रति ॥ ६
कथमाराधयिष्यामि देवदेवं जनार्दनम् । कस्मिन्क्षेत्रेऽथवा तीर्थे नदीतीरे तथाऽऽश्रमे ॥ ७
एवं चिन्तापरः सोऽथ निरीक्ष्य मनसा महीम् । आलोक्य सर्वतीर्थानि क्षेत्रा[12]ण्यथ पुराण्यपि ८

---

१ ख. अस्ति । २ ख. °मः । आत्मा स्वयं ज° । ३ ख. चाऽऽत्त्यमधि° । ४ ख. शुभे । ५ ख. °म् । सुचारुकें° । ६ ग. °र्णालकाञ्चितम् । ७ ख. °रुचन्दनचर्चित° । ८ ख. °वेशास्त्रभृतां वरः । रू° । ९ ख. स्रष्टा । १० ख. °भो वर° । ११ ख. °न्नो हृष्टः सर्वजनप्रियः । अध्यात्मविद्यानिरतो मु° । १२ ख. °त्राण्यायतनानि च । ता° ।

तानि[1] सर्वाणि संत्यज्य[2] जगामा[3]ऽऽयतनं पुनः । विख्यातं परमं क्षेत्रं मुक्तिदं पुरुषोत्तमम् ॥ ९
स गत्वा तत्क्षेत्र[4]वरं समृद्धबलवाहनः । अयजच्चाश्वमेधेन विधिवद्भूरिदक्षिणः ॥ १०
कारयित्वा महोत्सेधं[5] प्रासादं[6] चैवं विश्रुतम् । तत्र संकर्षणं कृष्णं सुभद्रां *स्थाप्य वीर्यवान् ॥
पञ्चतीर्थं च विधिवत्कृत्वा तत्र महीपतिः । स्नानं दानं तपो होमं देवताप्रेक्षणं तथा ॥ १२
भक्त्या चाऽऽराध्य विधिवत्प्रत्यहं पुरुषोत्तमम् । प्रसादाद्देवदेवस्य ततो मोक्षमवाप्तवान् ॥ १३
मार्कण्डेयं च कृष्णं च दृष्ट्वा रामं च भो द्विजाः । सागरे चेन्द्रद्युम्नाख्ये स्नात्वा मोक्षं लभेद्ध्रुवम्

मुनय ऊचुः—

कस्मात्स नृपतिः पूर्वमिन्द्रद्युम्नो जगत्पतिः । जगाम परमं क्षेत्रं मुक्तिदं पुरुषोत्तमम् ॥ १५
गत्वा तत्र सुरश्रेष्ठ कथं स नृपसत्तमः । वाजिमेधेन विधिवदिष्टवान्पुरुषोत्तमम् ॥ १६
कथं स सर्वफलदे क्षेत्रे परमदुर्लभे । प्रासादं कारयामास चेष्टं[9] त्रैलोक्यविश्रुतम् ॥ १७
कथं स कृष्णं रामं च सुभद्रां च प्रजापते । निर्ममे राजशार्दूलः क्षेत्रं रक्षितवान्कथम् ॥ १८
कथं तत्र महीपालः प्रासादे भुवनोत्तमे । स्थापयामास मतिमान्कृष्णादींस्त्रिदशा[10]र्चितान् ॥ १९
एतत्सर्वं सुरश्रेष्ठ विस्तरेण यथातथम् । वक्तुमर्हस्यशेषेण चरितं तस्य धीमतः ॥ २०
न तृप्तिमधिगच्छामस्तव वाक्यामृतेन वै । श्रोतुमिच्छामहे[11] ब्रह्मन्परं कौतूहलं हि नः ॥ २१

ब्रह्मोवाच —

साधु साधु द्विजश्रेष्ठा यत्पृच्छध्वं पुरातनम् । सर्वपापहरं पुण्यं भुक्तिमुक्तिप्रदं शुभम्[12] ॥ २२
वक्ष्यामि तस्य चरितं यथावृत्तं कृते युगे । शृणुध्वं मुनिशार्दूलाः प्रयताः संयतन्द्रियाः ॥ २३
अवन्ती नाम नगरी मालवे भुवि विश्रुता[13] । बभूव तस्य नृपतेः पृथिवी ककुदोपमा ॥ २४
हृष्टपुष्टजनाकीर्णा दृढप्राकारतोरणा । दृढयन्त्रा[14]र्गलद्वारा परिखाभिरलंकृता ॥ २५
नानावणिक्समाकीर्णा नानाभाण्डसुविक्रिया । रथ्यापणवती रम्या[15] सुविभक्तचतुष्पथा ॥ २६
गृहगोपुरसंबाधा वीथीभिः समलंकृता । राजहंसनिभैः शुभ्रैश्चित्रग्रीवैर्मनोहरैः ॥ २७
अनेकशतसाहस्रैः प्रासादैः समलंकृता । यज्ञोत्सवप्रमुदिता गीतवादित्रनिस्वना ॥ २८
नानावर्णपताकाभिर्ध्वजैश्च समलंकृता । हस्त्यश्वरथसंकीर्णा पदातिगणसंकुला ॥ २९
नानायोधसमाकीर्णा नानाजनपदैर्युता । ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चैव द्विजातिभिः ॥ ३०
समृद्धा सा मुनिश्रेष्ठा विद्वद्भिः समलंकृता । न तत्र मलिनाः सन्ति न मूर्खा नापि[16] निर्धनाः ३१
न रोगिणो न हीनाङ्गा[17] न द्यूतव्यसनान्विताः । सदा हृष्टाः सुमनसो दृश्यन्ते पुरुषाः स्त्रियः ॥
क्रीडन्ति स्म दिवा रात्रौ हृष्टास्तत्र पृथक्पृथक् । सुवेषाः पुरुषास्तत्र दृश्यन्ते मृष्टकुण्डलाः[18] ॥ ३३
सुरूपाः सुगुणाश्चैव दिव्यालंकारभूषिताः । कामदेवप्रतीकाशाः सर्वलक्षणलक्षिताः ॥ ३४
सुकेशाः सुकपोलाश्च सुमुखाः श्मश्रुधारिणः । ज्ञातारः सर्वशास्त्राणां भेत्तारः शत्रुवाहिनीम् ३५

---

* ल्यबार्षः ।

---

१ ग. भूमौ । २ ख. संचिन्त्य । ३ ग. °गाम मनसा पु° । ४ ख. तत्र नृपतिः स° । ५ ख. महारम्यं । ६ ग. प्राकारं । ७ ख. भूरि । ८ ग. °ण्डेयवटं कृ° । ९ ख. श्रेष्ठं । १० ख. दशोत्तमान् । ११ ख. °हे तस्मात्परं । १२ ख. शिवम् । १३ ख. °ता । इन्द्रद्युम्नस्य । १४ ग. °न्त्राकुल° । १५ ख. °म्या चतुष्पथविभूषिता । पुगाट्टालकसंयुक्ता सुविविक्त° । १६ ग. नातिनि° । १७ ख. °ङ्गा नाज्ञानव्य° । १८ ख. °लाः । पुरुषाः सुभगाः शूरा दि° ।

दातारः सर्वरत्नानां भोक्तारः सर्वसंपदाम् । स्त्रियस्तत्र मुनिश्रेष्ठा दृश्यन्ते सुमनोहराः ॥ ३६
हंसवारणगामिन्यः प्रफुल्लाम्भोजलोचनाः । सुमध्यमाः सुजघनाः पीनोन्नतपयोधराः ॥ ३७
सुकेशाश्चारुवदनाः सुकपोलाः स्थिरालकाः । हावभावानतग्रीवाः कर्णाभरणभूषिताः ॥ ३८
बिम्बोष्ठयो रञ्जितमुखास्ताम्बूलेन विराजिताः । सुवर्णाभरणोपेताः सर्वालंकारभूषिताः ॥ ३९
श्यामावदाताः सुश्रोण्यः काञ्चीनूपुरनादिताः । दिव्यमाल्याम्बरधरा दिव्यगन्धानुलेपनाः ४०
विदग्धाः सुभगाः कान्ताश्चार्वङ्ग्यः प्रियदर्शनाः । रूपलावण्यसंयुक्ताः सर्वाः प्रहसिताननाः ४१
क्रीडन्त्यश्च मदोन्मत्ताः सभासु चत्वरेषु च । गीतवाद्यकथालापै रमयन्त्यश्च ताः स्त्रियः ॥ ४२
वारमुख्याश्च दृश्यन्ते नृत्यगीतविशारदाः । प्रेक्षणालापकुशलाः सर्वयोषिद्गुणान्विताः ॥ ४३
अन्याश्च तत्र दृश्यन्ते गुणाचार्याः कुलस्त्रियः । पतिव्रताश्च सुभगा गुणैः सर्वैरलंकृताः ॥ ४४
वनैश्चोपवनैः पुण्यैरुद्यानैश्च मनोरमैः । देवतायतनैर्दिव्यैर्नानाकुसुमशोभितैः ॥ ४५
शालैस्तालैस्तमालैश्च बकुलैर्नागकेसरैः । पिप्पलैः कर्णिकारैश्च चन्दनागुरुचम्पकैः ॥ ४६
पुंनागैर्नारिकेरैश्च पनसैः सरलद्रुमैः । नारङ्गैर्लकुचैर्लोध्रैः सप्तपर्णैः शुभाञ्जनैः ॥ ४७
चूतबिल्वकदम्बैश्च शिंशपैर्धवखादिरैः । पाटलाशोकतगरैः करवीरैः सितेतरैः ॥ ४८
पीतार्जुनकभल्लातैः सिद्धैराम्रातकैस्तथा । न्यग्रोधाश्वत्थकाश्मर्यैः पलाशैर्देवदारुभिः ॥ ४९
मन्दारैः पारिजातैश्च तिन्तिडीकविभीतकैः । प्राचीनामलकैः प्लक्षैर्जम्बूशिरीषपादपैः ॥ ५०
कालेयैः काञ्चनारैश्च मधुजम्बीरतिन्दुकैः । खर्जूरागस्त्यबकुलैः शाखोटकहरीतकैः ॥ ५१
कङ्कोलैर्मुचुकुन्दैश्च हिन्तालैर्बीजपूरकैः । केतकीवनखण्डैश्च अतिमुक्तैः सकुब्जकैः ॥ ५२
मल्लिकाकुन्दबाणैश्च कदलीखण्डमण्डितैः । मातुलुङ्गैः पूगफलैः करुणैः सिन्धुवारकैः ॥ ५३
बहुवारैः कोविदारैर्बदरैः सकरञ्जकैः । अन्यैश्च विविधैः पुष्पवृक्षैश्चान्यैर्मनोहरैः ॥ ५४
लतागुल्मैर्वितानैश्च उद्यानैर्नन्दनोपमैः । सदा कुसुमगन्धाढ्यैः सदा फलभरानतैः ॥ ५५
नानापक्षिरुतै रम्यैर्नानाँमृगगणावृतैः । चकोरैः शतपत्रैश्च भृङ्गारैः प्रियपुत्रकैः ॥ ५६
कलविङ्कैर्मयूरैश्च शुकैः कोकिलकैस्तथा । कपोतैः खञ्जरीटैश्च श्येनैः पारावतैस्तथा ॥ ५७
खगैश्चान्यैर्बहुविधैः श्रोत्ररम्यैर्मनोरमैः । सरितः पुष्करिण्यश्च सरांसि सुबहूनि च ॥ ५८
अन्यैर्जलाशयैः पुण्यैः कुमुदोत्पलमण्डितैः । पद्मैः सितेतरैः शुभ्रैः कह्लारैश्च सुगन्धिभिः ॥ ५९
अन्यैर्बहुविधैः पुष्पैर्जलजैः सुमनोहरैः । गन्धामोदकरैर्दिव्यैः सर्वर्तुकुसुमोज्ज्वलैः ॥ ६०
हंसकारण्डवाकीर्णैश्चक्रवाकोपशोभितैः । सारसैश्च बलाकैश्च कूर्मैर्मत्स्यैः सनक्रकैः ॥ ६१
जलपादैः कदम्बैश्च प्लवैश्च जलकुक्कुटैः । खगैर्जलचरैश्चान्यैर्नानारवविभूषितैः ॥ ६२
नानावर्णैः सदा हृष्टैरश्चितानि समन्ततः । एवं नानाविधैः पुष्पैर्विविधैश्च जलाशयैः ॥ ६३
विविधैः पादपैः पुण्यैरुद्यानैर्विविधैस्तथा । जलस्थलचरैश्चैव विहगैश्चाविधिष्ठितैः ॥ ६४
देवतायतनैर्दिव्यैः शोभिता सा महापुरी । तत्राऽऽस्ते भगवान्देवस्त्रिपुरारिस्त्रिलोचनः ॥ ६५
महाकालेति विख्यातः सर्वकामप्रदः शिवः । शिवकुण्डे नरः स्नात्वा विधिवत्पापनाशने ॥ ६६

---

१ ग. सर्वकामानां । २ ख. °न्यः कर्णान्तायतलो° । ३ ख. °मध्याश्च सु° । ४ ख. °काः । मुक्ताहाराहर्हसुभ्री° । ५ ख. °न्मत्ता उद्यानेषु गृहेषु । ६ ख. प्रियालैः । ७ ग. °नामुनिग° । ८ ख. °ष्टैराविभाति स° । ९ ख. °रान्तास्त्रि° । १० ख. °हादेवेति ।

देवान्पितॄनृषींश्चैव संतर्प्य विधिवद्बुधः । गत्वा शिवालयं पश्चात्कृत्वा तं त्रिः प्रदक्षिणम् ॥ ६७
प्रविश्य संयतो भूत्वा धौतवासा जितेन्द्रियः । स्नानैः पुष्पैस्तथा गन्धैर्धूपैर्दीपैश्च भक्तितः ॥ ६८
नैवेद्यैरुपहारैश्च गीतवाद्यैः प्रदक्षिणैः । दण्डवत्प्रणिपातैश्च नृत्यैः स्तोत्रैश्च शंकरम् ॥ ६९
संपूज्य विधिवद्भक्त्या महाकालं सकृच्छिवम् । अश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ ७०
पापैः सर्वैर्विनिर्मुक्तो विमानैः सार्वकामिकैः । आरुह्य त्रिदिवं याति यत्र शंभोर्निकेतनम् ॥ ७१
दिव्यरूपधरः श्रीमान्दिव्यालंकारभूषितः । भुङ्क्ते तत्र वरान्भोगान्यावदाभूतसंप्लवम् ॥ ७२
शिवलोके मुनिश्रेष्ठा जरामरणवर्जितः । पुण्यक्षयादिहाऽऽयातः प्रवरे ब्राह्मणे कुले ॥ ७३
चतुर्वेदी भवेद्विप्रः सर्वशास्त्रविशारदः । योगं पाशुपतं प्राप्य ततो मोक्षमवाप्नुयात् ॥ ७४
आस्ते तत्र नदी पुण्या [3]शिप्रा नामेति विश्रुता । तस्यां स्नातस्तु विधिवत्संतर्प्य पितृदेवताः ७५
सर्वपापविनिर्मुक्तो विमानवरमास्थितः । भुङ्क्ते बहुविधान्भोगान्स्वर्गलोके नरोत्तमः ॥ ७६
आस्ते तत्रैव भगवान्देवदेवो जनार्दनः । गोविन्दस्वामिनामाऽसौ भुक्तिमुक्तिप्रदो हरिः ॥ ७७
तं दृष्ट्वा मुक्तिमाप्नोति त्रिसप्तकुलसंयुतः । विमानेनार्कवर्णेन किङ्किणीजालमालिना ॥ ७८
सर्वकामसमृद्धेन कामगेनास्थिरेण च । उपगीयमानो गन्धर्वैर्विष्णुलोके महीयते ॥ ७९
भुङ्क्ते च विविधान्कामान्निरातङ्को गतज्वरः । आभूतसंप्लवं यावत्सुरूपः सुभगः सुखी ॥ ८०
कालेनाऽऽगत्य मतिमान्ब्राह्मणः स्यान्महीतले । प्रवरे योगिनां गेहे वेदशास्त्रार्थतत्त्ववित् ॥ ८१
वैष्णवं योगमास्थाय ततो मोक्षमवाप्नुयात् । विक्रमस्वामिनामानं विष्णुं तत्रैव भो द्विजाः ॥ ८२
दृष्ट्वा नरो वा नारी वा फलं पूर्वोदितं लभेत् । अन्येऽपि तत्र तिष्ठन्ति देवाः शक्रपुरोगमाः ८३
मातरश्च मुनिश्रेष्ठाः सर्वकामफलप्रदाः । दृष्ट्वा तान्विधिवद्भक्त्या संपूज्य प्रणिपत्य च ॥ ८४
[6]सर्वपापविनिर्मुक्तो नरो याति त्रिविष्टपम् । एवं सा नगरी रम्या राजसिंहेन पालिता ॥ ८५
नित्योत्सवप्रमुदिता यथेन्द्रस्यामरावती । पुराष्टादशसंयुक्ता सुविस्तीर्णचतुष्पथा ॥ ८६
धनुर्ज्याघोषनिनदा सिद्धसंगमभूषिता । विद्यावद्गणभूयिष्ठा वेदनिर्घोषनादिता ॥ ८७
इतिहासपुराणानि शास्त्राणि विविधानि च । काव्यालापकथाश्चैव श्रूयन्तेऽहर्निशं द्विजाः ॥ ८८
एवं मया गुणाढ्या सा तदु(सोज्ज)यिनी समुदाहृता । यस्यां राजाऽभवत्पूर्वमिन्द्रद्युम्नो महामतिः

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादेऽवन्तिकावर्णनं नाम
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३११३

अथ चतुश्चत्वारिंशोऽध्यायः ।

ब्रह्मोवाच—

तस्यां स नृपतिः पूर्वं कुर्वन्राज्यमनुत्तमम् । पालयामास मतिमान्प्रजाः पुत्रानिवौरसान् ॥ १
सत्यवादी महाप्राज्ञः शूरः सर्वगुणाकरः । मतिमान्धर्मसंपन्नः सर्वशस्त्रभृतां वरः ॥ २

---

१ ख. °जिते । पु° । २ ग रम्या । ३ ख. क्षिप्रा । ४ ख. °धान्भोगानि° । ५ ख. °तद्वान्गत° । ६ ख. °वैकामवि° ।
७ ग. °क्ता षड्विंशग्रामभू° । ८ ख. °रः । सर्वजिद्धर्मे° ।

सत्यवाञ्शीलवान्दान्तः श्रीमान्परपुरंजयः । आदित्य इव तेजोभी रूपैराश्विनयोरिवं[1] ॥ ३
वर्धमानसुराश्चर्यः शक्रतुल्यपराक्रमः । शारदेन्दुरिवाऽऽभाति लक्षणैः समलंकृतः ॥ ४
आहर्ता सर्वयज्ञानां हयमेधादिकृत्तथा । दानैर्यज्ञैस्तपोभिश्च तत्तुल्यो ना[2]स्ति भूपतिः ॥ ५
सुवर्णमणिमुक्तानां गजाश्वानां च भूपतिः । प्रददौ विप्रमुख्येभ्यो यागे यागे महाधनम् ॥ ६
हस्त्यश्वरथमुख्यानां कम्बलाजिनवाससाम् । रत्नानां धनधान्यानामन्तैं[3]स्तस्य न विद्यते ॥ ७
एवं सर्वधनैर्युक्तो गुणैः सर्वैरलंकृतः । सर्वकामसमृद्धात्मा कुर्वन्राज्यमकण्टकम् ॥ ८
तस्येयं मतिरुत्पन्ना सर्वयोगेश्वरं हरिम् । कथमाराधयिष्यामि भुक्तिमुक्तिप्रदं प्रभुम् ॥ ९
विचार्य सर्वशास्त्राणि तन्त्राण्यागमविस्तरम् । इतिहासपुराणानि वेदाङ्गानि च सर्वशः ॥ १०
धर्मशास्त्राणि सर्वाणि नियमानृपिभाषितान् । वेदाङ्गानि च शास्त्राणि विद्यास्थानानि[4] यानि च
गुरुं [5]संसेव्य यत्नेन ब्राह्मणान्वेदपारगान् । आधाय परमां काष्ठां कृतकृत्योऽभवत्तदा ॥ १२
संप्राप्य परमं तत्त्वं वासुदेवाख्यमव्ययम् । भ्रान्तिज्ञानादतीतस्तु मुमुक्षुः संयतेन्द्रियः ॥ १३
कथमाराधयिष्यामि देवदेवं सनातनम् । पीतवस्त्रं चतुर्बाहुं शङ्खचक्रगदाधरम् ॥ १४
वनमालावृतोरस्कं पद्मपत्रायतेक्षणम् । श्रीवत्सोरःसमायुक्तं मुकुटाङ्गदशोभितम् ॥ १५
स्वपुरात्स तु निष्क्रान्त उज्जयिन्याः प्रजापतिः । बलेन महता युक्तः स[6]भृत्यः सपुरोहितः॥ १६
अनुजग्मुस्तु तं सर्वे रथिनः शस्त्रपाणयः । रथैर्विमानसंकाशैः पताकाध्वजसेवितैः ॥ १७
सादिनश्च तथा सर्वे प्रासतोमरपाणयः । अश्वैः पवनसंकाशैरनुजग्मुस्तु तं नृपम् ॥ १८
हिमवत्संभवैर्मत्तैर्वारणैः पर्वतोपमैः । [7]ईषादन्तैः सदा मत्तैः प्रचण्डैः षष्टिहायनैः ॥ १९
हेमकक्षैः सपताकैर्घण्टारवविभूषितैः । अनुजग्मुश्च तं सर्वे[8] गजयुद्धविशारदाः ॥ २०
असंख्येयाश्च पादाता धनुष्प्रा[9]सासिपाणयः । दिव्यमाल्याम्बरधरा दिव्यगन्धानुलेपनाः ॥ २१
अनुजग्मुश्च तं सर्वे युवानो मृष्टकुण्डलाः । सर्वास्त्रकुशलाः[10] शूराः सदा सङ्ग्रामलालसाः ॥ २२
अन्तःपुरनिवासिन्यः स्त्रियः सर्वाः स्वलंकृताः । बिम्बौष्ठचारुदशनाः सर्वाभरणभूषिताः ॥ २३
दिव्यवस्त्रधराः सर्वा दिव्यमाल्यविभूषिताः । दिव्यगन्धानुलिप्ताङ्गाः शरच्चन्द्रनिभाननाः ॥ २४
सुमध्यमाश्चारुवेषाश्चारुकर्णालकाञ्चिताः । ताम्बूलरञ्जितमुखा रक्षिभिश्च सुरक्षिताः ॥ २५
यानैरुच्चावचैः शुभ्रैर्मणिकाञ्चनभूषितैः । उपगीयमानास्ताः सर्वा गायनैः स्तुतिपाठकैः ॥ २६
वेष्टिताः श[11]स्त्रहस्तैश्चै[12] पद्मपत्रायतेक्षणाः । ब्राह्मणाः क्षत्रिया वैश्या अनुजग्मुश्च तं नृपम्[13] ॥ २७
वणिग्ग्रामगणाः सर्वे नानापुरनिवासिनः । धनै रत्नैः सुवर्णैश्च सदाराः सपरिच्छदाः[14] ॥ २८
अस्त्रविक्रयकाश्चैव ताम्बूलपण्यजीविनः । तृणविक्रयकाश्चैव काष्ठविक्रयकारकाः ॥ २९
रङ्गोपजीविनः सर्वे मांसविक्रयिणस्तथा । तैलविक्रयकाश्चैव वस्त्रविक्रयकास्तथा[15] ॥ ३०

१ ग. °व । षोडशार्धगुणैर्युक्तः श° । २ ख. नात्र । ३ ख. °न्तस्तेषां न । ४ ख. °नि सर्वशः । गु° । ५ ख. संभाव्य । ६ ख. सोह्लासः । ७ ख. रेखादन्तैः । ८ ख. °र्वे जययु° । ९ ग. °सादिपा° । १० ख. रूपयौवनसंपन्नाः । ११ ख. यष्टिहस्तैश्च । १२ ख. °श्च अ° । १३ ख. °म् । वेश्याः सर्वाङ्गसुन्दर्यो नानालंकारभूषिताः । परिवारगणैः सार्धमनुजग्मुस्तथा नृपम् । तथा मणिग° । १४ ख. °दाः । साङ्गवेदविदश्चैव नानाशास्त्रार्थपारगाः । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैवाष्टजातयः । स्वर्णकाराश्च कर्मारा लोहकाराश्मकुट्टकाः । मणिकाराः कुम्भकाराश्चर्मकाराश्च पावकाः । पराकारा वेत्रकारा मुद्रकाराश्च शिल्पिनः । केशकारास्तुम्बिकारा इषुकाराः स्वजीविनः । स्वर्णकाराः खड्गकाराः स्वधाकाराश्च वाहकाः । अपूपकारकाः सर्वे तोयविक्रयकास्तथा । मालाकाराः पर्वकाराः सर्वविक्रयिणश्च ये । मत्स्यविक्रयिणश्चैव मां° । १५ ख. °था । सुखग्विक्रयकाश्चैव ताम्बूलीपण्यजीविनः । तृणविक्रयकाश्चैव काष्ठविक्रयकास्तथा । रङ्गोपजीविनश्चैव रज° ।

फलविक्रयिणश्चैव पत्रविक्रयिणस्तथा । तथा जवसहाराश्च रजकाश्च सहस्रशः ॥ ३१
गोपाला नापिताश्चैव तथाऽन्ये वस्त्रसूचकाः । मेषपालाश्चाजपाला मृगपालाश्च हंसकाः ॥ ३२
धान्यविक्रयिणश्चैव सक्तुविक्रयिणश्च ये । गुडविक्रयिकाश्चैव तथा लवणजीविनः ॥ ३३
गायना नर्तकाश्चैव तथा मङ्गलपाठकाः । शैलूषाः कथकाश्चैव[1] पुराणार्थविशारदाः ॥ ३४
कवयः काव्यकर्तारो नानाकाव्यविशारदाः । विषघ्ना गारुडाश्चैव नानारत्नपरीक्षकाः ॥ ३५
व्योकारास्ताम्रकाराश्च कांस्यकाराश्च रूठकाः । कौषकाराश्चित्रकाराः कुन्दकाराश्च पावकाः ३६
दण्डकाराश्चासिकाराः सुराधूतोपजीविनः । मल्ला दूताश्च कायस्था ये चान्ये कर्मकारिणः॥ ३७
तन्तुवाया रूपकारा वार्तिकास्तैलपाठकाः । लावजीवास्तैत्तिरिका मृगपक्ष्युपजीविनः ॥ ३८
गजवैद्याश्च वैद्याश्च नरवैद्याश्च ये नराः । वृक्षवैद्याश्च गोवैद्या ये चान्ये छेददाहकाः ॥ ३९
एते नागरकाः सर्वे ये चान्ये नानुकीर्तिताः । अनुजग्मुस्तु राजानं समस्तपुरवासिनः ॥ ४०
यथा व्रजन्तं पितरं ग्रामान्तरं समुत्सुकाः । अनुयान्ति यथा पुत्रास्तथा तं तेऽपि नागराः ॥४१
एवं स नृपतिः श्रीमान्वृतः सर्वैर्महाजनैः । हस्त्यश्वरथपादातैर्जगाम च शनैः शनैः ॥ ४२
एवं गत्वा स नृपतिर्दक्षिणस्योदधेस्तटम् । सर्वैस्तैर्दीर्घकालेन बलैरनुगतः प्रभुः ॥ ४३
ददर्श सागरं[2] रम्यं नृत्यन्तमिव च स्थितम् । अनेकशतसाहस्रैरूर्मिभिश्च समाकुलम् ॥ ४४
नानारत्नालयं पूर्णं नानाप्राणिसमाकुलम् । वीचीतरङ्गबहुलं महाश्चर्यसमन्वितम् ॥ ४५
तीर्थराजं महाशब्दमपारं सुभयंकरम् । मेघवृन्दप्रतीकाशमगाधं मकरालयम्[3] ॥ ४६
मत्स्यैः कूर्मैश्च शङ्खैश्च शुक्तिकानक्रशङ्कुभिः । शिंशुमारैः कर्कटैश्च वृतं सर्पैर्महाविषैः ॥ ४७
लवणोदं हरेः स्थानं शयनस्य नदीपतिम् । सर्वपापहरं पुण्यं सर्ववाञ्छाफलप्रदम् ॥ ४८
अनेकावर्तगम्भीरं दानवानां समाश्रयम् । अमृतस्यारणिं दिव्यं देवयोनिमपां पतिम् ॥ ४९
विशिष्टं सर्वभूतानां प्राणिनां जीवधारणम् । सुपवित्रं पवित्राणां मङ्गलानां च मङ्गलम् ॥ ५०
तीर्थानामुत्तमं तीर्थमव्ययं यादसां पतिम् । चन्द्रवृद्धिक्षयस्येव यस्य मानं प्रतिष्ठितम् ॥ ५१
अभेद्यं सर्वभूतानां देवानाममृतालयम् । उत्पत्तिस्थितिसंहारहेतुभूतं सनातनम् ॥ ५२
उपजीव्यं च सर्वेषां पुण्यं नदनदीपतिम् । दृष्ट्वा तं नृपतिश्रेष्ठो विस्मयं परमं गतः ॥ ५३
निवासमकरोत्तत्र वेलामासाद्य सागरीम् । पुण्ये मनोहरे देशे सर्वभूमिगुणैर्युते ॥ ५४
वृतं शालैः कदम्बैश्च पुंनागैः सरलद्रुमैः । पनसैर्नारिकेलैश्च[6] बकुलैर्नागकेसरैः ॥ ५५
तालैः पिप्पलैः खर्जूरैर्नारङ्गैर्बीजपूरकैः । शालैराम्रातकैर्लोध्रैर्बकुलैर्बहुवारकैः ॥ ५६
कपित्थैः कर्णिकारैश्च पाटलाशोकचम्पकैः । दाडिमैश्च तमालैश्च पारिजातैस्तथाऽर्जुनैः ॥ ५७
प्राचीनामलकैर्बिल्वैः प्रियंगुवटखादिरैः । इङ्गुदीसप्तपर्णैश्च अश्वत्थागस्त्यजम्बुकैः ॥ ५८
मधुकैः कर्णिकारैश्च बहुवारैः सतिन्दुकैः । पलाशबदरैर्नीपैः सिद्धनिम्बैशुभाञ्जनैः ॥ ५९
वारकैः कोविदारैश्च भल्लातामलकैस्तथा । इति हिन्तालकाङ्कोलैः करञ्जैः सविभीतकैः ॥ ६०
ससर्जमधुकाश्मर्यैः शाल्मलीदेवदारुभिः । शाखोटकैर्निम्बवटैः कुम्भीकोष्ठहरीतकैः ॥ ६१
गुग्गुलैश्चन्दनैर्वृक्षैस्तथैवागुरुपाटलैः । जम्बीरकरुणैर्वृक्षैस्तिन्तिडीरक्तचन्दनैः ॥ ६२

---

१ ख. °कथका° । २ ख. °रं रौद्रमपारकलवर्तिनम् । ३ ख. °म् । बहुकू° । ४ ख. श्रितं । ५ ख. °धारिणाम् । ६ ख. °श्च लकुचैर्ना° । ७ ख. °म्बमुपत्रकैः । वा° । ८ ख. °था । तीति° । ९ ख. °पादपैः । ज° ।

एवं नानाविधैर्वृक्षैस्तथाऽन्यैर्बहुपादपैः। कल्पद्रुमैर्नित्यफलैः सर्वर्तुकुसुमोत्करैः॥ ६३
नानापक्षिरुतैर्दिव्यैर्मत्तकोकिलनादितैः। मयूरवरसंघुष्टैः शुकसारिकसंकुलैः॥ ६४
हारीतैर्भृङ्गराजैश्च चातकैर्बहुपुत्रकैः। जीवंजीवककाकोलैः कलविङ्कैः कपोतकैः॥ ६५
खगैर्नानाविधैश्चान्यैः श्रोत्ररम्यैर्मनोहरैः। पुष्पिताग्रेषु वृक्षेषु कूजद्भिश्चाधिष्ठितैः॥ ६६
केतकीवनखण्डैश्च सदा पुष्पधरैः सितैः। मल्लिकाकुन्दकुसुमैर्यूथिकातगरैस्तथा॥ ६७
कुटजैर्बाणपुष्पैश्च अतिमुक्तैः सकुब्जकैः। मालतीकरवीरैश्च तथा कदलकाञ्चनैः॥ ६८
अन्यैर्नानाविधैः पुष्पैः सुगन्धैश्चारुदर्शनैः। वनोद्यानोपवनजैर्नानावर्णैः सुगन्धिभिः॥ ६९
विद्याधरगणाकीर्णैः सिद्धचारणसेवितैः। गन्धर्वोरगरक्षोभिर्भूताप्सरसकिंनरैः॥ ७०
मुनियक्षगणाकीर्णैर्नानासत्त्वनिषेवितैः। मृगैः शाखामृगैः सिंहैर्वराहमहिषाकुलैः॥ ७१
तथाऽन्यैः कृष्णसाराद्यैर्मृगैः सर्वत्र शोभितैः। शार्दूलैर्दीप्तमातङ्गैस्तथाऽन्यैर्वनचारिभिः॥ ७२
एवं नानाविधैर्वृक्षैरुद्यानैर्नन्दनोपमैः। लतागुल्मवितानैश्च विविधैश्च जलाशयैः॥ ७३
हंसकारण्डवाकीर्णैः पद्मिनीखण्डमण्डितैः। कादम्बैश्च प्लवैर्हंसैश्चक्रवाकोपशोभितैः॥ ७४
कमलैः शतपत्रैश्च कह्लारैः कुमुदोत्पलैः। खगैर्जलचरैश्चान्यैः पुष्पैर्जलसमुद्भवैः॥ ७५
पर्वतैर्दीप्तशिखरैश्चारुकन्दरमण्डितैः। नानावृक्षसमाकीर्णैर्नानाधातुविभूषितैः॥ ७६
सर्वाश्चर्यमयैः शृङ्गैः सर्वभूतालयैः शुभैः। सर्वौषधिसमायुक्तैर्विपुलैश्चित्रसानुभिः॥ ७७
एवं सर्वैः समुदितैः शोभितं सुमनोहरैः। ददर्श स महीपालः स्थानं त्रैलोक्यपूजितम्॥ ७८
दशयोजनविस्तीर्णं पञ्चयोजनमायतम्। नानाश्चर्यसमायुक्तं क्षेत्रं परमदुर्लभम्॥ ७९

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे क्षेत्रदर्शनं नाम चतुश्चत्वारिंशोऽध्यायः॥ ४४॥

आदितः श्लोकानां समष्ट्यङ्काः—३१९२

अथ पञ्चचत्वारिंशोऽध्यायः।

मुनय ऊचुः—

तस्मिन्क्षेत्रवरे पुण्ये वैष्णवे पुरुषोत्तमे। किं तत्र प्रतिमा पूर्वं न स्थिता वैष्णवी प्रभो॥ १
येनासौ नृपतिस्तत्र गत्वा सबलवाहनः। स्थापयामास कृष्णं च रामं भद्रां शुभप्रदाम्॥ २
संशयो नो महानत्र विस्मयश्च जगत्पते। श्रोतुमिच्छामहे सर्वं ब्रूहि तत्कारणं च नः॥ ३

ब्रह्मोवाच—

शृणुध्वं पूर्वसंवृत्तां कथां पापप्रणाशिनीम्। प्रवक्ष्यामि समासेन श्रिया पृष्टः पुरा हरिः॥ ४
सुमेरोः काञ्चने शृङ्गे सर्वाश्चर्यसमन्विते। सिद्धविद्याधरैर्यक्षैः किंनरैरुपशोभिते॥ ५
देवदानवगन्धर्वैर्नागैरप्सरसां गणैः। मुनिभिर्गुह्यकैः सिद्धैः सौपर्णैः समरुद्गणैः॥ ६
अन्यैर्देवालयैः साध्यैः कश्यपाद्यैः प्रजेश्वरैः। वालखिल्यादिभिश्चैव शोभिते सुमनोहरे॥ ७
कर्णिकारवनैर्दिव्यैः सर्वर्तुकुसुमोत्करैः। जातरूपप्रतीकाशैर्भूषिते सूर्यसंनिभैः॥ ८
अन्यैश्च बहुभिर्वृक्षैः शालतालादिभिर्वनैः। पुंनागाशोककसरलन्यग्रोधाम्रातकार्जुनैः॥ ९

---

१ ख. °मैर्नीलफ°। २ ख. °श्च तथा पुष्पवरैः। ३ ख. °लैर्देवमा°। ४ ख. °श्चर्यैः समाक्रान्तं क्षे°। ५ ख. रामचन्द्रं सुखप्रदम्।

पारिजाताम्रखदिरनीपबिल्वकदम्बकैः । धवखादिरपालाशशीर्षामलकतिन्दुकैः ॥ १०
नारिङ्गकोलवकुललोध्रदाडिमदारुकैः । सर्जैश्च कर्णैस्तगरैः शिशिभूर्जवनिम्बकैः ॥ ११
अन्यैश्च काञ्चनैश्चैव फलभारैश्च नामितैः । नानाकुसुमगन्धाढ्यैर्भूषिते[1] पुष्पपादपैः ॥ १२
मालतीयूथिकामल्लीकुन्दवाणकुरुण्टकैः[2] । पाटलागस्त्यकुटजमन्दारकुसुमादिभिः ॥ १३
अन्यैश्च विविधैः पुष्पैर्मनसः प्रीतिदायकैः । नानाविहगसंघैश्च कूजद्भिर्मधुरस्वरैः ॥ १४
पुंस्कोकिलरुतैर्दिव्यैर्मत्तबर्हिणनादितैः । एवं नानाविधैर्वृक्षैः पुष्पैर्नानाविधैस्तथा ॥ १५
खगैर्नानाविधैश्चैव शोभिते सुरसेविते । तत्र स्थितं जगन्नाथं जगत्स्रष्टारमव्ययम् ॥ १६
सर्वलोकविधातारं वासुदेवाख्यमव्ययम् । प्रणम्य शिरसा [3]देवी लोकानां हितकाम्यया ॥
पप्रच्छेमं महाप्रश्नं[4] पद्मजा तमनुत्तमम् ॥ १७

श्रीरुवाच—

ब्रूहि त्वं सर्वलोकेश संशयं मे हृदि स्थितम् । मर्त्यलोके महाश्चर्ये कर्मभूमौ सुदुर्लभे ॥ १८
लोभमोहग्रहग्रस्ते कामक्रोधमहार्णवे । येन मुच्येत देवेश अस्मात्संसारसागरात् ॥ १९
आचक्ष्व सर्वदेवेश प्रणतां यदि मन्यसे । त्वदृते नास्ति लोकेऽस्मिन्वक्ता संशयनिर्णये ॥ २०

ब्रह्मोवाच—

श्रुत्वैवं वचनं तस्या देवदेवो जनार्दनः । प्रोवाच परया प्रीत्या परं[5] सारामृतोपमम् ॥ २१

श्रीभगवानुवाच—

सुखोपास्यः सुसाध्यश्चाभिरामश्च सुसत्फलः । आस्ते तीर्थवरे देवि विख्यातः पुरुषोत्तमः ॥ २२
न तेन सदृशः कश्चित्त्रिषु[6] लोकेषु विद्यते । कीर्तनाद्यस्य देवेशि मुच्यते सर्वपातकैः ॥ २३
न विज्ञातोऽमरैः सर्वैर्न दैत्यैर्न च दानवैः । मरीच्याद्यैर्मुनिवरैर्गोपितं मे वरानने ॥ २४
तत्तेऽहं संप्रवक्ष्यामि तीर्थराजं च सांप्रतम् । भावेनैकेन सुश्रोणि शृणुष्व वरवर्णिनि ॥ २५
आसीत्[7]कल्पे समुत्पन्ने[8] नष्टे स्थावरजङ्गमे । प्रलीना[9] देवगन्धर्व[10]दैत्यविद्याधरोरगाः[11] ॥ २६
तमोभूतमिदं सर्वं न प्राज्ञायत किंचन । तस्मिञ्जागर्ति भूतात्मा[12] परमात्मा जगद्गुरुः ॥ २७
श्रीमांस्त्रिमूर्तिकृद्देवो जगत्कर्ता महेश्वरः । वासुदेवेति विख्यातो योगात्मा हरिरीश्वरः[13] ॥ २८
सोऽसृजद्योगनिद्रान्ते नाभ्यम्भोरुहमध्यगम्[14] । पद्मकेशरसंकाशं[15] ब्रह्माणं भूतमव्ययम्[16] ॥ २९
तादृग्भूतस्ततो ब्रह्मा[17] सर्वलोकमहेश्वरः । पञ्चभूतसमायुक्तं सृजते च[18] शनैः शनैः[19] ॥ ३०
मात्रायोनीनि भूतानि स्थूलसूक्ष्माणि यानि च । चतुर्विधानि सर्वाणि स्थावराणि चराणि च ॥
ततः प्रजापतिर्ब्रह्मा चक्रे सर्वं चराचरम् । संचिन्त्य मनसाऽऽत्मानं ससर्ज विविधाः प्रजाः ३२
मरीच्यादीन्मुनीन्सर्वान्देवासुरपितॄनपि । यक्षविद्याधरांश्चान्यान्गङ्गाद्याः सरितस्तथा ॥ ३३
नरवानरसिंहांश्च विविधांश्च विहंगमान् । जरायूनण्डजान्देवि स्वेदजोद्भिदजांस्तथा ॥ ३४
ब्रह्मक्षत्रं तथा वैश्यं शूद्रं चैव चतुष्टयम् । अन्त्यजातांश्च[20] म्लेच्छांश्च ससर्ज विविधान्पृथक् ॥ ३५
यत्किंचिज्जीवसंज्ञं तु तृणगुल्मपिपीलिकम् । ब्रह्मा भूत्वा जगत्सर्वं निर्ममे स चराचरम् ॥ ३६

१ ग. °पितैस्त्रिदशार्चितैः । २ ख. °कुरण्ट° । ३ ख. देवं । ४ ग. °श्नं भूमौ स्थानम° । ५ ख. °रं वै चामृ° । ६ ख. °वैर्नाऽऽदित्यै° । ७ ख. °सीत्पद्मं स° । ८ ख. °त्पन्नं न° । ९ ग. प्रलीने । १० ग. °न्धर्वैर्दैत्य° । ११ ग. °रगैः । त° । १२ ख. °त्मा प्रलये वै ज° । १३ ख. °रः । आसीत्सद्यो° । १४ ख. °ध्यगः । पयःकेश° । १५ ख. °काशो ब्र° । १६ ख. °म् । आविर्भूत° । १७ ख. देवः । १८ ख. स्म । १९ ख. °नैः । विश्वं च नानाभू° । २० ख. अन्त्यजातींश्च ।

दक्षिणाङ्गे तथाऽऽत्मानं संचिन्त्य पुरुषं स्वयम् । वामे चैव तु नारीं स द्विधा भूतमकल्पयत् ३७
ततः प्रभृति लोकेऽस्मिन्प्रजा मैथुनसंभवाः । अधमोत्तमम[1]ध्यांश्च मम क्षेत्राणि यानि च ॥ ३८
एवं संचिन्त्य देवोऽसौ पुरा सलिलयोनिजः । जगाम ध्यानमास्थाय वासुदेवात्मिकां तनुम् ३९
ध्यानमात्रेण देवेन स्वयमेव जनार्दनः । तस्मिन्क्षणे समुत्पन्नः सहस्राक्षः सहस्रपात् ॥ ४०
सहस्रशीर्षा पुरुषः पुण्डरीकनिभेक्षणः । सलिलध्वान्तमेघाभः श्रीमाञ्श्रीवत्सलक्षणः* ॥ ४१
अपश्यत्सहसा तं तु ब्रह्मा लोकपितामहः । आसनैरर्घ्यपाद्यैश्च अक्षतैरभिनन्द्य च ॥ ४२
तुष्टाव परमैः स्तोत्रैर्विरिञ्चिः सुसमाहितः । ततोऽहमुक्तवान्देवं ब्रह्माणं कमलोद्भवम् ॥
कारणं वद मां तात मम ध्यानस्य सांप्रतम् ॥ ४३

ब्रह्मोवाच—

जगद्धिताय देवेश मर्त्यलोकैश्च दुर्लभम् । स्वर्गद्वारस्य मार्गाणि यज्ञदानव्रतानि च ॥ ४४
योगः सत्यं तपः श्रद्धा तीर्थानि विविधानि च । विहाय सर्वमेतेषां सुखं तत्साधनं वद ॥ ४५
स्थानं जगत्पते[2] मह्यामुत्कृष्टं च यदुच्यते । सर्वेषामुत्तमं स्थानं ब्रूहि [3]मे पुरुषोत्तम ॥ ४६
विधातुर्वचनं श्रुत्वा ततोऽहं प्रोक्तवान्प्रिये । शृणु ब्रह्मन्प्रवक्ष्यामि [4]निर्मलं भुवि दुर्लभम् ॥ ४७
उत्तमं सर्वक्षेत्राणां धन्यं संसारतारणम् । गोब्राह्मणहितं पुण्यं चातुर्वर्ण्यसुखोदयम् ॥ ४८
भुक्तिमुक्तिप्रदं नृणां क्षेत्रं परम[5]दुर्लभम् । महापुण्यं तु सर्वे[6]षां सिद्धिदं वै पितामह ॥ ४९
[7]तस्मादासीत्समुत्पन्नं तीर्थराजं सनातनम् । विख्यातं परमं क्षेत्रं चतुर्यु[8]गनिषेवितम् ॥ ५०
सर्वेषामेव देवानामृषीणां ब्रह्मचारिणाम् । दैत्यदानवसिद्धानां गन्धर्वोरगरक्षसाम् ॥ ५१
नागविद्याधराणां च स्थावरस्य चरस्य च । उत्तमः पुरुषो यस्मात्तस्मात्स पुरुषोत्तमः ॥ ५२
दक्षिणस्योदधेस्तीरे न्यग्रोधो यत्र तिष्ठति । दशयोजनविस्तीर्णं क्षेत्रं परमदुर्लभम् ॥ ५३
यस्तु कल्पे समुत्पन्ने महदु(त्यु)ल्कानिबर्हणे । विना[9]शं नैवमभ्येति स्वयं तत्रैवमास्थितः ॥ ५४
दृष्टमात्रे वटे तस्मिंश्छायामाक्रम्य चासकृत् । ब्रह्म[10]हत्यात्प्रमुच्येत पापेष्वन्येषु का कथा ॥ ५५
प्रदक्षिणा कृता यैस्तु नमस्कारश्च जन्तुभिः । सर्वे[11] विधूतपाप्मानस्ते गताः केशवालयम् ॥ ५६
न्यग्रोधस्योत्तरे किंचिद्दक्षिणे केशवस्य तु । प्रासादस्तत्र तिष्ठेत्तु पदं धर्ममयं हि तत् ॥ ५७
प्रतिमां तत्र वै दृष्ट्वा स्वयं देवेन निर्मिताम् । अनायासेन वै यान्ति [12]भुवनं मे ततो नराः ॥ ५८
गच्छमानांस्तु तान्प्रेक्ष्य एकदा धर्मराट्प्रिये । मदन्तिकमनुप्राप्य प्रणम्य शिरसाऽब्रवीत् ॥ ५९

यम उवाच—

नमस्ते भगवन्देव लोकनाथ जगत्पते । क्षी[13]रोदवासिनं देवं शेषभोगानुशायिनम् ॥ ६०
वरं वरेण्यं वरदं कर्तार[14]मकृतं प्रभुम् । विश्वेश्वरमजं विष्णुं सर्वज्ञमपराजितम् ॥ ६१
नीलोत्पलदलश्यामं पुण्डरीकनिभेक्षणम् । सर्वज्ञं निर्गुणं शान्तं जगद्धातारमव्ययम् ॥ ६२

---

* एतदग्रे 'चक्रं रराज श्रीवत्सं भुजाग्रे मूर्तिमानिव' इत्यर्धमधिकं ग. पुस्तके ।

---

१ ग. °ध्यानि मठक्षे° । २ ग. °ते तुभ्यं मर्त्यलोके य° । ३ ख. मां । ४ ख निर्मितं । ५ ख. °मशोभनम् । ६ ग. °षां वसतां प्रवि° । ७ ख. तत्तदा° । ८ ख. °गयुगादिकृत् । स° । ९ ख. °नाशे चैव वसते स्वयं तत्रैव दुर्लभः । दृ° । १० ख. °हत्या विनश्येत । ११ ख. °र्वे ते पापनिर्मुक्ता गच्छन्ति च शिवा° । १२ ख. भवनं । १३ ख. °रोदार्णवसंस्थानं शे° । १४ ख. °मनघाकृतिम् ।

सर्वलोकविधातारं सर्वलोकसुखावहम् । पुराणं पुरुषं वेद्यं व्यक्ताव्यक्तं सनातनम् ॥ ६३
परावराणां स्रष्टारं लोकनाथं जगद्गुरुम् । श्रीवत्सोरस्कसंयुक्तं वनमालाविभूषितम् ॥ ६४
पीतवस्त्रं चतुर्बाहुं शङ्खचक्रगदाधरम् । हारकेयूरसंयुक्तं मुकुटाङ्गदधारिणम् ॥ ६५
सर्वलक्षणसंपूर्णं सर्वेन्द्रियविवर्जितम् । कूटस्थमचलं सूक्ष्मं ज्योतीरूपं सनातनम् ॥ ६६
भावाभावविनिर्मुक्तं व्यापिनं प्रकृतेः परम् । नमस्यामि जगन्नाथमीश्वरं सुखदं प्रभुम् ॥ ६७
इत्येवं धर्मराजस्तु पुरा न्यग्रोधसंनिधौ । स्तुत्वा नानाविधैः स्तोत्रैः प्रणाममकरोत्तदा ॥ ६८
तं दृष्ट्वा तु महाभागे प्रणतं प्राञ्जलिस्थितम् । स्तोत्रस्य कारणं देवि पृष्टवानहमन्तकम् ॥ ६९
वैवस्वत महाबाहो सर्वदेवोत्तमो ह्यसि । किमर्थं स्तुतवान्मां त्वं संक्षेपात्तद्ब्रवीहि मे ॥ ७०

धर्मराज उवाच—

अस्मिन्नायतने पुण्ये विख्याते पुरुषोत्तमे । इन्द्रनीलमयी श्रेष्ठा प्रतिमा सार्वकामिकी ॥ ७१
तां दृष्ट्वा पुण्डरीकाक्ष भावेनैकेन श्रद्धया । श्वेताख्यं भवनं यान्ति निष्कामाश्चैव मानवाः ॥ ७२
अतः कर्तुं न शक्नोमि व्यापारमरिसूदन । प्रसीद सुमहादेव संहर प्रतिमां विभो ॥ ७३
श्रुत्वा वैवस्वतस्यैतद्वाक्यमेतदुवाच ह । यम तां गोपयिष्यामि सिकताभिः समन्ततः ॥ ७४
ततः सा प्रतिमा देवि वल्लिभिर्गोपिता मया । यथा तत्र न पश्यन्ति मनुजाः स्वर्गकाङ्क्षिणः ॥ ७५
प्रच्छाद्य वल्लिकैर्देवि जातरूपपरिच्छदैः । यमं प्रस्थापयामास स्वां पुरीं दक्षिणां दिशम् ॥ ७६

ब्रह्मोवाच—

लुप्तायां प्रतिमायां तु इन्द्रनीलस्य भो द्विजाः । तस्मिन्क्षेत्रवरे पुण्ये विख्याते पुरुषोत्तमे ॥ ७७
यो भूतस्तत्र वृत्तान्तो देवदेवो जनार्दनः । तं सर्वं कथयामास स तस्यै भगवान्पुरा ॥ ७८
इन्द्रद्युम्नस्य गमनं क्षेत्रसंदर्शनं तथा । क्षेत्रस्य वर्णनं चैव प्रासादकरणं तथा ॥ ७९
हयमेधस्य यजनं स्वप्नदर्शनमेव च । लवणस्योदधेस्तीरे काष्ठस्य दर्शनं तथा ॥ ८०
दर्शनं वासुदेवस्य शिल्पिराजस्य च द्विजाः । निर्माणं प्रतिमायास्तु यथावर्णं विशेषतः ॥ ८१
स्थापनं चैव सर्वेषां प्रासादे भुवनोत्तमे । यात्राकाले च विप्रेन्द्राः कल्पसंकीर्तनं तथा ॥ ८२
मार्कण्डेयस्य चरितं स्थापनं शंकरस्य च । पञ्चतीर्थस्य माहात्म्यं दर्शनं शूलपाणिनः ॥ ८३
वटस्य दर्शनं चैव व्युष्टिं तस्य च भो द्विजाः । दर्शनं बलदेवस्य कृष्णस्य च विशेषतः ॥ ८४
सुभद्रायाश्च तत्रैव माहात्म्यं चैव सर्वशः । दर्शनं नरसिंहस्य व्युष्टिसंकीर्तनं तथा ॥ ८५
अनन्तवासुदेवस्य दर्शनं गुणकीर्तनम् । श्वेतमाधवमाहात्म्यं स्वर्गद्वारस्य दर्शनम् ॥ ८६
उदधेर्दर्शनं चैव स्नानं तर्पणमेव च । समुद्रस्नानमाहात्म्यमिन्द्रद्युम्नस्य च द्विजाः ॥ ८७
पञ्चतीर्थफलं चैव महाज्येष्ठं तथैव च । स्थानं कृष्णस्य हलिनः पर्वयात्राफलं तथा ॥ ८८
वर्णनं विष्णुलोकस्य क्षेत्रस्य च पुनः पुनः । पूर्वं कथितवान्सर्वं तस्यै स पुरुषोत्तमः ॥ ८९

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे पूर्ववृत्तानुवर्णनं नाम

पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३२८१

---

१ ख. °वैसत्त्वमु° । २ ख. परं । ३ ख. यमराज । ४ ख. °दस्व म° । ५ ख. °स्वतं वाक्यं युक्तमेतदचिन्तयम् । सा तदा प्र° । ६ ख. °भिश्छादिता । ७ ख. °ष्टसंद° । ८ ख. स्थापना । ९ ख. °कालं च । १० ख. °संकर्त° । ११ ख. अघ्यं तु वा° । १२ ख. पुण्यकीर्तनम् । १३ ख. वर्णनम् । १४ ख. °नः सर्वं° । १५ ख. स्वयम् ।

अथ षट्चत्वारिंशोऽध्यायः ।

मुनय ऊचुः—

श्रोतुमिच्छामहे देव कथाशेषं [1]महीपतेः । तस्मिन्क्षेत्रवरे गत्वा किं चकार नराधिपः ॥ १

ब्रह्मोवाच—

शृणुध्वं मुनिशार्दूलाः प्रवक्ष्यामि समासतः । क्षेत्रसंदर्शनं चैव [2]कृत्यं तस्य च भूपतेः ॥ २
गत्वा तत्र महीपालः क्षेत्रे त्रैलोक्यविश्रुते । ददर्श रमणीयानि स्थानानि सरितस्तथा ॥ ३
नदी तत्र महापुण्या विन्ध्यपादविनिर्गता[3] । स्वित्रोपलेति विख्याता सर्वपापहरा [4]शिवा ॥ ४
गङ्गातुल्या महास्रोता दक्षिणार्णवगामिनी । महानदीति नाम्ना सा पुण्यतोया सरिद्वरा ॥ ५
दक्षिणस्यो[5]दधेर्गर्भे गताऽऽवर्तातिशोभिता । उभयोस्तटयोर्यस्या ग्रामाश्च नगराणि च ॥ ६
दृश्यन्ते मुनिशार्दूलाः [6]सुसस्याः सुमनोहराः । हृष्टपुष्टजनाकीर्णा वस्त्रा[7]लंकारभूषिताः ॥ ७
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रास्तत्र पृथक्पृथक् । स्वधर्मनिरताः शान्ता दृश्यन्ते शुभलक्षणाः ८
ताम्बूलपूर्णवदना मालादामविभूषिताः । वेदपूर्णमुखा विप्राः सषडङ्गपदक्रमाः ॥ ९
अग्निहोत्ररताः केचित्केचिद्[8]औपासनक्रियाः । सर्वशास्त्रार्थकुशला यज्वानो भूरिदक्षिणाः ॥ १०
चत्वरे राजमार्गेषु वनेषूपवनेषु च । सभामण्डलहर्म्येषु देवतायतनेषु च ॥ ११
इतिहासपुराणानि वेदाः साङ्गाः सुलक्षणाः । काव्यशास्त्र[9]कथास्तत्र श्रूयन्ते च महाजनैः ॥ १२
स्त्रियस्तद्देशवासिन्यो रूपयौवनगर्विताः । संपूर्णलक्षणोपेता विस्तीर्णश्रोणिमण्डलाः ॥ १३
सरोरुहमुखाः श्यामाः शरच्चन्द्रनिभाननाः । पीनोन्नतस्तनाः सर्वाः समृद्ध्या चारुदर्शनाः १४
सौवर्णवलयाक्रान्ता दिव्यैर्वस्त्रैरलंकृताः । कदलीगर्भसंकाशाः पद्मकिञ्जल्कसप्रभाः ॥ १५
बिम्बाधरपुटाः कान्ताः कर्णान्तायतलोचनाः । सुमुखाश्चारुकेशाश्च हावभावावनामिताः ॥ १६
काश्चित्पद्मपलाशाक्ष्यः काश्चिदिन्दीवरेक्षणाः । विद्युद्विस्पष्टदशनास्तन्वङ्ग्यश्च तथाऽपराः ॥ १७
कुटिलालकसंयुक्ताः सीमन्तेन विराजिताः । ग्रीवाभरणसंयुक्ता माल्यदामविभूषिताः ॥ १८
कुण्डलै रत्नसंयुक्तैः कर्णपूरैर्मनोहरैः । देवयोषित्प्रतीकाशा दृश्यन्ते शुभलक्षणाः ॥ १९
दिव्यगीतवरैर्धन्यैः क्रीडमाना वराङ्गनाः । वीणावेणुमृदङ्गैश्च पणवैश्चैव गोमुखैः ॥ २०
शङ्खदुन्दुभिनिर्घोषैर्नानावाद्यैर्मनोहरैः । क्रीडन्त्यस्ताः सदा हृष्टा विलासिन्यः परस्परम् ॥ २१
एवमादि तथाऽनेकगीतवाद्यविशारदाः । दिवा रात्रौ समायुक्ताः कामोन्मत्ता वराङ्गनाः ॥ २२
भिक्षुवैखानसैः सिद्धैः स्नातकैर्ब्रह्मचारिभिः । मन्त्रसिद्धैस्तपःसिद्धैर्यज्ञसिद्धैर्निषेवितम् ॥ २३
इत्येवं ददृशे राजा क्षेत्रं परमशोभनम् । [10]अत्रैवाऽऽराधयिष्यामि भगवन्तं सनातनम् ॥ २४
जगद्गुरुं परं देवं परं पारं परं पदम् । सर्वे[11]श्वरेश्वरं विष्णुमनन्तमपराजितम्[12] ॥ २५
इदं तन्मानसं तीर्थं ज्ञातं मे पुरुषोत्तमम् । कल्पवृक्षो महाकायो न्यग्रोधो यत्र तिष्ठति ॥ २६
प्रतिमा चेन्द्रनीलाख्या स्वयं देवेन गोपिता । [13]न चात्र दृश्यते चान्या प्रतिमा वैष्णवी शुभा २७

---

१ ख. त्वदाननात् । २ ख. जातं । ३ ख. °ता । विन्ध्योत्पले° । ४ ख. शुभा । ५ ख. °दधेः कान्ता दुहितृशतशो° । ६ ख. संपन्नाः । ७ ख. °स्त्राभरणभू° । ८ ख. °चियोगासनप्रियाः । ९ ग. °कलालापा दृश्यन्ते सुमहात्मनः । स्त्रि° । १० ख. अत्र त्वारा° । ११ ख. °श्वरं विष्णुरूपमरूपमप° । १२ ख. °म् । ददतं चापवर्गं तं ज्ञानं मां पु° । १३ ख. न वाऽन्तर्दृश्यते चापि वह्निभिर्वैष्ण° ।

तथा[1] यत्नं करिष्यामि यथा देवो जगत्पतिः । प्रत्यक्षं[2] मम चाभ्येति विष्णुः सत्यपराक्रमः २८
यज्ञैर्दानैस्तपोभिश्च होमैर्ध्यानैस्तथाऽर्चनैः । उपवासैश्च विधिवच्चरेयं व्रतमुत्तमम् ॥ २९
अनन्यमनसा चैव तन्मना नान्यमानसः । [3]विष्णवायतनविन्यासे प्रारम्भं च करोम्यहम् ॥ ३०

इति श्रीमहापुराणे स्वयंभुऋषिसंवादे क्षेत्रवर्णनं नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३३११

अथ सप्तचत्वारिंशोऽध्यायः ।

ब्रह्मोवाच[4]—

एवं स पृथिवीपालश्चिन्तयित्वा द्विजोत्तमाः । प्रासादार्थं हरेस्तत्र प्रारम्भमकरोत्तदा ॥ १
आनाय्य गणकान्सर्वानाचार्याञ्शास्त्रपारगान् । भूमिं संशोध्य यत्नेन राजा तु परया मुदा ॥२
ब्राह्मणैर्ज्ञानसंपन्नैर्वेदशास्त्रार्थपारगैः । अमात्यैर्मन्त्रिभिश्चैव वास्तुविद्याविशारदैः ॥ ३
तैः सार्धं स समालोच्य सुमुहूर्ते शुभे दिने[6] । सुचन्द्रतारसंयोगे ग्रै[7]हानुकूल्यसंयुते ॥ ४
जयमङ्गलशब्दैश्च नानावाद्यैर्मनोहरैः । वेदाध्ययननिर्घोषैर्गीतैः सुमधुरस्वरैः ॥ ५
पुष्पलाजाक्षतैर्गन्धैः पूर्णकुम्भैः सदीपकैः । ददावर्घ्यं ततो राजा श्रद्धया सुसमाहितः ॥ ६
दत्त्वैवमर्घ्यं विधिवदानाय्य स महीपतिः । कलिङ्गाधिपतिं शूरमुत्कलाधिपतिं तथा ॥
कोशलाधिपतिं चैव तानुवाच तदा नृपः ॥ ७

राजोवाच—

गच्छध्वं सहिताः सर्वे शिलोर्थे सुसमाहिताः । गृहीत्वा शिल्पिमुख्यांश्च शिलाकर्मविशारदान् ८
विन्ध्याचलं सुविस्तीर्णं बहुकन्दरशोभितम् । निरूप्य सर्वसानूनि च्छेदयित्वा शिलाः शुभाः ॥
संवाह्यन्तां च शकटैर्नौकाभिर्मा विलम्बथ ॥ ९

ब्रह्मोवाच—

एवं गन्तुं समादिश्य तान्नृपान्स महीपतिः । पुनरेवाब्रवीद्वाक्यं सामात्यान्सपुरोहितान् ॥ १०

राजोवाच—

गच्छन्तु दूताः सर्वत्र ममाऽऽज्ञां प्रवदन्तु वै । यत्र तिष्ठन्ति राजानः पृथिव्यां तान्सुशीघ्रगाः ॥
हस्त्यश्वरथपादातैः सामात्यैः सपुरोहितैः । गच्छत सहिताः सर्वे इन्द्रद्युम्नस्य शासनात् ॥ १२

ब्रह्मोवाच—

एवं दूताः समाज्ञाता राज्ञा तेन महात्मना । गत्वा तदा नृपानूचुर्वचनं तस्य भूपतेः ॥ १३
श्रुत्वा तु ते तथा सर्वे दूतानां वचनं नृपाः । आजग्मुस्त्वरिताः सर्वे स्वसैन्यैः परिवारिताः १४
ये नृपाः सर्वदिग्भागे ये च दक्षिणतः स्थिताः । पश्चिमायां स्थिता ये च उत्तरापथसंस्थिताः ॥
प्रत्यन्तवासिनो येऽपि ये च संनिधिवासिनः । पार्वतीयाश्च ये केचित्तथा द्वीपनिवासिनः ॥ १६
रथैर्नागैः पदातैश्च वाजिभिर्धनविस्तरैः । संप्राप्ता बहुशो विप्राः श्रुत्वेन्द्रद्युम्नशासनम् ॥ १७

---

१ ख. °था चात्र क° । २ ख. °क्षं दृश्यते सर्वैर्विष्णुः । ३ ख. विश्राय° । ४ ख. °न्यासप्रा° । ५ ख. सूत उवा° । ६ ख. °ने । सचन्द्र° । ७ ख. ग्रहलग्ने शुभे तथा । ज° । ८ ग. °रस्तवैः । पु° । ९ ख. °लाप्रेक्षार्थमुत्तमाः । गृ° ।

तानागतान्नृपान्दृष्ट्वा सामात्यान्सपुरोहितान् । प्रोवाच राजा हृष्टात्मा कार्यमुद्दिश्य सादरम् ॥ १८

राजोवाच—

शृणुध्वं नृपशार्दूला यथा किंचिद्ब्रवीम्यहम् । अस्मिन्क्षेत्रवरे पुण्ये भुक्तिमुक्तिप्रदे शिवे ॥ १९

हयमेधं महायज्ञं प्रासादं चैव वैष्णवम् । कथं शक्नोम्यहं कर्तुमिति चिन्ताकुलं मनः ॥ २०

भवद्भिः सुसहायैस्तु सर्वमेतत्करोम्यहम् । यदि यूयं सहाया मे भवध्वं नृपसत्तमाः ॥ २१

ब्रह्मोवाच—

इत्येवं वदमानस्य राजराजस्य धीमतः । सर्वे प्रमुदिता हृष्टा भूपास्ते तस्य शासनात् ॥ २२

ववृषुर्धनरत्नैश्च सुवर्णमणिमौक्तिकैः । कम्बलाजिनरत्नैश्च राङ्कवास्तरणैः शुभैः ॥ २३

वज्रवैदूर्यमाणिक्यैः पद्मरागेन्द्रनीलकैः । गजैरश्वैर्धनैश्चान्यै रथैश्चैव करेणुभिः ॥ २४

असंख्येयैर्बहुविधैर्द्रव्यैरुच्चावचैस्तथा । शालिव्रीहियवैश्चैव माषमुद्गतिलैस्तथा ॥ २५

सिद्धार्थचणकैश्चैव गोधूमैर्मसुरादिभिः । श्यामाकैर्मधुकैश्चैव नीवारैः सकुलत्थकैः ॥ २६

अन्यैश्च विविधैर्धान्यैर्ग्राम्यारण्यैः सहस्रशः । बहुधान्यसहस्राणां तण्डुलानां च राशिभिः ॥ २७

गव्यस्य हविषः कुम्भैः शतशोऽथ सहस्रशः । तथाऽन्यैर्विविधैर्द्रव्यैर्भक्ष्यभोज्यानुलेपनैः ॥ २८

राजानः पूरयामासुर्यत्किंचिद्द्रव्यसंभवैः । तान्दृष्ट्वा यज्ञसंभारान्सर्वसंपत्समन्वितान् ॥ २९

यज्ञकर्मविदो विप्रान्वेदवेदाङ्गपारगान् । शास्त्रेषु निपुणान्दक्षान्कुशलान्सर्वकर्मसु ॥ ३०

ऋषींश्चैव महर्षींश्च देवर्षींश्चैव तापसान् । ब्रह्मचारिगृहस्थांश्च वानप्रस्थान्यतींस्तथा ॥ ३१

स्नातकान्ब्राह्मणांश्चान्यानग्निहोत्रे सदा स्थितान् । आचार्योपाध्यायवरान्स्वाध्यायतपसाऽन्वितान् ॥ ३२

सदस्याञ्शास्त्रकुशलांस्तथाऽन्यान्पावकान्बहून् । दृष्ट्वा तान्नृपतिः श्रीमानुवाच स्वं पुरोहितम् ३३

राजोवाच—

ततः प्रयान्तु विद्वांसो ब्राह्मणा वेदपारगाः । वाजिमेधार्थसिद्ध्यर्थं देशं पश्यन्तु यज्ञियम् ॥ ३४

ब्रह्मोवाच—

इत्युक्तः स तथा चक्रे वचनं तस्य भूपतेः । हृष्टः स मन्त्रिभिः सार्धं तदा राजपुरोहितः ॥ ३५

ततो ययौ पुरोधाश्च प्राज्ञः स्थपतिभिः सह । ब्राह्मणाँनग्रतः कृत्वा कुशलान्यज्ञकर्मणि ॥ ३६

तं देशं धीवरग्रामं सप्रतोलिविटङ्किनम् । कारयामास विप्रोऽसौ यज्ञवाटं यथाविधि ॥ ३७

प्रासादशतसंबाधं मणिप्रवरशोभितम् । इन्द्रसद्मनिभं रम्यं हेमरत्नविभूषितम् ॥ ३८

स्तम्भान्कनकचित्रांश्च तोरणानि बृहन्ति च । यज्ञायतनदेशेषु दत्त्वा शुद्धं च काञ्चनम् ॥ ३९

अन्तःपुराणि राज्ञां च नानादेशनिवासिनाम् । कारयामास धर्मात्मा तत्र तत्र यथाविधि ॥ ४०

ब्राह्मणानां च वैश्यानां नानादेशसमीयुषाम् । कारयामास विधिवच्छालास्तत्राप्यनेकशः ४१

प्रियार्थं तस्य नृपतेराययुर्नृपसत्तमाः । रत्नान्यनेकान्यादाय स्त्रियश्चाऽऽययुरुत्सवे ॥ ४२

तेषां निर्विशतां स्वेषु शिबिरेषु महात्मनाम् । नदतः सागरस्येव दिविस्पृगभवद्ध्वनिः ॥ ४३

---

१ ख. °द्भिः समवेतश्च स° । २ ख. °मेव करो° । ३ ख. तथैव विवि° । ४ ख. °न्सर्वान्यानसम° । ५ ख. दिशं । ६ ख. याज्ञिकाः । ७ ख. °णान्पुरतः । ८ ग. °रकुट्टिमम् । कारयामास विधिवद्धेम° । ९ ग. वेश्मानि । १० ग. °वद्विदितात्मा ह्यने° ।

तेषामभ्यागतानां च स राजा मुनिसत्तमाः । व्यादिदेशाऽऽयतनानि शय्याश्चाप्युपचारतः॥४४
भोजनानि विचित्राणि शालीक्षुयवगोरसैः । उपेत्य नृपतिश्रेष्ठो व्यादिदेश स्वयं तदा ॥ ४५
तथा तस्मिन्महायज्ञे बहवो ब्रह्मवादिनः । ये च द्विजातिप्रवरास्तत्राऽऽसन्द्विजसत्तमाः ॥ ४६
समाजग्मुः सशिष्यास्तान्[1]प्रतिजग्राह पार्थिवः । सर्वांश्चताननुययौ यावदावसथानिति ॥ ४७
स्वयमेव महातेजा दम्भं त्यक्त्वा नृपोत्तमः । ततः कृत्वा स्वशिल्पं च शिल्पिनोऽन्ये च ये तदा
कृत्स्नं[2] यज्ञविधिं राज्ञे तदा तस्मै न्यवेदयन् । ततः श्रुत्वा नृपश्रेष्ठः कृतं सर्वमतन्द्रितः ॥
हृष्टरोमाऽभवद्राजा सह मन्त्रिभिरच्युतः ॥ ४९

ब्रह्मोवाच—

तस्मिन्यज्ञे प्रवृत्ते तु वाग्ग्मिनो[3] हेतुवादिभिः । हेतुवादान्बहूनाहुः परस्परजिगीषवः ॥ ५०
देवेन्द्रस्येव[4] (?)विहितं राजसिंहेन भो द्विजाः । ददृशुस्तोरणान्यत्र शातकुम्भमयानि च ॥ ५१
शय्यासनविकारांश्च सुबहून्रत्न[5]संचयान्[6] । घटपात्रीकटाहानि कलशान्वर्धमानकान् ॥ ५२
न हि कश्चिदसौवर्णमपश्यद्वसुधाधिपः । यूपांश्च शास्त्रपठितान्दारवान्हेमभूषितान् ॥ ५३
उपक्षिप्तान्यथाकालं विधिवद्भूरि[7]वर्चसः । स्थलजा जलजा ये च पशवः केचन द्विजाः ॥ ५४
सर्वानेव समानीतानपश्यंस्तत्र ते नृपाः । गाश्चैव महिषीश्चैव तथा वृद्धस्त्रियोऽपि च ॥ ५५
औदकानि च सत्त्वानि श्वापदानि वयांसि च । जरायुजाण्डजातानि स्वेदजान्युद्भिदानि च[8]५६
पर्वतान्युपधान्यानि भूतानि ददृशुश्च ते । एवं प्रमुदितं सर्वं पशुतो धनधान्यतः ॥ ५७
यज्ञवाटं नृपा दृष्ट्वा विस्मयं परमं गताः । ब्राह्मणानां विशां चैव बहुमिष्टान्नमृद्धिमत् ॥ ५८
पूर्णे शतसहस्रे तु विप्राणां तत्र भुञ्जताम् । दुन्दुभिर्मेघनिर्घोषान्मुहुर्मुहुरथाकरोत् ॥ ५९
विननादासकृच्चापि दिवसे दिवसे गते । एवं स ववृधे यज्ञस्तस्य राज्ञस्तु धीमतः ॥ ६०
अन्नस्य सुबहून्विप्रा उत्सर्गान्निर्गतोपमान् । दधिकुल्याश्च ददृशुः पयसश्च ह्रदांस्तथा ॥ ६१
जम्बूद्वीपो हि सकलो नानाजनपदैर्युतः । द्विजाश्च तत्र दृश्यन्ते राज्ञस्तस्य महामखे ॥ ६२
तत्र यानि[9] सहस्राणि पुरुषाणां ततस्ततः । गृहीत्वा भाजनं जग्मुर्बहूनि द्विजसत्तमाः[10] ॥ ६३
स्राविणश्चापि ते सर्वे सुमृष्टमणिकुण्डलाः । पर्यवेषयन्द्विजातीञ्शतशोऽथ सहस्रशः ॥ ६४
विविधान्यनुपानानि पुरुषा येऽनुयायिनः । ते वै नृपोपभोज्यानि ब्राह्मणेभ्यो ददुः सह ॥ ६५
समागतान्वेदविदो राज्ञश्च पृथिवीश्वरान् । पूजां चक्रे तदा तेषां विधिवद्भूरिदक्षिणः ॥ ६६
दिग्देशादागतान्राज्ञो महासङ्ग्रामशालिनः । नटनर्तककादींश्च गीतस्तुतिविशारदान् ॥ ६७
पत्न्यो मनोरमास्तस्य पीनोन्नतपयोधराः । इन्दीवरपलाशाक्ष्यः शरच्चन्द्रनिभाननाः ॥ ६८
कुलशीलगुणोपेताः सहस्रैकं शताधिकम् । एवं तद्रूपपरमपत्नीगणसमन्वितम् ॥ ६९
रत्नमालाकुलं दिव्यं पताकाध्वजसेवितम् । रत्नहारयुतं रम्यं चन्द्रकान्तिसमप्रभम् ॥ ७०
करिणः पर्वताकारान्मदसिक्तान्[11]महाबलान् । शतशः कोटिसंघातैर्दन्तिभि[12]र्दन्तभूषणैः ॥ ७१
वातवेगजवैरश्वैः सिन्धुजातैः सुशोभनैः । श्वेताश्वैः श्याम[13]कर्णैश्च कोट्यनेकैर्जवान्वितैः ॥ ७२
संनद्धबद्धकक्षैश्च नानाप्रहरणोद्यतैः । असंख्येयैः पदातैश्च देवपुत्रोपमैस्तथा ॥ ७३

१ ख. °स्तान्प्रीत्या ज° । २ क. कृत्स्नयज्ञविधानज्ञास्तदा । ३ ख. वादिनो । ४ ख. °न्द्रस्य विधिं चिन्त्यं रा° । ५ ख. °बहून्नस्य सं° । ६ ख. °न् । स्फाटिकानि च गेहानि क° । ७ ख. °रिदाक्षिणः । स्थ° । ८ ख. च । पार्वतीयानि भूतानि भूतपा द° । ९ ग. यार्मास° । १० ख. °माः । ते वै । ११ ख. °न्मनोहरान् । १२ ख. °न्तिभिः कृतभू । १३ ख. °मवर्णै° ।

इत्येवं ददृशे राजा यज्ञसंभारविस्तरम्[1] । मुदं[2] लेभे तदा राजा संहृष्टो वाक्यमब्रवीत् ॥ ७४

राजोवाच—

आनयध्वं हयश्रेष्ठं सर्वलक्षणलक्षितम् । चारयध्वं पृथिव्यां वै राजपुत्राः सुसंयताः ॥ ७५
विद्वद्भिर्धर्मविद्भिश्च अत्र होमो विधीयताम् । कृष्णच्छागं च महिषं कृष्णसारमृगं द्विजान् ॥ ७६
अनड्वाहं च गाश्चैव सर्वांश्च पशुपालकान् । इष्टयश्च प्रवर्तन्तां प्रासादं वैष्णवं ततः ॥ ७७
सर्वमेतच्च विप्रेभ्यो दीयतां मनसेप्सितम् । स्त्रियश्च रत्नकोट्यश्च ग्रामाश्च नगराणि च ॥ ७८
सम्यक्समृद्धभूम्यश्च विषयाश्चैवमर्थिनाम् । अन्यानि द्रव्यजातानि मनोज्ञानि बहूनि च ॥ ७९
सर्वेषां याचमानानां नास्ति ह्येतन्न भाषयेत् । तावत्प्रवर्ततां यज्ञो यावद्देवैः[3] पुरा त्विह ॥
प्रत्यक्षं मम चाभ्येति यज्ञस्यास्य समीपतः ॥ ८०

ब्रह्मोवाच—

एवमुक्त्वा तदा विप्रा राजसिंहो महाभुजः । ददौ सुवर्णसंघातं कोटीनां चैव भूषणम् ॥ ८१
करेणुशतसाहस्रं वाजिनो नियुतानि च । अर्बुदं चैव वृषभं स्वर्णशृङ्गीश्च धेनुकाः ॥ ८२
सुरूपाः सुरभीश्चैव कांस्यदोहाः पयस्विनीः । प्रायच्छत्स तु विप्रेभ्यो वेदविद्भ्यो मुदा युतः ॥
वासांसि च महार्हाणि राङ्कवास्तरणानि च । सुशुक्लानि च शुभ्राणि प्रवालमणिमुत्तमम् ॥ ८४
अददात्स महायज्ञे रत्नानि विविधानि च ॥ ८५
वज्रवैदूर्यमाणिक्यमुक्तिकाद्यानि यानि च । अलंकारवतीः शुभ्राः कन्या राजीवलोचनाः ॥८६
शतानि पञ्च विप्रेभ्यो राजा हृष्टः प्रदत्तवान् । स्त्रियः पीनपयोभाराः कञ्चुकैः स्वस्तनावृताः ८७
मध्यहीनाश्च सुश्रोण्यः पद्मपत्रायतेक्षणाः । हावभावान्वितग्रीवा बह्व्यो वलयभूषिताः ॥ ८८
पादनूपुरसंयुक्ताः पट्टदुकूलवाससः । एकैकशोऽददात्तस्मिन्काम्याश्च कामिनीर्बहूः ॥ ८९
अर्थिभ्यो ब्राह्मणादिभ्यो हयमेधे द्विजोत्तमाः । भक्ष्यं भोज्यं च संपूर्णं नानासंभारसंयुतम् ९०
खण्डकाद्यान्यनेकानि स्विन्नपक्वांश्च पिष्टकान् । अन्नान्यन्यानि मेध्यांश्च घृतपूरांश्च खाण्डवान् ९१
मधुरांस्तर्जितान्पूपानन्नं मृष्टं सुपाकिकम् । प्रीत्यर्थं सर्वसत्त्वानां दीयतेऽन्नं पुनः पुनः ॥ ९२
दत्तस्य दीयमानस्य धनस्यान्तो न विद्यते । एवं दृष्ट्वा महायज्ञं देवदैत्याः सवा(चा)रणाः॥ ९३
गन्धर्वाप्सरसः सिद्धा ऋषयश्च प्रजेश्वराः । विस्मयं परमं याता दृष्ट्वा क्रतुवरं शुभम् ॥ ९४
पुरोधा मन्त्रिणो राजा हृष्टास्तत्रैव सर्वशः । न तत्र मलिनः कश्चिन्न दीनो न क्षुधाऽन्वितः ॥९५
न वोपसर्गो न ग्लानिर्नाऽऽधयो व्याधयस्तथा । नाकालमरणं तत्र न दंशो न ग्रहा विषम् ९६
हृष्टपुष्टजनाः सर्वे तस्मिन्राज्ञो महोत्सवे । ये च तत्र तपःसिद्धा मुनयश्चिरजीविनः ॥ ९७
न जातं तादृशं यज्ञं धनधान्यसमन्वितम्(?) । एवं स राजा विधिवद्वाजिमेधं द्विजोत्तमाः ॥
क्रतुं समापयामास प्रासादं वैष्णवं तथा ॥ ९८

इति श्रीमहापुराण आदिब्राह्मे स्वयंभ्वृषिसंवादे प्रासादकरणं नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३४०९

---

१ ख. °ज्ञवाटप्रवि° । २ क. °दं चैवातुलां प्राप्य सं° । ३ ग. °वः सुराविह ।

अथाष्टचत्वारिंशोऽध्यायः ।

मुनय ऊचुः—

ब्रूहि नो देवदेवेश यत्पृच्छामः पुरातनम् । यथा ताः प्रतिमाः पूर्वमिन्द्रद्युम्नेन निर्मिताः ॥ १
केन चैव प्रकारेण तुष्टस्तस्मै स माधवः । तत्सर्वं वद चास्माकं परं कौतूहलं हि नः ॥ २

ब्रह्मोवाच—

शृणुध्वं मुनिशार्दूलाः पुराणं वेदसंमितम् । कथयामि पुरा वृत्तं प्रतिमानां च संभवम् ॥ ३
प्रवृत्ते च महायज्ञे प्रासादे चैव निर्मिते । चिन्ता तस्य बभूवाथ प्रतिमार्थमहर्निशम् ॥ ४
न वेद्मि केन देवेशं सर्वेशं लोकपावनम् । सर्गस्थित्यन्तकर्तारं पश्यामि पुरुषोत्तमम् ॥ ५
चिन्ताविष्टस्त्वभूद्राजा शेते रात्रौ दिवाऽपि न । न भुङ्क्ते विविधान्भोगान्न च स्नानं प्रसाधनम् ६
नैव वाद्येन गन्धेन गायनैर्वर्णकैरपि । न गजैर्मदयुक्तैश्च न चानेकैर्हयान्वितैः ॥ ७
नेन्द्रनीलैर्महानीलैः पद्मरागमयैर्न च । सुवर्णरजताद्यैश्च वज्रस्फटिकसंयुतैः ॥ ८
बहुरागार्थकामैर्वा न वन्यैरन्तरिक्षगैः । बभूव तस्य नृपतेर्मनसस्तुष्टिवर्धनम् ॥ ९
शैलमृद्दारुजातेषु प्रशस्तं किं महीतले । विष्णुप्रतिमायोग्यं च सर्वलक्षणलक्षितम् ॥ १०
एतैरेव त्रयाणां तु दयितं स्यात्सुरार्चितम् । स्थापिते प्रीतिमभ्येति इति चिन्तापरोऽभवत् ॥ ११
पञ्चरात्रविधानेन संपूज्य पुरुषोत्तमम् । चिन्ताविष्टो महीपालः संस्तोतुमुपचक्रमे ॥ १२

इति श्रीमहापुराणे आदिब्राह्मे इन्द्रद्युम्नस्य प्रतिमानिर्माणविधानं नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३४२१

अथैकोनपञ्चाशत्तमोऽध्यायः ।

वासुदेव नमस्तेऽस्तु नमस्ते मोक्षकारण । त्राहि मां सर्वलोकेश जन्मसंसारसागरात् ॥ १
निर्मलाम्बरसंकाश नमस्ते पुरुषोत्तम । संकर्षण नमस्तेऽस्तु त्राहि मां धरणीधर ॥ २
नमस्ते हेमगर्भाभ नमस्ते मकरध्वज । रतिकान्त नमस्तेऽस्तु त्राहि मां संवरान्तक ॥ ३
नमस्तेऽञ्जनसंकाश नमस्ते भक्तवत्सल । अनिरुद्ध नमस्तेऽस्तु त्राहि मां वरदो भव ॥ ४
नमस्ते विबुधावास नमस्ते विबुधप्रिय । नारायण नमस्तेऽस्तु त्राहि मां शरणागतम् ॥ ५
नमस्ते बलिनां श्रेष्ठ नमस्ते लाङ्गलायुध । चतुर्मुख जगद्धाम त्राहि मां प्रपितामह ॥ ६
नमस्ते नीलमेघाभ नमस्ते त्रिदशार्चित । त्राहि विष्णो जगन्नाथ मग्नं मां भवसागरे ॥ ७
प्रलयानलसंकाश नमस्ते दितिजान्तक । नरसिंह महावीर्य त्राहि मां दीप्तलोचन ॥ ८
यथा रसातलादुर्वी त्वया दंष्ट्रोद्धृता पुरा । तथा महावराहस्त्वं त्राहि मां दुःखसागरात् ॥ ९
तवैता मूर्तयः कृष्ण वरदाः संस्तुता मया । तवेमे बलदेवाद्याः पृथग्रूपेण संस्थिताः ॥ १०
अङ्गानि तव देवेश गरुत्माद्यास्तथा प्रभो । दिक्पालाः सायुधाश्चैव केशवाद्यास्तथाऽच्युत ॥ ११

ये चान्ये तव देवेश भेदाः प्रोक्ता मनीषिभिः । तेऽपि सर्वे जगन्नाथ प्रसन्नायतलोचन ॥ १२
मयाऽर्चिताः स्तुताः सर्वे तथा यूयं नमस्कृताः । प्रयच्छत वरं मह्यं धर्मकामार्थमोक्षदम् ॥ १३
भेदास्ते कीर्तिता ये तु हरे संकर्षणादयः । तव पूजार्थसंभूतास्ततस्त्वयि समाश्रिताः ॥ १४
न भेदस्तव देवेश विद्यते परमार्थतः । विविधं तव यद्[1]रूपमुक्तं तदुपचारतः ॥ १५
अद्वैतं त्वां कथं द्वैतं वक्तुं शक्नोति मानवः । एके[2]स्त्वं हि हरे व्यापी चित्स्वभावो निरञ्जनः १६
परमं तव यद्रूपं भावाभावविवर्जितम् । निर्लेपं निर्गुणं श्रेष्ठं कूटस्थमचलं ध्रुवम् ॥ १७
सर्वोपाधिविनिर्मुक्तं सत्तामात्रव्यवस्थितम् । तद्देवाश्च न जानन्ति कथं जानाम्यहं प्रभो ॥ १८
अपरं तव यद्रूपं पीतवस्त्रं चतुर्भुजम् । शङ्खचक्रगदापाणिमुकुटाङ्गदधारिणम् ॥ १९
श्रीवत्सोरस्कसंयुक्तं वनमालाविभूषितम् । तै[3]दर्चयन्ति विबुधा ये चान्ये तव संश्रयाः ॥ २०
देवदेव सुरश्रेष्ठ भक्तानामभयप्रद । त्राहि मां पद्मपत्राक्ष मग्नं विषयसागरे ॥ २१
नान्यं पश्यामि लोकेश यस्याहं शरणं व्रजे । त्वामृते कमलाकान्त प्रसीद मधुसूदन ॥ २२
जराव्याधिशतैर्युक्तो नानादुःखैर्निपीडितः । हर्षशोकान्वितो मूढः कर्मपाशैः सुयन्त्रितः ॥ २३
पतितोऽहं महारौद्रे घोरे संसारसागरे । विषमोदकदुष्पारे रागद्वेषझषाकुले ॥ २४
इन्द्रियावर्तगम्भीरे तृष्णाशोकोर्मिसंकुले । निराश्रये निरालम्बे निःसारेऽत्यन्तचञ्चले ॥ २५
मायया मोहितस्तत्र भ्रमामि सुचिरं प्रभो । नानाजातिसहस्रेषु जायमानः पुनः पुनः ॥ २६
मया जन्मान्यनेकानि सहस्राण्ययुतानि च । विविधान्यनुभूतानि संसारेऽस्मिञ्जनार्दन ॥ २७
वेदाः साङ्गा मयाऽधीताः शास्त्राणि विविधानि च । इतिहासपुराणानि तथा शिल्पान्यनेकशः॥
असंतोषाश्च संतोषाः संचयापचया व्ययाः । मया प्राप्ता जगन्नाथ क्षयवृद्ध्यक्षयेतराः ॥ २९
भार्यारिमित्रबन्धूनां वियोगाः संगमास्तथा । पितरो विविधा दृष्टा मातरश्च तथा मया ॥ ३०
दुःखानि चानुभूतानि यानि सौख्यान्यनेकशः । प्राप्ताश्च बान्धवाः पुत्रा भ्रातरो ज्ञातयस्तथा ॥
मयोषितं तथा स्त्रीणां कोष्ठे विण्मूत्रपिच्छले । गर्भवासे महादुःखमनुभूतं तथा प्रभो ॥ ३२
दुःखानि यान्यनेकानि बाल्ययौवनगोचरे । वार्धके च हृषीकेश तानि प्राप्तानि वै मया ॥ ३३
मरणे यानि दुःखानि यममार्गे यमालये[4] । मया तान्यनुभूतानि नरके यातना[5]स्तथा ॥ ३४
कृमिकीटद्रुमाणां च हस्त्यश्वमृगपक्षिणाम् । महिषोष्ट्रगवां चैव तथाऽन्येषां [6]वनौकसाम् ॥ ३५
द्विजातीनां च सर्वेषां शूद्राणां चैव योनिषु । *धनिनां क्षत्रियाणां च दरिद्राणां तपस्विनाम् ॥
नृपाणां नृपभृत्यानां तथाऽन्येषां च देहिनाम् । गृहेषु तेषामुत्पन्नो देव चाहं पुनः पुनः ॥ ३७
गतोऽस्मि दासतां नाथ [7]भृत्यानां बहुशो नृणाम् । दरिद्रत्वं चेश्वरत्वं स्वामित्वं च तथा गतः ॥
हतो मया हताश्चान्ये घातितो घातितास्तथा । दत्तं ममान्यैरन्येभ्यो मया दत्तमनेकशः ॥ ३९
पितृमातृसुहृद्भ्रातृकलत्राणां कृतेन च । धनिनां श्रोत्रियाणां च दरिद्राणां तपस्विनाम् ॥ ४०
उक्तं दैन्यं च विविधं त्यक्त्वा लज्जां जनार्दन । देवातिर्यङ्मनुष्येषु स्थावरेषु चरेषु च ॥ ४१
न विद्यते तथा स्थानं यत्राहं न गतः प्रभो । कदा मे नरके वासः कदा स्वर्गे जगत्पते ॥ ४२

---

* इदमर्धं ख. पुस्तके नास्ति ।

---

१ ख. °द्रूपं यज्ञार्थमुप° । २ ख. °कश्चासि हरिर्व्यापी विश्वभावो नि° । ३ ख. तर्कयन्ति च वि° । ४ ख. °ये । प्रयाता° । ५ ख. °नाकुले । कृ° । ६ ख. दिवौकसाम् । ७ ख. धन्यानां ।

कदा मनुष्यलोकेषु कदा[1] तिर्यग्गतेषु च । जलयन्त्रे यथा चक्रे घटी रज्जुनिबन्धना ॥ ४३
याति चोर्ध्वमधश्चैव कदा मध्ये च तिष्ठति । तथा चाहं सुरश्रेष्ठ[2] कर्मरज्जुसमावृतः ॥ ४४
अधश्चोर्ध्वं तथा मध्ये भ्रमन्गच्छामि योगतः । एवं संसारचक्रेऽस्मिन्भैरवे रोमहर्षणे ॥ ४५
भ्रमामि सुचिरं कालं नान्तं पश्यामि कर्हिचित् । न जाने किं करोम्यद्य हरे व्याकुलितेन्द्रियः
शोकतृष्णाभिभूतोऽहं कांदिशीको विचेतनः । इदानीं त्वामहं देव विह्वलः शरणं गतः ॥ ४७
त्राहि मां दुःखितं कृष्ण मग्नं संसारसागरे । कृपां कुरु जगन्नाथ भक्तं मां यदि मन्यसे ॥ ४८
त्वदृते नास्ति मे बन्धुर्योऽसौ चिन्तां करिष्यति। देव त्वां नाथमासाद्य न भयं मेऽस्ति कुत्रचित्
जीविते मरणे चैव योगक्षेमेऽथ वा प्रभो । ये तु त्वां विधिवद्देव नार्चयन्ति नराधमाः ॥ ५०
सुगतिस्तु कथं तेषां भवे[3]त्संसारबन्धनात् । किं तेषां कुलशीलेन विद्यया जीवितेन च ॥ ५१
येषां न जायते भक्तिर्जगद्धातरि केशवे । प्रकृतिं त्वासुरीं प्राप्य ये त्वां निन्दन्ति मोहिताः ५२
पतन्ति नरके[4] घोरे जायमानाः पुनः पुनः । न तेषां निष्कृतिस्तस्माद्विद्यते नरकार्णवात् ॥ ५३
ये दूषयन्ति दुर्वृत्तास्त्वां देव पुरुषाधमाः । यत्र यत्र भवेज्जन्म मम कर्मनिबन्धनात् ॥ ५४
तत्र तत्र हरे भक्तिस्त्वयि चास्तु दृढा सदा । आराध्य त्वां सुरा दैत्या नराश्चान्येऽपि संयताः
अवापुः परमां सिद्धिं कस्त्वां देव न पूजयेत् । न शक्नुवन्ति ब्रह्माद्याः स्तोतुं त्वां त्रिदशा हरे
कथं मानुषबुद्ध्याऽहं स्तौमि त्वां प्रकृतेः परम् । तथा चाज्ञानभावेन संस्तुतोऽसि मया प्रभो ५७
तत्क्षमस्वापराधं मे यदि तेऽस्ति दया मयि । कृतापराधेऽपि हरे क्षमां कुर्वन्ति साधवः ॥ ५८
तस्मात्प्रसीद देवेश भक्तस्नेहं समाश्रितः । स्तुतोऽसि यन्मया देव भक्तिभावेन चेतसा ॥
साङ्गं भवतु तत्सर्वं वासुदेव नमोऽस्तु ते ॥ ५९

ब्रह्मोवाच—

इत्थं स्तुतस्तदा तेन प्रसन्नो गरुडध्वजः । ददौ तस्मै मुनिश्रेष्ठाः सकलं मनसेप्सितम् ॥ ६०
यः संपूज्य जगन्नाथं प्रत्यहं स्तौति मानवः । स्तोत्रेणानेन मतिमान्स मोक्षं लभते ध्रुवम्[5] ॥ ६१
त्रिसंध्यं यो जपेद्विद्वानिदं स्तोत्रवरं शुचिः । धर्मं चार्थं च कामं च मोक्षं च लभते नरः ॥ ६२
यः पठेच्छृणुयाद्वाऽपि श्रावयेद्वा समाहितः । स लोकं शाश्वतं[6] विष्णोर्याति निर्धूतकल्मषः ॥ ६३
धन्यं पापहरं चेदं भुक्तिमुक्तिप्रदं शिवम् । गुह्यं सुदुर्लभं पुण्यं न देयं यस्य कस्यचित् ॥ ६४
न नास्तिकाय मूर्खाय न कृतघ्नाय मानिने । न दुष्टमतये दद्यान्नाभक्ताय कदाचन ॥ ६५
दातव्यं भक्तियुक्ताय गुणशीलान्विताय च । विष्णुभक्ताय शान्ताय श्रद्धानुष्ठानशालिने ॥ ६६

इदं समस्ताघविनाशहेतुः कारुण्यसंज्ञं सुखमोक्षदं च ।
अशेषवाञ्छाफलदं वरिष्ठं स्तोत्रं मयोक्तं पुरुषोत्तमस्य ॥ ६७
ये तं सुसूक्ष्मं विमला मुरारिं ध्यायन्ति नित्यं पुरुषं पुराणम् ।
ते मुक्तिभाजः प्रविशन्ति विष्णुं मन्त्रैर्यथाऽऽज्यं हुतमध्वराग्नौ ॥ ६८
एकः स देवो भवदुःखहन्ता परः परेषां न ततोऽस्ति चान्यत् ।
द्र(स्र)ष्टा स पाता स तु नाशकर्ता विष्णुः समस्ताखिलसारभूतः ॥ ६९

---

१ ख. °दा तीर्थजनेषु । २ ख. °ष्ठ कामर° । ३ ख. °त्संसारसागरे । किं । ४ ख. °के ते तु जा° । ५ ख. °म् । यः संध्ययोर्जपे° । ६ ख. °तं दिव्यं याति ।

किं विद्यया किं स्वगुणैश्च तेषां यज्ञैश्च दानैश्च तपोभिरुग्रैः ।
येषां न भक्तिर्भवतीह कृष्णे जगद्गुरौ मोक्षसुखप्रदे च ॥ ७०
लोके स धन्यः स शुचिः स विद्वान्मखैस्तपोभिः स गुणैर्वरिष्ठः ।
ज्ञाता स दाता स तु सत्यवक्ता यस्यास्ति भक्तिः पुरुषोत्तमाख्ये ॥ ७१

इति श्रीमहापुराण आदिब्राह्मे स्वयंभ्वृषिसंवादे कारुण्यस्तववर्णनं नामैकोन-
पञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३४९२

अथ पञ्चाशत्तमोऽध्यायः ।

ब्रह्मोवाच—

स्तुत्वैवं मुनिशार्दूलाः प्रणम्य च सनातनम् । वासुदेवं जगन्नाथं सर्वकामफलप्रदं ॥ १
चिन्ताविष्टो महीपालः कुशानास्तीर्य भूतले । वस्त्रं च तन्मना भूत्वा सुष्वाप धरणीतले ॥ २
कथं प्रत्यक्षमभ्येति देवदेवो जनार्दनः । मम चाऽऽर्तिहरो देवस्तदाऽसाविति चिन्तयन् ॥ ३
सुप्तस्य तस्य नृपतेर्वासुदेवो जगद्गुरुः । आत्मानं दर्शयामास शङ्खचक्रगदाभृतम् ॥ ४
स ददर्श तु सप्रेम देवदेवं जगद्गुरुम् । शङ्खचक्रधरं देवं गदाचक्रोग्रपाणिनम् ॥ ५
शार्ङ्गबाणधरं देवं ज्वलत्तेजोतिमण्डलम् । युगान्तादित्यवर्णाभं नीलवैदूर्यसंनिभम् ॥ ६
सुपर्णांसे तमासीनं षोडशार्धभुजं शुभम् । स चास्मै प्राब्रवीद्धीराः साधु राजन्महामते ॥ ७
क्रतुनाऽनेन दिव्येन तथा भक्त्या च श्रद्धया । तुष्टोऽस्मि ते महीपाल वृथा किमनुशोचसि ॥ ८
यदत्र प्रतिमा राजञ्जगत्पूज्या सनातनी । यथा सा प्राप्यते भूप तदुपायं ब्रवीमि ते ॥ ९
गतायामद्य शर्वर्यां निर्मले भास्करोदिते । सागरस्य जलस्यान्ते नानाद्रुमविभूषिते ॥ १०
जलं तथैव वेलायां दृश्यते तत्र वै महत् । लवणस्योदधे राजंस्तरङ्गैः समभिप्लुतम् ॥ ११
कूलान्ते हि महावृक्षः स्थितः स्थलजलेषु च । वेलाभिर्हन्यमानश्च न चासौ कम्पते द्रुमः ॥ १२
परशुमादाय हस्तेन ऊर्मेरन्तस्ततो व्रज । एकाकी विहरन्राजन्स त्वं पश्यसि पादपम् ॥ १३
ईदृक्चिह्नं समालोक्य छेदय त्वमशङ्कितः । छेद्यमानं तु तं वृक्षं प्रातरद्भुतदर्शनम् ॥ १४
दृष्ट्वा तेनैव संचिन्त्य ततो भूपाल दर्शनात् । कुरु तां प्रतिमां दिव्यां जहि चिन्तां विमोहिनीम्

ब्रह्मोवाच—

एवमुक्त्वा महाभागो जगामादर्शनं हरिः । स चापि स्वप्नमालोक्य परं विस्मयमागतः ॥ १६
तां निशां स समुद्वीक्ष्य स्थितस्तद्गतमानसः । व्याहरन्वैष्णवान्मन्त्रान्सूक्तं चैव तदात्मकम् ॥ १७
प्रगतायां रजन्यां तु उत्थितो नान्यमानसः । स स्नात्वा सागरे सम्यग्यथावद्विधिना ततः ॥ १८
दत्त्वा दानं च विप्रेभ्यो ग्रामांश्च नगराणि च । कृत्वा पौर्वाह्णिकं कर्म जगाम स नृपोत्तमः १९

---

१ ख. °ति दृष्टेर्मम ज° । २ ख. °नः । स महार्ति° । ३ ख. सुद्युम्नस्य तु नृ° । ४ ग. °स स्वप्ने तस्मै समक्षवत् । स । ५ ग. तु स्वप्ने वै दे° । ६ ख. °म् । तदा राजानमासाद्य विभुः प्राह महा° । ७ ख. दानेन । ८ ख. ते । प्रभाते विमले जाते नि° । ९ ख. °म् । अश्वत्थं च स° । १० ख °गतम् । तां । ११ ख. तु नान्यचित्तो नृपोत्तमः । स ।

न चाश्वो न पदातिश्च न गजो न च सारथिः । एकाकी स महावेलां प्र[1]विवेश [2]महीपतिः ॥२०
तं ददर्श महावृक्षं तेजस्वन्तं महाद्रुमम् । महातिगमहारोहं पुण्यं विपुलमेव च ॥ २१
[3]महोत्सेधं महाकायं [4]प्रसुप्तं च जलान्तिके । सान्द्रमाञ्जिष्ठवर्णाभं नामजातिविवर्जितम् ॥ २२
नरनाथस्तदा [5]विप्रा द्रुमं दृष्ट्वा मुदाऽन्वितः । परशुना शातयामास निशितेन दृढेन च ॥ २३
द्वैधीकर्तुमनास्तत्र बभूवेन्द्रसखः स च । निरीक्ष्यमाणे काष्ठे तु बभूवाद्भुतदर्शनम् ॥ २४
विश्वकर्मा[6] च विष्णुश्च विप्ररूपधरावुभौ । आजग्मतुर्म[7]हाभागौ तदा तुल्याग्रजन्मानौ ॥ २५
ज्वलमानौ[8] स्वतेजोभिर्दिव्यस्रगनुले[9]पनौ । अथ तौ तं समागम्य नृपमिन्द्रसखं तदा ॥ २६
तावूचतुर्महाराज किमत्र त्वं करिष्यसि । किमर्थं च महाबाहो शातितश्च वनस्पतिः ॥ २७
असहायो महादुर्गे निर्जने गहने वने । महासिन्धुतटे चै[10]वं कथं वै शातितो द्रुमः ॥ २८

ब्रह्मोवाच—

तयोः श्रुत्वा वचो विप्राः स तु राजा मुदाऽन्वितः । बभाषे वचनं ताभ्यां मृदुलं मधुरं तथा ॥
दृष्ट्वा [11]तौ ब्राह्मणौ तत्र चन्द्रसूर्याविवाऽऽगतौ । नमस्कृत्य जगन्नाथाववाङ्मुखमवस्थितः ॥ ३०

राजोवाच—

देवदेवमनाद्यन्तमनन्तं [12]जगतां पतिम् । आराधयितुं प्रतिमां करोमीति मतिर्मम ॥ ३१
अहं स देवदेवेन परमेण महात्मना । स्वप्नान्ते च समुद्दिष्टो भवद्भ्यां श्रावितं मया ॥ ३२

ब्रह्मोवाच—

राज्ञस्तु वचनं श्रुत्वा देवेन्द्रप्रतिमस्य च । प्रहस्य तस्मै विश्वेशस्तुष्टो वचनमब्रवीत् ॥ ३३

विष्णुरुवाच—

साधु साधु महीपाल यदे[13]तन्[14]मतमुत्तमम् । संसारसागरे घोरे कदलीदलसंनिभे ॥ ३४
निःसारे दुःखबहुले[15] कामक्रोधसमाकुले । इन्द्रियावर्तकलिले दुस्तरे रोमहर्षणे ॥ ३५
नानाव्याधिशतावर्ते जलबुद्बुदसंनिभे । यतस्ते मतिरुत्पन्ना विष्णोराराधनाय वै ॥ ३६
धन्यस्त्वं नृपशार्दूल गुणैः सर्वैरलंकृतः । [16]सप्रजा पृथिवी धन्या सशैलवनकानना ॥ ३७
सपुरग्रामनगरा चतुर्वर्णैरलंकृता । यत्र त्वं नृपशार्दूल प्रजाः पालयिता प्रभुः ॥ ३८
एह्येहि सुमहाभाग द्रुमेऽस्मिन्सुखशीतले । आवाभ्यां सह तिष्ठ त्वं कथाभिर्धर्म[17]संश्रितः ॥ ३९
अयं मम सहायस्तु आगतः शिल्पिनां वरः । विश्वकर्मस[18]मः सा[19]क्षान्निपुणः सर्वकर्मसु ॥
मयोद्दिष्टां तु प्रतिमां करोत्येष तटं त्यज ॥ ४०

ब्रह्मोवाच—

श्रुत्वैवं वचनं तस्य तदा राजा द्विजन्मनः । सागरस्य तटं त्यक्त्वा गत्वा तस्य समीपतः ॥ ४१
तस्थौ स नृपतिश्रेष्ठो वृक्षच्छाये सुशीतले । ततस्तस्मै स विश्वात्मा ददावाज्ञां द्विजाकृतिः ॥४२
शिल्पिमुख्याय विप्रेन्द्राः कुरुष्व प्रतिमा इति । कृष्णरूपं परं शान्तं पद्मपत्रायतेक्षणम् ॥ ४३
श्रीवत्सकौस्तुभधरं शङ्खचक्रगदाधरम् । गौराङ्गं क्षीरवर्णाभं द्वितीयं स्वस्तिकाङ्कितम् ॥ ४४

---

१ ख. °वेशामलां हिताम्। तत्रापश्यन्महा°। २ क. महामतिः। ३ ख. महोत्कटं। ४ ख. सुप्रभो (भं)। ५ ख. विष्णुं। ६ क. °र्मा तथा विश्वकर्ता रू°। ७ ख. °हात्मानौ त°। ८ ख. °नौ सुते°। ९ ख. °पनैः। अ°। १० क. °व किमर्थं शा°। ११ क. ख. तौ रूपसंपन्नौ च°। १२ ग. जगतः। १३ क. °तद्व्रत°। १४ ख. °न्मन उत्त°। १५ क. ख. °ले मोहप्राद्रस°। १६ क. समस्या। १७ ख. °संहितः। १८ ख. °मः क्षत्ता निपु°। १९ ग. °क्षाद्विपुलः स°।

लाङ्गलास्त्रधरं देवमनन्ताख्यं महाबलम् । देवदानवगन्धर्वयक्षविद्याधरोरगैः[1] ॥ ४५
न विज्ञातो हि तस्यान्तस्तेनानन्त इति स्मृतः । भगिनीं वासुदेवस्य रुक्मवर्णां सुशोभनाम् ४६
तृतीयां वै सुभद्रां च सर्वलक्षणलक्षिताम् ॥ ४७

ब्रह्मोवाच—

श्रुत्वैतद्वचनं तस्य विश्वकर्मा सुकर्मकृत्[2] । तत्क्षणात्कारयामास प्रतिमाः शुभलक्षणाः ॥ ४८
प्रथमं शुक्लवर्णाभं शारदेन्दुसमप्रभम् । आरक्ताक्षं महाकायं[3] स्फटाविकटमस्तकम् ॥ ४९
नीलाम्बरधरं चोग्रं[4] बलं बलमदोद्धतम् । कुण्डलैकधरं दिव्यं[5] गदामुशलधारिणम् ॥ ५०
द्वितीयं पुण्डरीकाक्षं नीलजीमूतसंनिभम् । अतसीपुष्पसंकाशं पद्मपत्रायतेक्षणम्[6] ॥ ५१
पीतवाससमत्युग्रं शुभं श्रीवत्सलक्षणम् । चक्रपूर्णकरं दिव्यं सर्वपापहरं हरिम् ॥ ५२
तृतीयां स्वर्णवर्णाभां पद्मपत्रायतेक्षणाम् । विचित्रवस्त्रसंछन्नां हारकेयूरभूषिताम् ॥ ५३
विचित्राभरणोपेतां रत्नहारावलम्बिताम्[7] । पीनोन्नतकुचां रम्यां विश्वकर्मा विनिर्ममे ॥ ५४
स तु राजाऽद्भुतं दृष्ट्वा क्षणेनैकेन निर्मिताः । दिव्यवस्त्रयुगच्छन्ना नानारत्नैरलंकृताः ॥ ५५
सर्वलक्षणसंपन्नाः प्रतिमाः सुमनोहराः । विस्मयं परमं गत्वा इदं वचनमब्रवीत् ॥ ५६

इन्द्रद्युम्न उवाच—

किं देवौ समनुप्राप्तौ[8] द्विजरूपधरावुभौ । उभौ चाद्भुतकर्माणौ देववृत्तावमानुषौ ॥ ५७
देवौ वा मानुषौ वाऽपि यक्षविद्याधरौ[9] युवाम् । किंनु ब्रह्महृषीकेशौ किं वसू किमुताश्विनौ ५८
न वेद्मि सत्यसद्भावौ मायारूपेण संस्थितौ । युवां गतोऽस्मि शरणमात्मा तु मे प्रकाश्यताम् ५९

इति श्रीमहापुराणे ब्राह्मे स्वयंभ्वृषिसंवादे प्रतिमोत्पत्तिकथनं नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

आदितः श्लोकानां समष्ट्यङ्काः—३५५१

अथैकपञ्चाशत्तमोऽध्यायः ।

---

[10]श्रीभगवानुवाच—

नाहं देवो न यक्षो वा न दैत्यो न च [11]देवराट् । न ब्रह्मा न च रुद्रोऽहं विद्धि मां [12]पुरुषोत्तमम्
अर्तिहा सर्वलोकानामनन्तबलपौरुषः । आराधनीयो भूतानामन्तो यस्य न विद्यते ॥ २
पठ्यते सर्वशास्त्रेषु वेदान्तेषु निगद्यते । यमाहुर्ज्ञानगम्येति वासुदेवेति योगिनः ॥ ३
अहमेव स्वयं ब्रह्मा [13]अहं विष्णुः शिवोऽप्यहम् । इन्द्रोऽहं देवराजश्च[14] जगत्संयमनो यमः ॥ ४
पृथिव्यादीनि भूतानि त्रेताग्निर्हुतभुङ्नृप । वरुणोऽपां पतिश्चाहं धरित्री च महीधरः ॥ ५
यत्किंचिद्वाङ्मयं लोके जगत्स्थावरजङ्गमम् । चराचरं च यद्विश्वं मदन्यन्नास्ति किंचन ॥ ६
प्रीतोऽहं ते नृपश्रेष्ठ वरं वरय सुव्रत । यदिष्टं तत्प्रयच्छामि हृदि यत्ते व्यवस्थितम् ॥ ७
मद्दर्शनमपुण्यानां स्वप्नान्तेऽपि न जायते । त्वं पुनर्दृढभक्तित्वात्प्रत्यक्षं दृष्टवानसि ॥ ८

---

१ क. °गैः । महिमा यस्य न ज्ञातस्ते° । २ ख. स्वकर्मकृत् । ३ ख. °यं फटा° । क. °यं बलवन्तं म° । ४ ख. घोरं । ५ क. ग. °व्यं महामु° । ६ क. °पत्रनिभेक्ष° । ७ क. °हारविलम्बिनीम् । ख. °हारविल° । ८ ख. °सौ दिव्यरू° । ९ ख. °रौ च किम् । १० ख. ब्राह्मण उवा° । ११ ख. देवताः । १२ क. ख. परमेश्वरम् । १३ क. अहमेव गदाधरः । तथैव दे° । १४ क. °श्च प्रजासंय° ।

ब्रह्मोवाच—

श्रुत्वैवं वासुदेवस्य वचनं तस्य भो द्विजाः । रोमाञ्चित[1]तनुर्भूत्वा इदं स्तोत्रं जगौ नृपः ॥ ९

राजोवाच—

श्रियः कान्त नमस्तेऽस्तु श्रीपते पीतवाससे । श्रीद श्रीश श्रीनिवास नमस्ते श्रीनिकेतन ॥ १०

आद्यं पुरुषमीशानं [2]सर्वेशं सर्वतोमुखम् । निष्कलं परमं देवं प्रणतोऽस्मि [3]सनातनम् ॥ ११

शब्दातीतं [4]गुणातीतं भावाभावविवर्जितम् । निर्लेपं निर्गुणं सूक्ष्मं सर्वज्ञं सर्वभावनम्[5] ॥ १२

प्रावृण्मेघप्रतीकाशं[6] गोब्रा[7]ह्मणहिते रतम् । सर्वेषामेव गोप्तारं व्यापिनं सर्वभाविनम् ॥ १३

शङ्खचक्रधरं देवं गदामुशलधारिणम् । नमस्ये वरदं देवं नीलोत्पलदलच्छविम् ॥ १४

नागपर्यङ्कशयनं क्षीरोदार्ण[8]वशायिनम् । नमस्येऽहं हृषीकेशं सर्वपापहरं हरिम् ॥ १५

पुनस्त्वां देवदेवेशं नमस्ये वरदं विभुम् । सर्वलोकेश्वरं [9]विष्णुं मोक्षकारणमव्ययम् ॥ १६

ब्रह्मोवाच—

एवं स्तुत्वा तु तं देवं प्रणिपत्य कृताञ्जलिः । उवाच प्रणतो भूत्वा निपत्य धरणीतले ॥ १७

राजोवाच—

प्रीतोऽसि यदि मे नाथ वृणोमि वरमुत्तमम् । देवासुराः सगन्धर्वा यक्षरक्षोमहोरगाः ॥ १८

सिद्धविद्याधराः साध्याः किंनरा गुह्यकास्तथा । ऋष[10]यो ये महाभागा नानाशास्त्रविशारदाः १९

परिव्राड्योगयुक्ताश्च वेदतत्त्वार्थचिन्तकाः । मोक्षमार्गविदो येऽन्ये ध्यायन्ति परमं पदम् ॥ २०

निर्गुणं निर्मलं शान्तं[11] यत्पश्यन्ति मनीषिणः । तत्पदं गन्तुमिच्छामि त्वत्प्रसादात्सुदुर्लभम् २१

श्रीभगवानुवाच—

[12]सर्वं भवतु भद्रं ते यथेष्टं सर्वमाप्नुहि । भविष्यति यथाकामं मत्प्रसादान्न संशयः ॥ २२

दश वर्षसहस्राणि तथा नव शतानि च । अविच्छिन्नं महाराज्यं कुरु त्वं नृपसत्तम ॥ २३

प्रयास्यसि पदं दिव्यं दुर्लभं यत्सुरासुरैः । पूर्णमनोरथं शान्तं गुह्यमव्यक्तमव्ययम् ॥ २४

परात्परतरं सूक्ष्मं [13]निर्लेपं [14]निष्कलं ध्रुवम्[15] । चिन्ताशोकविनिर्मुक्तं क्रियाकारणवर्जितम् ॥ २५

तदहं दर्शयिष्यामि ज्ञेयाख्यं परमं पदम् । यं प्राप्य परमानन्दं प्राप्स्यसि परमां गतिम् ॥ २६

कीर्तिश्च तव राजेन्द्र भ[16]वत्यत्र महीतले । याव[17]द्धरा नभो यावद्यावच्चन्द्रार्कतारकम् ॥ २७

यावत्समुद्राः सप्तैव यावन्मेर्वादिपर्वताः । तिष्ठन्ति दिवि देवाश्च तावत्सर्वत्र चाव्यया ॥ २८

इन्द्रद्युम्नसरो नाम तीर्थं य[18]ज्ञाङ्गसंभवम् । यत्र स्नात्वा सकृल्लोकः शक्रलोकमवाप्नुयात् ॥ २९

दापयिष्यति यः पिण्डांस्तटेऽस्मिन्सरसः शुभे । कुलैकविंशमुद्धृत्य शक्रलोकं गमिष्यति ॥ ३०

पूज्यमानोऽप्सरोभिश्च गन्धर्वैर्गीतनिस्वनैः । विमानेन वसेत्तत्र यावदिन्द्राश्चतुर्दश ॥ ३१

सरसो दक्षिणे भागे नैर्ऋत्यां तु समाश्रिते । न्यग्रोधस्तिष्ठते तत्र तत्समीपे तु मण्डपः ॥ ३२

केतकीवनसंछन्नो नानापादपसंकुलः । नारिकेलैरसंख्येयैश्चम्पकैर्व[19]कुलावृतैः ॥ ३३

अशोकैः कर्णिकारैश्च पुंनागैर्नागकेसरैः । पाटलाम्रातसरलैश्चन्दनैर्देवदारुभिः ॥ ३४

---

१ क. °तवपुर्भू° । २ क. सर्वगं । ३ ख. पुरातनम् । ४ ख. ज्ञानगम्यं । ५ ख. °म् । सान्द्रमेघ° । ६ ख. °शं ब्रा° । ७ ख. °ह्मणानां हितं शिवम् । ८ ख. °ववासिन° । ९ क. देवं । १० ख. °योऽथ म° । ११ ख. °न्तं गुह्यं परमपावनम् । त° । १२ क. एवं । १३ क. निर्गुणं ख. निर्मलं । १४ क. ख. निश्चलं । १५ ख. °म् । जराशो° । १६ ख. तिष्ठत्वत्र । १७ ख. °च्चराचरो लोको यावच्च° । १८ ख. °ज्ञान्तसं° । १९ ख. °कुलैर्वृतः । अ° ।

न्यग्रोधाश्वत्थखदिरैः पारिजातैः सहार्जुनैः । हिन्तालैश्चैव तालैश्च शिंशपैर्बदरैस्तथा ॥ ३५
करञ्जैर्लकुचैः प्लक्षैः पनसैर्बिल्वधातुकैः । अन्यैर्बहुविधैर्वृक्षैः शोभितः समलंकृतः ॥ ३६
आषाढस्य सिते पक्षे पञ्चम्यां पितृदैवते । ऋक्षे नेष्यन्ति नस्तत्र नीत्वा सप्त दिनानि वै ॥ ३७
मण्डपे स्थापयिष्यन्ति सुवेश्याभिः सुशोभनैः । क्रीडाविशेषबहुलैर्नृत्यगीतमनोहरैः ॥ ३८
चामरैः स्वर्णदण्डैश्च व्यजनै रत्नभूषणैः । वीजयन्तस्तथाऽस्मभ्यं स्थापयिष्यन्ति मङ्गलाः ॥ ३९
ब्रह्मचारी यतिश्चैव स्नातकाश्च द्विजोत्तमाः । वानप्रस्था गृहस्थाश्च सिद्धाश्चान्ये च ब्राह्मणाः ४०
नानावर्णपदैः स्तोत्रैर्ऋग्यजुःसामनिस्वनैः । करिष्यन्ति स्तुतिं राजन्रामकेशवयोः पुनः ॥ ४१
ततः स्तुत्वा च दृष्ट्वा च संप्रणम्य च भक्तितः । नरो वर्षायुतं दिव्यं श्रीमद्धरिपुरे वसेत् ॥ ४२
पूज्यमानोऽप्सरोभिश्च गन्धर्वैर्गीतनिस्वनैः । हरेरनुचरस्तत्र क्रीडते केशवेन वै ॥ ४३
विमानेनार्कवर्णेन रत्नहारेण भ्राजता । सर्वकामैर्महाभोगैस्तिष्ठते भुवनोत्तमे ॥ ४४
तपःक्षयादिहाऽऽगत्य मनुष्यो ब्राह्मणो भवेत् । कोटीधनपतिः श्रीमांश्चतुर्वेदी भवेद्ध्रुवम् ॥ ४५

ब्रह्मोवाच—

एवं तस्मै वरं दत्त्वा कृत्वा च समयं हरिः । जगामादर्शनं विप्राः सहितो विश्वकर्मणा ॥ ४६
स तु राजा तदा हृष्टो रोमाञ्चिततनूरुहः । कृतकृत्यमिवाऽऽत्मानं मेने संदर्शनाद्धरेः ॥ ४७
ततः कृष्णं च रामं च सुभद्रां च वरप्रदाम् । रथैर्विमानसंकाशैर्मणिकाञ्चनचित्रितैः ॥ ४८
संवाह्य तास्तदा राजा महामङ्गलनिःस्वनैः । आनयामास मतिमान्सामात्यः सपुरोहितः ॥ ४९
नानावादित्रनिर्घोषैर्नानावेदस्वनैः शुभैः । संस्थाप्य च शुभे देशे पवित्रे सुमनोहरे ॥ ५०
ततः शुभतिथौ काले नक्षत्रे शुभलक्षणे । प्रतिष्ठां कारयामास सुमुहूर्ते द्विजैः स ह ॥ ५१
यथोक्तेन विधानेन विधिदृष्टेन कर्मणा । आचार्यानुमतेनैव सर्वं कृत्वा महीपतिः ॥ ५२
आचार्याय तदा दत्त्वा दक्षिणां विधिवत्प्रभुः । ऋत्विग्भ्यश्च विधानेन तथाऽन्येभ्यो धनं ददौ
कृत्वा प्रतिष्ठां विधिवत्प्रासादे भवनोत्तमे । स्थापयामास तान्सर्वान्विधिदृष्टेन कर्मणा ॥ ५४
ततः संपूज्य विधिना नानापुष्पैः सुगन्धिभिः । सुवर्णमणिमुक्ताद्यैर्नानावस्त्रैः सुशोभनैः ॥ ५५
रत्नैश्च विविधैर्दिव्यैरासनैर्ग्रामपत्तनैः । ददौ चान्यांन्स विषयान्पुराणि नगराणि च ॥ ५६
एवं बहुविधं दत्त्वा राज्यं कृत्वा यथोचितम् । इष्ट्वा च विविधैर्यज्ञैर्दत्त्वा दानान्यनेकशः ॥ ५७
कृतकृत्यस्ततो राजा त्यक्तसर्वपरिग्रहः । जगाम परमं स्थानं तद्विष्णोः परमं पदम् ॥ ५८
एवं मया मुनिश्रेष्ठाः कथितो वो नृपोत्तमः । क्षेत्रस्य चैव माहात्म्यं किमन्यच्छ्रोतुमिच्छथ ॥ ५९

विष्णुरुवाच—

श्रुत्वैवं वचनं तस्य ब्रह्मणोऽव्यक्तजन्मनः । आश्चर्यं मेनिरे विप्राः पप्रच्छुश्च पुनर्मुदा ॥ ६०

मुनय ऊचुः—

कस्मिन्काले सुरश्रेष्ठ गन्तव्यं पुरुषोत्तमम् । विधिना केन कर्तव्यं पञ्चतीर्थमिति प्रभो ॥ ६१
एकैकस्य च तीर्थस्य स्नानदानस्य यत्फलम् । देवताप्रेक्षणे चैव ब्रूहि सर्वं पृथक्पृथक् ॥ ६२

---

१ क. ख. °भूषितैः । वी° । २ क. ख. °नामन्त्रप° । ३ क. ख. °नैः । हाररत्नधर° । ४ ख. राजता । ५ ख. °वेदो भ° । ६ क. °त्त्वा ध्मात्वा शङ्खं तदा ह° । ७ क. °न्यानि वित्तानि ग्रामाणि न° । ८ ख. त्यक्त्वा देहं दिवं ययौ । देवदेवप्रसादेन जगाम परमं प° । ९ ख. मुनिश्रेष्ठ ।

ब्रह्मोवाच—

निराहारः कुरुक्षेत्रे पादेनैकेन यस्तपेत् । जितेन्द्रियो जितक्रोधः सप्तसंवत्सरायुतम् ॥ ६३

दृष्ट्वा सदा ज्येष्ठशुक्लद्वादश्यां पुरुषोत्तमम् । कृतोपवासः प्राप्नोति ततोऽधिकतरं फलम् ॥ ६४

तस्माज्ज्येष्ठे मुनिश्रेष्ठाः प्रयत्नेन सुसंयतैः । स्वर्गलोकेप्सुविप्राद्यैर्द्रष्टव्यः पुरुषोत्तमः ॥ ६५

पञ्चतीर्थं तु विधिवत्कृत्वा ज्येष्ठे नरोत्तमः । शुक्लपक्षस्य द्वादश्यां पश्येत्तं पुरुषोत्तमम् ॥ ६६

ये पश्यन्त्यव्ययं देवं द्वादश्यां पुरुषोत्तमम् । ते विष्णुलोकमासाद्य न च्यवन्ते कदाचन ॥ ६७

तस्माज्ज्येष्ठे प्रयत्नेन गन्तव्यं भो द्विजोत्तमाः । कृत्वा तस्मिन्पञ्चतीर्थं द्रष्टव्यः पुरुषोत्तमः ॥६८

सुदूरस्थोऽपि यो भक्त्या कीर्तयेत्पुरुषोत्तमम् । अहन्यहनि शुद्धात्मा सोऽपि विष्णुपुरं व्रजेत् ६९

यात्रां करोति कृष्णस्य श्रद्धया यः समाहितः । सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः ॥ ७०

चक्रं दृष्ट्वा हरेर्दूरात्प्रासादोपरि संस्थितम् । सहसा मुच्यते पापान्नरो भक्त्या प्रणम्य तत् ॥७१

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे पुरुषोत्तमवर्णनं नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३६२२

अथ द्विपञ्चाशत्तमोऽध्यायः ।

ब्रह्मोवाच—

आसीत्कल्पे मुनिश्रेष्ठाः संप्रवृत्ते महाक्षये । नष्टेऽर्कचन्द्रे पवने नष्टे स्थावरजङ्गमे ॥ १

उदिते प्रलयादित्ये प्रचण्डे घनगर्जिते । विद्युदुत्पातसंघातैः संभग्ने तरुपर्वते ॥ २

लोके च संहृते सर्वे महदुल्कानिबर्हणे । शुष्केषु सर्वतोयेषु सरःसु च सरित्सु च ॥ ३

ततः संवर्तको वह्निर्वायुना सह भो द्विजाः । लोकं तु प्राविशत्सर्वमादित्यैरुपशोभितम् ॥ ४

पश्चात्स पृथिवीं भित्त्वा प्रविश्य च रसातलम् । देवदानवयक्षाणां भयं जनयते महत् ॥ ५

निर्दहन्नागलोकं च यच्च किंचित्क्षिताविह । अधस्तान्मुनिशार्दूलाः सर्वं नाशयते क्षणात् ॥ ६

ततो योजनविंशानां सहस्राणि शतानि च । निर्दहत्याशुगो वायुः स च संवर्तकोऽनलः ॥ ७

सदेवासुरगन्धर्वं सयक्षोरगराक्षसम् । ततो दहति संदीप्तः सर्वमेव जगत्प्रभुः ॥ ८

प्रदीप्तोऽसौ महारौद्रः कल्पाग्निरितिसंश्रुतः । महाज्वालो महार्चिष्मान्संप्रदीप्तमहास्वनः ॥ ९

सूर्यकोटिप्रतीकाशो ज्वलन्निव स तेजसा । त्रैलोक्यं चादहत्तूर्णं ससुरासुरमानुषम् ॥ १०

एवंविधे महाघोरे महाप्रलयदारुणे । ऋषिः परमधर्मात्मा ध्यानयोगपरोऽभवत् ॥ ११

एकः संतिष्ठते विप्रा मार्कण्डेयेति विश्रुतः । मोहपाशैर्निबद्धोऽसौ क्षुत्तृष्णाकुलितेन्द्रियः ॥ १२

स दृष्ट्वा तं महावह्निं शुष्ककण्ठोष्ठतालुकः । तृष्णार्तः प्रस्खलन्विप्रास्तदाऽसौ भयविह्वलः ॥ १३

बभ्राम पृथिवीं सर्वां कांदिशीको विचेतनः । त्रातारं नाधिगच्छन्वै इतश्चेतश्च धावति ॥ १४

न लेभे च तदा शर्म यत्र विश्राम्यता द्विजाः । करोमि किं न जानामि यस्याहं शरणं व्रजे १५

---

१ ख. सकृत्सुरश्रेष्ठं द्वाद° । २ क. ख. पञ्चतीर्थानि । ३ क. °या परया युतः । ४ ख. समाश्रितः । ५ ख. °र्सीत्कालक्षांप्रतरः सं° । ६ ख. संहृते । ७ क. ख. सहितो द्वि° । ८ ख. संतप्तः । ९ ख. °ष्णाव्याकुलेन्द्रि° । १० ख. ग. कांदिग्भूतो ।

कथं पश्यामि तं देवं पुरुषेशं सनातनम् । इति संचितयन्देवमेकाग्रेण सनातनम् ॥ १६
प्राप्तवांस्तत्पदं दिव्यं महाप्रलयकारणम् । पुरुषेशमिति ख्यातं वटराजं सनातनम् ॥ १७
त्वरायुक्तो मुनिश्चासौ न्यग्रोधस्यान्तिकं ययौ । आसाद्य तं मुनिश्रेष्ठास्तस्य मूले समाविशत् १८
न कालाग्निभयं तत्र न चाङ्गारप्रवर्षणम् । न संवर्तागमस्तत्र न च वज्राशनिस्तथा ॥ १९

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे मार्कण्डेयेन वटदर्शनं नाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३६४१

अथ त्रिपञ्चाशत्तमोऽध्यायः ।

ब्रह्मोवाच—

ततो गजकुलप्रख्यास्तडिन्मालाविभूषिताः । समुत्तस्थुर्महामेघा नभस्यद्भुतदर्शनाः ॥ १
केचिन्नीलोत्पलश्यामाः केचित्कुमुदसंनिभाः । केचित्किञ्जल्कसंकाशाः केचित्पीताः पयोधराः॥
केचिद्धरितसंकाशाः काकाण्डसंनिभास्तथा । केचित्कमलपत्राभाः केचिद्धिङ्गुलसंनिभाः ॥ ३
केचित्पुरवराकाराः केचिद्गिरिवरोपमाः । केचिदञ्जनसंकाशाः केचिन्मरकतप्रभाः ॥ ४
विद्युन्मालापिनद्धाङ्गाः समुत्तस्थुर्महाघनाः । घोररूपा महाभागा घोरस्वननिनादिताः ॥ ५
ततो जलधराः सर्वे समावृण्वन्नभस्तलम् । तैरियं पृथिवी सर्वा सपर्वतवनाकरा ॥ ६
आपूरिता दिशः सर्वाः सलिलौघपरिप्लुताः । ततस्ते जलदा घोरा वारिणा मुनिसत्तमाः ॥ ७
सर्वतः प्लावयामासुश्चोदिताः परमेष्ठिना । वर्षमाणा महातोयं पूरयन्तो वसुंधराम् ॥ ८
सुघोरमशिवं रौद्रं नाशयन्ति स्म पावकम् । ततो द्वादश वर्षाणि पयोदाः समुपप्लवे ॥ ९
धाराभिः पूरयन्तो वै चोद्यमाना महात्मना । ततः समुद्राः स्वां वेलामतिक्रामन्ति भो द्विजाः ॥
पर्वताश्च व्यशीर्यन्त मही चाप्सु निमज्जति । सर्वतः सुमहाभ्रान्तास्ते पयोदा नभस्तलम् ॥ ११
संवेष्टयित्वा नश्यन्ति वायुवेगसमाहताः । ततस्तं मारुतं घोरं स विष्णुर्मुनिसत्तमाः ॥ १२
आदिपद्मालयो देवः पीत्वा स्वपिति भो द्विजाः । तस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे ॥ १३
नष्टे देवासुरनरे यक्षराक्षसवर्जिते । ततो मुनिः स विश्रान्तो ध्यात्वा च पुरुषोत्तमम् ॥ १४
ददर्श चक्षुरुन्मील्य जलपूर्णां वसुंधराम् । नापश्यत्तं वटं नोर्वीं न दिगादि न भास्करम् ॥ १५
न चन्द्रार्काग्निपवनं न देवासुरपन्नगम् । तस्मिन्नेकार्णवे घोरे तमोभूते निराश्रये ॥ १६
निमज्जन्स तदा विप्राः संतर्तुमुपचक्रमे । बभ्रामासौ मुनिश्चाऽऽर्त इतश्चेतश्च संप्लवन् ॥ १७
निममज्ज तदा विप्रास्त्रातारं नाधिगच्छति । एवं तं विह्वलं दृष्ट्वा कृपया पुरुषोत्तमः ॥
प्रोवाच मुनिशार्दूलास्तदा ध्यानेन तोषितः ॥ १८

श्रीभगवानुवाच—

वत्स श्रान्तोऽसि बालस्त्वं भक्तस्त्र मम सुव्रत । आगच्छाऽऽगच्छ शीघ्रं त्वं मार्कण्डेय ममान्तिकम्

---

१ क. ख. यास्यामि । २ क. ख. महत्तोयं । ३ क. °ष्णुर्द्विजस° । ४ क. ख. °रे तमोभूते निराश्रये । न° । ५ क. °रमानवम् । ६ क. संप्लवे । ७ ख. °त्स प्रीतोऽस्मि वा° । ८ ख. शीघ्रेण मा° ।

मा त्वयैव च भेतव्यं संप्राप्तोऽसि ममाग्रतः । मार्कण्डेय मुने धीर बालस्त्वं श्रमपीडितः ॥ २०

ब्रह्मोवाच—

तस्य तद्वचनं श्रुत्वा मुनिः परमकोपितः । उवाच स तदा विप्रा विस्मितश्चाभवन्मुहुः ॥ २१

मार्कण्डेय उवाच—

कोऽयं नाम्ना कीर्तयति तपः परिभवन्निव । बहुवर्षसहस्राख्यं धर्षयन्निव[1] मे[2] वपुः ॥ २२

न ह्येष समुदाचारो देवेष्वपि समाहितः । मां ब्रह्मा स[3] च देवेशो दीर्घायु[4]रिति भाषते ॥ २३

कस्तपो घोरशिरसो ममाद्य त्यक्तजीवितः । मार्कण्डेयेति चोक्त्वा मन्मृत्युं गन्तुमिहेच्छति ॥ २४

ब्रह्मोवाच—

एवमुक्त्वा तदा विप्राश्चिन्ताविष्टोऽभवन्मुनिः । किं[5] स्वप्नोऽयं मया दृष्टः किंवा मोहोऽयमागतः ॥

इत्थं चिन्तयतस्तस्य उत्पन्ना दुःखहा[6] मतिः । व्रजामि शरणं देवं भक्त्याऽहं पुरुषोत्तमम् ॥ २६

स गत्वा शरणं देवं[7] मुनिस्तद्गतमानसः । ददर्श तं वटं भूयो विशालं सलिलोपरि ॥ २७

शाखायां तस्य सौवर्णे विस्तीर्णायां महाद्भुतम् । रुचिरं दिव्यपर्यङ्कं रचितं विश्वकर्मणा ॥ २८

वज्रवैडूर्यरचितं मणिविद्रुमशोभितम् । पद्मरागादिभिर्जुष्टं रत्नैरन्यैरलंकृतम् ॥ २९

नानास्तरणसंवीतं नानारत्नोपशोभितम् । नानाश्चर्यसमायुक्तं प्रभामण्डलमण्डितम् ॥ ३०

तस्योपरि स्थितं देवं कृष्णं बालवपुर्धरम् । सूर्यकोटिप्रतीकाशं दीप्यमानं सुवर्चसम् ॥ ३१

चतुर्भुजं[8] सुन्दराङ्गं पद्मपत्रायतेक्षणम् । श्रीवत्सवक्षसं देवं शङ्खचक्रगदाधरम् ॥ ३२

वनमालावृतोरस्कं दिव्यकुण्डलधारिणम् । हारभारार्पितग्रीवं दिव्यरत्नविभूषितम् ॥ ३३

दृष्ट्वा तदा मुनिर्देवं विस्मयोत्फुल्ललोचनः । रोमाञ्चिततनुर्देवं प्रणिपत्येदमब्रवीत् ॥ ३४

मार्कण्डेय उवाच—

अहो चैकार्णवे घोरे विनष्टे सचराचरे । कथमेको ह्ययं बालस्तिष्ठत्यत्र सुनिर्भयः[9] ॥ ३५

ब्रह्मोवाच—

भूतं भव्यं भविष्यं च जानन्नपि महामुनिः । न बुबोध तदा देवं मायया तस्य मोहितः ॥

यदा न बुबुधे चैनं तदा[10] खेदादुवाच ह ॥ ३६

मार्कण्डेय उवाच—

वृथा मे तपसो वीर्यं वृथा ज्ञानं वृथा क्रिया । वृथा मे जीवितं दीर्घं वृथा मानुष्य[11]मेव च ॥ ३७

योऽहं सुप्तं न जानामि पर्यङ्के दिव्यबालकम् ॥ ३८

ब्रह्मोवाच—

एवं संचिन्तयन्विप्रः प्लवमानो विचेतनः । त्राणार्थं विह्वलश्चासौ निर्वेदं गतवांस्तदा ॥ ३९

ततो बालार्कसंकाशं स्वमहिम्ना[12] व्यवस्थितम् । सर्वतेजोमयं विप्रा न शशाका[13]भिवीक्षितुम् ॥ ४०

दृष्ट्वा तं मुनिमायान्तं स बालः प्रहसन्निव । प्रोवाच मुनिशार्दूलास्तदा मेघौघनिस्वनः ॥ ४१

---

१ ख. वपुः । २ ग. °व तेजसा । न । ३ क. न । ४ क. °युषमभाषत । क° । ५ ख. किं मोहो मां समारूढः किं वा भ्रंशोऽय° । ६ क. ख. दुःसहा । ७ क. ख. विष्णुं । ८ क. ग. °भुजमुदाराङ्गं । ९ क. सुनिश्चलः । १० क. ख. °दा दुःखादु° । ११ ख. °नुषजन्म च । १२ ख. स्वमाहिम्नि । १३ ख. °शाक च वी° ।

श्रीभगवानुवाच—

वत्स जानामि श्रान्तं त्वां त्राणार्थं मामुपस्थितम् । शरीरं विश मे क्षिप्रं विश्रामस्ते मयोदितः॥

ब्रह्मोवाच—

श्रुत्वा स वचनं तस्य किंचिन्नोवाच मोहितः । विवेश वदनं तस्य विवृतं चावशो मुनिः ॥ ४३

इति श्रीमहापुराणे ब्राह्मे स्वयंभ्वृषिसंवादे मार्कण्डेयप्रलयदर्शनं नाम
त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्लोकानामादितः समष्ट्यङ्काः—३६८४

अथ चतुष्पञ्चाशत्तमोऽध्यायः ।

ब्रह्मोवाच—

स प्रविश्योदरे तस्य बालस्य मुनिसत्तमः । ददर्श पृथिवीं कृत्स्नां नानाजनपदैर्वृताम् ॥ १
लवणेक्षुसुरासर्पिर्दधिदुग्धजलोदधीन् । ददर्श तान्समुद्रांश्च जम्बु प्लक्षं च शाल्मलम् ॥ २
कुशं क्रौञ्चं च शाकं च पुष्करं च ददर्श सः । भारतादीनि वर्षाणि तथा सर्वांश्च पर्वतान् ॥ ३
मेरुं च सर्वरत्नाढ्यमपश्यत्कनकाचलम् । नानारत्नान्वितैः शृङ्गैर्भूषितं बहुकन्दरम् ॥ ४
नानामुनिजनाकीर्णं नानावृक्षवनाकुलम् । नानासत्त्वसमायुक्तं नानाश्चर्यसमन्वितम् ॥ ५
व्याघ्रैः सिंहैर्वराहैश्च चामरैर्महिषैर्गजैः । मृगैः शाखामृगैश्चान्यैर्भूषितं सुमनोहरम् ॥ ६
शक्राद्यैर्विविधैर्देवैः सिद्धचारणपन्नगैः । मुनियक्षाप्सरोभिश्च वृतैश्चान्यैः सुरालयैः ॥ ७

[*ब्रह्मोवाच]—

एवं सुमेरुं श्रीमन्तमपश्यन्मुनिसत्तमः । पर्यटन्स तदा विप्रस्तस्य बालस्य चोदरे ॥ ८
हिमवन्तं हेमकूटं निषधं गन्धमादनम् । श्वेतं च दुर्धरं नीलं कैलासं मन्दरं गिरिम् ॥ ९
महेन्द्रं मलयं विन्ध्यं पारियात्रं तथाऽर्बुदम् । सह्यं च शुक्तिमन्तं च मैनाकं वक्रपर्वतम् ॥ १०
एताश्चान्याश्च बहवो यावन्तः पृथिवीधराः । ततस्तांस्तु मुनिश्रेष्ठाः सोऽपश्यद्रत्नभूषितान् ॥ ११
कुरुक्षेत्रं च पाञ्चालान्मत्स्यान्मद्रान्सकेकयान् । बाह्लीकान्शूरसेनांश्च काश्मीरांस्तङ्गणान्खसान्॥
पार्वतीयान्किरातांश्च कर्णप्रावरणान्मरून् । अन्त्यजानन्त्यजातींश्च सोऽपश्यत्तस्य चोदरे ॥ १३
मृगाञ्शाखामृगान्सिंहान्वराहान्सृमराञ्शशान् । गजांश्चान्यांस्तथा सत्त्वान्सोऽपश्यत्तस्य चोदरे
पृथिव्यां यानि तीर्थानि ग्रामाश्च नगराणि च । कृषिगोरक्षवाणिज्यं क्रयविक्रयणं तथा ॥ १५
शक्रादीन्विबुधाञ्श्रेष्ठांस्तथाऽन्यांश्च दिवौकसः । गन्धर्वाप्सरसो यक्षानृषींश्चैव सनातनान्॥१६
दैत्यदानवसंघांश्च नागांश्च मुनिसत्तमाः । सिंहिकातनयांश्चैव ये चान्ये सुरशत्रवः ॥ १७
यत्किंचित्तेन लोकेऽस्मिन्दृष्टपूर्वं चराचरम् । अपश्यत्स तदा सर्वं तस्य कुक्षौ द्विजोत्तमाः ॥ १८
अथवा किं बहूक्तेन कीर्तितेन पुनः पुनः । ब्रह्मादिस्तम्बपर्यन्तं यत्किंचित्सचराचरम् ॥ १९

---

* इदमधिकम् ।

---

१ क. ख. त्वां प्राणार्थिनमु° । २ क. विषयस्ते । ३ क. °रत्नचितैः । ४ क. ख. °राहांश्च महाखगान् । ग°। ५ ख. °वसर्पांश्च ।

भूर्लोकं च भुवर्लोकं स्वर्लोकं च द्विजोत्तमाः । महर्जनस्तपः सत्यमतलं वितलं तथा ॥ २०
पातालं सुतलं चैव वितलं च रसातलम् । महातलं च ब्रह्माण्डमपश्यत्तस्य चोदरे ॥ २१
अव्याहता गतिस्तस्य तदाऽभूद्द्विजसत्तमाः । प्रसादात्तस्य देवस्य स्मृतिलोपश्च नाभवत् ॥ २२
भ्रममाणस्तदा कुक्षौ कृत्स्नं जगदिदं द्विजाः । नान्तं जगाम [2]देहस्य तस्य विष्णोः कदाचन २३
यदाऽसौ नाऽऽगतश्चान्तं तस्य देहस्य भो द्विजाः । तदा तं वरदं देवं शरणं गतवान्मुनिः ॥ २४
ततोऽसौ सहसा [3]विप्रा वायुवेगेन निःसृतः । महात्मनो मुखात्तस्य विवृतात्पुरुषस्य सः ॥ २५

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे मार्कण्डेयस्य भगवत्कुक्षिपरिवर्तनं नाम चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३७०९

अथ पञ्चपञ्चाशत्तमोऽध्यायः ।

ब्रह्मोवाच—

स निष्क्रम्योदरात्तस्य बालस्य मुनिसत्तमाः । पुनश्चैकार्णवामुर्वीमपश्यज्जनवर्जिताम् ॥ १
पूर्वदृष्टं च तं देवं ददर्श शिशुरूपिणम् । शाखायां वटवृक्षस्य पर्यङ्कोपरि संस्थितम् ॥ २
श्रीवत्सवक्षसं देवं पीतवस्त्रं चतुर्भुजम् । जगदादाय तिष्ठन्तं पद्मपत्रायतेक्षणम् ॥ ३
सोऽपि तं मुनिमायान्तं प्लवमानमचेतनम् । दृष्ट्वा मुखाद्विनिष्क्रान्तं प्रोवाच प्रहसन्निव ॥ ४

श्रीभगवानुवाच—

कच्चित्त्वयोषितं वत्स विश्रान्तं च ममोदरे । भ्रममाणश्च किं तत्र आश्चर्यं दृष्टवानसि ॥ ५
भक्तोऽसि मे मुनिश्रेष्ठ श्रान्तोऽसि च ममाऽऽश्रितः । तेन त्वामुपकाराय संभाषे पश्य मामिह ॥

ब्रह्मोवाच

श्रुत्वा स वचनं तस्य संप्रहृष्टतनूरुहः । ददर्श तं सुदुष्प्रेक्ष्यं रत्नैर्दिव्यैरलंकृतम् ॥ ७
प्रसन्ना निर्मला दृष्टिर्मुहूर्तात्तस्य भो द्विजाः । प्रसादात्तस्य देवस्य प्रादुर्भूता पुनर्नवा ॥ ८
रक्ताङ्गुलितलौ पादौ ततस्तस्य सुरार्चितौ । प्रणम्य शिरसा विप्रा हर्षगद्गदया गिरा ॥ ९
कृताञ्जलिस्तदा हृष्टो विस्मितश्च पुनः पुनः । दृष्ट्वा तं परमात्मानं[5] संस्तोतुमुपचक्रमे ॥ १०

मार्कण्डेय उवाच—

देवदेव जगन्नाथ मायाबालवपुर्धर । त्राहि मां चारुपद्माक्ष दुःखितं शरणागतम् ॥ ११
संतप्तोऽस्मि सुरश्रेष्ठ संवर्ताख्येन वह्निना । अङ्गारवर्षभीतं च त्राहि मां पुरुषोत्तम ॥ १२
शोषितश्च प्रचण्डेन वायुना जगदायुना । विह्वलोऽहं तथा श्रान्तस्त्राहि मां पुरुषोत्तम ॥ १३
तापितश्च तथामात्यैः (?) प्रलयावर्तकादिभिः । न शान्तिमधिगच्छामि त्राहि मां पुरुषोत्तम १४
तृषितश्च क्षुधाऽऽविष्टो दुःखितश्च जगत्पते । त्रातारं नात्र पश्यामि त्राहि मां पुरुषोत्तम ॥ १५
अस्मिन्नेकार्णवे घोरे विनष्टे सचराचरे । न चान्तमधिगच्छामि त्राहि मां पुरुषोत्तम ॥ १६
तवोदरे च देवेश मया दृष्टं चराचरम् । विस्मितोऽहं विषण्णश्च त्राहि मां पुरुषोत्तम ॥ १७

---

१ ग. °ता मति° । २ क. ग. देवस्य । ३ क. विप्रो । ४ क. °तम्रम् । ५ ख. °नं स स्तो° ।

संसारेऽस्मिन्निरालम्बे प्रसीद पुरुषोत्तम । प्रसीद विबुधश्रेष्ठ प्रसीद विबुधप्रिय ॥ १८
प्रसीद विबुधां नाथ प्रसीद विबु[1]धालय । प्रसीद सर्वलोकेश जगत्कारणकारण ॥ १९
प्रसीद [2]सर्वकृद्देव प्रसीद मम भूधर । प्रसीद[3] [4]सलिलावास प्रसीद मधुसूदन ॥ २०
प्रसीद कमलाकान्त प्रसीद त्रिदशेश्वर । प्रसीद कंसकेशिघ्न प्रसीदारिष्टनाशन ॥ २१
प्रसीद कृष्ण दैत्यघ्न प्रसीद दनुजान्तक । प्रसीद मथुरावास प्रसीद यदुनन्दन ॥ २२
प्रसीद शक्रावरज प्रसीद वरदा[5]व्यय । त्वं मही त्वं जलं देव त्वमग्निस्त्वं समीरणः ॥ २३
त्वं नभस्त्वं मनश्चैव त्वमहंकार एव च । त्वं बुद्धिः प्रकृतिश्चैव [6]सत्त्वाद्यास्त्वं [7]जगत्पते[8] ॥ २४
पुरुषस्त्वं [9]जगद्व्यापी पुरुषादपि चोत्तमः । त्वमिन्द्रियाणि सर्वाणि शब्दाद्या विषयाः प्रभो २५
त्वं दिक्पालाश्च धर्माश्च वेदा यज्ञाः सदक्षिणाः । त्वमिन्द्रस्त्वं शिवो देवस्त्वं हविस्त्वं हुताशनः
त्वं यमः पितृराड्देव त्वं रक्षोधिपतिः स्वयम् । वरुणस्त्वमपां [10]नाथं त्वं वायु[11]स्त्वं धनेश्वरः ॥२७
त्वमीशानस्त्वमनन्तस्त्वं गणेशश्च षण्मुखः । वसवस्त्वं तथा रुद्रास्त्वमादित्याश्च खेचराः ॥ २८
दानवास्त्वं तथा यक्षास्त्वं दैत्याः समरुद्गणाः । सिद्धाश्चाप्सरसो नागा गन्धर्वास्त्वं सचारणाः
पितरो वालखिल्याश्च प्रजानां पतयोऽच्युत । मुनयस्त्वमृषिगणास्त्वमश्विनौ निशाचराः ॥ ३०
अन्याश्च जातयस्त्वं हि यत्किंचिज्जीवसंज्ञितम् । किंचात्र बहुनोक्तेन ब्रह्मादिस्तम्बगोचरम् ३१
भूतं भव्यं भविष्यं च त्वं जगत्सचराचरम् । यत्ते रूपं परं देव कूटस्थमचलं ध्रुवम् ॥ ३२
ब्रह्माद्यास्तन्न जानन्ति कथमन्येऽल्पमेधसः । देव शुद्धस्वभावोऽसि नित्यस्त्वं प्रकृतेः परः ॥३३
अव्यक्तः शाश्वतोऽनन्तः सर्वव्यापी महेश्वरः । त्वमाकाशः परः शान्तो अजस्त्वं विभुरव्ययः॥
एवं त्वां निर्गुणं स्तोतुं कः शक्नोति निरञ्जनम् । स्तुतोऽसि यन्मया देव [12]विकलेनाल्पचेतसा
तत्सर्वं देवदेवेश क्षन्तुमर्हसि चाव्यय ॥

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे भगवत्स्तवनिरूपणं नाम
पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्लोकानामादितः समष्ट्यङ्काः—३७४४

अथ षट्पञ्चाशत्तमोऽध्यायः ।

ब्रह्मोवाच—
[13]इत्थं स्तुतस्तदा तेन मार्कण्डेयेन भो द्विजाः । प्रीतः प्रोवाच भगवान्मेघगम्भीरया गिरा ॥ १
श्रीभगवानुवाच—
ब्रूहि कामं मुनिश्रेष्ठ यत्ते मनसि वर्तते । ददामि सर्वं विप्रर्षे मत्तो यदभिवाञ्छसि ॥ २
ब्रह्मोवाच—
श्रुत्वा स वचनं [14]विप्राः शिशोस्तस्य महात्मनः । उवाच परमप्रीतो मुनिस्तद्गतमानसः ॥ ३

---

१ ख. °धाश्रय । २ ख. सर्वदेवेश । ३ क. °द मे श्रीनिवास । ४ ख. कमलावास । ५ क. °दायक । त्वं । ६ क. सत्यं त्वं च ज° । ७ ख. जगत्प्रभो । ८ ख. °ते । जगत्स्रष्टा जगद्बीजं पु° । ९ क. जगद्बीजं । १० ख. °थ वा° । ११ ख. °स्त्वं वनदेवताः । त्व° । १२ ख. विह्वले° ।१३ क. एवं । १४ ख. विप्रा विष्णोस्त° ।

मार्कण्डेय उवाच—

ज्ञातुमिच्छामि देव त्वां मायां वै तव चोत्तमाम् । त्वत्प्रसादाच्च देवेश स्मृतिर्न परिहीयते ॥ ४
द्रुतमन्तः शरीरेण सततं पर्य(रि)वर्तितम् । इच्छामि पुण्डरीकाक्ष ज्ञातुं त्वामहमव्ययम् ॥ ५
इह भूत्वा शिशुः साक्षात्किं भवानवतिष्ठते । पीत्वा जगदिदं सर्वमेतदाख्यातुमर्हसि ॥ ६
किमर्थं च जगत्सर्वं शरीरस्थं तवाऽनघ । कियन्तं च त्वया कालमिह स्थेयमरिंदम ॥ ७
ज्ञातुमिच्छामि देवेश ब्रूहि सर्वमशेषतः । त्वत्तः कमलपत्राक्ष विस्तरेण यथातथम् ।
महदेतदचिन्त्यं च यदहं दृष्टवान्प्रभो । ८

ब्रह्मोवाच—

इत्युक्तः स तदा तेन देवदेवो महाद्युतिः[1] । सान्त्वयन्स तदा[2] वाक्यमुवाच वदतां वरः ॥ ९

श्रीभगवानुवाच—

कामं देवाश्च मां विप्र नहि जानन्ति तत्त्वतः । तव प्रीत्या प्रवक्ष्यामि यथेदं विसृजाम्यहम् ॥ १०
पितृभक्तोऽसि विप्रर्षे[3] मामेव शरणं गतः । ततो दृष्टोऽस्मि ते साक्षाद्ब्रह्मचर्यं च ते महत् ॥ ११
आपो नारा इति पुरा संज्ञाकर्म कृतं मया । तेन नारायणोऽस्म्युक्तो मम[4] तास्त्वयनं सदा ॥ १२
अहं नारायणो नाम प्रभवः शाश्वतोऽव्ययः । विधाता सर्व भूतानां संहर्ता च द्विजोत्तम ॥ १३
अहं विष्णुरहं ब्रह्मा शक्रश्चापि सुराधिपः । अहं वैश्रवणो राजा यमः [6]प्रेताधिपस्तथा ॥ १४
अहं शिवश्च सोमश्च कश्यपश्च प्रजापतिः । अहं धाता विधाता च यज्ञश्चाहं द्विजोत्तम ॥ १५
अग्निरास्यं क्षितिः पादौ चन्द्रादित्यौ च लोचने । द्यौर्मूर्धा[7] खं दिशः श्रोत्रे तथाऽऽपः स्वेद-
संभवाः ॥ १६
सदिशं च नभः कायो वायुर्मनसि मे स्थितः । मया[8] क्रतुशतैरिष्टं[9] बहुभिश्चाऽऽप्तदक्षिणैः ॥ १७
यजन्ते वेदविदुषो मां देवयजने स्थितम् । पृथिव्यां क्षत्रियेन्द्राश्च पार्थिवाः स्वर्गकाङ्क्षिणः १८
यजन्ते मां तथा वैश्याः स्वर्गलोकजिगीषवः । चतुःसमुद्रपर्यन्तां मेरुमन्दरभूषणाम् ॥ १९
शेषो भूत्वा[10]ऽहमेको हि धारयामि वसुंधराम्[11] । वाराहं रूपमास्थाय ममेयं जगती पुरा ॥ २०
मज्जमाना जले विप्र वीर्येणास्मि समुद्धृता । अग्निश्च वाडवो विप्र भूत्वाऽहं द्विजसत्तम ॥ २१
पिबाम्यपः समाविष्टस्ताश्चैव विसृजाम्यहम् । ब्रह्म वक्त्रं भुजौ क्षत्रमूरू मे संश्रिता विशः ॥ २२
पादौ शूद्रा भवन्तीमे विक्रमेण क्रमेण च । ऋग्वेदः सामवेदश्च यजुर्वेदस्त्वथर्वणः ॥ २३
मत्तः प्रादुर्भवन्त्येते मामेव प्रविशन्ति च । यतयः शान्तिपरमा यतात्मानो बुभुत्सवः ॥ २४
कामक्रोधद्वेषमुक्ता निःसङ्गा वीतकल्मषाः । सत्त्वस्था निरहंकारा नित्यमध्यात्मकोविदाः ॥ २५
मामेव सततं विप्राश्चिन्तयन्त उपासते । अहं संवर्तको ज्योतिरहं संवर्तकोऽनलः ॥ २६
अहं संवर्तकः सूर्यस्त्वहं संवर्तकोऽनिलः । तारारूपाणि दृश्यन्ते यान्येतानि नभस्तले ॥ २७
मम वै रोमकूपाणि विद्धि त्वं द्विजसत्तम । रत्नाकराः समुद्राश्च सर्व एव चतुर्दिशः ॥ २८
वसनं शयनं चैव निलयं चैव विद्धि मे । कामः क्रोधश्च हर्षश्च भयं मोहस्तथैव च ॥ २९
ममैव विद्धि रूपाणि सर्वाण्येतानि सत्तम । प्राप्नुवन्ति नरा विप्र यत्कृत्वा कर्म शोभनम् ॥ ३०

१ क. जगत्पतिः । ख. महेश्वरः । २ क. °दा विप्रमु° । ३ क. ख. °र्षे मां चैव श° । ४ क. °म ताः शय° । ५ ख. द्विजोत्तम । ६ क. प्रेतपतिस्त° । ७ ख. द्यौर्भुवौ खं । ८ क. सदा । ९ क. °ष्टं यथोक्तवरद° । १० क. °त्वा महीमेको धा° । ११ क. महामुने ।

सत्यं दानं तपश्चोग्रमहिंसा सर्वजन्तुषु । मद्विधानेन विहिता मम देहविचारिणः ॥ ३१
मयाऽभिभूतविज्ञानाश्चेष्टयन्ति न कामतः । सम्यग्वेदमधीयाना यजन्तो विविधैर्मखैः ॥ ३२
शान्तात्मानो जितक्रोधाः प्राप्नुवन्ति द्विजातयः । प्राप्तुं शक्यो न चैवाहं नरैर्दुष्कृतकर्मभिः ३३
लोभाभिभूतैः कृपणैरनार्यैरकृतात्मभिः । तन्मां महाफलं विद्धि नराणां भावितात्मनाम् ॥ ३४
सुदुष्प्रापं विमूढानां मां कुयोगनिषेविणाम् । यदा यदा हि धर्मस्य ग्लानिर्भवति सत्तम ॥ ३५
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् । दैत्या हिंसानुरक्ताश्च अवध्याः सुरसत्तमैः॥३६
राक्षसाश्चापि लोकेऽस्मिन्यदोत्पत्स्यन्ति दारुणाः । तदाऽहं संप्रसूयामि गृहेषु पुण्यकर्मणाम् ३७
प्रविष्टो मानुषं देहं सर्वं प्रशमयाम्यहम् । सृष्ट्वा देवमनुष्यांश्च गन्धर्वोरगराक्षसान् ॥ ३८
स्थावराणि च भूतानि संहराम्यात्ममायया । कर्मकाले पुनर्देहमनुचिन्त्य सृजाम्यहम् ॥ ३९
आविश्य मानुषं देहं मर्यादाबन्धकारणात् । श्वेतः कृतयुगे धर्मः श्यामस्त्रेतायुगे मम ॥ ४०
रक्तो द्वापरमासाद्य कृष्णः कलियुगे तथा । त्रयो भागा ह्यधर्मस्य तस्मिन्काले भवन्ति च ॥ ४१
अन्तकाले च संप्राप्ते कालो भूत्वाऽतिदारुणः । त्रैलोक्यं नाशयाम्येकः सर्वं स्थावरजङ्गमम् ४२
अहं त्रिधर्मा विश्वात्मा सर्वलोकसुखावहः । अभिन्नः सर्वगोऽनन्तो हृषीकेश उरुक्रमः ॥ ४३
कालचक्रं नयाम्येको ब्रह्मरूपं ममैव तत् । शमनं सर्वभूतानां सर्वभूतकृतोद्यमम् ॥ ४४
एवं प्रणिहितः सम्यङ्ममाऽऽत्मा मुनिसत्तम । सर्वभूतेषु विप्रेन्द्र न च मां वेत्ति कश्चन ॥ ४५
सर्वलोके च मां भक्ताः पूजयन्ति च सर्वशः । यच्च किंचित्त्वया प्राप्तं मयि क्लेशात्मकं द्विज॥४६
सुखोदयाय तत्सर्वं श्रेयसे च तवानघ । यच्च किंचित्त्वया लोके दृष्टं स्थावरजङ्गमम् ॥ ४७
विहितः सर्व एवासौ मयाऽऽत्मा भूतभावनः । अहं नारायणो नाम शङ्खचक्रगदाधरः ॥ ४८
यावद्युगानां विप्रर्षे सहस्रं परिवर्तते । तावत्स्वपिमि विश्वात्मा सर्वविश्वानि मोहयन् ॥ ४९
एवं सर्वमहं कालमिहाऽऽसे मुनिसत्तम । अशिशुः शिशुरूपेण यावद्ब्रह्मा न बुध्यते ॥ ५०
मया च दत्तो विप्रेन्द्र वरस्ते ब्रह्मरूपिणा । असकृत्परितुष्टेन विप्रर्षिगणपूजित ॥ ५१
सर्वमेकार्णवं कृत्वा नष्टे स्थावरजङ्गमे । निर्गतोऽसि मयाऽऽज्ञातस्ततस्ते दर्शितं जगत् ॥ ५२
अभ्यन्तरं शरीरस्य प्रविष्टोऽसि यदा मम । दृष्ट्वा लोकं समस्तं हि विस्मितो नावबुध्यसे ॥ ५३
ततोऽसि वक्त्राद्विप्रर्षे द्रुतं निःसारितो मया । आख्यातस्ते मया चाऽऽत्मा दुर्ज्ञेयो हि सुरासुरैः
यावत्स भगवान्ब्रह्मा न बुध्येत महातपाः । तावत्त्वमिह विप्रर्षे विश्रब्धश्चर वै सुखम् ॥ ५५
ततो विबुद्धे तस्मिंस्तु सर्वलोकपितामहे । एको भूतानि स्रक्ष्यामि शरीराणि द्विजोत्तम ॥ ५६
आकाशं पृथिवीं ज्योतिर्वायुः सलिलमेव च । लोके यच्च भवेत्किंचिदिह स्थावरजङ्गमम् ॥ ५७

ब्रह्मोवाच—

एवमुक्त्वा तदा विप्राः पुनस्तं प्राह माधवः । पूर्णे युगसहस्रे तु मेघगम्भीरनिस्वनः ॥ ५८

श्रीभगवानुवाच—

मुने ब्रूहि यदर्थं मां स्तुतवान्परमार्थतः । वरं वृणीष्व यच्छ्रेष्ठं ददामि नचिरादहम् ॥ ५९
आयुष्मानसि देवानां मद्भक्तोऽसि दृढव्रतः । तेन त्वमसि विप्रेन्द्र पुनर्दीर्घायुराप्नुहि ॥ ६०

---

१ ख. °न्ति तु कामितः । २ क. जितमाना । ख. यतात्मानो । ३ क. ख. शुभकर्मणाम् । ४ क. °त्वा सुदा° । ५ क. अभिसृः । ६ ख. ब्रह्मरूपिणे । ७ ग. मम । ८ ख. दुर्गम्यश्च सु° । ९ ख. त्वविचारतः ।

ब्रह्मोवाच—

श्रुत्वा वाणीं शुभां तस्य विलोक्य स तदा पुनः । मूर्ध्ना निपत्य सहसा प्रणम्य पुनरब्रवीत् ६१

मार्कण्डेय उवाच—

दृष्टं परं हि देवेश तव रूपं द्विजोत्तम । मोहोऽयं विगतः सत्यं त्वयि दृष्टे तु मे हरे ॥ ६२

एवमेवमहं नाथ इच्छेयं त्वत्प्रसादतः । लोकानां च हितार्थाय नानाभावप्रशान्तये ॥ ६३

शैवभागवतानां च वादार्थप्रतिषेधकम् । अस्मिन्क्षेत्रवरे पुण्ये निर्मले पुरुषोत्तमे ॥ ६४

शिवस्याऽऽयतनं देव करोमि परमं महत् । प्रतिष्ठेय तथा तत्र तव स्थाने च शंकरम् ॥ ६५

ततो ज्ञास्यन्ति लोकेऽस्मिन्नेकमूर्ती हरीश्वरौ । प्रत्युवाच जगन्नाथः स पुनस्तं महामुनिम् ॥ ६६

श्रीभगवानुवाच—

यदेतत्परमं देवं कारणं भुवनेश्वरम् । लिङ्गमाराधनार्थाय नानाभावप्रशान्तये ॥ ६७

ममाऽऽदिष्टेन विप्रेन्द्र कुरु शीघ्रं शिवालयम् । तत्प्रभावाच्छिवलोके तिष्ठ त्वं च तथाऽक्षयम् ॥६८

शिवे संस्थापिते विप्र मम संस्थापनं भवेत् । नाऽऽवयोरन्तरं किंचिदेकभावौ द्विधा कृतौ ॥ ६९

यो रुद्रः स स्वयं विष्णुर्यो विष्णुः स महेश्वरः । उभयोरन्तरं नास्ति पवनाकाशयोरिव ॥ ७०

मोहितो नाभिजानाति य एव गरुडध्वजः । वृषध्वजः स एवेति त्रिपुरघ्नं [1]त्रिलोचनम् ॥ ७१

तव नामाङ्कितं तस्मात्कुरु विप्र शिवालयम् । उत्तरे देवदेवस्य कुरु तीर्थं सुशोभनम् ॥ ७२

मार्कण्डेयह्रदो नाम नरलोकेषु विश्रुतः । भविष्यति द्विजश्रेष्ठ सर्वपापप्रणाशनः ॥ ७३

ब्रह्मोवाच—

इत्युक्त्वा स तदा देवस्तत्रैवान्तरधीयत । मार्कण्डेयं मुनिश्रेष्ठाः सर्वव्यापी जनार्दनः ॥ ७४

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे मार्कण्डेयस्य श्रीभगवद्दर्शनं नाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—३८१७

अथ सप्तपञ्चाशत्तमोऽध्यायः ।

ब्रह्मोवाच—

अतः परं प्रवक्ष्यामि पञ्चतीर्थविधिं द्विजाः । यत्फलं स्नानदानेन देवताप्रेक्षणेन च ॥ १

मार्कण्डेयह्रदं गत्वा नरश्चोदङ्मुखः शुचिः । निमज्जेत्तत्र वारांस्त्रीनिमं मन्त्रमुदीरयेत् ॥ २

संसारसागरे मग्नं पापग्रस्तमचेतनम् । त्राहि मां भ[3]गनेत्रघ्न त्रिपुरारे नमोऽस्तु ते ॥ ३

नमः शिवाय शान्ताय सर्वपापहराय च । स्नानं करोमि देवेश मम नश्यतु पातकम् ॥ ४

नाभिमात्रे जले स्नात्वा विधिवद्देवता ऋषीन् । तिलोदकेन मतिमान्पि[4]तृंश्चान्यांश्च तर्पयेत् ॥ ५

स्नात्वा तथैव चाऽऽचम्य ततो गच्छेच्छिवालयम् । प्रविश्य देवतागारं कृत्वा तं त्रिः प्रदक्षिणम् ६

मूलमन्त्रेण संपूज्य मार्कण्डेयस्य चेश्वरम् । अघोरेण च भो विप्राः प्रणिपत्य प्रसादयेत् ॥ ७

त्रिलोचन नमस्तेऽस्तु नमस्ते शशिभूषण । त्राहि मां त्वं विरूपाक्ष महादेव नमोऽस्तु ते ॥ ८

---

१ क. °त्तम । शि° । २ ख. ग. त्रिविक्रमम् । ३ ख. °गवन्नत्र त्रिपुरान्त न° । ४ ख. °न्पितॄन्मातॄंश्च ।

मार्कण्डेयह्रदे त्वेवं स्नात्वा[1] दृष्ट्वा च शंकरम् । दशानामश्वमेधानां फलं प्राप्नोति मानवः ॥ ९
पापैः सर्वैर्विनिर्मुक्तः शिवलोकं स गच्छति । तत्र भुक्त्वा वरान्भोगान्यावदाभूतसंप्लवम् ॥ १०
इहलोकं समासाद्य भवेद्विप्रो बहुश्रुतः । शांकरं योगमासाद्य ततो मोक्षमवाप्नुयात् ॥ ११
कल्पवृक्षं ततो गत्वा कृत्वा तं त्रिः प्रदक्षिणम् । पूजयेत्परया भक्त्या मन्त्रेणानेन तं वटम् ॥ १२
ओं नमो व्यक्तरूपाय महाप्रलयकारिणे । महद्रसोपविष्टाय न्यग्रोधाय नमोऽस्तु ते ॥ १३
अमरस्त्वं सदा कल्पे हरेश्चाऽऽयतनं वट । न्यग्रोध हर मे पापं कल्पवृक्ष नमोऽस्तु ते ॥ १४
भक्त्या प्रदक्षिणं कृत्वा नत्वा कल्पवटं नरः । सहसा मुच्यते पापाज्जीर्णत्वच इवोरगः ॥ १५
छायां तस्य समाक्रम्य कल्पवृक्षस्य भो द्विजाः । ब्रह्महत्यां नरो जह्यात्पापेष्वन्येषु का कथा ॥
दृष्ट्वा कृष्णाङ्गसंभूतं ब्रह्मतेजोमयं परम् । न्यग्रोधाकृतिकं विष्णुं प्रणिपत्य च भो द्विजाः ॥ १७
राजसूयाश्वमेधाभ्यां फलं प्राप्नोति चाधिकम् । तथा स्ववंशमुद्धृत्य विष्णुलोकं स गच्छति १८
वैनतेयं नमस्कृत्य कृष्णस्य पुरतः स्थितम् । सर्वपापविनिर्मुक्तस्ततो विष्णुपुरं व्रजेत् ॥ १९
दृष्ट्वा वटं वैनतेयं यः पश्येत्पुरुषोत्तमम् । संकर्षणं सुभद्रां च स याति परमां गतिम् ॥ २०
प्रविश्याऽऽयतनं विष्णोः कृत्वा[2] तं त्रिः प्रदक्षिणम् । संकर्षणं स्वमन्त्रेण भक्त्याऽऽपूज्य
प्रसादयेत् ॥ २१
नमस्ते हैलधृग्राम[3] नमस्ते मुशलायुध । नमस्ते रेवतीकान्त नमस्ते भक्तवत्सल ॥ २२
नमस्ते बलिनां श्रेष्ठ नमस्ते धरणीधर । प्रलम्बारे नमस्तेऽस्तु त्राहि मां कृष्णपूर्वज ॥ २३
एवं प्रसाद्य चानन्तमजेयं त्रिदशार्चितम् । कैलासशिखराकारं चन्द्रात्कान्ततराननम् ॥ २४
नीलवस्त्रधरं देवं[4] फणाविकटमस्तकम् । महाबलं हलधरं कुण्डलैकविभूषितम् ॥ २५
रौहिणेयं नरो भक्त्या[5] लभेदभिमतं फलम् । सर्वपापैर्विनिर्मुक्तो विष्णुलोकं स गच्छति ॥ २६
आभूतसंप्लवं यावद्भुक्त्वा तत्र सुखं नरः[6] । पुण्यक्षयादिहाऽऽगत्य प्रवरे योगिनां कुले ॥ २७
ब्राह्मणप्रवरो भूत्वा सर्वशास्त्रार्थपारगः । ज्ञानं तत्र समासाद्य मुक्तिं प्राप्नोति दुर्लभाम्[7] ॥ २८
एवमभ्यर्च्य हलिनं ततः कृष्णं विचक्षणः । द्वादशाक्षरमन्त्रेण पूजयेत्सुसमाहितः[8] ॥ २९
द्विषट्कवर्णमन्त्रेण भक्त्या ये पुरुषोत्तमम् । पूजयन्ति सदा धीरास्ते मोक्षं प्राप्नुवन्ति वै ॥ ३०
न तां गतिं सुरा यान्ति योगिनो नैव सोमपाः[9] । यां गतिं यान्ति भो विप्रा द्वादशाक्षरतत्पराः[10]
तस्मात्तेनैव मन्त्रेण भक्त्या कृष्णं जगद्गुरुम् । संपूज्य गन्धपुष्पाद्यैः प्रणिपत्य प्रसादयेत् ॥ ३२
जय कृष्ण जगन्नाथ जय सर्वाघनाशन[11] । जय चाणूरकेशिघ्न जय कंसनिषूदन[12] ॥ ३३
जय पद्मपलाशाक्ष जय चक्रगदाधर । जय नीलाम्बुदश्याम जय सर्वसुखप्रद[13] ॥ ३४
जय देव जगत्पूज्य जय संसारनाशन । जय लोकपते नाथ जय वाञ्छाफलप्रद ॥ ३५
संसारसागरे घोरे[14] निःसारे दुःखफेनिले । क्रोधग्राहाकुले रौद्रे विषयोदकसंप्लवे ॥ ३६
नानारोगोर्मिकलिले[15] मोहावर्तसुदुस्तरे । निमग्नोऽहं सुरश्रेष्ठ त्राहि मां पुरुषोत्तम ॥ ३७
एवं प्रसाद्य देवेशं वरदं भक्तवत्सलम् । सर्वपापहरं देवं सर्वकामफलप्रदम्[16] ॥ ३८
पीनांसं द्विभुजं कृष्णं पद्मपत्रायतेक्षणम् । महोरस्कं महाबाहुं पीतवस्त्रं शुभाननम् ॥ ३९

---

१ ख. °त्वा पश्येच्च शं° । २ ख. °त्वा तत्र प्र° । ३ क. हलहस्ताय । ४ क. °वं घटावि° । ५ क. नत्वा । ६ ग. बुधः । ७ क. निश्चितम् । ८ क. °तः । त्रिष° । ९ ख. सामगाः । १० क. °रचिन्तकाः । त° । ११ ख. सर्वविना° । १२ क. कंसप्रमर्दन । १३ ख. °द देवदे° । १४ क. °रे दुःखसंतापफे° । १५ ग. °नावेगो° । १६ ख. °म् । योगिध्येयपदं विष्णुं प° ।

शङ्खचक्रगदापाणिं मुकुटाङ्गदभूषणम् । सर्वलक्षणसंयुक्तं वनमालाविभूषितम् ॥ ४०
दृष्ट्वा नरोऽञ्जलिं कृत्वा दण्डवत्प्रणिपत्य च । अश्वमेधसहस्राणां फलं प्राप्नोति वै द्विजाः॥ ४१
यत्फलं सर्वतीर्थेषु स्नाने दाने प्रकीर्तितम् । नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ४२
यत्फलं सर्वरत्नाद्यैरिष्टे बहुसुवर्णके । नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ४३
यत्फलं सर्ववेदेषु सर्वयज्ञेषु यत्फलम् । तत्फलं समवाप्नोति नरः कृष्णं प्रणम्य च ४४
यत्फलं सर्वदानेन व्रतेन नियमेन च । नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ४५
तपोभिर्विविधैरुग्रैर्यत्फलं समुदाहृतम् । नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ४६
यत्फलं ब्रह्मचर्येण सम्यक्चीर्णेन तत्कृतम् । नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ४७
यत्फलं च गृहस्थस्य यथोक्ताचारवर्तिनः । नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ४८
यत्फलं वनवासेन वानप्रस्थस्य कीर्तितम् । नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ४९
संन्यासेन यथोक्तेन यत्फलं समुदाहृतम् । नरस्तत्फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च ॥ ५०
किं चात्र बहुनोक्तेन माहात्म्ये तस्य भो द्विजाः । दृष्ट्वा कृष्णं नरो भक्त्या मोक्षं प्राप्नोति
दुर्लभम् ॥ ५१
पापैर्विमुक्तः शुद्धात्मा कल्पकोटिसमुद्भवैः । श्रिया परमया युक्तः सर्वैः संमुदितो गुणैः ॥ ५२
सर्वकामसमृद्धेन विमानेन सुवर्चसा । त्रिसप्तकुलमुद्धृत्य नरो विष्णुपुरं व्रजेत् ॥ ५३
तत्र कल्पशतं यावद्भुक्त्वा भोगान्मनोरमान् । गन्धर्वाप्सरसैः सार्धं यथा विष्णुश्चतुर्भुजः ॥ ५४
च्युतस्तस्मादिहाऽऽयातो विप्राणां प्रवरे कुले । सर्वज्ञः सर्ववेदी च जायते गतमत्सरः ॥ ५५
स्वधर्मनिरतः शान्तो दाता भूतहिते रतः । आसाद्य वैष्णवं ज्ञानं ततो मुक्तिमवाप्नुयात् ॥ ५६
ततः संपूज्य मन्त्रेण सुभद्रां भक्तवत्सलाम् । प्रसादयेत्ततो विप्राः प्रणिपत्य कृताञ्जलिः ॥ ५७
नमस्ते सर्वगे देवि नमस्ते शुभसौख्यदे । त्राहि मां पद्मपत्राक्षि कात्यायनि नमोऽस्तु ते ॥ ५८
एवं प्रसाद्य तां देवीं जगद्धात्रीं जगद्धिताम् । बलदेवस्य भगिनीं सुभद्रां वरदां शिवाम् ॥ ५९
कामगेन विमानेन नरो विष्णुपुरं व्रजेत् । आभूतसंप्लवं यावत्क्रीडित्वा तत्र देववत् ॥ ६०
इह मानुषतां प्राप्तो ब्राह्मणो वेदविद्भवेत् । प्राप्य योगं हरेस्तत्र मोक्षं च लभते ध्रुवम् ॥ ६१

इति श्रीमहापुराण आदिब्राह्मे स्वयंभुऋषिसंवादे कृष्णदर्शनमाहात्म्यं नाम सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

श्लोकानामादितः समष्ट्यङ्काः—३८७८

अथाष्टपञ्चाशत्तमोऽध्यायः ।

ब्रह्मोवाच—

एवं दृष्ट्वा बलं कृष्णं सुभद्रां प्रणिपत्य च । धर्मं चार्थं च कामं च मोक्षं च लभते ध्रुवम् ॥ १
निष्क्रम्य देवतागारात्कृतकृत्यो भवेन्नरः । प्रणम्याऽऽयतनं पश्चाद्व्रजेत्तत्र समाहितः ॥ २
इन्द्रनीलमयो विष्णुर्यत्राऽऽस्ते वालुकावृतः । अन्तर्धानगतं नत्वा ततो विष्णुपुरं व्रजेत् ॥ ३

---

१ ग. प्रमुदितो । २ ख. धर्मज्ञः । ३ क. ख. सत्यवादी । ४ ख. दान्तो । ५ ख. ग. °तः पूज्य स्वम° । ६ क. भद्रकारिणीम् । ७ ख. °लसमो वि° । ८ ख. नरो ।

सर्वदेवमयो योऽसौ हतवानसुरोत्तमम् । स आस्ते तत्र भो विप्राः सिंहार्धकृतविग्रहः ॥ ४
भक्त्या दृष्ट्वा तु तं देवं प्रणम्य नरकेसरीम्[1]* । मुच्यते पातकैर्मर्त्यः समस्तैर्नात्र संशयः ॥ ५
नरसिंहस्य ये भक्ता भवन्ति भुवि मानवाः । न तेषां दुष्कृतं किंचित्फलं स्याद्यद्यदीप्सितम् ६
तस्मात्सर्वप्रयत्नेन नरसिंहं समाश्रयेत् । धर्मार्थकाममोक्षाणां फलं यस्मात्प्रयच्छति ॥ ७

मुनय ऊचुः—

माहात्म्यं नरसिंहस्य सुखदं[2] भुवि दुर्लभम् । यथा कथयसे देव तेन नो विस्मयो महान् ॥ ८
प्रभावं तस्य देवस्य विस्तरेण जगत्पते[3] । श्रोतुमिच्छामहे ब्रूहि परं कौतूहलं हि नः ॥ ९
यथा प्रसीदेद्देवोऽसौ नरसिंहो महाबलः । भक्तानामुपकाराय ब्रूहि देव नमोऽस्तु ते ॥ १०
प्रसादान्नरसिंहस्य या भवन्त्यत्र सिद्धयः । ब्रूहि ताः कुरु चास्माकं प्रसादं प्रपितामह ॥ ११

ब्रह्मोवाच—

शृणुध्वं तस्य भो विप्राः प्रभावं गदतो मम । अजितस्याप्रमेयस्य भुक्तिमुक्तिप्रदस्य च ॥ १२
कः शक्नोति गुणान्वक्तुं समस्तांस्तस्य भो द्विजाः । सिंहार्धकृतदेहस्य प्रवक्ष्यामि समासतः १३
याः काश्चित्सिद्धयश्चात्र श्रूयन्ते दैवमानुषाः । प्रसादात्तस्य ताः सर्वाः सिध्यन्ति नात्र संशयः॥
स्वर्गे मर्त्ये च पाताले दिक्षु तोये[4] पुरे नगे । प्रसादात्तस्य देवस्य भवत्यव्याहता गतिः ॥ १५
असाध्यं तस्य देवस्य नास्त्यत्र सचराचरे । नरसिंहस्य भो विप्राः सदा भक्तानुकम्पिनः॥१६
विधानं तस्य वक्ष्यामि भक्तानामुपकारकम् । येन प्रसीदेच्चैवासौ सिंहार्धकृतविग्रहः ॥ १७
शृणुध्वं मुनिशार्दूलाः कल्पराजं सनातनम् । नरसिंहस्य[5] तत्त्वं च यन्न ज्ञातं सुरासुरैः ॥ १८
शाकयावकमूलैस्तु फलपिण्याकसक्तुकैः । पयोभक्षेण विप्रेन्द्रा वर्तयेत्साधकोत्तमैः[6] ॥ १९
कोशकौपीनवासाश्च ध्यानयुक्तो जितेन्द्रियः । अरण्ये विजने देशे पर्वते सिन्धुसंगमे ॥ २०
ऊषरे सिद्धक्षेत्रे च नरसिंहाश्रमे तथा । प्रतिष्ठाप्य स्वयं[7] वाऽपि पूजां कृत्वा विधानतः ॥ २१
द्वादश्यां शुक्लपक्षस्य उपोष्य मुनिपुंगवाः । जपेल्लक्षाणि वै +विंशन्मनसा संयतेन्द्रियः ॥ २२
उपपातकयुक्तश्च महापातकसंयुतः । मुक्तो भवेत्ततो विप्राः साधको नात्र संशयः ॥ २३
कृत्वा प्रदक्षिणं तत्र[8] नरसिंहं प्रपूजयेत् । पुण्यगन्धादिभिर्धूपैः[9] प्रणम्य शिरसा प्रभुम्[10] ॥ २४
कर्पूरचन्दनाक्तानि जातीपुष्पाणि मस्तके । प्रदद्यान्नरसिंहस्य ततः सिद्धिः प्रजायते ॥ २५
भगवान्सर्वकार्येषु न क्वचित्प्रतिहन्यते । तेजः सोढुं न शक्ताः स्युर्ब्रह्मरुद्रादयः सुराः ॥ २६
किं पुनर्दानवा लोके सिद्धगन्धर्वमानुषाः । विद्याधरा यक्षगणाः सकिंनरमहोरगाः ॥ २७
मन्त्रं यानासुरान्हन्तुं जपन्त्येकेऽन्यसाधकाः । ते सर्वे प्रलयं यान्ति दृष्ट्वाऽऽदित्याग्निवर्चसः॥२८
सकृज्जप्तं तु कवचं रक्षेत्सर्वमुपद्रवम् । द्विर्जप्तं कवचं दिव्यं रक्षते देवदानवात् ॥ २९
गन्धर्वाः किंनरा यक्षा विद्याधरमहोरगाः । भूताः पिशाचा रक्षांसि ये चान्ये परिपन्थिनः॥३०
त्रिर्जप्तं कवचं दिव्यमभेद्यं च सुरासुरैः । द्वादशाभ्यन्तरे चैव योजनानां द्विजोत्तमाः ॥ ३१

---

* इशब्देन केसरिशब्दस्य समासादिना कथंचिद्योज्यम् । एवमग्रेऽपि । + पुस्तकत्रयेऽप्ययमेव पाठः । त्रिंशदिति कदाचित्संभवेत् ।

---

१ क. नरकेशवम् । २ क. अनन्तं । ग. अत्यन्तं । ३ ख. जगत्पतेः । ४ क. तोयान्तरे न° । ५ क. °स्य सत्त्वस्य य° । ६ ख. °मः । शुद्धः कौ° । ७ ख. ग. °यं चापि । ८ ग. तस्य । ९ क. ख. पुण्यग° । १० क. विभुम् ।

रक्षते भगवान्देवो नरसिंहो महाबलः । ततो गत्वा बिलद्वारमुपोष्य रजनीत्रयम् ॥ ३२
पलाशकाष्ठैः प्रज्वाल्य भगवन्तं हुताशनम् । पलाशस[1]मिधस्तत्र जुहुया[2]त्रिमधुप्लुताः ॥ ३३
द्वे[3] शते द्विजशार्दूलो[4] वषट्कारेण साधकः । ततो विवरद्वारं तु प्रकटं जायते क्षणात् ॥ ३४
ततो विशेत्तु [5]निःशङ्कं कवची विवरं बुधः । गच्छतः संकटं तस्य तमोमोहश्च नश्यति ॥ ३५
राजमार्गः सुविस्तीर्णो दृश्यते [6]भ्रमराजि(श्रि)तः । नरसिंहं स्मरंस्तत्र पातालं विशते द्विजाः ३६
गत्वा तत्र जपेत्तत्त्वं नरसिंहाख्यमव्ययम् । ततः स्त्रीणां सहस्राणि वीणावादनकर्मणाम् ॥ ३७
निर्गच्छन्ति पुरो विप्राः स्वागतं ता वदन्ति च । प्रवेशयन्ति ता हस्ते गृहीत्वा सा[7]धकेश्वरम् ॥
ततो रसायनं दिव्यं पाययन्ति द्विजोत्तमाः । पीतमात्रे दिव्यदेहो जायते सुमहाबलः ॥ ३९
क्रीडते[8] सह कन्याभिर्यावदाभूतसंप्लवम् । भिन्नदे[9]हो वासुदेवे लीयते नात्र संशयः ॥ ४०
यदा न रोचते वासस्तस्मान्निर्गच्छते पुनः । पट्टं शूलं च खड्गं च रोचनां च मणिं तथा ॥ ४१
रसं रसायनं चैव पादुकाञ्जनमेव च । कृष्णाजिनं [10]मुनिश्रेष्ठा [11]गुटिकां च [12]मनोहराम् ॥ ४२
कमण्डलुं चाक्षसूत्रं [13]यष्टिं संजीवनीं तथा । सिद्धविद्यां च शास्त्राणि गृहीत्वा साधकेश्वरः ॥ ४३
ज्वलद्वह्निस्फुलिङ्गोर्मिवेष्टितं त्रिशिखं हृदि । सकृन्न्यस्तं दहेत्सर्वं वृजिनं जन्मकोटिज[14]म् ॥ ४४
विषे न्यस्तं विषं हन्यात्कुष्ठं हन्यात्तनौ स्थितम् । स्वदेहे भ्रूणहत्यादि कृत्वा दिव्येन शुध्यति॥
महाग्र[15]हैर्गृहीतेषु ज्वलमानं विचिन्तयेत् । [16]हृदन्ते वै ततः शीघ्रं नश्येयुर्दारुणा ग्रहाः ॥ ४६
बालानां [17]कण्ठके बद्धं रक्षा भवति नित्यशः । गण्डपिण्डकलूतानां [18]नाशनं कुरुते ध्रुवम् ॥ ४७
व्याधिजाते समिद्भिश्च घृतक्षीरेण होमयेत् । त्रिसंध्यं मासमेकं तु सर्वरोगान्विनाशयेत् ॥ ४८
असाध्यं तु न पश्यामि त्रैलोक्ये सचराचरे । यां यां कामयते सिद्धिं तां तां प्राप्नोति स ध्रुवम्
अष्टोत्तरशतं त्वेके पूजयित्वा मृगाधिपम् । मृत्तिकाः सप्त वल्मीके श्मशाने च चतुष्पथे ॥ ५०
रक्तचन्दनसंमिश्रा गवां क्षीरेण [19]लोडयेत् । सिंहस्य प्रतिमां कृत्वा प्रमाणेन षडङ्गुलाम् ॥ ५१
लिम्पेत्तथा भूर्जपत्रे रोचनया समालिखेत्। नरसिंहस्य कण्ठे तु बद्ध्वा चैव हि मन्त्रवित् ॥ ५२
जपेत्संख्याविहीनं तु पूजयित्वा जलाशये । यावत्सप्ताहमात्रं तु जपेत्संयमितेन्द्रियः ॥ ५३
जलाकीर्णा मुहूर्तेन जायते सर्वमेदिनी । अथवा शुष्कवृक्षाग्रे नरसिंहं तु पूजयेत् ॥ ५४
जप्त्वा चाष्टशतं तत्त्वं वर्षन्तं विनिवारयेत् । तमेवं [20]पिञ्जके बद्ध्वा भ्रामयेत्साधकोत्तमः ॥ ५५
महावातो मुहूर्तेन आगच्छेन्नात्र संशयः । पुनश्च धारयेत्क्षिप्रं सप्तस(ज)प्तेन वारिणा ॥ ५६
अथ तां प्रतिमां द्वारि निखनेद्यस्य साधकः । गोत्रोत्सादो भवेत्तस्य उद्धृते[21] चैव शान्तिदः ५७
तस्मात्तं मुनिशार्दूला भक्त्या संपूजयेत्सदा । मृगराजं महावीर्यं सर्वकामफलप्रदम् ॥ ५८
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति। ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रान्त्यजातयः
संपूज्य तं सुरश्रेष्ठं भक्त्या सिंहवपुर्धरम् । मुच्यन्ते चाशुभैर्दुःखैर्जन्मकोटिसमुद्भवैः ॥ ६०
संपूज्य तं सुरश्रेष्ठं प्राप्नुवन्त्यभिवाञ्छितम् । देवत्वममरेशत्वं [22]गन्धर्वत्वं च भो द्विजाः ॥ ६१

---

१ ख. °मिधा तत्र । ग. °मिधं तत्र । २ क. °त्रिर्मधु° । ३ ख. ग. द्वे युते । ४ क. °ला एकोनपञ्चाशत्तथा । त° । ५ ख. निःशङ्कः । ६ ख. भगवद्द्विजाः । ७ क. °धकोत्तमम् । ८ ख. °ते शतक° । ९ ख. ग. °देहे वा° । १० ख. द्विजश्रेष्ठा । ११ ग. गुडिकां । १२ ग. मनःशिलाम् । १३ क. विद्यां । १४ क. °म् । देहे न्यस्तं करे न्यस्तं हन्यात्सप्तशतैः कृत° । १५ क. °हपरीते° । १६ क. तुदते । १७ ख. कम्बुके । १८ क. शमनं । १९ क. लेपयेत् । २० क. पिष्टके । २१ क. °तेनैव । २२ ख. सर्वज्ञत्वं ।

यक्षविद्याधरत्वं च तथाऽन्यच्चाभिवाञ्छितम्[1]। दृष्ट्वा स्तुत्वा नमस्कृत्वा संपूज्य नरकेसरीम्[2]* ६२
प्राप्नुवन्ति नरा राज्यं स्वर्गं मोक्षं च दुर्लभम् । नरसिंहं नरो दृष्ट्वा लभेदभिमतं फलम् ॥ ६३
निर्मुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति । सकृद्दृष्ट्वा तु तं देवं भक्त्या सिंहवपुर्धरम् ॥ ६४
मुच्यते[3] चाशुभैर्दुःखैर्जन्मकोटिसमुद्भवैः । सङ्ग्रामे संकटे दुर्गे चोरव्याघ्रादिपीडिते ॥ ६५
कान्तारे प्राणसंदेहे विषवह्निजलेषु च । राजादिभ्यः समुद्रेभ्यो[4] ग्रहरोगादिपीडिते ॥ ६६
स्मृत्वा तं पुरुषः सर्वैः राजग्रामैर्विमुच्यते । सूर्योदये यथा नाशं तमोऽभ्येति महत्तरम् ॥ ६७
तथा संदर्शने तस्य विनाशं यान्त्युपद्रवाः । गुटिकाञ्जनपातालपादुके च रसायनम् ॥ ६८
नरसिंहे प्रसन्ने तु प्राप्नोत्यन्यांश्च[5] वाञ्छितान्[6]। यान्यान्कामानभिध्यायन्भजते नरकेसरीम्* ६९
तांस्तान्कामानवाप्नोति नरो नास्त्यत्र संशयः । दृष्ट्वा तं देवदेवेशं भक्त्याऽऽपूज्य प्रणम्य च ७०
दशानामश्वमेधानां फलं दशगुणं लभेत् । पापैः सर्वैर्विनिर्मुक्तो गुणैः सर्वैरलंकृतः ॥ ७१
सर्वकामसमृद्धात्मा जरामरणवर्जितः । सौवर्णेन विमानेन किंकिणीजालमालिना ॥ ७२
सर्वकामसमृद्धेन कामगेन सुवर्चसा । तरुणादित्यवर्णेन मुक्ताहारा[7]वलम्बिना ॥ ७३
दिव्यस्त्रीशतयुक्तेन दिव्यगन्धर्व[8]नादिना । कुलैकविंशमुद्धृत्य देववन्मुदितः सुखी ॥ ७४
स्तूयमानोऽप्सरोभिश्च विष्णुलोकं व्रजेन्नरः । भुक्त्वा तत्र वरान्भोगान्विष्णुलोके द्विजोत्तमाः ॥
+गन्धर्वैरप्सरैर्युक्तः कृत्वा रूपं चतुर्भुजम् । मनोह्लादकरं सौख्यं यावदाभूतसंप्लवम् ॥ ७६
पुण्यक्षयादिहाऽऽयातः प्रवरे योगिनां कुले । चतुर्वेदी भवेद्विप्रो वेदवेदाङ्गपारगः ॥
वैष्णवं योगमास्थाय[9] ततो मोक्षमवाप्नुयात् ॥ ७७

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे नरसिंहमाहात्म्यवर्णनं नामाष्ट-
पञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

श्लोकानामादितः समष्ट्यङ्काः—३९५५

अथैकोनषष्टितमोऽध्यायः ।

ब्रह्मोवाच—

अनन्ताख्यं वासुदेवं दृष्ट्वा भक्त्या प्रणम्य च । सर्वपापविनिर्मुक्तो नरो याति परं पदम् ॥ १
मया चाऽऽराधितश्चासौ शक्रेण तदनन्तरम् । विभीषणेन रामेण कस्तं नाऽऽराधयेत्पुमान् ॥ २
†श्वेतगङ्गां नरः स्नात्वा यः पश्येच्छ्वेतमाधवम् । मत्स्याख्यं माधवं चैव श्वेतद्वीपं स गच्छति ॥ ३

मुनय ऊचुः—

श्वेतमाधवमाहात्म्यं वक्तुमर्हस्यशेषतः । विस्तरेण जगन्नाथ प्रतिमां तस्य वै हरेः ॥ ४
तस्मिन्क्षेत्रवरे पुण्ये विख्याते जगतीतले । श्वेताख्यं माधवं देवं कस्तं स्थापितवान्पुरा ॥ ५

---

* अस्याध्यायस्य पञ्चमः श्लोको द्रष्टव्यः । * अस्याध्यायस्य पञ्चमः श्लोको द्रष्टव्यः । + अदन्तोऽयमप्सरशब्दः पुमान् । † आर्षत्वात्कथंचित्कर्मत्वविवक्षयेदम् ।

---

१ क. ग. °न्यच्च प्रयच्छति । दृ°। २ क. °केशवम् । ३ क. °ते कल्मषैः सर्वैर्ज°। ४ ख. समुद्रास्ये । ५ ख. °त्यन्यच्च वा°। ६ ख. °ञ्छितम् । या°। ७ क. ख. °हारविल°। ८ ख. ग. °र्ववादि°। ९ क. ख. °मासाद्य त°। १० क. ग. पुरुषोत्तमे ।

ब्रह्मोवाच—

अभूत्कृतयुगे विप्राः श्वेतो नाम नृपो बली । मतिमान्धर्मविच्छूरः सत्यसंधो दृढव्रतः[1] ॥ ६
यस्य राज्ये तु वर्षा[2]णां सहस्रं दश मानवाः । भवन्त्यायुष्मन्तो लोका बालस्तस्मिन्न सीदति ॥ ७
वर्तमाने तदा राज्ये किंचित्काले गते द्विजाः । कपाल[3]गौतमो नाम ऋषिः परमधार्मिकः ॥ ८
सुतोऽस्याजातदन्तश्च मृ[4]तः कालवशाद्द्विजाः । तमादाय ऋषिर्धीमान्नृपस्यान्तिकमानयत् ॥ ९
दृष्ट्वैवं नृपतिः सुप्तं कुमारं गतचेतसम् । प्रतिज्ञामकरोद्विप्रा जीवनार्थं शिशोस्तदा ॥ १०

राजोवाच—

यावद्बालमहं त्वेनं यमस्य सदने गतम् । नाऽऽनये[5] सप्तरात्रेण चितां दीप्तां समारुहे ॥ ११

ब्रह्मोवाच—

एवमुक्त्वाऽसितैः पद्मैः शतैर्दशशतादिकैः । संपूज्य च महादेवं रा[6]जा विद्यां पुन[7]र्जपेत्(?) ॥ १२
अतिभक्तिं तु संचिन्त्य नृपस्य जगदीश्वरः । सांनिध्यमगमत्तुष्टोऽस्मीत्युवाच सहोमया ॥ १३
श्रुत्वैवं गिरमीशस्य विलोक्य सहसा हरम् । भस्मदिग्धं विरूपाक्षं शरत्कुन्देन्दुवर्चसम् ॥ १४
शार्दूलचर्मवसनं शशाङ्काङ्कितमूर्धजम् । महीं निपत्य सहसा प्रणम्य स तदाऽब्रवीत् ॥ १५

श्वेत उवाच—

कारुण्यं यदि मे दृष्ट्वा प्रसन्नोऽसि प्रभो यदि । कालस्य वशमापन्नो[8] बालको द्विजपुत्रकः[9] ॥ १६
जीवत्वेष पुनर्बाल इत्येवं व्रतमाहितम् । अकस्माच्च मृतं बालं नियम्य भगवन्स्वयम् ॥
यथोक्तायुष्यसंयुक्तं क्षेमं कुरु महेश्वर ॥ १७

ब्रह्मोवाच—

श्वेतस्यैतद्वचः श्रुत्वा मुदं प्राप हरस्तदा । कालमाज्ञापयामास सर्वभूतभयंकरम् ॥ १८
नियम्य कालं दुर्धर्षं यमस्याऽऽज्ञाकरं द्विजाः । बालं संजीवयामास मृत्योर्मुखगतं पुनः ॥ १९
कृत्वा क्षेमं जगत्सर्वं मुनेः पुत्रं स तं द्विजाः । देव्या सहोमया देवस्तत्रैवान्तरधीयत ॥ २०
एवं संजीवयामास मुनेः पुत्रं नृपोत्तमः ॥ २१

मुनय ऊचुः—

देवदेव जगन्नाथ त्रैलोक्यप्रभवाव्यय । ब्रूहि नः परमं तथ्यं श्वेताख्यस्य च सांप्रतम् ॥ २२

ब्रह्मोवाच—

शृणुध्वं मुनिशार्दूलाः सर्वसत्त्वहि[10]तावहम् । प्रवक्ष्यामि यथातथ्यं यत्पृच्छथ ममानघाः ॥ २३
माधवस्य च माहात्म्यं सर्वपापप्रणाशनम् । यच्छ्रुत्वाऽभिमतान्कामान्ध्रुवं प्राप्नोति मानवः ॥ २४
श्रुतवानृषिभिः [11]पूर्वं माधवाख्यस्य भो द्विजाः । शृणुध्वं तां कथां दिव्यां भयशोकार्तिनाशिनीम्
स कृत्वा राज्यमेकाग्र्यं वर्षाणां च सहस्रशः । विचार्य लौकिकान्धर्मान्वैदि[12]कान्नियमांस्तथा २६
केशवाराधने [13]विप्रा निश्चितं व्रतमास्थितः । स गत्वा परमं क्षेत्रं [14]सागरं दक्षिणाश्रयम् ॥ २७
तटे तस्मिञ्शुभे रम्ये देशे कृष्णस्य चान्तिके । [15]श्वेतोऽथ कारयामास प्रासादं शुभलक्षणम् ॥ २८

१ क. °तः । जीवन्ति तस्य राज्ये वै व° । २ क. °णां द° । ३ ख. °लमौनको ना° । ४ क. ग. °तः पञ्चशतादिकः । त° । ५ क. °येयं सपुत्रो हि चि° । ६ क. ख. राजर्वि° । ७ ख. °नर्यजेत् । । ८ क. °न्नो जीवतु द्वि° । ९ क. °कः । आनयिष्ये पु° । १० क. ख. °ताय वै । प्र° । ११ क. सर्वे । १२ क. °कान्विधिवत्तथा । १३ ख. यत्तो । १४ क. सादरं । १५ ख. मनोज्ञं ।

धन्वन्तरशतं चैकं देवदेवस्य दक्षिणे । ततः श्वेतेन विप्रेन्द्राः श्वेतशैलमयेन च ॥ २९
कृतः स भगवाञ्[1]श्वेतो माधवश्चन्द्रसंनिभः । प्रतिष्ठां विधिवच्चक्रे यथोदिष्टां स्वयं तु सः ॥ ३०
दत्त्वा दानं द्विजातिभ्यो दीना[2]नाथतपस्विनाम् । अथानन्तरतो राजा माधवस्य च संनिधौ ३१
महीं निपत्य सहसा ओंकारं द्वादशाक्षरम् । [3]जपन्स मौनमास्थाय मासमेकं समाधिना ॥ ३२
निराहारो महाभागः सम्यग्विष्णुपदे स्थितः । जपान्ते स तु देवेशं संस्तोतुमुपचक्रमे ॥ ३३

श्वेत उवाच—

ओं नमो वासुदेवाय नमः संकर्षणाय च । प्रद्युम्नायानिरुद्धाय नमो नारायणाय च ॥ ३४
नमोऽस्तु बहुरूपाय विश्वरूपाय वेधसे । निर्गुणायाप्रतर्क्याय शुचये [4]शुक्लकर्मणे ॥ ३५
ओं नमः पद्मनाभाय पद्मगर्भोद्भवाय च । नमोऽस्तु पद्मवर्णाय पद्महस्ताय ते नमः ॥ ३६
ओं नमः पुष्कराक्षाय सहस्राक्षाय[5] मीढुषे । नमः सहस्रपादाय सहस्रभुज मन्यवे ॥ ३७
ओं नमोऽस्तु वराहाय वरदाय सुमेधसे । [6]वरिष्ठाय वरेण्याय[7] शरण्यायाच्युताय च ॥ ३८
ओं नमो बालरूपाय बालपद्मप्रभाय च । बालार्कसोमनेत्राय मुञ्जकेशाय धीमते ॥ ३९
केशवाय नमो नित्यं नमो नारायणाय च । माधवाय वरिष्ठाय गोविन्दाय नमो नमः ॥ ४०
ओं नमो विष्णवे [8]नित्यं देवाय[9] वसुरेतसे । मधुसूदनाय नमः शु[10]द्धायांशुधराय च ॥ ४१
नमोऽनन्ताय सूक्ष्माय नमः श्रीवत्सधारिणे । त्रिविक्रमाय च न[11]मो दिव्यपीता[12]म्बराय च ॥ ४२
सृष्टिकर्त्रे नमस्तुभ्यं गोप्त्रे [13]धात्रे नमो नमः । नमोऽस्तु [14]गुणभूताय निर्गुणाय नमो नमः ॥ ४३
नमो वामनरूपाय नमो वामनकर्मणे । नमो वामननेत्राय नमो वामनवाहिने ॥ ४४
[15]नमो रम्याय पूज्याय नमोऽस्त्वव्यक्तरूपिणे । अप्रतर्क्याय शुद्धाय नमो भयहराय च ॥ ४५
संसारार्णवपोताय प्रशान्ताय स्वरूपिणे । शिवाय सौम्यरूपाय [16]रुद्रायोत्तारणाय च ॥ ४६
भवभङ्गकृते चैव भवभोगप्रदाय च । भवसंघातरूपाय भवसृष्टिकृते नमः ॥ ४७
ओं नमो दिव्यरूपाय सोमाग्निश्वसिताय च । सोम[17]सूर्याग्निशुकेशाय गोब्राह्मणहिताय च ॥ ४८
ओं नम ऋक्स्वरूपाय पदक्रमस्वरूपिणे । ऋक्स्तुताय नमस्तुभ्यं नम ऋक्साधनाय च ॥ ४९
ओं नमो यजुषां धात्रे यजूरूपधराय च । यजुर्याज्याय जुष्टाय यजुषां पतये नमः ॥ ५०
ओं नमः श्रीपते देव श्रीधराय वराय च । श्रियः कान्ताय दान्ताय योगिचिन्त्याय योगिने ॥
ओं नमः सामरूपाय सामध्वनिवराय च । ओं नमः सामसौम्याय सामयोगविदे नमः ॥ ५२
साम्ने च सामगीताय ओं नमः सामधारिणे । सामयज्ञविदे चैव नमः सामकराय च ॥ ५३
नमस्त्वथर्वशिरसे नमोऽथर्वस्वरूपिणे । नमोऽस्त्वथर्वपादाय नमोऽथर्वकराय च ॥ ५४
ओं न[18]मो वज्रशीर्षाय मधुकैटभघातिने । महोदधिजलस्थाय वेदाहरणकारिणे ॥ ५५
नमो [19]दीप्तस्वरूपाय हृषीकेशाय वै नमः । नमो भगवते तुभ्यं वासुदेवाय ते नमः ॥ ५६
नारायण नमस्तुभ्यं नमो लोकहिताय च । ओं नमो मोहनाशाय भवभङ्गकराय च ॥ ५७
गतिप्रदाय च नमो नमो बन्धहराय च । त्रैलोक्यतेजसां कर्त्रे नमस्तेजःस्वरूपिणे ॥ ५८

---

१ ख. °ञ्श्वेतमा° । २ ख. °नानां च त° । ३ ख. जजाप मौ° । ४ क. ख. सर्वकर्मणाम् । ५ ख. °य ते नमः । न° । ६ ख. वसिष्ठा° । ७ क. °य वरदाया° । ८ ख. तुभ्यं । ९ क. °य सुररे° । १० ख. °द्धाय अजरा° । ११ ख. नमः पी° । १२ ख. °म्बरधरा° । १३ क. हर्त्रे । ख. हन्त्रे । १४ ख. गुणयुक्ताय । १५ क. ख. °मोऽनन्ताय । १६ ख. घोररूपधराय । १७ क. °सूर्याग्निके° । १८ ग. °मो वाजिशी° । १९ ग. दीर्घस्व° ।

योगीश्वराय शुद्धाय रामायोत्तरणाय च । सुखाय सुखनेत्राय नमः सुकृतधारिणे ॥ ५९
वासुदेवाय वन्द्याय वामदेवाय वै नमः । देहिनां देहकर्त्रे च भेदभङ्गकराय च ॥ ६०
देवैर्वन्दितदेहाय नमस्ते दिव्यमौलिने । नमो वासनिवासाय वासव्यवहराय च ॥ ६१
ओं नमो वसुकर्त्रे च वसुवासप्रदाय च । नमो यज्ञस्वरूपाय यज्ञेशाय च योगिने ॥ ६२
यतियोगकरेशाय नमो यज्ञाङ्गधारिणे । संकर्षणाय च नमः प्रलम्बमथनाय च ॥ ६३
मेघघोषस्वनोत्तीर्णवेगलाङ्गलधारिणे । नमोऽस्तु ज्ञानिनां ज्ञान नारायणपरायण ॥ ६४
न मेऽस्ति त्वामृते बन्धुर्नरकोत्तारणे प्रभो । अतस्त्वां सर्वभावेन प्रणतो नतवत्सल ॥ ६५
मलं यत्कायजं वाऽपि मानसं चैव केशव । न तस्यान्योऽस्ति देवेश क्षालकस्त्वामृतेऽच्युत ॥ ६६
संसर्गाणि समस्तानि विहाय त्वामुपस्थितः । संगो मेऽस्तु त्वया सार्धमात्मलाभाय केशव ॥ ६७
कष्टमापत्सुदुष्पारं संसारं वेद्मि केशव । तापत्रयपरिक्लिष्टस्तेन त्वां शरणं गतः ॥ ६८
एषणाभिर्जगत्सर्वं मोहितं मायया तव । आकर्षितं च लोभाद्यैरतस्त्वामहमाश्रितः ॥ ६९
नास्ति किंचित्सुखं विष्णो संसारस्थस्य देहिनः । यथा यथा हि यज्ञेश त्वयि चेतः प्रवर्तते ७०
तथा फलविहीनं तु सुखमात्यन्तिकं लभेत् । नष्टो विवेकशून्योऽस्मि दृश्यते जगदातुरम् ॥ ७१
गोविन्द त्राहि संसारान्मामुद्धर्तुं त्वमर्हसि । मग्नस्य मोहसलिले निरुत्तारे भवार्णवे ॥
उद्धर्ता पुण्डरीकाक्ष त्वामृतेऽन्यो न विद्यते ॥ ७२

ब्रह्मोवाच—

इत्थं स्तुतस्ततस्तेन राज्ञा श्वेतेन भो द्विजाः । तस्मिन्क्षेत्रवरे दिव्ये विख्याते पुरुषोत्तमे ॥ ७३
भक्तिं तस्य तु संचिन्त्य देवदेवो जगद्गुरुः । आजगाम नृपस्याग्रे सर्वैर्देवैर्वृतो हरिः ॥ ७४
नीलजीमूतसंकाशः पद्मपत्रायतेक्षणः । दधत्सुदर्शनं धीमान्कराग्रे दीप्तमण्डलम् ॥ ७५
क्षीरोदजलसंकाशो विमलश्चन्द्रसंनिभः । रराज वामहस्तेऽस्य पाञ्चजन्यो महाद्युतिः ॥ ७६
पक्षिराजध्वजः श्रीमान्गदाशार्ङ्गासिधृक्प्रभुः । उवाच साधु भो राजन्यस्य ते मतिरुत्तमा ॥
यदिष्टं वर भद्रं ते प्रसन्नोऽस्मि तवानघ ॥ ७७

ब्रह्मोवाच—

श्रुत्वैवं देवदेवस्य वाक्यं तत्परमामृतम् । प्रणम्य शिरसोवाच श्वेतस्तद्गतमानसः ॥ ७८

श्वेत उवाच—

यद्यहं भगवन्भक्तः प्रयच्छ वरमुत्तमम् । आब्रह्मभवनादूर्ध्वं वैष्णवं पदमव्ययम् ॥ ७९
विमलं विरजं शुद्धं संसारासङ्गवर्जितम् । तत्पदं गन्तुमिच्छामि त्वत्प्रसादाज्जगत्पते ॥ ८०

श्रीभगवानुवाच—

यत्पदं विबुधाः सर्वे मुनयः सिद्धयोगिनः । नाभिगच्छन्ति यद्रम्यं परं पदमनामयम् ॥ ८१
यास्यसि परमं स्थानं राज्यामृतमुपास्य च । सर्वाँल्लोकानतिक्रम्य मम लोकं गमिष्यसि ॥ ८२
कीर्तिस्तवात्र राजेन्द्र त्रीँल्लोकांश्च गमिष्यति । सांनिध्यं मम चैवात्र सर्वदैव भविष्यति ॥ ८३
श्वेतगङ्गेति गास्यन्ति सर्वे ते देवदानवाः । कुशाग्रेणापि राजेन्द्र श्वेतगाङ्गेयमम्बु च ॥ ८४

---

१ ख. वार्गाश्वराय । २ क. ख. बुद्धाय । ३ क. ख. °य वामा° । ४ ख. शस्त्रवायुप्रदाय । ५ क. °णवेदला° । ख. °णदेवला° । ६ ख. °मुपाश्रितः । ७ क. ख. °तः । योगोऽस्तु मे त्व° । ८ ख. °स्यार्थं स° । ९ क. सर्वदेवमयो ह° । १० क. °माद्भुत° ।

स्पृष्ट्वा स्वर्गं गमिष्यन्ति मद्भक्ता ये समाहिताः । यस्त्विमां प्रतिमां गच्छेन्माधवाख्यां शशि-
प्रभाम् ॥ ८५
शङ्खगोक्षीरसंकाशामशेषाघविनाशिनीम् । तां प्रणम्य सकृद्भक्त्या पुण्डरीकनिभेक्षणाम् ॥ ८६
विहाय सर्वलोकान्वै मम लोके महीयते । मन्वन्तराणि तत्रैव देवकन्याभिरावृतः ॥ ८७
गीयमानश्च मधुरं सिद्धगन्धर्वसेवितः । भुनक्ति विपुलान्भोगान्यथेष्टं मामकैः सह ॥ ८८
च्युतस्तस्मादिहाऽऽगत्य मनुष्यो ब्राह्मणो भवेत् । वेदवेदाङ्गविच्छ्रीमान्भोगवांश्चिरजीवितः ॥८९
गजाश्वरथयानाढ्यो धनधान्यावृतः शुचिः । रूपवान्बहुभाग्यश्च पुत्रपौत्रसमन्वितः ॥ ९०
पुरुषोत्तमं पुनः प्राप्य वटमूलेऽथ सागरे । त्यक्त्वा देहं हरिं स्मृत्वा ततः शान्तपदं व्रजेत् ॥९१

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे श्वेतमाधवमाहात्म्यवर्णनं
नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४०४६

अथ षष्टितमोऽध्यायः ।

ब्रह्मोवाच—

श्वेतमाधवमालोक्य समीपे मत्स्यमाधवम् । एकार्णवजले पूर्वं रोहितं रूपमास्थितम् ॥ १
वेदानां हरणार्थाय रसातलतले स्थितम् । चिन्तयित्वा क्षितिं सम्यक्तस्मिन्स्थाने प्रतिष्ठितम् २
आद्यावतरणं रूपं माधवं मत्स्यरूपिणम् । प्रणम्य प्रणतो भूत्वा सर्वदुःखाद्विमुच्यते ॥ ३
प्रयाति परमं स्थानं यत्र देवो हरिः स्वयम् । काले पुनरिहाऽऽयातो राजा स्यात्पृथिवीतले ॥४
वत्समाधवमासाद्य दुराधर्षो भवेन्नरः । दाता भोक्ता भवेद्यज्वा वैष्णवः सत्यसंगरः ॥ ५
योगं प्राप्य हरेः पश्चात्ततो मोक्षमवाप्नुयात् । मत्स्यमाधवमाहात्म्यं मया संपरिकीर्तितम् ॥
यं दृष्ट्वा मुनिशार्दूलाः सर्वान्कामानवाप्नुयात् ॥ ६

मुनय ऊचुः—

भगवञ्श्रोतुमिच्छामो मार्जनं वरुणालये । क्रियते स्नानदानादि तस्याशेषफलं वद ॥ ७

ब्रह्मोवाच—

शृणुध्वं मुनिशार्दूला मार्जनस्य यथाविधि । भक्त्या तु तन्मना भूत्वा संप्राप्य पुण्यमुत्तमम् ॥ ८
मार्कण्डेयह्रदे स्नानं पूर्वकाले प्रशस्यते । चतुर्दश्यां विशेषेण सर्वपापप्रणाशनम् ॥ ९
तद्वत्स्नानं समुद्रस्य सर्वकालं प्रशस्यते । पौर्णमास्यां विशेषेण हयमेधफलं लभेत् ॥ १०
मार्कण्डेयं वटं कृष्णं रौहिणेयं महोदधिम् । इन्द्रद्युम्नसरश्चैव पञ्चतीर्थीविधिः स्मृतः (?) ॥ ११
पूर्णिमा ज्येष्ठमासस्य ज्येष्ठा ऋक्षं यदा भवेत् । तदा गच्छेद्विशेषेण तीर्थराजं परं शुभम् ॥ १२
कायवाङ्मानसैः शुद्धस्तद्भावो नान्यमानसः । सर्वद्वंद्वविनिर्मुक्तो वीतरागो विमत्सरः ॥ १३
कल्पवृक्षवटं रम्यं तत्र स्नात्वा जनार्दनम् । प्रदक्षिणं प्रकुर्वीत त्रिवारं सुसमाहितः ॥ १४

---

१ ख. °जीवनः । ग° ।२ ख. °नवांश्च पुनः शु° । ३ ख. °भार्यश्च । ४ क. ख. पूर्णे । ५ क. मोहितं । ६ ख. करणार्थाय । ७ क. °कालं विशिष्यते ।

यं दृष्ट्वा मुच्यते पापात्सप्तजन्मसमुद्भवात् । पुण्यं चाऽऽप्नोति विपुलं गतिमिष्टां च भो द्विजाः ॥
तस्य नामानि वक्ष्यामि प्रमाणं च युगे युगे । यथासंख्यं च भो विप्राः कृतादिषु यथाक्रमम् १६
वटं वटेश्वरं [1]कृष्णं पुराणपुरुषं द्विजाः । वटस्यैतानि नामानि कीर्तितानि कृतादिषु ॥ १७
योजनं पादहीनं च योजनार्धं तदर्धकम् । प्रमाणं कल्पवृक्षस्य कृतादौ परिकीर्तितम् ॥ १८
[2]यथोक्तेन तु मन्त्रेण नमस्कृत्वा तु तं वटम् । दक्षिणाभिमुखो गच्छेद्धन्वन्तरशतत्रयम् ॥ १९
यत्रासौ दृश्यते [3]विष्णुः स्वर्गद्वारं मनोरमम् । सागराम्भः स[4]माक्रुष्टं काष्ठं सर्वगुणान्वितम् ॥२०
प्रणिपत्य ततस्तं भोः परिपूज्य ततः पुनः । मुच्यते[5] सर्वरोगाद्यैस्तथा पापैर्ग्रहादिभिः ॥ २१
उग्रसेनं पुरा दृष्ट्वा स्वर्गद्वारेण [6]सागरम् । गत्वा[7]ऽऽचम्य शुचिस्तत्र ध्यात्वा नारायणं परम् ॥ २२
न्यसेदष्टाक्षरं मन्त्रं पश्चाद्धस्तशरीरयोः । ॐ नमो नारायणायेति यं वदन्ति मनीषिणः ॥ २३
किं कार्यं बहुभिर्मन्त्रैर्मनोविभ्रमकारकैः । ॐ नमो नारायणायेति मन्त्रः सर्वार्थसाधकः ॥ २४
आपो नरस्य सूनुत्वान्नारा इतीह कीर्तिताः । विष्णोर्[8]तास्त्वयनं पूर्वं तेन नारायणः स्मृतः २५
*नारायणपरा वेदा नारायणपरा द्विजाः । नारायणपरा यज्ञा नारायणपराः क्रियाः ॥ २६
नारायणपरा पृथ्वी नारायणपरं जलम् । नारायणपरो वह्निर्नारायणपरं नभः ॥ २७
नारायणपरो वायुर्नारायणपरं मनः । अहंकारश्च बुद्धिश्च उभे नारायणात्मके ॥ २८
भूतं भव्यं भविष्यं च यत्किंचिज्जीवसंज्ञितम् । स्थूलं सूक्ष्मं परं चैव सर्वं नारायणात्मकम् ॥२९
शब्दाद्या विषयाः सर्वे श्रोत्रादीनीन्द्रियाणि च । प्रकृतिः पुरुषश्चैव सर्वे नारायणात्मकाः ॥ ३०
+जले स्थले च पाताले स्वर्गलोकेऽम्बरे नगे । अवष्टभ्य इदं सर्वमास्ते नारायणः प्रभुः ॥ ३१
किं चात्र बहुनोक्तेन जगदेतच्चराचरम् । ब्रह्मादिस्तम्बपर्यन्तं सर्वं नारायणात्मकम् ॥ ३२
नारायणात्परं किंचिन्नेह पश्यामि भो द्विजाः । तेन व्याप्तमिदं सर्वं दृश्यादृश्यं चराचरम् ॥३३
आपो ह्यायतनं विष्णोः स च एवाम्भसां पतिः । तस्मादप्सु स्मरेन्नित्यं नारायणमघापहम् ३४
स्नानकाले विशेषे[9]ण चोपस्थाय जले शुचिः । स्मरेन्नारायणं ध्यायेद्धस्ते काये च विन्यसेत् ३५
ओंकारं च नकारं च अङ्गुष्ठे हस्तयोर्न्यसेत् । शेषैर्ह(षान्ह)स्ततलं(ले) यावत्तर्जन्यादिषु विन्यसेत् ॥
ओंकारं वामपादे तु नकारं दक्षिणे न्यसेत् । मोकारं वामकट्यां तु नाकारं दक्षिणे न्यसेत् ॥३७
राकारं नाभिदेशे तु यकारं वामबाहुके । णाकारं दक्षिणे न्यस्य यकारं मूर्ध्नि विन्यसेत् ॥ ३८
अधश्चोर्ध्वं च हृदये पार्श्वतः पृष्ठतोऽग्रतः । ध्यात्वा नारायणं पश्चादारभेत्कवचं बुधः ॥ ३९
पूर्वे मां पातु गोविन्दो दक्षिणे मधुसूदनः । पश्चिमे श्रीधरो देवः केशवस्तु तथोत्तरे ॥ ४०
पातु विष्णुस्तथाऽऽग्नेये नैर्ऋते माधवोऽव्ययः । वायव्ये तु हृषीकेशस्तथेशाने च वामनः ॥ ४१
[10]भूतले पातु वाराहस्तथोर्ध्वं च त्रिविक्रमः । कृत्वैवं कवचं पश्चादात्मानं चिन्तयेत्ततः ॥ ४२
अहं नारायणो देवः शङ्खचक्रगदाधरः । एवं ध्यात्वा तदाऽऽत्मानमिमं मन्त्रमुदीरयेत् ॥ ४३
त्वमग्नि[11]र्द्विपदां नाथ रेतोधाः कामदीपनः । प्रधानः सर्वभूताना[12]ं जीवानां प्रभुरव्य[13]यः ॥ ४४

---

* ख. पुस्तक एतच्छ्लोकस्थाने ' नारायणपरा लोका नारायणपराः सुराः । नारायणपरं सत्यं नारायणपरं पदम् ' इति पद्यं दृश्यते । + अयं श्लोको नास्ति ख. पुस्तके ।

---

१ क. पूर्वं । २ ग. पूर्वोक्तेन । ३ क. ग. चिह्नं । ४ ग. °माकीर्णं का° । ५ ख. °ते दुष्टरोगैस्तु तथा । ६ क. संगतम् । ७ क. °त्वा तत्र शुचिर्भूत्वा ध्या° । ८ क. °स्तास्त्वय° । ९ क. ख. °ण वेदस्याऽऽयतनं शु° । १० ख. सुतले । ११ क. ख. °र्द्विपतां ना° । १२ ख. °नां च प्रमुख्यकः । अ° । १३ क. ख. °यः । यतस्तस्या° ।

अमृतस्यारणिस्त्वं हि देवयोनिरपां पते । वृजिनं हर मे सर्वं तीर्थराज नमोऽस्तु ते ॥ ४५
एवमुच्चार्य विधिवत्ततः स्नानं समाचरेत् । अन्यथा भो [२]द्विजश्रेष्ठाः स्नानं तत्र न शस्यते ॥ ४६
कृत्वा तु वैदिकैर्मन्त्रैरभिषेकं च मार्जनम् । अन्तर्जले जपेत्पश्चा[३]त्रिरावृत्त्याऽघमर्षणम् ॥ ४७
हयमेधो यथा विप्राः सर्वपापहरः क्रतुः । तथाऽघमर्षणं चात्र सूक्तं सर्वाघनाशनम् ॥ ४८
उत्तीर्य वाससी धौते निर्मले परिधाय वै । प्राणानायम्य चाऽऽचम्य संध्यां चोपास्य भास्करम्
उपतिष्ठे[४]त्ततश्चोर्ध्वं क्षिप्त्वा पुष्पजलाञ्जलिम् । उपस्थायोर्ध्वबाहुश्च तल्लिङ्गै[५]र्भास्करं ततः ॥ ५०
गायत्रीं पावनीं देवीं जपेदष्टोत्तरं शतम् । अन्यांश्च सौरमन्त्रांश्च जप्त्वा तिष्ठन्समाहितः ॥ ५१
कृत्वा प्रदक्षिणं सूर्यं नमस्कृत्योपविश्य च । स्वाध्यायं प्राङ्मुखः कृत्वा तर्पयेद्देवतान्ृषीन् ॥ ५२
मनुष्यांश्च पितॄंश्चान्यान्नामगोत्रेण मन्त्रवित् । तोयेन तिलमिश्रेण विधिवत्सुसमाहितः ॥ ५३
तर्पणं देवतानां च पूर्वं कृत्वा समाहितः । अधिकारी भवेत्पश्चात्पितॄणां तर्पणे द्विजः ॥ ५४
श्राद्धे हवनकाले च पाणिनैकेन [६]निर्वपेत् । तर्पणे तूभयं कुर्यादेष एव विधिः सदा ॥ ५५
अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु । तृप्यतामिति[८] सिञ्चेत्तु नामगोत्रेण वाग्यतः ॥ ५६
कायस्थैर्यस्तिलैर्मोहात्करोति पितृतर्पणम् । तर्पितास्तेन पितरस्त्वङ्मांसरुधिरास्थिभिः ॥ ५७
अङ्गस्थैर्न तिलैः कुर्याद्देवतापितृतर्पणम् । रुधिरं तद्भवेत्तोयं प्रदाता किल्बिषी भवेत् ॥ ५८
भूम्यां यद्दीयते तोयं दाता चैव जले स्थितः । वृथा तन्मुनिशार्दूला नोपतिष्ठति कस्यचित् ॥ ५९
स्थले स्थित्वा जले यस्तु प्रयच्छेदुदकं नरः । पितॄणां नोपतिष्ठेत सलिलं तन्निरर्थकम् ॥ ६०
उदके नोदकं कुर्यात्पितृभ्यश्च कदाचन । उत्तीर्य तु शुचौ देशे कुर्यादुदकतर्पणम् ॥ ६१
नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना । नोपतिष्ठति तत्तोयं यद्भूम्यां न प्रदीयते ॥ ६२
पितॄणामक्षयं[९] स्थानं मही दत्ता मया द्विजाः । तस्मात्तत्रैव दातव्यं पितॄणां प्रीतिमिच्छता ॥ ६३
भूमिपृष्ठे समुत्पन्ना भूम्यां चैव च संस्थिताः । भूम्यां चैव लयं याता भूमौ दद्यात्ततो जलम् ६४
आस्तीर्य च कुशान्साग्रांस्तानावाह्य स्वमन्त्रतः । प्राचीनाग्रेषु वै देवान्याम्याग्रेषु तथा पितॄन् ६५

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे समुद्रस्नानविधिनिरूपणं नाम षष्टितमोऽध्यायः ॥ ६० ॥

श्लोकानामादितः समष्ट्यङ्काः—४१११

अथैकषष्टितमोऽध्यायः ।

ब्रह्मोवाच—

देवान्पितॄंस्तथा चान्यान्संतर्प्याऽऽचम्य वाग्यतः । हस्तमात्रं चतुष्कोणं चतुर्द्वारं सुशोभनम् ॥ १
पुरं वि[१०]लिख्य भो विप्रास्तीरे तस्य महोदधेः । मध्ये तत्र लिखेत्पद्ममष्टपत्रं सकर्णिकम् ॥ २
एवं मण्डलमालिख्य पूजयेत्तत्र भो द्विजाः । अष्टाक्षरविधानेन नारायणमजं विभुम् ॥ ३
अतः परं प्रवक्ष्यामि कायशोधनमुत्तमम् । [११]अंकारं हृदये [१२]ध्यात्वा च[१३]क्ररेखासमन्वितम् ॥ ४

---

१ क. देव । २ ख. मुनिश्रेष्ठाः । ३ क. °श्चान्मन्त्रं चाप्यघ° । ४ क. °त्ततो विप्राः क्षि° । ५ क. नरः । ६ क. तर्पयेत् । ७ ख. द्वितयं । ८ क. ख. °ति वक्तव्यं ना° । ९ ख. °यं सम्यङ्मही । १० ख. विलिप्य । ग. प्रलिप्य । ११ ग. क्षकारं । १२ ख. ग. चिन्त्य । १३ ख. °रेफस° ।

ज्वलन्तं त्रिशिखं चैव दहन्तं पापनाशनम् । चन्द्र[1]मण्डलमध्यस्थं रा[2]कारं मूर्ध्नि चिन्तयेत् ॥ ५
शु[3]क्लवर्णं प्रवर्षन्तममृतं प्लावयन्महीम् । एवं निर्धूतपापस्तु दि[4]व्यदेहस्ततो भवेत् ॥ ६
अष्टाक्षरं ततो मन्त्रं न्यसेदेवाऽऽत्मनो बुधः । वामपादं समारभ्य क्रमशश्चैव विन्यसेत् ॥ ७
पञ्चाङ्गं वैष्णवं चैव चतुर्व्यूहं तथैव च । करशुद्धिं प्रकुर्वीत मूलमन्त्रेण साधकः ॥ ८
एकैकं चैव वर्णं तु अङ्गुलीषु पृथक्पृथक् । ओंकारं पृथिवीं शुक्लां वामपादे तु विन्यसेत् ॥ ९
नकारः शां[5]भवः श्यामो दक्षिणे तु व्यवस्थितः । मोकारं कालमेवाऽऽहुर्वामकट्यां निधापयेत् ॥
नाकारः स[6]र्वबीजं तु दक्षिणस्यां व्यवस्थितः । राकारस्तेज इत्याहुर्नाभिदेशे व्यवस्थितः ॥ ११
वायव्योऽयं यकारस्तु वामस्कन्धे समाश्रितः । णाकारः सर्वगो ज्ञेयो दक्षिणांसे व्यवस्थितः ॥
यकारोऽयं शिरस्थश्च यत्र लोकाः प्रतिष्ठिताः ॥ १२

ॐ विष्णवे नमः शिरः । ॐ ज्वलनाय नमः शिखा । ॐ विष्णवे नमः कवचम् । ॐ विष्णवे[7] न[8]मः स्फुरणं दिशोबन्धाय । ॐ हुंफ[9]डस्त्रम् । ॐ शिरसि शुक्लो वासुदेव इति[10] । ॐ आं ललाटे रक्तः संकर्षणो[11] गरुत्मान्वह्निस्तेज आदित्य इति[12] । ॐ आं ग्रीवायां पीतः प्रद्युम्नो वायु[13]मेघ इति[14] ॥ ॐ आं हृदये[15] कृष्णोऽनिरुद्धः सर्वशक्तिसमन्वित इति । एवं चतुर्व्यूहमात्मानं कृत्वा ततः कर्म समाचरेत् । १३

ममाग्रेऽवस्थितो विष्णुः पृष्ठतश्चापि केशवः । गोविन्दो दक्षिणे पार्श्वे वामे तु मधुसूदनः ॥ १४
उ[16]परिष्टात्तु वैकुण्ठो वाराहः पृथिवीतले । अवान्तरदिशो यास्तु तासु सर्वासु माधवः ॥ १५
गच्छतस्तिष्ठतो वाऽपि जाग्रतः स्वपतोऽपि वा । नरसिंहकृता गुप्तिर्वासुदेवमयो ह्यहम् ॥ १६
एवं विष्णुमयो भूत्वा ततः कर्म समारभेत् । यथा[17] देहे तथा देवे सर्वतत्त्वानि योजयेत् ॥ १७
ततश्चैव प्रकुर्वीत प्रोक्षणं प्र[18]णवेन तु । फट्कारान्तं समुद्दिष्टं सर्वविघ्नहरं शुभम् ॥ १८
तत्रा[19]र्कचन्द्रवह्नीनां मण्डलानि विचिन्तयेत् । पद्ममध्ये न्यसेद्वि[20]ष्णुं पवनस्याम्बरस्य च ॥ १९
ततो विचिन्त्य हृदय ओंकारं ज्योतीरूपिणम् । कर्णिकायां समासीनं ज्योतीरूपं सनातनम् २०
अष्टाक्षरं ततो मन्त्रं विन्यसेच्च यथाक्रमम् । तेन व्यस्तसमस्तेन पूजनं परमं स्मृतम् ॥ २१
द्वादशाक्षरमन्त्रेण यजेद्देवं सनातनम् । ततोऽवधार्य हृदये कर्णिका[21]यां बहिर्न्यसेत् ॥ २२
चतुर्भुजं महासत्त्वं सूर्यकोटिसमप्रभम् । चिन्तयित्वा महायोगं ज्योतीरूपं सनातनम् ॥
ततश्चाऽऽवाहयेन्मन्त्रं क्रमेणाऽऽचिन्त्य मानसे ॥ २१

आवाहनमन्त्रः—मीनरूपो वराहश्च नरसिंहोऽथ वामनः । आयातु देवो वरदो मम नारायणोऽग्रतः । ॐ नमो नारायणाय नमः ॥ २४

स्थापनमन्त्रः[22]—कर्णिकायां सुपीठेऽत्र पद्मकल्पितमासनम् । सर्वसत्त्वहितार्थाय तिष्ठ त्वं मधुसूदन । ओं नमो नारायणाय नमः ॥ २५

---

१ ख. चतुर्मण्ड° । २ क. वकारं । ख. चकारं । ३ क. रक्तवर्णं । ४ ख. °व्यहस्तस्त° । ५ क. शोभनः । ६ ग. पूर्वबीजं । ७ क. °वे स्फु° । ८ ख. °मः स्फुरस्फारदि° । ग. °मः क्षारक्षारदि° । ९ ग. °फण्मन्त्रम् । १० क. °ति । ए° । ख. °ति ल° । ११ ख. °णो वह्नि° । १२ क. °ति । आग्नि° । ख. °ति । अग्नी° । १३ ख. °मेघाभ्र ई° । १४ ग. °ति । अं ॐ हृ° । १५ ग. °ये हृष्टोऽनि° । १६ क. °पतिष्ठतु वै° । १७ ख. °थाऽऽत्मनि त° । १८ क. प्रवणेन । ग. प्रवरेण । १९ क. °त्रार्धच° । २० क. °द्विष्णुमेवमस्यापरस्य तु । त° । २१ ख. °यां हरिं न्य° । २२ ग. °न्त्रः । सुमेरुः पादपीठं ते प° ।

अर्घमन्त्रः—ॐ त्रैलोक्यपतीनां[1] पतये[2] देवदेवाय हृषीकेशाय विष्णवे नमः। ओं नमो नारायणाय नमः ॥ २६

पाद्यमन्त्रः—ओं पाद्यं पादयोर्देव पद्मनाभ सनातन। विष्णो कमलपत्राक्ष गृहाण मधुसूदन। ओं नमो नारायणाय नमः ॥ २७

मधुपर्कमन्त्रः—मधुपर्कं महादेव ब्रह्माद्यैः कल्पितं तव। मया निवेदितं भक्त्या गृहाण पुरुषोत्तम। ओं नमो नारायणाय नमः ॥ २८

आचमनीयमन्त्रः—मन्दाकिन्याः सितं वारि सर्वपापहरं शिवम्। गृहाणाऽऽचमनीयं त्वं मया भक्त्या निवेदितम्। ओं नमो नारायणाय नमः ॥ २९

स्नानमन्त्रः—त्वमापः पृथिवी चैव ज्योतिस्त्वं वायुरेव च। लोकेश[3] वृत्तिमात्रेण वारिणा स्नापयाम्यहम्। ओं नमो नारायणाय नमः ॥ ३०

वस्त्रमन्त्रः—देवतत्त्वसमायुक्त यज्ञवर्णसमन्वित[4]। स्वर्णवर्णप्रभे देव वाससी तव केशव। ओं नमो नारायणाय नमः ॥ ३१

विलेपनमन्त्रः—शरीरं ते न जानामि चेष्टां चैव च केशव। मया निवेदितो गन्धः प्रतिगृह्य विलिप्यताम्। ओं नमो नारायणाय नमः ॥ ३२

उपवीतमन्त्रः—ऋग्यजुःसाममन्त्रेण त्रिवृतं पद्मयोनिना। सावित्रीग्रन्थिसंयुक्तमुपवीतं तवा[5]र्पये। ओं नमो नारायणाय नमः ॥ ३३

अलंकारमन्त्रः—दिव्यरत्नसमायुक्त वह्निभानुसमप्रभ। गात्राणि तव शोभन्तु सालंकाराणि माधव। ओं नमो नारायणाय नमः ॥ ३४

ओं नम इति प्रत्यक्षरं समस्तेन मूलमन्त्रेण वा पूजयेत्। ३५

धूपमन्त्रः—वनस्पतिरसो दिव्यो गन्धाढ्यः सुरभिश्च[6] ते। मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम्। ओं नमो नारायणाय नमः ॥ ३६

दीपमन्त्रः—सूर्यचन्द्रसमो ज्योतिर्विद्युदग्न्योस्तथैव च। त्वमेव ज्योतिषां देव दीपोऽयं प्रतिगृह्यताम्। ओं नमो नारायणाय नमः ॥ ३७

नैवेद्यमन्त्रः—अन्नं चतुर्विधं चैव रसैः षड्भिः समन्वितम्। मया निवेदितं भक्त्या नैवेद्यं तव केशव। ओं नमो नारायणाय नमः ॥ ३८

पूर्वे दले वासुदेवं याम्ये संकर्षणं न्यसेत्। प्रद्युम्नं पश्चिमे कुर्यादनिरुद्धं तथोत्तरे ॥ ३९
वाराहं च तथाऽऽग्नेये नरसिंहं च नैर्ऋते। वायव्ये माधवं चैव तथैशाने त्रिविक्रमम् ॥ ४०
तथाऽष्टाक्षरदेवस्य गरुडं पुरतो न्यसेत्। वामपार्श्वे तथा चक्रं शङ्खं दक्षिणतो न्यसेत् ॥ ४१
तथा महागदां चैव न्यसेद्देवस्य दक्षिणे। ततः शार्ङ्गं धनुर्विद्वान्न्यसेद्देवस्य वामतः ॥ ४२
दक्षिणेनेषुधी दिव्ये खड्गं वामे च विन्यसेत्। श्रियं दक्षिणतः स्थाप्य पुष्टिमुत्तरतो न्यसेत् ॥ ४३
वनमालां च पुरतस्ततः श्रीवत्सकौस्तुभौ। विन्यसेद्धृदयादीनि पूर्वादिषु चतुर्दिशम् ॥ ४४
ततोऽस्त्रं देवदेवस्य कोणे चैव तु विन्यसेत्। इन्द्रमग्निं यमं चैव नैर्ऋतं वरुणं तथा ॥ ४५

---

१ क. °तीनामच्चर्याय दे°। २ ख. °येऽच्चर्याय दे°। ३ ग. लोकसंधृतिमा°। ४ ख. °ज्ञकर्मस°। ५ क. तवाच्युत। ख. तथा तव। ओं। ६ क. सुमनोहरः। म°।

वायुं धनदमीशानमनन्तं ब्रह्मणा सह । पूजयेत्तांत्रिकैर्मन्त्रैरधश्चोर्ध्वं तथैव च ॥ ४६
एवं संपूज्य देवेशं मण्डलस्थं जनार्दनम् । लभेदभिमतान्कामान्नरो नास्त्यत्र संशयः ॥ ४७
अनेनैव विधानेन मण्डलस्थं जनार्दनम् । पूजितं यः संपश्येत स विशेद्विष्णुमव्ययम् ॥ ४८
सकृदप्यर्चितो येन विधिनाऽनेन केशवः । जन्ममृत्युजेरां तीर्त्वा स विष्णोः पदमाप्नुयात् ॥ ४९
यः स्मरेत्सततं भक्त्या नारायणमतन्द्रितः । अन्वहं तस्य वासाय श्वेतद्वीपः प्रकल्पितः ॥ ५०
ओंकारादिसमायुक्तं नमःकारान्तदीपितम् । तन्नाम सर्वतत्त्वानां मन्त्र इत्यभिधीयते ॥ ५१
अनेनैव विधानेन गन्धपुष्पं निवेदयेत् । एकैकस्य प्रकुर्वीत यथोदिष्टं क्रमेण तु ॥ ५२
मुद्रास्ततो निबध्नीयाँद्यथोक्तक्रमचोदिताः । जपं चैव प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ॥ ५३
अष्टाविंशतिमष्टौ वा शतमष्टोत्तरं तथा । कामेषु चँ यथाप्रोक्तं यथाशक्ति समाहितः ॥ ५४
पद्मं शङ्खश्च श्रीवत्सो गदा गरुड एव च । चक्रं खड्गश्च शार्ङ्गं च अष्टौ मुद्राः प्रकीर्तिताः ॥ ५५
विसर्जनमन्त्रः—गच्छ गच्छ परं स्थानं पुराणपुरुषोत्तम । यत्र ब्रह्मादयो देवा विन्दन्ति परमं पदम् ॥ ५६
अर्चनं ये न जानन्ति हरेर्मन्त्रैर्यथोदितम् । ते तत्र मूलमन्त्रेण पूजयन्त्वच्युतं सदा ॥ ५७

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे पूजाविधिकथनं नामैकषष्टितमोऽध्यायः ॥ ६१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४१६६

अथ द्विषष्टितमोऽध्यायः ।

ब्रह्मोवाच—

एवं संपूज्य विधिवद्भक्त्या तं पुरुषोत्तमम् । प्रणम्य शिरसा पश्चात्सागरं च प्रसादयेत् ॥ १
प्राणस्त्वं सर्वभूतानां योनिश्च सरितां पते । तीर्थराज नमस्तेऽस्तु त्राहि मामच्युतप्रिय ॥ २
स्नात्वैवं सागरे सम्यक्तस्मिन्क्षेत्रवरे द्विजाः । तीरे चाभ्यर्च्य विधिवन्नारायणमनामयम् ॥ ३
रामं कृष्णं सुभद्रां च प्रणिपत्य च सागरम् । शतानामश्वमेधानां फलं प्राप्नोति मानवः ॥ ४
सर्वपापविनिर्मुक्तः सर्वदुःखविवर्जितः । वृन्दारक इव श्रीमान्रूपयौवनगर्वितः ॥ ५
विमानेनार्कवर्णेन दिव्यगन्धर्वनादिना । कुलैकविंशमुद्धृत्य विष्णुलोकं स गच्छति ॥ ६
भुक्त्वा तत्र वरान्भोगान्क्रीडित्वा चाप्सरैः सह । मन्वन्तरशतं साग्रं जरामृत्युविवर्जितः ॥ ७
पुण्यक्षयादिहाऽऽयातः कुले सर्वगुणान्विते । रूपवान्सुभगः श्रीमान्सत्यवादी जितेन्द्रियः ॥ ८
वेदशास्त्रार्थविद्विप्रो भवेद्यज्वा तु वैष्णवः । योगं च वैष्णवं प्राप्य ततो मोक्षमवाप्नुयात् ॥ ९
ग्रहोपरागे संक्रान्त्यामयने विषुवे तथा । युगादिषु षडशीत्यां व्यतीपाते दिनक्षये ॥ १०
आषाढ्यां चैव कार्तिक्यां माघ्यां वाऽन्ये शुभे तिथौ । ये तत्र दानं विप्रेभ्यः प्रयच्छन्ति सुमेधसः
फलं सहस्रगुणितमन्यतीर्थाल्लभन्ति ते । पितॄणां ये प्रयच्छन्ति पिण्डं तत्र विधानतः ॥ १२

---

१ क. °त्तान्स्वकै° । २ क. °जरातीतं स । ३ क. °हं स्वर्गमार्गे वै तेन दीपः प्रवर्तितः । ४ ख. °यात्क्रमाच्चैव विधानतः । ज° । ५ ख. च तथाऽप्येवं य° । ६ ख. °राणं पु° । ७ क. °म् । दशाना° । ८ ख. °ग्रं नरो मृ° ।

अक्षयां पितरस्तेषां तृप्तिं संप्राप्नुवन्ति वै । एवं स्नानफलं सम्यक्सागरस्य मयोदितम् ॥ १३
दानस्य च फलं विप्राः पिण्डदानस्य चैव हि । धर्मार्थमोक्षफलदमायुष्कीर्तियशस्करम् ॥ १४
भुक्तिमुक्तिफलं नृणां धन्यं दुःस्वप्ननाशनम् । सर्वपापहरं पुण्यं सर्वकामफलप्रदम् ॥ १५
नास्तिकाय न वक्तव्यं पुराणं च द्विजोत्तमाः । तावद्गर्जन्ति तीर्थानि माहात्म्यैः स्वैः पृथक्पृथक्
यावन्न तीर्थराजस्य माहात्म्यं वर्ण्यते द्विजाः । पुष्करादीनि तीर्थानि प्रयच्छन्ति स्वकं फलम् १७
तीर्थराजस्तु स पुनः सर्वतीर्थफलप्रदः । भूतले यानि तीर्थानि सरितश्च सरांसि च ॥ १८
विशन्ति सागरे तानि तेनासौ श्रेष्ठतां गतः । राजा समस्ततीर्थानां सागरः सरितां पतिः ॥१९
तस्मात्समस्ततीर्थेभ्यः श्रेष्ठोऽसौ सर्वकामदः । तमो नाशं यथाऽभ्येति भास्करेऽभ्युदिते द्विजाः॥
स्नानेन तीर्थराजस्य तथा पापस्य संक्षयः । तीर्थराजसमं तीर्थं न भूतं न भविष्यति ॥ २१
अधिष्ठानं यदा यत्र प्रभोर्नारायणस्य वै । कः शक्नोति गुणान्वक्तुं तीर्थराजस्य भो द्विजाः २२
कोट्यो नवनवत्यस्तु यत्र तीर्थानि सन्ति वै । तस्मात्स्नानं च दानं च होमं जप्यं सुरार्चनम् ॥
यत्किंचित्क्रियते तत्र चाक्षयं क्रियते द्विजाः ॥ २३

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे समुद्रस्नानमाहात्म्यवर्णनं नाम
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४१८९

अथ त्रिषष्टितमोऽध्यायः ।

ब्रह्मोवाच—

ततो गच्छेद्द्विजश्रेष्ठास्तीर्थं यज्ञाङ्गसंभवम् । इन्द्रद्युम्नसरो नाम यत्राऽऽस्ते पावनं शुभम् ॥ १
गत्वा तत्र शुचिर्धीमानाचम्य मनसा हरिम् । ध्यात्वोपस्थाय च जलमिमं मन्त्रमुदीरयेत् ॥ २
अश्वमेधाङ्गसंभूत तीर्थ सर्वाघनाशन । स्नानं त्वयि करोम्यद्य पापं हर नमोऽस्तु ते ॥ ३
एवमुच्चार्य विधिवत्स्नात्वा देवानृषीन्पितॄन् । तिलोदकेन चान्यांश्च संतर्प्याऽऽचम्य वाग्यतः ॥४
दत्त्वा पितॄणां पिण्डांश्च संपूज्य पुरुषोत्तमम् । दशाश्वमेधिकं सम्यक्फलं प्राप्नोति मानवः ॥ ५
सप्तावरान्सप्त परान्वंशानुद्धृत्य देववत् । कामगेन विमानेन विष्णुलोकं स गच्छति ॥ ६
भुक्त्वा तत्र सुखान्[1]भोगान्यावच्चन्द्रार्कतारकम् । च्युतस्तस्मादिहाऽऽयातो मोक्षं च लभते ध्रुवम्॥
एवं कृत्वा पञ्चतीर्थीमेकादश्यामुपोषितः । ज्येष्ठशुक्लपञ्चदश्यां यः पश्येत्पुरुषोत्तमम् ॥ ८
स पूर्वोक्तं फलं प्राप्य क्रीडित्वा वाऽच्युतालये । प्रयाति परमं स्थानं यस्मान्नाऽऽवर्तते पुनः॥९

मुनय ऊचुः—

मासानन्यान्परित्यज्य माघादीन्प्रपितामह । प्रशंससि कथं ज्येष्ठं ब्रूहि तत्कारणं प्रभो ॥ १०

ब्रह्मोवाच—

शृणुध्वं मुनिशार्दूलाः प्रवक्ष्यामि समासतः । ज्येष्ठं मासं यथा तेभ्यः प्रशंसामि पुनः पुनः॥११
पृथिव्यां यानि तीर्थानि सरितश्च सरांसि च । पुष्करिण्यस्तडागानि वाप्यः कूपास्तथा ह्रदाः॥

---

१ ख. सुखं भोगा° । २ ख. °तीर्थमे° ३ ख. मार्गादी° । ४ ख. विभो ।

नानानद्यः समुद्राश्च सप्ताहं पुरुषोत्तमे । ज्येष्ठशुक्लदशम्यादि प्रत्यक्षं यान्ति सर्वदा ॥ १३
स्नानदानादिकं तस्माद्देवताप्रेक्षणं द्विजाः । यत्किंचित्क्रियते तत्र तस्मिन्कालेऽक्षयं भवेत् ॥ १४
शुक्लपक्षस्य दशमी ज्येष्ठे मासि द्विजोत्तमाः । हरते दश पापानि तस्माद्दशहरा स्मृता ॥ १५
यस्तस्यां हलिनं कृष्णं पश्येद्भद्रां सुसंयतः । सर्वपापविनिर्मुक्तो विष्णुलोकं व्रजेन्नरः ॥ १६
उत्तरे दक्षिणे विप्रास्त्वयने पुरुषोत्तमम् । दृष्ट्वा रामं सुभद्रां च विष्णुलोकं व्रजेन्नरः ॥ १७
नरो दोलागतं[1] दृष्ट्वा गोविन्दं पुरुषोत्तमम् । फाल्गुन्यां प्रयतो भूत्वा गोविन्दस्य[2] पुरं व्रजेत् १८
विषुवद्दिवसे प्राप्ते पञ्चतीर्थी विधानतः । कृत्वा संकर्षणं कृष्णं दृष्ट्वा भद्रां च भो द्विजाः ॥ १९
नरः समस्तयज्ञानां फलं प्राप्नोति दुर्लभम् । विमुक्तः सर्वपापेभ्यो विष्णुलोकं च गच्छति ॥२०
यः पश्यति तृतीयायां कृष्णं चन्दनै[3]रूषितम् । वैशाखस्यासिते पक्षे स यात्यच्युतमन्दिरम् ॥२१
ज्यैष्ठ्यां ज्येष्ठर्क्षयुक्तायां यः पश्येत्पुरुषोत्तमम् । कुलैकविंशमुद्धृत्य विष्णुलोकं स गच्छति ॥२२

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे पञ्चतीर्थीमाहात्म्यनिरूपणं नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४२११

अथ चतुःषष्टितमोऽध्यायः ।

ब्रह्मोवाच—

यदा भवेन्महाज्यैष्ठी राशिनक्षत्रयोगतः । प्रयत्नेन तदा मर्त्यैर्गन्तव्यं पुरुषोत्तमम् ॥ १
कृष्णं दृष्ट्वा महाज्यैष्ठ्यां रामं भद्रां च भो द्विजाः । नरो द्वादशयात्रायाः फलं प्राप्नोति चाधिकम्
प्रयागे च कुरुक्षेत्रे नैमिषे पुष्करे गये । गङ्गाद्वारे[4] कुशावर्ते गङ्गासागरसंगमे ॥ ३
कोकामुखे शूकरे[5] च मथुरायां मरुस्थले । शालग्रामे वायुतीर्थे मन्दरे सिन्धुसागरे ॥ ४
पिण्डारके चित्रकूटे प्रभासे कनखले द्विजाः । शङ्खोद्धारे द्वारकायां तथा बदरिकाश्रमे ॥ ५
लोहकुण्डे[6] चाश्वतीर्थे सर्वपापप्रमोचने । कामालये[7] कोटितीर्थे तथा चामरकण्टके ॥ ६
लोहार्गले जम्बुमार्गे[8] सोमतीर्थे पृथूदके । उत्पलावर्तके चैव पृथुतुङ्गे[9] सुकुब्जके ॥ ७
एकाम्रके च केदारे काश्यां च विरजे द्विजाः । कालञ्जरे च गोकर्णे श्रीशैले गन्धमादने ॥ ८
महेन्द्रे मलये विन्ध्ये पारियात्रे हिमालये । सह्ये च शुक्तिमन्ते च गोमन्ते चार्बुदे तथा ॥ ९
गङ्गायां सर्वतीर्थेषु यामुनेषु च भो द्विजाः । सारस्वतेषु गोमत्यां ब्रह्मपुत्रेषु सप्तसु ॥ १०
गोदावरी भीमरथी तुङ्गभद्रा च नर्मदा । तापी पयोष्णी कावेरी शिप्रा चर्मण्वती द्विजाः ॥ ११
वितस्ता चन्द्रभागा च शतद्रुर्बाहुदा तथा । ऋषिकुल्या कुमारी च विपाशा च दृषद्वती ॥ १२
शरयूर्नाकगङ्गा[10] च गण्डकी च महानदी । कौशिकी करतोया च त्रिस्रोता मधुवाहिनी ॥ १३
महानदी वैतरणी याश्चान्या नानुकीर्तिताः । अथवा किं बहूक्तेन भाषितेन द्विजोत्तमाः ॥ १४
पृथिव्यां सर्वतीर्थेषु[11] सर्वेष्वायतनेषु च । सागरेषु च शैलेषु नदीषु च सरःसु च ॥ १५

---

१ क. दोलायितं । २ क. °न्दभवनं व्र° । ३ ख. °नभूषि° । ४ ग. °रे च कुब्जाम्रे ग° । ५ क. °करके म° । ६ क. ख. °हदण्डे । ७ क. रुद्रमाले । ग. कर्दमाले । ८ क. जम्बुतीर्थे । ९ क. पृथुकुञ्जे । ख. पृथुनगे । १० क. °शूर्वरग° । ११ क. ख. °षु ह्रदेश्वाऽऽय° ।

यत्फलं स्नानदानेन राहुग्रस्ते दिवाकरे। तत्फलं कृष्णमालोक्य महाज्यैष्ठ्यां लभेन्नरः ॥ १६
तस्मात्सर्वप्रयत्नेन गन्तव्यं पुरुषोत्तमे। महाज्यैष्ठ्यां मुनिश्रेष्ठा सर्वकामफलेप्सुभिः ॥ १७
दृष्ट्वा रामं महाज्येष्ठं कृष्णं सुभद्रया सह। विष्णुलोकं नरो याति समुद्धृत्य समं कुलम् ॥ १८
भुक्त्वा तत्र वरान्भोगान्यावदाभूतसंप्लवम्। पुण्यक्षयादिहाऽऽगत्य चतुर्वेदी द्विजो भवेत् ॥ १९
स्वधर्मनिरतः शान्तः कृष्णभक्तो जितेन्द्रियः। वैष्णवं योगमास्थाय ततो मोक्षमवाप्नुयात् ॥ २०

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे महाज्यैष्ठीप्रशंसावर्णनं नाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४२३१

अथ पञ्चषष्टितमोऽध्यायः।

मुनय ऊचुः—

कस्मिन्काले भवेत्स्नानं कृष्णस्य कमलोद्भव[3]। विधिना केन तद्ब्रूहि ततो विधिविदां वर ॥ १

ब्रह्मोवाच—

शृणुध्वं मुनयः स्नानं कृष्णस्य वदतो मम। रामस्य च सुभद्रायाः पुण्यं सर्वाघनाशनम् ॥ २
मासि ज्येष्ठे च संप्राप्ते नक्षत्रे चन्द्रदैवते। पौर्णमास्यां तदा स्नानं सर्वकालं हरेर्द्विजाः ॥ ३
सर्वतीर्थमयः कूपस्तत्राऽऽस्ते निर्मलः शुचिः। तदा भोगवती तत्र प्रत्यक्षा भवति द्विजाः ॥ ४
तस्माज्ज्यैष्ठ्यां समुद्धृत्य हैमाद्यैः कलशैर्जलम्। कृष्णरामाभिषेकार्थं सुभद्रायाश्च भो द्विजाः ५
कृत्वा सुशोभनं मञ्चं पताकाभिरलंकृतम्। सुदृढं सुखसंचारं वस्त्रैः पुष्पैरलंकृतम् ॥ ६
विस्तीर्णं धूपितं धूपैः स्नानार्थं रामकृष्णयोः। सितवस्त्रपरिच्छन्नं मुक्ताहारावलम्बितम् ॥ ७
तत्र नानाविधैर्वाद्यैः कृष्णं नीलाम्बरं द्विजाः। मध्ये सुभद्रां चाऽऽस्थाप्य जयमङ्गलनिस्वनैः॥८
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यैश्च जातिभिः। अनेकशतसाहस्रैर्वृतं स्त्रीपुरुषैर्द्विजाः ॥ ९
गृहस्थाः स्नातकाश्चैव यतयो ब्रह्मचारिणः। स्नापयन्ति तदा कृष्णं मञ्चस्थं सहलायुधम् ॥ १०
तथा समस्ततीर्थानि पूर्वोक्तानि द्विजोत्तमाः। स्वोदकैः पुष्पमिश्रैश्च स्नापयन्ति पृथक्पृथक्॥ ११
पश्चात्पटहशङ्खाद्यैर्भेरीमुरजनिस्वनैः। काहलैस्तालशब्दैश्च मृदङ्गैर्झर्झरैस्तथा ॥ १२
अन्यैश्च विविधैर्वाद्यैर्घण्टास्वनविभूषितैः। स्त्रीणां मङ्गलशब्दैश्च स्तुतिशब्दैर्मनोहरैः ॥ १३
जयशब्दैस्तथा स्तोत्रैर्वीणावेणुनिनादितैः। श्रूयते सुमहाञ्शब्दः सागरस्येव गर्जतः ॥ १४
मुनीनां वेदशब्देन मन्त्रशब्दैस्तथाऽपरैः। नानास्तोत्ररवैः पुण्यैः सामशब्दोपबृंहितैः ॥ १५
यतिभिः स्नातकैश्चैव गृहस्थैर्ब्रह्मचारिभिः। स्नानकाले सुरश्रेष्ठ स्तुवन्ति परया मुदा ॥ १६
श्यामैर्वेश्याजनैश्चैव कुचभारावनामिभिः। पीतरक्ताम्बराभिश्च माल्यदामावनामिभिः ॥ १७
सरत्नकुण्डलैर्दिव्यैः सुवर्णस्तबकान्वितैः। चामरै रत्नदण्डैश्च वीज्येते रामकेशवौ ॥ १८
यक्षविद्याधरैः सिद्धैः किंनरैश्चाप्सरोगणैः[10]। परिवार्याम्बरगतैर्[11]देवगन्धर्वचारणैः ॥ १९

---

१ ग. °त्तमम्। म°। २ ख. °मासाद्य त°। ३ ख. °व। के च तत्कारयन्तीह स्नानं तस्य विधिं वद। ब्र°। ४ क. ख. मासे। ५ ग. प्रत्यक्षं। ६ ख. °वस्त्रैः प°। ७ क. ख. °धैर्घोषैर्घ°। ८ ख. °काश्चितैः। ९ ख. °रै रुक्मद°। १० ख. °णैः। संविचार्य वरगुणैर्दे°। ११ क. °र्यामरगणैर्दे°।

आदित्या वसवो रुद्राः साध्या विश्वे मरुद्गणाः । लोकपालास्तथा चान्ये स्तुवन्ति पुरुषोत्तमम्
नमस्ते देवदेवेश पुराण पुरुषोत्तम । सर्गस्थित्यन्तकृद्देव लोकनाथ जगत्पते ॥ २१
त्रैलोक्यधारिणं देवं ब्रह्मण्यं[1] मोक्षकारणम् । तं नमस्यामहे* भक्त्या सर्वकामफलप्रदम् ॥ २२
स्तुत्वैवं विबुधाः कृष्णं रामं चैव महाबलम् । +सुभद्रां च मुनिश्रेष्ठास्तदाऽऽकाशे व्यवस्थिताः॥
गायन्ति देवगन्धर्वा नृत्यन्त्यप्सरसस्तथा । देवतूर्याण्यवाद्यन्त वाता वान्ति सुशीतलाः ॥ २४
पुष्पमिश्रं तदा मेघा वर्षन्त्याकाशगोचराः । जयशब्दं च कुर्वन्ति मुनयः सिद्धचारणाः ॥ २५
शक्राद्या विबुधाः सर्व ऋषयः पितरस्तथा[2] । प्रजानां पतयो नागा ये चान्ये स्वर्गवासिनः ॥२६
ततो मङ्गलसंभारैर्विधिमन्त्रपुरस्कृतम् । आभिषेचनिकं द्रव्यं गृहीत्वा देवतागणाः ॥ २७
इन्द्रो विष्णुर्महावीर्यः सूर्याचन्द्रमसौ तथा । धाता चैव विधाता च तथा चैवानिलानलौ ॥ २८
पूषा भगोऽर्यमा त्वष्टा अंशुनैव विवस्वता[3] । पत्नीभ्यां सहितो धीमान्मित्रेण वरुणेन च ॥ २९
रुद्रैर्वसुभिरादित्यैरश्विभ्यां च वृतः प्रभुः । विश्वैर्देवैर्मरुद्भिश्च साध्यैश्च पितृभिः सह ॥ ३०
गन्धर्वैरप्सरोभिश्च यक्षराक्षसपन्नगैः । देवर्षिभिरसंख्येयैस्तथा ब्रह्मर्षिभिर्वरैः ॥ ३१
वैखानसैर्वालखिल्यैर्वाय्वाहारैर्मरीचिपैः । भृगुभिश्चाङ्गिरोभिश्च[4] सर्वविद्यासुनिष्ठितैः ॥ ३२
सर्वविद्याधरैः पुण्यैर्योगसिद्धिभिरावृतः । पितामहः पुलस्त्यश्च पुलहश्च महातपाः ॥ ३३
अङ्गिराः कश्यपो[5]ऽत्रिश्च मरीचिर्भृगुरेव च । क्रतुर्हरः प्रचेताश्च मनुर्द[6]क्षस्तथैव च ॥ ३४
ऋतव[7]श्च ग्रहाश्चैव[8] ज्योतींषि च द्विजोत्तमाः । मूर्तिमत्यश्च सरितो[9] देवाश्चैव सनातनाः ॥ ३५
समुद्राश्च ह्रदाश्चैव तीर्थानि विविधानि च । पृथिवी द्यौर्दिशश्चैव पादपाश्च द्विजोत्तमाः ॥ ३६
अदितिर्देवमाता च ह्रीः श्रीः स्वाहा सरस्वती । उमा शची सिनीवाली तथा चानुमतिः कुहूः
राका च धिषणा चैव पत्न्यश्चान्या दिवौकसाम् । हिमवांश्चैव विन्ध्यश्च मेरुश्चानेकशृङ्गवान् ३८
ऐरावतः सानुचरः कलाकाष्ठास्तथैव च । मासार्धं मासऋतवस्तथा रात्र्यहनी समाः ॥ ३९
उच्चैःश्रवा हयश्रेष्ठो नागराजश्च वामनः । अरुणो गरुडश्चैव वृक्षाश्चौषधिभिः सह ॥ ४०
धर्मश्च भगवान्देवः[10] समाजग्मुर्हि संगताः । कालो यमश्च मृत्युश्च यमस्यानुचरा[11]श्च ये ॥ ४१
बहुलत्वाच्च नोक्ता ये विविधा देवतागणाः । ते देवस्याभिषेकार्थं समायान्ति ततस्ततः ॥ ४२
गृहीत्वा ते तदा विप्राः सर्वे देवा दिवौकसः । आभिषेचनिकं द्रव्यं मङ्गलानि च सर्वशः ॥४३
दिव्यसंभारसंयुक्तैः कलशैः काञ्चनैर्द्विजाः । सारस्वतीभिः पुण्याभिर्दिव्यतोयाभिरेव च ॥ ४४
[12]तोयेनाऽऽकाशगङ्गायाः कृष्णं रामेण संगतम् । सपुष्पैः काञ्चनैः कुम्भैः स्नापयन्त्ये[13][14]वनिस्थिताः॥
संचरन्ति विमानानि देवानामम्बरे[15] तथा । उच्चावचानि दिव्यानि कामगानि स्थिराणि च॥४६
दिव्यरत्नविचित्राणि सेवितान्यप्सरोगणैः । गीतैर्वाद्यैः पताकाभिः शोभितानि समन्ततः॥ ४७
एवं तदा मुनिश्रेष्ठाः कृष्णं रामेण संगतम् । स्नापयित्वा सुभद्रां च संस्तुवन्ति मुदाऽन्विताः ४८

---

* एवमादीनां प्रयोगाणामार्षत्वात्कथंचिद्गतिर्विधेया । + इदमर्धं क. पुस्तके नास्ति ।

---

१ क. ख. ब्रह्माणं । २ क. ग. °तरोऽव्ययाः । प्र° । ३ ग. °ता । रुद्राश्विस° । ४ ख. °श्च यतिभिश्च महात्मभिः । स° । ५ क. ख. °श्यपश्चैव म° । ६ ख. मधुर्द° । ७ क. ईश्वराश्च । ख. ऐश्वराश्च । ८ क. ख. °व नक्षत्राणि द्वि° । ९ ग. °तो वेदाश्चै° । १० ग °न्देवैः स° । ११ क. °रास्तथा । ब° । १२ क. तोयैराका° । १३ ख. °यन्ति धरास्थि° । १४ ग. °न्त्यम्बरे स्थि° । १५ ख. °मन्तरे ।

जय जय लोकपाल[1] भक्तरक्षक जय जय प्रणतवत्सल जय जय भूतचरण जय जयाऽऽदि-
देव बहु[2]कारण जय जय वासुदेव जय जयासुरसंहरण जय जय [3]दिव्यमीन[4] जय जय त्रिदशवर
जय जय जलधिशयन जय जय योगिवर[5] जय जय सूर्यनेत्र जय जय देवराज जय जय कैटभारे
जय जय [6]वेदवर जय जय कूर्मरूप जय जय य[7]ज्ञवर जय जय कमलनाभ जय जय शैलचर जय
जय योगशायिञ्जय जय वेगधर जय जय विश्वमूर्ते जय जय चक्रधर जय जय भूतनाथ जय जय
धरणीधर जय जय शेषशायिञ्जय जय पीतवासो जय जय सोमकान्त जय जय योगवास जय
जय द[8]हनवक्त्र जय जय धर्मवास जय जय गुणनिधान जय जय श्रीनिवास जय जय गरुडगमन
जय जय सुखनिवास जय जय धर्मकेतो जय जय महीनिवास जय जय ग[9]हनचरित्र जय जय
योगिगम्य जय जय मखनिवास जय जय वेदवेद्य जय शान्तिकर जय जय योगिचिन्त्य जय जय
पुष्टिकर जय जय ज्ञानमूर्ते जय जय कमलाकर जय जय [11]भावबेद्य जय जय [12]मुक्तिकर जय जय
विमलदेह जय जय [13]सत्त्वनिलय जय जय [14]गुणसमृद्ध जय जय यज्ञकर जय जय गुणविहीन जय
जय मोक्षकर जय जय भूशरण्य जय जय कान्तियुत जय जय लोकशरण जय जय लक्ष्मीयुत
जय जय पङ्कजाक्ष जय जय सृष्टिकर जय जय योगयुत जय जयातसीकुसुमश्या[15]मदेह जय जय
[16]समुद्रवि[17]ष्टदेह जय जय लक्ष्मीपङ्कजषट्चरण जय जय भक्तवश जय जय लोककान्त जय जय
परमशान्त जय जय परमसार जय जय चक्रधर जय जय भोगियुत जय जय नीलाम्बर जय
जय शान्तिकर जय जय मोक्षकर जय जय कलुषहर ॥ ४९

जय कृष्ण जगन्नाथ जय संकर्षणानुज । जय पद्मपलाशाक्ष जय वाञ्छाफलप्रद ॥ ५०

जय मालावृतोरस्क जय चक्रगदाधर । जय पद्मालयाकान्त जय विष्णो नमोऽस्तु ते ॥ ५१

ब्रह्मोवाच—

एवं स्तुत्वा तदा देवाः शक्राद्या हृष्टमानसाः । सिद्धचारणसंघाश्च ये चान्ये स्वर्गवासिनः ॥५२
मुनयो वालखिल्याश्च कृष्णं रामेण संगतम् । सुभद्रां च मुनिश्रेष्ठाः प्रणिपत्याम्बरे स्थिताः ५३
दृष्ट्वा स्तुत्वा नमस्कृत्वा तदा ते त्रिदिवौकसः । कृष्णं रामं सुभद्रां च यान्ति स्वं स्वं निवेशनम्
संचरन्ति विमानानि देवानामम्बरे [18]तदा । उच्चावचानि दिव्यानि कामगानि स्थिराणि च ॥५५
दिव्यरत्नविचित्राणि सेवितान्यप्सरोगणैः । गीतैर्वाद्यैः पताकाभिः शोभितानि समन्ततः॥ ५६
तस्मिन्काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम् । बलभद्रं सुभद्रां च ते यान्ति पदमव्ययम्॥ ५७
सुभद्रारामसहितं मञ्चस्थं पुरुषोत्तमम् । दृष्ट्वा निरामयं स्थानं यान्ति नास्त्यत्र संशयः ॥ ५८
कपिलाशतदानेन यत्फलं पुष्करे स्मृतम् । तत्फलं कृष्णमालोक्[19]य मञ्चस्थं सहलायुधम् ॥
सुभद्रां च मुनिश्रेष्ठाः प्राप्नोति शुभकृन्नरः ॥ ५९
कन्याशतप्रदानेन यत्फलं समुदाहृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६०
सुवर्णशतनिष्काणां दानेन यत्फलं स्मृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६१

---

१ क. °ल जय जयजय काङ्क्षण जय जय पद्मनाभ जय जय परायण । ग. °ल जय जय पद्मनाभ भूधर° । २ ग. °हुकर° । ३ ख. दिव्यगीत । ४ क. °न जय जय जल° । ५ क. °वन्द्य ज° । ६ क. ख. वैद्यवर । ७ क. यज्ञरूप । ख. यज्ञचर । ८ क. ख. दहनचक्र । ९ ग. गहनगेहनिवास । १० ख. °नगमन जय जय भवाब्धिवास ज° । ११ क. भववैद्य । १२ क. ख. मूर्तिकर । १३ क. ख. प्रीतिकर । १४ ग. गुणसमूह । १५ ख. °म ज° । १६ क. ख. सप्तसमु° । १७ क. ख. °ष्टगेह° । १८ क. तथा । १९ क. °क्य ह्यवश्यं लभते नरः । क° ।

गोसहस्रप्रदानेन यत्फलं परिकीर्तितम्[1] । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६२
भूमिदानेन विधिवद्यत्फलं समुदाहृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६३
यत्फलं चान्नदानेन अर्घातिथ्येन कीर्तितम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६४
वृषोत्सर्गेण विधिवद्यत्फलं समुदाहृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६५
यत्फलं तोयदानेन ग्रीष्मे वाऽन्यत्र कीर्तितम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६६
तिलधेनुप्रदानेन यत्फलं संप्रकीर्तितम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६७
गजाश्वरथदानेन यत्फलं समुदाहृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६८
सुवर्णशृङ्गीदानेन यत्फलं समुदाहृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ६९
जलधेनुप्रदानेन यत्फलं समुदाहृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ७०
दानेन घृतधेन्वाश्च फलं यत्समुदाहृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ७१
चान्द्रायणेन चीर्णेन यत्फलं समुदाहृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ७२
मासोपवासैर्विधिवद्यत्फलं समुदाहृतम् । तत्फलं कृष्णमालोक्य मञ्चस्थं लभते नरः ॥ ७३
अथ किं बहुनोक्तेन भाषितेन पुनः पुनः । तस्य देवस्य माहात्म्यं मञ्चस्थस्य द्विजोत्तमाः ॥ ७४
यत्फलं सर्वतीर्थेषु व्रतैर्दानैश्च कीर्तितम् । तत्फलं कृष्णमालोक्य मञ्चस्थं सहलायुधम् ॥ ७५
सुभद्रां च मुनिश्रेष्ठाः प्राप्नोति शुभकृन्नरः । तस्मान्नरोऽथवा नारी पश्येत्तं पुरुषोत्तमम् ॥ ७६
ततः समस्ततीर्थानां लभेत्स्नानादिकं फलम् । स्नानशेषेण कृष्णस्य तोयेनाऽऽत्माऽभिषिच्यते ॥
वन्ध्या मृतप्रजा या तु दुर्भगा ग्रहपीडिता । राक्षसाद्यैर्गृहीता वा तथा रोगैश्च संहताः ॥ ७८
सद्यस्ताः स्नानशेषेण उदकेनाभिषेचिताः । प्राप्नुवन्तीप्सितान्कामान्यान्यान्वाञ्छन्ति चेप्सितान्
पुत्रार्थिनी लभेत्पुत्रान्सौभाग्यं च सुखार्थिनी । रोगार्ता मुच्यते रोगाद्धनं च धनकाङ्क्षिणी ८०
पुण्यानि यानि तोयानि तिष्ठन्ति धरणीतले । तानि स्नानावशेषस्य कलां नार्हन्ति षोडशीम् ८१
तस्मात्स्नानावशेषं यत्कृष्णस्य सलिलं द्विजाः । तेनाभिषिञ्चेद्गात्राणि सर्वकामप्रदं हि तत् ॥ ८२
स्नातं पश्यन्ति ये कृष्णं व्रजन्तं दक्षिणामुखम् । ब्रह्महत्यादिभिः पापैर्मुच्यन्ते ते न संशयः ॥ ८३
शास्त्रेषु यत्फलं प्रोक्तं पृथिव्यास्त्रिप्रदक्षिणैः । दृष्ट्वा नरो लभेत्कृष्णं व्रजन्तं दक्षिणामुखम् ॥ ८४
तीर्थयात्राफलं यत्तु पृथिव्यां समुदाहृतम् । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥ ८५
बदर्यां यत्फलं प्रोक्तं दृष्ट्वा नारायणं नरम् । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥ ८६
गङ्गाद्वारे[2] कुरुक्षेत्रे स्नानदानेन यत्फलम् । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥ ८७
[*प्रयागे च महामाघ्यां यत्फलं समुदाहृतम् । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥
शालग्रामे महाचैत्र्यां स्नानदानेन यत्फलम् । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥ ८९
महाभिधानकार्तिक्यां पुष्करे यत्फलं स्मृतम् । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥ ९०
यत्फलं स्नानदानेन गङ्गासागरसंगमे । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम्] ॥ ९१
ग्रस्ते सूर्ये कुरुक्षेत्रे स्नानदानेन यत्फलम् । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥ ९२
[+गङ्गायां सर्वतीर्थेषु[3] यामुनेषु च भो द्विजाः । सारस्वतेषु तीर्थेषु तथाऽन्येषु सरःसु च] ॥ ९३

---

* एतदादिश्लोकचतुष्टयं नास्ति क. ग. पुस्तकयोः । + अयं श्लोकः ख. पुस्तके नास्ति ।

---

१ ख. समुदाहृतम् । २ क. ग. °रे च कुब्जाम्रे स्ना° । ३ ग. °षु तथा चान्येषु भो ।

यत्फलं स्नानदानेन विधिवत्समुदाहृतम् । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥ ९४
पुष्करे चाथ तीर्थेषु गये चामरकण्टके । नैमिषादिषु तीर्थेषु क्षेत्रेष्वायतनेषु च ॥ ९५
यत्फलं स्नानदानेन राहुग्रस्ते दिवाकरे । दृष्ट्वा नरो लभेत्कृष्णं तत्फलं दक्षिणामुखम् ॥ ९६
अथ किं पुनरुक्तेन भाषितेन पुनः पुनः । यत्किंचित्कथितं चात्र फलं पुण्यस्य कर्मणः ॥ ९७
वेदशास्त्रे पुराणे च भारते च द्विजोत्तमाः । धर्मशास्त्रेषु सर्वेषु तथाऽन्यत्र मनीषिभिः ॥ ९८
दृष्ट्वा नरो लभेत्कृष्णं तत्फलं सहलायुधम् । सकलं भद्रया सार्धं व्रजन्तं दक्षिणामुखम् ॥ ९९

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे कृष्णस्नानमाहात्म्यवर्णनं नाम पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४३१०

अथ षट्षष्टितमोऽध्यायः ।

ब्रह्मोवाच—

गुडिवामण्डपं[1] यान्तं ये पश्यन्ति रथे स्थितम् । कृष्णं बलं सुभद्रां च ते यान्ति भवनं हरेः ॥ १
ये पश्यन्ति तदा कृष्णं सप्ताहं मण्डपे स्थितम् । हलिनं च सुभद्रां च विष्णुलोकं व्रजन्ति ते॥२

मुनय ऊचुः—

केन सा निर्मिता यात्रा दक्षिणस्यां[2] जगत्पते । यात्राफलं च किं तत्र प्राप्यते ब्रूहि मानवैः ॥ ३
किमर्थं सरसस्तीरे राज्ञस्तस्य जगत्पते[3] । पवित्रे विजने देशे गत्वा[4] तत्र च मण्डपे ॥ ४
कृष्णः संकर्षणश्चैव सुभद्रा च रथेन ते । स्वस्थानं संपरित्यज्य सप्तरात्रं वसन्ति वै ॥ ५

ब्रह्मोवाच—

इन्द्रद्युम्नेन भो विप्राः पुरा वै प्रार्थितो हरिः । सप्ताहं सरसस्तीरे मम यात्रा भवत्विति ॥ ६
गुडिवा नाम देवेश भुक्तिमुक्तिफलप्रदा । तस्मै किल वरं चासौ ददौ स पुरुषोत्तमः ॥ ७

श्रीभगवानुवाच—

सप्ताहं सरसस्तीरे तव राजन्भविष्यति । गुडिवा[5] नाम यात्रा मे सर्वकामफलप्रदा ॥ ८
ये मां तत्रार्चयिष्यन्ति श्रद्धया मण्डपे स्थितम् । संकर्षणं सुभद्रां च विधिवत्सुसमाहिताः ॥ ९
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्राश्च वै नृप । पुष्पैर्गन्धैस्तथा धूपैर्दीपैर्नैवेद्यकैर्वरैः ॥ १०
उपहारैर्बहुविधैः[6] प्रणिपातैः प्रदक्षिणैः । जयशब्दैस्तथा स्तोत्रैर्गीतैर्वाद्यैर्मनोहरैः ॥ ११
न तेषां दुर्लभं किंचित्फलं यस्य यदीप्सितम् । भविष्यति नृपश्रेष्ठ मत्प्रसादादसंशयम् ॥ १२

ब्रह्मोवाच—

एवमुक्त्वा तु तं देवस्तत्रैवान्तरधीयत । स तु राजवरः[7] श्रीमान्कृतकृत्योऽभवत्तदा ॥ १३
तस्मात्सर्वप्रयत्नेन गुडिवायां[8] द्विजोत्तमाः । सर्वकामप्रदं देवं पश्येत्तं पुरुषोत्तमम् ॥ १४
अपुत्रो लभते पुत्रान्निर्धनो लभते धनम् । रोगाच्च मुच्यते रोगी कन्या प्राप्नोति सत्पतिम्॥ १५
आयुः कीर्तिं यशो मेधां बलं विद्यां धृतिं पशून् । नरः[9] संततिमाप्नोति रूपयौवनसंपदम् ॥ १६

१ क. गुटिवा° । ख. गुण्डिवा° । २ ख. दक्षिणाख्यां । ग. गुडिवाख्यां । ३ ख. ग. जगत्पतेः । ४ ख. यात्रा । ५ ख. गुण्डिवा । ६ क. °विधैरुपवासैः प्रजागरैः । ज° । ख. °विधैरुपचारैः प्र° । ७ क. भूपवरः । ८ ख. गुण्डिवायां । ९ ग. °रः सद्गति° ।

यान्यान्समीहते[1] भोगान्दृष्ट्वा तं पुरुषोत्तमम् । नरो वाऽप्यथवा नारी तांस्तान्प्राप्नोत्यसंशयम् ॥
यात्रां कृत्वा गुंडिवा[2]ख्यां विधिवत्सुसमाहितः । आषाढ[3]स्य सिते पक्षे नरो योषिदथापि वा १८
दृष्ट्वा कृष्णं च रामं च सुभद्रां च द्विजोत्तमाः । दशपञ्चाश्वमेधानां फलं प्राप्नोति चाधिकम् १९
सप्तावरान्सप्त परान्वंशानुद्धृत्य चाऽऽत्मनः । कामगेन विमानेन सर्वरत्नैरलंकृतः ॥ २०
गन्धर्वैरप्सरोभिश्च सेव्यमानो यथोत्तरैः । रूपवान्सुभगः शूरो नरो विष्णुपुरं व्रजेत् ॥ २१
तत्र भुक्त्वा वरान्भोगान्यावदाभूतसंप्लवम् । सर्वकामसमृद्धात्मा जरामरणवर्जितः ॥ २२
पुण्यक्षयादिहाऽऽगत्य चतुर्वेदी द्विजो भवेत् । वैष्णवं योगमा[4]स्थाय ततो मोक्षमवाप्नुयात् ॥ २३

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे गुडिवायात्रामाहात्म्यनिरूपणं नाम षट्षष्टितमोऽध्यायः ॥ ६६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४३३३

अथ सप्तषष्टितमोऽध्यायः ।

मुनय ऊचुः—

एकैकस्यास्तु यात्रायाः फलं ब्रूहि पृथ[5]क्पृथक् । यत्प्राप्नोति नरः कृत्वा नारी[6] वा तत्र सं[7]यता ॥

ब्रह्मोवाच—

प्रतियात्राफलं विप्राः शृणुध्वं गदतो मम । यत्प्राप्नोति नरः कृत्वा तस्मिन्क्षेत्रे सुसंयतः ॥ २
[8]गुंडिवायां तथोत्थाने फाल्गुन्यां विषुवे तथा । यात्रां कृत्वा विधानेन दृष्ट्वा कृष्णं प्रणम्य च ३
संकर्षणं सुभद्रां च लभेत्सर्वत्र वै फलम् । नरो गच्छेद्विष्णुलोके यावदिन्द्राश्चतुर्दश ॥ ४
यावद्यात्रां ज्येष्ठमासे करोति विधिवन्नरः । तावत्कल्पं विष्णुलोके सुखं भुङ्क्ते न संशयः ॥ ५
तस्मिन्क्षेत्रवरे पुण्ये रम्ये श्रीपुरुषोत्तमे । भुक्तिमुक्तिप्रदे नृणां सर्वसत्त्वसुखावहे ॥ ६
ज्येष्ठे यात्रां(त्रा) नरः कृत्वा नारी वा संयतेन्द्रियः । यथोक्तेन विधानेन द[9]श द्वे च समाहितः ७
प्रतिष्ठां कुरुते यस्तु शाठ्यदम्भविवर्जितः । स भुक्त्वा विविधान्भोगान्मोक्षं चान्ते लभेद्ध्रुवम् ८

मुनय ऊचुः—

श्रोतुमिच्छामहे देव प्रतिष्ठां वदतस्तव । विधानं चार्चनं दानं फलं तत्र ज[10]गत्पतेः ॥ ९

ब्रह्मोवाच—

शृणुध्वं मुनिशार्दूलाः प्रतिष्ठां विधिचोदिताम् । यां कृत्वा तु नरो भक्त्या नारी वा लभते फलम्
यात्रा द्वादश संपूर्णा यदा स्यात्तु(स्युस्तु) द्विजोत्तमाः । तदा कुर्वीत विधिवत्प्रतिष्ठां पापनाशिनीम्
ज्येष्ठे मासि सिते पक्षे त्वेकादश्यां समाहितः । गत्वा जलाशयं पुण्यमाचम्य प्रयतः शुचिः ॥१२
आवाह्य सर्वतीर्थानि ध्यात्वा नारायणं तथा । ततः स्नानं प्रकुर्वीत विधिवत्सुसमाहितः ॥ १३
यस्य यो विधिरुद्दिष्ट ऋषिभिः स्नानकर्मणि । तेनैव तु विधानेन स्नानं तस्य विधीयते ॥ १४
स्नात्वा सम्यग्विधानेन ततो देवानृषीन्पितॄन् । संतर्पयेत्तथाऽन्यांश्च नामगोत्रविधानवित् ॥ १५
उत्तीर्य वाससी धौते निर्मले परिधाय वै । उपस्पृश्य विधानेन भास्कराभिमुखस्ततः ॥ १६

---

१ क. °ते कामान्द° । २ ख. गुण्डिवा° । ३ ख. °ढस्यासि° । ४ क. ख. °मासाद्य त° । ५ ख. °थग्विभो । य° । ६ ख. °र्गाभिस्तत्र सं° । ७ क. ख. संयुतः । ८ ख. गुण्डिवा° । ९ ख. दशाब्दं च । १० ग. जगत्पते ।

गायत्रीं पावनीं देवीं मनसा वेदमातरम् । सर्वपापहरां पुण्यां जपेदष्टोत्तरं शतम् ॥ १७
पुण्यांश्च सौरमन्त्रांश्च श्रद्धया सुसमाहितः । त्रिः प्रदक्षिणमावृत्य भास्करं प्रणमेत्ततः ॥ १८
वेदोक्तं त्रिषु वर्णेषु स्नानं[1] जाप्यमुदाहृतम् । स्त्रीशूद्रयोः स्नानजाप्यं वेदोक्तविधिवर्जितम् ॥१९
ततो गच्छेद्गृहं मौनी पूजयेत्पुरुषोत्तमम् । प्रक्षाल्य हस्तौ पादौ च उपस्पृश्य यथाविधि ॥ २०
घृतेन स्नापयेद्देवं क्षीरेण तदनन्तरम् । मधुगन्धोदकेनैव तीर्थचन्दनवारिणा[2] ॥ २१
ततो वस्त्रयुगं श्रेष्ठं भक्त्या तं परिधापयेत् । चन्दनागरुकर्पूरैः कुङ्कुमेन विलेपयेत् ॥ २२
पूजयेत्परया भक्त्या [3]पद्मैश्च पुरुषोत्तमम् । अन्यैश्च वै[4]ष्णवैः पुष्पैरर्चयेन्मल्लिकादिभिः ॥ २३
संपूज्यैवं जगन्नाथं भुक्तिमुक्तिप्रदं हरिम् । धूपं चागुरुसंयुक्तं[5] दहेद्देवस्य चाग्रतः ॥ २४
गुग्गुलं च[6] मुनिश्रेष्ठा दहेद्गन्धसमन्वितम् । दीपं प्रज्वालयेद्भक्त्या यथाशक्त्या(क्ति) घृतेन वै ॥
अन्यांश्च दीपकान्दद्याद्द्वादशैव समाहितः । घृतेन च मुनिश्रेष्ठास्तिलतैलेन वा पुनः ॥ २६
नैवेद्ये पायसापूपशष्कुलीवटकं तथा । मोदकं फाणितं वाऽल्पं फलानि च निवेदयेत् ॥ २७
एवं पञ्चोपचारेण संपूज्य पुरुषोत्तमम्[7] । नमः पुरुषोत्तमायेति जपेदष्टोत्तरं शतम् ॥ २८
ततः प्रसादयेद्देवं भक्त्या तं पुरुषोत्तमम् । नमस्ते सर्वलोकेश भक्तानामभयप्रद ॥ २९
संसारसागरे मग्नं त्राहि मां पुरुषोत्तम । यास्ते मया कृता यात्रा द्वादशैव जगत्पते ॥ ३०
प्रसादात्तव गोविन्द संपूर्णास्ता भवन्तु मे । एवं प्रसाद्य तं देवं दण्डवत्प्रणिपत्य च ॥ ३१
ततोऽर्चयेद्गुरुं भक्त्या पुष्पवस्त्रानुलेपनैः[8] । नानयोरन्तरं यस्माद्विद्यते मुनिसत्तमाः ॥ ३२
देवस्योपरि कुर्वीत श्रद्धया सुसमाहितः । नानापुष्पैर्मुनिश्रेष्ठा विचित्रं पुष्पमण्डपम्[9] ॥ ३३
कृत्वाऽवधारणं पश्चाज्जागरं कारयेन्निशि । कथां च वासुदेवस्य गीतिकां चापि कारयेत् ॥ ३४
ध्या[10]यन्पठन्स्तुवन्देवं[11] प्रणयेद्रजनीं बुधः । ततः प्रभाते विमले द्वादश्यां द्वादशैव तु ॥ ३५
निमन्त्रये[12]द्व्रतस्नातान्ब्राह्मणान्वेदपारगान् । इतिहासपुराणज्ञाञ्श्रोत्रियान्संयतेन्द्रियान् ॥ ३६
स्नात्वा सम्यग्विधानेन धौतवासा जितेन्द्रियः । स्नापयेत्पूर्ववत्तत्र पूजयेत्पुरुषोत्तमम् ॥ ३७
गन्धैः पुष्पैरुपहारैर्नैवेद्यैर्दीपकैस्तथा । उपचारैर्बहुविधैः प्रणिपातैः प्रदक्षिणैः ॥ ३८
जाप्यैः स्तुतिनमस्कारैर्गीतवाद्यैर्मनोहरैः । संपूज्यैवं जगन्नाथं ब्राह्मणान्पूजयेत्ततः ॥ ३९
द्वादशैव तु गास्तेभ्यो दत्त्वा कनकमेव च । छत्रोपानद्युगं चैव श्रद्धाभ[13]क्तिसमन्वितः ॥ ४०
भक्त्या तु सधनं तेभ्यो दद्याद्वस्त्रादिकं द्विजाः । सद्भावेन तु गोवि[14]न्दस्तोष्यते पूजितो यतः ४१
आचार्याय ततो द[15]द्याद्गोवस्त्रं कनकं तथा । छत्रोपानद्युगं[16] चान्यत्कांस्यपात्रं च भक्तितः ॥४२
ततस्तान्भोजयेद्विप्रान्भोज्यं पायसपूर्वकम् । पक्वान्नं भक्ष्यभोज्यं च गुडसर्पिःसमन्वितम् ॥ ४३
ततस्तानन्नतृप्तांश्च ब्राह्मणान्स्वस्थमानसान् । द्वादशैवोदकुम्भांश्च द[17]द्यात्तेभ्यः समोदकान् ॥ ४४
दक्षिणां च यथाशक्त्या(क्ति) दद्यात्तेभ्यो विमत्सरः।कुम्भं च दक्षिणां चैव आचार्याय निवेदयेत्
एवं संपूज्य तान्विप्रान्गुरुं ज्ञानप्रदायकम् । पूजयेत्परया भक्त्या विष्णुतुल्यं द्विजोत्तमाः ॥ ४६
सुवर्णवस्त्रगोधान्यैर्द्रव्यैश्चान्यैर्वरैर्बुधः । संपूज्य तं नमस्कृत्य इमं मन्त्रमुदीरयेत् ॥ ४७

---

१ ग. °नं जप्य° । २ ख. °णा । नव्यव° । ३ क. मन्त्रैश्च । ख. गन्धैश्च । ४ क. विविधैः । ५ क. °क्तं देवदेव° । ६ ख. वा । ७ ग. °म् । ॐ न° । ८ ख. °नैः । स्नानसंध्योत्तरं पश्चाच्छोभनं मु° । ९ ग. °ण्डलम् । १० क. °यन्गायन्स्तु° । ११ क. °वं गमये° । १२ ख. °येत्कृतस्नानान्ब्रा° । १३ ख. °क्तिपुरःसरः । भ° । १४ ख. °न्दस्तुष्य° । १५ क. ख. °द्यात्सुव° । १६ क. ख. °गं धान्यं कांस्य° । १७ ख. °द्याद्भक्त्या स° ।

सर्वव्यापी जगन्नाथः शङ्खचक्रगदाधरः । अनादिनिधनो देवः प्रीयतां पुरुषोत्तमः ॥ ४८
इत्युच्चार्य ततो विप्रांस्त्रिः कृत्वा च प्रदक्षिणाम् । प्रणम्य शिरसा भक्त्या आचार्यं तु विसर्जयेत्
ततस्तान्ब्राह्मणान्भक्त्या चाऽऽसीमान्तमनुव्रजेत् । अनुव्रज्य तु तान्सर्वान्नमस्कृत्य निवर्तयेत् ५०
बान्धवैः स्वजनैर्युक्तस्ततो भुञ्जीत वाग्यतः । अन्यैश्चोपासकैर्दीनैर्भिक्षुकैश्चान्नकाङ्क्षिभिः ॥ ५१
एवं कृत्वा नरः सम्यङ्नारी वा लभते फलम् । अश्वमेधसहस्राणां राजसूयशतस्य च ॥ ५२
अतीतं शतमादाय पुरुषाणां नरोत्तमाः । भविष्यं च शतं विप्राः स्वर्गत्या दिव्यरूपधृक् ॥ ५३
सर्वलक्षणसंपन्नः सर्वालंकारभूषितः । सर्वकामसमृद्धात्मा देववद्विगतज्वरः ॥ ५४
रूपयौवनसंपन्नो गुणैः सर्वैरलंकृतः । स्तूयमानोऽप्सरोभिश्च गन्धर्वैः समलंकृतः ॥ ५५
विमानेनार्कवर्णेन कामगेन स्थिरेण च । पताकाध्वजयुक्तेन सर्वरत्नैरलंकृतः ॥ ५६
उद्योतयन्दिशः सर्वा आकाशे विगतक्लमः । युवा महाबलो धीमान्विष्णुलोकं स गच्छति ॥५७
तत्र कल्पशतं यावद्भुङ्क्ते भोगान्यथेप्सितान् । सिद्धाप्सरोभिर्गन्धर्वैः सुरविद्याधरोरगैः ॥ ५८
स्तूयमानो मुनिवरैस्तिष्ठते विगतज्वरः । यथा देवो जगन्नाथः शङ्खचक्रगदाधरः ॥ ५९
तथाऽसौ मुदितो विप्राः कृत्वा रूपं चतुर्भुजम् । भुक्त्वा तत्र वरान्भोगान्क्रीडां कृत्वा सुरैः सह
तदन्ते ब्रह्मसदनमायाति सर्वकामदम् । सिद्धविद्याधरैश्चापि शोभितं सुरकिंनरैः ॥ ६१
कालं नवतिकल्पं तु तत्र भुक्त्वा सुखं नरः । तस्मादायाति विप्रेन्द्राः सर्वकामफलप्रदम् ॥ ६२
रुद्रलोकं सुरगणैः सेवितं सुखमोक्षदम् । अनेकशतसाहस्रैर्विमानैः समलंकृतम् ॥ ६३
सिद्धविद्याधरैर्यक्षैर्भूषितं दैत्यदानवैः । अशीतिकल्पकालं तु तत्र भुक्त्वा सुखं नरः ॥ ६४
तदन्ते याति गोलोकं सर्वभोगसमन्वितम् । सुरसिद्धाप्सरोभिश्च शोभितं सुमनोहरम् ॥ ६५
तत्र सप्ततिकल्पांस्तु भुक्त्वा भोगमनुत्तमम् । दुर्लभं त्रिषु लोकेषु स्वस्थचित्तो यथाऽमरः ॥ ६६
तस्मादागच्छते लोकं प्राजापत्यमनुत्तमम् । गन्धर्वाप्सरसैः सिद्धैर्मुनिविद्याधरैर्वृतः ॥ ६७
षष्टिकल्पान्सुखं तत्र भुक्त्वा नानाविधं मुदा । तदन्ते शक्रभवनं नानाश्चर्यसमन्वितम् ॥ ६८
गन्धर्वैः किंनरैः सिद्धैः सुरविद्याधरोरगैः । गुह्यकाप्सरसैः साध्यैर्वृतैश्चान्यैः सुरोत्तमैः ॥ ६९
आगत्य तत्र पञ्चाशत्कल्पान्भुक्त्वा सुखं नरः । सुरलोकं ततो गत्वा विमानैः समलंकृतः ॥७०
चत्वारिंशत्तु कल्पांस्तु भुक्त्वा भोगान्सुदुर्लभान् । आगच्छते ततो लोकं नक्षत्राख्यं सुदुर्लभम्
ततो भोगान्वरान्भुङ्क्ते त्रिंशत्कल्पान्यथेप्सितान् । तस्मादागच्छते लोकं शशाङ्कस्य द्विजोत्तमाः ॥
यत्रासौ तिष्ठते सोमः सर्वैर्देवैरलंकृतः । तत्र विंशतिकल्पांस्तु भुक्त्वा भोगं सुदुर्लभम् ॥ ७३
आदित्यस्य ततो लोकमायाति सुरपूजितम् । नानाश्चर्यमयं पुण्यं गन्धर्वाप्सरःसेवितम् ॥ ७४
तत्र भुक्त्वा शुभान्भोगान्दश कल्पान्द्विजोत्तमाः । तस्मादायाति भुवनं गन्धर्वाणां सुदुर्लभम् ॥
तत्र भोगान्समस्तांश्च कल्पमेकं यथासुखम् । भुक्त्वा चाऽऽयाति मेदिन्यां राजा भवति धार्मिकः
चक्रवर्ती महावीर्यो गुणैः सर्वैरलंकृतः । कृत्वा राज्यं स्वधर्मेण यज्ञैरिष्ट्वा सुदक्षिणैः ॥ ७७
तदन्ते योगिनां लोकं गत्वा मोक्षप्रदं शिवम् । तत्र भुक्त्वा वरान्भोगान्यावदाभूतसंप्लवम् ॥७८
तस्मादागच्छते चात्र जायते योगिनां कुले । प्रवरे वैष्णवे विप्रा दुर्लभे साधुसंमते ॥ ७९

---

१ ख. अन्नैश्च तर्पयेद्दीनानिभक्षुकांश्चान्नकाङ्क्षिणः । ए° । २ क. °वताराधने रतः । रू° । ३ ख. ग. °गान्क्रीडित्वा चाप्सरैः । ४ क. °त्तो जितेन्द्रियः । त° । ५ क. बुधाः । ख. बुधः । ६ ख. बुधः ।

चतुर्वेदी विप्रवरो यज्ञैरिष्ट्वाऽऽप्तदक्षिणैः । वैष्णवं योगमास्थाय ततो मोक्षमवाप्नुयात् ॥ ८०
एवं यात्राफलं विप्रा मया सम्यगुदाहृतम् । भुक्तिमुक्तिप्रदं नॄणां किमन्यच्छ्रोतुमिच्छथ ॥ ८१

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे द्वादशयात्राफलमाहात्म्यनिरूपणं नाम सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४४१४

अथाष्टषष्टितमोऽध्यायः ।

मुनय ऊचुः—

श्रोतुमिच्छामहे देव विष्णुलोकमनामयम् । लोकानन्दकरं कान्तं सर्वाश्चर्यसमन्वितम् ॥ १
प्रमाणं तस्य लोकस्य भोगं कान्तिं बलं प्रभो । कर्मणा केन गच्छन्ति तत्र धर्मपरायणाः ॥ २
दर्शनात्स्पर्शनाद्वाऽपि तीर्थस्नानादिनाऽपि वा । विस्तराद्ब्रूहि तत्त्वेन परं कौतूहलं हि नः ॥ ३

ब्रह्मोवाच—

शृणुध्वं मुनयः सर्वे यत्परं परमं पदम् । भक्तानामीहितं धन्यं पुण्यं संसारनाशनम् ॥ ४
प्रवरं सर्वलोकानां विष्ण्वाख्यं वदतो मम । सर्वाश्चर्यमयं पुण्यं स्थानं त्रैलोक्यपूजितम् ॥ ५
अशोकैः पारिजातैश्च मन्दारैश्चम्पकद्रुमैः । मालतीमल्लिकाकुन्दैर्बकुलैर्नागकेसरैः ॥ ६
पुन्नागैरतिमुक्तैश्च प्रियङ्गुतगरार्जुनैः । पाटलाचूतखदिरैः कर्णिकारवनोज्ज्वलैः ॥ ७
नारङ्गैः पनसैर्लोध्रैर्निम्बदाडिमसर्जकैः । द्राक्षालकुचखर्जूरैर्मधुकेन्द्रफलैर्द्रुमैः ॥ ८
कपित्थैर्नारिकेरैश्च तालैः श्रीफलसंभवैः । कल्पवृक्षैरसंख्यैश्च वन्यैरन्यैः सुशोभनैः ॥ ९
सरलैश्चन्दनैर्नीपैर्देवदारुशुभाञ्जनैः । जातीलवङ्गकङ्कोलैः कर्पूरामोदवासिभिः ॥ १०
ताम्बूलपत्रनिचयैस्तथा पूगीफलद्रुमैः । अन्यैश्च विविधैर्वृक्षैः सर्वर्तुफलशोभितैः ॥ ११
पुष्पैर्नानाविधैश्चैव लतागुच्छसमुद्भवैः । नानाजलाशयैः पुण्यैर्नानापक्षिरुतैर्वरैः ॥ १२
दीर्घिकाशतसंघातैस्तोयपूर्णैर्मनोहरैः । कुमुदैः शतपत्रैश्च पुष्पैः कोकनदैर्वरैः ॥ १३
रक्तनीलोत्पलैः कान्तैः कह्लारैश्च सुगन्धिभिः । अन्यैश्च जलजैः पुष्पैर्नानावर्णैः सुशोभनैः ॥
हंसैःकारण्डवाकीर्णैश्चक्रवाकोपशोभितैः । कोयष्टिकैश्च दात्यूहैः कारण्डवरवाकुलैः ॥ १५
चातकैः प्रियपुत्रैश्च जीवंजीवकजातिभिः । अन्यैर्दिव्यैर्जलचरैर्विहारमधुरस्वनैः ॥ १६
एवं नानाविधैर्दिव्यैर्नानाश्चर्यसमन्वितैः । वृक्षैर्जलाशयैः पुण्यैर्भूषितं सुमनोहरैः ॥ १७
तत्र दिव्यैर्विमानैश्च नानारत्नविभूषितैः । कामगैः काञ्चनैः शुभ्रैर्दिव्यगन्धर्वनादितैः ॥ १८
तरुणादित्यसंकाशैरप्सरोभिरलंकृतैः । हेमशय्यासनयुतैर्नानाभोगसमन्वितैः ॥ १९
खेचरैः सपताकैश्च मुक्ताहारावलम्बिभिः । नानावर्णैरसंख्यातैर्जातरूपपरिच्छदैः ॥ २०
नानाकुसुमगन्धाढ्यैश्चन्दनागुरुभूषितैः । सुखप्रचारबहुलैर्नानावादित्रनिःस्वनैः ॥ २१
मनोमारुततुल्यैश्च किङ्किणीस्तबकाकुलैः । विहरन्ति पुरे तस्मिन्वैष्णवे लोकपूजिते ॥ २२
नानाङ्गनाभिः सततं गन्धर्वाप्सरसादिभिः । चन्द्राननाभिः कान्ताभिर्योषिद्भिः सुमनोहरैः ॥

१ क. °लोकं यथातथम् । लो° । २ ख. °नैः । पलाशचू । ३ ख. °धुकत्र्चुफ° । ४ ख. °ससारससंकी° । ५ ख. °मपुष्पसमायुक्तैर्ना° ।

पीनोन्नतकुचाग्राभिः सुमध्याभिः समन्ततः । श्यामावदातवर्णाभिर्मत्तमातङ्गगामिभिः * ॥ २४
परिवार्य नरश्रेष्ठं वीजयन्ति स्म ताः स्त्रियः । चामरै रुक्मदण्डैश्च नानारत्नविभूषितैः ॥ २५
गीतनृत्यैस्तथा वाद्यैर्मोदमानैर्मदालसैः । यक्षविद्याधरैः सिद्धैर्गन्धर्वैरप्सरोगणैः ॥ २६
सुरसंघैश्च ऋषिभिः शुशुभे भुवनोत्तमम् । तत्र प्राप्य महाभोगान्प्राप्नुवन्ति मनीषिणः ॥ २७
वटराजसमीपे तु दक्षिणस्योदधेस्तटे । दृष्टो यैर्भगवान्कृष्णः पुष्कराक्षो जगत्पतिः[1] ॥ २८
क्रीडन्त्यप्सरसैः सार्धं यावद्द्यौश्चन्द्रतारकम् । प्रतप्तहेमसंकाशा जरामरणवर्जिताः ॥ २९
सर्वदुःखविहीनाश्च तृष्णाग्लानिविवर्जिताः । चतुर्भुजा महावीर्या वनमालाविभूषिताः ॥ ३०
श्रीवत्सलाञ्छनैर्युक्ताः शङ्खचक्रगदाधराः । केचिन्नीलोत्पलश्यामाः केचित्काञ्चनसंनिभाः ॥ ३१
केचिन्मरकतप्रख्याः केचिद्वैदूर्यसंनिभाः । श्यामवर्णाः कुण्डलिनस्तथाऽन्ये वज्रसंनिभाः ॥ ३२
न तादृक्सर्वदेवानां भान्ति लोका द्विजोत्तमाः । यादृग्भाति हरेर्लोकः सर्वाश्चर्यसमन्वितः ॥ ३३
न तत्र पुनरावृत्तिर्गमनाज्जायते द्विजाः । प्रभावात्तस्य देवस्य यावदाभूतसंप्लवम् ॥ ३४
विचरन्ति पुरे दिव्ये रूपयौवनगर्विताः । कृष्णं रामं सुभद्रां च पश्यन्ति पुरुषोत्तमे ॥ ३५
प्रतप्तहेमसंकाशं तरुणादित्यसंनिभम् । पुरमध्ये हरेर्भाति मन्दिरं रत्नभूषितम् ॥ ३६
अनेकशतसाहस्रैः पताकैः समलंकृतम् । योजनायुतविस्तीर्णं हेमप्राकारवेष्टितम् ॥ ३७
नानावर्णैर्ध्वजैश्चित्रैः कल्पितैः सुमनोहरैः । विभाति शारदो यद्वन्नक्षत्रैः सह चन्द्रमाः ॥ ३८
चतुर्द्वारं सुविस्तीर्णं कञ्चुकिभिः सुरक्षितम् । पुरसप्तकसंयुक्तं महोत्सेकं मनोहरम् ॥ ३९
प्रथमं काञ्चनं तत्र द्वितीयं मरकतैर्युतम् । इन्द्रनीलं तृतीयं तु महानीलं ततः परम् ॥ ४०
पुरं तु पञ्चमं दीप्तं पद्मरागमयं पुरम् । षष्ठं वज्रमयं विप्रा वैदूर्यं सप्तमं पुरम् ॥ ४१
नानारत्नमयैर्हेमप्रवालाङ्कुरभूषितैः । स्तम्भैरद्भुतसंकाशैर्भाति तद्भवनं महत् ॥ ४२
दृश्यन्ते तत्र सिद्धाश्च भासयन्ति दिशो दश । पौर्णमास्यां सनक्षत्रो यथा भाति निशाकरः ॥
आरूढस्तत्र भगवान्सलक्ष्मीको जनार्दनः । पीताम्बरधरः श्यामः श्रीवत्सलक्ष्मसंयुतः ॥ ४४
ज्वलत्सुदर्शनं चक्रं घोरं सर्वास्त्रनायकम् । दधार दक्षिणे हस्ते सर्वतेजोमयं हरिः ॥ ४५
कुन्देन्दुरजतप्रख्यं हारगोक्षीरसंनिभम् । आदाय तं मुनिश्रेष्ठाः सव्यहस्तेन केशवः[2] ॥ ४६
यस्य शब्देन सकलं [3]संक्षोभं जायते जगत् । विश्रुतं पाञ्चजन्येति सहस्रावर्तभूषितम् ॥ ४७
दुष्कृतान्तकरीं रौद्रां दैत्यदानवनाशिनीम् । ज्वलद्वह्निशिखाकारां दुःसहां त्रिदशैरपि ॥ ४८
कौमोदकीं गदां चासौ धृतवान्दक्षिणे करे । वामे विस्फुरति ह्यस्य शार्ङ्गं सूर्यसमप्रभम् ॥ ४९
शरैरादित्यसंकाशैर्ज्वालामालाकुलैर्वरैः । योऽसौ संहरते देवस्त्रैलोक्यं सचराचरम् ॥ ५०
सर्वानन्दकरः श्रीमान्सर्वशास्त्रविशारदः । सर्वलोकगुरुर्देवः सर्वैर्देवैर्नमस्कृतः ॥ ५१
सहस्रमूर्धा देवेशः सहस्रचरणेक्षणः । सहस्राख्यः सहस्राङ्गः सहस्रभुजवान्प्रभुः ॥ ५२
सिंहासनगतो देवः पद्मपत्रायतेक्षणः । विद्युद्विस्पष्टसंकाशो जगन्नाथो जगद्गुरुः ॥ ५३
परीतः सुरसिद्धैश्च गन्धर्वाप्सरसां गणैः । यक्षविद्याधरैर्नागैर्मुनिसिद्धैः सचारणैः ॥ ५४
सुपर्णैर्दानवैर्दैत्यै राक्षसैर्गुह्यकिंनरैः । अन्यैर्देवगणैर्दिव्यैः स्तूयमानो विराजते ॥ ५५

---

* ङीबभाव आर्षः ।

---

१ क. पुरुषो जगतां पतिः । २ क. ख. °न्सर्वलोकज° । ३ ख. ग. विक्षोभं ।

तत्रस्था सततं कीर्तिः प्रज्ञा मेधा सरस्वती। बुद्धिर्मतिस्तथा क्षान्तिः सिद्धिमूर्तिस्तथा द्युतिः॥५६
गायत्री चैव सावित्री मङ्गला सर्वमङ्गला। प्रभा मतिस्तथा कान्तिस्तत्र नारायणी स्थिता ॥५७
श्रद्धा च कौशिकी देवी विद्युत्सौदामिनी तथा। निद्रा रात्रिस्तथा माया तथाऽन्यामरयोषितः॥
वासुदेवस्य सर्वास्ता भवने संप्रतिष्ठिताः। अथ किं बहुनोक्तेन सर्वं तत्र प्रतिष्ठितम् ॥ ५९
घृताची मेनका रम्भा सहजन्या तिलोत्तमा। उर्वशी चैव निम्लोचा तथाऽन्या वामना परा॥६०
मन्दोदरी च सुभगा विश्वाची विपुलानना। भद्राङ्गी चित्रसेना च प्रम्लोचा सुमनोहरा॥ ६१
मुनिसंमोहनी रामा चन्द्रमध्या शुभानना। सुकेशी नीलकेशा च तथा मन्मथदीपिनी॥ ६२
अलम्बुषा मिश्रकेशी तथाऽन्या मुञ्जिकस्थला। क्रतुस्थला वराङ्गी च पूर्वचित्तिस्तथा परा॥६३
परावती महारूपा शशिलेखा शुभानना। हंसलीलानुगामिन्यो मत्तवारणगामिनी॥ ६४
बिम्बोष्ठी नवगर्भा च विख्याताः सुरयोषितः। एताश्चान्या अप्सरसो रूपयौवनगर्विताः ॥६५
सुमध्याश्चारुवदनाः सर्वालंकारभूषिताः। गीतमाधुर्यसंयुक्ताः सर्वलक्षणसंयुताः॥ ६६
गीतवाद्ये च कुशलाः सुरगन्धर्वयोषितः। नृत्यन्त्यनुदिनं तत्र यत्रासौ पुरुषोत्तमः॥ ६७
न तत्र रोगो नो ग्लानिर्न मृत्युर्न हिमातपौ। न क्षुत्पिपासा न जरा न वैरूप्यं न चासुखम्॥६८
परमानन्दजननं सर्वकामफलप्रदम्। विष्णुलोकात्परं लोकं नात्र पश्यामि भो द्विजाः॥ ६९
ये लोकाः स्वर्गलोके तु श्रूयन्ते पुण्यकर्मणाम्। विष्णुलोकस्य ते विप्राः कलां नार्हन्ति षोडशीम्॥७०
एवं हरेः पुरस्थानं सर्वभोगगुणान्वितम्। सर्वसौख्यकरं पुण्यं सर्वाश्चर्यमयं द्विजाः॥ ७१
न तत्र नास्तिका यान्ति पुरुषा विषयात्मकाः। न कृतघ्ना न पिशुना नो स्तेना नाजितेन्द्रियाः॥ ७२
येऽर्चयन्ति सदा भक्त्या वासुदेवं जगद्गुरुम्। ते तत्र वैष्णवा यान्ति विष्णुलोकं न संशयः ७३
दक्षिणस्योदधेस्तीरे क्षेत्रे परमदुर्लभे। दृष्ट्वा कृष्णं च रामं च सुभद्रां च द्विजोत्तमाः॥ ७४
कल्पवृक्षसमीपे तु ये त्यजन्ति कलेवरम्। ते तत्र मनुजा यान्ति मृता ये पुरुषोत्तमे॥ ७५
वटसागरयोर्मध्ये यः स्मरेत्पुरुषोत्तमम्। तेऽपि तत्र नरा यान्ति ये मृताः पुरुषोत्तमे॥ ७६
तेऽपि तत्र परं स्थानं यान्ति नास्त्यत्र संशयः। एवं मया मुनिश्रेष्ठा विष्णुलोकः सनातनः॥
सर्वानन्दकरः प्रोक्तो भुक्तिमुक्तिफलप्रदः॥ ७७

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे विष्णुलोकानुकीर्तनं नामाष्टषष्टितमोऽध्यायः॥ ६८॥

आदितः श्लोकानां समष्ट्यङ्काः—४४९०

अथोनसप्ततितमोऽध्यायः।

मुनय ऊचुः—

बह्वाश्चर्यस्त्वया प्रोक्तो विष्णुलोको जगत्पते। नित्यानन्दकरः श्रीमान्भुक्तिमुक्तिफलप्रदः॥ १

---

१ ख. संततिः। २ क. ख. °द्धिर्मूर्ति°। ३ क. भुवने। ४ क. ख. °शी सुरसेना च त°। ५ क. ख. वासना। ६ क. महोद°। ७ क. जम्बुकस्तना। ८ क. जन्तुस्थला। ९ क. पञ्चजन्या। १० क. सलिलेशा। ११ क. जितेन्द्रियाः। १२ क. जगत्पतेः।

क्षेत्रं च दुर्लभं लोके कीर्तितं पुरुषोत्तमम् । त्यक्त्वा यत्र नरो देहं याति सालोक्यतां हरेः ॥ २
सम्यक्क्षेत्रस्य माहात्म्यं त्वया[1] सम्यक्प्रकीर्तितम् । यत्र स्वदेहसंत्यागाद्विष्णुलोकं व्रजेन्नरः ॥ ३
अहो मोक्षस्य मार्गो[2]ऽयं देहत्यागस्त्वयोदितः । नराणामुपकाराय पुरुषाख्ये न संशयः ॥ ४
अनायासेन देवेश देहं त्यक्त्वा नरोत्तमाः । तस्मिन्क्षेत्रे प[3]रं विष्णोः पदं यान्ति निरामयम् ॥ ५
श्रुत्वा क्षेत्रस्य माहात्म्यं विस्मयो नो महानभूत् । प्रयागपुष्करादीनि क्षेत्राण्यायतनानि च ॥ ६
पृथिव्यां सर्वतीर्थानि सरितश्च सरांसि च । न तथा तानि सर्वाणि प्रशंससि सुरोत्तम ॥ ७
यथा प्रशंससि क्षेत्रं पुरुषाख्यं पुनः पुनः । ज्ञातोऽस्माभिरभिप्रायस्तवेदानीं पितामह ॥ ८
येन प्रशंससि क्षेत्रं मुक्तिदं पुरुषोत्तमम् । पुरुषाख्यसमं नूनं क्षेत्रं नास्ति महीतले ॥
तेन त्वं विबुधश्रेष्ठ प्रशंससि पुनः पुनः ॥ ९

ब्रह्मोवाच—

सत्यं सत्यं मुनिश्रेष्ठा भवद्भिः समुदाहृतम् । पुरुषाख्यसमं[4] क्षेत्रं ना[5]स्त्यत्र पृथिवीतले ॥ १०
सन्ति यानि तु तीर्थानि पुण्यान्यायतनानि च । तानि श्रीपुरुषाख्यस्य कलां नार्हन्ति षोडशीम्
यथा सर्वेश्वरो विष्णुः सर्वलो[6]कोत्तमोत्तमः । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ १२
आदित्यानां यथा विष्णुः श्रेष्ठत्वे समुदाहृतः । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ १३
नक्षत्राणां यथा सोमः सरसां सागरो यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ १४
वसूनां पावको यद्वद्रुद्राणां शंकरो यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ १५
वर्णानां ब्राह्मणो यद्वद्वैनतेयश्च पक्षिणाम् । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ १६
शिखरिणां यथा मेरुः पर्वतानां हिमालयः । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ १७
प्रमदानां यथा लक्ष्मीः सरितां जाह्नवी यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ १८
ऐरावतो गजेन्द्राणां महर्षीणां भृगुर्यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ १९
सेनानीनां यथा स्कन्दः सिद्धानां कपिलो यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् २०
उच्चैःश्रवा यथाऽश्वानां कवीनामुशना कविः । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ २१
मुनीनां च यथा व्यासः कुबेरो यक्षरक्षसाम् । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ २२
इन्द्रियाणां मनो यद्वद्भूतानामवनी यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ २३
अश्वत्थः सर्ववृक्षाणां पवनः प्लवतां यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ २४
भूषणानां तु सर्वेषां यथा चूडामणिर्द्विजाः । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ २५
गन्धर्वाणां चित्ररथः शस्त्राणां कुलिशो यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ २६
अकारः सर्ववर्णानां गायत्री छन्दसां यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ २७
सर्वाङ्गेभ्यो यथा श्रेष्ठमुत्तमाङ्गं द्विजोत्तमाः । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ २८
अरुन्धती यथा स्त्रीणां सतीनां श्रेष्ठतां गता । तथा समस्ततीर्थानां श्रेष्ठं तत्पुरुषोत्तमम् ॥ २९
यथा समस्तविद्यानां मोक्षविद्या परा स्मृता । तथा समस्ततीर्थानां श्रेष्ठं तत्पुरुषोत्तमम् ॥ ३०
मनुष्याणां यथा राजा धेनूनामपि कामधुक् । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ३१

---

१ ख. °या ब्रह्मन्प्रकी° । २ ग. अथ । ३ क. वरं । ४ ख. °मं नूनं क्षे° । ५ ख. नास्ति महीत° । ६ ख. °लोकेषु चोत्त° ।

सुवर्णं सर्वरत्नानां सर्पाणां वासुकिर्यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ३२
प्रह्लादः सर्वदैत्यानां रामः शस्त्रभृतां यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ३३
झषाणां मकरो यद्वन्मृगाणां मृगराड्यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ३४
समुद्राणां यथा श्रेष्ठः क्षीरोदः सरितां पतिः । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ३५
वरुणो यादसां यद्वद्यमः संयमिनां यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ३६
देवर्षीणां यथा श्रेष्ठो नारदो मुनिसत्तमाः । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ३७
धातूनां काञ्चनं यद्वत्पवित्राणां च दक्षिणा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ३८
प्रजापतिर्यथा दक्ष ऋषीणां कश्यपो यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ३९
ग्रहाणां भास्करो यद्वन्मन्त्राणां प्रणवो यथा । तथा समस्ततीर्थानां वरिष्ठं पुरुषोत्तमम् ॥ ४०
अश्वमेधस्तु यज्ञानां यथा श्रेष्ठः प्रकीर्तितः । तथा समस्ततीर्थानां क्षेत्रं च तद्द्विजोत्तमाः ॥ ४१
ओषधीनां यथा धान्यं तृणेषु तृणराड्यथा । तथा समस्ततीर्थानामुत्तमं पुरुषोत्तमम् ॥ ४२
यथा समस्ततीर्थानां धर्मः संसारतारकः । तथा समस्ततीर्थानां श्रेष्ठं तत्पुरुषोत्तमम् ॥ ४३

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे पुरुषोत्तममाहात्म्यनिरूपणं नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४५४८

अथ सप्ततितमोऽध्यायः ।

[*ब्रह्मोवाच—
सर्वेषां चैव तीर्थानां क्षेत्राणां च द्विजोत्तमाः । जपहोमव्रतानां च तपोदानफलानि च ॥ १
न तत्पश्यामि भो विप्रा यत्तेन सदृशं भुवि । किं चात्र बहुनोक्तेन भाषितेन पुनः पुनः ॥ २
सत्यं सत्यं पुनः सत्यं क्षेत्रं तत्परमं महत् । पुरुषाख्यं सकृद्दृष्ट्वा सागराम्भःसमाप्लुतम् ॥ ३
ब्रह्मविद्यां सकृज्ज्ञात्वा गर्भवासो न विद्यते । हरेः संनिहिते स्थान उत्तमे पुरुषोत्तमे ॥ ४
संवत्सरमुपासीत मासमात्रमथापि वा । तेन जप्तं हुतं तेन तेन तप्तं तपो महत् ॥ ५
स याति परमं स्थानं यत्र योगेश्वरो हरिः । भुक्त्वा भोगान्विचित्रांश्च देवयोषित्समन्वितः ॥ ६
कल्पान्ते पुनरागत्य मर्त्यलोके नरोत्तमः । जायते योगिनां विप्रा ज्ञानज्ञेयोद्यतो गृहे ॥ ७
संप्राप्य वैष्णवं योगं हरेः स्वच्छन्दतां व्रजेत् । कल्पवृक्षस्य रामस्य कृष्णस्य भद्रया सह ॥ ८
मार्कण्डेयेन्द्रद्युम्नस्य माहात्म्यं माधवस्य च । स्वर्गद्वारस्य माहात्म्यं सागरस्य विधिः क्रमात् ॥ ९
मार्जनस्य यथाकाले भागीरथ्याः समागमम् । सर्वमेतन्मया ख्यातं यत्परं श्रोतुमिच्छथ ॥ १०
इन्द्रद्युम्नस्य माहात्म्यमेतच्च कथितं मया । सर्वाश्चर्यं समाख्यातं रहस्यं पुरुषोत्तमम् ॥
पुराणं परमं गुह्यं धन्यं संसारमोचनम्] ॥ ११

---

* धनुश्चिह्नान्तर्गताः श्लोकाः क. पुस्तके न सन्ति ।

---

१ ख. °न्वितान् । क° । २ ख. °यो यतो गृही । सं° ।

+[*मुनय ऊचुः—
नहि नस्तृप्तिरस्तीह शृण्वतां तीर्थविस्तरम् । पुनरेव परं गुह्यं वक्तुमर्हस्यशेषतः ॥
परं तीर्थस्य माहात्म्यं सर्वतीर्थोत्तमोत्तमम् ॥ १२

ब्रह्मोवाच—
इममेव पुरा प्रश्नं पृष्टोऽस्मि द्विजसत्तमाः । नारदेन प्रयत्नेन तदा तं प्रोक्तवानहम्] ॥ १३

नारद उवाच—
तपसो यज्ञदानानां [1]तीर्थानां पावनं स्मृतम् । सर्वं श्रुतं मया त्वत्तो जगद्योने [2]जगत्पते ॥ १४
कि[3]यन्ति सन्ति तीर्थानि[4] स्वर्गमर्त्यरसातले । सर्वेषामेव तीर्थानां सर्वदा किं विशिष्यते ॥ १५

ब्रह्मोवाच—
चतुर्विधानि तीर्थानि स्वर्गे मर्त्ये रसातले । दैवानि मुनिशार्दूल आसुराण्यारुषाणि च ॥ १६
मानुषाणि त्रिलोकेषु विख्यातानि सुरादिभिः । मानुषेभ्यश्च तीर्थेभ्य आर्षं तीर्थमनुत्तमम् ॥ १७
आर्षेभ्यश्चैव तीर्थेभ्य आसुरं बहुपुण्यदम् । आसुरेभ्यस्तथा पुण्यं दैवं तत्सार्वकामिकम् ॥ १८
ब्रह्मविष्णुशिवैश्चैव निर्मितं दैवमुच्यते । त्रिभ्यो यदेकं जायेत तस्मान्नातः परं विदुः ॥ १९
त्रयाणामपि लोकानां तीर्थं मेध्यमुदाहृतम् । तत्रापि जाम्बवं द्वीपं तीर्थं बहुगुणोदयम् ॥ २०
जाम्बवे भारतं वर्षं तीर्थं त्रैलोक्यविश्रुतम् । कर्मभूमिर्यतः पुत्र तस्मात्तीर्थं तदुच्यते ॥ २१
तत्रैव यानि तीर्थानि यान्युक्तानि मया तव । हिमवद्विन्ध्ययोर्मध्ये षण्नद्यो देवसंभवाः ॥ २२
तथैव देवजा ब्रह्मन्दक्षिणार्णवविन्ध्ययोः । एता द्वादश नद्यस्तु प्राधान्येन प्रकीर्तिताः ॥ २३
अभिसंपूजितं यस्माद्भारतं बहुपुण्यदम् । कर्मभूमिरतो देवैर्वर्षं तस्मात्प्रकीर्तितम् ॥ २४
आर्षाणि चैव तीर्थानि देवजानि क्वचित्क्वचित् । आसुरैरावृतान्यासंस्तद्देवाऽऽसुरमुच्यते ॥ २५
दैवेष्वेव प्रदेशेषु तपस्तप्त्वा महर्षयः । दैवप्रभावात्तपस आर्षाण्यपि च तान्यपि ॥ २६
आत्मनः श्रेयसे मुक्त्यै पूजायै भूतयेऽथवा । आत्मनः फलभूत्यर्थं यशसोऽवाप्तये पुनः ॥ २७
मानुषैः कारितान्याहुर्मानुषाणीति नारद । एवं चतुर्विधो भेदस्तीर्थानां मुनिसत्तम ॥ २८
भेदं न कश्चिज्जानाति श्रोतुं युक्तोऽसि नारद । बहवः पण्डितंमन्याः शृण्वन्ति कथयन्ति च ॥
सुकृती कोऽपि जानाति वक्तुं श्रोतुं निजैर्गुणैः ॥ २९

नारद उवाच—
तेषां स्वरूपं भेदं च श्रोतुमिच्छामि तत्त्वतः । यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ३०
ब्रह्मन्कृतयुगादौ तु उपायोऽन्यो न विद्यते । तीर्थसेवां विना स्वल्पायासेनाभीष्टदायिनीम् ॥ ३१
न त्वया सदृशो धातर्वक्ता ज्ञाताऽथवा क्वचित् । त्वं नाभिकमले विष्णोः संजातोऽखिलपूर्वजः ॥

+ ख. ग. पुस्तकयोः 'मुनय ऊचुः' इत्यादि गौतमीमाहात्म्यं न वर्तते ।

* धनुश्चिह्नान्तर्गतग्रन्थस्थाने घ. पुस्तके––'श्रीगणेशाय नमः । विद्याविनोदाय नमः । यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथाऽन्ये । विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ॥ १ ॥ श्रीगुरुं परमानन्दं वन्दे आनन्दविग्रहम् । यतः संनतिमात्रेण चिदानन्दायते तनुः ॥ २ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ३ ॥ श्रीब्रह्मपुराणम्' इति वर्तते ।

---

१ घ. तीर्थसेवनमुत्तमम् । इति श्रु° । २ घ. जगत्प्रभो । ३ घ. °यद्वेदानि ती° । ४ घ. °नि किंफलानि सुरेश्वर । स° ।

ब्रह्मोवाच—

गोदावरी भीमरथी तुङ्गभद्रा च वेणिका । तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्तिताः ॥ ३३
भागीरथी नर्मदा तु यमुना च सरस्वती । विशोका च वितस्ता च हिमवत्पर्वताश्रिताः ॥ ३४
एता नद्यः पुण्यतमा देवतीर्थान्युदाहृताः । गयः कोल्लासुरो[1] वृत्रस्त्रिपुरो ह्यन्धकस्तथा ॥ ३५
हयमूर्धा च लवणो नमुचिः शृङ्गकस्तथा । यमः पातालकेतुश्च मयः पुष्कर एव च ॥ ३६
एतैरावृततीर्थानि आसुराणि शुभानि च । प्रभासो भार्गवोऽगस्तिर्नरनारायणौ तथा ॥ ३७
वसिष्ठश्च भरद्वाजो गोतमः कश्यपो मनुः । इत्यादिमुनिजुष्टानि ऋषितीर्थानि नारद ॥ ३८
अम्बरीषो हरिश्चन्द्रो मांधाता मनुरेव च । कुरुः कनखलश्चैव भद्राश्वः[2] सगरस्तथा ॥ ३९
अश्वयूपो नाचिकेता वृषाकपिररिंदमः । इत्यादिमानुषैर्विप्र निर्मितानि शुभानि च ॥ ४०
यशसः फलभूत्यर्थं निर्मितानीह नारद । स्वतोद्भूतानि दैवानि यत्र क्वापि जगत्त्रये ॥
पुण्यतीर्थानि तान्याहुस्तीर्थभेदो मयोदितः ॥ ४१

इति श्रीमहापुराणे[3] स्वयंभ्वृषिसंवादे तीर्थमाहात्म्ये तीर्थभेदवर्णनं नाम सप्ततितमोऽध्यायः ॥७०॥

गौतमीमाहात्म्ये प्रथमोऽध्यायः ॥ १ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४५८९

अथैकसप्ततितमोऽध्यायः ।

नारद उवाच—

त्रिदैवत्यं तु यत्तीर्थं सर्वेभ्यो ह्युक्तमुत्तमम् । तस्य स्वरूपभेदं च विस्तरेण ब्रवीतु मे ॥ १

ब्रह्मोवाच—

तावदन्यानि तीर्थानि तावत्ताः पुण्यभूमयः । तावद्यज्ञादयो यावत्त्रिदैवत्यं न दृश्यते* ॥ २
गङ्गेयं सरितां श्रेष्ठा सर्वकामप्रदायिनी । त्रिदैवत्या मुनिश्रेष्ठ तदुत्पत्तिमतः शृणु[4] ॥ ३
वर्षाणामयुतात्पूर्वं देवकार्य उपस्थिते । तारको बलवानासीन्मद्वरादतिगर्वितः ॥ ४
देवानां परमैश्वर्यं हृतं तेन बलीयसा । ततस्ते शरणं जग्मुर्देवाः सेन्द्रपुरोगमाः ॥ ५
क्षीरोदशायिनं देवं जगतां प्रपितामहम् । कृताञ्जलिपुटा देवा विष्णुमूचुरनन्यगाः ॥ ६

देवा ऊचुः—

त्वं त्राता जगतां नाथ देवानां कीर्तिवर्धन । सर्वेश्वर जगद्योने[5] त्रयीमूर्ते नमोऽस्तु ते[6] ॥ ७
लोकस्रष्टाऽसुरान्हन्ता त्वमेव जगतां पतिः । स्थित्युत्पत्तिविनाशानां कारणं त्वं जगन्मय ॥ ८

त्राता न कोऽप्यस्ति जगत्त्रयेऽपि शरीरिणां सर्वविपद्गतानाम् ।
त्वया विना वारिजपत्रनेत्र तापत्रयाणां शरणं न चान्यत् ॥ ९

---

* एतदग्रे घ. पुस्तके–'व्रतोपवासकृच्छ्रेभ्यो गङ्गासेवा महाफला। कृच्छ्राङ्काः सर्वतीर्थेषु दृश्यन्ते तेषु तेषु हि । द्रव्यात्मा मातृजनकाया शुद्धिर्देहिनां मुने । त्रिदैवत्यं विहायेह कथं पापक्षयो भवेत् । स्मृता दृष्टाऽथवा स्पृष्टा या सर्वाकाङ्क्षितप्रदा' इत्यधिकः पाठः ।

---

१ घ. कोहलासु° । २ घ. भरतः । ३ घ. °णे गौतमीमाहात्म्ये । ४ घ. °णु । इन्द्राणा° । ५ घ. °ने त्रिमूर्ते तु न° । ६ क. °ते । अपां स्र° ।

पिता च माता जगतोऽखिलस्य त्वमेव सेवासुलभोऽसि विष्णो ।
प्रसीद पाहीश महाभयेभ्योऽस्मदार्तिहन्ता वद कस्त्वदन्यः ॥ १०
आदिकर्ता वराहस्त्वं मत्स्यः कूर्मस्तथैव च । इत्यादिरूपभेदैर्नो रक्षसे भय आगते ॥ ११
हृतस्वाम्यान्सुरगणान्हृतदारान्गतापदः । कस्मान्न रक्षसे देव अनन्यशरणान्हरे ॥ १२

ब्रह्मोवाच—

ततः प्रोवाच भगवाञ्शेषशायी जगत्पतिः । कस्माच्च भयमापन्नं तद्ब्रुवन्तु गतज्वराः ॥
ततः श्रियः पतिं प्राहुस्तं तारकवधं प्रति ॥ १३

देवा ऊचुः—

तारकाद्भयमापन्नं भीषणं रोमहर्षणम् । न युद्धैस्तपसा शापैर्हन्तुं नैव क्षमा वयम् ॥ १४
अर्वाग्दशाहाद्यो बालस्तस्मान्मृत्युमवाप्स्यति । तस्मादेव न चान्येभ्यस्तत्र नीतिर्विधीयताम् ॥ १५

ब्रह्मोवाच—

पुनर्नारायणः प्राह नाहं बलोत्कटः सुराः । न मत्तो मदपत्याच्च न देवेभ्यो वधो भवेत् ॥ १६
ईश्वराद्यदि जायेत अपत्यं बहुशक्तिमत् । तस्माद्वधमवाप्नोति तारको लोकदारुणः[2] ॥ १७
तद्गच्छामः सुराः सर्वे यतितुमृषिभिः सह । भार्यार्थे प्रथमो यत्नः कर्तव्यः प्रभविष्णुभिः ॥ १८
तथेत्युक्त्वा सुरगणा जग्मुस्ते च नगोत्तमम् । हिमवन्तं रत्नमयं मेनां च हिमवत्प्रियाम् ॥ १९
इदमूचुः सर्व एव सभार्यं तुहिनं गिरिम् ॥ २०

देवा ऊचुः—

दाक्षायणी लोकमाता या शक्तिः संस्थिता गिरौ[3] । बुद्धिः प्रज्ञा धृतिर्मेधा लज्जा पुष्टिः सरस्वती
एवं त्वनेकधा लोके या स्थिता लोकपावनी । देवानां कार्यसिद्ध्यर्थं युवयोर्गर्भमाविशत्[4] ॥ २२
समुत्पन्ना जगन्माता[5] शंभोः पत्नी भविष्यति । अस्माकं भवतां चापि पालनी च भविष्यति २३

ब्रह्मोवाच—

हिमवानपि तद्वाक्यं सुराणामभिनन्द्य च । मेना चापि महोत्साहा अस्त्वित्येवं वचोऽब्रवीत् ॥ २४
तदोत्पन्ना जगद्धात्री[6] गौरी हिमवतो गृहे । शिवध्यानरता नित्यं तन्निष्ठा तन्मनोगता[7] ॥ २५
तां वै प्रोचुः सुरगणा ईशार्थे तप आविश । तथा हिमवतः पृष्ठे गौरी तेपे तपो महत् ॥ २६
पुनः संमन्त्रयामासुरीशो ध्यायति तां शिवाम् । आत्मानं वा तथाऽन्यद्वा न जानीमः कथं भवः
मेनकायाः सुतायां तु चित्तं दध्यात्सुरेश्वरः । तत्र नीतिर्विधातव्या ततः श्रेष्ठ्यमवाप्स्यथ ॥
ततः प्राह महाबुद्धिर्वाचस्पतिरुदारधीः ॥ २८

बृहस्पतिरुवाच—

यस्त्वयं मदनो धीमान्कन्दर्पः पुष्पचापधृक् । स विध्यतु शिवं शान्तं बाणैः पुष्पमयैः शुभैः २९
तेन विद्धस्त्रिनेत्रोऽपि ईशायां बुद्धिमादधेत् । परिणेष्यत्यसौ नूनं तदा तां गिरिजां हरः ॥ ३०
जयिनः पञ्चबाणस्य न बाणाः क्वापि कुण्ठिताः । तथोढायां जगद्धात्र्यां शंभोः पुत्रो भविष्यति
जातः पुत्रस्त्रिनेत्रस्य तारकं स हनिष्यति । वसन्तं च सहायार्थं शोभिष्ठं कुसुमाकरम् ॥ ३२
आह्लादनं च मनसा कामायैनं प्रयच्छथ ॥ ३३

---

१ क. °क्षयो भयमातान । हृत° । २ घ. लोकदारकः । ३ घ. शिवे । ४ क. °विशेत् । ५ घ. °त् । सा तुभ्य° ।
६ घ. जगद्धात्री । ७ घ. तत्परायणा ।

ब्रह्मोवाच—

तथेत्युक्त्वा सुरगणा मदनं कुसुमाकरम् । प्रेषयामासुरव्यग्राः शिवान्तिकमरिंदमाः ॥ ३४
स जगाम त्वरा कामो धृतचापो समाधवः । रत्या च सहितः कामः कर्तुं कर्म सुदुष्करम् ॥ ३५
गृहीत्वा सशरं चापमिदं तस्य मनोऽभवत् । मया वेध्यस्त्ववेध्यो वै शंभुर्लोकगुरुः प्रभुः ॥ ३६
त्रैलोक्यजयिनो बाणाः शंभौ मे किं दृढा न वा । तेनासौ चाग्निनेत्रेण भस्मशेषस्तदा कृतः ३७
तदेव कर्म सुदृढमीक्षितुं सुरसत्तमाः । आजग्मुस्तत्र यद्वृत्तं शृणु विस्मयकारकम् ॥ ३८
शंभुं दृष्ट्वा सुरगणा यावत्पश्यन्ति मन्मथम् । तावच्च भस्मसाद्भूतं कामं दृष्ट्वा भयातुराः ॥
तुष्टुवुस्त्रिदशेशानं कृताञ्जलिपुटाः सुराः ॥ ३९

देवा ऊचुः—

तारकाद्भयमापन्नं कुरु पत्नीं गिरेः सुताम् ॥ ४०

ब्रह्मोवाच—

विद्धचित्तो हरोऽप्याशु मेने वाक्यं सुरोदितम्* । अरुन्धतीं वसिष्ठं च मां तु चक्रधरं तथा ४१
प्रेषयामासुरमरा विवाहाय परस्परम् । संबन्धोऽपि तथाऽप्यासीद्धिमवल्लोकनाथयोः ॥ ४२

इति श्रीमहापुराण आदिब्राह्मे स्वयंभ्वृषिसंवादे गङ्गोत्पत्तौ शंभुविवाहसंभवो नामैकसप्ततितमोऽध्यायः ॥ ७१ ॥

गौतमीमाहात्म्ये द्वितीयोऽध्यायः ॥ २ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४६३१

अथ द्विसप्ततितमोऽध्यायः ।

ब्रह्मोवाच—

हिमवत्पर्वते श्रेष्ठे नानारत्नविचित्रिते । नानावृक्षलताकीर्णे नानाद्विजनिषेविते ॥ १
नदीनदसरःकूपतडागादिभिरावृते । देवगन्धर्वयक्षादिसिद्धचारणसेविते ॥ २
शुभमारुतसंपन्ने हर्षोत्कर्षैककारणे । मेरुमन्दरकैलासमैनाकादिनगैर्वृते ॥ ३
वसिष्ठागस्त्यपौलस्त्यलोमशादिभिरावृते । महोत्सवे वर्तमाने विवाहः समजायत ॥ ४
तत्र वेदी रत्नमयी शोभिता स्वर्णभूषिता+ । वज्रमाणिक्यवैदूर्यतन्मयस्तम्भशोभिता ॥ ५
जयालक्ष्मीशुभाक्षान्तिकीर्तिपुष्ट्यादिसंवृता । मेरुमन्दरकैलासरैवतैः परिशोभितैः ॥ ६
पूजितो लोकनाथेन विष्णुना प्रभविष्णुना । मैनाकः पर्वतश्रेष्ठो रेजेऽतीव हिरण्मयः ॥ ७
ऋषयो लोकपालाश्च आदित्याः समरुद्गणाः । विवाहे वेदिकां चक्रुर्देवदेवस्य शूलिनः ॥ ८
विश्वकर्मा स्वयं त्वष्टा वेदीं चक्रे सतोरणाम् । सुरभी नन्दिनी नन्दा सुनन्दा कामदोहिनी ॥९
आभिस्तु शोभितेशान्या विवाहः समजायत । समुद्राः सरितो नागा ओषध्यो लोकमातरः १०

---

* इत उत्तरं घ. पुस्तके "गणयन्ति महात्मानः परार्थे न हिताहितम्" इत्यर्धमधिकम् । + एतदग्रे घ. पुस्तके— "रचिता मण्डपे दिव्ये मनोज्ञा विश्वकर्मणा" इत्यधिकम् ।

---

१ घ. °लासे तैरेवोपरिशोभिते । पू° । २ म. कामदा ।

सवनस्पतिबीजाश्च सर्वे तत्र समाययुः । भुवः कर्म इला चक्रे ओषध्यस्त्वन्नकर्म च ॥ ११
वरुणः पानकर्माणि दानकर्म धनाधिपः । अग्निश्चकार[१] तत्रान्नं यच्चेष्टं लोकनाथयोः ॥ १२
तत्र तत्र पृथक्पूजां चक्रे विष्णुः सनातनः । वेदांश्च[२] सरहस्यां[३] वै गायन्ति च हसन्ति[४] च ॥ १३
नृत्यन्त्यप्सरसः सर्वा जगुर्गन्धर्वकिंनराः । लाजाधृक्चापि मैनाको बभूव मुनिसत्तम ॥ १४
पुण्याहवाचनं वृत्तमन्तर्वेश्मनि नारद । वेदिकायामुपाविष्टौ दंपती सुरसत्तमौ[५] ॥ १५
प्रतिष्ठाप्याग्निं विधिवदश्मानं चापि पुत्रक । हुत्वा लाजांश्च विधिवत्प्रदक्षिणमथाकरोत् ॥ १६
अश्मनः स्पर्शहेतोश्च देव्यङ्गुष्ठं करेऽस्पृशत् । विष्णुना प्रेरितः शंभुर्दक्षिणस्य पदस्य च ॥ १७
तामदर्शमहं तत्र होमं कुर्वन्हरान्तिके । दृष्टेऽङ्गुष्ठे दुष्टबुद्ध्या वीर्यं सुस्राव मे तदा ॥* १८
लज्जया कलुषीभूतः स्कन्नं वीर्यमचूर्णयम् । मद्वीर्याच्चूर्णितात्सूक्ष्माद्वालखिल्यास्तु जज्ञिरे ॥ १९
ततो महानभूत्तत्र हाहाकारः सुरोदितः । लज्जया परिभूतोऽहं निर्गतस्तु तदाऽऽसनात् ॥ २०
पश्यत्सु देवसंघेषु तूष्णींभूतेषु नारद । गच्छन्तं मां महादेवो दृष्ट्वा नन्दिनमब्रवीत् ॥ २१

शिव उवाच—

ब्रह्माणमाह्वयस्वेह गतपापं करोम्यहम् । [+कृतापराधेऽपि जने सन्तः सकृपमानसाः ॥
मोहयन्त्यपि विद्वांसं विषयाणामियं स्थितिः] ॥ २२

ब्रह्मोवाच—

एवमुक्त्वा स भगवानुमया सहितः शिवः । ममानुकम्पया चैव लोकानां हितकाम्यया ॥ २३
एतच्चकार लोकेशः शृणु नारद यत्नतः । पापिनां पापमोक्षाय भूमिरापो भविष्यति ॥ २४
तयोश्च सारसर्वस्वमाहरिष्यामि पावनम् । एवं निश्चित्य भगवांस्तयोः सारं समाहरत् ॥ २५
भूमिं कमण्डलुं कृत्वा तत्रापः संनिवेश्य च । [*पावमान्यादिभिः सूक्तैरभिमन्त्र्य च यत्नतः ॥
त्रिजगत्पावनीं शक्तिं तत्र सस्मार पापहा] । मामुवाच स लोकेशो गृहाणेमं कमण्डलुम् ॥ २७
आपो वै मातरो देव्यो भूमिर्माता तथाऽपरा । स्थित्युत्पत्तिविनाशानां हेतुत्वमुभयोः स्थितम् ॥
अत्र प्रतिष्ठितो धर्मो ह्यत्र यज्ञः सनातनः । अत्र भुक्तिश्च मुक्तिश्च स्थावरं जङ्गमं तथा ॥ २९
स्मरणान्मानसं पापं वचनाद्वाचिकं तथा । स्नानपानाभिषेकाच्च प्रणश्यत्यपि कायिकम् ॥ ३०
एतदेवामृतं लोके नैतस्मात्पावनं परम् । मयाऽभिमन्त्रितं ब्रह्मन्गृहाणेमं कमण्डलुम् ॥ ३१
[+अत्रत्यं वारि यः कश्चित्स्मरेदपि पठेदपि । स सर्वकामानाप्नोति गृहाणेमं कमण्डलुम्] ॥ ३२
भूतेभ्यश्चापि पञ्चभ्य आपो भूतं महोदितम् । तासामुत्कृष्टमेतस्माद्[६]गृहाणेमं कमण्डलुम् ॥ ३३
अत्र यद्वारि शोभिष्ठं पुण्यं पावनमेव च । स्पृष्ट्वा स्मृत्वा च दृष्ट्वा च ब्रह्मन्पापाद्विमोक्ष्यसे ॥ ३४
एवमुक्त्वा महादेवः प्रादान्मम कमण्डलुम् । ततः सुरगणाः सर्वे भक्त्या प्रोचुः सुरेश्वरम् ॥
आह्लादश्च महांस्तत्र जयशब्दो व्यवर्तत । ३५

---

* एतदग्रे घ. पुस्तके 'विडम्बितो न कामेन कोऽप्यस्मिन्भुवनत्रये' इत्यधिकम् । + धनुश्चिह्नान्तर्गतः पाठो घ. पुस्तकस्थः । * धनुश्चिह्नान्तर्गतः पाठो घ. पुस्तकस्थः । + धनुश्चिह्नान्तर्गतः पाठो घ. पुस्तकस्थः ।

---

१ घ. °र यच्चेष्टं हिमवल्लोक° । २ क. वेदांश्च । ३ क. °स्यान्वै गा° । ४ क. वदन्ति । ५ क. °वन्सुरा° ।
६ घ. °तस्याद्गृ° ।

देवोत्सवे मातुरजः पदाग्रं समीक्ष्य पापात्पतितत्वमाप ॥
प्रादात्कृपालुः स्मरणात्पवित्रां गङ्गां पिता पुण्यकमण्डलुस्थाम् ॥ ३६

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे तीर्थमाहात्म्ये गङ्गोत्पत्तौ ब्रह्मकमण्डलुदानं नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

गौतमीमाहात्म्ये तृतीयोऽध्यायः ॥ ३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४६६७

अथ त्रिसप्ततितमोऽध्यायः ।

नारद उवाच—

कमण्डलुस्थिता देवी तव पुण्यविवर्धिनी । यथा मर्त्यं गता नाथ तन्मे विस्तरतो वद ॥ १

ब्रह्मोवाच—

बलिर्नाम महादैत्यो देवारिरपराजितः । धर्मेण यशसा चैव प्रजासंरक्षणेन च ॥ २
गुरुभक्त्या च सत्येन वीर्येण च बलेन च । त्यागेन क्षमया चैव त्रैलोक्ये नोपमीयते ॥ ३
तस्यर्द्धिमुन्नतां दृष्ट्वा देवाश्चिन्तापरायणाः । मिथः समूचुरमरा जेष्यामो वै कथं बलिम् ॥ ४
तस्मिञ्शासति राज्यं तु त्रैलोक्यं हतकण्टकम् । नारयो व्याधयो वाऽपि नाऽऽधयो वा कथंचन
अनावृष्टिरधर्मो वा नास्तिशब्दो न दुर्जनः । स्वप्नेऽपि नैव दृश्येत बलौ राज्यं प्रशासति ॥ ६
तस्योन्नतिशरैर्भग्नाः कीर्तिखड्गद्विधाकृताः । तस्याऽऽज्ञाशक्तिभिन्नाङ्गा देवाः शर्म न लेभिरे ॥ ७
ततः संमन्त्रयामासुः कृत्वा मात्सर्यमग्रतः । तद्यशोग्निप्रदीप्ताङ्गा विष्णुं जग्मुः सुविह्वलाः ॥ ८

देवा ऊचुः—

[1]आर्ताः स्म गतसत्त्वाः स्म शङ्खचक्रगदाधर । अस्मदर्थे भवा[2]न्नित्यमायुधानि बिभर्ति च ॥ ९
त्वयि नाथे जगन्नाथ अस्माकं दुःखमीदृशम् । त्वां तु *प्रणमती वाणी कथं दैत्यं नमस्यति ॥
मनसा कर्मणा वाचा त्वामेव शरणं गताः । त्वदङ्घ्रिशरणाः सन्तः कथं दैत्यं नमेमहि ॥ ११
यजामस्त्वां महायज्ञैर्वदामो वाग्भिरच्युत । त्वदेकशरणाः सन्तः कथं दैत्यं नमेमहि ॥ १२
त्वद्वीर्यमाश्रिता नित्यं देवाः सेन्द्रपुरोगमाः । त्वया दत्तं पदं प्राप्य कथं दैत्यं नमेमहि ॥ १३
स्रष्टा त्वं ब्रह्ममूर्त्या तु विष्णुर्भूत्वा तु रक्षसि । संहर्ता रुद्रशक्त्या त्वं कथं दैत्यं नमेमहि ॥ १४
ऐश्वर्यं कारणं लोके विनैश्वर्यं तु किं फलम् । हतैश्व[3]र्याः सुरेशान कथं दैत्यं नमेमहि ॥ १५
अनादिस्त्वं जगद्धातरनन्तस्त्वं जगद्गुरुः । अन्तवन्तममुं शत्रुं कथं दैत्यं नमेमहि ॥ १६
तवैश्वर्येण पुष्टाङ्गा जित्वा त्रैलोक्यमोजसा । स्थिराः स्यामः सुरेशान कथं दैत्यं नमेमहि ॥ १७

ब्रह्मोवाच—

इत्येतदेव वचनं श्रुत्वा दैतेयसूदनः । उवाच सर्वानमरान्देवानां कार्यसिद्धये ॥ १८

---

* नुमभाव आर्षः ।

---

१ घ. आर्तानां जगतामीश श° । २ घ. °न्नित्यं छायारूपं बि° । ३ क. °श्वर्याशनाः सन्तः क° ।

श्रीभगवानुवाच—

मद्भक्तोऽसौ बलिर्दैत्यो ह्यवध्योऽसौ[1] सुरासुरैः । यथा भवन्तो मत्पोष्यास्तथा पोष्यो बलिर्मम ॥

विना तु संगरं[2] देवा हत्वा राज्यं त्रिविष्टपे । बलिं निबध्य मन्त्रोक्त्या राज्यं वः प्रददाम्यहम् ॥

ब्रह्मोवाच—

तथेत्युक्त्वा सुरगणाः संजग्मुर्दिवमेव हि । भगवानपि देवेशो ह्यदित्या गर्भमाविशत् ॥ २१

तस्मिन्नुत्पद्यमाने तु उत्सवाश्च बभूविरे । जातोऽसौ वामनो ब्रह्मन्यज्ञेशो यज्ञपूरुषः ॥ २२

एतस्मिन्नन्तरे ब्रह्मन्हयमेधाय दीक्षितः । बलिर्बलवतां श्रेष्ठ ऋषिमुख्यैः समाहितः ॥ २३

पुरोधसा च शुक्रेण वेदवेदाङ्गवेदिना । मखे तस्मिन्वर्तमाने यजमाने बलौ तथा ॥ २४

आर्त्विज्य ऋषिमुख्ये तु शुक्रे तत्र पुरोधसि । हविर्भागार्थमासन्नदेवगन्धर्वपन्नगे ॥ २५

दीयतां भुज्यतां पूजा क्रियतां च पृथक्पृथक् । परिपूर्णं पुनः पूर्णमेवं वाक्ये प्रवर्तति ॥ २६

शनैस्तद्देशमभ्यागाद्वामनः सामगायनः । यज्ञवाटमनुप्राप्तो वामनश्चित्रकुण्डलः ॥ २७

प्रशंसमानस्तं यज्ञं वामनं प्रेक्ष्य भार्गवः । ब्रह्मरूपधरं देवं वामनं दैत्यसूदनम् ॥ २८

दातारं यज्ञतपसां फलं हन्तारं रक्षसाम् ।[3] ज्ञात्वा त्वरन्नथोवाच राजानं भूरितेजसम् ॥ २९

जेतारं क्षत्रधर्मेण दातारं भक्तितो धनम् । बलिं बलवतां श्रेष्ठं सभार्यं दीक्षितं मखे ॥ ३०

ध्यायन्तं यज्ञपुरुषमुत्सृजन्तं हविः पृथक् । तमाह भृगुशार्दूलः शुक्रः परमबुद्धिमान् ॥ ३१

शुक्र उवाच—

योऽसौ तव मखं प्राप्तो ब्राह्मणो वामनाकृतिः । नासौ विप्रो बले सत्यं यज्ञेशो यज्ञवाहनः ॥

शिशुस्त्वां याचितुं प्राप्तो[4] नूनं देवहिताय हि । मया च सह संमन्त्र्य पश्चाद्देयं त्वया प्रभो ॥ ३३

ब्रह्मोवाच—

बलिस्तु भार्गवं प्राह पुरोधसमरिंदमः ॥ ३४

बलिरुवाच—

धन्योऽहं मम यज्ञेशो गृहमायाति[5] मूर्तिमान् । आगत्य याचते किंचित्कि[6] मन्त्र्यमत्रशिष्यते ॥ ३५

ब्रह्मोवाच—

एवमुक्त्वा सभार्योऽसौ शुक्रेण च पुरोधसा । जगाम यत्र विप्रेन्द्रो वामनोऽदितिनन्दनः ॥ ३६

कृताञ्जलिपुटो भूत्वा[7] केनार्थित्वं तदुच्यताम् । वामनोऽपि तदा प्राह पदत्रयमितां भुवम् ॥ ३७

देहि राजेन्द्र नान्येन कार्यमस्ति धनेन किम् । तथेत्युक्त्वा तु कलशान्नानारत्नविभूषितात् ॥ ३८

वारिधारां पुरस्कृत्य वामनाय भुवं ददौ । पश्यत्सु ऋषिमुख्येषु शुक्रे चैव पुरोधसि ॥ ३९

पश्यत्सु[8] लोकनाथेषु वामनाय भुवं ददौ । पश्यत्सु दैत्यसंघेषु जयशब्दे प्रवर्तति ॥ ४०

शनैस्तु वामनः प्राह स्वस्ति राजन्सुखी भव । देहि मे संमितां भूमिं त्रिपदामाशु गम्यते ॥ ४१

तथेत्युवाच दैत्येशो यावत्पश्यति वामनम् । यज्ञेशो यज्ञपुरुषश्चन्द्रादित्यौ स्तनान्तरे ॥ ४२

यथा स्यातां सुरा[9] मूर्ध्नि ववृधे विक्रमाकृतिः । अनन्तश्चाच्युतो देवो विक्रान्तो विक्रमाकृतिः[10] ॥

तं दृष्ट्वा दैत्यराट् प्राह सभार्यो विनयान्वितः ॥ ४३

---

१ घ. ह्यजेयोऽसौ । २ घ. °नश्छत्र° । ३ घ. °लिं तं कलिहन्तारं स° । ४ क. °प्तो यः परः परमादपि । म° । ५ क. °मागत्य यत्परः । आ° । ६ क. °चित्किमन्यदव° । ७ घ. °त्वा मम कृत्यं तु तद्वद । वा° । ८ घ. लोकपालेषु । ९ क. सुरेशानौ व° । १० घ. विक्रमाश्रयः ।

बलिरुवाच—

क्रमस्व विष्णो लोकेश यावच्छक्त्या(क्ति) जगन्मय । जितं मया सुरेशान सर्वभावेन विश्वकृत् ॥

ब्रह्मोवाच—

तद्वाक्यसमकालं तु विष्णुः प्राह महाक्रतुः ॥ ४५

विष्णुरुवाच—

दैत्येश्वर महाबाहो क्रमिष्ये पश्य दैत्यराट् ॥ ४६

ब्रह्मोवाच—

एवं वदन्तं स प्राह क्रम विष्णो पुनः पुनः ॥ ४७

ब्रह्मोवाच—

कूर्मपृष्ठे पदं न्यस्य बलियज्ञे पदं न्यसत् । द्वितीयं तु पदं प्राप ब्रह्मलोकं सनातनम् ॥ ४८
तृतीयस्य [1]पदस्यात्र स्थानं नास्त्यसुरेश्वर । क्व क्रमिष्ये भुवं देहि बलिं तं हरिरब्रवीत् ॥
विहस्य बलिरप्याह सभार्यः स कृताञ्जलिः ॥ ४९

बलिरुवाच—

त्वया सृष्टं जगत्स[2]र्वं न स्रष्टाऽहं सुरेश्वर । त्वद्दोषादल्पमभवत्किं करोमि जगन्मय ॥ ५०
तथाऽपि नानृतपूर्वं कदाचिद्वच्मि केशव । सत्यवाक्यं च मां कुर्वन्मत्पृष्ठे हि पदं न्यस ॥ ५१

ब्रह्मोवाच—

ततः प्रसन्नो भगवांस्त्रयीमूर्तिः सुरार्चितः ॥ ५२

भगवानुवाच—

वरं वृणीष्व भद्रं ते भक्त्या प्रीतोऽस्मि दैत्यराट् ॥ ५३

ब्रह्मोवाच—

स तु प्राह जगन्नाथं न याचे त्वां त्रिविक्रमम् । स तु प्रादात्स्वयं विष्णुः प्रीतः सन्मनसेप्सितम् ॥
रसातलपतित्वं च भावि चेन्द्रपदं पुनः । आत्माधिपत्यं च हरिरविनाशि यशो विभुः ॥ ५५
एवं दत्त्वा बलेः सर्वं ससुतं भार्ययाऽन्वितम् । रसातले हरिः स्थाप्य बलिं त्वमरवैरिणम् ॥ ५६
शतक्रतोस्तथा प्रादात्सुरराज्यं यथाभवम् । एतस्मिन्नन्तरे तत्र पदं प्रागात्सुरार्चितम् ॥ ५७
द्वितीयं तत्पदं विष्णोः पितुर्मम महामते । यत्पदं समनुप्राप्तं गृहं दृष्ट्वाऽप्यचिन्तयम् ॥ ५८
किं कृत्यं यच्छुभं मे स्यात्पदे विष्णोः समागते । सर्वस्वं च समालोक्य श्रेष्ठो मे स्यात्कमण्डलुः
तद्वारि यत्पुण्यतमं दत्तं च त्रिपुरारिणा । वरं वरेण्यं वरदं वरं शान्तिकरं परम् ॥ ६०
शुभं च शुभदं नित्यं भुक्तिमुक्तिप्रदायकम् । मातृस्वरूपं लोकानाममृतं भेषजं शुचि ॥ ६१
पवित्रं पावनं पू[3]ज्यं ज्येष्ठं श्रेष्ठं गुणान्वितम् । स्मरणादेव लोकानां पावनं किं नु दर्शनात् ॥ ६२
तादृग्वारि शुचिर्भूत्वा कल्पयेऽर्घाय मे पितुः । इति संचिन्त्य तद्वारि गृहीत्वाऽर्घाय कल्पितम् ॥
विष्णोः पादे तु पतितमर्घवारि सुमन्त्रितम् । तद्वारि पतितं मेरौ चतुर्धा व्यगमद्भुवम् ॥ ६४
पूर्वे तु दक्षिणे चैव पश्चिमे चोत्तरे तथा । दक्षिणे यत्तु पतितं जटाभिः शंकरो मुने ॥ ६५
जग्राह पश्चिमे यत्तु पुनः प्रायात्कमण्डलुम् । उत्तरे पतितं यत्तु विष्णुर्जग्राह तज्जलम् ॥ ६६

---

१ क. पदं स्थानं नैवास्ति द्विजसत्तम । क्व । २ क. °र्वं तावदेव सु° । ३ क. °ज्यं श्रेष्ठं श्रेष्ठशुभावहम् ।

पूर्वस्मिन्नृषयो देवा पितरो लोकपालकाः । जगृहुः शुभदं वारि तस्माच्छ्रेष्ठं तदुच्यते ॥ ६७
या दक्षिणां दिशं प्राप्ता आपो वै लोकमातरः । विष्णुपादप्रसूतास्ता ब्रह्मण्या लोकमातरः॥६८
महेश्वरजटासंस्थाः पर्वजातशुभोदयाः । तासां प्रभावस्मरणात्सर्वकामानवाप्नुयात् ॥ ६९

इति श्रीमहापुराणे ब्राह्मे स्वयंभ्वृषिसंवादे तीर्थमाहात्म्ये गंगाया महेश्वरजटागमननिरूपणं नाम त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

गौतमीमाहात्म्ये चतुर्थोऽध्यायः ॥ ४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४७३६

अथ चतुःसप्ततितमोऽध्यायः ।

नारद उवाच—
कमण्डलुस्थिता देवी महेश्वरजटागता । श्रुता देव यथा मर्त्यमागता तद्ब्रवीतु मे ॥
ब्रह्मोवाच— १
महेश्वरजटास्था या आपो देव्यो महामते । तासां च द्विविधो भेद आहर्तुर्द्वयकारणात् ॥ २
एकांशो ब्राह्मणेनात्र व्रतदानसमाधिना । गोतमेन शिवं *पूज्य आहृतो लोकविश्रुतः ॥ ३
अपरस्तु महाप्राज्ञ क्षत्रियेण बलीयसा । आराध्य शंकरं देवं तपोभिर्नियमैस्तथा ॥ ४
भगीरथेन भूपेन आहृतोंऽशोऽपरस्तथा । एवं द्वैरूप्यमभवद्गङ्गाया मुनिसत्तम ॥ ५
नारद उवाच—
महेश्वरजटास्था या हेतुना केन गौतमः । आहर्ता क्षत्रियेणापि आहृता केन तद्वद ॥ ६
ब्रह्मोवाच—
यथाऽऽनीता पुरा वत्स ब्राह्मणेनेतरेण वा । तत्सर्वं विस्तरेणाहं वदिष्ये प्रीतये तव ॥ ७
यस्मिन्काले सुरेशस्य उमा पत्न्यभवत्प्रिया । तस्मिन्नेवाभवद्गङ्गा प्रिया शंभोर्महामते ॥ ८
मम दोषापनोदाय चिन्तयानः शिवस्तदा । उमया सहितः श्रीमान्देवीं प्रेक्ष्य विशेषतः ॥ ९
रसवृत्तौ स्थितो यस्मान्निर्ममे रसमुत्तमम् । रसिकत्वात्प्रियत्वाच्च स्त्रैणत्वात्पावनत्वतः ॥ १०
सर्वाभ्यो ह्यधिकप्रीतिर्गङ्गाऽभूद्द्विजसत्तमं । तामेव चिन्तयानोऽसौ सर्वदाऽऽस्ते महेश्वरः ॥ ११
सैवोद्धृता जटामार्गात्कस्मिंश्चित्कारणान्तरे । स तु संगोपयामास गङ्गां शंभुर्जटागताम् ॥ १२
शिरसा च धृतां ज्ञात्वा न शशाक उमा तदा । सोढुं ब्रह्मञ्जटाजूटे स्थितां दृष्ट्वा पुनः पुनः ॥ १३
अमर्षेण भवं गोरी प्रेरयस्वेत्यभाषत । नैवासौ प्रैरयच्छंभू रसिको रसमुत्तमम् ॥ १४
जटास्वेव तदा देवीं गोपायन्तं विमृश्य सा । विनायकं जयां स्कन्दं रहो वचनमब्रवीत् ॥ १५

---

* ल्यबार्षः ।

---

१ घ °स्ता ब्राह्म्यो वै लो° । २ घ. °संस्था एवं जाताः शु° । ३ घ. °णेनेज्यो व्र° । ४ क. °ङ्गायां गां गता यतः । ना° । ५ क. °म । आत्मनो मस्तके गङ्गा जानात्येव उपेति वै । गङ्गां जगद्गुरुर्देवः कस्मिं° । ६ क. °नः । उमा तदाऽवदद्दुः-खादनाथाऽस्र्माति वै तदा । ज° ।

नैवायं त्रिदशेशानो गङ्गां त्यजति कामुकः। साऽपि प्रिया शिवस्याद्य कथं त्यजति तां प्रियाम्॥
एवं विमृश्य बहुशो गौरी चाऽऽह विनायकम् ॥ १७

पार्वत्युवाच—

न देवैर्नासुरैर्यक्षैर्न सिद्धैर्भवताऽपि च । न राजभिरथान्यैर्वा न गङ्गां त्यजति प्रभुः ॥ १८
पुनस्तप्स्यामि वा गत्वा हिमवन्तं नगोत्तमम् । अथवा ब्राह्मणैः पुण्यैस्तपोभिर्हतकल्मषैः ॥ १९
तैर्वा जटास्थिता गङ्गा प्रार्थिता भुवमाप्नुयात् ॥ २०

ब्रह्मोवाच—

एतच्छ्रुत्वा मातृवाक्यं मातरं प्राह विघ्नराट् । भ्रात्रा स्कन्देन जयया संमन्त्र्येह च युज्यते ॥ २१
तत्कुर्मो मस्तकाद्गङ्गां यथा त्यजति मे पिता । एतस्मिन्नन्तरे ब्रह्मन्ननावृष्टिरजायत ॥ २२
द्विर्द्वादश समा मर्त्ये सर्वप्राणिभयावहा । ततो विनष्टमभवज्जगत्स्थावरजङ्गमम् ॥ २३
विना तु गौतमं पुण्यमाश्रमं सर्वकामदम् । स्रष्टुकामः पुरा पुत्र स्थावरं जङ्गमं तथा ॥ २४
कृतो यज्ञो मया पूर्वं स देवयजनो गिरिः । मन्नामा तत्र विख्यातस्ततो ब्रह्मगिरिः सदा ॥२५
तमाश्रित्य नगश्रेष्ठं सर्वदाऽऽस्ते स गौतमः । तस्याऽऽश्रमे महापुण्ये श्रेष्ठे ब्रह्मगिरौ शुभे ॥ २६
आधयो व्याधयो वाऽपि दुर्भिक्षं वाऽप्यवर्षणम् । भयशोकौ च दारिद्र्यं न श्रूयन्ते कदाचन२७
तदाश्रमं विनाऽन्यत्र हव्यं वा कव्यमेव वा। नास्ति पुत्र तथा दाता होता यष्टा तथैव च ॥२८
यदैव गौतमो विप्रो ददाति च जुहोति च । तदैवाप्ययनं स्वर्गे सुराणामपि नान्यतः ॥ २९
देवलोकेऽपि मर्त्ये वा श्रूयते गौतमो मुनिः । होता दाता च भोक्ता च स एवेति जना विदुः ॥
तच्छ्रुत्वा मुनयः सर्वे नानाश्रमनिवासिनः । गौतमाश्रममापृच्छन्नागच्छन्तस्तपोधनाः ॥ ३१
तेषां मुनीनां सर्वेषामागतानां स गौतमः । शिष्यवत्पुत्रवद्भक्त्या पितृवत्पोषकोऽभवत् ॥ ३२
यस्य(तेषां)यथेप्सितं कामं यथायोग्यं यथाक्रमम् । यथानुरूपं सर्वेषां शुश्रूषामकरोन्मुनिः ३३
आज्ञया गौतमस्याऽऽसन्नोषध्यो लोकमातरः । आराधिताः पुनस्तेन ब्रह्मविष्णुमहेश्वराः ॥ ३४
जायन्ते च तदौषध्यो लूयन्ते च तदैव हिं ·। संपत्स्यन्ते तदोप्यन्ते गौतमस्य तपोबलात् ॥ ३५
सर्वाः समृद्धयस्तस्य संसिध्यन्ते मनोगताः । प्रत्यहं वक्ति विनयाद्गौतमस्त्वागतान्मुनीन् ॥ ३६
पुत्रवच्छिष्यवच्चैव प्रेष्यवत्करवाणि किम् । पितृवत्पोषयामास संवत्सरगणान्बहून् ॥ ३७
एवं वसत्सु मुनिषु त्रैलोक्ये ख्यातिराश्रयात् । ततो विनायकः प्राह मातरं भ्रातरं जयाम्॥३८

विनायक उवाच—

देवानां सदने मातर्गीयते गौतमो द्विजः । यन्न साध्यं सुरगणैर्गौतमः कृतवानिति ॥ ३९
एवं श्रुतं मया देवि ब्राह्मणस्य तपोबलम् । स विप्रश्चालयेदेनां मातर्गङ्गां जटागताम् ॥ ४०
तपसा वाऽन्यतो वाऽपि पूजयित्वा त्रिलोचनम् । स एव च्यावयेदेनां जटास्थां मे पितृप्रियाम्
तत्र नीतिर्विधातव्या तां विप्रो याचयेद्यथा । तत्प्रभावात्सरिच्छ्रेष्ठा शिरसोऽवतरत्यपि ॥ ४२

ब्रह्मोवाच—

इत्युक्त्वा मातरं भ्रात्रा जयया सह विघ्नराट् । जगाम गौतमो यत्र ब्रह्मसूत्रधरः कृशः ॥ ४३

---

१ घ. °र्न मर्त्यैर्भि° । २ क. च पूज्य च । त° । ३ क. °निः । स एव दाता भो° । ४ घ. पुरा तेन । ५ घ. सूयन्ते । ६ क. हि । तं कल्पन्ते ।

वसन्कतिपयाहःसु गौतमाश्रममण्डले । उवाच ब्राह्मणान्सर्वांस्तत्र तत्र च विघ्नराट् ॥ ४४
गच्छामः स्वमधिष्ठानमाश्रमाणि शुचीनि च । पुष्टाः स्म गौतमान्नेन पृच्छामो गौतमं मुनिम् ४५
इति संमन्त्र्य पृच्छन्ति मुनयो मुनिसत्तमाः । स तान्निवारयामास स्नेहबुद्ध्या मुनीन्पृथक् ॥ ४६

गौतम उवाच—

कृताञ्जलिः सविनयमासध्वमिह चैव हि । युष्मच्चरणशुश्रूषां करोमि मुनिपुंगवाः ॥ ४७
शुश्रूषौ पुत्रवन्नित्यं मयि तिष्ठति नोचितम् । भवतां भूमिदेवानामाश्रमान्तरसेवनम् ॥ ४८
इदमेवाऽऽश्रमं पुण्यं सर्वेषामिति मे मतिः । अलमन्येन मुनय आश्रमेण गतेन वा ॥ ४९

ब्रह्मोवाच—

इति श्रुत्वा मुनेर्वाक्यं विघ्नकृत्यमनुस्मरन् । उवाच प्राञ्जलिर्भूत्वा ब्राह्मणान्स गणाधिपः ॥५०

गणाधिप उवाच—

अन्नक्रीता वयं किं नो निवारयत गौतमः । साम्ना नैव वयं शक्ता गन्तुं स्वं स्वं निवेशनम् ५१
नायमर्हति दण्डं वा उपकारी द्विजोत्तमः । तस्माद्बुद्ध्या व्यवस्यामि तत्सर्वैरनुमन्यताम् ॥ ५२

ब्रह्मोवाच—

ततः सर्वे द्विजश्रेष्ठाः क्रियतामित्यनुब्रुवन्* । एतस्य तूपकाराय लोकानां हितकाम्यया ॥ ५३
ब्राह्मणानां च सर्वेषां श्रेयो यत्स्यात्तथा कुरु । ब्राह्मणानां वचः श्रुत्वा मेने वाक्यं गणाधिपः

विनायक उवाच—

क्रियते गुणरूपं यद्गौतमस्य विशेषतः ॥ ५५

ब्रह्मोवाच—

अनुमान्य द्विजान्सर्वान्पुनः पुनरुदारधीः । स्वयं च ब्राह्मणो भूत्वा प्रणम्य ब्राह्मणान्पुनः ॥
मातुर्मते स्थितो विद्वाञ्जयां प्राह गणेश्वरः ॥ ५६

विनायक उवाच—

यथा नान्यो विजानीते तथा कुरु शुभानने । गोरूपधारिणी गच्छ गौतमो यत्र तिष्ठति ॥ ५७
शालीन्खाद विनाश्याथ विकारं कुरु भामिनि । कृते प्रहारे हुंकारे प्रेक्षिते चापि किंचन ॥
पत दीनं स्वनं कृत्वा न म्रियस्व न जीव च ॥ ५८

ब्रह्मोवाच—

तथा चकार विजया विघ्नेश्वरमते स्थिता । यत्राऽऽसीद्गौतमो विप्रो जया गोरूपधारिणी ॥ ५९
जगाम शालीन्खादन्ती तां ददर्श स गौतमः । गां दृष्ट्वा विकृतां विप्रस्तां तृणेन न्यवारयत्॥६०
निवार्यमाणा सा तेन स्वनं कृत्वा पपात गौः । तस्यां तु पतितायां च हाहाकारो महानभूत् ६१
स्वनं श्रुत्वा च दृष्ट्वा च गौतमस्य विचेष्टितम् । व्यथिता ब्राह्मणाः प्राहुर्विघ्नराजपुरस्कृताः॥६२

ब्राह्मणा ऊचुः—

इतो गच्छामहे सर्वे न स्थातव्यं तवाऽऽश्रमे । पुत्रवत्पोषिताः सर्वे पृष्टोऽसि मुनिपुंगव ॥ ६३

---

* अडभाव आर्षः ।

---

१ घ. क्यं दिव्यकृ । २ क. तु । ३ क. शमुं । ४ क. वा । ५ घ. नि । दत्ते प्र । ६ घ. हारवचने प्रक्षिप्ते वाऽपि ।

ब्रह्मोवाच—

इति श्रुत्वा मुनिर्वाक्यं विप्राणां गच्छतां तदा । वज्राहत इवाऽऽसीत्स विप्राणां पुरतोऽपतत् ॥
तमूचुर्ब्राह्मणाः सर्वे पश्येमां पतितां भुवि । रुद्राणां मातरं देवीं जगतां पावनीं प्रियाम् ॥ ६५
तीर्थदेवस्वरूपिण्यामस्यां गवि विधेर्बलात् । पतितायां मुनिश्रेष्ठ गन्तव्यमवशिष्यते ॥ ६६
[1]चीर्णं व्रतं क्षयं याति यथा वासस्त्वदाश्रमे । वयं नान्यधना ब्रह्मन्केवलं तु तपोधनाः ॥ ६७

ब्रह्मोवाच—

विप्राणां पुरतः स्थित्वा विनीतः प्राह गौतमः ॥ ६८

गौतम उवाच—

भवन्त एव शरणं पूतं मां कर्तुमर्हथ ॥ ६९

ब्रह्मोवाच—

ततः प्रोवाच भगवान्विघ्नेराड्ब्राह्मणैर्वृतः ॥ ७०

विघ्नराज उवाच—

नैवेयं म्रियते तत्र नैव जीवति तत्र किम् । वदामोऽस्मिन्सुसंदिग्धे निष्कृतिं गतिमेव वा ॥ ७१

गौतम उवाच—

कथमुत्थास्यतीयं गौरथ चास्मिंश्च निष्कृतिम् । वक्तुमर्हथ तत्सर्वं करिष्येऽहमसंशयम् ॥ ७२

ब्राह्मणा ऊचुः

सर्वेषां च मतेनायं वदि[3]ष्यति च बुद्धिमान् । एतद्वाक्यमथास्माकं प्रमाणं तव गौतम[4] ॥ ७३

ब्रह्मोवाच—

ब्राह्मणैः प्रेर्यमाणोऽसो गौतमेन बलीयसा । विघ्नकृद्[2]ब्रह्मवपुषा प्राह सर्वानिदं वचः ॥ ७४

विघ्नराज उवाच—

सर्वेषां च मतेनाहं वदिष्यामि यथार्थवत् । अनुमन्यन्तु मुनयो मद्वाक्यं गौतमोऽपि च ॥ ७५
महेश्वरजटाजूटे ब्रह्मणोऽव्यक्तजन्मनः । कमण्डलुस्थितं वारि तिष्ठतीति हि शुश्रुम ॥ ७६
तदानयस्व तरसा तपसा नियमेन च । तेनाभिषिञ्च गामेतां भगवन्भुवमाश्रिताम् ॥
ततो वत्स्यामहे सर्वे पूर्ववत्तव वेश्मनि ॥ ७७

ब्रह्मोवाच—

इत्युक्तवति विप्रेन्द्रे ब्राह्मणानां च संसदि । तत्रापतत्पुष्पवृष्टिर्जयशब्दो व्यवर्धत ॥
ततः कृताञ्जलिर्नम्रो गौतमो वाक्यमब्रवीत् ॥ ७८

गौतम उवाच—

तपसाऽग्निप्रसादेन देवब्रह्मप्रसादतः । भवतां च प्रसादेन मत्संकल्पोऽनुसिध्यताम् ॥ ७९

ब्रह्मोवाच—

एवमस्त्विति तं विप्रा आपृच्छन्मुनिपुंगवम् । स्वानि स्थानानि ते जग्मुः समृद्धान्यन्नवारिभिः॥
यातेषु तेषु विप्रेषु भ्रात्रा सह गणेश्वरः । जयया सह सुप्रीतः कृतकृत्यो न्यवर्तत ॥ ८१
गतेषु ब्रह्मवृन्देषु गणेशे च गते तथा । गौतमोऽपि मुनिश्रेष्ठस्तपसा हतकल्मषः ॥ ८२

---

१ घ. चीर्णव्रतं पुनीतं त्वामेष्यामः पुनरेव हि । व° । २ क. °घ्नकृद्ब्राह्म° । ३ घ. °ष्यत्यतिबु° । ४ घ. °म । तच्छ्रुत्वा हर्षसंपन्नो गौ° ।

ध्यायंस्तदर्थं स मुनिः किमिदं मम संस्थितम् । इत्येवं बहुशो ध्यायञ्ज्ञानेन ज्ञातवान्द्विज ॥ ८३
निश्चित्य देवकार्यार्थमात्मनः किल्बिषां गतिम् । लोकानामुपकारं च शंभोः प्रीणनमेव च ॥ ८४
उमायाः प्रीणनं चापि गङ्गानयनमेव च । सर्वं श्रेयस्करं मन्ये मयि नैव च किल्बिषम् ॥ ८५
इत्येवं मनसा ध्यायन्सुप्रीतोऽभूद्द्विजोत्तमः* । आराध्य जगतामीशं त्रिनेत्रं वृषभध्वजम् ॥ ८६
आनयिष्ये सरिच्छ्रेष्ठां प्रीताऽस्तु गिरिजा मम । सपत्नी जगदम्बाया महेश्वरजटास्थिता ॥ ८७

एवं हि संकल्प्य मुनिप्रवीरः स गौतमो ब्रह्मगिरेर्जगाम ।
कैलासमाधिष्ठितमुग्रधन्वना सुरार्चितं प्रियया ब्रह्मवृन्दैः ॥ ८८

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे तीर्थमाहात्म्ये विनायकगौतमव्यापारनिरूपणं नाम चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

गौतमीमाहात्म्ये पञ्चमोऽध्यायः ।

आदितः श्लोकानां समष्ट्यङ्काः—४८२४

अथ पञ्चसप्ततितमोऽध्यायः ।

नारद उवाच—

कैलासशिखरं गत्वा गौतमो भगवानृषिः । किं चकार तपो वाऽपि कां चक्रे स्तुतिमुत्तमाम् ॥ १

ब्रह्मोवाच—

गिरिं गत्वा[1] ततो वत्स वाचं संयम्य गौतमः । आस्तीर्य स कुशान्प्राज्ञः कैलासे पर्वतोत्तमे ॥ २
उपविश्य शुचिर्भूत्वा स्तोत्रं चेदं ततो जगौ । अपतत्पुष्पवृष्टिश्च स्तूयमाने महेश्वरे ॥ ३

गौतम उवाच—

भोगार्थिनां भोगमभीप्सितं च दातुं महान्त्यष्टवपूंषि धत्ते[2] ।
सोमो जनानां गुणवन्ति नित्यं देवं महादेवमिति स्तुवन्ति ॥ ४
कर्तुं स्वकीयैर्विषयैः सुखानि भर्तुं समस्तं सचराचरं च ।
संपत्तये ह्यस्य[3] विवृद्धये च महीमयं रूपमितीश्वरस्य ॥ ५
सृष्टेः स्थितेः संहरणाय भूमेराधारमाधातुमपां स्वरूपम् ।
भेजे शिवः शान्ततनुर्जनानां सुखाय धर्माय जगत्प्रतिष्ठितम्[4] ॥ ६
कालव्यवस्थाममृतस्रवं च जीवस्थितिं सृष्टिमथो विनाशनम् ।
मुदं प्रजानां सुखमुन्नतिं च चक्रेऽर्कचन्द्राग्निमयं शरीरम् ॥ ७
वृद्धिं गतिं शक्तिमथाक्षराणि जीवव्यवस्थां मुदमप्यनेकाम् ।
स्रष्टुं कृतं वायुरितीशरूपं त्वं वेत्सि नूनं भगवन्भवन्तम् ॥ ८
भेदैर्विना नैव कृतिर्न धर्मो नाऽऽत्मीयमन्यन्न दिशोऽन्तरिक्षम् ।
द्यावापृथिव्यौ न च भुक्तिमुक्ती तस्मादिदं व्योमवपुस्तवेश ॥ ९

---

* एतदग्रे क. पुस्तके 'भार्यया सह संमन्त्र्य इदमाह द्विजोत्तमः' इत्यधिकम् ।

---

१ घ. त्वा यतो भूत्वा वा । २ क. धत्से । ३ घ. तस्य । ४ घ. तिष्ठम् । ५ घ. लप्रतिष्ठान ।

धर्मं व्यवस्थापयितुं व्यवस्य ऋक्सामशास्त्राणि यजुश्च शाखाः ।
लोके च गाथाः स्मृतयः पुराणमित्यादिशब्दात्मकतामुपैति ॥ १०
यष्टा क्रतुर्यान्यपि साधनानि ऋत्विक्प्रदेशं(यं) फलदेशकालाः ।
त्वमेव शंभो परमार्थतत्त्वं वदन्ति यज्ञाङ्गमयं वपुस्ते ॥ ११
कर्ता प्रदाता प्रतिभूः प्रदानं सर्वज्ञसाक्षी पुरुषः परश्च ।
प्रत्यात्मभूतः परमार्थरूपस्त्वमेव सर्वं किमु वाग्विलासैः ॥ १२
न वेदशास्त्रैर्गुरुभिः प्रदिष्टो न नासि बुद्ध्यादिभिरप्रधृष्यः ।
अजोऽप्रमेयः शिवशब्दवाच्यस्त्वमस्ति(मेव) सत्यं भगवन्नमस्ते ॥ १३
आत्मैकतां स्वप्रकृतिं कदाचिदीक्षच्छिवः संपदियं ममेति ।
पृथक्तदेवाभवदप्रतर्क्याचिन्त्यप्रभावो बहुविश्वमूर्तिः ॥ १४
भावेऽभिवृद्धा च भवे भवे च स्वकारणं कारणमास्थिता च ।
नित्या शिवा सर्वसुलक्षणा वा विलक्षणा विश्वकरस्य शक्तिः ॥ १५
उत्पादनं संस्थितिरन्नवृद्धिलयाः सतां यत्र सनातनास्ते ।
एकैव मूर्तिर्न समस्ति किंचिदसाध्यमस्या दयिता हरस्य ॥ १६
यदर्थमन्नानि धनानि जीवा यच्छन्ति कुर्वन्ति तपांसि धर्मान् ।
साऽपीयमम्बा जगतो जनित्री प्रिया तु सोमस्य महासुकीर्तिः ॥ १७
यदीक्षितं काङ्क्षति वासवोऽपि यन्नामतो मङ्गलमाप्नुयाच्च ।
या व्याप्य विश्वं विमली करोति सोमा सदा सोमसमानरूपा ॥ १८
ब्रह्मादिजीवस्य चराचरस्य बुद्ध्यक्षिचैतन्यमनःसुखानि ।
यस्याः प्रसादात्फलवन्ति नित्यं वागीश्वरी लोकगुरोः सुरम्या ॥ १९
चतुर्मुखस्यापि मनो मलीनं किमन्यजन्तोरिति चिन्त्य माता ।
गङ्गाऽवतारं विविधैरुपायैः सर्वं जगत्पावयितुं चकार ॥ २०
श्रुतीः समालक्ष्य हरप्रभुत्वं विश्वस्य लोकः सकलैः प्रमाणैः ।
कृत्वा च धर्मान्बुभुजे च भोगान्विभूतिरेषा तु सदाशिवस्य ॥ २१
कार्यक्रियाकारकसाधनानां वेदोदितानामथ लौकिकानाम् ।
यत्साध्यमुत्कृष्टतमं प्रियं च प्रोक्ता च सा सिद्धिरनादिकर्तुः ॥ २२
ध्यात्वा वरं ब्रह्म परं प्रधानं यत्सारभूतं यदुपासितव्यम् ।
यत्प्राप्य मुक्ता न पुनर्भवन्ति सद्योगिनो मुक्तिरुमापतिः सः ॥ २३
यथा यथा शंभुरमेयमायारूपाणि धत्ते जगतो हिताय ।
तद्योगयोग्यानि तथैव धत्से पतिव्रतात्वं त्वयि मातरेवम् ॥ २४

ब्रह्मोवाच—

इत्येवं स्तुवतस्तस्य पुरस्ताद्वृषभध्वजः । उमया सहितः श्रीमान्गणेशादिगणैर्वृतः ॥ २५

---

१ घ. °ष्टो नानाऽसि । २ क. नास्ति बु° । ३ घ. °शक्तिवा° । ४ क. °ति । वृथा सदै° । ५ घ. °वृद्ध्याऽभिभवे भवस्य या कारणं कारणका भवानी । नि° । ६ घ. एषैव भूमिर्न समाऽस्ति किंस्विन्न ध्यानगम्या द° । ७ क. °स्य सहस्रकी° । ८ घ. °ति सा मां स° । ९ क. °दिदेव° । १० क. बुद्ध्यादिचै° ।

साक्षादागत्य तं शंभुः प्रसन्नो वाक्यमब्रवीत् ॥ २६

शिव उवाच—

किं ते गौतम दास्यामि भक्तिस्तोत्रव्रतैः शुभैः । परितुष्टोऽस्मि याचस्व देवानामपि दुष्करम् ॥

ब्रह्मोवाच—

इति श्रुत्वा जगन्मूर्तेर्वाक्यं वाक्यविशारदः । हर्षबाष्पपरीताङ्गो गौतमः पर्यचिन्तयत् ॥ २८

अहो दैवमहो धर्मो ह्यहो वै विप्रपूजनम् । अहो लोकगतिश्चित्रा अहो धातर्नमोऽस्तु ते ॥ २९

गौतम उवाच—

जटास्थितां शुभां गङ्गां देहि मे त्रिदशार्चित । यदि तुष्टोऽसि देवेश त्रयीधाम नमोऽस्तु ते ॥ ३०

ईश्वर उवाच—

त्रयाणामुपकारार्थं लोकानां याचितं त्वया । आत्मनस्तूपकाराय तद्याचस्वाकुतोभयः ॥ ३१

गौतम उवाच—

स्तोत्रेणानेन ये [1]भक्तास्त्वां च देवीं स्तुवन्ति वै । सर्वकामसमृद्धाः स्युरेतद्धि वरयाम्यहम् ॥

ब्रह्मोवाच—

एवमस्त्विति देवेशः परितुष्टोऽब्रवीद्वचः । अन्यानपि वरान्मत्तो याचस्व विगतज्वरः ॥ ३३

एवमुक्तस्तु हर्षेण गौतमः प्राह शंकरम् ॥ ३४

गौतम उवाच—

इमां देवीं जटासंस्थां पावनीं लोकपावनीम् । तव प्रियां जगन्नाथ उत्सृज ब्रह्मणो गिरौ ॥ ३५

सर्वासां तीर्थभूता तु यावद्गच्छति सागरम् । ब्रह्महत्यादिपापानि मनोवाक्कायिकानि च ॥ ३६

स्नानमात्रेण सर्वाणि विलयं यान्तु शंकर । चन्द्रसूर्योपरागे च अयने विषुवे तथा ॥ ३७

संक्रान्तौ वैधृतौ पुण्यतीर्थेष्वन्येषु यत्फलम् । अस्यास्तु स्मरणादेव तत्पुण्यं जायतां हर ॥ ३८

श्लाघ्यं कृते तपः प्रोक्तं त्रेतायां यज्ञकर्म च । द्वापरे यज्ञदाने च दानमेव कलौ युगे ॥ ३९

युगधर्माश्च ये सर्वे देशधर्मास्तथैव च । देशकालादिसंयोगे यो धर्मो यत्र शस्यते ॥ ४०

यदन्यत्र कृतं पुण्यं स्नानदानादिसंयमैः । अस्यास्तु स्मरणादेव तत्पुण्यं जायतां हर ॥ ४१

यत्र यत्र स्वियं याति यावत्सागरगामिनी । तत्र तत्र त्वया भाव्यमेष चास्तु वरो वरः ॥ ४२

योजनानां तूपरि तु दश यावच्च संख्यया । तदन्तरप्रविष्टानां महापातकिनामपि ॥ ४३

तत्पितॄणां च तेषां च स्नानायाऽऽगच्छतां शिव । स्नाने चाप्यन्तरे मृत्योर्मुक्तिभाजो भवन्तु वै॥

एकतः सर्वतीर्थानि स्वर्गमर्त्यरसातले । एषा तेभ्यो विशिष्टा तु अलं शंभो नमोऽस्तु ते ॥ ४५

ब्रह्मोवाच—

तद्गौतमवचः श्रुत्वा तथाऽस्त्वित्यब्रवीच्छिवः । अस्याः परतरं तीर्थं न भूतं न भविष्यति ॥ ४६

सत्यं सत्यं पुनः सत्यं वेदे च परिनिष्ठितम् । सर्वेषां गौतमी पुण्या इत्युक्त्वाऽन्तरधीयत ॥ ४७

ततो गते भगवति लोकपूजिते तदाज्ञया पूर्णबलः स गौतमः ।
जटां समादाय सरिद्वरां तां सुरैर्वृतो ब्रह्मगिरिं विवेश ॥ ४८

ततस्तु गौतमे प्राप्ते जटामादाय नारद । पुष्पवृष्टिरभूत्तत्र समाजग्मुः सुरेश्वराः ॥ ४९

---

१ घ. भक्त्या त्वां च ।

ऋषयश्च महाभागा ब्राह्मणाः क्षत्रियास्तथा । जयशब्देन तं विप्रं पूजयन्तो मुदान्विताः ॥ ५०

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे तीर्थमाहात्म्ये गौतम्यानयनं नाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

गौतमीमाहात्म्ये षष्ठोऽध्यायः ॥ ६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४८७४

अथ षट्सप्ततितमोऽध्यायः ।

नारद उवाच—

महेश्वरजटाजूटाद्गङ्गामादाय गौतमः । आगत्य ब्रह्मणः पुण्ये ततः किमकरोद्गिरौ ॥ १

ब्रह्मोवाच—

आदाय गौतमो गङ्गां शुचिः प्रयतमानसः । पूजितो देवगन्धर्वैस्तथा गिरिनिवासिभिः ॥ २

गिरेर्मूर्ध्नि जटां स्थाप्य स्मरन्देवं त्रिलोचनम् । उवाच प्राञ्जलिर्भूत्वा गङ्गां स द्विजसत्तमः ॥ ३

गौतम उवाच—

त्रिलोचनजटोद्भूते सर्वकामप्रदायिनि । क्षमस्व मातः शान्ताऽसि सुखं याहि हितं कुरु ॥ ४

ब्रह्मोवाच—

एवमुक्ता गौतमेन गङ्गा प्रोवाच गौतमम् । दिव्यरूपधरा देवी दिव्यस्रगनुलेपना ॥ ५

गङ्गोवाच—

गच्छेयं देवसदनमथवाऽपि कमण्डलुम् । रसातलं वा गच्छेयं जातस्त्वं सत्यवागसि ॥ ६

गौतम उवाच—

त्रयाणामुपकारार्थं लोकानां याचिता मया । शंभुना च तथा दत्ता देवि तन्नान्यथा भवेत् ॥ ७

ब्रह्मोवाच—

तद्गौतमवचः श्रुत्वा गङ्गा मेने द्विजेरितम् । त्रेधाऽऽत्मानं विभज्याथ स्वर्गमर्त्यरसातले ॥ ८

स्वर्गे चतुर्धा व्यगमत्सप्तधा मर्त्यमण्डले । रसातले चतुर्धैव सैवं पञ्चदशाकृतिः ॥ ९

सर्वत्र सर्वभूतैव सर्वपापविनाशिनी । सर्वकामप्रदा नित्यं सैव वेदे प्रगीयते ॥ १०

मर्त्या मर्त्यगतामेव पश्यन्ति न तलं गताम् । नैव स्वर्गगतां मर्त्याः पश्यन्त्यज्ञानबुद्धयः ॥ ११

यावत्सागरगा देवी तावद्देवमयी स्मृता । उत्सृष्टा गौतमेनैव प्रायात्पूर्वार्णवं प्रति ॥ १२

ततो देवर्षिभिर्जुष्टां मातरं जगतः शुभाम् । गौतमो मुनिशार्दूलः प्रदक्षिणमथाकरोत् ॥ १३

त्रिलोचनं सुरेशानं प्रथमं पूज्य गौतमः । उभयोस्तीरयोः स्नानं करोमीति दधे मतिम् ॥ १४

[*स्मृतमात्रस्तदा तत्राऽऽविरासीत्करुणार्णवः] । तत्र स्नानं कथं सिध्येदित्येवं शर्वमब्रवीत् १५

कृताञ्जलिपुटो भूत्वा भक्तिनम्रस्त्रिलोचनम् ॥ १६

गौतम उवाच—

देवदेव महेशान तीर्थस्नानविधिं मम । ब्रूहि सम्यङ्महेशान लोकानां हितकाम्यया ॥ १७

---

* इदमर्धं घ. पुस्तकस्थम् ।

---

१ घ. °त्र धर्मभू° ।

शिव उवाच—

महर्षे शृणु सर्वं च विधिं गोदावरीभवम् । पूर्वं नान्दीमुखं कृत्वा देहशुद्धिं विधाय च ॥ १८

ब्राह्मणान्भोजयित्वा च तेषामाज्ञां प्रगृह्य च । ब्रह्मचर्येण गच्छन्ति पतितालापवर्जिताः ॥ १९

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् । विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ २०

भावदुष्टिं परित्यज्य स्वधर्मपरिनिष्ठितः । श्रान्तसंवाहनं कुर्वन्दद्यादन्नं यथोचितम् ॥ २१

अकिंचनेभ्यः साधुभ्यो दद्याद्वस्त्राणि कम्बलान् । शृण्वन्हरिकथां दिव्यां तथा गङ्गासमुद्भवाम् ॥

अनेन विधिना गच्छन्सम्यक्तीर्थफलं लभेत् ॥ २२

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

गौतमीमाहात्म्ये सप्तमोऽध्यायः ॥ ७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४८९६

अथ सप्तसप्ततितमोऽध्यायः ।

ब्रह्मोवाच—

त्र्यम्बकश्च इति प्राह गौतमं मुनिभिर्वृतम् ।

शिव उवाच—

द्विहस्तमात्रे तीर्थानि संभविष्यन्ति गौतम । सर्वत्राहं संनिहितः सर्वकामप्रदस्तथा ॥ २

*ब्रह्मोवाच—

गङ्गाद्वारे प्रयागे च तथा सागरसंगमे । एतेषु पुण्यदा पुंसां मुक्तिदा सा भगीरथी ॥ ३

नर्मदा तु सरिच्छ्रेष्ठा पर्वतेऽमरकण्टके । यमुना संगता तत्र[1] प्रभासे तु सरस्वती ॥ ४

कृष्णा भीमरथी चैव तुङ्गभद्रा तु नारद । तिसृणां संगमो यत्र तत्तीर्थं मुक्तिदं नृणाम्[2] ॥ ५

पयोष्णी संगता यत्र[3] तत्रत्या[4] तच्च मुक्तिदम् । इयं तु गौतमी वत्स यत्र क्वापि ममाऽऽज्ञया ॥ ६

सर्वेषां सर्वदा नृणां[5] स्नानान्मुक्तिं प्रदास्यति । किंचित्काले पुण्यतमं किंचित्तीर्थं सुरागमे ॥ ७

सर्वेषां सर्वदा तीर्थं गौतमी नात्र संशयः । तिस्रः कोट्योऽर्धकोटी च योजनानां शतद्वये ॥ ८

तीर्थानि मुनिशार्दूल संभविष्यन्ति गौतम । इयं माहेश्वरी गङ्गा गौतमी वैष्णवीति च ॥ ९

ब्राह्मी गोदावरी नन्दा सुनन्दा कामदायिनी । ब्रह्मतेजःसमानीता सर्वपापप्रणाशनी ॥ १०

स्मरणादेव पापौघहर्त्री मम सदा प्रिया । पञ्चानामपि भूतानामापः श्रेष्ठत्वमागताः ॥ ११

तत्रापि तीर्थभूतास्तु तस्मादापः पराः स्मृताः । तासां भागीरथी श्रेष्ठा ताभ्योऽपि गौतमी तथा ॥

आनीता सजटा गङ्गा अस्या नान्यच्छुभावहम् । स्वर्गे भुवि तले वाऽपि तीर्थं सर्वार्थदं मुने ॥

ब्रह्मोवाच—

इत्येतत्कथितं पुत्र गौतमाय महात्मने । साक्षाद्धरेण तुष्टेन मया तव निवेदितम् ॥ १४

---

* इदमधिकम् ।

---

१ घ. यत्र । २ घ. स्मृतम् । ३ क. तत्र । ४ क. तपत्या । ५ क. °णां नाम्ना मुक्तिं ।

एवं सा गौतमी गङ्गा सर्वेभ्योऽप्यधिका मता। तत्स्वरूपं च कथितं कुतोऽन्या श्रवणस्पृहा ॥१९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

गौतमीमाहात्म्येऽष्टमोऽध्यायः ॥ ८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४९११

अथाष्टसप्ततितमोऽध्यायः।

नारद उवाच—

द्विविधा सैव गदिता एकाऽपि सुरसत्तम। एको भेदस्तु कथितो ब्राह्मणेनाऽऽहृतो यतः ॥ १

क्षत्रियेणापरोऽप्यंशो जटास्वेव व्यवस्थितः। भवस्य देवदेवस्य आहृतस्तद्वदस्व मे ॥ २

ब्रह्मोवाच—

वैवस्वतान्वये जात इक्ष्वाकुकुलसंभवः। पुरा वै सगरो नाम राजाऽऽसीदतिधार्मिकः ॥ ३

यज्वा दानपरो नित्यं धर्माचारविचारवान्। तस्य भार्याद्वयं चाऽऽसीत्पतिभक्तिपरायणम् ॥ ४

तस्य वै संततिर्नाभूदिति चिन्तापरोऽभवत्। वसिष्ठं गृहमाहूय संपूज्य विधिवत्ततः ॥ ५

उवाच वचनं राजा संततेः कारणं प्रति। इति तद्वचनं श्रुत्वा ध्यात्वा राजानमब्रवीत् ॥ ६

वसिष्ठ उवाच—

सपत्नीकः सदा राजन्नृषिपूजापरो भव ॥ ७

ब्रह्मोवाच—

इत्युक्त्वा स मुनिर्विप्र यथास्थानं जगाम ह। एकदा तस्य राजर्षेर्गृहमागात्तपोनिधिः ॥ ८

तस्यर्षेः पूजनं चक्रे स संतुष्टोऽब्रवीद्वचः। वरं ब्रूहि महाभागेत्युक्ते पुत्रान्स चाऽऽवृणोत् ॥ ९

स मुनिः प्राह राजानमेकस्यां वंशधारकः। पुत्रो भूयात्तथाऽन्यस्यां षष्टिसाहस्रकं सुताः ॥ १०

वरं दत्त्वा मुनौ याते पुत्रा जाताः सहस्रशः। स यज्ञान्सुबहूंश्चक्रे हयमेधान्सुदक्षिणान् ॥ ११

एकस्मिन्हयमेधे वै दीक्षितो विधिवन्नृपः। पुत्रान्व्ययोजयद्राजा ससैन्यान्हयरक्षणे ॥ १२

क्वचिदन्तरमासाद्य हयं जह्रे शतक्रतुः। मार्गमाणाश्च ते पुत्रा नैवापश्यन्हयं तदा ॥ १३

सहस्राणां तथा षष्टिर्नानायुद्धविशारदाः। तेषु पश्यत्सु रक्षांसि पुत्रेषु सगरस्य हि ॥ १४

प्रोक्षितं तद्धयं नीत्वा ते रसातलमागमन्। राक्षसान्मायया युक्तान्नैवापश्यन्त सागराः ॥ १५

न दृष्ट्वा ते हयं पुत्राः सगरस्य बलीयसः। इतश्चेतश्चरन्तस्ते नैवापश्यन्हयं तदा ॥ १६

देवलोकं तदा जग्मुः पर्वतांश्च सरांसि च। वनानि च विचिन्वन्तो नैवापश्यन्हयं तदा ॥ १७

कृतस्वस्त्ययनो राजा ऋत्विग्भिः कृतमङ्गलः। अदृष्ट्वा तु पशुं रम्यं राजा चिन्तामुपेयिवान् १८

अटन्तः सागराः सर्वे[3] देवलोकमुपागमन्। हयं तमनुचिन्वन्तस्तत्रापि न हयोऽभवत् ॥ १९

ततो महीं समाजग्मुः पर्वतांश्च वनानि च। तत्रापि च हयं नैव दृष्टवन्तो नृपात्मजाः ॥ २०

एतस्मिन्नन्तरे तत्र दैवी वागभवत्तदा। रसातले हयो बद्ध आस्ते नान्यत्र सागराः ॥ २१

इति श्रुत्वा ततो वाक्यं गन्तुकामा रसातलम्। अखनन्पृथिवीं सर्वां परितः सागरास्ततः ॥ २२

---

१ घ. मतः। २ घ. अथ ते सा॰। ३ क. ॰र्वे लोकपालमु॰।

ते क्षुधार्ता मृदं शुष्कां भक्षयन्तस्त्वहर्निशम् । न्यखनंश्चापि जग्मुश्च सत्वरास्ते रसातलम् ॥ २३
तानागतान्भूपसुतान्सागरान्बलिनः कृतीन् । श्रुत्वा रक्षांसि संत्रस्ता व्यगमन्कपिलान्तिकम् ॥ २४
कपिलोऽपि महाप्राज्ञस्तत्र शेते रसातले । पुरा च साधितं तेन देवानां कार्यमुत्तमम् ॥ २५
विनिद्रेण ततः श्रान्तः सिद्धे कार्ये सुरान्प्रति । अब्रवीत्कपिलः श्रीमान्निद्रास्थानं प्रयच्छथ(त)॥
रसातलं ददुस्तस्मै पुनराह सुरान्मुनिः । यो मामुत्थापयेन्मन्दो भस्मी भूयाच्च सत्वरम् ॥ २७
ततः शये तलगतो नो चेन्न स्वप्न एव हि । तथेत्युक्तः सुरगणैस्तत्र शेते रसातले ॥ २८
तस्य प्रभावं ते ज्ञात्वा राक्षसा मायया युताः । सागराणां च सर्वेषां वधोपायं प्रचक्रिरे ॥ २९
विना युद्धेन ते भीता राक्षसाः सत्वरास्तदा । आगत्य यत्र स मुनिः कपिलः कोपनो महान् ॥
शिरोदेशे हयं ते वै बद्ध्वाऽथ त्वरयाऽन्विताः । दूरे स्थित्वा मौनिनश्च प्रेक्षन्तः किं भवेदिति॥
ततस्तु सागराः सर्वे निर्विशन्तो रसातलम् । ददृशुस्ते हयं बद्धं शयानं पुरुषं तथा ॥ ३२
तं मेनिरे च हर्तारं क्रतुहन्तारमेव च । एनं हत्वा महापापं नयामोऽश्वं नृपान्तिकम् ॥ ३३
केचिदूचुः पशुं बद्धं नयामोऽनेन किं फलम् । तदाऽऽहुरपरे शूरा राजानः शासका वयम् ॥ ३४
उत्थाप्यैनं महापापं हन्मः क्षात्रेण वर्चसा । ते तं जघ्नुर्मुनिं पादैर्ब्रुवन्तो निष्ठुराणि च ॥ ३५
ततः कोपेन महता कपिलो मुनिसत्तमः । सागरानीक्षयामास तान्कोपाद्भस्मसात्करोत् ॥ ३६
जज्वलुस्ते ततस्तत्र सागराः सर्व एव हि । तत्तु सर्वं न जानाति दीक्षितः सगरो नृपः ॥ ३७
नारदः कथयामास सगराय महात्मने । कपिलस्य तु संस्थानं हयस्यापि तु संस्थितिम् ॥ ३८
राक्षसानां तु विकृतिं सागराणां च नाशनम् । ततश्चिन्तापरो राजा कर्तव्यं नावबुध्यत ॥ ३९
अपरोऽपि सुतश्चाऽऽसीदसमञ्जा इति श्रुतः । स तु बालांस्तथा पौरान्मौर्ख्यात्क्षिपति चाम्भसि
सगरोऽप्यथ विज्ञप्तः पौरैः संमिलितैस्तदा । दुर्नयं तस्य तं ज्ञात्वा ततः क्रुद्धोऽब्रवीन्नृपः ॥ ४१
स्वानमात्यांस्तदा राजा देशत्यागं करोत्वयम् । असमञ्जाः क्षत्रधर्मत्यागी वै बालघातकः॥ ४२
सगरस्य तु तद्वाक्यं श्रुत्वाऽमात्यास्त्वरान्विताः । तत्यजुर्नृपतेः पुत्रमसमञ्जा गतो वनम् ॥ ४३
सागरा ब्रह्मशापेन नष्टाः सर्वे रसातले । एकोऽपि च वनं प्राप्त इदानीं का गतिर्मम ॥ ४४
अंशुमानिति विख्यातः पुत्रस्तस्यासमञ्जसः । आनाय्य बालकं राजा कार्यं तस्मै न्यवेदयत् ४५
कपिलं च समाराध्य अंशुमानपि बालकः । सगराय हयं प्रादात्ततः पूर्णोऽभवत्क्रतुः ॥ ४६
[*तस्यापि पुत्रस्तेजस्वी दिलीप इति धार्मिकः] । तस्यापि पुत्रो मतिमान्भगीरथ इति श्रुतः ॥
पितामहानां सर्वेषां गतिं श्रुत्वा सुदुःखितः । सगरं नृपशार्दूलं पप्रच्छ विनयान्वितः ॥ ४८
सागराणां तु सर्वेषां निष्कृतिस्तु कथं भवेत् । भगीरथं नृपः प्राह कपिलो वेत्ति पुत्रक ॥ ४९
तस्य तद्वचनं श्रुत्वा बालः प्रायाद्रसातलम् । कपिलं च नमस्कृत्वा सर्वं तस्मै न्यवेदयत् ॥ ५०
स मुनिस्तु चिरं ध्यात्वा तपसाऽऽराध्य शंकरम् । जटाजलेन स्वपितॄनाप्लाव्य नृपसत्तम ॥ ५१
ततः कृतार्थो भविता त्वं च ते पितरस्तथा । तथा करोमीति मुनिं प्रणम्य पुनरब्रवीत् ॥ ५२
क्व गच्छेऽहं मुनिश्रेष्ठ कर्तव्यं चापि तद्वद ॥ ५३

कपिल उवाच—

कैलासं तं नरश्रेष्ठ गत्वा स्तुहि महेश्वरम् । तपः कुरु यथाशक्ति ततश्चेप्सितमाप्स्यसि ॥ ५४

---

* इदमर्धं घ. पुस्तके नास्ति ।

ब्रह्मोवाच—

तच्छ्रुत्वा स मुनेर्वाक्यं मुनिं नत्वा त्वगान्नगम् । कैलासं स शुचिर्भूत्वा बालो बालक्रियान्वितः
तपसे निश्चयं कृत्वा उवाच स भगीरथः ॥ ५५

भगीरथ उवाच—

बालोऽहं बालबुद्धिश्च बालचन्द्रधर प्रभो । नाहं किमपि जानामि ततः प्रीतो भव प्रभो ॥ ५६

वाग्भिर्मनोभिः कृतिभिः कदाचिन्ममोपकुर्वन्ति हिते रता ये ।
तेभ्यो हितार्थं त्विह चामरेश सोमं नमस्यामि सुरादिपूज्यम् ॥ ५७
उत्पादितो यैरभिवर्धितश्च समानगोत्रश्च समानधर्मा ।
तेषामभीष्टानि शिवः करोतु बालेन्दुमौलिं प्रणतोऽस्मि नित्यम् ॥ ५८

ब्रह्मोवाच—

एवं तु ब्रुवतस्तस्य पुरस्तादभवच्छिवः । वरेण च्छन्दयानो वै भगीरथमुवाच ह ॥ ५९

शिव वाच—

यन्न साध्यं सुरगणैर्देयं तत्ते मया ध्रुवम् । वदस्व निर्भयो भूत्वा भगीरथ महामते ॥ ६०

ब्रह्मोवाच—

भगीरथः प्रणम्येशं हृष्टः प्रोवाच शंकरम् ॥ ६१

भगीरथ उवाच—

जटास्थितां पितॄणां मे पावनाय सरिद्वराम् । तामेव देहि देवेश सर्वमाप्तं ततो भवेत् ॥ ६२

ब्रह्मोवाच—

महेशोऽपि विहस्याथ भगीरथमुवाच ह ॥ ६३

शिव उवाच—

दत्ता मयेयं ते पुत्र पुनस्तां स्तुहि सुव्रत ॥ ६४

ब्रह्मोवाच—

तदेववचनं श्रुत्वा तदर्थं तु तपो महत् । स्तुतिं चकार गङ्गाया भक्त्या प्रयतमानसः ॥ ६५
तस्या अपि प्रसादं च प्राप्य बालोऽप्यबालवत् । गङ्गां महेश्वरात्प्राप्तामादायागाद्रसातलम्॥ ६६
न्यवेदयत्स मुनये कपिलाय महात्मने । यथोदितप्रकारेण गङ्गां संस्थाप्य यत्नतः ॥ ६७
प्रदक्षिणमथाऽऽवर्त्य कृताञ्जलिपुटोऽब्रवीत् ॥ ६८

भगीरथ उवाच—

देवि मे पितरः शापात्कपिलस्य महामुनेः । प्राप्तास्ते विगतिं मातस्तस्मात्तान्पातुमर्हसि ॥ ६९

ब्रह्मोवाच—

तथेत्युक्त्वा सुरनदी सर्वेषामुपकारिका । लोकानामुपकारार्थं पितॄणां पावनाय च ॥ ७०
अगस्त्यपीतस्याम्भोधेः पूरणाय विशेषतः । स्मरणादेव पापानां नाशाय सुरनिम्नगा ॥ ७१
भगीरथोदितं चक्रे रसातलतले स्थितान् । भस्मीभूतान्नृपसुतान्सागरांश्च विशेषतः ॥ ७२
विनिर्दग्धानथाऽऽप्लाव्य खातपूरमथाकरोत् । ततो मेरुं समाप्लाव्य स्थितां बालोऽब्रवीन्नृपः ७३

---

१ घ. °यामास भ° ।

कर्मभूमौ त्वया भाव्यं तथेत्यागाद्धिमालयम् । हिमवत्पर्वतात्पुण्याद्भारतं वर्षमभ्यगात् ॥ ७४
तन्मध्यतः पुण्यनदी प्रायात्पूर्वार्णवं प्रति । एवमेषाऽपि ते प्रोक्ता गङ्गा क्षात्रा महामुने ॥ ७५
माहेश्वरी वैष्णवी च सैव ब्राह्मी च पावनी । भागीरथी देवनदी हिमवच्छिखराश्रया ॥ ७६
महेश्वरजटावारि एवं द्वैविध्यमागतम् । विन्ध्यस्य दक्षिणे गङ्गा गौतमी सा निगद्यते ॥
उत्तरे साऽपि विन्ध्यस्य भागीरथ्यभिधीयते ॥ ७७

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे भागीरथ्यवतरणं नामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

गौतमीमाहात्म्ये नवमोऽध्यायः ॥ ९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—४९८८

अथोनाशीतितमोऽध्यायः ।

नारद उवाच—

न मनस्तृप्तिमाधत्ते कथाः शृण्वत्त्वयेरिताः । पृथक्तीर्थफलं श्रोतुं प्रवृत्तं मम मानसम् ॥ १
क्रमशो ब्राह्मणानीतां गङ्गां मे प्रथमं वद । पृथक्तीर्थफलं पुण्यं सेतिहासं यथाक्रमम् ॥ २

ब्रह्मोवाच—

तीर्थानां च पृथग्भावं फलं माहात्म्यमेव च । सर्वं वक्तुं न शक्नोमि न च त्वं श्रवणे क्षमः ॥ ३
तथाऽपि किंचिद्वक्ष्यामि शृणु नारद यत्नतः ।[*यान्युक्तानि च तीर्थानि श्रुतिवाक्यानि यानि च]
तानि वक्ष्यामि संक्षेपान्नमस्कृत्वा त्रिलोचनम् । यत्रासौ भगवानासीत्प्रत्यक्षस्त्र्यम्बको मुने ॥ ५
त्र्यम्बकं नाम तत्तीर्थं भुक्तिमुक्तिप्रदायकम् । वाराहमपरं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥ ६
तस्य रूपं प्रवक्ष्यामि नाम विष्णोर्यथाऽभवत् । पुरा देवान्पराभूय यज्ञमादाय राक्षसः ॥ ७
रसातलमनुप्राप्तः सिन्धुसेन इति श्रुतः । यज्ञे तलमनुप्राप्ते निर्यज्ञा ह्यभवन्मही ॥ ८
नायं लोकोऽस्ति न परो यज्ञे नष्ट इतीत्वराः । सुरास्तमेव विविशू रसातलमनुद्विपम् ॥ ९
नाशक्नुवंस्तु तं जेतुं देवा इन्द्रपुरोगमाः । विष्णुं पुराणपुरुषं गत्वा तस्मै न्यवेदयन् ॥ १०
राक्षसस्य तु तत्कर्म यज्ञभ्रंशमशेषतः । ततः प्रोवाच भगवान्वाराहं वपुरास्थितः ॥ ११
शङ्खचक्रगदापाणिर्गत्वा चैव रसातलम् । आनयिष्ये मखं पुण्यं हत्वा राक्षसपुंगवान् ॥ १२
स्वः प्रयान्तु सुराः सर्वे व्येतु वो मानसो ज्वरः । येन गङ्गा तलं प्राप्ता पथा तेनैव चक्रधृक् १३
जगाम तरसा पुत्र भुवं भित्त्वा रसातलम् । स वराहवपुः श्रीमान्रसातलनिवासिनः ॥ १४
राक्षसान्दानवान्हत्वा मुखे धृत्वा महाध्वरम् । वाराहरूपी भगवान्मखमादाय यज्ञभुक् ॥ १५
येन प्राप तलं विष्णुः पथा तेनैव शत्रुजित् । मुखे न्यस्य महायज्ञं निश्चक्राम रसातलात् ॥ १६
तत्र ब्रह्मगिरौ देवाः प्रतीक्षां चक्रिरे हरेः । पथस्तस्माद्विनिःसृत्य गङ्गास्रवणमभ्यगात् ॥ १७
प्रक्षालयच्च स्वाङ्गानि असृग्लिप्तानि नारद । गङ्गाम्भसा तत्र कुण्डं वाराहमभवत्ततः ॥ १८
मुखे न्यस्तं महायज्ञं देवानां पुरतो हरिः । दत्तवांस्त्रिदशश्रेष्ठो मुखाद्यज्ञोऽभ्यजायत ॥ १९

---

* एतदर्धस्थाने घ. पुस्तके 'अश्वमेधादिपुण्यानि सर्वोत्कृष्टानि यानि हि' इत्यर्धं दृश्यते ।

ततः प्रभृति यज्ञाङ्गं प्रधानं स्रुव उच्यते । वाराहरूपमभवदेवं वै कारणान्तरात् ॥ २०
तस्मात्पुण्यतमं तीर्थं वाराहं सर्वकामदम् । तत्र स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ २१
तत्र स्थितोऽपि यः कश्चित्पितॄन्स्मरति पुण्यकृत् । विमुक्ताः सर्वपापेभ्यः पितरः स्वर्गमाप्नुयुः ॥

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये वराहतीर्थवर्णनं नामोनाशीतितमोऽध्यायः ॥ ७९ ॥

गौतमीमाहात्म्ये दशमोऽध्यायः ॥ १० ॥

आदितः श्लोकानां समष्ट्यङ्काः—५०१०

अथाशीतितमोऽध्यायः ।

ब्रह्मोवाच—

कुशावर्तस्य माहात्म्यमहं वक्तुं न ते क्षमः । तस्य स्मरणमात्रेण कृतकृत्यो भवेन्नरः ॥ १
कुशावर्तमिति ख्यातं नराणां सर्वकामदम् । कुशेनाऽऽवर्तितं यत्र गौतमेन महात्मना ॥ २
कुशेनाऽऽवर्तयित्वा तु आनयामास तां मुनिः । तत्र स्नानं च दानं च पितॄणां तृप्तिदायकम् ॥ ३
नीलगङ्गा सरिच्छ्रेष्ठा निःसृता नीलपर्वतात् । तत्र स्नानादि यत्किंचित्करोति प्रयतो नरः ॥ ४
सर्वं तदक्षयं विद्यात्पितॄणां तृप्तिदायकम् । विश्रुतं त्रिषु लोकेषु कपोतं तीर्थमुत्तमम् ॥ ५
तस्य रूपं च वक्ष्यामि मुने शृणु महाफलम् । तत्र ब्रह्मगिरौ कश्चिद्व्याधः परमदारुणः ॥ ६
हिनस्ति ब्राह्मणान्साधून्यतीन्गोपक्षिणो मृगान् । एवंभूतः स पापात्मा क्रोधनोऽनृतभाषणः ७
भीषणाकृतिरत्युग्रो नीलाक्षो ह्रस्वबाहुकः । दन्तुरो नष्टनासाक्षो ह्रस्वपात्पृथुकुक्षिकः ॥ ८
ह्रस्वोदरो ह्रस्वभुजो विकृतो गर्दभस्वनः । पाशहस्तः पापचित्तः पापिष्ठः सधनुः सदा ॥ ९
तस्य भार्या तथाभूता अपत्यान्यपि नारद । तया तु प्रेर्यमाणोऽसौ विवेश गहनं वनम् ॥ १०
स जघान मृगान्पापः पक्षिणो बहुरूपिणः । पञ्जरे प्राक्षिपत्कांश्चिज्जीवमानांस्तथेतरान् ॥ ११
क्षुधया परितप्ताङ्गो विह्वलस्तृषया तथा । भ्रान्तदेशो बहुतरं न्यवर्तत गृहं प्रति ॥ १२
ततोऽपराह्णे संप्राप्ते निवृत्ते मधुमाधवे । क्षणात्तडिद्गर्जितं च साभ्रं चैवाभवत्तदा ॥ १३
ववौ वायुः साश्मवर्षो वारिधारातिभीषणः । स गच्छल्लुँब्धकः श्रान्तः पन्थानं नावबुध्यत १४
जलं स्थलं गर्तमथो पन्थानमथवा दिशः । न बुबोध तदा पापः श्रान्तः शरणमप्यथ ॥ १५
क्व गच्छामि क्व तिष्ठेयं किं करोमीत्यचिन्तयत् । सर्वेषां प्राणिनां प्राणानाहर्ताऽहं यथाऽन्तकः ॥
ममाप्यन्तकरं भूतं संप्राप्तं चाश्मवर्षणम् । त्रातारं नैव पश्यामि शिलां वा वृक्षमन्तिके ॥ १७
एवं बहुविधं व्याधो विचिन्त्यापश्यदन्तिके । वने वनस्पतिमिव नक्षत्राणां यथाऽत्रिजम् ॥ १८
मृगाणां च यथा सिंहमाश्रमाणां गृहाधिपम् । इन्द्रियाणां मन इव त्रातारं प्राणिनां नगम् ॥ १९
श्रेष्ठं विटपिनं शुभ्रं शाखापल्लवमण्डितम् । तमाश्रित्योपविष्टोऽभूत्क्लिन्नवासा स लुब्धकः ॥ २०
स्मरन्भार्यामपत्यानि जीवेयुरथवा न वा । एतस्मिन्नन्तरे तत्र चास्तं प्राप्तो दिवाकरः ॥ २१
तमेव नगमाश्रित्य कपोतो भार्यया सह । पुत्रपौत्रैः परिवृतो ह्यास्ते तत्र नगोत्तमे ॥ २२
सुखेन निर्भयो भूत्वा सुतृप्तः प्रीत एव च । बहवो वत्सरा याता वसतस्तस्य पक्षिणः ॥ २३

१ घ. सयष्टिः ।

पतिव्रता तस्य भार्या सुप्रीता तेन चैव हि । कोटरे तन्नगे श्रेष्ठे जलवाय्वग्निवर्जिते ॥ २४
भार्यापुत्रैः परिवृतः सर्वदाऽऽस्ते कपोतकः । तस्मिन्दिने दैववशात्कपोतश्च कपोतकी ॥ २५
भक्ष्यार्थं तु उभौ यातौ कपोतो नगमभ्यगात् । साऽपि दैववशात्तत्र पञ्जरस्थैव वर्तते ॥ २६
गृहीता लुब्धकेनाथ जीवमानेव वर्तते । कपोतकोऽप्यपत्यानि मातृहीनान्युदीक्ष्य च ॥ २७
वर्षं च भीषणं प्राप्तमस्तं यातो दिवाकरः । स्वकोटरं तया हीनमालोक्य विललाप सः ॥ २८
तां बद्धां पञ्जरस्थां वा न बुबोध कपोतराट् । अन्वारेभे कपोतो वै प्रियाया गुणकीर्तनम् ॥२९
नाद्याप्यायाति कल्याणी मम हर्षविवर्धिनी । मम धर्मस्य जननी मम देहस्य चेश्वरी ॥ ३०
धर्मार्थकाममोक्षाणां सैव नित्यं सहायिनी । तुष्टे हसन्ती रुष्टे च मम दुःखप्रमार्जनी ॥ ३१
सखी मन्त्रेषु सा नित्यं मम वाक्यरता सदा । नाद्याप्यायाति कल्याणी संप्रयातेऽपि भास्करे ॥
न जानाति व्रतं मन्त्रं दैवं धर्मार्थमेव च । पतिव्रता पतिप्राणा पतिमन्त्रा पतिप्रिया ॥ ३३
नाद्याप्यायाति कल्याणी किं करोमि क्व यामि वा । किं मे गृहं काननं च तया हीनं हि दृश्यते
तया युक्तं श्रिया युक्तं भीषणं वाऽपि शोभनम् । नाद्याप्यायाति मे कान्ता यया गृहमुदीरितम्
विनाऽनया न जीविष्ये त्यजे वाऽपि प्रियां तनुम् । किं कुर्वन्तु त्वपत्यानि लुप्तधर्मस्त्वहं पुनः॥
एवं विलपतस्तस्य भर्तुर्वाक्यं निशम्य सा । पञ्जरस्थैव सा वाक्यं भर्तारमिदमब्रवीत् ॥ ३७

कपोतक्युवाच—

अत्राहमस्मि बद्धैव विवशाऽस्मि खगोत्तम । आनीताऽहं लुब्धकेन बद्धा पाशैर्महामते ॥ ३८
धन्याऽस्म्यनुगृहीताऽस्मि पतिर्वक्ति गुणान्मम । सतो वाऽप्यसतो वाऽपि कृतार्थाऽहं न संशयः
तुष्टे भर्तरि नारीणां तुष्टाः स्युः सर्वदेवताः । विपर्यये तु नारीणामवश्यं नाशमाप्नुयात् ॥ ४०
त्वं दैवं त्वं प्रभुर्मह्यं त्वं सुहृत्त्वं परायणम् । त्वं व्रतं त्वं परं ब्रह्म स्वर्गो मोक्षस्त्वमेव च ॥ ४१
मा चिन्तां कुरु कल्याण धर्मे बुद्धिं स्थिरां कुरु । त्वत्प्रसादाच्च भुक्ता हि भोगाश्च विविधा मया
अलं खेदेन मज्जेन धर्मे बुद्धिं कुरु स्थिराम् ॥ ४३

ब्रह्मोवाच—

इति श्रुत्वा प्रियावाक्यमुत्ततार नगोत्तमात् । यत्र सा पञ्जरस्था तु कपोती वर्तते त्वर(द्रुत)म्॥
तामागत्य प्रियां दृष्ट्वा मृतवच्चापि लुब्धकम् । मोचयामीति तामाह निश्चेष्टो लुब्धकोऽधुना ॥४५
मा मुञ्चस्व महाभाग ज्ञात्वा संबन्धमास्थिरम् । लुब्धानां खेचरा ह्यन्नं जीवो जीवस्य चाशनम्॥
नापराधं स्मराम्यस्य धर्मबुद्धिं स्थिरां कुरु । गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ॥ ४७
पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः । अभ्यागतमनुप्राप्तं वचनैस्तोषयन्ति ये ॥ ४८
तेषां वागीश्वरी देवी तृप्ता भवति निश्चितम् । तस्यान्नस्य प्रदानेन शक्रस्तृप्तिमवाप्नुयात् ॥ ४९
पितरः पादशौचेन अन्नाद्येन प्रजापतिः । तस्योपचाराद्धि लक्ष्मीर्विष्णुना प्रीतिमाप्नुयात् ॥ ५०
शयने सर्वदेवास्तु तस्मात्पूज्यतमोऽतिथिः । अभ्यागतमनुश्रान्तं सूर्योढं गृहमागतम् ॥
तं विद्याद्देवरूपेण सर्वक्रतुफलो ह्यसौ ॥ ५१

अभ्यागतं श्रान्तमनुव्रजन्ति देवाश्च सर्वे पितरोऽग्नयश्च ।
तस्मिन्हि तृप्ते मुदमाप्नुवन्ति गते निराशेऽपि च ते निराशाः ॥ ५२

तस्मात्सर्वात्मना कान्त दुःखं त्यक्त्वा शमं व्रज । कृत्वा तिष्ठ शुभां बुद्धिं धर्मकृत्यं समाचर ५३

उपकारोऽपकारश्च प्रवराविति संमतौ । उपकारिषु सर्वोऽपि करोत्युपकृतिं पुनः ॥ ५४
अपकारिषु यः साधुः पुण्यभाक्स उदाहृतः ॥ ५५

कपोत उवाच—

आवयोरनुरूपं च त्वयोक्तं साधु मन्यसे । किंतु वक्तव्यमप्यस्ति तच्छृणुष्व वरानने ॥ ५६
सहस्रं भरते कश्चिच्छतमन्यो दशापरः । आत्मानं च सुखेनान्यो वयं कष्टोदरंभराः ॥ ५७
गर्तधान्यधनाः केचित्कुशूलधनिनोऽपरे । घटक्षिप्तधनाः केचिच्चञ्चुक्षिप्तधना वयम् ॥ ५८
पूजयामि कथं श्रान्तमभ्यागतमिमं शुभे ॥ ५९

कपोत्युवाच—

अग्निरापः शुभा वाणी तृणकाष्ठादिकं च यत् । एतदप्यर्थिने देयं शीतार्तो लुब्धकस्त्वयम् ॥६०

ब्रह्मोवाच—

एतच्छ्रुत्वा प्रियावाक्यं वृक्षमारुह्य पक्षिराट् । आलोकयामास तदा वह्निं दूरं ददर्श ह ॥ ६१
स तु गत्वा वह्निदेशं चञ्चुनोल्मुकमाहरत् । पुरोऽग्निं ज्वालयामास लुब्धकस्य कपोतकः ॥ ६२
शुष्ककाष्ठानि पर्णानि तृणानि च पुनः पुनः । अग्नौ निक्षेपयामास निशीथे स कपोतराट् ॥६३
तमग्निं ज्वलितं दृष्ट्वा लुब्धकः शीतदुःखितः । अवशानि स्वकाङ्गानि प्रताप्य सुखमाप्तवान् ॥६४
क्षुधाग्निना दह्यमानं व्याधं दृष्ट्वा कपोतकी । मा मुञ्चस्व महाभाग इति भर्तारमब्रवीत् ॥ ६५
स्वशरीरेण दुःखार्तं लुब्धकं प्रीणयामि तम् । इष्टातिथीनां ये लोकास्तांस्त्वं प्राप्नुहि सुव्रत ॥६६

कपोत उवाच—

मयि तिष्ठति नैवायं तव धर्मो विधीयते । इष्टातिथिर्भवामीह अनुजानीहि मां शुभे ॥ ६७

ब्रह्मोवाच—

इत्युक्त्वाऽग्निं त्रिरावर्त्य स्मरन्देवं चतुर्भुजम् । विश्वात्मकं महाविष्णुं शरण्यं भक्तवत्सलम् ॥६८
यथासुखं जुषस्वेति वदन्नग्निं तथाऽऽविशत् । तं दृष्ट्वाऽग्नौ क्षिप्तजीवं लुब्धको वाक्यमब्रवीत् ॥६९

लुब्धक उवाच—

अहो मानुषदेहस्य धिग्जीवितमिदं मम । यदिदं पक्षिराजेन मदर्थे साहसं कृतम् ॥ ७०

ब्रह्मोवाच—

एवं ब्रुवन्तं तं लुब्धं पक्षिणी वाक्यमब्रवीत् ॥ ७१

कपोतक्युवाच—

मां त्वं मुञ्च महाभाग दूरं यात्येष मे पतिः ॥ ७२

ब्रह्मोवाच—

तस्यास्तद्वचनं श्रुत्वा पञ्जरस्थां कपोतकीम् । लुब्धको मोचयामास तरसा भीतवत्तदा ॥ ७३
साऽपि प्रदक्षिणं कृत्वा पतिमग्निं तदा जगौ ॥ ७४

कपोत्युवाच—

स्त्रीणामयं परो धर्मो यद्भर्तुरनुवेशनम् । वेदे च विहितो मार्गः सर्वलोकेषु पूजितः ॥ ७५
व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् । एवं त्वनुगता नारी सह भर्त्रा दिवं व्रजेत् ॥ ७६
तिस्रः कोट्योऽर्धकोटी च यानि रोमाणि मानुषे । तावत्कालं वसेत्स्वर्गे भर्तारं याऽनुगच्छति ॥
नमस्कृत्वा भुवं देवान्गङ्गां चापि वनस्पतीन् । आश्वास्य तान्यपत्यानि लुब्धकं वाक्यमब्रवीत् ७८

कपोत्युवाच—

त्वत्प्रसादान्महाभाग उपपन्नं ममेदृशम् । अपत्यानां क्षमस्वेह भर्त्रा यामि त्रिविष्टपम् ॥ ७९

ब्रह्मोवाच—

इत्युक्त्वा पक्षिणी साध्वी प्रविवेश हुताशनम् । प्रविष्टायां हुतवहे जयशब्दो न्यवर्तत ॥ ८०

गगने सूर्यसंकाशं विमानमतिशोभनम् । तदाऽऽरूढौ सुरनिभौ दंपती ददृशे ततः ॥ ८१

हर्षेण प्रोचतुरुभौ लुब्धकं विस्मयान्वितम् ॥ ८२

दंपती ऊचतुः—

गच्छावस्त्रिदशस्थानमापृष्टोऽसि महामते । आवयोः स्वर्गसोपानमतिथिस्त्वं नमोऽस्तु ते ॥ ८३

ब्रह्मोवाच—

विमानवरमारूढौ तौ दृष्ट्वा लुब्धकोऽपि सः । सधनुः पञ्जरं त्यक्त्वा कृताञ्जलिरभाषत ॥ ८४

लुब्धक उवाच—

न त्यक्तव्यो महाभागौ देयं किंचिदजानते । अहमत्रातिथिर्मान्यो निष्कृतिं वक्तुमर्हथः ॥ ८५

दंपती ऊचतुः—

गौतमीं गच्छ भद्रं ते तस्याः पापं निवेदय । तत्रैवाऽऽप्लवनात्पक्षं सर्वपापैर्विमोक्ष्यसे ॥ ८६

मुक्तपापः पुनस्तत्र गङ्गायामवगाहने । अश्वमेधफलं पुण्यं प्राप्य पुण्यो भविष्यसि ॥ ८७

सरिद्वरायां गौतम्यां ब्रह्मविष्ण्वीशसंभुवि । पुनराप्लवनादेव त्यक्त्वा देहं मलीमसम् ॥ ८८

विमानवरमारूढः स्वर्गं गन्ताऽस्यसंशयम् ॥ ८९

ब्रह्मोवाच—

तच्छ्रुत्वा वचनं ताभ्यां तथा चक्रे स लुब्धकः । विमानवरमारूढो दिव्यरूपधरोऽभवत् ॥ ९०

दिव्यमाल्याम्बरधरः पूज्यमानोऽप्सरोगणैः । कपोतश्च कपोती च तृतीयो लुब्धकस्तथा ॥

गङ्गायाश्च प्रभावेण सर्वे वै दिवमाक्रमन् ॥ ९१

ततः प्रभृति तत्तीर्थं कापोतमिति विश्रुतम् । तत्र स्नानं च दानं च पितृपूजनमेव च ॥ ९२

जपयज्ञादिकं कर्म तदानन्त्याय कल्पते ॥ ९३

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये कपोततीर्थवर्णनं नामाशीतितमोऽध्यायः ॥ ८० ॥

गौतमीमाहात्म्ये एकादशोऽध्यायः ॥ ११ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५१०२

अथैकाशीतितमोऽध्यायः ।

ब्रह्मोवाच—

कार्तिकेयं परं तीर्थं कौमारमिति विश्रुतम् । यन्नामश्रवणादेव कुलवान्रूपवान्भवेत् ॥ १

निहते तारके दैत्ये स्वस्थे जाते त्रिविष्टपे । कार्तिकेयं सुतं ज्येष्ठं प्रीत्या प्रोवाच पार्वती ॥ २

यथासुखं भुङ्क्ष्व भोगांस्त्रैलोक्ये मनसः प्रियान् । ममाऽऽज्ञया प्रीतमनाः पितुश्चैव प्रसादतः ॥ ३

एवमुक्तः स वै मात्रा विशाखो देवतास्त्रियः (?) । यथासुखं बलाद्रेमे देवपत्न्योऽपि रेमिरे ॥ ४

ततः संभुज्यमानासु देवपत्नीषु नारद । नाशक्नुवन्वारयितुं कार्तिकेयं दिवौकसः ॥ ५
ततो निवेदयामासुः पार्वत्यै पुत्रकर्म तत् । असकृद्वार्यमाणोऽपि मात्रा देवैः स शक्तिधृक् ॥ ६
नैवासावकरोद्वाक्यं स्त्रीष्वासक्तस्तु षण्मुखः । अभिशापभयाद्भीता पार्वती पर्यचिन्तयत् ॥ ७
पुत्रस्नेहात्तथैवेशा देवानां कार्यसिद्धये । देवपत्न्यश्चिरं रक्ष्या इति मत्वा पुनः पुनः ॥ ८
यस्यां तु रमते स्कन्दः पार्वती त्वपि तादृशी । तद्रूपमात्मनः कृत्वा वर्तयामास पार्वती ॥ ९
इन्द्रस्य वरुणस्यापि भार्यामाहूय षण्मुखः । यावत्पश्यति तस्यां तु मातृरूपमपश्यत ॥ १०
तामपास्य नमस्याथ पुनरन्यामथाऽऽह्वयत् । तस्यां तु मातृरूपं स प्रेक्ष्य लज्जामुपेयिवान् ॥ ११
एवं बह्वीषु तद्रूपं दृष्ट्वा मातृमयं जगत् । इति संचिन्त्य गाङ्गेयो वैराग्यमगमत्तदा ॥ १२
स तु मातृकृतं ज्ञात्वा प्रवृत्तस्य निवर्तनम् । निवार्यश्चेदहं भोगात्किंतु पूर्वं प्रवर्तितः ॥ १३
तस्मान्मातृकृतं सर्वं मम हास्यास्पदं त्विति । लज्जया परया युक्तो गौतमीमगमत्तदा ॥ १४
इयं च मातृरूपा मे शृणोतु मम भाषितम् । इतः स्त्रीनामधेयं यन्मम मातृसमं मतम् ॥ १५
एवं ज्ञात्वा लोकनाथः पार्वत्या सह शंकरः । पुत्रं निवारयामास वृत्तमित्यब्रवीद्गुरुः ॥ १६
ततः सुरपतिः प्रीतः किं ददामीति चिन्तयन् । कृताञ्जलिपुटः स्कन्दः पितरं पुनरब्रवीत् ॥ १७

स्कन्द उवाच—

सेनापतिः सुरपतिस्तव पुत्रोऽहमित्यपि । अलमेतेन देवेश किं वरैः सुरपूजित ॥ १८
अथवा दातुकामोऽसि लोकानां हितकाम्यया । याचेऽहं नाऽऽत्मना देव तदनुज्ञातुमर्हसि ॥ १९
महापातकिनः केचिद्गुरुदाराभिगामिनः । अत्राऽऽप्लवनमात्रेण धौतपापा भवन्तु ते ॥ २०
आप्नुवन्तूत्तमां जातिं तिर्यञ्चोऽपि सुरेश्वर । कुरूपो रूपसंपत्तिमत्र स्नानादवाप्नुयात् ॥ २१

ब्रह्मोवाच—

एवमस्त्विति तं शंभुः प्रत्यनन्दत्सुतेरितम् । ततः प्रभृति तत्तीर्थं कार्तिकेयमिति श्रुतम् ॥
तत्र स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ २२

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये कुमारतीर्थवर्णनं नामैकाशीतितमोऽध्यायः ॥ ८१ ॥

गौतमीमाहात्म्ये द्वादशोऽध्यायः ॥ १२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५१२४

अथ द्व्यशीतितमोऽध्यायः ।

ब्रह्मोवाच—

यत्ख्यातं कृत्तिकातीर्थं कार्तिकेयादनन्तरम् । तस्य श्रवणमात्रेण सोमपानफलं लभेत् ॥ १
पुरा तारकनाशाय भवरेतोऽपिबत्कविः । रेतोगर्भं कविं दृष्ट्वा ऋषिपत्न्योऽस्पृहन्मुने ॥ २
सप्तर्षीणामृतुस्नातां वर्जयित्वा त्वरुन्धतीम् । तासु गर्भः समभवत्षट्सु स्त्रीषु तदाऽग्नितः ॥ ३
तप्यमानास्तु शोभिष्ठा(?) ऋतुस्नातास्तु ता मुने । किं कुर्मः क्व नु गच्छामः किं कृत्वा सुकृतं भवेत्
इत्युक्त्वा ता मिथो गङ्गां व्यग्रा गत्वा व्यपीडयन् । ताभ्यस्ते निःसृता गर्भाः फेनरूपास्तदाऽम्भसि
अम्भसा त्वेकतां प्राप्ता वायुना सर्व एव हि । एकरूपस्तदा ताभ्यः षण्मुखः समजायत ॥ ६
स्रावयित्वा तु तान्गर्भानृषिपत्न्यो गृहान्ययुः । तासां विकृतरूपाणि दृष्ट्वा ते ऋषयोऽब्रुवन् ॥ ७

गम्यतां गम्यतां शीघ्रं स्वैरी वृत्तिर्न युज्यते । स्त्रीणामिति ततो वत्स निरस्ताः पतिभिस्तु ताः८
ततो दुःखं समाविष्टास्त्यक्ताः स्वपतिभिश्च षट् । ता दृष्ट्वा नारदः प्राह कार्तिकेयो हरोद्भवः ॥९
गाङ्गेयोऽग्निभवश्चेति विख्यातस्तारकान्तकः । तं यान्तु न चिरादेव प्रीतो भोगं प्रदास्यति ॥१०
देवर्षेर्वचनादेव समभ्येत्य च षण्मुखम् । कृत्तिकाः स्वयमेवैतद्यथावृत्तं न्यवेदयत् ॥ ११
ताभ्यो वाक्यं कृत्तिकाभ्यः कार्तिकेयोऽनुमन्य च । गौतमीं यान्तु सर्वाश्च स्नात्वाऽऽपूज्य महेश्वरम् ॥ १२
एष्यामि चाहं तत्रैव यास्यामि सुरमन्दिरम् । तथेत्युक्त्वा कृत्तिकाश्च स्नात्वा गङ्गां च गौतमीम्
देवेश्वरं च संपूज्य कार्तिकेयानुशासनात् । देवेश्वरप्रसादेन प्रययुः सुरमन्दिरम् ॥ १४
ततः प्रभृति तत्तीर्थं कृत्तिकातीर्थमुच्यते । कार्तिक्यां कृत्तिकायोगे तत्र यः स्नानमाचरेत् ॥ १५
सर्वक्रतुफलं प्राप्य राजा भवति धार्मिकः । तत्तीर्थस्मरणं वाऽपि यः करोति शृणोति च ॥
सर्वपापविनिर्मुक्तो दीर्घमायुरवाप्नुयात् ॥ १६

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये कृत्तिकातीर्थवर्णनं नाम
द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

गौतमीमाहात्म्ये त्रयोदशोऽध्यायः ॥ १३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५१४०

अथ त्र्यशीतितमोऽध्यायः ।

ब्रह्मोवाच—

दशाश्वमेधिकं तीर्थं तच्छृणुष्व महामुने । यस्य श्रवणमात्रेण हयमेधफलं लभेत् ॥ १
विश्वकर्मसुतः श्रीमान्विश्वरूपो महाबलः । तस्यापि प्रथमः पुत्रस्तत्पुत्रो भौवनो विभुः ॥ २
पुरोधाः कश्यपस्तस्य सर्वज्ञानविशारदः । तमपृच्छन्महाबाहुर्भौवनः सार्वभौवनः ॥ ३
यक्ष्येऽहं हयमेधैश्च युगपद्दशभिर्मुने । इत्यपृच्छद्गुरुं विप्रं क्व यक्ष्यामि सुरानिति ॥ ४
सोऽवदद्देवयजनं तत्र तत्र नृपोत्तम । यत्र यत्र द्विजश्रेष्ठाः प्रावर्तन्त महाक्रतून् ॥ ५
तत्राभवन्नृषिगणा आर्त्विज्ये मखमण्डले । युगपद्दशमेधानि प्रवृत्तानि पुरोधसा ॥ ६
पूर्णतां नाऽऽययुस्तानि दृष्ट्वा चिन्तापरो नृपः । विहाय देवयजनं पुनरन्यत्र तान्क्रतून् ॥ ७
उपाक्रामत्तथा तत्र विघ्नदोषास्तमाययुः । दृष्ट्वाऽपूर्णांस्ततो यज्ञान्राजा गुरुमभाषत ॥ ८

राजोवाच—

देशदोषात्कालदोषान्मम दोषात्तवापि वा । पूर्णतां नाऽऽप्नुवन्ति स्म दशमेधानि वाजिनः ॥ ९

ब्रह्मोवाच—

ततश्च दुःखितो राजा कश्यपेन पुरोधसा । गीष्पतेर्भ्रातरं ज्येष्ठं गत्वा संवर्तमूचतुः ॥ १०

कश्यपभौवनावूचतुः—

भगवन्युगपत्कार्याण्यश्वमेधानि मानद । दश संपूर्णतां यान्ति तं देशं तं गुरुं वद ॥ ११

ब्रह्मोवाच—

ततो ध्यात्वा ऋषिश्रेष्ठः संवर्तो भौवनं तदा । अब्रवीद्गच्छ ब्रह्माणं गुरुं देशं वदिष्यति ॥ १२

भौवनोऽपि महाप्राज्ञः कश्यपेन महात्मना । आगत्य मामब्रवीच्च गुरुं देशादिकं च यत् ॥ १३
ततोऽहमब्रवं पुत्र भौवनं कश्यपं तथा । गौतमीं गच्छ राजेन्द्र स देशः क्रतुपुण्यवान् ॥ १४
अयमेव गुरुः श्रेष्ठः कश्यपो वेदपारगः । गुरोरस्य प्रसादेन गौतम्याश्च प्रसादतः ॥ १५
एकेन हयमेधेन तत्र स्नानेन वा पुनः । सेत्स्यन्ति तत्र यज्ञाश्च दशमेधानि वाजिनः ॥ १६
तच्छ्रुत्वा भौवनो राजा गौतमीतीरमभ्यगात् । कश्यपेन सहायेन हयमेधाय दीक्षितः ॥ १७
ततः प्रवृत्ते यज्ञेशे हयमेधे महाक्रतौ । संपूर्णे तु तदा राजा पृथिवीं दातुमुद्यतः ॥ १८
ततोऽन्तरिक्षे वागुच्चैरुवाच नृपसत्तमम् । पूजयित्वा स्थितं विप्रानृत्विजोऽथ सदस्पतीन् ॥ १९

आकाशवागुवाच—

पुरोधसे कश्यपाय सशैलवनकाननाम् । पृथिवीं दातुकामेन दत्तं सर्वं त्वया नृप ॥ २०
भूमिदानस्पृहां त्यक्त्वा अन्नं देहि महाफलम् । नान्नदानसमं पुण्यं त्रिषु लोकेषु विद्यते ॥ २१
विशेषतस्तु गङ्गायाः श्रद्धया पुलिने मुने । त्वया तु हयमेधोऽयं कृतः सबहुदक्षिणः ॥
कृतकृत्योऽसि भद्रं ते नात्र कार्या विचारणा ॥ २२

ब्रह्मोवाच—

तथाऽपि दातुकामं तं मही प्रोवाच भौवनम् ॥ २३

पृथिव्युवाच—

विश्वकर्मज सार्वभौम मा मां देहि पुनः पुनः । निमज्जेऽहं सलिलस्य मध्ये तस्मान्न दीयताम् ॥

ब्रह्मोवाच—

ततश्च भौवनो भीतः किं देयमिति चाब्रवीत् । पुनश्चोवाच सा पृथ्वी भौवनं ब्राह्मणैर्वृतम् ॥२५

भूम्युवाच—

तिला गावो धनं धान्यं यत्किंचिद्गौतमीतटे । सर्वं तदक्षयं दानं किं मां भौवन दास्यसि ॥ २६
गङ्गातीरं समाश्रित्य ग्रासमेकं ददाति यः । तेनाहं सकला दत्ता किं मां भौवन दास्यसि ॥२७

ब्रह्मोवाच—

तद्भुवो वचनं श्रुत्वा भौवनः सार्वभौवनः । तथेति मत्वा विप्रेभ्यो ह्यन्नं प्रादात्सुविस्तरम् ॥२८
ततः प्रभृति तत्तीर्थं दशाश्वमेधिकं विदुः । दशानामश्वमेधानां फलं स्नानादवाप्यते ॥ २९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये दशाश्वमेधतीर्थवर्णनं नाम
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

गौतमीमाहात्म्ये चतुर्दशोऽध्यायः ॥ १४ ॥

श्लोकानामादितः समष्ट्यङ्काः—५१६९

अथ चतुरशीतितमोऽध्यायः ।

ब्रह्मोवाच—

पैशाचं तीर्थमपरं पूजितं ब्रह्मवादिभिः । तस्य स्वरूपं वक्ष्यामि गौतम्या दक्षिणे तटे ॥ १
गिरिर्ब्रह्मगिरेः पार्श्वे अञ्जनो नाम नारद । तस्मिञ्शैले मुनिवर शापभ्रष्टा वराप्सरा ॥ २
अञ्जना नाम तत्राऽऽसीदुत्तमाङ्गेन वानरी । केसरी नाम तद्भर्ता अद्रिकेति तथाऽपरा ॥ ३

साऽपि केसरिणो भार्या शापभ्रष्टा वराप्सरा । उत्तमाङ्गेन मार्जारी साऽप्यास्तेऽञ्जनपर्वते ॥ ४
दक्षिणार्णवमभ्यागात्केसरी लोकविश्रुतः । एतस्मिन्नन्तरेऽगस्त्योऽञ्जनं पर्वतमभ्यगात् ॥ ५
अञ्जना चाद्रिका चैव अगस्त्यमृषिसत्तमम् । पूजयामासतुरुभे यथान्यायं यथासुखम् ॥ ६
ततः प्रसन्नो भगवानाहोभे व्रियतां वरः । ते आहतुरुभेऽगस्त्यं पुत्रौ देहि मुनीश्वर ॥ ७
सर्वेभ्यो बलिनौ श्रेष्ठौ सर्वलोकोपकारकौ । तथेत्युक्त्वा मुनिश्रेष्ठो जगामाऽऽशां स दक्षिणाम्॥
ततः कदाचित्ते काले अञ्जना चाद्रिका तथा । गीतं नृत्यं च हास्यं च कुर्वत्यौ गिरिमूर्धनि ॥९
वायुश्च निर्ऋतिश्चापि ते दृष्ट्वा सस्मितौ सुरौ । कामाक्रान्तधियौ चोभौ तदा सत्वरमीयतुः १०
भार्ये भवेतामुभयोरावां देवौ वरप्रदौ । ते अप्यूचतुरस्त्वेतद्रेमाते गिरिमूर्धनि ॥ ११
अञ्जनायां तथा वायोर्हनुमान्समजायत । अद्रिकायां च निर्ऋतेरद्रिर्नाम पिशाचराट् ॥ १२
पुनस्ते आहतुरुभे पुत्रौ जातौ मुनेर्वरात् । आवयोर्विकृतं रूपमुत्तमाङ्गेन दूषितम् ॥ १३
शापाच्छचीपतेस्तत्र युवामाज्ञातुमर्हथः । ततः प्रोवाच भगवान्वायुश्च निर्ऋतिस्तथा ॥ १४
गौतम्यां स्नानदानाभ्यां शापमोक्षो भविष्यति । इत्युक्त्वा तावुभौ प्रीतौ तत्रैवान्तरधीयताम्॥
ततोऽञ्जनां समादाय अद्रिः पैशाचमूर्तिमान् । भ्रातुर्हनुमतः प्रीत्यै स्नापयामास मातरम् ॥ १६
तथैव हनुमान्गङ्गामादायाद्रिमतित्वरन् । मार्जाररूपिणीं नीत्वा गौतम्यास्तीरमाप्तवान् ॥ १७
ततः प्रभृति तत्तीर्थं पैशाचं चाऽऽञ्जनं तथा । ब्रह्मणो गिरिमासाद्य सर्वकामप्रदं शुभम् ॥ १८
योजनानां त्रिपञ्चाशन्मार्जारं पूर्वतो भवेत् । मार्जारसंज्ञितात्तस्माद्धनूमन्तं वृषाकपिम् (?) ॥ १९
फेनासंगममाख्यातं सर्वकामप्रदं शुभम् । तस्य स्वरूपं व्युष्टिश्च तत्रैव प्रोच्यते शुभा ॥ २०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये पैशाचतीर्थवर्णनं नाम
चतुरशीतितमोऽध्यायः ॥ ८४ ॥
गौतमीमाहात्म्ये पञ्चदशोऽध्यायः ॥ १५ ॥

श्लोकानामादितः समष्ट्यङ्काः—५१८९

अथ पञ्चाशीतितमोऽध्यायः ।

ब्रह्मोवाच—

क्षुधातीर्थमिति ख्यातं शृणु नारद तन्मनाः । कथ्यमानं महापुण्यं सर्वकामप्रदं नृणाम् ॥ १
ऋषिरासीत्पुरा कण्वस्तपस्वी वेदवित्तमः । परिभ्रमन्नाश्रमाणि क्षुधया परिपीडितः ॥ २
गौतमस्याऽऽश्रमं पुण्यं समृद्धं चान्नवारिणा । आत्मानं च क्षुधायुक्तं समृद्धं चापि गौतमम् ॥ ३
वीक्ष्य कण्वोऽथ वैषम्यं वैराग्यमगमत्तदा । गौतमोऽपि द्विजश्रेष्ठो ह्यहं तपसि निष्ठितः ॥ ४
समेन याच्ञाऽयुक्ता स्यात्तस्माद्गौतमवेश्मनि । न भोक्ष्येऽहं क्षुधार्तोऽपि पीडितेऽपि कलेवरे॥५
गच्छेयं गौतमीं गङ्गामर्जयेयं च संपदम् । इति निश्चित्य मेधावी गत्वा गङ्गां च पावनीम् ॥ ६
स्नात्वा शुचिर्यतमना उपविश्य कुशासने । तुष्टाव गौतमीं गङ्गां क्षुधां च परमापदम् ॥ ७

कण्व उवाच—

नमोऽस्तु गङ्गे परमार्तिहारिणि नमः क्षुधे सर्वजनार्तिकारिणि ।
नमो महेशानजटोद्भवे शुभे नमो महामृत्युमुखाद्विनिसृते ॥ ८

पुण्यात्मनां शान्तरूपे क्रोधरूपे दुरात्मनाम् । सरिद्रूपेण सर्वेषां तापपापापहारिणि ॥ ९
क्षुधारूपेण सर्वेषां तापपापप्रदे नमः । नमः श्रेयस्करि देवि नमः पापप्रमर्दिनि ॥
नमः शान्तिकरि देवि नमो दारिद्र्यनाशिनि ॥ १०

ब्रह्मोवाच—

इत्येवं स्तुवतस्तस्य पुरस्तादभवद्द्वयम् । एकं गाङ्गं मनोहारि ह्यपरं भीषणाकृति ॥
पुनः कृताञ्जलिर्भूत्वा नमस्कृत्वा द्विजोत्तमः ॥ ११

कण्व उवाच—

सर्वमङ्गलमाङ्गल्ये ब्राह्मि माहेश्वरि शुभे । वैष्णवि त्र्यम्बके देवि गोदावरि नमोऽस्तु ते ॥ १२
त्र्यम्बकस्य जटोद्भूते गौतमस्याघनाशिनि । सप्तधा सागरं यान्ति गोदावरि नमोऽस्तु ते ॥ १३
सर्वपापकृतां पापे धर्मकामार्थनाशिनि । दुःखलोभमयि देवि क्षुधे तुभ्यं नमो नमः ॥ १४

ब्रह्मोवाच—

तत्कण्ववचनं श्रुत्वा सुप्रीते आहतुर्द्विजम् ॥ १५

गङ्गाक्षुधे ऊचतुः—

अभीष्टं वद कल्याण वरान्वरय सुव्रत ॥ १६

ब्रह्मोवाच—

प्रोवाच प्रणतो गङ्गां कण्वः क्षुधां यथाक्रमम् ॥ १७

कण्व उवाच—

देहि देवि मनोज्ञानि कामानि विभवं मम । आयुर्वित्तं च भुक्तिं च मुक्तिं गङ्गे प्रयच्छ मे ॥ १८

ब्रह्मोवाच—

इत्युक्त्वा गौतमीं गङ्गां क्षुधां चाऽऽह द्विजोत्तमः ॥ १९

कण्व उवाच—

मयि मद्वंशजे चापि क्षुधे तृष्णे दरिद्रिणि । याहि पापतरे रूक्षे न भूयास्त्वं कदाचन ॥ २०
अनेन स्तवेन ये वै त्वां स्तुवन्ति क्षुधातुराः । तेषां दारिद्र्यदुःखानि न भवेयुर्वरोऽपरः ॥ २१
अस्मिंस्तीर्थे महापुण्ये स्नानदानजपादिकम् । ये कुर्वन्ति नरा भक्त्या लक्ष्मीभाजो भवन्तु ते ॥
यस्त्विदं पठते स्तोत्रं तीर्थे वा यदि वा गृहे । तस्य दारिद्र्यदुःखेभ्यो न भयं स्याद्वरोऽपरः २३

ब्रह्मोवाच—

एवमस्त्विति चोक्त्वा ते कण्वं याते स्वमालयम् । ततः प्रभृति तत्तीर्थं काण्वं गाङ्गं क्षुधाभिधम्॥
सर्वपापहरं वत्स पितॄणां प्रीतिवर्धनम् ॥ २५

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये क्षुधातीर्थवर्णनं नाम
पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

गौतमीमाहात्म्ये षोडशोऽध्यायः ॥ १६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५२१४

अथ षडशीतितमोऽध्यायः ।

ब्रह्मोवाच—

अस्ति ब्रह्मन्महातीर्थं चक्रतीर्थमिति श्रुतम् । तत्र स्नानान्नरो भक्त्या हरेर्लोकमवाप्नुयात् ॥ १
एकादश्यां तु शुक्लायामुपोष्य पृथिवीपते । गणिकासंगमे स्नात्वा प्राप्नुयादक्षयं पदम् ॥ २
पुरा तत्र यथा वृत्तं तन्मे निगदतः शृणु । आसीद्विश्वधरो नाम वैश्यो बहुधनान्वितः ॥ ३
उत्तरे वयसि श्रेष्ठस्तस्य पुत्रोऽभवद्दृषे । गुणवान्रूपसंपन्नो विलासी शुभदर्शनः ॥ ४
प्राणेभ्योऽपि प्रियः पुत्रः काले पञ्चत्वमागतः । तथा दृष्ट्वा तु तं पुत्रं दंपती दुःखपीडितौ ॥ ५
कुर्वाते स्म तदा तेन सहैव मरणे मतिम् । हा पुत्र हन्त कालेन पापेन सुदुरात्मना ॥ ६
यौवने वर्तमानोऽपि नीतोऽसि गुणसागर । आवयोश्च तथैव त्वं प्राणेभ्योऽपि सुदुर्लभः ॥ ७
इत्थं तु रुदितं श्रुत्वा दंपत्योः करुणं यमः । त्यक्त्वा निजपुरं तूर्णं कृपयाऽऽविष्टमानसः ॥ ८
गोदावर्याः शुभे तीरे स्थितो ध्यायञ्जनार्दनम् । अपि स्वल्पेन कालेन प्रजा वृद्धाः समन्ततः ९
इयत इति मे पृथ्वी कथ्यतां केन पूरिता(?) । न कश्चिन्म्रियते जन्तुर्भाराक्रान्ता वसुंधरा ॥१०
ततो देवी गता तूर्णं वसुधा मुनिसत्तम । यत्रास्ति सुरसंयुक्तः शक्रः परपुरंजयः ॥
दृष्ट्वा वसुंधरामिन्द्रः प्रणिपत्येदमब्रवीत् ॥ ११

इन्द्र उवाच—

किमागमनकार्यं त इति मे पृथ्वि कथ्यताम् ॥ १२

धरोवाच—

भारेण गुरुणा शक्र पीडिताऽहं विना वधम् । कारणं प्रष्टुमायाता किमिदं कथ्यतां मम ॥ १३

ब्रह्मोवाच—

इति श्रुत्वा महीवाक्यमिन्द्रो वचनमब्रवीत् ॥ १४

इन्द्र उवाच—

कारणं यदि नाम स्यात्तदानीं ज्ञायते मया । सुराणां हि पतिर्यस्मादहं सर्वासु(?) मेदिनि ॥१५

ब्रह्मोवाच—

अथ पृथ्वी तदा वाक्यं श्रुत्वा चाऽऽह शचीपतिम् । यम आदिश्यतां तर्हि यथा संहरते प्रजाः ॥
इति श्रुत्वा वचो मह्या आदिष्टाः सिद्धकिंनराः । यमस्याऽऽनयने शीघ्रं महेन्द्रेण महामुने ॥१७
ततस्ते सत्वरं याताः सर्वे वैवस्वतं पुरम् । नैवापश्यन्यमं तत्र ते सिद्धाः सह किंनरैः ॥
तथाऽऽगत्य पुनर्वेगाद्वार्ता शक्रे निवेदिता ॥ १८

सिद्धकिंनरा ऊचुः—

यमो यमपुरे नाथ अस्माभिर्नावलोकितः । महताऽपि सुयत्नेन वीक्ष्यमाणः समन्ततः ॥ १९

ब्रह्मोवाच—

इति श्रुत्वा वचस्तेषां पृष्टः शक्रेण वै तदा । सविता स पिता तस्य यमः कुत्राऽऽस्त इत्यथ २०

सूर्य उवाच—

शक्र गोदावरीतीरे कृतान्तो वर्ततेऽधुना । चरंस्तत्र तपस्तीव्रं न जाने किं नु कारणम् ॥ २१

ब्रह्मोवाच—

इति श्रुत्वा वचो भानोः शक्रः शङ्कामुपाविशत् ॥ २२

शक्र उवाच—

अहो कष्टं महाकष्टं नष्टा मे सुरनाथता । गोदावर्यां तपः कुर्याद्यमो वै दुष्टचेष्टितः ॥
जिघृक्षुर्मत्पदं नूनं देवा इति मतिर्मम ॥ २३

ब्रह्मोवाच—

इत्युक्त्वा सहसेन्द्रेण आहूतश्चाप्सरोगणः ॥ २४

इन्द्र उवाच—

का भवतीषु कालस्य स्थितस्य तपसि द्विषः । तपःप्रणाशने शक्ता इति मे शीघ्रमुच्यताम् ॥२५

ब्रह्मोवाच—

इति शक्रवचः श्रुत्वा नोचे काऽपि महामुने । अथ शक्रः प्रकोपेण प्रत्युवाचाप्सरोगणम् ॥ २६

इन्द्र उवाच—

उत्तरं नाब्रवीत्किंचिद्यामस्तर्हि वयं स्वयम् । सज्जा भवन्तु विबुधाः सैन्यैरायान्तु मा चिरम् ॥
घातयामो वयं शत्रुं तपसा स्वर्गकामुकम् ॥ २७

ब्रह्मोवाच—

इत्युक्ते सति देवानां सेना प्रादुर्बभूव ह । इतीन्द्रहृदयं ज्ञात्वा हरिणा लोकधारिणा ॥ २८
प्रेषितं चक्रिणा चक्रं रक्षणाय यमस्य हि । चक्रं यत्राभवत्तत्र चक्रतीर्थमनुत्तमम् ॥ २९
अथेन्द्रं मेनका प्राह शङ्कितेति वचस्तदा ॥ ३०

मेनकोवाच—

कालावलोकने नालं काचिदस्ति सुरेश्वर । मरणं च वरं देव भवतो न यमात्पुनः ॥ ३१
रूपयौवनमत्तेयं गणिकायाचनं प्रभो । प्रेषणं तत्प्रयच्छैषा स्वामित्वं मन्यते त्वया ॥ ३२

ब्रह्मोवाच—

इति श्रुत्वा वचस्तस्याः शक्रः सुरवरेश्वरः । आदिदेशाबलां क्षामां सत्कृत्य गणिकां तथा ३३

शक्र उवाच—

गणिके गच्छ मे कार्यं कुरु सुन्दरि मा चिरम् । कृतकृत्याऽऽगता भूयो वल्लभा मे यथा शची ३४

ब्रह्मोवाच—

इत्याकर्ण्य वचः शक्रादुत्पत्य गणिका दिशः । क्षणेन यमसांनिध्यमायाता चारुरूपिणी ॥ ३५
यमान्तिकमनुप्राप्ता द्योतयन्ती दिशो दश । सलीलं ललितं बाला जगौ हिन्दोलकंकलम्[चञ्चला]
ततश्चचाल कालस्य मनो लोलं चलाचलम् । अथोन्मील्य यमो नेत्रे कामपावकपूरिते ॥ ३७
तस्यां व्यापारयामास श्रेयःशत्रौ महामुने । ततो विलीय सा सद्यः सरित्त्वमगमत्तदा ॥ ३८
गौतम्यां तु समागम्य गणिकागणकिंकरैः । गीयमाना गता स्वर्गे तस्य तीर्थप्रभावतः ॥ ३९
गच्छन्तीं गणिकां दृष्ट्वा विमानस्थां दिवं प्रति । विस्मयं परमं प्राप्तः कालस्तरललोचनः ॥
अथाऽऽदित्येन चाऽऽगत्य एवमुक्तो यमस्तदा ॥ ४०

सूर्य उवाच—

कुरु पुत्र निजं कर्म प्रजानां त्वं परिक्षयम् । पश्य वातं सदा वान्तं सृजन्तं वेधसं प्रजाः ॥
पर्यटन्तं त्रिलोकीं मां वहन्तीं वसुधां प्रजाः ॥ ४१

ब्रह्मोवाच—

इति श्रुत्वा यमो वाक्यं पितुर्वचनमब्रवीत् ॥ ४२

यम उवाच—

एतन्न गर्हितं कर्म कुर्यामहमिदं ध्रुवम् । कर्मण्यस्मिन्महाक्रूरे समादेष्टुं न वाऽर्हसि ॥ ४३
इति श्रुत्वा च तद्वाक्यं भानुर्वचनमब्रवीत् । किं नाम गर्हितं कर्म तव कर्तुमलं यम ॥ ४४
किं न दृष्टा त्वया यान्ती गणिका गणकिंकरैः । गीयमाना दिवं सद्यो गौतमीतोयमाप्लुता ॥४५
त्वया चात्र तपस्तीव्रं कृतं पुत्र सुदुष्करम् । नैवान्तं तस्य पश्यामि तस्माद्गच्छ निजं पुरम् ॥४६
इत्युक्त्वा भगवान्भानुस्तत्र स्नात्वा गतो दिवम् । यमोऽपि संगमे स्नात्वा ततो निजपुरं ययौ ॥
भूतहाऽपि ततः शङ्कां तत्याज च महामुने । तथा दृष्ट्वा यमं यान्तं चक्रे चक्रं प्रयाणकम् ॥ ४८
भगवान्यत्र गोविन्दो वनमालाविभूषितः । इति यः शृणुयान्मर्त्यः पठेद्वाऽपि समाहितः ॥ ४९
आपदस्तस्य नश्यन्ति दीर्घमायुरवाप्नुयात् ॥ ५०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये चक्रतीर्थगणिकासंगमवर्णनं नाम
षडशीतितमोऽध्यायः ॥ ८६ ॥
गौतमीमाहात्म्ये सप्तदशोऽध्यायः ॥ १७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५२६४

अथ सप्ताशीतितमोऽध्यायः ।

ब्रह्मोवाच—

अहल्यासंगमं चेह तीर्थं त्रैलोक्यपावनम् । शृणु सम्यङ्मुनिश्रेष्ठ तत्र वृत्तमिदं यथा ॥ १
कौतुकेनातिमहता मया पूर्वं मुनीश्वर । सृष्टा कन्या बहुविधा रूपवत्यो गुणान्विताः ॥ २
तासामेकां श्रेष्ठतमां निर्ममे शुभलक्षणाम् । तां बालां चारुसर्वाङ्गीं दृष्ट्वा रूपगुणान्विताम् ॥ ३
को वाऽस्याः पोषणे शक्त इति मे बुद्धिराविशत् । न दैत्यानां सुराणां च न मुनीनां तथैव च
नास्त्यस्याः पोषणे शक्तिरिति मे बुद्धिरन्वभूत् । गुणज्येष्ठाय विप्राय तपोयुक्ताय धीमते ॥ ५
सर्वलक्षणयुक्ताय वेदवेदाङ्गवेदिने । गौतमाय महाप्राज्ञामददां पोषणाय ताम् ॥ ६
पालयस्व मुनिश्रेष्ठ यावदाप्स्यति यौवनम् । यौवनस्थां पुनः साध्वीमानयेथा ममान्तिकम् ॥ ७
एवमुक्त्वा गौतमाय प्रादां कन्यां सुमध्यमाम् । तामादाय मुनिश्रेष्ठ तपसा हतकल्मषः ॥ ८
तां पोषयित्वा विधिवदलंकृत्य ममान्तिकम् । निर्विकारो मुनिश्रेष्ठो ह्यहल्यामानयत्तदा ॥ ९
तां दृष्ट्वा विबुधाः सर्वे शक्राग्निवरुणादयः । मम देया सुरेशान इत्यूचुस्ते पृथक्पृथक् ॥ १०
तथैव मुनयः साध्या दानवा यक्षराक्षसाः । तान्सर्वानागतान्दृष्ट्वा कन्यार्थमथ संगतान् ॥ ११
इन्द्रस्य तु विशेषेण महांश्चाभूत्तदा ग्रहः । गौतमस्य तु माहात्म्यं गाम्भीर्यं धैर्यमेव च ॥ १२

स्मृत्वा सुविस्मितो भूत्वा ममैवमभवत्सुधीः । देयेयं गौतमायैव नान्ययोग्या शुभानना ॥ १३
तस्मा एव तु तां दास्ये तथाऽप्येवमचिन्तयम् । सर्वेषां च मतिर्धैर्यं मथितं बालयाऽनया ॥ १४
अहल्येति सुरैः प्रोक्तं[1] मया च ऋषिभिस्तदा । देवानृषींस्तदा वीक्ष्य मया तत्रोक्तमुच्चकैः ॥ १५
तस्मै सा दीयते सुभ्रूर्यः पृथिव्याः प्रदक्षिणाम् । कृत्वोपतिष्ठते पूर्वं न चान्यस्मै पुनः पुनः॥१६
ततः सर्वे सुरगणाः श्रुत्वा वाक्यं मयेरितम् । अहल्यार्थं सुरा जग्मुः पृथिव्याश्च प्रदक्षिणे ॥१७
गतेषु सुरसंघेषु गौतमोऽपि मुनीश्वर । प्रयत्नमकरोत्कंचिदहल्यार्थमिमं तथा ॥ १८
एतस्मिन्नन्तरे ब्रह्मन्सुरभिः सर्वकामधुक् । अर्धप्रसूता ह्यभवत्तां ददर्श स गौतमः ॥ १९
तस्याः प्रदक्षिणं चक्रे इयमुर्वीति संस्मरन् । लिङ्गस्य च सुरेशस्य प्रदक्षिणमथाकरोत् ॥ २०
तयोः प्रदक्षिणं कृत्वा गौतमो मुनिसत्तमः । सर्वेषां चैव देवानामेकं चापि प्रदक्षिणम् ॥ २१
नैवाभवद्ध्रुवो गन्तुः संजातं द्वितयं मम । एवं निश्चित्य स मुनिर्ममान्तिकमथाभ्यगात् ॥ २२
नमस्कृत्वाऽब्रवीद्वाक्यं गौतमो मां महामतिः । कमलासन विश्वात्मन्नमस्तेऽस्तु पुनः पुनः ॥ २३
प्रदक्षिणीकृता ब्रह्मन्मयेयं[2] वसुधाऽखिला । यदत्र युक्तं देवेश जानीते तद्भवान्स्वयम् ॥ २४
मया तु ध्यानयोगेन ज्ञात्वा गौतममब्रवम् । तवैव दीयते सुभ्रूः प्रदक्षिणमिदं कृतम् ॥ २५
धर्मं जानीहि विप्रर्षे दुर्ज्ञेयं निगमैरपि । अर्धप्रसूता सुरभिः सप्तद्वीपवती मही ॥ २६
कृता प्रदक्षिणा तस्याः पृथिव्याः सा कृता भवेत् । लिङ्गं प्रदक्षिणीकृत्य तदेव फलमाप्नुयात् २७
तस्मात्सर्वप्रयत्नेन मुने गौतम सुव्रत । तुष्टोऽहं तव धैर्येण ज्ञानेन तपसा तथा ॥ २८
दत्तेयमृषिशार्दूल कन्या लोकवरा मया । इत्युक्त्वाऽहं गौतमाय अहल्यामददां मुने ॥ २९
जाते विवाहे ते देवाः कृत्वेलायाः प्रदक्षिणम् । शनैः शनैरथाऽऽगत्य ददृशुः सर्व एव ते ॥ ३०
तं गौतममहल्यां च दांपत्यं प्रीतिवर्धनम् । ते चाऽऽगत्याथ पश्यन्तो विस्मिताश्चाभवन्सुराः ३१
अतिक्रान्ते विवाहे तु सुराः सर्वे[3] दिवं ययुः । समत्सरः शचीभर्ता तामीक्ष्य च दिवं ययौ॥३२
ततः प्रीतमनास्तस्मै गौतमाय महात्मने । प्रादां ब्रह्मगिरिं पुण्यं सर्वकामप्रदं शुभम् ॥ ३३
अहल्यायां मुनिश्रेष्ठो रेमे तत्र स गौतमः । गौतमस्य कथां पुण्यां श्रुत्वा शक्रस्त्रिविष्टपे ॥ ३४
तमाश्रमं तं च मुनिं तस्य भार्यामनिन्दिताम् । भूत्वा ब्राह्मणवेषेण द्रष्टुमागाच्छतक्रतुः ॥ ३५
स दृष्ट्वा भवनं तस्य भार्यां च विभवं तथा । पापीयसीं मतिं कृत्वा अहल्यां समुदैक्षत ॥ ३६
नाऽऽत्मानं न परं देशं कालं शापादृषेर्भयम् । न बुबोध तदा वत्स कामाकृष्टः शतक्रतुः ॥ ३७
तद्ध्यानपरमो नित्यं सुरराज्येन गर्वितः । संतप्ताङ्गः कथं कुर्यां प्रवेशो मे कथं भवेत् ॥ ३८
एवं वसन्विप्ररूपो नान्तरं त्वध्यगच्छत । स कदाचिन्महाप्राज्ञः कृत्वा पौर्वाह्णिकीं क्रियाम्॥३९
सहितो गौतमः शिष्यैर्निर्गतश्चाऽऽश्रमाद्बहिः । आश्रमं[4] गौतमीं विप्रान्धान्यानि[5] विविधानि च४०
द्रष्टुं गतो मुनिवर इन्द्रस्तं समुदैक्षत । इदमन्तरमित्युक्त्वा चक्रे कार्यं मनःप्रियम् ॥ ४१
रूपं कृत्वा गौतमस्य प्रियेप्सुः स शतक्रतुः । तां दृष्ट्वा[6] चारुसर्वाङ्गीमहल्यां वाक्यमब्रवीत् ॥ ४२

इन्द्र उवाच—

आकृष्टोऽहं तव गुणै रूपं स्मृत्वा स्खलत्पदः । इति ब्रुवन्हसन्हस्तमादायान्तः समाविशत् ॥ ४३

---

१ ग. प्रोक्ता । २ क. °येला द्विविधा पुनः । य° । ३ क. °र्वे गताः पुनः । स° । ४ घ. आश्रमे । ५ घ. °नि च वनानि । ६ घ. गत्वा ।

न बुबोध त्वहल्या तं जारं मेने तु गौतमम् । रममाणा यथासौख्यं प्रागाच्छिष्यैः स गौतमः ४४
आगच्छन्तं नित्यमेव अहल्या प्रियवादिनी । प्रतियाति प्रियं वक्ति तोषयन्ती च तं गुणैः ॥ ४५
तामदृष्ट्वा महाप्राज्ञो मेने तन्महदद्भुतम् । द्वारस्थितं मुनिश्रेष्ठं सर्वे पश्यन्ति नारद ॥ ४६
अग्निहोत्रस्य शालाया रक्षिणो गृहकर्मिणः । ऊचुर्मुनिवरं भीता गौतमं विस्मयान्विताः ॥ ४७

रक्षिण ऊचुः—

भगवन्किमिदं चित्रं बहिरन्तश्च दृश्यसे । प्रिययाऽन्तः प्रविष्टोसि तथैव च बहिर्भवान् ॥
अहो तपःप्रभावोऽयं नानारूपधरो भवान् ॥ ४८

ब्रह्मोवाच—

तच्छ्रुत्वा विस्मितस्त्वन्तः प्रविष्टः को नु तिष्ठति । प्रिये अहल्ये भवति किं मां न प्रतिभाषसे ॥
इत्यृषेर्वचनं श्रुत्वा अहल्या जारमब्रवीत् ॥ ५०

अहल्योवाच—

को भवान्मुनिरूपेण पापं त्वं कृतवानसि । इति ब्रुवती शयनादुत्थिता सत्वरं भयात् ॥ ५१
स चापि पापकृच्छक्रो विडालोऽभून्मुनेर्भयात् । त्रस्तां च विकृतां दृष्ट्वा स्वप्रियां दूषितां तदा ॥
उवाच स मुनिः कोपात्किमिदं साहसं कृतम् । इति ब्रुवन्तं भर्तारं साऽपि नोवाच लज्जिता ५३
अन्वेषयंस्तु तं जारं बिडालं ददृशे मुनिः । को भवानिति तं प्राह भस्मी कुर्यां[3] मृषावदन् ॥५४

इन्द्र उवाच—

कृताञ्जलिपुटो भूत्वा चैवमाह शचीपतिः । शचीभर्ता पुरां भेत्ता तपोधन पुरुष्टुतः ॥ ५५
ममेदं पापमापन्नं सत्यमुक्तं मयाऽनघ । महद्भिर्गर्हितं कर्म कृतवानस्म्यहं मुने ॥ ५६
स्मरसायकनिर्भिन्नहृदयाः किं न कुर्वते । ब्रह्मन्मयि महापापे क्षमस्व करुणानिधे ॥ ५७
सन्तः कृतापराधेऽपि न रौक्ष्यं जातु कुर्वते । निशम्य तद्वचो विप्रो हरिमाह रुषाऽन्वितः ॥ ५८

गौतम उवाच—

भगभक्त्या कृतं पापं सहस्रभगवान्भव । तामप्याह मुनिः कोपात्त्वं च शुष्कनदी भव ॥ ५९
ततः प्रसादयामास कथयन्ती तदाकृतिम् ॥ ६०

अहल्योवाच—

मनसाऽप्यन्यपुरुषं पापिष्ठाः कामयन्ति याः । अक्षयान्यान्ति नरकांस्तासां सर्वेऽपि पूर्वजाः ६१
भूत्वा प्रसन्नो भगवन्नवधारय मद्वचः । तत्र रूपेण चाऽऽगत्य मामगात्साक्षिणस्त्विमे ॥ ६२
तथेति रक्षिणः प्रोचुरहल्या सत्यवादिनी । ध्यानेनापि मुनिर्ज्ञात्वा शान्तः प्राह पतिव्रताम् ॥ ६३

गौतम उवाच—

यदा तु संगता भद्रे गौतम्या सरिदीशया । नदी भूत्वा पुना रूपं प्राप्यसे प्रियकृन्मम ॥ ६४
इत्यृषेर्वचनं श्रुत्वा तथा चक्रे पतिव्रता । तया तु संगता देव्या अहल्या गौतमप्रिया ॥ ६५
पुनस्तद्रूपमभवद्यन्मया निर्मितं पुरा । ततः कृताञ्जलिपुटः सुरराट्प्राह गौतमम् ॥ ६६

इन्द्र उवाच—

मां पाहि मुनिशार्दूल पापिष्ठं गृहमागतम् । पादयोः पतितं दृष्ट्वा कृपया प्राह गौतमः ॥ ६७

---

१ क. पतिप्रिया । २ क. °ता । भ्रममाणं भयोद्विग्नं बि° । ३ घ. °यां सहानुगम् । इ° । ४ क. °तः । त्वया शक्र कृ° । ५ घ. °गभागभव ।

गौतम उवाच—

गौतमीं गच्छ भद्रं ते स्नानं कुरु पुरंदर । क्षणान्निर्धूतपापस्त्वं सहस्राक्षो भविष्यसि ॥ ६८
उभयं विस्मयकरं दृष्टवानस्मि नारद । अहल्यायाः पुनर्भावं शचीभर्ता सहस्रदृक् ॥ ६९
ततः प्रभृति तत्तीर्थमहल्यासंगमं शुभम् । इन्द्रतीर्थमिति ख्यातं सर्वकामप्रदं नृणाम् ॥ ७०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्येऽहल्यासंगमेन्द्रतीर्थवर्णनं नाम सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

गौतमीमाहात्म्येऽष्टादशोऽध्यायः ॥ १८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९३३४

अथाष्टाशीतितमोऽध्यायः ।

ब्रह्मोवाच—

तस्मादप्यपरं तीर्थं जनस्थानमिति श्रुतम् । चतुर्योजनविस्तीर्णं स्मरणान्मुक्तिदं नृणाम् ॥ १
वैवस्वतान्वये जातो राजाऽभूज्जनकः पुराः । सोऽपांपतेस्तु तनुजामुपयेमे गुणार्णवाम् ॥ २
धर्मार्थकाममोक्षाणां जनकां जनको नृपः । अनुरूपगुणत्वाच्च तस्य भार्या गुणार्णवा ॥ ३
याज्ञवल्क्यश्च विप्रेन्द्रस्तस्य राज्ञः पुरोहितः । तमपृच्छन्नृपश्रेष्ठो याज्ञवल्क्यं पुरोहितम् ॥ ४

जनक उवाच—

भुक्तिमुक्ती उभे श्रेष्ठे निर्णीते मुनिसत्तमैः । दासीदासेभतुरगरथाद्यैर्भुक्तिरुत्तमा ॥ ५
किंत्वन्तविरसा भुक्तिर्मुक्तिरेका निरत्यया । भुक्तेर्मुक्तिः श्रेष्ठतमा भुक्त्या मुक्तिं कथं व्रजेत् ॥ ६
सर्वसङ्गपरित्यागान्मुक्तिप्राप्तिः सुदुःखतः । तद्ब्रूहि द्विजशार्दूल सुखान्मुक्तिः कथं भवेत् ॥ ७

याज्ञवल्क्य उवाच—

अपांपतिस्तव गुरुः श्वशुरः प्रियकृत्तथा । तं गत्वा पृच्छ नृपते उपदेक्ष्यति ते हितम् ॥ ८
याज्ञवल्क्यश्च जनको राजानं वरुणं तदा । गत्वा चोचतुरव्यग्रौ मुक्तिमार्गं यथाक्रमम् ॥ ९

वरुण उवाच—

द्विधा तु संस्थिता मुक्तिः कर्मद्वारेऽप्यकर्मणि । वेदे च निश्चितो मार्गः कर्म ज्यायो ह्यकर्मणः ॥ १०
सर्वं च कर्मणा बद्धं पुरुषार्थचतुष्टयम् । अकर्मणैवाऽऽप्यत इति मुक्तिमार्गो मृषोच्यते ॥ ११
कर्मणा सर्वधान्यानि[1] सेत्स्यन्ति नृपसत्तम । तस्मात्सर्वात्मना कर्म कर्तव्यं वैदिकं नृभिः ॥ १२
तेन भुक्तिं च मुक्तिं च प्राप्नुवन्तीह मानवाः । अकर्मणः कर्म पुण्यं कर्म चाप्याश्रमेषु च ॥ १३
जात्याश्रितं च राजेन्द्र तत्रापि शृणु धर्मवित् । आश्रमाणि च चत्वारि कर्मद्वाराणि मानद ॥ १४
चतुर्णामाश्रमाणां च गार्हस्थ्यं पुण्यदं स्मृतम् । तस्माद्भुक्तिश्च मुक्तिश्च भवतीति मतिर्मम ॥ १५

ब्रह्मोवाच—

एतच्छ्रुत्वा तु जनको याज्ञवल्क्यश्च बुद्धिमान् । वरुणं पूजयित्वा तु पुनर्वचनमूचतुः ॥ १६
को देशः किं च तीर्थं स्याद्भुक्तिमुक्तिप्रदायकम् । तद्वदस्व सुरश्रेष्ठ सर्वज्ञोऽसि नमोऽस्तु ते ॥ १७

---

१ घ. °र्वसाध्यानि ।

वरुण उवाच—

पृथिव्यां भारतं वर्षं दण्डकं तत्र पुण्यदम् । तस्मिन्क्षेत्रे कृतं कर्म भुक्तिमुक्तिप्रदं नृणाम् ॥ १८

तीर्थानां गौतमी गङ्गा श्रेष्ठा मुक्तिप्रदा नृणाम् । तत्र यज्ञेन दानेन भोगान्मुक्तिमवाप्स्यति ॥१९

ब्रह्मोवाच—

याज्ञवल्क्यश्च जनको वाचं श्रुत्वा ह्यपांपतेः । वरुणेन ह्यनुज्ञातौ स्वपुरीं जग्मतुस्तदा ॥ २०

अश्वमेधादिकं कर्म चकार जनको नृपः । याजयामास विप्रेन्द्रो याज्ञवल्क्यश्च तं नृपम् ॥ २१

गङ्गातीरं समाश्रित्य यज्ञान्मुक्तिमवाप राट् । तथा जनकराजानो बहवस्तत्र कर्मणा ॥ २२

मुक्तिं प्रापुर्महाभागा गौतम्याश्च प्रसादतः । ततः प्रभृति तत्तीर्थं जनस्थानेति विश्रुतम् २३

जनकानां यज्ञसदो जनस्थानं प्रकीर्तितम् । चतुर्योजनविस्तीर्णं स्मरणात्सर्वपापनुत् ॥ २४

तत्र स्नानेन दानेन पितॄणां तर्पणेन तु । तीर्थस्य स्मरणाद्वाऽपि गमनाद्भक्तिसेवनात् ॥ २५

सर्वान्कामानवाप्नोति मुक्तिं च समवाप्नुयात् ॥ २६

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये जनस्थानतीर्थवर्णनं नामाष्टाशीतितमोऽध्यायः ॥ ८८ ॥

गौतमीमाहात्म्य एकोनविंशोऽध्यायः ॥ १९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५३६०

अथोननवतितमोऽध्यायः ।

ब्रह्मोवाच—

अरुणा वरुणा चैव नद्यौ पुण्यतरे शुभे । तयोश्च संगमः पुण्यो गङ्गायां मुनिसत्तम ॥ १

तदुत्पत्तिं शृणुष्वेह सर्वपापविनाशिनीम् । कश्यपस्य सुतो ज्येष्ठ आदित्यो लोकविश्रुतः ॥ २

त्रैलोक्यचक्षुस्तीक्ष्णांशुः सप्ताश्वो लोकपूजितः । तस्य पत्नी उषा ख्याता त्वाष्ट्री त्रैलोक्यसुन्दरी

भर्तुः प्रतापतीव्रत्वमसहन्ती सुमध्यमा । चिन्तयामास किं कृत्यं मम स्यादिति भामिनी ॥ ४

तस्याः पुत्रौ महाप्राज्ञौ मनुर्वैवस्वतो यमः । यमुना च नदी पुण्या शृणु विस्मयकारणम् ॥ ५

साऽकरोदात्मनश्छायामात्मरूपेण यत्नतः । तामब्रवीत्ततश्चोषा त्वं च मत्सदृशी भव ॥ ६

भर्तारं त्वमपत्यानि पालयस्व ममाऽऽज्ञया । यावदागमनं मे स्यात्पत्युस्तावत्प्रिया भव ॥ ७

नाऽऽख्यातव्यं त्वया क्वापि अपत्यानां तथा प्रिये । तथेत्याह च सा छाया निर्जगाम गृहादुषा

इत्युक्त्वा सा जगामाऽऽशु शान्तं रूपमभीप्सती । सा गत्वोषा गृहं त्वष्टुः पित्रे सर्वं न्यवेदयत्॥

त्वष्टाऽपि चकितः प्राह तां सुतां सुतवत्सलः ॥ ९

त्वष्टोवाच—

नैतद्युक्तं भर्तृमत्या यत्स्वैरेण प्रवर्तनम् । अपत्यानां कथं वृत्तिर्भर्तुर्वा सवितुस्तव ॥

बिभेमि भद्रे शिष्टोऽहं भर्तुर्गेहं पुनर्व्रज ॥ १०

ब्रह्मोवाच—

एवमुक्ता तु पित्रा सा नेत्युक्त्वा वै पुनः पुनः । उत्तरं च कुरोर्देशं जगाम तपसे त्वरा ॥ ११

तत्र तेपे तपस्तीव्रं वडवारूपधारिणी। दुष्प्रेक्षं तं स्वकं कान्तं ध्यायन्ती निश्चला उषा॥ १२
एतस्मिन्नन्तरे तात छाया चोषास्वरूपिणी। पत्यौ सा वर्तयामास अपत्यान्यथ जज्ञिरे॥ १३
सावर्णिश्च शनिश्चैव विष्टिर्या दुष्टकन्यका। सा छाया वर्तयामास वैषम्येणैव नित्यशः॥ १४
स्वेष्वपत्येषु चोषाया यमस्तत्र चुकोप ह। वैषम्येणाथ वर्तन्तीं छायां तां मातरं तदा॥ १५
ताडयामास पादेन दक्षिणाशापतिर्यमः। पुत्रदौर्जन्यसंक्षोभाच्छाया वैवस्वतं यमम्॥ १६
शशाप पाप ते पादो विशीर्यतु ममाऽऽज्ञया। विशीर्णचरणो दुःखाद्रुदन्पितरमभ्यगात्॥
सवित्रे तं तु वृत्तान्तं न्यवेदयदशेषतः॥ १७

यम उवाच—

नेयं माता सुरश्रेष्ठ यया शप्तोऽहमीदृशः। अपत्येषु विरुद्धेषु जननी नैव कुप्यते॥ १८
यद्बाल्यादब्रवं किंचिदथवा दुष्कृतं कृतम्। नैव कुप्यति सा माता तस्मान्नेयं ममाम्बिका॥ १९
यदपत्यकृतं किंचित्साध्वसाधु यथा तथा। मात्यस्यां सर्वमप्येतत्तस्मान्मातेति गीयते॥ २०
प्रधक्ष्यन्तीव मां तात नित्यं पश्यति चक्षुषा। वक्त्यग्निकालसदृशा वाचा नेयं मदम्बिका॥ २१

ब्रह्मोवाच—

तत्पुत्रवचनं श्रुत्वा सविताऽचिन्तयत्ततः। इयं छाया नास्य माता उषा माता तु साऽन्यतः २२
मम शान्तिमभीप्सन्ती देशेऽन्यस्मिंस्तपोरता। उत्तरे च कुरौ त्वाष्ट्री वडवारूपधारिणी॥ २३
तत्राऽऽस्ते सा इति ज्ञात्वा जगामेशो दिवाकरः। यत्र सा वर्तते कान्ता अश्वरूपः स्वयं तदा॥
तां दृष्ट्वा वडवारूपां पर्यधावद्धयाकृतिः। कामातुरं हयं दृष्ट्वा श्रुत्वा वै हेषितस्वनम्॥ २५
उषा पतिव्रतोपेता पतिध्यानपरायणा। हयधर्षणसंभीता को न्वयं चेत्यजानती॥ २६
अपलायत्पतौ प्राप्ते दक्षिणाभिमुखी त्वरा। को नु मे रक्षकोऽत्र स्यादृषयो वाऽथवा सुराः २७
धावन्तीं तां प्रियामश्वामश्वरूपधरः स्वयम्। पर्यधावद्यतो याति उषा भानुस्ततस्ततः॥ २८
स्मरग्रहवशे जातः को दुश्चेष्टं न चेष्टते। भागीरथीं नदीश्चान्या वनान्युपवनानि च॥ २९
नर्मदां चाथ विन्ध्यं च दक्षिणाभिमुखावु(खी उ)भौ। अतिक्रम्य भयोद्विग्ना त्वाष्ट्र्यभ्यगाच्च गौतमीम्॥ ३०
त्रातारः सन्ति मुनयो जनस्थान इति श्रुतम्। ऋषीणामाश्रमं साऽश्वा प्रविष्टा गौतमीं तथा ३१
अनुप्राप्तस्तथा चाश्वो भानुस्तद्रूपवांस्ततः। अश्वं निवारयामासुर्जनस्था मुनिदारकाः॥
ततः कोपादृषींस्तांश्च शशापोषापतिः प्रभुः॥ ३२

भानुरुवाच—

निवारयथ मां यस्माद्वृदा यूयं भविष्यथ॥ ३३

ब्रह्मोवाच—

ज्ञानदृष्ट्या तु मुनयो मेनिरेऽश्वमुषापतिम्। स्तुवन्तो देवदेवेशं भानुं तं मुनयो मुदा॥ ३४
स्तूयमानो मुनिगणैरश्वां भानुरथागमत्। वडवाया मुखे लग्नं मुखं चाश्वस्वरूपिणम्॥ ३५
ज्ञात्वा त्वाष्ट्री च भर्तारं मुखाद्वीर्यं प्रसुस्रुवे। तयोर्वीर्येण गङ्गायामश्विनौ समजायताम्॥ ३६
तत्राऽऽगच्छन्सुरगणाः सिद्धाश्च मुनयस्तथा। नद्यो गावस्तथौषध्यो देवा ज्योतिर्गणास्तथा ३७
सप्ताश्वश्च रथः पुण्यो ह्यरुणो भानुसारथिः। यमो मनुश्च वरुणः शनिर्वैवस्वतस्तथा॥ ३८
यमुना च नदी पुण्या तापी चैव महानदी। तत्तद्रूपं समास्थाय नद्यस्ता विस्मयान्मुने॥ ३९

द्रष्टुं ते विस्मयाविष्टा आजग्मुः श्वशुरस्तथा। अभिप्रायं विदित्वा तु श्वशुरं भानुरब्रवीत्॥ ४०

भानुरुवाच—

उषायाः प्रीतये त्वष्टः कुर्वत्यास्तप उत्तमम्। यन्त्रारूढं च मां कृत्वा छिन्धि तेजांस्यनेकशः॥
यावत्सौख्यं भवेदस्यास्तावच्छिन्धि प्रजापते॥ ४१

ब्रह्मोवाच—

तथेत्युक्त्वा ततस्त्वष्टा सोमनाथस्य संनिधौ। तेजसां छेदनं चक्रे प्रभासं तु ततो विदुः॥ ४२
भर्त्रा च संगता यत्र गौतम्यामश्वरूपिणी। अश्विनोर्यत्र चोत्पत्तिरश्वतीर्थं तदुच्यते॥ ४३
भानुतीर्थं तदाख्यातं तथा पञ्चवटाश्रमः। तापी च यमुना चैव पितरं द्रष्टुमागते॥ ४४
अरुणावरुणानद्योर्गङ्गायां संगमः शुभः। देवानां तत्र तीर्थानामागतानां पृथक्पृथक्॥ ४५
नव त्रीणि सहस्राणि तीर्थानि गुणवन्ति च। तत्र स्नानं च दानं च सर्वमक्षयपुण्यदम्॥ ४६
स्मरणात्पठनाद्वाऽपि श्रवणादपि नारद। सर्वपापविनिर्मुक्तो धर्मवान्स सुखी भवेत्॥ ४७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्येऽरुणावरुणासंगमाश्वभानुतीर्थवर्णनं नामोननवतितमोऽध्यायः॥ ८९॥

गौतमीमाहात्म्ये विंशतितमोऽध्यायः॥ २०॥

आदितः श्लोकानां समष्ट्यङ्काः—५४०७

अथ नवतितमोऽध्यायः।

ब्रह्मोवाच—

गारुडं नाम यत्तीर्थं सर्वविघ्नप्रशान्तिदम्। तस्य प्रभावं वक्ष्यामि शृणु नारद यत्नतः॥ १
मणिनाग इति त्वासीच्छेषपुत्रो महाबलः। गरुडस्य भयाद्भक्त्या तोषयामास शंकरम्॥ २
ततः प्रसन्नो भगवान्परमेष्ठी महेश्वरः। तमुवाच महानागं वरं वरय पन्नग॥ ३
नागः प्राह प्रभो मह्यं देहि मे गरुडाभयम्। तथेत्याह च तं शंभुर्गरुडादभयं भवेत्॥ ४
निर्गतो निर्भयो नागो गरुडादरुणानुजात्। क्षीरोदशायी यत्राऽऽस्ते क्षीरार्णवसमीपतः॥ ५
इतश्चेतश्च चरति नागोऽसौ सुखशीतले। गरुडोऽपि च यत्राऽऽस्ते तं देशमपि यात्यसौ॥ ६
गरुडः पन्नगं दृष्ट्वा चरन्तं निर्भयेन तु। तं गृहीत्वा महानागं प्राक्षिपत्स्वस्य वेश्मनि॥ ७
तं बद्ध्वा गारुडैः पाशैर्गरुडो नागसत्तमम्। एतस्मिन्नन्तरे नन्दी प्रोवाचेशं जगत्प्रभुम्॥ ८

नन्दिकेश्वर उवाच—

नूनं नागो न चाऽऽयाति भक्षितो बद्ध एव वा। गरुडेन सुरेशान जीवन्नागो न संव्रजेत्॥ ९

ब्रह्मोवाच—

नन्दिनो वचनं श्रुत्वा ज्ञात्वा शंभुरथाब्रवीत्॥ १०

शिव उवाच—

गरुडस्य गृहे नागो बद्धस्तिष्ठति सत्वरम्। गत्वा तं जगतामीशं विष्णुं स्तुहि जनार्दनम्॥ ११
बद्धं नागं काश्यपेन मद्वाक्यादानय स्वयम्। तत्प्रभोर्वचनं श्रुत्वा नन्दी गत्वा श्रियः पतिम्॥

व्यज्ञापयत्स्वयं वाक्यं विष्णुं लोकपरायणम् । नारायणः प्रीतमना गरुडं वाक्यमब्रवीत् ॥ १३

विष्णुरुवाच—

विनतात्मज मे वाक्यान्नन्दिने देहि पन्नगम् । कम्पमानस्तदाकर्ण्य नेत्युवाच विहंगमः ॥
विष्णुमप्यब्रवीत्कोपात्सुपर्णो नन्दिनोऽन्तिके ॥ १४

गरुड उवाच—

यद्यत्प्रियतमं किंचिद्भृत्येभ्यः प्रभविष्णवः । दास्यन्त्यन्ये भवान्नैव मयाऽऽनीतं हरिष्यति ॥ १५
पश्य देवं त्रिनयनं नागं मोक्ष्यति नन्दिना । मयोपपादितं नागं त्वं तु दास्यसि नन्दिने ॥ १६
त्वां वहामि सदा स्वामिन्मम देयं सदा त्वया । मयोपपादितं नागं वक्तुं देहीति नोचितम् १७
सतां प्रभूणां नेयं स्याद्वृत्तिः सद्वृत्तिकारिणाम् । सन्तो दास्यन्ति भृत्येभ्यो मदुपात्तहरो भवान्
दैत्याञ्जयसि सङ्ग्रामे मद्बलेनैव केशव । अहं महाबलीत्येवं मुधैव श्लाघते भवान् ॥ १९

ब्रह्मोवाच—

गरुडस्येति तद्वाक्यं श्रुत्वा चक्रगदाधरः । विहस्य नन्दिनः पार्श्वे पश्यद्भिर्लोकपालकैः ॥ २०
इदमाह महाबुद्धिर्मां समुह्य कृशो भवान् । त्वद्बलादसुरान्सर्वाञ्जेष्येऽहं खगसत्तम ॥ २१
इत्युक्त्वा श्रीपतिर्ब्रह्मञ्शान्तकोपोऽब्रवीदिदम् । वहाङ्गुलिं करस्याऽऽशु कनिष्ठां नन्दिनोऽन्तिके
गरुडस्य ततो मूर्ध्नि न्यस्येदं पुनरब्रवीत् । सत्यं मां वहसे नित्यं पश्य धर्मं विहंगम ॥ २३
न्यस्तायां च ततोऽङ्गुल्यां शिरः कुक्षौ समाविशत् । कुक्षिश्च चरणस्यान्तः प्राविशच्चूर्णितोऽभवत्
ततः कृताञ्जलिर्दीनो व्यथितो लज्जयाऽन्वितः ॥ २४

गरुड उवाच—

त्राहि त्राहि जगन्नाथ भृत्यं मामपराधिनम् । त्वं प्रभुः सर्वलोकानां धर्ता धार्यस्त्वमेव च ॥ २५
अपराधसहस्राणि क्षमन्ते प्रभविष्णवः । कृतापराधेऽपि जने महती यस्य वै कृपा ॥ २६
वदन्ति मुनयः सर्वे त्वामेव करुणाकरम् । रक्षस्वाऽऽर्तं जगन्मातर्मामम्बुजनिवासिनि ॥
कमले बालकं दीनमार्तं तनयवत्सले ॥ २७

ब्रह्मोवाच—

ततः कृपान्विता देवी श्रीरप्याह जनार्दनम् ॥ २८

कमलोवाच—

रक्ष नाथ स्वकं भृत्यं गरुडं विपदं गतम् । जनार्दन उवाचेदं नन्दिनं शंभुवाहनम् ॥ २९

विष्णुरुवाच—

नय नागं सगरुडं शंभोरन्तिकमेव च । तत्प्रसादाच्च गरुडो महेश्वरनिरीक्षितः ॥
आत्मीयं च पुना रूपं गरुडः समवाप्स्यति ॥ ३०

ब्रह्मोवाच—

तथेत्युक्त्वा च वृषभो नागेन गरुडेन च । शनैः स शंकरं गत्वा सर्वं तस्मै न्यवेदयत् ॥
शंकरोऽपि गरुत्मन्तं प्रोवाच शशिशेखरः ॥ ३१

शिव उवाच—

याहि गङ्गां महाबाहो गौतमीं लोकपावनीम् । सर्वकामप्रदां शान्तां तामाप्लुत्य पुनर्वपुः ॥ ३२

प्राप्स्यसे सर्वकामांश्च शतधाऽथ सहस्रधा । सर्वपापोपतप्ता ये दुर्दैवोन्मूलितोद्यमाः ॥
प्राणिनोऽभीष्टदा तेषां शरणं खग गौतमी ॥ ३३

ब्रह्मोवाच—

तद्वाक्यं प्रणतो भूत्वा श्रुत्वा तु गरुडोऽभ्यगात् । गङ्गामाप्लुत्य गरुडः शिवं विष्णुं ननाम सः ३४
ततः स्वर्णमयः पक्षी वज्रदेहो महाबलः । वेगी भवन्मुनिश्रेष्ठ पुनर्विष्णुमियात्सुधीः ॥ ३५
ततः प्रभृति तत्तीर्थं गारुडं सर्वकामदम् । तत्र स्नानादि यत्किंचित्करोति प्रयतो नरः ॥
सर्वं तदक्षयं वत्स शिवविष्णुप्रियावहम् ॥ ३६

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये गरुडतीर्थवर्णनं नाम नवतितमोऽध्यायः ॥ ९० ॥

गौतमीमाहात्म्ये एकविंशतितमोऽध्यायः ॥ २१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५४४२

अथैकनवतितमोऽध्यायः ।

ब्रह्मोवाच—

ततो गोवर्धनं तीर्थं सर्वपापप्रणाशनम् । पितॄणां पुण्यजननं स्मरणादपि पापनुत् ॥ १
तस्य प्रभाव एष स्यान्मया दृष्टस्तु नारद । ब्राह्मणः कर्षकः कश्चिज्जाबालिरिति विश्रुतः ॥ २
न विमुञ्चत्यनड्वाहौ मध्यं यातेऽपि भास्करे । प्रतोदेन प्रतुदति पृष्ठतोऽपि च पार्श्वयोः ॥ ३
तौ गावावश्रुपूर्णाक्षौ दृष्ट्वा गौः कामदोहिनी । सुरभिर्जगतां माता नन्दिने सर्वमब्रवीत् ॥ ४
स चापि व्यथितो भूत्वा शंभवे तन्न्यवेदयत् । शंभुश्च वृषभं प्राह सर्वं सिध्यतु ते वचः ॥ ५
शिवाज्ञासहितो नन्दी गोजातं सर्वमाहरत् । नष्टेषु गोषु सर्वेषु स्वर्गे मर्त्ये ततस्त्वरा ॥ ६
मामवोचन्सुरगणा विना गोभिर्न जीव्यते । तानवोचं सुरान्सर्वाञ्शंकरं यात याचत ॥ ७
तथैवेशं तु ते सर्वे स्तुत्वा कार्यं न्यवेदयन् । ईशोऽपि विबुधानाह जानाति वृषभो मम ॥ ८
ते वृषं प्रोचुरमरा देहि गा उपकारिणः । वृषोऽपि विबुधानाह गोसवः क्रियतां क्रतुः ॥ ९
ततः प्राप्स्यथ गाः सर्वा या दिव्या याश्च मानुषाः । ततः प्रवर्तते यज्ञो गोसवो देवनिर्मितः १०
गौतम्याश्च शुभे पार्श्वे गावो ववृधिरे ततः । गोवर्धनं तु तत्तीर्थं देवानां प्रीतिवर्धनम् ॥ ११
तत्र स्नानं मुनिश्रेष्ठ गोसहस्रफलप्रदम् । किंचिद्दानादिना यत्स्यात्फलं तत्तु न विद्महे ॥ १२

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये गोवर्धनतीर्थवर्णनं नामैकनवतितमोऽध्यायः ॥ ९१ ॥

गौतमीमाहात्म्ये द्वाविंशोऽध्यायः ॥ २२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५४५४

---

१ घ. पारे ।

अथ द्विनवतितमोऽध्यायः ।

ब्रह्मोवाच—

पापप्रणाशनं नाम तीर्थं पापभयापहम् । नामधेयं प्रवक्ष्यामि शृणु नारद यत्नतः ॥ १
धृतव्रत इति ख्यातो ब्राह्मणो लोकविश्रुतः । तस्य भार्या मही नाम तरुणी लोकसुन्दरी ॥ २
तस्य पुत्रः सूर्यनिभः सनाज्जात इति श्रुतः । धृतव्रतं तथाऽकर्षन्मृत्युः कालेरितो मुने ॥ ३
ततः सा बालविधवा बालपुत्रा सुरूपिणी । त्रातारं नैव पश्यन्ती गालवाश्रममभ्यगात् ॥ ४
तस्मै पुत्रं निवेद्याथ स्वैरिणी पापमोहिता । सा बभ्राम बहून्देशान्पुंस्कामा कामचारिणी ॥ ५
तत्पुत्रो गालवगृहे वेदवेदाङ्गपारगः । जातोऽपि मातृदोषेण वेश्येरितमतिस्त्वभूत् ॥ ६
जनस्थानमिति ख्यातं नानाजातिसमावृतम् । तत्रासौ पण्यवेषेण अध्यास्ते च मही तथा ॥ ७
तत्सुतोऽपि बहून्देशान्परिबभ्राम कामुकः । सोऽपि कालवशात्तत्र जनस्थानेऽवसत्तदा ॥ ८
स्त्रियमाकाङ्क्षते वेश्यां धृतव्रतसुतो द्विजः । मही चापि धनं दातॄन्पुरुषान्समपेक्षते ॥ ९
मेने न पुत्रमात्मीयं स चापि न तु मातरम् । तयोः समागमश्चाऽऽसीद्विधिना मातृपुत्रयोः ॥ १०
एवं बहुतिथे काले पुत्रे मातरि गच्छति । तयोः परस्परं ज्ञानं नैवाऽऽसीन्मातृपुत्रयोः ॥ ११
एवं प्रवर्तमानस्य पितृधर्मेण सन्मतिः । आसीत्तस्याप्यसद्वृत्तेः शृणु नारद चित्रवत् ॥ १२
स्वैरास्थित्या वर्तमानो नेदं स परिहातवान् । ब्राह्मीं संध्यामनुष्ठाय तदूर्ध्वं तु धनार्जनम् ॥ १३
विद्याबलेन वित्तानि बहून्यार्ज्य ददात्यसौ । तथा स प्रातरुत्थाय गङ्गां गत्वा यथाविधि ॥ १४
शौचादि स्नानसंध्यादि सर्वं कार्यं यथाक्रमम् । कृत्वा तु ब्राह्मणान्नत्वा ततोऽभ्येति स्वकर्मसु ॥
प्रातःकाले गौतमीं तु यदा याति विरूपवान् । कुष्ठसर्वाङ्गशिथिलः पूयशोणितनिःस्रवः ॥ १६
स्नात्वा तु गौतमीं गङ्गां यदा याति सुरूपधृक् । शान्तः सूर्याग्निसदृशो मूर्तिमानिव भास्करः ॥
एतद्रूपद्वयं स्वस्य नैव पश्यति स द्विजः । गालवो यत्र भगवांस्तपोज्ञानपरायणः ॥ १८
आश्रित्य गौतमीं देवीं आस्ते च मुनिभिर्वृतः । ब्राह्मणोऽपि च तत्रैव नित्यं तीर्थं समेत्य च १९
गालवं च नमस्याथ ततो याति स्वमन्दिरम् । गङ्गायाः सेवनात्पूर्वं सनाज्जातस्य यद्वपुः ॥ २०
स्नानसंध्योत्तरे काले पुनर्यदपि तद्द्विजे । उभयं तस्य तद्रूपं गालवो नित्यमेव च ॥ २१
दृष्ट्वा सविस्मयो मेने किंचिदस्त्यत्र कारणम् । एवं सविस्मयो भूत्वा गालवः प्राह तं द्विजम् ॥
गच्छन्तं तु नमस्याथ सनाज्जातं गुरुर्गृहम् । आहूय यत्नतो धीमान्कृपया विस्मयेन च ॥ २३

गालव उवाच—

को भवान्क च गन्ताऽसि किं करोषि क भोक्ष्यसि । किंनामा त्वं क शय्या ते का ते भार्या वदस्व मे ॥

ब्रह्मोवाच—

गालवस्य वचः श्रुत्वा ब्राह्मणोऽप्याह तं मुनिम् ॥ २५

ब्राह्मण उवाच—

श्वः कथ्यते मया सर्वं ज्ञात्वा कार्यविनिर्णयम् ॥ २६

---

१ घ. °णो भ्रान्तवन्मुनि° ।

ब्रह्मोवाच—

एवमुक्त्वा गालवं तं सनाज्जातो गृहं ययौ । भुक्त्वा रात्रौ तया सम्यक्शय्यामासाद्य बन्धकीम्
उवाच चकितः स्मृत्वा गालवस्य तु यद्वचः ॥ २७

ब्राह्मण उवाच—

त्वं तु सर्वगुणोपेता बन्धक्यपि पतिव्रता । आवयोः सदृशी प्रीतिर्यावज्जीवं प्रवर्तताम् ॥ २८
तथाऽपि किंचित्पृच्छामि किंनाम्नी त्वं क वा कुलम् । किंनु स्थानं क वा बन्धुर्मम सर्वं निवेद्यताम्

बन्धक्युवाच—

धृतव्रत इति ख्यातो ब्राह्मणो दीक्षितः शुचिः । तस्य भार्या मही चाहं मत्पुत्रो गालवाश्रमे ३०
उत्सृष्टो मतिमान्बालः सनाज्जात इति श्रुतः । अहं तु पूर्वदोषेण त्यक्त्वा धर्मं कुलागतम् ॥
स्वैरिणी त्विह वर्तेऽहं विद्धि मां ब्राह्मणीं द्विज ॥ ३१

ब्रह्मोवाच—

तस्यास्तद्वचनं श्रुत्वा मर्मविद्ध इवाभवत् । पपात सहसा भूमौ वेश्या तं वाक्यमब्रवीत् ॥ ३२

वेश्योवाच—

किं तु जातं द्विजश्रेष्ठ क च प्रीतिर्गता तव । किं तु वाक्यं मया चोक्तं तव चित्तविरोधकृत् ३३
आत्मानमात्मनाऽऽश्वास्य ब्राह्मणो वाक्यमब्रवीत् ॥ ३४

ब्राह्मण उवाच—

धृतव्रतः पिता विप्रस्तत्पुत्रोऽहं सनाद्यतः । माता मही मम इयं मम दैवादुपागता ॥ ३५

ब्रह्मोवाच—

एतच्छ्रुत्वा तस्य वाक्यं साऽप्यभूदतिदुःखिता । तयोस्तु शोचतोः पश्चात्प्रभाते विमले रवौ
गालवं मुनिशार्दूलं गत्वा विप्रो न्यवेदयत् ॥ ३६

ब्राह्मण उवाच—

धृतव्रतसुतो ब्रह्मंस्त्वया पूर्वं तु पालितः । उपनीतस्त्वया चैव मही माता मम प्रभो ॥ ३७
किं करोमि च किं कृत्वा निष्कृतिर्मम वै भवेत् ॥ ३८

ब्रह्मोवाच—

तद्विप्रवचनं श्रुत्वा गालवः प्राह मा शुचः । तवेदं द्विविधं रूपं नित्यं पश्याम्यपूर्ववत् ॥ ३९
ततः पृष्टोऽसि वृतान्तं श्रुतं ज्ञातं मया यथा । यत्कृत्यं तव तत्सर्वं गङ्गायां प्रत्यगात्क्षयम् ॥ ४०
अस्य तीर्थस्य माहात्म्यादस्या देव्याः प्रसादतः । पूतोऽसि प्रत्यहं वत्स नात्र कार्या विचारणा
प्रभाते तव रूपाणि सपापानि त्वहर्निशम् । पश्येऽहं पुनरप्येव रूपं तव गुणोत्तमम् ॥ ४२
आगच्छन्तं त्वागोयुक्तं गच्छन्तं त्वामनागसम् । पश्यामि नित्यं तस्मात्त्वं पूतो देव्या कृतोऽधुना
तस्मान्न कार्यं ते किंचिदवशिष्टं भविष्यति । इयं च माता ते विप्र ज्ञाता या चैव बन्धकी ॥ ४४
पश्चात्तापं गताऽत्यन्तं निवृत्ता त्वथ पातकात् । भूतानां विषये प्रीतिर्वत्स स्वाभाविकी यतः ४५
सत्सङ्गतो महापुण्यान्निवृत्तिर्दैवतो भवेत् । अत्यर्थमनुतप्तेयं प्रागाचरितपुण्यतः ॥ ४६
स्नानं कृत्वा चात्र तीर्थे ततः पूता भविष्यति । तथा तौ चक्रतुरुभौ मातापुत्रौ च नारद ॥ ४७

---

१ घ. तथा । २ घ. °तरम् ।

स्नानाद्बभूवतुरुभौ गतपापावसंशयम् । ततः प्रभृति तत्तीर्थं धौतपापं प्रचक्षते ॥ ४८
पापप्रणाशनं नाम गालवं चेति विश्रुतम् । महापातकमल्पं वा तथा यच्चोपपातकम् ॥
तत्सर्वं नाशयेदेतद्धौतपापं सुपुण्यदम् ॥ ४९

इति श्रीमहापुराणे आदिब्राह्मे गौतमीमाहात्म्ये धौतपापमाहात्म्यनिरूपणं नाम द्विनवतितमोऽध्यायः ॥ ९२ ॥

गौतमीमाहात्म्ये त्रयोविंशोऽध्यायः ॥ २३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५५०३

अथ त्रिनवतितमोऽध्यायः ।

ब्रह्मोवाच—

यत्र दाशरथी रामः सीतया सहितो द्विज । पितॄन्संतर्पयामास पितृतीर्थं ततो विदुः ॥ १
तत्र स्नानं च दानं च पितॄणां तर्पणं तथा । सर्वमक्षयतामेति नात्र कार्या विचारणा ॥ २
यत्र दाशरथी रामो विश्वामित्रं महामुनिम् । पूजयामास राजेन्द्रो मुनिभिस्तत्त्वदर्शिभिः ॥ ३
विश्वामित्रं तु तत्तीर्थमृषिजुष्टं सुपुण्यदम् । तत्स्वरूपं च वक्ष्यामि पठितं वेदवादिभिः ॥ ४
अनावृष्टिरभूत्पूर्वं प्रजानामतिभीषणा । विश्वामित्रो महाप्राज्ञः सशिष्यो गौतमीमगात् ॥ ५
शिष्यान्पुत्रांश्च जायां च कृशान्दृष्ट्वा क्षुधातुरान् । व्यथितः कौशिकः श्रीमाञ्शिष्यानिदमुवाच ह

विश्वामित्र उवाच—

यथाकथंचिद्यत्किंचिद्यत्र क्वापि यथा तथा । आनीयतां किंतु भक्ष्यं भोज्यं वा मा विलम्ब्यताम्
इदानीमेव गन्तव्यमानेतव्यं क्षणेन तु ॥ ७

ब्रह्मोवाच—

ऋषेस्तद्वचनाच्छिष्याः क्षुधितास्त्वरया ययुः । अटमाना इतश्चेतो मृतं ददृशिरे शुनम् ॥ ८
तमादाय त्वरायुक्ता आचार्याय न्यवेदयन् । सोऽपि तं भद्रमित्युक्त्वा प्रतिजग्राह पाणिना ॥९
विशसध्वं श्वमांसं च क्षालयध्वं च वारिणा । पचध्वं मन्त्रवच्चापि हुत्वाऽग्नौ तुं यथाविधि ॥ १०
देवानृषीन्पितॄनन्यांस्तर्पयित्वाऽतिथीन्गुरून् । सर्वे भोक्ष्यामहे शेषमित्युवाच स कौशिकः ॥ ११
विश्वामित्रवचः श्रुत्वा शिष्याश्चक्रुस्तथैव तत् । पच्यमाने श्वमांसे तु देवदूतोऽग्निरभ्यगात् ॥
देवानां सदने सर्वं देवेभ्यस्तन्न्यवेदयत् ॥ १२

अग्निरुवाच—

[2]देवैः श्वमांसं भोक्तव्यमापन्नमृषिकल्पितम् ॥ १३

ब्रह्मोवाच—

अग्नेस्तद्वचनादिन्द्रः श्येनो भूत्वा विहायसि । स्थालीमथाहरत्पूर्णां मांसेन[3] पिहितां तदा ॥ १४
तत्कर्म दृष्ट्वा शिष्यास्ते ऋषेः श्येनं न्यवेदयन् । हृता स्थाली मुनिश्रेष्ठ श्येनेनाकृतबुद्धिना ॥१५
ततश्चुकोप भगवाञ्शप्तुकामस्तदा हरिम् । ततो ज्ञात्वा सुरपतिः स्थालीं चक्रे मधुप्लुताम् ॥ १६

---

१ क. °त्वा क्रमाद्वयम् । स° । २ क. देवाः । ३ क. °नेन कृ° ।

पुनर्निवेशयामास उल्कास्वेव खगो हरिः । मधुना तु समायुक्तां विश्वामित्रश्चुकोप ह ॥
स्थालीं वीक्ष्य ततः कोपादिदमाह स कौशिकः ॥ १७

विश्वामित्र उवाच—

श्वमांसमेव नो देहि त्वं हरामृतमुत्तमम् । नो चेत्त्वां भस्मसात्कुर्यामिन्द्रो भीतस्तदाऽब्रवीत्॥ १८

इन्द्र उवाच—

मधु हुत्वा यथान्यायं पिब पुत्रैः समन्वितः । किमनेन श्वमांसेन अमेध्येन महामुने ॥ १९

ब्रह्मोवाच—

विश्वामित्रोऽपि नेत्याह भुक्तेनैकेन किं फलम् । प्रजाः सर्वाश्च सीदन्ति किं तेन मधुना हरे २०
सर्वेषाममृतं चेत्स्याद्भोक्ष्येऽहममृतं शुचि । अथवा देवपितरो भोक्ष्यन्तीदं श्वमांसकम् ॥ २१
पश्चादहं तच्च मांसं भोक्ष्ये नानृतमस्ति मे । ततो भीतः सहस्राक्षो मेघानाहूय तत्क्षणात् ॥ २२
ववर्ष चामृतं वारि ह्यमृतेनार्पिताः प्रजाः । पश्चात्तदमृतं पुण्यं हरिदत्तं यथाविधि ॥ २३
तर्पयित्वा सुरानादौ तर्पयित्वा जगत्त्रयम् । विप्रः संभुक्तवाञ्शिष्यैर्विश्वामित्रः स्वभार्यया ॥२४
ततः प्रभृति तत्तीर्थमाख्यातं चातिपुण्यदम् । यत्राऽऽगतः सुरपतिर्लोकानाममृतार्पणम् ॥ २५
संजातं मांसवर्जं तु तत्तीर्थं पुण्यदं नृणाम् । तत्र स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ २६
ततः प्रभृति तत्तीर्थं विश्वामित्रमिति स्मृतम् । मधुतीर्थमथैन्द्रं च श्येनं पर्जन्यमेव च ॥ २७

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे तीर्थमाहात्म्ये विश्वामित्रतीर्थवर्णनं नाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥

गौतमीमाहात्म्ये चतुर्विंशोऽध्यायः ॥ २४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५५३०

अथ चतुर्नवतितमोऽध्यायः ।

ब्रह्मोवाच—

श्वेततीर्थमिति ख्यातं त्रैलोक्ये विश्रुतं शुभम् । तस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ १
श्वेतो नाम पुरा विप्रो गौतमस्य प्रियः सखा । आतिथ्यपूजानिरतो गौतमीतीरमाश्रितः ॥ २
मनसा कर्मणा वाचा शिवभक्तिपरायणः । ध्यायन्तं तं द्विजश्रेष्ठं पूजयन्तं सदाशिवम् ॥ ३
पूर्णायुषं द्विजवरं शिवभक्तिपरायणम् । नेतुं दूताः समाजग्मुर्दक्षिणाशापतेस्तदा ॥ ४
नाशक्नुवन्गृहं तस्य प्रवेष्टुमपि नारद । तदा काले व्यतिक्रान्ते चित्रको मृत्युमब्रवीत् ॥ ५

चित्रक उवाच—

किं नाऽऽयाति क्षीणजीवो मृत्यो श्वेतः कथंत्विति । नाद्याप्यायान्ति दूतास्ते मृत्योर्नैवोचितं तु ते

ब्रह्मोवाच—

ततश्च कुपितो मृत्युः प्रायाच्छ्वेतगृहं स्वयम् । बहिःस्थितांस्तदा पश्यन्मृत्युर्दूतान्भयार्दितान् ॥
प्रोवाच किमिदं दूता मृत्युमूचुश्च दूतकाः ॥ ७

---

१ घ. 'च किंत्विह यूयं स्खलद्वाचः समूचिरे । शि' ।

दूता उचुः—

शिवेन रक्षितं श्वेतं वयं नो वीक्षितुं क्षमाः । येषां प्रसन्नो गिरिशस्तेषां का नाम भीतयः ॥ ८

ब्रह्मोवाच—

पाशपाणिस्तदा मृत्युः प्राविशद्यत्र स द्विजः । नासौ विप्रो विजानाति मृत्युं वा यमकिंकरान् ९
शिवं पूजयते भक्त्या श्वेतस्य तु समीपतः । मृत्युं पाशधरं दृष्ट्वा दण्डी[1] प्रोवाच विस्मितः ॥ १०

दण्ड्युवाच—

किमत्र वीक्षसे मृत्यो दण्डिनं[2] मृत्युरब्रवीत् ॥ ११

मृत्युरुवाच—

श्वेतं नेतुमिहाऽऽयातस्तस्माद्वीक्षे द्विजोत्तमम् ॥ १२

ब्रह्मोवाच—

त्वं गच्छेत्यब्रवीद्दण्डी मृत्युः पाशानथाक्षिपत् । श्वेताय मुनिशार्दूल ततो दण्डी[3] चुकोप ह ॥ १३
शिवदत्तेन दण्डेन दण्डी मृत्युमताडयत् । ततः पाशधरो मृत्युः पपात धरणीतले ॥ १४
ततस्ते सत्वरं दूता हतं मृत्युमवेक्ष्य च । यमाय सर्वमवदन्वधं मृत्योस्तु दण्डिना[4] ॥ १५
ततश्च कुपितो धर्मो यमो महिषवाहनः । चित्रगुप्तं बहुबलं यमदण्डं च रक्षकम् ॥ १६
महिषं भूतवेतालानाधिव्याधींस्तथैव च । अक्षिरोगान्कुक्षिरोगान्कर्णशूलं तथैव च ॥ १७
ज्वरं च त्रिविधं पापं नरकाणि पृथक्पृथक् । त्वरन्तामिति तानुक्त्वा जगाम त्वरितो यमः॥१८
एतैरन्यैः परिवृतो यत्र श्वेतो द्विजोत्तमः । तमायान्तं यमं दृष्ट्वा नन्दी प्रोवाच सायुधः ॥ १९
विनायकं तथा स्कन्दं भूतनाथं तु दण्डिनम् । तत्र तद्युद्धमभवत्सर्वलोकभयावहम् ॥ २०
कार्तिकेयः स्वयं शक्त्या बिभेद यमकिंकरान् । दक्षिणाशापतिं चापि निजघान बलान्वितम् ॥
हतावशिष्टा याम्यास्ते आदित्याय न्यवेदयन् । आदित्योऽपि सुरैः सार्धं श्रुत्वा तन्महदद्भुतम्॥
लोकपालैरनुवृतो ममान्तिकमुपागमत् । अहं विष्णुश्च भगवानिन्द्रोऽग्निर्वरुणस्तथा ॥ २३
चन्द्रादित्यावश्विनौ च लोकपाला मरुद्गणाः । एते चान्ये च बहवो वयं याता यमान्तिकम् २४
मृत आस्ते दक्षिणेशो गङ्गातीरे बलान्वितः । समुद्राश्च नदा नागा नानाभूतान्यनेकशः॥ २५
तत्राऽऽजग्मुः सुरेशानं द्रष्टुं वैवस्वतं यमम् । तं दृष्ट्वा हतसैन्यं च यमं देवा भयार्दिताः ॥
कृताञ्जलिपुटाः शंभुमूचुः सर्वे पुनः पुनः ॥ २६

देवा ऊचुः—

भक्तप्रियत्वं ते नित्यं दुष्टहन्तृत्वमेव च । आदिकर्तर्नमस्तुभ्यं नीलकण्ठ नमोऽस्तु ते ॥
ब्रह्मप्रिय नमस्तेऽस्तु देवप्रिय नमोऽस्तु ते ॥ २७

श्वेतं द्विजं भक्तमनायुषं ते नेतुं यमादिः सकलोऽसमर्थः ।
संतोषमाप्ताः परमं समीक्ष्य भक्तप्रियत्वं त्वयि नाथ सत्यम् ॥ २८
ये त्वां प्रपन्नाः शरणं कृपालुं नालं कृतान्तोऽप्यनुवीक्षितुं तान् ।
एवं विदित्वा शिव एव सर्वे त्वामेव भक्त्या परया भजन्ते ॥ २९

त्वमेव जगतां नाथ किं न स्मरसि शंकर । त्वां विना कः समर्थोऽत्र व्यवस्थां कर्तुमीश्वरः॥३०

---

१ घ. नन्दी । २ घ. नन्दिनं । ३ घ. नन्दी । ४ घ. नन्दिना ।

ब्रह्मोवाच—

एवं तु स्तुवतां तेषां पुरस्तादभवच्छिवः । किं ददामीति तानाह इदमूचुः सुरा अपि ॥ ३१

देवा ऊचुः—

अयं वैवस्वतो धर्मो नियन्ता सर्वदेहिनाम् । धर्माधर्मव्यवस्थायां स्थापितो लोकपालकः ॥ ३२

नायं वधमवाप्नोति नापराधी न पापकृत् । विना तेन जगद्धातुर्नैव किंचिद्भविष्यति ॥ ३३

तस्माज्जीवय देवेश यमं सबलवाहनम् । प्रार्थना सफला नाथ महत्सु न वृथा भवेत् ॥ ३४

ब्रह्मोवाच—

ततः प्रोवाच भगवाञ्जीवयेयमसंशयम् । यमं यदि वचो मेऽद्य अनुमन्यन्ति देवताः ॥ ३५

ततः प्रोचुः सुराः सर्वे कुर्मो वाक्यं त्वयोदितम् । हरिब्रह्मादिसहितं वशे यस्याखिलं जगत् ३६

ततः प्रोवाच भगवानमरान्समुपागतान् । मद्भक्तो न मृतिं यातु नेत्यूचुरमराः पुनः ॥ ३७

अमराः स्युस्ततो देव सर्वलोकाश्चराचराः । अमर्त्यमर्त्यभेदोऽयं न स्यादेव जगन्मय ॥ ३८

पुनरप्याह ताञ्शंभुः शृण्वन्तु मम भाषितम् । मद्भक्तानां वैष्णवानां गौतमीमनुसेवताम् ॥ ३९

वयं तु स्वामिनो नित्यं न मृत्युः स्वाम्यमर्हति । वार्ताऽप्येषां न कर्तव्या यमेन तु कदाचन ४०

आधिव्याध्यादिभिर्जातु कार्यो नाभिभवः क्वचित् । ये शिवं शरणं यातास्ते मुक्तास्तत्क्षणादपि

सानुगस्य यमस्यातो नमस्याः सर्व एव ते । तथेत्यूचुः सुरगणा देवदेवं शिवं प्रति ॥ ४२

ततश्च भगवान्नाथो नन्दिनं प्राह वाहनम् । ४३

शिव उवाच—

गौतम्या उदकेन त्वमभिषिञ्च मृतं यमम् ॥ ४४

ब्रह्मोवाच—

ततो यमादयः सर्वे अभिषिक्तास्तु नन्दिना । उत्थिताश्च सजीवास्ते दक्षिणाशां ततो गताः ४५

उत्तरे गौतमीतीरे विष्ण्वाद्याः सर्वदैवताः । स्थिता आसन्पूजयन्तो देवदेवं महेश्वरम् ॥ ४६

तत्राऽऽसन्नयुतान्यष्ट सहस्राणि चतुर्दश । तथा षट्च सहस्राणि पुनः षट्च तथैव च ॥ ४७

षड्दक्षिणे तथा तीरे तीर्थानामयुतत्रयम् । पुण्यमाख्यानमेतद्धि श्वेततीर्थस्य नारद ॥ ४८

यत्रासौ पतितो मृत्युर्मृत्युतीर्थं तदुच्यते । तस्य श्रवणमात्रेण सहस्रं जीवते समाः ॥ ४९

तत्र स्नानं च दानं च सर्वपापप्रणाशनम् । श्रवणं पठनं चापि स्मरणं च मलक्षयम् ॥

करोति सर्वलोकानां भुक्तिमुक्तिप्रदायकम् ॥ ५०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये उत्तरतीरस्थैकलक्षद्वादशसहस्रतीर्थदक्षिणतीरस्थत्रिंशत्सहस्रतीर्थवर्णनं नाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

गौतमीमाहात्म्ये पञ्चविंशोऽध्यायः ॥ २५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५५७९

———

१ घ. ब्रुवतां ।

अथ पञ्चनवतितमोऽध्यायः ।

ब्रह्मोवाच—

शुक्रतीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् । सर्वपापप्रशमनं सर्वव्याधिविनाशनम् ॥ १

अङ्गिराश्च भृगुश्चैव ऋषी परमधार्मिकौ[1] । तयोः पुत्रौ महाप्राज्ञौ रूपबुद्धिविलासिनौ ॥ २

जीवः कविरिति ख्यातौ मातापित्रोर्वशे रतौ । उपनीतौ सुतौ दृष्ट्वा पितरावूचतुर्मिथः ॥ ३

ऋषी ऊचतुः—

आवयोरेक एवास्तु शास्ता नित्यं च पुत्रयोः । तस्मादेकः शासिता स्यात्तिष्ठत्वेको यथासुखम्

ब्रह्मोवाच—

एतच्छ्रुत्वा ततः शीघ्रमङ्गिराः प्राह भार्गवम् । अध्यापयिष्ये सदृशं सुखं तिष्ठतु भार्गवः ॥ ५

एतच्छ्रुत्वा चाङ्गिरसो वाक्यं भृगुकुलोद्वहः । तथेति मत्वाऽङ्गिरसे शुक्रं तस्मै न्यवेदयत् ॥ ६

उभावपि सुतौ नित्यमध्यापयति वै पृथक् । वैषम्यबुद्ध्या तौ बालौ चिराच्छुक्रोऽब्रवीदिदम्॥ ७

शुक्र उवाच—

वैषम्येण गुरो मां त्वमध्यापयसि नित्यशः । गुरूणां नेदमुचितं वैषम्यं पुत्रशिष्ययोः ॥ ८

वैषम्येण च वर्तन्ते मूढाः शिष्येषु देशिकाः । नैषा विषमबुद्धीनां संख्या पापस्य विद्यते ॥ ९

आचार्य सम्यग्ज्ञातोऽसि नमस्येऽहं पुनः पुनः । गच्छेयं गुरुमन्यं वै मामनुज्ञातुमर्हसि ॥ १०

गच्छेयं पितरं ब्रह्मन्यद्यसौ विषमो भवेत् । ततो वाऽन्यत्र गच्छामि स्वामिन्पृष्टोऽसि गम्यते ११

ब्रह्मोवाच—

गुरुं बृहस्पतिं द(पृ)ष्ट्वा अनुज्ञातस्त्वगात्ततः । अवाप्तविद्यः पितरं गच्छेयं चेत्यचिन्तयत् ॥ १२

तस्मात्कमनुपृच्छेयमुत्कृष्टः को गुरुर्भवेत् । इति स्मरन्महाप्राज्ञमपृच्छद्वृद्धगौतमम् ॥ १३

शुक्र उवाच—

को गुरुः स्यान्मुनिश्रेष्ठ मम ब्रूहि गुरुर्भवेत् । त्रयाणामपि लोकानां यो गुरुस्तं व्रजाम्यहम् ॥ १४

ब्रह्मोवाच—

स प्राह जगतामीशं शंभुं देवं जगद्गुरुम्[2] । क्वाऽऽराधयामि गिरिशमित्युक्तः प्राह गौतमः ॥ १५

गौतम उवाच—

गौतम्यां तु शुचिर्भूत्वा स्तोत्रैस्तोषय शंकरम् । ततस्तुष्टो जगन्नाथः स ते विद्यां प्रदास्यति १६

ब्रह्मोवाच—

गौतमस्य तु तद्वाक्यात्प्रागाद्गङ्गां स भार्गवः । स्नात्वा भूत्वा शुचिः सम्यक्स्तुतिं चक्रे स बालकः

शुक्र उवाच—

*बालोऽहं बालबुद्धिश्च बालचन्द्रधर प्रभो । नाहं जानामि ते किंचित्स्तुतिं कर्तुं नमोऽस्तु ते १८

---

* एतदर्धस्थाने घ. पुस्तके—दीनानाथैकशरणं शंभो त्वां शरणं गतः, इत्यर्धं वर्तते ।

---

१ ख. °र्वशीकृतौ । २ क. °म् । शुक्रः प्राह कथं तं वै पश्येयं त्रिदशेश्वरम् । गौतमः प्राह धर्मज्ञो वृद्धः शुक्रं गुरुप्रियम् । गौतम्यां ।

परित्यक्तस्य गुरुणा न ममास्ति सुहृत्सखा । त्वं प्रभुः सर्वभावेन जगन्नाथ नमोऽस्तु ते ॥ १९
गुरुर्गुरुमतां देव महतां च महानसि । अहमल्पतरो बालो जगन्मय नमोऽस्तु ते ॥ २०
विद्यार्थं हि सुरेशान नाहं वेद्मि भवद्गतिम् । मां त्वं च कृपया पश्य लोकसाक्षिन्नमोऽस्तु ते २१

ब्रह्मोवाच—

एवं तु स्तुवतस्तस्य प्रसन्नोऽभूत्सुरेश्वरः ॥ २२

शिव उवाच—

कामं वरय भद्रं ते यच्चापि सुरदुर्लभम् ॥ २३

ब्रह्मोवाच—

कविरप्याह देवेशं कृताञ्जलिरुदारधीः ॥ २४

शुक्र उवाच—

ब्रह्मादिभिश्च ऋषिभिर्या विद्या नैव गोचरा । तां विद्यां नाथ याचिष्ये त्वं गुरुर्मम दैवतम् २५

ब्रह्मोवाच—

मृतसंजीविनीं विद्यामज्ञातां त्रिदशैरपि । तां दत्तवान्सुरश्रेष्ठस्तस्मै शुक्राय याचते ॥ २६
इतरा लौकिकी विद्या वैदिकी चान्यगोचरा । किं पुनः शंकरे तुष्टे विचार्यमवशिष्यते ॥ २७
स तु लब्ध्वा महाविद्यां प्रायात्स्वपितरं गुरुम् । दैत्यानां च गुरुश्चाऽऽसीद्विद्यया पूजितः कविः
ततः कदाचित्तां विद्यां कस्मिंश्चित्कारणान्तरे । कचो बृहस्पतिसुतो विद्यां प्राप्तः कवेस्तु ताम् ॥
कचाद्बृहस्पतिश्चापि[1] ततो देवाः पृथक्पृथक् । अवापुर्महतीं विद्यां यामाहुर्मृतजीविनीम् ॥ ३०
यत्र सा कविना प्राप्ता विद्याऽऽपूज्य महेश्वरम् । गौतम्या उत्तरे पारे शुक्रतीर्थं तदुच्यते ॥ ३१
मृतसंजीविनीतीर्थमायुरारोग्यवर्धनम् । स्नानं दानं च यत्किंचित्सर्वमक्षयपुण्यदम् ॥ ३२

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे मृतसंजीविनीतीर्थमाहात्म्यनिरूपणं नाम पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

गौतमीमाहात्म्ये षड्विंशोऽध्यायः ॥ २६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८६१२

अथ षण्णवतितमोऽध्यायः ।

ब्रह्मोवाच—

इन्द्रतीर्थमिति ख्यातं ब्रह्महत्याविनाशनम् । स्मरणादपि पापौघक्लेशसंघविनाशनम् ॥ १
पुरा वृत्रवधे वृत्ते ब्रह्महत्या तु नारद । शचीपतिं चानुगता तां दृष्ट्वा भीतवद्धरिः ॥ २
इन्द्रस्ततो वृत्रहन्ता इतश्चेतश्च धावति । यत्र यत्र त्वसौ याति हत्या साऽपीन्द्रगामिनी ॥ ३
स महत्सर आविश्य पद्मनालमुपागमत् । तत्रासौ तन्तुवद्भूत्वा वासं चक्रे शचीपतिः ॥ ४
सरस्तीरेऽपि हत्याऽऽसीद्दिव्यं वर्षसहस्रकम् । एतस्मिन्नन्तरे देवा निरिन्द्रा ह्यभवन्मुने ॥ ५
मन्त्रयामासुरव्यग्राः कथमिन्द्रो भवेदिति । तत्राहमवदं देवान्हत्यास्थानं प्रकल्प्य च ॥ ६
इन्द्रस्य पावनार्थाय गौतम्यामभिषिच्यताम् । यत्राभिषिक्तः पूतात्मा पुनरिन्द्रो भविष्यति ॥ ७

---

१ घ. °पि जीवाद्देवाः ।

तथा ते निश्चयं कृत्वा गौतमीं शीघ्रमागमन् । तत्र स्नातं सुरपतिं देवाश्च ऋषयस्तथा ॥ ८
अभिषेकुकामास्ते सर्वे शचीकान्तं च तस्थिरे । अभिषिच्यमानमिन्द्रं तं प्रकोपाद्गौतमोऽब्रवीत् ॥

गौतम उवाच—

अभिषेक्ष्यन्ति पापिष्ठं महेन्द्रं गुरुतल्पगम् । तान्सर्वान्भस्मसात्कुर्यां शीघ्रं यान्त्वसुरारयः ॥ १०

ब्रह्मोवाच—

तदृषेर्वचनं श्रुत्वा परिहृत्य च गौतमीम् । नर्मदामगमन्सर्वे इन्द्रमादाय सत्वराः ॥ ११
उत्तरे नर्मदातीरे अभिषेकाय तस्थिरे । अभिषेक्ष्यमाणमिन्द्रं तं माण्डव्यो भगवानृषिः ॥ १२
अब्रवीद्भस्मसात्कुर्यां यदि स्यादभिषेचनम् । पूजयामासुरमरा माण्डव्यं युक्तिभिः स्तवैः ॥ १३

देवा ऊचुः—

अयमिन्द्रः सहस्राक्षो यस्मिन्देशेऽभिषिच्यते । तत्रातिदारुणं विघ्नं मुने समुपजायते ॥ १४
तच्छान्तिं कुरु कल्याण प्रसीद वरदो भव । मलनिर्यातनं यस्मिन्कुर्मस्तस्मिन्वरान्बहून् ॥ १५
देशे दास्यामहे सर्वे तदनुज्ञातुमर्हसि । यस्मिन्देशे सुरेन्द्रस्य अभिषेको भविष्यति ॥ १६
स सर्वकामदः पुंसां धान्यवृक्षफलैर्युतः । नानावृष्टिर्नदुर्भिक्षं भवेदत्र कदाचन ॥ १७

ब्रह्मोवाच—

मेने ततो मुनिश्रेष्ठो माण्डव्यो लोकपूजितः । अभिषेकः कृतस्तत्र मलनिर्यातनं तथा ॥ १८
देवैस्तदोक्तो मुनिभिः स देशो मालवस्ततः । अभिषिक्ते सुरपतौ जाते च विमले तदा ॥ १९
आनीय गौतमीं गङ्गां तं पुण्यायाभिषेचिरे । सुराश्च ऋषयश्चैव अहं विष्णुस्तथैव च ॥ २०
वसिष्ठो गौतमश्चापि अगस्त्योऽत्रिश्च कश्यपः । एते चान्ये च ऋषयो देवा यक्षाः सपन्नगाः २१
स्नानं तत्पुण्यतोयेन अकुर्वन्नभिषेचनम् । मया पुनः शचीभर्ता कमण्डलुभवेन च ॥ २२
वारिणाऽप्यभिषिक्तश्च तत्र पुण्याऽभवन्नदी । सिक्ता चेति च तत्राऽऽसींत्ते गङ्गायां च संगते २३
संगमौ तत्र विख्यातौ सर्वदा मुनिसेवितौ । ततः प्रभृति तत्तीर्थं पुण्यासंगममुच्यते ॥ २४
सिक्तायाः संगमे पुण्यमैन्द्रं तदभिधीयते । तत्र सप्त सहस्राणि तीर्थान्यासञ्शुभानि च ॥ २५
तेषु स्नानं च दानं च विशेषेण तु संगमे । सर्वं तदक्षयं विद्यान्नात्र कार्या विचारणा ॥ २६
यदेतत्पुण्यमाख्यानं यः पठेच्च शृणोति वा । सर्वपापैः स मुच्येत मनोवाक्कायकर्मजैः ॥ २७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये पुण्यासिक्तासंगमेन्द्रतीर्थादिसप्त-
सहस्रतीर्थवर्णनं नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥

गौतमीमाहात्म्ये सप्तविंशोऽध्यायः ॥ २७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५६३९

अथ सप्तनवतितमोऽध्यायः ।

ब्रह्मोवाच—

पौलस्त्यं तीर्थमाख्यातं सर्वसिद्धिप्रदं नृणाम् । प्रभावं तस्य वक्ष्यामि भ्रष्टराज्यप्रदायकम् ॥ १
उत्तराशापतिः पूर्वमृद्धिसिद्धिसमन्वितः । पुरा लङ्कापतिश्चाऽऽसीज्ज्येष्ठो विश्रवसः सुतः ॥ २

तस्यैते भ्रातरश्चाऽऽसन्बलवन्तोऽमितप्रभाः । सापत्ना रावणश्चैव कुम्भकर्णो विभीषणः ॥ ३
तेऽपि विश्रवसः पुत्रा राक्षस्यां राक्षसास्तु ते । मद्दत्तेन विमानेन धनदो भ्रातृभिः सह ॥ ४
ममान्तिकं भक्तियुक्तो नित्यमेति तु याति च । रावणस्य तु या माता कुपिता साऽब्रवीत्सुतान्

रावणमातोवाच—

मरिष्ये न च जीविष्ये पुत्रा वैरूप्यकारणात् । देवाश्च दानवाश्चाऽऽसन्सापत्ना भ्रातरो मिथः ६
अन्योन्यवधमीप्सन्ते जयैश्वर्यवशानुगाः । तद्भवन्तो न पुरुषा न शक्ता न जयैषिणः ॥
सापत्नं योऽनुमन्यते तस्य जीवो निरर्थकः ॥ ७

ब्रह्मोवाच—

तन्मातृवचनं श्रुत्वा भ्रातरस्ते त्रयो मुने । जग्मुस्ते तपसेऽरण्यं कृतवन्तस्तपो महत् ॥ ८
मत्तो वरानवापुश्च त्रय एते च राक्षसाः । मातुलेन मरीचेन तथा मातामहेन तु ॥ ९
तन्मातृवचनाच्चापि ततो लङ्कामयाचत । रक्षोभावान्मातृदोषाद्भ्रात्रोर्वैरमभून्महत् ॥ १०
ततस्तदभवद्युद्धं देवदानवयोरिव । युद्धे जित्वाऽग्रजं शान्तं धनदं भ्रातरं तथा ॥ ११
पुष्पकं च पुरीं लङ्कां सर्वं चैव व्यपाहरत् । रावणो घोषयामास त्रैलोक्ये सचराचरे ॥ १२
यो दद्यादाश्रयं भ्रातुः स च वध्यो भवेन्मम । भ्रात्रा निरस्तो वैश्रवणो नैव प्रापाऽऽश्रयं क्वचित्
पितामहं पुलस्त्यं तं गत्वा नत्वाऽब्रवीद्वचः ॥ १३

धनद उवाच—

भ्रात्रा निरस्तो दुष्टेन किं करोमि वदस्व मे । आश्रयः शरणं यत्स्याद्दैवं वा तीर्थमेव च ॥ १४

ब्रह्मोवाच—

तत्पौत्रवचनं श्रुत्वा पुलस्त्यो वाक्यमब्रवीत् । १५

पुलस्त्य उवाच—

गौतमीं गच्छ पुत्र त्वं स्तुहि देवं महेश्वरम् । तत्र नास्य प्रवेशः स्याद्गङ्गाया जलमध्यतः ॥ १६
सिद्धिं प्राप्स्यसि कल्याणीं तथा कुरु मया सह ॥ १७

ब्रह्मोवाच—

तथेत्युक्त्वा जगामासौ सभार्यो धनदस्तथा । पित्रा मात्रा च वृद्धेन पुलस्त्येन धनेश्वरः ॥ १८
गत्वा तु गौतमीं गङ्गां शुचिः स्नात्वा यतव्रतः । तुष्टाव देवदेवेशं भुक्तिमुक्तिप्रदं शिवम् ॥ १९

धनद उवाच—

स्वामी त्वमेवास्य चराचरस्य विश्वस्य शंभो न परोऽस्ति कश्चित् ।
त्वामप्यवज्ञाय यदीह मोहात्प्रगल्भते कोऽपि स शोच्य एव ॥ २०
त्वमष्टमूर्त्या सकलं बिभर्षि त्वदाज्ञया वर्तत एव सर्वम् ।
तथाऽपि वेदेति बुधो भवन्तं न जात्वविद्वान्महिमा पुरातनम् ॥ २१
मलप्रसूतं यदवोचदम्बा हास्यात्सुतोऽयं तव देव शूरः ।
त्वत्प्रेक्षिताद्यः स च विघ्नराजो जज्ञे त्वहो चेष्टितमीशदृष्टेः ॥ २२

---

१ घ. °लसंप्लवात् । सि° ।

अश्रुप्लुताङ्गी गिरिजा समीक्ष्य वियुक्तदांपत्यमितीशमूचे* ।
मनोभवोऽभून्मदनो रतिश्च सौभाग्यपूर्व(र्ण)त्वमवाप सोमात् ॥ २३

ब्रह्मोवाच—

इत्यादि स्तुवतस्तस्य पुरतोऽभूत्रिलोचनः । वरेण च्छन्दयामास हर्षान्नोवाच किंचन ॥ २४
तूष्णींभूते तु धनदे पुलस्त्ये च महेश्वरे । पुनः पुनर्वरस्वेति शिवे वादिनि हर्षिते ॥ २५
एतस्मिन्नन्तरे तत्र वागुवाचाशरीरिणी । प्राप्तव्यं धनपालत्वं वदन्तीदं महेश्वरम् ॥ २६
पुलस्त्यस्य तु यच्चित्तं पितुर्वैश्रवणस्य तु । विदित्वेव तदा वाणी शुभमर्थमुदीरयत् ॥ २७
भूतवद्भवितव्यं स्याद्दास्यमानं तु दत्तवत् । प्राप्तव्यं प्राप्तवत्तत्र दैवी वागभवच्छुभा ॥ २८
प्रभूतशत्रुः परिभूतदुःखः संपूज्य सोमेश्वरमाप लिङ्गम् ।
दिगीश्वरत्वं द्रविणप्रभुत्वमपारदातृत्वकलत्रपुत्रान् ॥ २९
तां वाचं धनदः श्रुत्वा देवदेवं त्रिशूलिनम् । एवं भवतु नामेति धनदो वाक्यमब्रवीत् ॥ ३०
तथैवास्त्विति देवेशो दैवीं वाचममन्यत । पुलस्त्यं च वरैः पुण्यैस्तथा विश्रवसं मुनिम् ॥ ३१
धनपालं च देवेशो ह्यभिनन्द्य ययौ शिवः । ततः प्रभृति तत्तीर्थं पौलस्त्यं धनदं विदुः ॥ ३२
तथा वैश्रवसं पुण्यं सर्वकामप्रदं शुभम् । तेषु स्नानादि यत्किंचित्तत्सर्वं बहुपुण्यदम् ॥ ३३

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये पौलस्त्यतीर्थवर्णनं नाम
सप्तनवतितमोऽध्यायः ॥ ९७ ॥

गौतमीमाहात्म्येऽष्टाविंशोऽध्यायः ॥ २८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५६७१

अथाष्टनवतितमोऽध्यायः ।

ब्रह्मोवाच—

अग्नितीर्थमिति ख्यातं सर्वक्रतुफलप्रदम् । सर्वविघ्नोपशमनं तत्तीर्थस्य फलं शृणु ॥ १
जातवेदा इति ख्यातो अग्नेर्भ्राता स हव्यवाट् । हव्यं वहन्तं देवानां गौतम्यास्तीर एव तु ॥ २
ऋषीणां सत्रसदने अग्नेर्भ्रातरमुत्तमम् । भ्रातुः प्रियं तथा दक्षं मधुर्दितिसुतो बली ॥ ३
जघान ऋषिमुख्येषु पश्यत्सु च सुरेष्वपि । हव्यं देवा नैव चाऽऽपुर्मृते वै जातवेदसि ॥ ४
मृते भ्रातरि स त्वग्निः प्रिये वै जातवेदसि । कोपेन महताऽऽविष्टो गाङ्गमम्भः समाविशत् ॥ ५
गङ्गाम्भसि समाविष्टे ह्यग्नौ देवाश्च मानुषाः । जीवमुत्सर्जयामासुरग्निजीवा यतो मताः ॥ ६
यत्राग्निर्जलमाविष्टस्तं देशं सर्व एव ते । आजग्मुर्विबुधाः सर्वे ऋषयः पितरस्तथा ॥ ७
विनाऽग्निना न जीवामः स्तुवन्तोऽग्निं विशेषतः । अग्निं जलगतं दृष्ट्वा प्रियं चोचुर्दिवौकसः ॥ ८

देवा ऊचुः—

देवाञ्जीवय हव्येन कव्येन च पितॄंस्तथा । मानुषानन्नपाकेन बीजानां क्लेदनेन च ॥ ९

ब्रह्मोवाच—

अग्निरप्याह तान्देवाञ्शक्तो यो मे गतोऽनुजः । क्रियमाणे भवत्कार्ये या गतिर्जातवेदसः ॥ १०

---

* अत्र किंचित्त्रुटितम् ।

सा वाऽपि स्यान्मम सुरा नोत्सहे कार्यसाधने । कार्यं तु सर्वतस्तस्य भवतां जातवेदसः ॥ ११
इमां स्थितिमनुप्राप्तो न जाने मे कथं भवेत् । इह चामुत्र च व्याप्तौ शक्तिरप्यत्र नो भवेत् ॥ १२
अथापि क्रियमाणे वै कार्ये सैव गतिर्मम । देवास्तमूचुर्भावेन सर्वेण ऋषयस्तथा ॥ १३
आयुः कर्मणि च प्रीतिर्व्याप्तौ शक्तिश्च दीयते । प्रयाजाननुयाजांश्च दास्यामो हव्यवाहन ॥ १४
देवानां त्वं मुखं श्रेष्ठमाहुत्यः प्रथमास्तव । त्वया दत्तं तु यद्द्रव्यं भोक्ष्यामः सुरसत्तम ॥ १५

ब्रह्मोवाच—

ततस्तुष्टोऽभवद्वह्निर्देववाक्याद्यथाक्रमम् । इह चामुत्र च व्याप्तौ हव्ये वा लौकिके तथा ॥ १६
सर्वत्र वह्निरभयः समर्थोऽभूत्सुराज्ञया । जातवेदा बृहद्भानुः सप्तार्चिर्नीललोहितः ॥ १७
जलगर्भः शमीगर्भो यज्ञगर्भः स उच्यते । जलादाकृष्य विबुधा अभि(भ्य)षिच्य वि(श्वन्वि)
भावसुम् ॥ १८
उभयत्र पदे वासः सर्वगोऽग्निस्ततोऽभवत् । यथागतं सुरा जग्मुर्वह्नितीर्थं तदुच्यते ॥ १९
तत्र सप्त शतान्यासंस्तीर्थानि गुणवन्ति च । तेषु स्नानं च दानं च यः करोति जितात्मवान् २०
अश्वमेधफलं साग्रं प्राप्नोत्यविकलं शुभम् । देवतीर्थं च तत्रैव आग्नेयं जातवेदसम् ॥ २१
अग्निप्रतिष्ठितं लिङ्गं तत्राऽऽस्तेऽनेकवर्णवत् । तद्देवदर्शनादेव सर्वक्रतुफलं लभेत् ॥ २२

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्येऽग्नितीर्थवर्णनं नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥

गौतमीमाहात्म्य एकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५६९३

अथैकोनशततमोऽध्यायः ।

ब्रह्मोवाच—

ऋणप्रमोचनं नाम तीर्थं वेदविदो विदुः । तस्य स्वरूपं वक्ष्यामि शृणु नारद तन्मनाः ॥ १
आसीत्पृथुश्रवा नाम प्रियः कक्षीवतः सुतः । न दारसंग्रहं लेभे वैराग्यान्नाग्निपूजनम् ॥ २
कनीयांस्तु समर्थोऽपि परिवित्तिभयान्मुने । नाकरोद्दारकर्मादि नैवाग्नीनामुपासनम् ॥ ३
ततः प्रोचुः पितृगणाः पुत्रं कक्षीवतः शुभम् । ज्येष्ठं चैव कनिष्ठं च पृथक्पृथगिदं वचः ॥ ४

पितर ऊचुः—

ऋणत्रयापनोदाय क्रियतां दारसंग्रहः ॥ ५

ब्रह्मोवाच—

नेत्युवाच ततो ज्येष्ठः किमृणं केन युज्यते । कनीयांस्तु पितॄन्प्राह न योग्यो दारसंग्रहः ॥ ६
ज्येष्ठे सति महाप्राज्ञः परिवित्तिभयादिति । तावुभौ पुनरप्येवमूचुस्ते वै पितामहाः ॥ ७

पितर ऊचुः—

यातामुभौ गौतमीं तु पुण्यां कक्षीवतः सुतौ । कुरुतां गौतमीस्नानं सर्वाभीष्टप्रदायकम् ॥ ८
गच्छतां गौतमीं गङ्गां लोकत्रितयपावनीम् । स्नानं च तर्पणं तस्यां कुरुतां श्रद्धयाऽन्वितौ ॥ ९
दृष्टाऽवनामिता ध्याता गौतमी सर्वकामदा । न देशकालजात्यादिनियमोऽत्रावगाहने ॥
ज्येष्ठोऽनृणस्ततो भूयात्परिवित्तिर्न चेतरः ॥ १०

ब्रह्मोवाच—

ततः पृथुश्रवा ज्येष्ठः कृत्वा स्नानं सतर्पणम् । त्रयाणामपि लोकानां काक्षीवतोऽनृणोऽभवत् ११
ततः प्रभृति तत्तीर्थमृणमोचनमुच्यते । श्रौतस्मार्तऋणेभ्यश्च इतरेभ्यश्च नारद ॥
तत्र स्नानेन दानेन ऋणी मुक्तः सुखी भवेत् ॥ १२

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये ऋणमोचनतीर्थवर्णनं नाम नवनवतितमोऽध्यायः ॥ ९९ ॥

गौतमीमाहात्म्ये त्रिंशत्तमोऽध्यायः ॥ ३० ॥

आदितः श्लोकानां समष्ट्यङ्काः—५७०९

अथ शततमोऽध्यायः ।

ब्रह्मोवाच—

सुपर्णासंगमं नाम काद्रवासंगमं तथा । महेश्वरो यत्र देवो गङ्गापुलिनमाश्रितः ॥ १
अग्निकुण्डं च तत्रैव रौद्रं वैष्णवमेव च । सौरं सौम्यं तथा ब्राह्मं कौमारं वारुणं तथा ॥ २
अप्सरा च नदी यत्र संगता गङ्गया तथा । तत्तीर्थस्मरणादेव कृतकृत्यो भवेन्नरः ॥ ३
सर्वपापप्रशमनं शृणु यत्नेन नारद । इन्द्रेण हिंसिताः पूर्वं वालखिल्या महर्षयः ॥
दत्तार्धतपसः सर्वे प्रोचुस्ते काश्यपं मुनिम् ॥ ४

वालखिल्या ऊचुः—

पुत्रमुत्पादयानेन इन्द्रदर्पहरं शुभम् । तपसोऽर्धं तु दास्यामस्तथेत्याह मुनिस्तु तान् ॥ ५
सुपर्णायां[1] ततो गर्भमादधे स प्रजापतिः । कद्र्वां चैव शनैर्ब्रह्मन्सर्पाणां सर्पमातरि ॥ ६
ते गर्भिण्यावुभे आह गन्तुकामः प्रजापतिः । अपराधो न च क्वापि कार्यो गमनमेव च ॥ ७
अन्यत्र गमनाच्छापो भविष्यति न संशयः ॥ ८

ब्रह्मोवाच—

इत्युक्त्वा स ययौ पत्न्यौ गते भर्तरि ते उभे । तदैव जग्मतुः सत्रमृषीणां भावितात्मनाम् ॥ ९
ब्रह्मवृन्दसमाकीर्णं गङ्गातीरसमाश्रितम् । उन्मत्ते ते उभे नित्यं वयःसंपत्तिगर्विते ॥ १०
निवार्यमाणे बहुशो मुनिभिस्तत्त्वदर्शिभिः । विकुर्वत्यौ तत्र सत्रे समानि च हवींषि च ॥ ११
योषितां दुर्विलसितं कः संवरितुमीश्वरः । ते दृष्ट्वा चुक्षुभुर्विप्रा अपमार्गरते उभे ॥ १२
अपमार्गस्थिते यस्मादापगे हि भविष्यथः । सुपर्णा चैव कद्रूश्च नद्यौ ते संबभूवतुः ॥ १३
स कदाचिद्गृहं प्रायात्कश्यपोऽथ प्रजापतिः । ऋषिभ्यस्तत्र वृत्तान्तं शापं ताभ्यां सविस्तरम्
श्रुत्वा तु विस्मयाविष्टः किं करोमीत्यचिन्तयत् । ऋषिभ्यः कथयामास वालखिल्या इति श्रुताः
त ऊचुः कश्यपं विप्रं गत्वा गङ्गां तु गौतमीम् । तत्र स्तुहि महेशानं पुनर्भार्ये भविष्यतः ॥ १६
ब्रह्महत्याभयादेव यत्र देवो महेश्वरः । गङ्गामध्ये सदा ह्यास्ते मध्यमेश्वरसंज्ञया ॥ १७
तथेत्युक्त्वा कश्यपोऽपि स्नात्वा गङ्गां जितव्रतः । तुष्टाव स्तवनैः पुण्यैर्देवदेवं महेश्वरम् ॥ १८

---

१ घ. विनतायां ।

कश्यप उवाच—

लोकत्रयैकाधिपतेर्न यस्य कुत्रापि वस्तुन्यभिमानलेशः ।
स सिद्धनाथोऽखिलविश्वकर्ता भर्ता शिवाया भवतु प्रसन्नः ॥ १९
तापत्रयोष्णद्युतितापितानामितस्ततो वै परिधावतां च ।
शरीरिणां स्थावरजङ्गमानां त्वमेव दुःखव्यपनोददक्षः ॥ २०
सत्त्वादियोगस्त्रिविधोऽपि यस्य शक्रादिभिर्वक्तुमशक्य एव ।
विचित्रवृत्तिं परिचिन्त्य सोमं सुखी सदा दानपरो वरेण्यः ॥ २१

ब्रह्मोवाच—

इत्यादिस्तुतिभिर्देवः स्तुतो गौरीपतिः शिवः । प्रसन्नो ह्यददाच्छंभुः कश्यपाय वरान्बहून् ॥२२
भार्यार्थिनं तु तं प्राह स्यातां भार्ये उभे तु ते । नदीस्वरूपे पत्न्यौ ये गङ्गां प्राप्य सरिद्वराम् २३
तत्संगमनमात्रेण ताभ्यां भूयात्स्वकं वपुः । ते गर्भिण्यौ पुनर्जाते गङ्गायाश्च प्रसादतः ॥ २४
ततः प्रजापतिः प्रीतो भार्ये प्राप्य महामनाः । आह्वयामास तान्विप्रान्गौतमीतीरमाश्रितान् ॥२५
सीमन्तोन्नयनं चक्रे ताभ्यां प्रीतः प्रजापतिः । ब्राह्मणान्पूजयामास विधिदृष्टेन कर्मणा ॥ २६
भुक्तवत्स्वथ विप्रेषु कश्यपस्याथ मन्दिरे । भर्तृसमीपोपविष्टा कद्रूर्विप्रान्निरीक्ष्य च ॥ २७
ततः कद्रूरृषीनक्ष्णा प्राहसत्ते च चुक्षुभुः । येनाक्ष्णा हसिता पापे भज्यतां तेऽक्षि पापवत् ॥२८
काणाऽभवत्ततः कद्रूः सर्पमातेति योच्यते । ततः प्रसादयामास कश्यपो भगवानृषीन् ॥ २९
ततः प्रसन्नास्ते प्रोचुर्गौतमी सरितां वरा । अपराधसहस्रेभ्यो रक्षिष्यति च सेवनात् ॥ ३०
भार्यान्वितस्तथा चक्रे कश्यपो मुनिसत्तमः । ततः प्रभृति तत्तीर्थमुभयोः संगमं विदुः ॥
सर्वपापप्रशमनं सर्वक्रतुफलप्रदम् ॥ ३१

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे कद्रूसुपर्णासंगमतीर्थवर्णनं नाम शततमोऽध्यायः ॥ १०० ॥

गौतमीमाहात्म्य एकत्रिंशोऽध्यायः ॥ ३१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५७३६

अथैकाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

पुरूरवसमाख्यातं तीर्थं वेदविदो विदुः । स्मरणादेव पापानां नाशनं किंतु दर्शनात् ॥ १
पुरूरवा ब्रह्मसदः प्राप्य तत्र सरस्वतीम् । यदृच्छया देवनदीं हसन्तीं ब्रह्मणोऽन्तिके ॥
तां दृष्ट्वा रूपसंपन्नामुर्वशीं प्राह भूपतिः ॥ २

राजोवाच—

केयं रूपवती साध्वी स्थितेयं ब्रह्मणोऽन्तिके । सर्वासामुत्तमा योषिद्दीपयन्ती सभामिमाम् ॥ ३

ब्रह्मोवाच—

उर्वशी प्राह राजानमियं देवनदी शुभा । सरस्वती ब्रह्मसुता नित्यमेति च याति च ॥
तच्छ्रुत्वा विस्मितो राजा आनयेमां ममान्तिकम् ॥ ४

ब्रह्मोवाच—
उर्वशी पुनरप्याह राजानं भूरिदक्षिणम् ॥ ५
उर्वश्युवाच—
आनीयते महाराज तस्याः सर्वं निवेद्य च ॥ ६
ब्रह्मोवाच—
ततस्तां प्राहिणोत्तत्र राजा प्रीत्या तदोर्वशीम् । सा गत्वा राजवचनं न्यवेदयदथोर्वशी ॥ ७
सरस्वत्यपि तन्मेने उर्वश्या यन्निवेदितम् । सा तथेति प्रतिज्ञाय प्रायाद्यत्र पुरूरवाः ॥ ८
सरस्वत्यास्ततस्तीरे स रेमे बहुलाः समाः । सरस्वानभवत्पुत्रो यस्य पुत्रो बृहद्रथः ॥ ९
तां गच्छन्तीं नृपगृहं नित्यमेव सरस्वतीम् । सरस्वन्तं ततो लक्ष्म ज्ञात्वाऽन्येषु तथा कृतम् ॥ १०
तस्यै ददावहं शापं भूया इति महानदी । मच्छापभीता वागीशा प्रागादेवीं च गौतमीम् ॥ ११
कमण्डलुभवां पूतां मातरं लोकपावनीम् । तापत्रयोपशमनीमैहिकामुष्मिकप्रदाम् ॥ १२
सा गत्वा गौतमीं देवीं प्राह मच्छापमादितः । गङ्गाऽपि मामुवाचेदं विशापां कर्तुमर्हसि ॥ १३
न युक्तं यत्सरस्वत्याः शापं त्वं दत्तवानसि । स्त्रीणामेष स्वभावो वै पुंस्कामा योषितो यतः १४
स्वभावचपला ब्रह्मन्योषितः सकला अपि । त्वं कथं तु न जानीषे जगत्स्रष्टाऽम्बुजासन ॥ १५
विडम्बयति कं वा न कामो वाऽपि स्वभावतः । ततो विशापमवदं दृश्याऽपि स्यात्सरस्वती १६
तस्माच्छापान्नदी मर्त्ये दृश्याऽदृश्या सरस्वती । यत्रैषा संगता देवी गङ्गायां शापविह्वला ॥ १७
तत्र प्रायान्नृपवरो धार्मिकः स पुरूरवाः । तपस्तप्त्वा समाराध्य देवं सिद्धेश्वरं हरम् ॥ १८
सर्वान्कामानथावाप गङ्गायाश्च प्रसादतः । ततः प्रभृति तत्तीर्थं पुरूरवसमुच्यते ॥ १९
सरस्वतीसंगमं च ब्रह्मतीर्थं तदुच्यते । सिद्धेश्वरो यत्र देवः सर्वकामप्रदं तु तत् ॥ २०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये सरस्वतीसंगमपुरूरवसब्रह्मतीर्थसिद्धेश्वरवर्णनं नामैकाधिकशततमोऽध्यायः ॥ १०१ ॥

गौतमीमाहात्म्ये द्वात्रिंशोऽध्यायः ॥ ३२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५७५६

अथ द्व्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—
सावित्री चैव गायत्री श्रद्धा मेधा सरस्वती । एतानि पञ्च तीर्थानि पुण्यानि मुनयो विदुः ॥ १
तत्र स्नात्वा तु पीत्वा तु मुच्यते सर्वकल्मषात् । सावित्री चैव गायत्री श्रद्धा मेधा सरस्वती ॥ २
एता मम सुता ज्येष्ठा धर्मसंस्थानहेतवः । सर्वासामुत्तमां कांचिन्निर्ममे लोकसुन्दरीम् ॥ ३
तां दृष्ट्वा विकृता बुद्धिर्ममाऽऽसीन्मुनिसत्तम । गृह्यमाणा मया बाला सा मां दृष्ट्वा पलायिता ॥ ४
मृगीभूता तु सा बाला मृगोऽहमभवं तदा । मृगव्याधोऽभवच्छंभुर्धर्मसंरक्षणाय च ॥ ५
ता मद्भीताः पञ्च सुता गङ्गामीयुर्महानदीम् । ततो महेश्वरः प्रायाद्धर्मसंरक्षणाय सः ॥ ६
धनुर्गृहीत्वा सशरमीशोऽपि मृगरूपिणम् । मामुवाच वधिष्ये त्वां मृगव्याधस्तदा हरः ॥ ७

---

१ क. एताः पञ्च सु॰ ।

तत्कर्मणो निवृत्तोऽहं प्रादां कन्यां विवस्वते । सावित्र्याद्याः पञ्च सुता नदीरूपेण संगताः ॥८
ता आगताः पुनश्चापि स्वर्गं लोकं ममान्तिकम् । यत्र ताः संगता देव्या पञ्च तीर्थानि नारद ९
संगतानि च पुण्यानि पञ्च नद्यः सरस्वती । तेषु स्नानं तथा दानं यत्किंचित्कुरुते नरः ॥ १०
सर्वकामप्रदं तत्स्यान्नैष्कर्म्यान्मुक्तिदं स्मृतम् । तत्राभवन्मृगव्याधं तीर्थं सर्वार्थदं नृणाम् ॥
स्वर्गमोक्षफलं चान्यद्ब्रह्मतीर्थफलं स्मृतम् ॥ ११

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये पञ्चतीर्थमाहात्म्यनिरूपणं नाम
द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

गौतमीमाहात्म्ये त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

श्लोकानामादितः समष्ट्यङ्काः—५७६७

अथ त्र्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

शमीतीर्थमिति ख्यातं सर्वपापोपशान्तिदम् । तस्याऽऽख्यानं प्रवक्ष्यामि शृणु यत्नेन नारद ॥ १
आसीत्प्रियव्रतो नाम क्षत्रियो जयतां वरः । गौतम्या दक्षिणे तीरे दीक्षां चक्रे पुरोधसा ॥ २
हयमेध उपक्रान्ते ऋत्विग्भिर्ऋषिभिर्वृते । तस्य राज्ञो महाबाहोर्वसिष्ठस्तु पुरोहितः ॥ ३
तद्यज्ञवाटमगमद्दानवोऽथ हिरण्यकः । तं दानवमभिप्रेक्ष्य देवास्त्विन्द्रपुरोगमाः ॥ ४
भीताः केचिद्दिवं जग्मुर्हव्यवाट्शमिमाविशत् । अश्वत्थं विष्णुरगमद्भानुरर्कं वटं शिवः ॥ ५
सोमः पलाशमगमद्गङ्गाम्भो हव्यवाहनः । अश्विनौ तु हयं गृह्य वायसोऽभूद्यमः स्वयम् ॥ ६
एतस्मिन्नन्तरे तत्र वसिष्ठो भगवानृषिः । यष्टिमादाय दैतेयान्यवारयदथाऽऽज्ञया ॥ ७
ततः प्रवृत्तः पुनरेव यज्ञो दैत्यो गतः स्वेन बलेन युक्तः ।
इमानि तीर्थानि ततः शुभानि दशाश्वमेधस्य फलानि दद्युः ॥ ८
प्रथमं तु शमीतीर्थं द्वितीयं वैष्णवं विदुः । आर्कं शैवं च सौम्यं च वासिष्ठं सर्वकामदम् ॥ ९
देवाश्च ऋषयः सर्वे निवृत्ते मखविस्तरे । तुष्टाः प्रोचुर्वसिष्ठं तं यजमानं प्रियव्रतम् ॥ १०
तांश्च वृक्षांस्तां च गङ्गां मुदा युक्ताः पुनः पुनः । हयमेधस्य निष्पत्त्यै एते याता इतस्ततः॥ ११
हयमेधफलं दद्युस्तीर्थानीत्यवदन्सुराः । तस्मात्स्नानेन दानेन तेषु तीर्थेषु नारद ॥
हयमेधफलं पुण्यं प्राप्नोति न मृषा वचः ॥ १२

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे तीर्थमाहात्म्ये शम्यादितीर्थवर्णनं नाम
त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

गौतमीमाहात्म्ये चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५७७९

अथ चतुरधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

विश्वामित्रं हरिश्चन्द्रं शुनःशेपं च रोहितम् । वारुणं ब्राह्ममाग्नेयमैन्द्रमैन्दवमैश्वरम् ॥ १
मैत्रं च वैष्णवं चैव याम्यमाश्विनमौशनम् । एतेषां पुण्यतीर्थानां नामधेयं शृणुष्व मे ॥ २
हरिश्चन्द्र इति त्वासीदिक्ष्वाकुप्रभवो नृपः । तस्य गृहे मुनी प्राप्तौ नारदः पर्वतस्तथा ॥
कृत्वाऽऽतिथ्यं तयोः सम्यग्घरिश्चन्द्रोऽब्रवीदृषी ॥ ३

हरिश्चन्द्र उवाच—

पुत्रार्थं क्लिश्यते लोकः किं पुत्रेण भविष्यति । ज्ञानी वाऽप्यथवाऽज्ञानी उत्तमो मध्यमोऽथवा ॥
एतं मे संशयं नित्यं ब्रूतामृषिवरावुभौ ॥ ४

ब्रह्मोवाच—

तावूचतुर्हरिश्चन्द्रं पर्वतो नारदस्तथा ॥ ५

नारदपर्वतावूचतुः—

एकधा दशधा राजञ्शतधा च सहस्रधा । उत्तरं विद्यते सम्यक्तथाऽप्येतदुदीर्यते ॥ ६
नापुत्रस्य परो लोको विद्यते नृपसत्तम । जाते पुत्रे पिता स्नानं यः करोति जनाधिप ॥ ७
दशानामश्वमेधानामभिषेकफलं लभेत् । आत्मप्रतिष्ठा पुत्रात्स्याज्जायते चामरोत्तमः ॥ ८
अमृतेनामरा देवाः पुत्रेण ब्राह्मणादयः । त्रिऋणान्मोचयेत्पुत्रः पितरं च पितामहान् ॥ ९
किंतु मूलं किमु जलं किंतु श्मश्रूणि किं तपः । विना पुत्रेण राजेन्द्र स्वर्गो मुक्तिः सुतात्स्मृताः॥
पुत्र एव परो लोको धर्मः कामोऽर्थ एव च । पुत्रो मुक्तिः परं ज्योतिस्तारकः सर्वदेहिनाम् ११
विना पुत्रेण राजेन्द्र स्वर्गमोक्षौ सुदुर्लभौ । पुत्र एव परो लोके धर्मकामार्थसिद्धये ॥ १२
विना पुत्रेण यद्दत्तं विना पुत्रेण यद्धुतम् । विना पुत्रेण यज्जन्म व्यर्थं तदवभाति मे ॥ १३
तस्मात्पुत्रसमं किंचित्काम्यं नास्ति जगत्त्रये । तच्छ्रुत्वा विस्मयवांस्तावुवाच नृपः पुनः ॥ १४

हरिश्चन्द्र उवाच—

कथं मे स्यात्सुतो ब्रूतां यत्र क्वापि यथातथम् । येन केनाप्युपायेन कृत्वा किंचित्तु पौरुषम् ॥
मन्त्रेण यागदानाभ्यामुत्पाद्योऽसौ सुतो मया ॥ १५

ब्रह्मोवाच—

तावूचतुर्नृपश्रेष्ठं हरिश्चन्द्रं सुतार्थिनम् । ध्यात्वा क्षणं तथा सम्यग्गौतमीं याहि मानद ॥ १६
तत्रापांपतिरुत्कृष्टं ददाति मनसीप्सितम् । वरुणः सर्वदाता वै मुनिभिः परिकीर्तितः ॥ १७
स तु प्रीतः शनैः काले तव पुत्रं प्रदास्यति । एतच्छ्रुत्वा नृपश्रेष्ठो मुनिवाक्यं तथाऽकरोत् ॥१८
तोषयामास वरुणं गौतमीतीरमाश्रितः । ततश्च तुष्टो वरुणो हरिश्चन्द्रमुवाच ह ॥ १९

वरुण उवाच—

पुत्रं दास्यामि ते राजँल्लोकत्रयविभूषणम् । यदि यक्ष्यसि तेनैव तव पुत्रो भवेद्ध्रुवम् ॥ २०

ब्रह्मोवाच—

हरिश्चन्द्रोऽपि वरुणं यक्ष्ये तेनेत्यथोचत । ततो गत्वा हरिश्चन्द्रश्चरुं कृत्वा तु वारुणम् ॥ २१
भार्यायै नृपतिः प्रादात्ततो जातः सुतो नृपात् । जाते पुत्रे अपामीशः प्रोवाच वदतां वरः ॥२२

वरुण उवाच—
अद्यैव पुत्रो यष्टव्यः स्मरसे वचनं पुरा ॥ २३
ब्रह्मोवाच—
हरिश्चन्द्रोऽपि वरुणं प्रोवाचेदं क्रमागतम् ॥ २४
हरिश्चन्द्र उवाच—
निर्दशो मेध्यतां याति पशुर्यक्ष्ये ततो ह्यहम् ॥ २५
ब्रह्मोवाच—
तच्छ्रुत्वा वचनं राज्ञो वरुणोऽगात्स्वमालयम् । निर्दशे पुनरभ्येत्य यजस्वेत्याह तं नृपम् ॥ २६
राजाऽपि वरुणं प्राह निर्दन्तो निष्फलः पशुः । पशोर्दन्तेषु जातेषु एहि गच्छाधुनाऽप्पते ॥२७
तच्छ्रुत्वा राजवचनं पुनः प्रायादपांपतिः । जातेषु चैव दन्तेषु सप्तवर्षेषु नारद ॥ २८
पुनरप्याह राजानं यजस्वेति ततोऽब्रवीत् । राजाऽपि वरुणं प्राह पत्स्यन्तीमे अपांपते ॥ २९
संपत्स्यन्ति तथा चान्ये ततो यक्ष्ये व्रजाधुना । पुनः प्रायात्स वरुणः पुनर्दन्तेषु नारद ॥
यजस्वेति नृपं प्राह राजा प्राह त्वपांपतिम् ॥ ३०
राजोवाच—
यदा तु क्षत्रियो यज्ञे पशुर्भवति वारिप । धनुर्वेदं यदा वेत्ति तदा स्यात्पशुरुत्तमः ॥ ३१
ब्रह्मोवाच—
तच्छ्रुत्वा राजवचनं वरुणोऽगात्स्वमालयम् । यदाऽस्त्रेषु च शस्त्रेषु समर्थोऽभूत्स रोहितः ॥ ३२
सर्ववेदेषु शास्त्रेषु वेत्ताऽभूत्स त्वरिंदमः । युवराज्यमनुप्राप्ते रोहिते षोडशाब्दिके ॥ ३३
प्रीतिमानगमत्तत्र यत्र राजा सरोहितः । आगत्य वरुणः प्राह यजस्वाद्य सुतं स्वकम् ॥ ३४
ओमित्युक्त्वा नृपवर ऋत्विजः प्राह भूपतिः । रोहितं च सुतं ज्येष्ठं शृण्वतो वरुणस्य च ३५
हरिश्चन्द्र उवाच—
एहि पुत्र महावीर यक्ष्ये त्वां वरुणाय हि ॥ ३६
ब्रह्मोवाच—
किमेतदित्यथोवाच रोहितः पितरं प्रति । पिताऽपि तद्यथावृत्तमाचचक्षे सविस्तरम् ॥
रोहितः पितरं प्राह शृण्वतो वरुणस्य च ॥ ३७
रोहित उवाच—
अहं पूर्वं महाराज ऋत्विग्भिः सपुरोहितः । विष्णवे लोकनाथाय यक्ष्येऽहं त्वरितं शुचिः ॥
पशुना वरुणेनाथ तदनुज्ञातुमर्हसि ॥ ३८
ब्रह्मोवाच—
रोहितस्य तु तद्वाक्यं श्रुत्वा वारीश्वरस्तदा । कोपेन महताऽऽविष्टो जलोदरमथाकरोत् ॥ ३९
हरिश्चन्द्रस्य नृपते रोहितः स वनं ययौ । गृहीत्वा स धनुर्दिव्यं रथारूढो गतव्यथः ॥ ४०
यत्र चाऽऽराध्य वरुणं हरिश्चन्द्रो जनेश्वरः । गङ्गायां प्राप्तवान्पुत्रं तत्रागात्सोऽपि रोहितः ॥ ४१
व्यतीतान्यथ वर्षाणि पञ्चषष्ठे प्रवर्तति । तत्र स्थित्वा नृपसुतः शुश्राव नृपते रुजम् ॥ ४२
मया पुत्रेण जातेन पितुर्वै क्लेशकारिणा । किं फलं किंनु कृत्यं स्यादित्येवं पर्यचिन्तयत् ॥ ४३
तस्यास्तीरे ऋषीन्पुण्यानपश्यन्नृपतेः सुतः । गङ्गातीरे वर्तमानमपश्यद्दृषिसत्तमम् ॥ ४४

अजीगर्तमिति ख्यातमृषेस्तु वयसः सुतम् । त्रिभिः पुत्रैरनुवृतं भार्यया क्षीणवृत्तिकम् ॥
तं दृष्ट्वा नृपतेः पुत्रो नमस्येदं वचोऽब्रवीत् ॥ ४५

रोहित उवाच—

क्षीणवृत्तिः कृशः कस्माद्दुर्मना इव लक्ष्यसे ॥ ४६

ब्रह्मोवाच—

अजीगर्तोऽपि चोवाच रोहितं नृपतेः सुतम् ॥ ४७

अजीगर्त उवाच—

वर्तनं नास्ति देहस्य भोक्तारो बहवश्च मे । विनाऽन्नेन मरिष्यामो ब्रूहि किं करवामहे ॥ ४८

ब्रह्मोवाच—

तच्छ्रुत्वा पुनरप्याह नृपपुत्र ऋषिं तदा । ४९

रोहित उवाच—

तव किं वर्तते चित्ते तद्ब्रूहि वदतांवर ॥ ५०

अजीगर्त उवाच—

हिरण्यं रजतं गावो धान्यं वस्त्रादिकं न मे । विद्यते नृपशार्दूल वर्तनं नास्ति मे ततः ॥ ५१
सुता मे सन्ति भार्या च अहं वै पञ्चमस्तथा । नैतेषां कतमस्यापि क्रेताऽन्नेन नृपोत्तम ॥ ५२

रोहित उवाच—

किं क्रीणासि महाबुद्धेऽजीगर्त सत्यमेव मे । वद नान्यच्च वक्तव्यं विप्रा वै सत्यवादिनः ॥ ५३

अजीगर्त उवाच—

त्रयाणामपि पुत्राणामेकं वा मां तथैव च । भार्यां वाऽपि गृहाणेमां क्रीत्वा जीवामहे वयम् ॥ ५४

रोहित उवाच—

किं भार्यया महाबुद्धे किं त्वया वृद्धरूपिणा । युवानं देहि पुत्रं मे पुत्राणां यं त्वमिच्छसि ॥ ५५

अजीगर्त उवाच—

ज्येष्ठपुत्रं शुनःपुच्छं नाहं क्रीणामि रोहित । माता कनीयसं चापि न क्रीणाति ततोऽनयोः
मध्यमं तु शुनःशेपं क्रीणामि वद तद्धनम् ॥ ५६

रोहित उवाच—

वरुणाय पशुः कल्प्यः पुरुषो गुणवत्तरः । यदि क्रीणासि मूल्यं त्वं वद सत्यं महामुने ॥ ५७

ब्रह्मोवाच—

तथेत्युक्त्वा त्वजीगर्तः पुत्रमूल्यमकल्पयत् । गवां सहस्रं धान्यानां निष्काणां चापि वाससाम्
राजपुत्र वरं देहि दास्यामि स्वसुतं तव । ५८

ब्रह्मोवाच—

तथेत्युक्त्वा रोहितोऽपि प्रादात्सवसनं धनम् । दत्त्वा जगाम पितरमृषिपुत्रेण रोहितः ॥
पित्रे निवेदयामास क्रयक्रीतमृषेः सुतम् ॥ ५९

रोहित उवाच—

वरुणाय यजस्व त्वं पशुना त्वमरुग्भव । ६०

---

१ घ. श्वलाङ्गुलम् ।

ब्रह्मोवाच—
तथोवाच हरिश्चन्द्रः पुत्रवाक्यादनन्तरम् ॥ ६१
हरिश्चन्द्र उवाच—
ब्राह्मणाः क्षत्रिया वैश्या राज्ञा पाल्या इति श्रुतिः । विशेषतस्तु वर्णानां गुरवो हि द्विजोत्तमाः
विष्णोरपि हि ये पूज्या मादृशाः कुत एव हि । अवज्ञयाऽपि येषां स्यान्नृपाणां स्वकुलक्षयः ६३
तान्पशून्कृत्वा कृपणं कथं रक्षितुमुत्सहे । अहं च ब्राह्मणं कुर्यां पशुं नैतद्धि युज्यते ॥ ६४
वरं हि जातु मरणं न कथंचिद्द्विजं पशुम् । करोमि तस्मात्पुत्र त्वं ब्राह्मणेन सुखं व्रज ॥ ६५
ब्रह्मोवाच—
एतस्मिन्नन्तरे तत्र वागुवाचाशरीरिणी । ६६
आकाशवागुवाच—
गोतमीं गच्छ राजेन्द्र ऋत्विग्भिः सपुरोहितः । पशुना विप्रपुत्रेण रोहितेन सुतेन च ॥ ६७
त्वया कार्यः क्रतुश्चैव शुनःशेपवधं विना । क्रतुः पूर्णो भवेत्तत्र तस्माद्याहि महामते ॥ ६८
ब्रह्मोवाच—
तच्छ्रुत्वा वचनं शीघ्रं गङ्गामगान्नृपोत्तमः । विश्वामित्रेण ऋषिणा वसिष्ठेन पुरोधसा ॥ ६९
वामदेवेन ऋषिणा तथाऽन्यैर्मुनिभिः सह । प्राप्य गङ्गां गौतमीं तां नरमेधाय दीक्षितः ॥ ७०
वेदिमण्डपकुण्डादि यूपपश्वादि चाकरोत् । कृत्वा सर्वं यथान्यायं तस्मिन्यज्ञे प्रवर्तिते ॥ ७१
शुनःशेपं पशुं यूपे निबध्याथ समन्त्रकम्[1] । वारिभिः प्रोक्षितं दृष्ट्वा विश्वामित्रोऽब्रवीदिदम् ७२
विश्वामित्र उवाच—
देवानृषीन्हरिश्चन्द्रं रोहितं च विशेषतः । अनुजानन्त्विमं सर्वे शुनःशेपं द्विजोत्तमम् ॥ ७३
येभ्यस्त्वयं हविर्देयो देवेभ्योऽयं पृथक्पृथक् । अनुजानन्तु ते सर्वे शुनःशेपं विशेषतः ॥ ७४
वसाभिर्लोमभिस्त्वग्भिर्मांसैः सन्मन्त्रितैर्मखे । अग्नौ होष्यः पशुश्चायं शुनःशेपो द्विजोत्तमः ॥ ७५
उपासिताः स्युर्विप्रेन्द्रास्ते सर्वे त्वनुमन्य माम् । गौतमीं यान्तु विप्रेन्द्राः स्नात्वा देवान्पृथक्पृथक्
मन्त्रैः स्तोत्रैः स्तुवन्तस्ते मुदं यान्तु शिवे रताः । एनं रक्षन्तु मुनयो देवाश्च हविषो भुजः ॥ ७७
ब्रह्मोवाच—
तथेत्यूचुश्च मुनयो मेने च नृपसत्तमः । ततो गत्वा शुनःशेपो गङ्गां त्रैलोक्यपावनीम् ॥ ७८
स्नात्वा तुष्टाव तान्देवान्ये तत्र हविषो भुजः । ततस्तुष्टाः सुरगणाः शुनःशेपं च ते मुने ॥
अवदन्त सुराः सर्वे विश्वामित्रस्य शृण्वतः ॥ ७९
सुरा ऊचुः—
क्रतुः पूर्णो भवत्वेष शुनःशेपवधं विना ॥ ८०
ब्रह्मोवाच—
विशेषेणाथ वरुणश्चावदन्नृपसत्तमम् । ततः पूर्णोऽभवद्राज्ञो नृमेधो लोकविश्रुतः ॥ ८१
देवानां च प्रसादेन मुनीनां च प्रसादतः । तीर्थस्य तु[2] प्रसादेन राज्ञः पूर्णोऽभवत्क्रतुः ॥ ८२
विश्वामित्रः शुनःशेपं पूजयामास संसदि । अकरोदात्मनः पुत्रं पूजयित्वा सुरान्तिके ॥ ८३

---

१ घ. तु । २ घ. समन्त्रकैः ।

ज्येष्ठं चकार पुत्राणामात्मनः स तु कौशिकः। न मेनिरे ये च पुत्रा विश्वामित्रस्य धीमतः ॥८४
शुनःशेपस्य च ज्यैष्ठ्यं तान्शशाप स कौशिकः। ज्यैष्ठ्यं ये मेनिरे पुत्राः पूजयामास तान्सुतान्
वरेण मुनिशार्दूलस्तदेतत्कथितं मया। एतत्सर्वं यत्र जातं गौतम्या दक्षिणे तटे ॥ ८६
तत्र तीर्थानि पुण्यानि विख्यातानि सुरादिभिः। बहूनि तेषां नामानि मत्तः शृणु महामते ८७
हरिश्चन्द्रं शुनःशेपं विश्वामित्रं सरोहितम्। इत्याद्यष्ट सहस्राणि तीर्थान्यथ चतुर्दश ॥ ८८
तेषु स्नानं च दानं च नरमेधफलप्रदम्। आख्यातं चास्य माहात्म्यं तीर्थस्य मुनिसत्तम ॥ ८९
यः पठेत्पाठयेद्वाऽपि शृणुयाद्वाऽपि भक्तितः। अपुत्रः पुत्रमाप्नोति यच्चान्यन्मनसः प्रियम् ॥९०

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे तीर्थमाहात्म्ये विश्वामित्रादिद्वाविंशतिसहस्रतीर्थवर्णनं नाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

गौतमीमाहात्म्ये पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५८६९

अथ पञ्चाधिकशततमोऽध्यायः।

ब्रह्मोवाच—

सोमतीर्थमिति ख्यातं पितॄणां प्रीतिवर्धनम्। तत्र वृत्तं महापुण्यं शृणु यत्नेन नारद ॥ १
सोमो राजाऽमृतमयो गन्धर्वाणां पुराऽभवत्। न देवानां तदा देवा मामभ्येत्येदमब्रुवन् ॥ २

देवा ऊचुः—

गन्धर्वैराहृतः सोमो देवानां प्राणदः पुरा। तमध्यायन्सुरगणा ऋषयस्त्वतिदुःखिताः ॥
यथा स्यात्सोमो ह्यस्माकं तथा नीतिर्विधीयताम् ॥ ३

ब्रह्मोवाच—

तत्र वाग्विबुधानाह गन्धर्वाः स्त्रीषु कामुकाः। तेभ्यो दत्त्वाऽथ मां देवाः सोममाहर्तुमर्हथ ॥ ४
वाचं प्रत्यूचुरमरास्त्वां दातुं न क्षमा वयम्। विना तेनापि न स्थातुं शक्यं नैव त्वया विना ५
पुनर्वागब्रवीद्देवान्पुनरेष्याम्यहं त्विह। अत्र बुद्धिर्विधातव्या क्रियतां क्रतुरुत्तमः ॥ ६
गौतम्या दक्षिणे तीरे भवेद्देवागमो यदि। मखं तु विषयं कृत्वा आयान्तु सुरसत्तमाः ॥ ७
गन्धर्वाः स्त्रीप्रिया नित्यं पणध्वं तं मया सह। तथेत्युक्त्वा सुरगणाः सरस्वत्या वचःस्थिताः ८
देवदूतैः पृथग्देवान्यक्षान्गन्धर्वपन्नगान्। आह्वानं चक्रिरे तत्र पुण्ये देवगिरौ तदा ॥ ९
ततो देवगिरिर्नाम पर्वतस्याभवन्मुने। तत्राऽऽगमन्सुरगणा गन्धर्वा यक्षकिंनराः ॥ १०
देवाः सिद्धाश्च ऋषयस्तथाऽष्टौ देवयोनयः। ऋषिभिर्गौतमीतीरे क्रियमाणे महाध्वरे ॥ ११
तत्र देवैः परिवृतः सहस्राक्षोऽभ्यभाषत ॥ १२

इन्द्र उवाच—

गन्धर्वानथ संपूज्य सरस्वत्याः समीपतः। सरस्वत्या पणध्वं नो युष्माकममृतात्मना ॥ १३

ब्रह्मोवाच—

तच्छक्रवचनात्ते वै गन्धर्वाः स्त्रीषु कामुकाः। सोमं दत्त्वा सुरेभ्यस्तु जगृहुस्तां सरस्वतीम् १४

---

१ घ. °त्त्वा तु मां।

सोमोऽभवच्चामराणां गन्धर्वाणां सरस्वती । अवसत्तत्र वागीशा तथाऽपि च सुरान्तिके ॥ १५
आयाति च रहो नित्यमुपांशु क्रियतामिति । अत एव हि सोमस्य क्रयो भवति नारद ॥ १६
उपांशुना वर्तितव्यं सोमक्रयण एव हि । ततोऽभवद्देवतानां सोमश्चापि सरस्वती ॥ १७
गन्धर्वाणां नैव सोमो नैवाऽऽसीच्च सरस्वती । तत्रागमन्सर्व एव सोमार्थं गौतमीतटम् ॥ १८

गावो देवाः पर्वता यक्षरक्षाः सिद्धाः साध्या मुनयो गुह्यकाश्च ।
गन्धर्वास्ते मरुतः पन्नगाश्च सर्वौषध्यो मातरो लोकपालाः ॥
रुद्रादित्या वसवश्चाश्विनौ च येऽन्ये देवा यज्ञभागस्य योग्याः । १९

पञ्चविंशतिनद्यस्तु गङ्गायां संगता मुने । पूर्णाहुतिर्यत्र दत्ता पूर्णाख्यानं तदुच्यते ॥ २०
गौतम्यां संगता यास्तु सर्वाश्चापि यथोदिताः । तन्नामधेयतीर्थानि संक्षेपाच्छृणु नारद ॥ २१
सोमतीर्थं च गान्धर्वं देवतीर्थमतः परम् । पूर्णातीर्थं[1] ततः शालं श्रीपर्णासंगमं तथा ॥ २२
स्वागतासंगमं पुण्यं कुसुमायाश्च संगमम् । पुष्टिसंगममाख्यातं कर्णिकासंगमं शुभम् ॥ २३
वैणवीसंगमश्चैव कृशरासंगमस्तथा । वासवीसंगमश्चैव शिवशर्या[2] तथा शिखी[3] ॥ २४
कुसुम्भिका उपारथ्यां[4] शान्तिजा देवजा तदा । अजो वृद्धः सुरो भद्रो गौतम्या सह संगताः ॥
एते चान्ये च बहवो नदीनदसहायगाः । पृथिव्यां यानि तीर्थानि ह्यगमन्देवपर्वते ॥ २६
सोमार्थं वै तथा चान्येऽप्यागमन्मखमण्डपम् । तानि तीर्थानि गङ्गायां संगतानि यथाक्रमम् २७
नदीरूपेण कान्येव नदरूपेण कानिचित् । सरोरूपेण कान्यत्र स्तवरूपेण कानिचित् ॥ २८
तान्येव सर्वतीर्थानि विख्यातानि पृथक्पृथक् । तेषु स्नानं जपो होमः पितृतर्पणमेव च ॥ २९
सर्वकामप्रदं पुंसां भुक्तिदं मुक्तिभाजनम् । एतेषां पठनं चापि स्मरणं वा करोति यः ॥
सर्वपापविनिर्मुक्तो[5] याति विष्णुपुरं जनः ॥ ३०

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे तीर्थमाहात्म्ये पूर्णादिपञ्चविंशतिनदीदेवनदी-नदसंगमवर्णनं नाम पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

गौतमीमाहात्म्ये षट्त्रिंशत्तमोऽध्यायः ॥ ३६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५८९९

अथ षडधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

प्रवरासंगमो[6] नाम श्रेष्ठा चैवं[7] महानदी । यत्र सिद्धेश्वरो देवः सर्वलोकोपकारकृत् ॥ १
देवानां दानवानां च संगमोऽभूत्सुदारुणः । तेषां परस्परं वाऽपि प्रीतिश्चाभून्महामुने ॥ २
तेऽप्येवं मन्त्रयामासुर्देवा वै दानवा मिथः । मेरुपर्वतमासाद्य परस्परहितैषिणः ॥ ३

---

१ क. पूर्णती॰ । २ घ. शिल्या आर्या । ३ घ. शिली । ४ घ. ॰थ्या रन्तिदा देवनो नदः । आजो बुन्ध्यः सरो । ५ घ. ॰मुक्तश्चान्ते विष्णुपदं व्रजेत् । पुण्याप्रवरयोर्मध्ये नद्यो विंशतिरीरिताः । वृद्धाप्रवरयोर्मध्ये या भूमिः श्रेयसंयुता । तत्रस्थाः प्राणिनः सर्वे मुक्तिभाजो न संशयः । अहं च वा य आसीच्च सृष्ट्यर्थे यजनं कृतम् । प्रणीतासंगमायार्थे पुरतः कथयामि ते । इ॰ । ६ क. ॰गमं श्रेष्ठं श्रे॰ । ७ घ. सैव ।

देवदैत्या ऊचुः—

अमृतेनामरत्वं स्यादुत्पाद्यामृतमुत्तमम् । पिबामः सर्व एवैते भवामश्चामरा वयम् ॥ ४
एकी भूत्वा वयं लोकान्पालयामः सुखानि च । प्राप्स्यामः संगरं हित्वा संगरो दुःखकारणम् ५
प्रीत्या चैवार्जितानर्थान्भोक्ष्यामो गतमत्सराः । यतः स्नेहेन वृत्तिर्या साऽस्माकं सुखदा सदा ६
वैपरीत्यं तु यद्वृत्तं न स्मर्तव्यं कदाचन । न च त्रैलोक्यराज्येऽपि कैवल्ये वा सुखं मनाक् ॥
तदूर्ध्वमपि वा यत्तु निर्वैरत्वादवाप्यते ॥ ७

ब्रह्मोवाच—

एवं परस्परं प्रीताः सन्तो देवाश्च दानवाः । एकीभूताश्च सुप्रीता विमथ्य वरुणालयम् ॥ ८
मन्थानं मन्दरं कृत्वा रज्जुं कृत्वा तु वासुकिम् । देवाश्च दानवाः सर्वे ममन्थुर्वरुणालयम् ॥ ९
उत्पन्नं च ततः पुण्यममृतं सुरवल्लभम् । निष्पन्ने चामृते पुण्ये ते च प्रोचुः परस्परम् ॥ १०
यामः स्वं स्वमधिष्ठानं कृतकार्याः श्रमं गताः । सर्वे समं च सर्वेभ्यो यथायोग्यं विभज्यताम् ११
यदा सर्वागमो यत्र यस्मिल्लँग्ने शुभावहे । विभज्यतामिदं पुण्यममृतं सुरसत्तमाः ॥ १२
इत्युक्त्वा ते ययुः सर्वे दैत्यदानवराक्षसाः । गतेषु दैत्यसंघेषु देवाः सर्वेऽन्वमन्त्रयन् ॥ १३

देवा ऊचुः—

गतास्ते रिपवोऽस्माकं दैवयोगादरिंदमाः । रिपूणाममृतं नैव देयं भवति सर्वथा ॥ १४

ब्रह्मोवाच—

बृहस्पतिस्तथेत्याह पुनराह सुरानिदम् ॥ १५

बृहस्पतिरुवाच—

न जानन्ति यथा पापा पिबध्वं च तथाऽमृतम् । अयमेवोचितो मन्त्रो यच्छत्रूणां पराभवः॥ १६
द्वेष्याः सर्वात्मना द्वेष्या इति नीतिविदो विदुः । न विश्वास्या न चाऽऽख्येया नैव मन्त्र्याश्च शत्रवः
तेभ्यो न देयममृतं भवेयुरमरास्ततः । अमरेषु च जातेषु तेषु दैत्येषु शत्रुषु ॥
ताञ्जेतुं नैव शक्ष्यामो न देयममृतं ततः ॥ १८

ब्रह्मोवाच—

इति संमन्त्र्य ते देवा वाचस्पतिमथाब्रुवन् ॥ १९

देवा ऊचुः—

क्व यामः कुत्र मन्त्रः स्यात्क्व पिबामः क्व संस्थितिः । कुर्मस्तदेव प्रथमं वद वाचस्पते तथा २०

बृहस्पतिरुवाच—

यान्तु ब्रह्माणममराः पृच्छन्त्वत्र गतिं पराम् । स तु ज्ञाता च वक्ता च दाता चैव पितामहः२१

ब्रह्मोवाच—

बृहस्पतेर्वचः श्रुत्वा मदन्तिकमथाऽऽगमन् । नमस्य मां सुराः सर्वे यद्वृत्तं तन्न्यवेदयन् ॥ २२
तद्देववचनात्पुत्र तैः सुरैरगमं हरिम् । विष्णवे कथितं सर्वं शंभवे विषहारिणे ॥ २३
अहं विष्णुश्च शंभुश्च देवगन्धर्वकिंनरैः । मेरुकंदरमागत्य न जानन्ति यथाऽसुराः ॥ २४
रक्षकं च हरिं कृत्वा सोमपानाय तस्थिरे । आदित्यस्तत्र विज्ञाता सोमभोज्यानथेतरान्॥ २५
सोमो दाताऽमृतं भागं चक्रधृग्रक्षकस्तथा । नैव जानन्ति तद्दैत्या दनुजा राक्षसास्तथा ॥ २६
विना राहुं महाप्राज्ञं सैंहिकेयं च सोमपम् । कामरूपधरो राहुर्मरुतां मध्यमाविशत् ॥ २७

मरुद्रूपं समास्थाय पानपात्रधरस्तथा । ज्ञात्वा दिवाकरो दैत्यं तं सोमाय न्यवेदयत् ॥ २८
तदा तदमृतं तस्मै दैत्यायादैत्यरूपिणे । दत्त्वा सोमं तदा सोमो विष्णवे तन्न्यवेदयत् ॥ २९
विष्णुः पीतामृतं दैत्यं चक्रेणोद्यम्य तच्छिरः। चिच्छेद तरसा वत्स तच्छिरस्त्वमरं त्वभूत् ३०
शिरोमात्रविहीनं यद्देहं तदपतद्भुवि । देहं तदमृतस्पृष्टं पतितं दक्षिणे तटे ॥ ३१
गौतम्या मुनिशार्दूल कम्पयद्वसुधातलम् । देहं चाप्यमरं पुत्र तदद्भुतमिवाभवत् ॥ ३२
देहं च शिरसोऽपेक्षि शिरो देहमपेक्षते । उभयं चामरं जातं दैत्यश्चायं महाबलः ॥ ३३
शिरः काये समाविष्टं सर्वान्भक्षयते सुरान् । तस्माद्देहमिदं पूर्वं नाशयामो महीगतम् ॥
ततस्ते शंकरं प्राहुर्देवाः सर्वे ससंभ्रमाः ॥ ३४

शंकर उवाच—

महीगतं दैत्यदेहं नाशयस्व सुरोत्तम । त्वं देव करुणासिन्धुः शरणागतरक्षकः ॥ ३५
शिरसा नैव युज्येत दैत्यदेहं तथा कुरु ॥ ३६

ब्रह्मोवाच—

प्रेषयामास चेशोऽपि श्रेष्ठां शक्तिं तदाऽऽत्मनः । मातृभिः सहितां देवीं मातरं लोकपालिनीम्
ईशायुधधरा देवी ईशशक्तिसमन्विता । महीगतं यत्र देहं तत्रागाद्भक्ष्यकाङ्क्षिणी ॥ ३८
शिरोमात्रं सुराः सर्वे मेरौ तत्रैव सान्त्वयन्। देहो देव्या[1] पुनस्तत्र युयुधे बहवः समाः ॥ ३९
राहुस्तत्र सुरानाह भित्त्वा देहं पुरा मम (?) । अत्राऽऽस्ते रसमुत्कृष्टं तदाकृष्य शरीरतः(?)४०
पृथक्भूते रसे देहं प्रवरेऽमृतमुत्तमम् । भस्मी भूयात्क्षणेनैव तस्मात्कुर्वन्तु तत्पुरा ॥ ४१

ब्रह्मोवाच—

एतद्राहुवचः श्रुत्वा प्रीताः सर्वेऽसुरारयः । अभ्यषिञ्चन्ग्रहाणां त्वं ग्रहो भूया मुदाऽन्वितः ४२
तद्देववचनाच्छक्तिरीश्वरी या निगद्यते । देहं भित्त्वा दैत्यपतेः सुरशक्तिसमन्विता ॥ ४३
आकृष्य शीघ्रमुत्कृष्टं प्रवरं चामृतं बहिः । स्थापयित्वा तु तद्देहं भक्षयामास चाम्बिका ॥ ४४
कालरात्रिर्भद्रकाली प्रोच्यते या महाबला । स्थापितं रसमुत्कृष्टं रसानां प्रवरं रसम्(?) ॥ ४५
व्यस्रवत्स्थापितं तत्तु प्रवरा साऽभवन्नदी । आकृष्टममृतं चैव स्थापितं साऽप्यभक्षयत् ॥ ४६
ततः श्रेष्ठा नदी जाता प्रवरा चामृता शुभा । राहुदेहसमुद्भूता रुद्रशक्तिसमन्विता ॥ ४७
नदीनां प्रवरा रम्या चामृता प्रेरिता तथा । तत्र पञ्च सहस्राणि तीर्थानि गुणवन्ति च ॥ ४८
तत्र शंभुः स्वयं तस्थौ सर्वदा सुरपूजितः । तस्यै तुष्टाः सुराः सर्वे देव्यै नद्यै पृथक्पृथक्॥ ४९
वरान्ददुर्मुदा युक्ता यथा पूजामवाप्स्यति । शंभुः सुरपतिर्लोके तथा पूजामवाप्स्यसि ॥ ५०
निवासं कुरु देवि त्वं लोकानां हितकाम्यया। सदा तिष्ठ रसेशानि सर्वेषां सर्वसिद्धिदा॥ ५१
स्तवनात्कीर्तनाद्ध्यानात्सर्वकामप्रदायिनी । त्वां नमस्यन्ति ये भक्त्या किंचिदापेक्ष्य सर्वदा ५२
तेषां सर्वाणि कार्याणि भवेयुर्देवताज्ञया । शिवशक्त्योर्यतस्तस्मिन्निवासोऽभूत्सनातनः ॥ ५३
अतो वदन्ति मुनयो निवासपुरमित्यदः । प्रवरायाः पुरा देवाः सुप्रीतास्ते वरान्ददुः ॥ ५४
गङ्गायाः संगमो यस्ते विख्यातः सुरवल्लभः । तत्राऽऽप्लुतानां सर्वेषां भुक्तिर्वा मुक्तिरेव च ॥५५
यद्वाऽपि मनसः काम्यं देवानामपि दुर्लभम् । स्यात्तेषां सर्वमेवेह एवं दत्त्वा सुरा ययुः ॥ ५६

---

१ घ. °व्या सह तदा यु° ।

ततः प्रभृति तत्तीर्थं प्रवरासंगमं विदुः । प्रेरिता देवदेवेन शक्तिर्या प्रेरिता तु सा ॥ ५७
[1]अमृता सैव विख्याता प्रवरैवं महानदी ॥ ५८

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे शिवप्रेरितामृतासंगमादितीर्थवर्णनं नाम षडधिकशततमोऽध्यायः ॥ १०६ ॥

गौतमीमाहात्म्ये सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—५९५७

अथ सप्ताधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

वृद्धासंगममाख्यातं यत्र वृद्धेश्वरः शिवः । तस्याऽऽख्यानं प्रवक्ष्यामि शृणु पापप्रणाशनम् ॥ १
गौतमो वृद्ध इत्युक्तो मुनिरासीन्महातपाः । यदा पुराऽभवद्बालो गौतमस्य सुतो द्विजः ॥ २
अनासः स पुरोत्पन्नस्तस्माद्विकृतरूपधृक् । स वैराग्याज्जगामाथ देशं तीर्थमितस्ततः ॥ ३
उपाध्यायेन नैवाऽऽसील्लज्जितस्य समागमः । शिष्यैरन्यैः सहाध्यायो लज्जितस्य च नाभवत् ४
उपनीतः कथंचिच्च पित्रा वै गौतमेन सः । एतावता गौतमोऽपि व्यगमच्चरितुं बहिः ॥ ५
एवं बहुतिथे काले ब्रह्ममात्रा धृते द्विजे । नैव चाध्ययनं तस्य संजातं गौतमस्य हि ॥ ६
नैव शास्त्रस्य चाभ्यासो गौतमस्याभवत्तदा । अग्निकार्यं ततश्चक्रे नित्यमेव यतव्रतः ॥ ७
गायत्र्यभ्यासमात्रेण ब्राह्मणो नामधारकः । अग्न्युपासनमात्रं च गायत्र्यभ्यसनं तथा ॥ ८
एतावता ब्राह्मणत्वं गौतमस्याभवन्मुने । उपासतोऽग्निं विधिवद्गायत्रीं च महात्मनः ॥ ९
तस्याऽऽयुर्ववृधे पुत्र गौतमस्य चिरायुषः । न दारसंग्रहं लेभे नैव दाताऽस्ति कन्यकाम् ॥ १०
तथा चरंस्तीर्थदेशे वनेषु विविधेषु च । आश्रमेषु च पुण्येषु अटन्नास्ते स गौतमः ॥ ११
एवं भ्रमञ्शीतगिरिमाश्रित्याऽऽस्ते स गौतमः । तत्रापश्यद्गुहां रम्यां वल्लीविटपमालिनीम् ॥ १२
तत्रोपविश्य विप्रेन्द्रो वस्तुं समकरोन्मतिम्[2] । चिन्तयंस्तु प्रविष्टोऽसावपश्यत्स्त्रियमुत्तमाम् ॥ १३
शिथिलाङ्गीमथ कृशां वृद्धां च तपसि स्थिताम् । ब्रह्मचर्येण वर्तन्तीं [3]विरागां रहसि स्थिताम् ॥ १४
स तां दृष्ट्वा मुनिश्रेष्ठो नमस्काराय तस्थिवान् । नमस्यन्तं मुनिश्रेष्ठं तं गौतममवारयत् ॥ १५

वृद्धोवाच—

गुरुस्त्वं भविता मह्यं न मां वन्दितुमर्हसि । आयुर्विद्या धनं कीर्तिर्धर्मः स्वर्गादिकं च यत् ॥
तस्य नश्यति वै सर्वं यं नमस्यति वै गुरुः ॥ १६

ब्रह्मोवाच—

कृताञ्जलिपुटस्तां वै गौतमः प्राह विस्मितः ॥ १७

गौतम उवाच—

तपस्विनी त्वं वृद्धा च गुणज्येष्ठा च भामिनी । अल्पविद्यस्त्वल्पवया अहं तव गुरुः कथम् १८

वृद्धोवाच—

आर्ष्टिषेणप्रियपुत्र ऋतध्वज इति श्रुतः । गुणवान्मतिमाञ्शूरः क्षत्रधर्मपरायणः ॥ १९

---

१ क. अमृतं । २ घ. °म् । तदाऽन्तस्तु । ३ घ. कुमारीं ।

स कदाचिद्वनं प्रायान्मृगयाकृष्टचेतनः । विश्राममकरोदस्यां गुहायां स ऋतध्वजः ॥ २०
युवा स मतिमान्दक्षो बलेन महता वृतः । तं विश्रान्तं नृपवरमप्सरा ददृशे ततः ॥ २१
गन्धर्वराजस्य सुता सुश्यामा इति विश्रुता । तां दृष्ट्वा चकमे राजा राजानं चकमे च सा ॥ २२
इति क्रीडा समभवत्तया राज्ञो महामते । निवृत्तकामो राजेन्द्रस्तामापृच्छ्याऽऽगमद्गृहम् ॥ २३
उत्पन्नाऽहं ततस्तस्यां सुश्यामायां महामते । गच्छन्ती मां तदा माता इदमाह तपोधन ॥ २४

सुश्यामोवाच—

यस्त्वस्यां प्रविशेद्भद्रे स ते भर्ता भविष्यति ॥ २५

वृद्धोवाच—

इत्युक्त्वा सा जगमाथ माता मम महामते । तस्मादत्र प्रविष्टस्त्वं पुमान्नान्यः कदाचन ॥ २६
सहस्राणि तथाऽशीतिं कृत्वा राज्यं पिता मम । अत्रैव च तपस्तप्त्वा ततः स्वर्गमुपेयिवान् २७
स्वर्गं यातेऽपि पितरि सहस्राणि तथा दश । वर्षाणि मुनिशार्दूल राज्यं कृत्वा तथा परः ॥ २८
स्वर्गं यातो मम भ्राता अहमत्रैव संस्थिता । अहं ब्रह्मन्नान्यवृत्ता न माता न पिता मम ॥ २९
अहमात्मेश्वरी ब्रह्मन्निविष्टा[1] क्षत्रकन्यका । तस्माद्भजस्व मां ब्रह्मन्व्रतस्थां पुरुषार्थिनीम् ॥ ३०

गौतम उवाच—

सहस्रायुरहं भद्रे मत्तस्त्वं वयसाऽधिका । अहं बालस्त्वं तु वृद्धा नैवायं घटते मिथः ॥ ३१

वृद्धोवाच—

त्वं भर्ता मे पुरा दिष्टो नान्यो भर्ता मतो मम । धात्रा दत्तस्ततस्त्वं मां न निराकर्तुमर्हसि ॥ ३२
अथवा नेच्छसि मां त्वमप्रदुष्टामनुव्रताम् । ततस्त्यक्ष्यामि जीवं मे इदानीं तव पश्यतः ॥ ३३
अपेक्षिताप्राप्तितो हि देहिनां मरणं वरम् । अनुरक्तजनत्यागे पातकान्तो न विद्यते ॥ ३४

ब्रह्मोवाच—

वृद्धायास्तद्वचः श्रुत्वा गौतमो वाक्यमब्रवीत् ॥ ३५

गौतम उवाच—

अहं तपोविरहितो विद्याहीनो ह्यकिंचनः । नाहं वरो हि योग्यस्ते कुरूपो भोगवर्जितः ॥ ३६
अनाप्तोऽहं किं करोमि अतपोविद्य एव च । तस्मात्सुरूपं सुविद्यामापाद्य प्रथमं शुभे ॥
पश्चात्ते वचनं कार्यं ततो वृद्धाऽब्रवीद्द्विजम् ॥ ३७

वृद्धोवाच—

मया सरस्वती देवी तोषिता तपसा द्विज । तथैवाऽऽपो रूपवत्यो रूपदाताऽग्निरेव च ॥ ३८
तस्माद्वागीश्वरी देवी सा ते विद्यां प्रदास्यति । अग्निश्च रूपवान्देवस्तव रूपं प्रदास्यति ॥ ३९

ब्रह्मोवाच—

एवमुक्त्वा गौतमं तं वृद्धोवाच विभावसुम् । प्रार्थयित्वा सुविद्यं तं सुरूपं चाकरोन्मुनिम् ॥ ४०

ततः सुविद्यः सुभगः सुकान्तो वृद्धां स पत्नीमकरोत्प्रीतियुक्तः ।
तया स रेमे बहुला मनोज्ञया समाः सुखं प्रीतमना गुहायाम् ॥ ४१

कदाचित्तत्र वसतोर्दंपत्योर्मुदितोर्गिरौ । गुहायां मुनिशार्दूल आजग्मुर्मुनयोऽमलाः ॥ ४२

---

१ घ. °न्निर्दिष्टा ।

वसिष्ठवामदेवाद्या ये चान्ये च महर्षयः । भ्रमन्तः पुण्यतीर्थानि प्राप्तुवंस्तस्य तां गुहाम् ॥ ४३
आगतांस्तानृषीन्ज्ञात्वा गौतमः सह भार्यया । सत्कारमकरोत्तेषां जहसुस्तं च केचन ॥ ४४
ये बाला यौवनोन्मत्ता वयसा ये च मध्यमाः । वृद्धां च गौतमं प्रेक्ष्य जहसुस्तत्र केचन ॥ ४५

ऋषय ऊचुः—

पुत्रोऽयं तव पौत्रो वा वृद्धे को गौतमोऽभवत् । सत्यं वदस्व कल्याणि इत्येवं जहसुर्द्विजाः॥४६
विषं वृद्धस्य युवती वृद्धाया अमृतं युवा । इष्टानिष्टसमायोगो दृष्टोऽस्माभिरहो चिरात् ॥ ४७

ब्रह्मोवाच—

इत्येवमूचिरे केचिद्दंपत्योः शृण्वतोस्तदा । एवमुक्त्वा कृतातिथ्या ययुः सर्वे महर्षयः ॥ ४८
ऋषीणां वचनं श्रुत्वा उभावपि सुदुःखितौ । लज्जितौ च महाप्राज्ञौ गौतमो भार्यया सह ॥
पप्रच्छ मुनिशार्दूलमगस्त्यमृषिसत्तमम् ॥ ४९

गौतम उवाच—

को देशः किमु तीर्थं वा यत्र श्रेयः समाप्यते । शीघ्रमेव महाप्राज्ञ भुक्तिमुक्तिप्रदायकम् ॥ ५०

अगस्त्य उवाच—

वदद्भिर्मुनिभिर्ब्रह्मन्मया श्रुतमिदं वचः । सर्वे कामास्तत्र पूर्णा गौतम्यां नात्र संशयः ॥ ५१
तस्माद्गच्छ महाबुद्धे गौतमीं पापनाशिनीम् । अहं त्वामनुयास्यामि यथेच्छसि तथा कुरु ॥ ५२

ब्रह्मोवाच—

एतच्छ्रुत्वाऽगस्त्यवाक्यं वृद्धया गौतमोऽभ्यगात् । तत्र तेपे तपस्तीव्रं पत्न्या स भगवानृषिः ५३
स्तुतिं चकार देवस्य शंभोर्विष्णोस्तथैव च । गङ्गां च तोषयामास भार्यार्थे भगवानृषिः ॥ ५४

गौतम उवाच—

खिन्नात्मनामत्र भवे त्वमेव शरणं शिवः । मरुभूमावध्वगानां विटपीव प्रियायुतः ॥ ५५
उच्चावचानां भूतानां सर्वथा पापनोदनः । सस्यानां घनवत्कृष्ण त्वमग्रग्रहशोषिणाम् ॥ ५६
वैकुण्ठदुर्गनिःश्रेणिस्त्वं पीयूषतरङ्गिणी । अधोगतानां तप्तानां शरणं भव गौतमि ॥ ५७

ब्रह्मोवाच—

ततस्तुष्टाऽवदद्वाक्यं गौतमं वृद्धया युतम् । शरणागतदीनार्तं शरण्या गौतमी मुदा ॥ ५८

गौतम्युवाच—

अभिषिञ्चस्व भार्यां त्वं मज्जलैर्मन्त्रसंयुतैः । कलशैरुपचारैश्च ततः पत्नी तव प्रिया ॥ ५९
सुरूपा चारुसर्वाङ्गी सुभगा चारुलोचना । सर्वलक्षणसंपूर्णा रम्यरूपमवाप्स्यति ॥ ६०
रूपवत्या पुनस्त्वं वै भार्यया चाभिषेचितः । सर्वलक्षणसंपूर्णः कान्तं रूपमवाप्स्यसि ॥ ६१

ब्रह्मोवाच—

तथेति गाङ्गवचनाद्यथोक्तं तौ च चक्रतुः । सुरूपतामुभौ प्राप्तौ गौतम्याश्च प्रसादतः ॥ ६२
अभिषेकोदकं यच्च सा नदी समजायत । तस्या नाम्ना तु विख्याता वृद्धाया मुनिसत्तम ॥ ६३
वृद्धा नदीतिविख्याता गौतमोऽपि तथोच्यते । वृद्धगौतम इत्युक्त ऋषिभिः समवासिभिः ॥
वृद्धा तु गौतमीं प्राह गङ्गां प्रत्यक्षरूपिणीम् ॥ ६४

वृद्धोवाच—

मन्नाम्नीयं नदी देवि वृद्धा चेत्यभिधीयताम् । त्वया च संगमस्तस्यास्तस्यास्तीर्थमनुत्तमम् ॥६५

रूपसौभाग्यसंपत्तिपुत्रपौत्रप्रवर्धनम् । आयुरारोग्यकल्याणं जयप्रीतिविवर्धनम् ॥
स्नानदानादिहोमैश्च पितॄणां पावनं परम् ॥ ६६

ब्रह्मोवाच—

अस्त्वित्याह च तां गङ्गा सुवृद्धां गौतमप्रियाम् । गौतमस्थापितं लिङ्गं वृद्धानाम्नैव कीर्तितम् ॥
तत्रैव च मुदं प्राप्तो वृद्धया मुनिसत्तमः । तत्र स्नानं च दानं च सर्वाभीष्टप्रदायकम् ॥ ६८
ततः प्रभृति तत्तीर्थं वृद्धासंगममुच्यते ॥ ६९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये वृद्धासंगमाद्युभयतटस्थसप्तदशतीर्थवर्णनं नाम सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

गौतमीमाहात्म्येऽष्टात्रिंशोऽध्यायः ॥ ३८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६०२६

अथाष्टाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

इलातीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् । ब्रह्महत्यादिपापानां पावनं सर्वकामदम् ॥ १
वैवस्वतान्वये जात इलो नाम जनेश्वरः । महत्या सेनया सार्धं जगाम मृगयावनम् ॥ २
परिबभ्राम गहनं बहुव्यालसमाकुलम् । नानाकारद्विजयुतं विटपैः परिशोभितम् ॥ ३
वनेचरं नृपश्रेष्ठो मृगयागतमानसः । तत्रैव मतिमाधत्त इलोऽमात्यानथाब्रवीत् ॥ ४

इल उवाच—

गच्छन्तु नगरं सर्वे मम पुत्रेण पालितम् । देशं कोशं बलं राज्यं पालयन्तु पुनश्च तम् ॥ ५
वसिष्ठोऽपि तथा यातु आदायाग्नीन्पितेव नः । पत्नीभिः सहितो धीमानरण्येऽहं वसाम्यथ ॥६
अरण्यभोगभुग्भिश्च वाजिवारणमानुषैः । मृगयाशीलिभिः कैश्चिद्यान्तु सर्व इतः पुरीम् ॥ ७

ब्रह्मोवाच—

तथेत्युक्त्वा ययुस्तेऽपि स्वयं प्रायाच्छनैर्गिरिम् । हिमवन्तं रत्नमयं[2] वसंस्तत्र इलो नृपः ॥ ८
ददर्श कंदरं तत्र नानारत्नविचित्रितम् । तत्र यक्षेश्वरः कश्चित्समन्युरिति विश्रुतः ॥ ९
तस्य भार्या समानाम्नी भर्तृव्रतपरायणा । तस्मिन्वसत्यसौ यक्षो रमणीये नगोत्तमे ॥ १०
मृगरूपेण व्यचरद्भार्यया स महामतिः । स्वेच्छया स्ववने यक्षः क्रीडते नृत्यगीतकैः ॥ ११
इत्थं स यक्षो जानाति मृगरूपधरोऽपि च । इलस्तु तं न जानाति कंदरं यक्षपालितम् ॥ १२
यक्षस्य गेहं विपुलं नानारत्नविचित्रितम् । तत्रोपविष्टो नृपतिर्महत्या सेनया वृतः ॥ १३
वासं चक्रे स तत्रैव गेहे यक्षस्य धीमतः । स यक्षोऽधर्मकोपेन भार्यया मृगरूपधृक् ॥ १४
*इलं जेतुं न शक्नोमि याचितो न ददाति च । हृतं गेहं ममानेन किं करोमीत्यचिन्तयत् ॥ १५
युधि मत्तं कथं हन्यां चेति स्थित्वा स यक्षराट् । आत्मीयान्प्रेषयामास यक्षाञ्शूरान्धनुर्धरान् १६

---

* अत्र घ. पुस्तके—'दृष्ट्वोवाच तदा कान्तामेकान्ते निश्वसन्मुहुः' इत्यर्धमधिकम् ।

---

१ घ. °यन्तं प्रजाश्च । २ क. °यं स्वयं वसन्निलो ।

यक्ष उवाच—

युद्धे जित्वा च राजानमिलमुद्धतदन्तिनम् । गृहाद्यथाऽन्यतो याति मम तत्कर्तुमर्हथ ॥ १७

ब्रह्मोवाच—

यक्षेश्वरस्य तद्वाक्याद्यक्षास्ते युद्धदुर्मदाः । इलं गत्वाऽब्रुवन्सर्वे निर्गच्छास्माद्गृहालयात् ॥ १८

न चेद्युद्धात्परिभ्रष्टः पलाय्य क्व गमिष्यसि । तद्यक्षवचनात्कोपाद्युद्धं चक्रे स राजराट् ॥ १९

जित्वा यक्षान्बहुविधानुवास दश शर्वरीः । यक्षेश्वरो मृगो भूत्वा भार्ययाऽपि वने वसन् ॥ २०

हृतगेहो वनं प्राप्तो हृतभृत्यः स यक्षिणीम् । प्राह चिन्तापरो भूत्वा मृगीरूपधरां प्रियाम् ॥ २१

यक्ष उवाच—

राजाऽयं दुर्मनाः कान्ते व्यसनासक्तमानसः । कथमायाति विपदं तत्रोपायो विचिन्त्यताम् २२

पापर्धिव्यसनान्तानि राज्यान्यखिलभूभुजाम् । प्रापयोमावनं सुभ्रूर्मृगी भूत्वा मनोहरा ॥ २३

प्रविशेत्तत्र राजाऽयं स्त्री भविष्यत्यसंशयम् । करणीयं त्वया भद्रे न चैतद्युज्यते मम ॥

अहं तु पुरुषो येन त्वं पुनः स्त्री च यक्षिणी ॥ २४

यक्षिण्युवाच—

कथं त्वया न गन्तव्यमुमावनमनुत्तमम् । गतेऽपि त्वयि को दोषस्तन्मे कथय तत्त्वतः ॥ २५

यक्ष उवाच—

हिमवत्पर्वतश्रेष्ठ उमया सहितः शिवः । देवैर्गणैरनुवृतो विचचार यथासुखम् ॥

पार्वती शंकरं प्राह कदाचिद्रहसि स्थितम् ॥ २६

पार्वत्युवाच—

स्त्रीणामेष स्वभावोऽस्ति रतं गोपायितं भवेत् । तस्मान्मे नियतं देशमाज्ञया रक्षितं तव ॥ २७

देहि मे त्रिदशेशान उमावनमिति श्रुतम् । विना त्वया गणेशेन कार्तिकेयेन नन्दिना ॥ २८

यस्त्वत्र प्रविशेन्नाथ स्त्रीत्वं तस्य भवेदिति ॥ २९

यक्ष उवाच—

इत्याज्ञोमावने दत्ता प्रसन्नेनेन्दुमौलिना । किं करोमि पुमान्कान्ते त्वया प्रणयनार्दितः ॥

तस्मान्मया न गन्तव्यमुमाया वनमुत्तमम् ॥ ३०

ब्रह्मोवाच—

तद्भर्तृवचनं श्रुत्वा यक्षिणी कामरूपिणी । मृगी भूत्वा विशालाक्षी इलस्य पुरतोऽभवत् ॥ ३१

यक्षस्तु संस्थितस्तत्र ददर्शेलो मृगीं तदा । मृगयासक्तचित्तो वै मृगीं दृष्ट्वा विशेषतः ॥ ३२

एक एव हयारूढो निर्ययौ तां मृगीमनु । साऽऽकर्षत शनैस्तं तु राजानं मृगयाकुलम् ॥ ३३

शनैर्जगाम सा तत्र यदुमावनमुच्यते । अदृश्या तु मृगी तस्मै दर्शयन्ती क्वचित्क्वचित् ॥ ३४

तिष्ठन्ती चैव गच्छन्ती धावन्ती च विभीतवत् । हरिणी चपलाक्षी सा तमाकर्षदुमावनम् ॥ ३५

अनुप्राप्तो हयारूढस्तत्प्राप स उमावनम् । उमावनं प्रविष्टं तं ज्ञात्वा सा यक्षिणी तदा ॥ ३६

मृगीरूपं परित्यज्य यक्षिणी कामरूपिणी । दिव्यरूपं समास्थाय चाशोकतरुसंनिधौ ॥ ३७

तच्छाखालम्बितकरा दिव्यगन्धानुलेपना । दिव्यरूपधरा तन्वी कृतकार्या समा तदा ॥ ३८

हसन्ती नृपतिं प्रेक्ष्य श्रान्तं हयगतं तदा । मृगीमालोकयन्तं तं चपलाक्षमिलं तदा ॥ ३९

भर्तृवाक्यमशेषेण स्मरन्ती प्राह भूमिपम् ॥ ४०

समोवाच—
हयारूढाऽबला तन्वि क एकैव तु गच्छसि । पुरुषस्य च वेषेण इले कमनुयास्यसि ॥ ४१
ब्रह्मोवाच—
इलेति वचनं श्रुत्वा राजाऽसौ क्रोधमूर्छितः । यक्षिणीं भर्त्सयित्वाऽसौ तामपृच्छन्मृगीं पुनः ॥
तथाऽपि यक्षिणी प्राह इले किमनुवीक्षसे । इलेति वचनं श्रुत्वा धृतचापो हयस्थितः ॥ ४३
कुपितो दर्शयामास त्रैलोक्यविजयी धनुः । पुनः सा प्राह नृपतिं महात्मानमिले स्वयम् ॥ ४४
प्रेक्षस्व पश्चान्मां ब्रूहि असत्यां सत्यवादिनीम् । तदा चाऽऽलोकयद्राजा स्तनौ तुङ्गौ भुजान्तरे ॥
किमिदं मम संजातमित्येवं चकितोऽभवत् ॥ ४६
इलोवाच—
किमिदं मम संजातं जानीते भवती स्फुटम् । वद सर्वं यथातथ्यं त्वं का वा वद सुव्रते ॥ ४७
यक्षिण्युवाच—
हिमवत्कंदरश्रेष्ठे समन्युर्वसते पतिः । यक्षाणामधिपः श्रीमांस्तद्भार्याऽहं तु यक्षिणी ॥ ४८
यत्कंदरे भवान्राजा तूपविष्टः सुशीतले । यस्य यक्षा हता मोहात्त्वया हि संगरं विना ॥ ४९
ततोऽहं निर्गमार्थं ते मृगी भूत्वा उमावनम् । प्रविष्टा त्वं प्रविष्टोऽसि पुरा प्राह महेश्वरः ॥ ५०
यस्त्वत्र प्रविशेन्मन्दः पुमान्स्त्रीत्वमवाप्स्यति । तस्मात्स्त्रीत्वमवाप्तोऽसि न त्वं दुःखितुमर्हसि ॥
प्रौढोऽपि कोऽत्र जानाति विचित्रभवितव्यताम् ॥ ५१
ब्रह्मोवाच—
यक्षिणीवचनं श्रुत्वा हयारूढस्तदाऽपतत् । तमाश्वास्य पुनः सैव यक्षिणी वाक्यमब्रवीत् ॥ ५२
यक्षिण्युवाच—
स्त्रीत्वं जातं जातमेव न पुंस्त्वं कर्तुमर्हसि । गृहाण विद्यां स्त्रीयोग्यां नृत्यं गीतमलंकृतिम् ॥
स्त्रीलालित्यं स्त्रीविलासं स्त्रीकृत्यं सर्वमेव तत् ॥ ५३
ब्रह्मोवाच—
इला सर्वमथावाप्य यक्षिणीं वाक्यमब्रवीत् ॥ ५४
इलोवाच—
को वा भर्ता किं तु कृत्यं पुनः पुंस्त्वं कथं भवेत् । एतद्वदस्व कल्याणी दुःखार्ताया विशेषतः ॥
आर्तानामार्तिशमनाच्छ्रेयो नाभ्यधिकं क्वचित् ॥ ५५
यक्षिण्युवाच—
बुधः सोमसुतो नाम वनादस्माच्च पूर्वतः । आश्रमस्तस्य सुभगे पितरं नित्यमेष्यति ॥ ५६
अनेनैव पथा सोमं पितरं स बुधो ग्रहः । द्रष्टुं याति ततो नित्यं नमस्कर्तुं तथैव च ॥ ५७
यदा याति बुधः शान्तस्तदाऽऽत्मानं च दर्शये । तं दृष्ट्वा त्वं तु सुभगे सर्वकामानवाप्स्यसि ५८
ब्रह्मोवाच—
तामाश्वास्य ततः सुभ्रूर्यक्षिण्यन्तरधीयत । यक्षिणी सा तमाचष्ट यक्षोऽपि सुखमाप्तवान् ॥ ५९
इलसैन्यं च तत्राऽऽसीत्तद्गतं च यथासुखम् । उमावनास्थिता चेला गायन्ती नृत्यती पुनः ॥ ६०

---

१ घ. °क्यजयिनं भुजम् । पु° । २ घ. °य । तत्प्रसादवशात्सर्वानिले का° ।

स्त्रीभावमनुचेष्टन्ती स्मरन्ती कर्मणो गतिम् । कदाचित्क्रियमाणे तु इलया नृत्यकर्मणि ॥ ६१
तामपश्यद्बुधो धीमान्पितरं गन्तुमुद्यतः । इलां दृष्ट्वा गतिं त्यक्त्वा तामागत्याब्रवीद्बुधः ॥ ६२

बुध उवाच—

भार्या भव मम स्वस्था सर्वाभ्यस्त्वं प्रिया भव ॥ ६३

ब्रह्मोवाच—

बुधवाक्यमिला भक्त्या त्वभिनन्द्य तथाऽकरोत् । स्मृत्वा च यक्षिणीवाक्यं ततस्तुष्टाऽभवन्मुने॥
बुधो रेमे तया प्रीत्या नीत्वा स्वस्थानमुत्तमम् । सा चापि सर्वभावेन तोषयामास तं पतिम् ॥
ततो बहुतिथे काले बुधस्तुष्टोऽवदत्प्रियाम् ॥ ६५

बुध उवाच—

किं ते देयं मया भद्रे प्रियं यन्मनसि स्थितम् ॥ ६६

ब्रह्मोवाच—

तद्वाक्यसमकालं तु पुत्रं देहीत्यभाषत । इला बुधं सोमसुतं प्रीतिमन्तं प्रियं तथा ॥ ६७

बुध उवाच—

अमोघमेतन्मद्वीर्यं तथा प्रीतिसमुद्भवम् । पुत्रस्ते भविता तस्मात्क्षत्रियो लोकविश्रुतः ॥ ६८
सोमवंशकरः श्रीमानादित्य इव तेजसा । बुद्ध्या बृहस्पतिसमः क्षमया पृथिवीसमः ॥ ६९
वीर्येणाऽऽजौ हरिरिव कोपेन हुतभुग्यथा ॥ ७०

ब्रह्मोवाच—

तस्मिन्नुत्पद्यमाने तु बुधपुत्रे महात्मनि । जयशब्दश्च सर्वत्र त्वासीच्च सुरवेश्मनि ॥ ७१
बुधपुत्रे समुत्पन्ने तत्राऽऽजग्मुः सुरेश्वराः । अहमप्यागमं तत्र मुदा युक्तो महामते ॥ ७२
जातमात्रः सुतो रावमकरोत्स पृथुस्वरम् । तेन सर्वेऽप्यवोचन्वै संगता ऋषयः सुराः ॥ ७३
यस्मात्पुरू रवोऽस्येति तस्मादेष पुरूरवाः । स्यादित्येवं नाम चक्रुः सर्वे संतुष्टमानसाः ॥ ७४
बुधोऽप्यध्यापयामास क्षात्रविद्यां सुतं शुभाम् । धनुर्वेदं सप्रयोगं बुधः प्रादात्तदाऽऽत्मजे ॥ ७५
स शीघ्रं वृद्धिमगमच्छुक्लपक्षे यथा शशी । स मातरं दुःखयुतां समीक्ष्येलां महामतिः ॥
नमस्याथ विनीतात्मा इलामैलोऽब्रवीदिदम् ॥ ७६

ऐल उवाच—

बुधो मातर्मम पिता तव भर्ता प्रियस्तथा । अहं च पुत्रः कर्मण्यः कस्मात्ते मानसो ज्वरः ॥ ७७

इलोवाच—

सत्यं पुत्र बुधो भर्ता त्वं च पुत्रो गुणाकरः । भर्तृपुत्रकृता चिन्ता न ममास्ति कदाचन ॥ ७८
तथाऽपि पूर्वजं किंचिद्दुःखं स्मृत्वा पुनः पुनः । चिन्तयेयं महाबुद्धे ततो मातरमब्रवीत् ॥ ७९

ऐल उवाच—

निवेदयस्व मे मातस्तदेव प्रथमं मम ॥ ८०

ब्रह्मोवाच—

इला चैनमुवाचेदं रहोवाचं कथं वदे । तथाऽपि पुत्र ते वच्मि पित्रोः पुत्रो यतो गतिः ॥
मग्नानां दुःखपाथोब्धौ पुत्रः प्रवहणं परम् ॥ ८१

ब्रह्मोवाच—

तन्मातृवचनं श्रुत्वा विनीतः प्राह मातरम् । *पादयोः पतितश्चापि वद मातर्यथा तथा ॥ ८२

ब्रह्मोवाच—

सा पुरूरवसं प्राह इक्ष्वाकूणां तथा कुलम् । तत्रोत्पत्तिं स्वस्य नाम राज्यप्राप्तिं प्रियान्सुतान् ८३

पुरोधसं वसिष्ठं च प्रियां भार्यां स्वकं पदम् । वननिर्याणमेवाथ अमात्यानां पुरोधसः ॥ ८४

प्रेषणं च नगर्यां तां मृगयासक्तिमेव च । हिमवत्कंदरगतिं यक्षेश्वरगृहे गतिम् ॥ ८५

उमावनप्रवेशं च स्त्रीत्वप्राप्तिमशेषतः । महेश्वराज्ञया तत्र चाप्रवेशं नरस्य तु ॥ ८६

यक्षिणीवाक्यमप्यस्य वरदानं तथैव च । बुधप्राप्तिं तथा प्रीतिं पुत्रोत्पत्त्याद्यशेषतः ॥ ८७

कथयामास तत्सर्वं श्रुत्वा मातरमब्रवीत् । पुरूरवाः किं करोमि किं कृत्वा सुकृतं भवेत् ॥ ८८

एतावता ते तृप्तिश्चेदलमेतेन चाम्बिके । यद्प्यन्यन्मनोवर्ति तदप्याज्ञापयस्व मे ॥ ८९

इलोवाच—

इच्छेयं पुंस्त्वमुत्कृष्टमिच्छेयं राज्यमुत्तमम् । अभिषेकं च पुत्राणां तव चापि विशेषतः ॥ ९०

दानं दातुं च यष्टुं च मुक्तिमार्गस्य वीक्षणम् । सर्वं च कर्तुमिच्छामि तव पुत्र प्रसादतः ॥ ९१

पुत्र उवाच—

उपायं त्वा तु पृच्छामि येन पुंस्त्वमवाप्स्यसि । तपसो वाऽन्यतो वाऽपि वदस्व मम तत्त्वतः ९२

इलोवाच—

बुधं त्वं पितरं पृच्छ गत्वा पुत्र यथार्थवत् । स तु सर्वं तु जानाति उपदेक्ष्यति ते हितम् ॥ ९३

ब्रह्मोवाच—

तन्मातृवचनादैलो गत्वा पितरमञ्जसा । उवाच प्रणतो भूत्वा मातुः कृत्यं तथाऽऽत्मनः ॥ ९४

बुध उवाच—

इलं जाने महाप्राज्ञ इलां जातां पुनस्तथा । उमावनप्रवेशं च शंभोराज्ञां तथैव च ॥ ९५

तस्माच्छंभुप्रसादेन उमायाश्च प्रसादतः । विशापो भविता पुत्र तावाराध्य न चान्यथा ॥ ९६

पुरूरवा उवाच—

पश्येयं तं कथं देवं कथं वा मातरं शिवाम् । तीर्थाद्वा तपसो वाऽपि तत्पितः प्रथमं वद ॥ ९७

बुध उवाच—

गौतमीं गच्छ पुत्र त्वं तत्राऽऽस्ते सर्वदा शिवः । उमया सहितः श्रीमाञ्शापहन्ता वरप्रदः ॥ ९८

ब्रह्मोवाच—

पुरूरवाः पितुर्वाक्यं श्रुत्वा तु मुदितोऽभवत् । गौतमीं तपसे धीमान्गङ्गां त्रैलोक्यपावनीम् ॥ ९९

पुंस्त्वमिच्छंस्तथा मातुर्जगाम तपसे त्वरन् । हिमवन्तं गिरिं नत्वा मातरं पितरं गुरुम् ॥ १००

\+ एतदग्रस्थाने घ. पुस्तके—पादौ निधाय शिरसि साश्रुनेत्रः सगद्गदः । सर्वैरुपायैः पित्रोर्यः पुत्रो न हराति श्रमम् । जीवन्मृतस्य तस्याहो निष्फले जन्मजीविते । तीर्थसेवादानयज्ञतपःप्रभृतिकान्यपि । कृतानि तेन पुण्यानि पितरौ येन तोषितौ । सर्वं मनोगतं सत्यं वद मातर्यथा तथा । साऽवदत्तनयं रोष्णनिश्वासग्रथिताधरा । यथावृत्तं हि दुःखाब्धौ मज्जमानेव विह्वला" इति श्लोका वर्तन्ते ।

गच्छन्तमन्वगात्पुत्रमिला सोमसुतस्तथा । ते सर्वे गौतमीं प्राप्ता हिमवत्पर्वतोत्तमात् ॥ १०१
तत्र स्नात्वा तपः किंचित्कृत्वा चक्रुः स्तुतिं पराम् । भवस्य देवदेवस्य स्तुतिक्रममिमं शृणु ॥ २
बुधस्तुष्टाव प्रथममिला च तदनन्तरम् । ततः पुरूरवाः पुत्रो गौरीं देवीं च शंकरम् ॥ १०३

बुध उवाच—

यौ कुङ्कुमेन स्वशरीरजेन स्वभावहेमप्रतिमौ सरूपौ ।
यावर्चितौ स्कन्दगणेश्वराभ्यां तौ मे शरण्यौ शरणं भवेताम् ॥ १०४

इलोवाच—

संसारतापत्रयदावदग्धाः शरीरिणो यौ परिचिन्तयन्तः ।
सद्यः परां निर्वृतिमाप्नुवन्ति तौ शंकरौ मे शरणं भवेताम् ॥ १०५
आर्ता ह्यहं पीडितमानसा ते क्लेशादिगोप्ता न परोऽस्ति कश्चित् ।
देव त्वदीयौ चरणौ सुपुण्यौ तौ मे शरण्यौ शरणं भवेताम् ॥ १०६

पुरूरवा उवाच—

ययोः सकाशादिदमभ्युदेति प्रयाति चान्ते लयमेव सर्वम् ।
जगच्छरण्यौ जगदात्मकौ तु गौरीहरौ मे शरणं भवेताम् ॥ १०७
यौ देववृन्देषु महोत्सवे तु पादौ गृहाणेश(ति) गिरीशपुत्र्याः ।
प्रोक्तं धृतौ प्रीतिवशाच्छिवेन तौ मे शरण्यौ शरणं भवेताम् ॥ १०८

श्रीदेव्युवाच—

किमभीष्टं प्रदास्यामि युष्मभ्यं तद्वदन्तु मे । कृतकृत्याः स्थ भद्रं वो देवानामपि दुष्करम् ॥१०९

पुरूरवा उवाच—

इलो राजा तवाज्ञात्वा वनं प्राविशदम्बिके । तत्क्षमस्व सुरेशानि पुंस्त्वं दातुं त्वमर्हसि ॥ ११०

ब्रह्मोवाच—

तथेत्युवाच तान्सर्वान्भवस्य तु मते स्थिता । ततः स भगवानाह देवीवाक्यरतः सदा ॥ १११

शिव उवाच—

अत्राभिषेकमात्रेण पुंस्त्वं प्राप्नोत्वयं नृपः ॥ ११२

ब्रह्मोवाच—

स्नाताया बुधभार्यायाः शरीराद्वारि सुस्रुवे । नृत्यं गीतं च लावण्यं यक्षिण्या यदुपार्जितम् ११३
तत्सर्वं वारिधाराभिर्गङ्गाम्भसि समाविशत् । नृत्या गीता च सौभाग्या इमा नद्यो बभूविरे११४
ताश्चापि संगता गङ्गां ते पुण्याः संगमास्त्रयः । तेषु स्नानं च दानं च सुरराज्यफलप्रदम् ॥११५
इला पुंस्त्वमवाप्याथ गौरीशंभोः प्रसादतः । महाभ्युदयसिद्ध्यर्थं वाजिमेधमथाकरोत् ॥ ११६
पुरोधसं वसिष्ठं च भार्यां पुत्रांस्तथैव च । अमात्यांश्च बलं कोशमानीय स नृपोत्तमः ॥ ११७
चतुरङ्गं बलं राज्यं दण्डकेऽस्थापयत्तदा । इलस्य नाम्ना विख्यातं तत्र तत्पुरमुच्यते ॥ ११८
पूर्वजातानथो पुत्रान्सूर्यवंशक्रमागते । राज्येऽभिषिच्य पश्चात्तमैलं स्नेहादसिश्चयत् ॥ ११९
सोमवंशकरः श्रीमानयं राजा भवेदिति । सर्वेभ्यो मतिमानेभ्यो ज्येष्ठः श्रेष्ठोऽभवन्मुने ॥ १२०
यत्र च क्रतवो वृत्ता इलस्य नृपतेः शुभाः । यत्र पुंस्त्वमवाप्याथ यत्र पुत्राः समागताः ॥ १२१
यक्षिणीदत्तनृत्यादिगीतसौभाग्यमङ्गलाः । नद्यो भूत्वा यत्र गङ्गां संगतास्तानि नारद ॥ १२२

तीर्थानि शुभदान्यासन्सहस्राण्यथ षोडश । उभयोस्तीरयोस्तात तत्र शंभुरिलेश्वरः ॥
तेषु स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ १२३

इति श्रीमहापुराणे ब्राह्मे स्वयंभ्वृषिसंवादे तीर्थमाहात्म्ये बुधेलापुरूरवोवसिष्ठनृत्यगीतसौभाग्येले-श्वरादिषोडशसहस्रतीर्थवर्णनं नामाष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

गौतमीमाहात्म्य एकोनचत्वारिंशत्तमोऽध्यायः ॥ ३९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६१५०

अथ नवाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

चक्रतीर्थमिति ख्यातं ब्रह्महत्यादिनाशनम् । यत्र चक्रेश्वरो देवश्चक्रमाप यतो हरिः ॥ १
यत्र विष्णुः स्वयं स्थित्वा चक्रार्थं शंकरं प्रभुः । पूजयामास तत्तीर्थं चक्रतीर्थमुदाहृतम् ॥ २
यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते । दक्षक्रतौ प्रवृत्ते तु देवानां च समागमे ॥ ३
दक्षेण दूषिते देवे शिवे शर्वे महेश्वरे । अनाह्वाने सुरेशस्य दक्षचित्ते मलीमसे ॥ ४
दाक्षायण्या श्रुते वाक्ये अनाह्वानस्य कारणे । अहल्यायां चोक्तवत्यां कुपिताऽभूत्सुरेश्वरी ॥ ५
पितरं नाशये पापं क्षमेयं न कथंचन । शृण्वती दोषवाक्यानि पित्रा चोक्तानि भर्तरि ॥ ६
पत्युः शृण्वन्ति या निन्दां तासां पापावधिः कुतः । यादृशस्तादृशो वाऽपि पतिः स्त्रीणां परा गतिः ॥ ७
किं पुनः सकलाधीशो महादेवो जगद्गुरुः । श्रुतं तन्निन्दनं तर्हि धारयामि न देहकम् ॥ ८
तस्मात्त्यक्ष्य इमं देहमित्युक्त्वा सा महासती । कोपेन महताऽऽविष्टा प्रजज्वाल सुरेश्वरी ॥ ९
शिवैकचेतना देहं बलाद्योगाच्च तत्यजे । महेश्वरोऽपि सकलं वृत्तमाकर्ण्य नारदात् ॥ १०
दृष्ट्वा चुकोप पप्रच्छ जयां च विजयां तथा । ते ऊचतुरुभे देवं दक्षक्रतुविनाशनम् ॥ ११
दाक्षायण्या इति श्रुत्वा मखं प्रायान्महेश्वरः । भीमैर्गणैः परिवृतो भूतनाथैः समं ययौ ॥ १२
मखस्तैर्वेष्टितः सर्वो देवब्रह्मपुरस्कृतः । दक्षेण यजमानेन शुद्धभावेन रक्षितः ॥ १३
वसिष्ठादिभिरत्युग्रैर्मुनिभिः परिवारितः । इन्द्रादित्याद्यैर्वसुभिः सर्वतःपरिपालितः ॥ १४
ऋग्यजुःसामवेदैश्च स्वाहाशब्दैरलंकृतः । श्रद्धा पुष्टिस्तथा तुष्टिः शान्तिर्लज्जा सरस्वती ॥ १५
भूमिर्द्यौः शर्वरी क्षान्तिरुषा आशा जया मतिः । एताभिश्च तथाऽन्याभिः सर्वतःसमलंकृतः १६
त्वष्ट्रा महात्मना चापि कारितो विश्वकर्मणा । सुरभिर्नन्दिनी धेनुः कामधुकामदोहिनी ॥ १७
एताभिः कामवर्षाभिः सर्वकामसमृद्धिमान् । कल्पवृक्षः पारिजातो लताः कल्पलतादिकाः १८
यद्यदिष्टतमं किंचित्तत्र तस्मिन्मखे स्थितम् । स्वयं मघवता पूष्णा हरिणा परिरक्षितः ॥ १९
दीयतां भुज्यतां वाऽपि क्रियतां स्थीयतां सुखम् । एतैश्च सर्वतो वाक्यैर्दक्षस्य पूजितं मखम् २०
[*आदौ तु वीरभद्रोऽसौ भद्रकाल्या युतो ययौ । शोककोपपरीतात्मा पश्चाच्छूलपिनाकधृक्] ॥

---

* धनुश्चिह्नान्तर्गतः पाठः क. पुस्तके नास्ति ।

---

१ घ. वा ।

अभ्याययौ महादेवो महाभूतैरलंकृतः । तानि भूतानि परितो मखे वेष्ट्य महेश्वरम् ॥ २२
क्रतुं विध्वंसयामासुस्तत्र क्षोभो महानभूत् । पलायन्त ततः केचित्केचिद्गत्वा ततः शिवम् ॥ २३
केचित्स्तुवन्ति देवेशं केचित्कुप्यन्ति शंकरम् । एवं विध्वंसितं यज्ञं दृष्ट्वा पूषा समभ्यगात् ॥ २४
पूष्णो दन्तानथोत्पाट्य इन्द्रं व्यद्रावयत्क्षणात् । भगस्य चक्षुषी विप्र वीरभद्रो व्यपाटयत् ॥ २५
दिवाकरं पुनर्दोर्भ्यां परिभ्राम्य समाक्षिपत् । ततः सुरगणाः सर्वे विष्णुं ते शरणं ययुः ॥ २६

देवा ऊचुः—

त्राहि त्राहि गदापाणे भूतनाथकृताद्भयात् । महेश्वरगणः कश्चित्प्रमथानां तु नायकः ॥
तेन दग्धो मखः सर्वो वैष्णवः पश्यतो हरेः ॥ २७

ब्रह्मोवाच—

हरिणा चक्रमुत्सृष्टं भूतनाथवधं प्रति । भूतनाथोऽपि तच्चक्रमापतच्च तदाऽग्रसत् ॥ २८
ग्रस्ते चक्रे ततो विष्णोर्लोकपाला भयाद्ययुः । तथा स्थितानवेक्ष्याथ दक्षो यज्ञं सुरानपि ॥
तुष्टाव शंकरं देवं दक्षो भक्त्या प्रजापतिः ॥ २९

दक्ष उवाच—

जय शंकर सोमेश जय सर्वज्ञ शंभवे । जय कल्याणभृच्छंभो जय कालात्मने नमः ॥ ३०
आदिकर्तर्नमस्तेऽस्तु नीलकण्ठ नमोऽस्तु ते । ब्रह्मप्रिय नमस्तेऽस्तु ब्रह्मरूप नमोऽस्तु ते ॥ ३१
त्रिमूर्तये नमो देव त्रिधाम परमेश्वर । सर्वमूर्ते नमस्तेऽस्तु त्रैलोक्याधार कामद ॥ ३२
नमो वेदान्तवेद्याय नमस्ते परमात्मने । यज्ञरूप नमस्तेऽस्तु यज्ञधाम नमोऽस्तु ते ॥ ३३
यज्ञदान नमस्तेऽस्तु हव्यवाह नमोऽस्तु ते । यज्ञहर्त्रे नमस्तेऽस्तु फलदाय नमोऽस्तु ते ॥ ३४
त्राहि त्राहि जगन्नाथ शरणागतवत्सल । भक्तानामप्यभक्तानां त्वमेव शरणं प्रभो ॥ ३५

ब्रह्मोवाच—

एवं तु स्तुवतस्तस्य प्रसन्नोऽभून्महेश्वरः । किं ददामीति तं प्राह क्रतुः पूर्णोऽस्तु मे प्रभो ॥ ३६
तथेत्युवाच भगवान्देवदेवो महेश्वरः । शंकरः सर्वभूतात्मा करुणावरुणालयः ॥ ३७
क्रतुं कृत्वा ततः पूर्णं तस्य दक्षस्य वै मुने । एवमुक्त्वा स भगवान्भूतैरन्तरधीयत ॥ ३८
यथागतं सुरा जग्मुः स्वमेव सदनं प्रति । ततः कदाचिद्देवानां दैत्यानां विग्रहो महान् ॥ ३९
बभूव तत्र दैत्येभ्यो भीता देवाः श्रियः पतिम् । तुष्टुवुः सर्वभावेन वचोभिस्तं जनार्दनम् ॥४०

देवा ऊचुः—

शक्रादयोऽपि त्रिदशाः कटाक्षमवेक्ष्य यस्यास्तप आचरन्ति ।
सा चापि यत्पादरता च लक्ष्मीस्तं ब्रह्मभूतं शरणं प्रपद्ये ॥ ४१
यस्मात्त्रिलोक्यां न परः समानो न चाधिकस्तार्क्ष्यरथान्नृसिंहात् ।
स देवदेवोऽवतु नः समस्तान्महाभयेभ्यः कृपया प्रपन्नान् ॥ ४२

ब्रह्मोवाच—

ततः प्रसन्नो भगवाञ्शङ्खचक्रगदाधरः । किमर्थमागताः सर्वे तत्कर्ताऽस्मीत्युवाच तान् ॥ ४३

देवा ऊचुः—

भयं च तीव्रं दैत्येभ्यो देवानां मधुसूदन । ततस्त्राणाय देवानां मतिं कुरु जनार्दन ॥ ४४

ब्रह्मोवाच—

तानागतान्हरिः प्राह ग्रस्तं चक्रं हरेण मे । किं करोमि गतं चक्रं भवन्तश्चार्तिमागताः ॥
यान्तु सर्वे देवगणा रक्षा वः क्रियते मया ॥ ४६

ब्रह्मोवाच—

ततो गतेषु देवेषु विष्णुश्चक्रार्थमुद्यतः । गोदावरीं ततो गत्वा शंभोः पूजां प्रचक्रमे ॥ ४७
सुवर्णकमलैर्दिव्यैः सुगन्धैर्दशभिः शतैः । भक्तितो नित्यवत्पूजां चक्रे विष्णुरुमापतेः ॥ ४८
एवं संपूज्यमाने तु तयोस्तत्त्वमिदं शृणु । कमलानां सहस्रे तु यदेकं नैव पूर्यते ॥ ४९
तदाऽसुरारिः स्वं नेत्रमुत्पाट्याघ्र्यमकल्पयत् । अर्घ्यपात्रं करे गृह्य सहस्रकमलान्वितम् ॥
ध्यात्वा शंभुं ददावर्घ्यमनन्यशरणो हरिः ॥ ५०

विष्णुरुवाच—

त्वमेव देव जानीषे भावमन्तर्गतं नृणाम् । त्वमेव शरणोऽधीशोऽत्र का भवेद्विचारणा ॥ ५१

ब्रह्मोवाच—

वदन्नुदश्रुनयनो निलिल्येऽसावितीश्वरे । भवानीसहितः शंभुः पुरस्तादभवत्तदा ॥ ५२
गाढमालिङ्ग्य विविधैर्वरैरापूरयद्धरिम् । तदेव चक्रमभवन्नेत्रं चापि यथा पुरा ॥ ५३
ततः सुरगणाः सर्वे तुष्टुवुर्हरिशंकरौ । गङ्गां चापि सरिच्छ्रेष्ठां देवं च वृषभध्वजम् ॥ ५४
ततः प्रभृति तत्तीर्थं चक्रतीर्थमिति स्मृतम् । यस्यानुश्रवणेनैव मुच्यते सर्वकिल्बिषैः ॥ ५५
तत्र स्नानं च दानं च यः कुर्यात्पितृतर्पणम् । सर्वपापविनिर्मुक्तः पितृभिः स्वर्गभाग्भवेत् ॥
तत्तु चक्राङ्कितं तीर्थमद्यापि परिदृश्यते ॥ ५७

इति श्रीमहापुराणे आदिब्राह्मे चक्रतीर्थवर्णनं नाम नवाधिकशततमोऽध्यायः ॥ १०९ ॥

गौतमीमाहात्म्ये चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥

आदितः श्लोकानां समष्ट्यङ्काः—६२०७

अथ दशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

पिप्पलं तीर्थमाख्यातं चक्रतीर्थादनन्तरम् । यत्र चक्रेश्वरो देवश्चक्रमाप यतो हरिः ॥ १
यत्र विष्णुः स्वयं स्थित्वा चक्रार्थं शंकरं विभुम् । पूजयामास तत्तीर्थं चक्रतीर्थमुदाहृतम् ॥ २
यत्र प्रीतोऽभवद्विष्णोः शंभुस्तत्पिप्पलं विदुः । महिमानं यस्य वक्तुं न क्षमोऽप्यहिनायकः ॥ ३
चक्रेश्वरो पिप्पलेशो नामधेयस्य कारणम् । शृणु नारद तद्भक्त्या साक्षाद्वेदोदितं मया ॥ ४
दधीचिरिति विख्यातो मुनिरासीद्गुणान्वितः । तस्य भार्या महाप्राज्ञा कुलीना च पतिव्रता ॥ ५
लोपामुद्रेति या ख्याता स्वसा तस्या गभस्तिनी । इति नाम्ना च विख्याता वडवेति प्रकीर्तिता
दधीचेः सा प्रिया नित्यं तपस्तेपे तया महत् । दधीचिरग्निमान्नित्यं गृहधर्मपरायणः ॥ ७

---

१ घ. °र्थाच दक्षिणे । य° । २ घ. °क्षाद्देवोदि° ।

भागीरथीं समाश्रित्य देवातिथिपरायणः। स्वकलत्ररतः शान्तः कुम्भयोनिरिवापरः॥ ८
तस्य प्रभावात्तं देशं नारयो दैत्यदानवाः। आजग्मुर्मुनिशार्दूल यत्रागस्त्यस्य चाऽऽश्रमः॥ ९
तत्र देवाः समाजग्मू रुद्रादित्यास्तथाऽश्विनौ। इन्द्रो विष्णुर्यमोऽग्निश्च जित्वा दैत्यानुपागतान्॥
जयेन जातसंहर्षाः स्तुताश्चैव मरुद्गणैः। दधीचिं मुनिशार्दूलं दृष्ट्वा नेमुः सुरेश्वराः॥ ११
दधीचिर्जातसंहर्षः सुरान्पूज्य पृथक्पृथक्। गृहकृत्यं ततश्चक्रे सुरेभ्यो भार्यया सह॥ १२
पृष्टाश्च कुशलं तेन कथाश्चक्रुः सुरा अपि। दधीचिमब्रुवन्देवा भार्यया सुखितं पुनः॥ १३
आसीनं हृष्टमनस ऋषिं नत्वा पुनः पुनः॥ १४

देवा ऊचुः—

किमद्य दुर्लभं लोके ऋषेऽस्माकं भविष्यति। त्वादृशः सकृपो येषु मुनिर्भूकल्पपादपः॥ १५
एतदेव फलं पुंसां जीवतां मुनिसत्तम। तीर्थाप्लुतिर्भूतदया दर्शनं च भवादृशाम्॥ १६
यत्स्नेहादुच्यतेऽस्माभिरवधारय तन्मुने। जित्वा दैत्यानिह प्राप्ता हत्वा राक्षसपुंगवान्॥ १७
वयं च सुखिनो ब्रह्मंस्त्वयि दृष्टे विशेषतः। नाऽऽयुधैः फलमस्माकं वोढुं नैव क्षमा वयम् १८
स्थाप्यदेशं न पश्याम आयुधानां मुनीश्वर। स्वर्गे सुरद्विषो ज्ञात्वा स्थापितानि हरन्ति च १९
नयेयुरायुधानीति तथैव च रसातले। तस्मात्तवाश्रमे पुण्ये स्थाप्यन्तेऽस्त्राणि मानद॥ २०

नैवात्र किंचिद्भयमस्ति विप्र न दानवेभ्यो राक्षसेभ्यश्च घोरम्।
त्वदाज्ञया रक्षितपुण्यदेशो न विद्यते तपसा ते समानः॥ २१
जितारयो ब्रह्मविदां वरिष्ठं वयं च पूर्वं निहता दैत्यसंघाः।
अस्त्रैरलं भारभूतैः कृतार्थैः स्थाप्यं स्थानं ते समीपे मुनीश॥ २२
दिव्यान्भोगान्कामिनीभिः समेतान्देवोद्याने नन्दने संभजामः।
ततो यामः कृतकार्याः सहेन्द्राः स्वं स्वं स्थानं चाऽऽयुधानां च रक्षा॥ २३
त्वया कृता जायतां तत्प्रशाधि समर्थस्त्वं रक्षणे धारणे च॥ २४

ब्रह्मोवाच—

तद्वाक्यमाकर्ण्य दधीचिरेवं वाक्यं जगौ विबुधानेवमस्तु।
निवार्यमाणः प्रियशीलया स्त्रिया किं देवकार्येण विरुद्धकारिणा॥ २५
ये ज्ञातशास्त्राः परमार्थनिष्ठाः संसारचेष्टासु गतानुरागाः।
तेषां परार्थव्यसनेन किं मुने येनात्र वाऽमुत्र सुखं न किंचित्॥ २६
देवद्विषो द्वेषमनुप्रयान्ति दत्ते स्थाने विप्रवर्य शृणुष्व।
नष्टे हृते चाऽऽयुधानां मुनीश कुप्यन्ति देवा रिपवस्ते भवन्ति॥ २७
तस्मान्नेदं वेदविदां वरिष्ठ युक्तं द्रव्ये परकीये ममत्वम्।
तावच्च मैत्री द्रव्यभावश्च तावन्नष्टे हृते रिपवस्ते भवन्ति॥ २८
चेदस्ति शक्तिर्द्रव्यदाने ततस्ते दातव्यमेवार्थिने किं विचार्यम्।
नो चेत्सन्तः परकार्याणि कुर्युर्वाग्भिर्मनोभिः कृतिभिस्तथैव॥ २९
परस्वसंधारणमेतदेव सद्भिर्निरस्तं त्यज कान्त सद्यः॥ ३०

ब्रह्मोवाच—

एवं प्रियाया वचनं स विप्रो निशम्य भार्यामिदमाह सुभ्रूम्॥ ३१

दधीचिरुवाच—

पुरा सुराणामनुमान्य भद्रे नेतीति वाणी न सुखं ममैति ॥ ३२

ब्रह्मोवाच—

श्रुत्वेरितं पत्युरिति प्रियायां दैवं विनाऽन्यन्न नृणां समर्थम् ।
तूष्णीं स्थितायां सुरसत्तमास्ते संस्थाप्य चास्त्राण्यतिदीप्तिमन्ति ॥ ३३
नत्वा मुनीन्द्रं ययुरेव लोकान्दैत्यद्विषो [1]न्यस्तशस्त्राः कृतार्थाः ।
गतेषु देवेषु मुनिप्रवर्यो हृष्टोऽवसद्भार्यया धर्मयुक्तः ॥ ३४
गते च काले ह्यतिविप्रयुक्ते दैवे वर्षे संख्यया वै सहस्रे ।
न ते सुरा आयुधानां मुनीश वाचं मनश्चापि तथैव चक्रुः ॥ ३५
दधीचिरप्याह गभस्तिमोजसा देवारयो मां द्विषतीह भद्रे ।
न ते सुरा नेतुकामा भवन्ति संस्थापितान्यत्र वदस्व युक्तम् ॥ ३६
सा चाऽऽह कान्तं विनयादुक्तमेव त्वं जानीषे नाथ यदत्र युक्तम् ।
दैत्या हरिष्यन्ति महाप्रवृद्धास्तपोयुक्ता बलिनः स्वायुधानि ॥ ३७
तदस्त्ररक्षार्थमिदं स चक्रे मन्त्रैस्तु संक्षाल्य जलैश्च पुण्यैः ।
तद्वारि सर्वास्त्रमयं सुपुण्यं तेजोयुक्तं तच्च पपौ दधीचिः ॥ ३८
निर्वीर्यरूपाणि तदायुधानि क्षयं जग्मुः क्रमशः कालयोगात् ।
सुराः समागत्य दधीचिमूचुर्महाभयं ह्यागतं शात्रवं नः ॥ ३९
ददस्व चास्त्राणि मुनिप्रवीर यानि त्वदन्ते निहितानि देवैः ।
दधीचिरप्याह सुरारिभीत्या अनागत्या भवतां चाचिरेण ॥ ४०
अस्त्राणि पीतानि शरीरसंस्थान्युक्तानि युक्तं मम तद्वदन्तु ।
श्रुत्वा तदुक्तं वचनं तु देवाः प्रोचुस्तमित्थं विनयावनम्राः ॥ ४१
अस्त्राणि देहीति च वक्तुमेतच्छक्यं न वाऽन्यत्प्रतिवक्तुं मुनीन्द्र ।
विना च तैः परिभूयेम नित्यं पुष्टारयः क्व प्रयामो मुनीश ॥ ४२
न मर्त्यलोके न तले न नाके वासः सुराणां भविताऽद्य तात ।
त्वं विप्रवर्यस्तपसा चैव युक्तो नान्यद्वक्तुं युज्यते[2] ते पुरस्तात्[3] ॥ ४३
विप्रस्तदोवाच मदस्थिसंस्थान्यस्त्राणि गृह्णन्तु न संशयोऽत्र ।
देवास्तमप्याहुरनेन किं नो ह्यस्त्रैर्हीनाः स्त्रीत्वमाप्ताः सुरेन्द्राः ॥ ४४
पुनस्तदा चाऽऽह मुनिप्रवीरस्त्यक्ष्ये जीवान्दैहिकान्योगयुक्तः ।
अस्त्राणि कुर्वन्तु मदस्थिभूतान्यनुत्तमान्युत्तमरूपवन्ति ॥ ४५
कुरुष्व चेत्याहुरदीनसत्त्वं दधीचिमित्युत्तरमग्निकल्पम् ।
तदा तु तस्य प्रियमीरयन्ती न सांनिध्ये प्रातिथेयी मुनीश ॥ ४६

---

१ घ. जयिनस्ते । २ क. ते हि द्विजेश । वि । ३ घ. त् । इतीरितं देवगणैः स विप्र आकर्ण्य तानाह कथं विषण्णाः । कुर्वन्तु सर्वे त्रिदशा यथेष्टं मदस्थिभिस्तानि समायुधानि । निशम्य शक्रो मुनिभाषितं हृदा प्रकम्पितस्तत्प्रमना मनस्वी । यद्दैवदिष्टं मुनिवर्य तन्नो भवत्वहो ब्राह्मणदैवतानाम् । अथो बभाषे स महानुभावो न मेऽभिलाषोऽस्ति शरीरकस्य । वि ।

ते चापि देवास्तामदृष्ट्वैव शीघ्रं तस्या भीता विप्रमूचुः कुरुष्व ।
तत्याज जीवान्दुस्त्यजान्प्रीतियुक्तो यथासुखं देहमिमं जुषध्वम् ॥ ४७
मदस्थिभिः प्रीतिमन्तो भवन्तु सुराः सर्वे किंतु देहेन कार्यम् ॥ ४८

ब्रह्मोवाच—

इत्युक्त्वाऽसौ बद्धपद्मासनस्थो नासाग्रदत्ताक्षिप्रकाशप्रसन्नः ।
वायुं सवह्निं मध्यमोद्घाटयोगान्नीत्वा शनैर्दहराकाशगर्भम् ॥ ४९
यदप्रमेयं परमं पदं यद्ब्रह्मरूपं यदुपासितव्यम् ।
तत्रैव विन्यस्य धियं महात्मा सायुज्यतां ब्रह्मणोऽसौ जगाम ॥ ५०
निर्जीवतां प्राप्तमभीक्ष्य देवाः कलेवरं तस्य सुराश्च सम्यक् ।
त्वष्टारमप्यूचुरतित्वरन्तः कुरुष्व चास्त्राणि बहूनि सद्यः ॥ ५१
स चापि तानाह कथं नु कार्यं कलेवरं ब्राह्मणस्येह देवाः ।
बिभेमि कर्तुं दारुणं चाक्षमोऽहं विदारितान्यायुधान्युत्तमानि ॥ ५२
तदस्थिभूतानि करोमि सद्यस्ततो देवा गाः समूचुस्त्वरन्तः ॥ ५३

देवा ऊचुः—

वज्रं मुखं वः क्रियते हितार्थं गावो देवैरायुधार्थं क्षणेन ।
दधीचिदेहं तु विदार्य यूयमस्थीनि शुद्धानि प्रयच्छताद्य ॥ ५४

ब्रह्मोवाच—

ता देववाक्याच्च तथैव चक्रुः संलिह्य चास्थीनि ददुः सुराणाम् ।
सुरास्त्वरा जग्मुरदीनसत्त्वाः स्वमालयं चापि तथैव गावः ॥ ५५
कृत्वा तथाऽस्त्राणि च देवतानां त्वष्टा जगामाथ सुराज्ञया तदा ।
ततश्चिराच्छीलवती सुभद्रा भर्तुः प्रिया बालगर्भा त्वरन्ती ॥ ५६
करे गृहीत्वा कलशं वारिपूर्णमुर्मां नत्वा फलपुष्पैः समेत्य ।
अग्निं च भर्तारमथाऽऽश्रमं च संद्रष्टुकामा ह्याजगामाथ शीघ्रम् ॥ ५७
आगच्छन्तीं तां प्रातिथेयीं तदानीं निवारयामास तदोल्कपातः ।
सा संभ्रमादागता चाऽऽश्रमं स्वं नैवापश्यत्तत्र भर्तारमग्रे ॥ ५८
क्व वा गतश्चेति सविस्मया सा पप्रच्छ चाग्निं प्रातिथेयी तदानीम् ।
अग्निस्तदोवाच सविस्तरं तां देवागमं याचनं[2] वै शरीरे ॥ ५९
अस्थ्नामुपादानमथ प्रयाणं श्रुत्वा सर्वं दुःखिता सा बभूव ।
दुःखोद्वेगात्सा पपाताथ पृथ्व्यां मन्दं मन्दं वह्निनाऽऽश्वासिता च ॥ ६०

प्रातिथेय्युवाच—

शापेऽमराणां तु नाहं समर्था अग्निं प्राप्स्ये किं नु कार्यं भवेन्मे ॥ ६१

ब्रह्मोवाच—

कोपं च दुःखं च नियम्य साध्वी तदाऽवादीद्धर्मयुक्तं च भर्तुः ॥ ६२

---

१ घ. °दार्यैता° । २ घ. °नं चैव शस्त्रम् । अ° ।

प्रातिथेय्युवाच—

उत्पद्यते यत्तु विनाशि सर्वं न शोच्यमस्तीति मनुष्यलोके ।
गोविप्रदेवार्थमिह त्यजन्ति प्राणान्प्रियान्पुण्यभाजो मनुष्याः ॥ ६३
संसारचक्रे परिवर्तमाने देहं समर्थं धर्मयुक्तं त्ववाप्य ।
प्रियान्प्राणान्देवविप्रार्थहेतोस्ते वै धन्याः प्राणिनो ये त्यजन्ति ॥ ६४
प्राणाः सर्वेऽस्यापि देहान्वितस्य यातारो वै नात्र संदेहलेशः ।
एवं ज्ञात्वा विप्रगोदेवदीनाद्यर्थं चैनानुत्सृजन्तीश्वरास्ते ॥ ६५
निवार्यमाणोऽपि मया प्रपन्नया चकार देवास्त्रपरिग्रहं सः ।
मनोगतं वेत्त्यथवा विधातुः को मर्त्यलोकातिगचेष्टितस्य ॥ ६६

ब्रह्मोवाच—

इत्येवमुक्त्वाऽऽपूज्य चाग्नीन्यथावद्भर्तुस्त्वचालोमभिः सा विवेश ।
गर्भस्थितं बालकं प्रातिथेयी कुक्षिं विदार्याथ करे गृहीत्वा ॥ ६७
नत्वा च गङ्गां भुवमाश्रमं च वनस्पतीनोषधीराश्रमस्थान् ॥ ६८

प्रातिथेय्युवाच—

पित्रा हीनो बन्धुभिर्गोत्रजैश्च मात्रा हीनो बालकः सर्व एव ।
रक्षन्तु सर्वेऽपि च भूतसंघास्तथौषध्यो बालकं लोकपालाः ॥ ६९
ये बालकं मातृपितृप्रहीणं सनिर्विशेषं स्वतनुप्ररूढैः ।
पश्यन्ति रक्षन्ति त एव नूनं ब्रह्मादिकानामपि वन्दनीयाः ॥ ७०

ब्रह्मोवाच—

इत्युक्त्वा चात्यजद्बालं भर्तृचित्तपरायणा । पिप्पलानां समीपे तु न्यस्य बालं नमस्य च ॥ ७१
अग्निं प्रदक्षिणीकृत्य यज्ञपात्रसमन्विता । विवेशाग्निं प्रातिथेयी भर्त्रा सह दिवं ययौ ॥ ७२
रुरुदुश्चाऽऽश्रमस्था ये वृक्षाश्च वनवासिनः । पुत्रवत्पोषिता येन ऋषिणा च दधीचिना ॥ ७३
विना तेन न जीवामस्तया मात्रा विना तथा । मृगाश्च पक्षिणः सर्वे वृक्षाः प्रोचुः परस्परम् ७४

वृक्षा ऊचुः—

स्वर्गमासेदुषोः पित्रोस्तदपत्येष्वकृत्रिमम् । ये कुर्वन्त्यनिशं स्नेहं त एव कृतिनो नराः ॥ ७५
दधीचिः प्रातिथेयी वा वीक्षतेऽस्मान्यथा पुरा । तथा पिता न माता वा धिगस्मान्पापिनो वयम्
अस्माकमपि सर्वेषामतः प्रभृति निश्चितम् । बालो दधीचिः प्रातिथेयी बालो धर्मः सनातनः ७७

ब्रह्मोवाच—

एवमुक्त्वा तदौषध्यो वनस्पतिसमन्विताः । सोमं राजानमभ्येत्य याचिरेऽमृतमुत्तमम् ॥ ७८
स चापि दत्तवांस्तेभ्यः सोमोऽमृतमनुत्तमम् । ददुर्बालाय ते चापि अमृतं सुरवल्लभम् ॥ ७९
स तेन तृप्तो ववृधे शुक्लपक्षे यथा शशी । पिप्पलैः पालितो यस्मात्पिप्पलादः स बालकः ॥
प्रवृद्धः पिप्पलानेवमुवाच त्वतिविस्मितः ॥ ८०

पिप्पलाद उवाच—

मानुषेभ्यो मानुषास्तु जायन्ते पक्षिभिः खगाः । बीजेभ्यो वीरुधो लोके वैषम्यं नैव दृश्यते ॥
वार्क्षस्त्वहं कथं जातो हस्तपादादिजीववान् ॥ ८१

ब्रह्मोवाच—

वृक्षास्तद्वचनं श्रुत्वा सर्वमूचुर्यथाक्रमम् । दधीचेर्मरणं साध्व्यास्तथा चाग्निप्रवेशनम् ॥ ८२

अस्थ्नां संहरणं देवैरेतत्सर्वं सविस्तरम् । श्रुत्वा दुःखसमाविष्टो निपपात तदा भुवि ॥ ८३

आश्वासितः पुनर्वृक्षैर्वाक्यैर्धर्मार्थसंहितैः । आश्वस्तः स पुनः प्राह तदौषधिवनस्पतीन् ॥ ८४

पिप्पलाद उवाच—

पितृहन्तॄन्हनिष्येऽहं नान्यथा जीवितुं क्षमः । पितुर्मित्राणि शत्रूंश्च तथा पुत्रोऽनुवर्तते ॥ ८५

स एव पुत्रो योऽन्यस्तु पुत्ररूपो रिपुः स्मृतः । वदन्ति पितृमित्राणि तारयन्त्यहितानपि ॥ ८६

ब्रह्मोवाच—

वृक्षास्तं बालमादाय सोमान्तिकमथाऽऽययुः । बालवाक्यं तु ते वृक्षाः सोमायाथ न्यवेदयन् ॥
श्रुत्वा सोमोऽपि तं बालं पिप्पलादमभाषत ॥ ८७

सोम उवाच—

गृहाण विद्यां विधिवत्समग्रां तपःसमृद्धिं च शुभां च वाचम् ।
शौर्यं च रूपं च बलं च बुद्धिं संप्राप्स्यसे पुत्र मदाज्ञया त्वम् ॥ ८८

ब्रह्मोवाच—

पिप्पलादस्तमप्याह ओषधीशं विनीतवत् ॥ ८९

पिप्पलाद उवाच—

सर्वमेतद्वृथा मन्ये पितृहन्तृविनिष्कृतिम् । न करोम्यत्र यावच्च तस्मात्तत्प्रथमं वद ॥ ९०

यस्मिन्देशे यत्र काले यस्मिन्देवे च मन्त्रके । यत्र तीर्थे च सिध्येत मत्संकल्पः सुरोत्तम ॥ ९१

ब्रह्मोवाच—

चन्द्रः प्राह चिरं ध्यात्वा भुक्तिर्वा मुक्तिरेव वा । सर्वं महेश्वरादेवाज्जायते नात्र संशयः ॥ ९२

स सोमं पुनरप्याह कथं द्रक्ष्ये महेश्वरम् । बालोऽहं बालबुद्धिश्च न सामर्थ्यं तपस्तथा ॥ ९३

चन्द्र उवाच—

गौतमीं गच्छ भद्र त्वं स्तुहि चक्रेश्वरं हरम् । प्रसन्नस्तु तवेशानो ह्यल्पायासेन वत्सक ॥ ९४

प्रीतो भवेन्महादेवः साक्षात्कारुणिकः शिवः । आस्ते साक्षात्कृतः शंभुर्विष्णुना प्रभविष्णुना ॥

वरं च दत्तवान्विष्णोश्चक्रं च त्रिदशार्चितम् । गच्छ तत्र महाबुद्धे दण्डके गौतमीं नदीम् ॥ ९६

चक्रेश्वरं नाम तीर्थं जानन्त्योषधयस्तु तत् । तं गत्वा स्तुहि देवेशं सर्वभावेन शंकरम् ॥
स ते प्रीतमनास्तात सर्वान्कामान्प्रदास्यति ॥ ९७

ब्रह्मोवाच—

तद्राजवचनाद्ब्रह्मन्पिप्पलादो महामुनिः । आजगाम जगन्नाथो यत्र रुद्रः स चक्रदः ॥ ९८

तं बालं कृपयाऽऽविष्टाः पिप्पलाः स्वाश्रमान्ययुः । गोदावर्यां ततः स्नात्वा नत्वा त्रिभुवनेश्वरम्
तुष्टाव सर्वभावेन पिप्पलादः शिवं शुचिः ॥ ९९

पिप्पलाद उवाच—

सर्वाणि कर्माणि विहाय धीरास्त्यक्तैषणा निर्जितचित्तवाताः ।
यं यान्ति मुक्त्यै शरणं प्रयत्नात्तमादिदेवं प्रणमामि शंभुम् ॥ १००

यः सर्वसाक्षी सकलान्तरात्मा सर्वेश्वरः सर्वकलानिधानम् ।
विज्ञाय मच्चित्तगतं समस्तं स मे स्मरारिः करुणां करोतु ॥ १०१
दिगीश्वराञ्जित्य सुरार्चितस्य कैलासमान्दोलयतः पुरारेः ।
अङ्गुष्ठकृत्यैव रसातलादधोगतस्य तस्यैव दशाननस्य ॥ १०२
आलूनकायस्य गिरं निशम्य विहस्य देव्या सह दत्तमिष्टम् ।
तस्मै प्रसन्नः कुपितोऽपि तद्वदयुक्तदाताऽसि महेश्वर त्वम् ॥ १०३
सौत्रामणीमृद्धिमधः स चक्रे योऽर्चां हरौ(रे) नित्यमतीव कृत्वा ।
बाणः प्रशस्यः कृतवानुच्चपूजां रम्यां मनोज्ञां शशिखण्डमौलेः ॥ १०४
जित्वा रिपून्देवगणान्प्रपूज्य गुरुं नमस्कर्तुमगाद्विशाखः ।
चुकोप दृष्ट्वा गणनाथमूढमङ्के तमारोप्य जहास सोमः ॥ १०५
ईशाङ्करूढोऽपि शिशुस्वभावान्न मातुरङ्कं प्रमुमोच बालः ।
क्रुद्धं सुतं बोधितुमप्यशक्तस्ततोऽर्धनारित्वमवाप सोमः ॥ १०६

ब्रह्मोवाच—

ततः स्वयंभूः सुप्रीतः पिप्पलादमभाषत ॥ १०७

शिव उवाच—

वरं वरय भद्रं ते पिप्पलाद यथेप्सितम् ॥ १०८

पिप्पलाद उवाच—

हतो देवैर्महादेव पिता मम महायशाः । अदाम्भिकः सत्यवादी तथा माता पतिव्रता ॥ १०९
देवेभ्यश्च तयोर्नाशं श्रुत्वा नाथ सविस्तरम् । दुःखकोपसमाविष्टो नाहं जीवितुमुत्सहे ॥ ११०
तस्मान्मे देहि सामर्थ्यं नाशयेयं सुरान्यथा । अवध्यसेव्यस्त्रैलोक्ये त्वमेव शशिशेखर ॥ १११

ईश्वर उवाच—

तृतीयं नयनं द्रष्टुं यदि शक्नोषि मेऽनघ । ततः समर्थो भविता देवांश्छेदयितुं भवान ॥ ११२

ब्रह्मोवाच—

ततो द्रष्टुं मनश्चक्रे तृतीयं लोचनं विभोः । न शशाक तदोवाच न शक्तोऽस्मीति शंकरम् ॥ ११३

ईश्वर उवाच—

किंचित्कुरु तपो बाल यदा द्रक्ष्यसि लोचनम् । तृतीयं त्वं तदाऽभीष्टं प्राप्स्यसे नात्र संशयः ॥

ब्रह्मोवाच—

एतच्छ्रुत्वेशानवाक्यं तपसे कृतनिश्चयः । दधीचिसूनुर्धर्मात्मा तत्रैव बहुलाः समाः ॥ ११५
शिवध्यानैकनिरतो बालोऽपि बलवानिव । प्रत्यहं प्रातरुत्थाय स्नात्वा नत्वा गुरून्क्रमात् ॥ ११६
सुखासीनो मनः कृत्वा सुषुम्नायामनन्यधीः । हस्तस्वस्तिकमारोप्य नाभौ विस्मृतसंसृतिः ११७
स्थानात्स्थानान्तरोत्कर्षान्विदध्यौ शांभवं महः । ददर्श चक्षुर्देवस्य तृतीयं पिप्पलाशनः ॥
कृताञ्जलिपुटो भूत्वा विनीत इदमब्रवीत् ॥ ११८

पिप्पलाद उवाच—

शंभुना देवदेवेन वरो दत्तः पुरा मम । तार्तीयचक्षुषो ज्योतिर्यदा पश्यसि तत्क्षणात् ॥ ११९

---

१ क. ङ. प्रातिकारणम् ।

सर्वं ते प्रार्थितं सिध्येदित्याह त्रिदशेश्वरः । तस्माद्रिपुविनाशाय हेतुभूतां प्रयच्छ मे ॥ १२०
तदैव पिप्पलाः प्रोचुर्वडवाऽपि महाद्युते । माता तव प्रातिथेयी वदन्त्येवं दिवं गता ॥ १२१
पराभिद्रोहनिरता विस्मृतात्महिता नराः । इतस्ततो भ्रान्तचित्ताः पतन्ति नरकावटे ॥ १२२
तन्मातृवचनं श्रुत्वा कुपितः पिप्पलाशनः । अभिमाने ज्वलत्यन्तः साधुवादो निरर्थकः ॥ १२३
देहि देहीति तं प्राह कृत्या नेत्रविनिर्गता । वडवेति स्मरन्विप्रः कृत्याऽपि वडवाकृतिः ॥ १२४
सर्वसत्त्वविनाशाय प्रभूताऽनलगर्भिणी । गभस्तिनी बालगर्भा या माता पिप्पलाशिनः ॥ १२५
तद्ध्यानयोगात्तु जाता कृत्या साऽनलगर्भिणी । उत्पन्ना सा महारौद्रा मृत्युजिह्वेव भीषणा १२६
अवोचत्पिप्पलादं तं किं कृत्यं मे वदस्व तत् । पिप्पलादोऽपि तां प्राह देवान्खाद रिपून्मम ॥
जग्राह सा तथेत्युक्त्वा पिप्पलादं पुरस्थितम् । स प्राह किमिदं कृत्ये सा चाप्याह त्वयोदितम्
देवैश्च निर्मितं देहं ततो भीतः शिवं ययौ । तुष्टाव देवं स मुनिः कृत्यां प्राह तदा शिवः ॥ १२९

शिव उवाच—

योजनान्तःस्थिताञ्जीवान्न गृहाण मदाज्ञया । तस्माद्याहि ततो दूरं कृत्ये कृत्यं ततः कुरु ॥ १३०

ब्रह्मोवाच—

तीर्थात्तु पिप्पलात्पूर्वं यावद्योजनसंख्यया । प्रातिष्ठद्वडवारूपा कृत्या सा ऋषिनिर्मिता ॥ १३१
तस्यां जातो महानग्निर्लोकसंहरणक्षमः । तं दृष्ट्वा विबुधाः सर्वे त्रस्ताः शंभुमुपागमन् ॥ १३२
चक्रेश्वरं पिप्पलेशं पिप्पलादेन तोषितम् । स्तुवन्तो भीतमनसः शंभुमूचुर्दिवौकसः ॥ १३३

देवा ऊचुः—

रक्षस्व शंभो कृत्याऽस्मान्बाधते तद्भवानलः । शरणं भव सर्वेश भीतानामभयप्रद ॥ १३४
सर्वतः परिभूतानामार्तानां श्रान्तचेतसाम् । सर्वेषामेव जन्तूनां त्वमेव शरणं शिव ॥ १३५
ऋषिणाऽभ्यर्थिता कृत्या त्वच्चक्षुर्वह्निनिर्गता । सा जिघांसति लोकांस्त्रींस्त्वं नस्त्राता न चेतरः ॥

ब्रह्मोवाच—

तानब्रवीज्जगन्नाथो योजनान्तर्निवासिनः । न बाधते त्वसौ कृत्या तस्माद्यूयमहर्निशम् ॥
इहैवाऽऽसध्वममरास्तस्या वो न भयं भवेत् ॥ १३७

ब्रह्मोवाच—

पुनरूचुः सुरेशानं त्वया दत्तं त्रिविष्टपम् । तत्त्यक्त्वाऽत्र कथं नाथ वत्स्यामस्त्रिदशार्चित ॥ १३९

ब्रह्मोवाच—

देवानां वचनं श्रुत्वा शिवो वाक्यमथाब्रवीत् ॥ १४०

शिव उवाच—

देवोऽसौ विश्वतश्चक्षुर्यो देवो विश्वतोमुखः । यो रश्मिभिस्तु धमते नित्यं यो जनको मतः १४१
स सूर्य एक एवात्र साक्षाद्रूपेण सर्वदा । स्थितिं करोतु तन्मूर्तौ भविष्यन्त्यखिलाः स्थिताः १४२

ब्रह्मोवाच—

तथेति शंभुवचनात्पारिजाततरोस्तदा । देवा दिवाकरं चक्रुस्त्वष्टा भास्करमब्रवीत् ॥ १४३

---

१ क. °श भक्ताना° ।

त्वष्टोवाच—

इहैवाऽऽस्व जगत्स्वामिन्रक्षेमान्विबुधान्स्वयम् । स्वांशैश्च वयमप्यत्र तिष्ठामः शंभुसंनिधौ १४४
चक्रेश्वरस्य परितो यावद्योजनसंख्यया । गङ्गाया उभयं तीरमासाद्याऽऽसन्सुरोत्तमाः ॥ १४५
अङ्गुल्यर्धार्धमात्रं तु गङ्गातीरं समाश्रिताः । तिस्रः कोव्यस्तथा पञ्च शतानि मुनिसत्तम ॥
तीर्थानां तत्र व्युष्टिं च कः शृणोति ब्रवीति वा ॥ १४६

ब्रह्मोवाच—

ततः सुरगणाः सर्वे विनीताः शिवमब्रुवन् ॥ १४७

देवा ऊचुः—

पिप्पलादं सुरेशान शमं नय जगन्मय ॥ १४८

ब्रह्मोवाच—

ओमित्युक्त्वा जगन्नाथः पिप्पलादमवोचत ॥ १४९

शिव उवाच—

नाशितेष्वपि देवेषु पिता ते नाऽऽगमिष्यति । दत्ताः पित्रा तव प्राणा देवानां कार्यसिद्धये १५०
दीनार्तकरुणाबन्धुः को हि तादृग्भवे भवेत् । तथा याता दिवं तात तव माता पतिव्रता ॥ १५१
समा काऽप्यत्र मतया लोपामुद्राऽप्यरुन्धती । यदस्थिभिः सुराः सर्वे जयिनः सुखिनः सदा ॥
तेनावाप्तं यशः स्फीतं तव मात्राऽक्षयं कृतम् । त्वया पुत्रेण सर्वत्र नातः परतरं कृतम् ॥ १५३
त्वत्प्रतापभयात्स्वर्गाच्च्युतांस्त्वं पातुमर्हसि । कांदिशीकांस्तव भयादमरांस्त्रातुमर्हसि ॥
नाऽऽर्तत्राणादभ्यधिकं सुकृतं क्वापि विद्यते ॥ १५४

यावद्यशः स्फुरति चारु मनुष्यलोके अहानि तावन्ति दिवं गतस्य ।
दिने दिने वर्षसंख्या(ख्यं) परस्मिँल्लोके वासो जायते निर्विकारः ॥ १५५
मृतास्त एवात्र यशो न येषामन्धास्त एव श्रुतवर्जिता ये ।
ये दानशीला न नपुंसकास्ते ये धर्मशीला न त एव शोच्याः ॥ १५६

ब्रह्मोवाच—

भाषितं देवदेवस्य श्रुत्वा[1] शान्तोऽभवन्मुनिः । कृताञ्जलिपुटो भूत्वा नत्वा नाथमथाब्रवीत् ॥

पिप्पलाद उवाच—

वाग्भिर्मनोभिः कृतिभिः कदाचिन्ममोपकुर्वन्ति हिते रता ये ।
तेभ्यो हितार्थं त्विह चापरेषां सोमं नमस्यामि सुरादिपूज्यम् ॥ १५८
संरक्षितो[2] यैरभिवर्धितश्च समानगोत्रश्च समानधर्मा ।
तेषामभीष्टानि शिवः करोतु बालेन्दुमौलिं प्रणतोऽस्मि नित्यम् ॥ १५९
यैरहं वर्धितो नित्यं मातृवत्पितृवत्प्रभो । तन्नाम्ना जायतां तीर्थं देवदेव जगत्त्रये ॥ १६०
यशस्तु तेषां भविता तेभ्योऽहमनृणस्ततः । यानि क्षेत्राणि देवानां यानि तीर्थानि भूतले १६१
तेभ्यो यदिदमधिकमनुमन्यन्तु देवताः । ततः क्षमेऽहं देवानामपराधं निरञ्जनः ॥ १६२

---

१ घ. °देवेन श्रु° । २ घ. उत्पादितो ।

ब्रह्मोवाच—

ततः समक्षं सुरसाक्षरां गिरं सहस्रचक्षुःप्रमुखांस्तथाऽग्रतः ।
उवाच देवा अपि मेनिरे वचो दधीचिपुत्रोदितमादरेण ॥ १६३
बालस्य बुद्धिं विनयं च विद्यां शौर्यं बलं साहसं सत्यवाचम् ।
पित्रोर्भक्तिं भावशुद्धिं विदित्वा तदाऽवादीच्छंकरः पिप्पलादम् ॥ १६४

शंकर उवाच—

वत्स यद्वै प्रियं कामं यच्चापि सुरवल्लभम् । प्राप्स्यसे वद कल्याणं नान्यथा त्वं मनः कृथाः॥

पिप्पलाद उवाच—

ये गङ्गायामाप्लुता धर्मनिष्ठाः संपश्यन्ति त्वत्पदाब्जं महेश ।
सर्वान्कामानाप्नुवन्तु प्रसह्य देहान्ते ते पदमायान्तु शैवम् ॥ १६६
तातः प्राप्तस्त्वत्पदं चाम्बिका मे नाथ प्राप्ता पिप्पलश्चामराश्च ।
सुखं प्राप्ता नाथनाथं विलोक्य त्वां पश्येयुस्त्वत्पदं ते प्रयान्तु ॥ १६७

ब्रह्मोवाच—

तथेत्युक्त्वा पिप्पलादं देवदेवो महेश्वरः । अभिनन्द्य च तं देवैः सार्धं वाक्यमथाब्रवीत् ॥१६८
देवा अपि मुदा युक्ता निर्भयास्तत्कृताद्भयात्[1] । इदमूचुः सर्व एव दाधीचं शिवसंनिधौ ॥१६९

देवा ऊचुः—

सुराणां यदभीष्टं च त्वया कृतमसंशयम् । पालिता देवदेवस्य आज्ञा त्रैलोक्यमण्डनी ॥ १७०
याचितं च त्वया पूर्वं परार्थं नाऽऽत्मने द्विज । तस्मादन्यतमं ब्रूहि किंचिद्दास्यामहे वयम् ॥

ब्रह्मोवाच—

पुनः पुनस्तदेवोचुः सुरसंघा द्विजोत्तमम् । कृताञ्जलिपुटः पूर्वं नत्वा शंभुसुरानिदम् ॥
उवाच पिप्पलादश्च उमां नत्वा च पिप्पलान् ॥ १७२

पिप्पलाद उवाच—

पितरौ द्रष्टुकामोऽस्मि सदा मे शब्दगोचरौ । ते धन्याः प्राणिनो लोके मातापित्रोर्वशे स्थिताः
शुश्रूषणपरा नित्यं तत्पादाज्ञाप्रतीक्षकाः* । इन्द्रियाणि शरीरं च कुलं शक्तिं धियं वपुः १७४
परिलभ्य तयोः कृत्ये[2] कृतकृत्यो भवेत्स्वयम् । पशूनां पक्षिणां चापि सुलभं मातृदर्शनम् ॥१७५
दुर्लभं मम तच्चापि पृच्छे पापफलं नु किम् । दुर्लभं च तथा चेत्स्यात्सर्वेषां यस्य कस्यचित् ॥
नोपपद्येत सुलभं मत्तो नान्योऽस्ति पापकृत् । तयोर्दर्शनमात्रं च यदि प्राप्स्ये सुरोत्तमाः ॥
मनोवाक्कायकर्मभ्यः फलं प्राप्तं भविष्यति । पितरौ ये न पश्यन्ति समुत्पन्ना न(स्तु) संस्तौ ॥
तेषां महापातकानां कः संख्यां कर्तुमीश्वरः ॥ १७८

ब्रह्मोवाच—

तदृषेर्वचनं श्रुत्वा मिथः संमन्त्र्य ते सुराः । विमानवरमारूढौ पितरौ दंपती शुभौ ॥ १७९

---

* एतदग्रे घ. पुस्तके—'ये न कुर्वन्ति शुश्रूषां मातापित्रोरनुव्रताः । तानालोक्य रविद्रष्टुः सूर्यान्तरमपेक्ष्यते' इत्यधिकः श्लोको विद्यते ।

---

१ घ. °भयाः शंकराज्ञया । इ° । २ घ. °त्ये नोपयोगि निरर्थकम् ।

तव संदर्शनाकाङ्क्षौ द्रक्ष्यसे वाऽद्य निश्चितम् । विषादं लोभमोहौ च त्यक्त्वा चित्तं शमं नय
पश्य पश्येति तं प्राहुर्दधीचं सुरसत्तमाः । विमानवरमारूढौ स्वर्गिणौ स्वर्णभूषणौ ॥ १८१
तव संदर्शनाकाङ्क्षौ पितरौ दंपती शुभौ । वीज्यमानौ सुरस्त्रीभिः स्तूयमानौ च किंनरैः १८२
दृष्ट्वा स मातापितरौ ननाम शिवसंनिधौ । हर्षबाष्पाश्रुनयनो स कथंचिदुवाच तौ ॥ १८३

पुत्र उवाच—

तारयन्त्येव पितरावन्ये पुत्राः कुलोद्वहाः । अहं तु मातुरुदरे केवलं भेदकारणम् ॥
एवंभूतोऽपि तौ मोहात्पश्येयमतिदुर्मतिः ॥ १८४

ब्रह्मोवाच—

तावालोक्य ततो दुःखाद्वक्तुं नैव शशाक सः । देवाश्च मातापितरौ पिप्पलादमथाब्रुवन् ॥१८५

देवा ऊचुः—

धन्यस्त्वं पुत्र लोकेषु यस्य कीर्तिर्गता दिवम्।साक्षात्कृतस्त्वया त्र्यक्षो देवाश्चाऽऽश्वासितास्त्वया
त्वया पुत्रेण सल्लोका न क्षीयन्ते कदाचन ॥ १८६

ब्रह्मोवाच—

पुष्पवृष्टिस्तदा स्वर्गात्पपात तस्य मूर्धनि । जयशब्दः सुरैरुक्तः प्रादुर्भूतो महामुने ॥ १८७
आशिषं तु सुते दत्त्वा दधीचिः सह भार्यया । शंभुं गङ्गां सुरान्नत्वा पुत्रं वाक्यमथाब्रवीत्१८८

दधीचिरुवाच—

प्राप्य भार्यां शिवे भक्तिं कुरु गङ्गां च सेवय । पुत्रानुत्पाद्य विधिवद्यज्ञानिष्ट्वा सदक्षिणान् ॥
कृतकृत्यस्ततो वत्स आक्रमस्व चिरं दिवम् ॥ १८९

ब्रह्मोवाच—

करोम्येवमिति प्राह दधीचिं पिप्पलाशनः । दधीचिः पुत्रमाश्वास्य भार्यया च पुनः पुनः ॥
अनुज्ञातः सुरगणैः पुनः स दिवमाक्रमत् । देवा अप्यूचिरे सर्वे पिप्पलादं ससंभ्रमाः ॥ १९१

देवा ऊचुः—

कृत्यां शमय भद्रं ते तदुत्पन्नं महानलम् ॥ १९२

ब्रह्मोवाच—

पिप्पलादस्तु तानाह न शक्तोऽहं निवारणे । असत्यं नैव वक्ताऽहं यूयं कृत्यां तु ब्रूत ताम् १९३
मां दृष्ट्वा सा महारौद्रा विपरीतं करिष्यति । तामेव गत्वा विबुधाः प्रोचुस्ते शान्तिकारणम् ॥
अनलं च यथाप्रीति ते उभे नेत्यवोचताम् । सर्वेषां भक्षणायैव सृष्टा चाहं द्विजन्मना ॥ १९५
तथाच मत्प्रसूतोऽग्निरन्यथा तत्कथं भवेत् । महाभूतानि पञ्चापि स्थावरं जङ्गमं तथा ॥ १९६
सर्वमस्मन्मुखे विद्याद्वक्तव्यं नावशिष्यते । मया संमन्त्र्य ते देवाः पुनरूचुरुभावपि ॥ १९७
भक्षयेतामुभौ सर्वं यथानुक्रमतस्तथा । वडवाऽपि सुरानेवमुवाच शृणु नारद ॥ १९८

वडवोवाच—

भवतामिच्छया सर्वं भक्ष्यं मे सुरसत्तमाः ॥ १९९

---

१ ध. °म सुरसं ।

ब्रह्मोवाच—

वडवा सा नदी जाता गङ्गया संगता मुने। तद्भवस्तु महानग्निर्य आसीदतिभीषणः ॥
तमाहुरमरा वह्निं भूतानामादितो विदुः ॥ २००

सुरा ऊचुः—

आपो ज्येष्ठतमा ज्ञेयास्तथैव प्रथमं भवान्। तत्राप्यपांपतिं ज्येष्ठं समुद्र(तिर्ज्येष्ठस्तस्य त्व)मशनं कुरु
[1]यथैव तु वयं ब्रूमो गच्छ भुङ्क्ष्व यथासुखम् ॥ २०१

ब्रह्मोवाच—

अनलस्त्वमरानाह आपस्तत्र कथं त्वहम्। व्रजेयं यदि मां तत्र प्रापयन्त्युदकं महत् ॥ २०२
भवन्त एव तेऽप्याहुः कथं तेऽग्ने गतिर्भवेत्। अग्निरप्याह तान्देवान्कन्या मां गुणशालिनी२०३
हिरण्यकलशे स्थाप्य नयेद्यत्र गतिर्मम। तस्य तद्वचनं श्रुत्वा कन्यामूचुः सरस्वतीम् ॥ २०४

देवा ऊचुः—

[2]नयैनमनलं शीघ्रं शिरसा वरुणालयम् ॥ २०५

ब्रह्मोवाच—

सरस्वती सुरानाह नैका शक्ता च धारणे। युक्ता चतसृभिः शीघ्रं वहेयं वरुणालयम् ॥ २०६
सरस्वत्या वचः श्रुत्वा गङ्गां च यमुनां तथा। नर्मदां तपतीं चैव सुराः प्रोचुः पृथक्पृथक् २०७
ताभिः समन्वि[3]तोवाह हिरण्यकलशेऽनलम्। *संस्थाप्य शिरसाऽऽधार्य ता जग्मुर्वरुणालयम् ॥
[+संस्थाप्य यत्र देवेशः सोमनाथो जगत्पतिः। अध्यास्ते विबुधैः सार्धं प्रभासे शशिभूषणः ॥
प्रापया[4]मासुरनलं पञ्चनद्यः सरस्वति। अध्यास्ते च महानग्निः पिबन्वारि शनैः शनैः] २१०
ततः सुरगणाः सर्वे शिवमूचुः सुरोत्तमम् ॥ २११

देवा ऊचुः—

अस्थ्नां च पावनं ब्रूहि अस्माकं च गवां तथा ॥ २१२

ब्रह्मोवाच—

शिवः प्राह तदा सर्वान्गङ्गामाप्लुत्य यत्नतः। देवाश्च गावस्तत्पापान्मुच्यन्ते नात्र संशयः २१३
प्रक्षालितानि चास्थीनि ऋषिदेहभवान्यथ। तानि प्रक्षालनादेव तत्र प्राप्तानि पूतताम् ॥ २१४
यत्र देवा मुक्तपापास्तत्तीर्थं पापनाशनम्। तत्र स्नानं च दानं च ब्रह्महत्याविनाशनम् ॥ २१५
गवां च पावनं यत्र गोतीर्थं तदुदाहृतम्। तत्र स्नानान्महाबुद्धिर्गोमेधफलमाप्नुयात् ॥ २१६
यत्र तद्ब्राह्मणास्थीनि आसन्पुण्यानि नारद। पितृतीर्थं तु वै ज्ञेयं पितॄणां प्रीतिवर्धनम् ॥ २१७
भस्मास्थिनखरोमाणि प्राणिनो यस्य कस्यचित्। तत्र तीर्थे संक्रमेरन्यावच्चन्द्रार्कतारकम्॥ २१८
स्वर्गे वासो भवेत्तस्य अपि दुष्कृतकर्मणः। तथा चक्रेश्वरात्तीर्थात्त्रीणि तीर्थानि नारद ॥
ततः पूताः सुरगणा गावः शंभुमथाब्रुवन् ॥ २१९

गोसुरा ऊचुः—

यामः स्वं स्वमधिष्ठानमत्र सूर्यः प्रतिष्ठितः। अस्मिन्स्थिते दिनकरे सुराः सर्वे प्रतिष्ठिताः॥२२०

* इदमर्धं घ. पुस्तके नास्ति। + धनुश्चिह्नान्तर्गतः पाठो ङ. पुस्तके नास्ति।

१ क. ङ. तथैव। २ घ. नय त्वम°। ३ घ. °न्विता वाचा हि°। ४ घ. °मास वारीशं पञ्चनद्या सरस्वती अ°।
५ घ. मध्यतः।

भवेयुर्जगतामीश तदनुज्ञातुमर्हसि । सूर्यो ह्यात्माऽस्य जगतस्तस्थुषश्च सनातनः ॥ २२१
दिवाकरो देवमयस्तत्रास्माभिः प्रतिष्ठितः । यत्र गङ्गा जगद्धात्री यत्र वै त्र्यम्बकः स्वयम् ॥
सुरवासं प्रतिष्ठानं भवेद्यत्र च त्र्यम्बकम् ॥ २२२

ब्रह्मोवाच—

आपृच्छ्य पिप्पलादं तं सुराः स्वं सदनं ययुः । पिप्पलाः कालपर्याये स्वर्गं जग्मुरथाक्षयम् ॥
पादपानां पदं विप्रः पिप्पलादः प्रतापवान् । क्षेत्राधिपत्ये संस्थाप्य पूजयामास शंकरम् ॥२२४

दधीचिसूनुर्मुनिरुग्रतेजा अवाप्य भार्यां गौतमस्याऽऽत्मजां च ।
पुत्रानथावाप्य श्रियं यशश्च सुहृज्जनैः स्वर्गमवाप धीरः ॥ २२५

ततः प्रभृति तत्तीर्थं पिप्पलेश्वरमुच्यते । सर्वक्रतुफलं पुण्यं स्मरणादघनाशनम् ॥ २२६
किं पुनः स्नानदानाभ्यामादित्यस्य तु दर्शनात् । चक्रेश्वरः पिप्पलेशो देवदेवस्य नामनी॥२२७
सरहस्यं विदित्वा तु सर्वकामानवाप्नुयात् । सूर्यस्य च प्रतिष्ठानात्सुरवासे प्रतिष्ठिते ॥
प्रतिष्ठानं तु तत्क्षेत्रं सुराणामपि वल्लभम् ॥ २२८

इतीदमाख्यानमतीव पुण्यं पठेत वा यः शृणुयात्स्मरेद्वा ।
स दीर्घजीवी धनवान्धर्मयुक्तश्चान्ते स्मरञ्शंभुमुपैति नित्यम् ॥ २२९

इति श्रीमहापुराणे आदिब्राह्मे चक्रेश्वरपिप्पलेश्वरपापप्रणाशनगोतीर्थपितृतीर्थसूर्यप्रतिष्ठान-
कोट्यादितीर्थवर्णनं नाम दशाधिकशततमोऽध्यायः ॥ ११० ॥

गौतमीमाहात्म्य एकचत्वारिंशत्तमोऽध्यायः ॥ ४१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६४३७

अथैकादशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

नागतीर्थमिति ख्यातं सर्वकामप्रदं शुभम् । यत्र नागेश्वरो देवः शृणु तस्यापि विस्तरम् ॥ १
प्रतिष्ठानपुरे राजा शूरसेन इति श्रुतः । सोमवंशभवः श्रीमान्मतिमान्गुणसागरः ॥ २
पुत्रार्थं स महायत्नमकरोत्प्रियया सह । तस्य पुत्रश्चिरादासीत्सर्पो वै भीषणाकृतिः ॥ ३
पुत्रं तं गोपयामास शूरसेनो महीपतिः । राज्ञः पुत्रः सर्प इति न कश्चिद्विन्दते जनः ॥ ४
अन्तर्वर्ती परो वाऽपि मातरं पितरं विना । धात्रेय्यपि न जानाति नामात्यो न पुरोहितः ॥ ५
तं दृष्ट्वा भीषणं सर्पं सभार्यो नृपसत्तमः । संतापं नित्यमाप्नोति सर्पाद्वरमपुत्रता ॥ ६
एतदस्ति महासर्पो वक्ति नित्यं मनुष्यवत् । स सर्पः पितरं प्राह कुरु चूडामपि क्रियाम् ॥ ७
तथोपनयनं चापि वेदाध्ययनमेव च । यावद्वेदं न चाधीते तावच्छूद्रसमो द्विजः ॥ ८

ब्रह्मोवाच—

एतच्छ्रुत्वा पुत्रवचः शूरसेनोऽतिदुःखितः । ब्राह्मणं कंचनाऽऽनीय संस्कारादि तदाऽकरोत् ॥
अधीतवेदः सर्पोऽपि पितरं चाब्रवीदिदम् ॥ ९

---

१ घ. °वासः प्र° । ङ. °वारां प्र° । २ घ. परं । ३ घ. °नाभ्यां देवदेवस्य द° । ४ घ. °त्रेयी काऽपि जा° । ५ ङ. संतोषं नित्यं नाऽऽप्नो° । ६ घ. °डादिकी क्रि° । ७ क. °मणिक्रियाः । त° । ८ ङ. °स्कारांश्च तथाऽक° । ९ घ. °रं ह्यब्रवीद्वहः । विवाहकर्म हे तात मम त्वं कुरु निर्भयः । अ° ।

सर्प उवाच—

विवाहं कुरु मे राजन्स्त्रीकामोऽहं नृपोत्तम । अन्यथाऽपि च कृत्यं ते न सिध्येदिति मे मतिः १०

जनयित्वाऽऽत्मजान्वेदविधिनाऽखिलसंस्कृतीः । न कुर्याद्यः पिता तस्य नरकान्नास्ति निष्कृतिः

ब्रह्मोवाच—

विस्मितः स पिता प्राह सुतं तमुरगाकृतिम् ॥ १२

शूरसेन उवाच—

यस्य शब्दादपि त्रासं यान्ति शूराश्च पूरुषाः । तस्मै कन्यां तु को दद्याद्वद पुत्र करोमि किम् ॥

ब्रह्मोवाच—

तत्पितुर्वचनं श्रुत्वा सर्पः प्राह विचक्षणः ॥ १४

सर्प उवाच—

विवाहा बहवो राजन्राज्ञां सन्ति जनेश्वर । प्रसह्याऽऽहरणं चापि शस्त्रैर्वैवाह एव च ॥ १५

जाते विवाहे पुत्रस्य पिताऽसौ कृतकृद्भवेत् । नो चेदत्रैव गङ्गायां मरिष्ये नात्र संशयः ॥ १६

ब्रह्मोवाच—

तत्पुत्रनिश्चयं ज्ञात्वा अपुत्रो नृपसत्तमः । विवाहार्थममात्यांस्तानाहूयेदं वचोऽब्रवीत् ॥ १७

शूरसेन उवाच—

नागेश्वरो मम सुतो युवराजो गुणाकरः । गुणवान्मतिमाञ्शूरो दुर्जयः शत्रुतापनः ॥ १८

रथे नागे स धनुषि पृथिव्यां नोपमीयते । विवाहस्तस्य कर्तव्यो ह्यहं वृद्धस्तथैव च ॥ १९

राज्यभारं सुते न्यस्य निश्चिन्तोऽहं भवाम्यतः । न दारसंग्रहो यावत्तावत्पुत्रो मम प्रियः ॥ २०

बालभावं नो जहाति तस्मात्सर्वेऽनुमन्य च । विवाहायाथ कुर्वन्तु यत्नं मम हिते रताः ॥ २१

न मे काचित्तदा चिन्ता कृतोद्वाहो यदाऽऽत्मजः । सुते न्यस्तभरा यान्ति कृतिनस्तपसे वनम्

ब्रह्मोवाच—

अमात्या राजवचनं श्रुत्वा सर्वे विनीतवत् । ऊचुः प्राञ्जलयो हर्षाद्राजानं भूरितेजसम् ॥ २३

अमात्या ऊचुः—

तव पुत्रो गुणज्येष्ठस्त्वं च सर्वत्र विश्रुतः । विवाहे तव पुत्रस्य किं मन्त्र्यं किंतु चिन्त्यते ॥ २४

ब्रह्मोवाच—

अमात्येषु तथोक्तेषु गम्भीरो नृपसत्तमः । पुत्रं सर्पं त्वमात्यानां न चाऽऽख्याति न ते विदुः २५

राजा पुनस्तानुवाच का स्यात्कन्या गुणाधिका । महावंशभवः श्रीमान्को राजा स्याद्गुणाश्रयः॥

संबन्धयोग्यः शूरश्च यत्संबन्धः प्रशस्यते । तद्राजवचनं श्रुत्वा अमात्यानां महामतिः ॥ २७

कुलीनः साधुरत्यन्तं राजकार्यहिते रतः । राज्ञो मतिं विदित्वा तु इङ्गितज्ञोऽब्रवीदिदम् ॥ २८

अमात्य उवाच—

पूर्वदेशे महाराज विजयो नाम भूपतिः । वाजिवारणरत्नानां यस्य संख्या न विद्यते ॥ २९

---

१ क. ङ. °था पितृकृत्यं मे न । २ घ. °ह त्वं सर्पो ह्यतिभीषणः । य° । ३ ङ. मानवाः । ४ ङ. °त्वा स पुत्री नृ° । ५ घ. च । ६ ङ. °हार्थं प्रकु° । ७ घ. न्यस्य भुवो या° । ८ घ. पुत्ररूपं त्व° । ९ क. °च कस्य कन्या । १० घ. °शधरः श्री° । ११ घ. °णाधिकः । सं° । १२ घ. °त्वाऽथ इ° ।

अष्टौ पुत्रा महेष्वासा महाराजस्य धीमतः । तेषां स्वसा भोगवती साक्षाल्लक्ष्मीरिवापरा ॥
तव पुत्रस्य योग्या सा भार्या राजन्मयोदिता[1] ॥ ३०

ब्रह्मोवाच—

वृद्धामात्यवचः श्रुत्वा राजा तं प्रत्यभाषत ॥ ३१

राजोवाच—

सुता तस्य कथं मेऽस्य सुतस्य स्याद्वदस्व तत् ॥ ३२

वृद्धामात्य उवाच—

लक्षितोऽसि [2]महाराज यत्ते मनसि वर्तते[3] । यच्छूरसेन कृत्यं स्यादनुजानीहि मां ततः ॥ ३३

ब्रह्मोवाच—

वृद्धामात्यवचः श्रुत्वा भूषणाच्छादनोक्तिभिः । संपूज्य प्रेषयामास महत्या सेनया सह[4] ॥ ३४
स पूर्वदेशमागत्य महाराजं समेत्य च । संपूज्य विविधैर्वाक्यैरुपायैर्नातिसंभवैः ॥ ३५
महाराजसुतायाश्च भोगवत्या महामतिः । शूरसेनस्य नृपतेः सूनोर्नागस्य धीमतः ॥ ३६
विवाहायाकरोत्संधिं मिथ्यामिथ्यावचोक्तिभिः । पूजयामास नृपतिं भूषणाच्छादनादिभिः ३७
अवाप्य पूजां नृपतिर्ददामीत्यवदत्तदा । तत आगत्य राज्ञेऽसौ वृद्धामात्यो महामतिः ॥ ३८
शूरसेनाय तद्वृत्तं वैवाहिकमवेदयत् । ततो बहुतिथे काले वृद्धामात्यो महामतिः ॥ ३९
पुनर्बलेन महता वस्त्रालंकारभूषितः । जगाम तरसा सर्वैरन्यैश्च सचिवैर्वृतः ॥ ४०
विवाहाय महामात्यो महाराजाय[5] बुद्धिमान् । सर्वं प्रोवाच वृद्धोऽसावमात्यः सचिवैर्वृतः ॥ ४१

वृद्धामात्य उवाच—

अत्राऽऽगन्तुं न चाऽऽया(चेच्छ)ति शूरसेनस्य भूपतेः । पुत्रो नाग इति ख्यातो बुद्धिमान्गुणसागरः[6]
क्षत्रियाणां विवाहाश्च भवेयुर्बहुधा नृप । तस्माच्छस्त्रैरलंकारैर्विवाहः स्यान्महामते ॥ ४३
क्षत्रिया ब्राह्मणाश्चैव सत्यां वाचं वदन्ति हि । तस्माच्छस्त्रैरलंकारैर्विवाहस्त्वनुमन्यताम् ॥ ४४

ब्रह्मोवाच—

वृद्धामात्यवचः श्रुत्वा विजयो राजसत्तमः । मेने वाक्यं तथा[7] सत्यममात्यं भूपतिं[8] तदा ॥ ४५
विवाहमकरोद्राजा भोगवत्याः सविस्तरम् । शस्त्रेण च यथाशास्त्रं प्रेषयामास तां पुनः ॥ ४६
स्वानमात्यांस्तथा गाश्च हिरण्यतुरगादिकम् । बहु दत्त्वाऽथ विजयो हर्षेण महता युतः ॥ ४७
तामादायाथ सचिवा वृद्धामात्यपुरोगमाः । प्रतिष्ठानमथाभ्येत्य शूरसेनाय तां स्नुषाम् ॥ ४८
न्यवेदयंस्तथोचुस्ते विजयस्य वचो बहु । भूषणानि विचित्राणि दास्यो वस्त्रादिकं च यत् ॥४९
निवेद्य शूरसेनाय कृतकृत्या बभूविरे । विजयस्य तु येऽमात्या भोगवत्या सहाऽऽगताः ॥ ५०
तान्पूजयित्वा राजाऽसौ बहुमानपुरःसरम् । विजयाय यथा प्रीतिस्तथा कृत्वा व्यसर्जयत् ॥५१
विजयस्य सुता बाला रूपयौवनशालिनी । श्वश्रूश्वशुरयोर्नित्यं शुश्रूषन्ती सुमध्यमा ॥ ५२
भोगवत्याश्च यो भर्ता महासर्पोऽतिभीषणः । एकान्तदेशे विजने गृहे रत्नसुशोभिते ॥ ५३
सुगन्धकुसुमाकीर्णे तत्राऽऽस्ते सुखशीतले । स सर्पो मातरं प्राह पितरं च पुनः पुनः ॥ ५४
मम भार्या राजपुत्री किं मां नैवोपसर्पति । तत्पुत्रवचनं श्रुत्वा सर्पमातेदमब्रवीत् ॥ ५५

---

१ क. ङ. °दितम् । वृ° । २ घ. मया राजन्यत्ते । ३ घ. °ते । क्रियते तच्छूरसेन चानु° । ४ घ. °ह । सोऽगाच्छनैः पूर्वदेशं म° । ५ घ. विजयाय । ६ ङ. °मान्स गुणाकरः । ७ घ. तत्र सत्यं मत्वा वृद्धस्य भूपतिः । वि° । ८ ङ. °पतिस्तदा ।

राजपत्न्युवाच—

धात्रिके गच्छ सुभगे शीघ्रं भोगवतीं वद। तव भर्ता सर्प इति ततः सा किं वदिष्यति॥ ५६

ब्रह्मोवाच—

धात्रिका च तथेत्युक्त्वा गत्वा भोगवतीं तदा। रहोगता उवाचेदं विनीतवदपूर्ववत्॥ ५७

धात्रिकोवाच—

जानेऽहं सुभगे भद्रे भर्तारं तव दैवतम्। न चाऽऽख्येयं त्वया क्वापि सर्पो न पुरुषो ध्रुवम्॥५८

ब्रह्मोवाच—

तस्यास्तद्वचनं श्रुत्वा भोगवत्यब्रवीदिदम्॥ ५९

भोगवत्युवाच—

मानुषीणां मनुष्यो हि भर्ता सामान्यतो भवेत्। किं पुनर्देवजातिस्तु भर्ता पुण्येन लभ्यते॥६०

ब्रह्मोवाच—

भोगवत्यास्तु तद्वाक्यं सा च सर्वं न्यवेदयत्। सर्पाय सर्पमात्रे च राज्ञे चैव यथाक्रमम्॥ ६१

रुरोद राजा तद्वाक्यात्स्मृत्वा तां कर्मणो गतिम्। भोगवत्यपि तां प्राह उक्तपूर्वा पुनः सखीम्॥

भोगवत्युवाच—

कान्तं दर्शय भद्रं ते वृथा याति वयो मम॥ ६३

ब्रह्मोवाच—

ततः सा दर्शयामास सर्पं तमतिभीषणम्। सुगन्धकुसुमाकीर्णे शयने सा रहोगता॥ ६४

तं दृष्ट्वा भीषणं सर्पं भर्तारं रत्नभूषितम्। कृताञ्जलिपुटा वाक्यमवदत्कान्तमञ्जसा॥ ६५

भोगवत्युवाच—

धन्याऽस्म्यनुगृहीताऽस्मि यस्या मे दैवतं पतिः॥ ६६

ब्रह्मोवाच—

इत्युक्त्वा शयने स्थित्वा तं सर्पं सर्पभावनैः[2][3]। खेलयामास तन्वङ्गी गीतैश्चैवाङ्गसंगमैः॥ ६७

सुगन्धकुसुमैः पानैस्तोषयामास तं पतिम्। तस्याश्चैव प्रसादेन सर्पस्याभूत्स्मृतिर्मुने॥

स्मृत्वा सर्वं दैवकृतं रात्रौ सर्पोऽब्रवीत्प्रियाम्॥ ६८

सर्प उवाच—

राजकन्याऽपि मां दृष्ट्वा न भीताऽसि कथं प्रिये। सोवाच दैवविहितं कोऽतिक्रमितुमीश्वरः॥

पतिरेव गतिः स्त्रीणां सर्वदैव विशेषतः॥ ६९

ब्रह्मोवाच—

*श्रुत्वेति हृष्टस्तामाह नागः प्रहसिताननः॥ ७०

सर्प उवाच—

तुष्टोऽस्मि तव भक्त्याऽहं किं ददामि तवेप्सितम्। तव प्रसादाच्चार्वङ्गि सर्वस्मृतिरभूदियम्॥७१

शप्तोऽहं देवदेवेन कुपितेन पिनाकिना। महेश्वरकरे नागः शेषपुत्रो महाबलः॥ ७२

---

* एतदर्धस्थाने क. ङ. पुस्तकयोः 'ततः प्रसन्नो नागेन्द्रः प्राह भार्यां महामतिः' इत्यर्धं वर्तते।

---

१ ङ. °द्वाक्यकोविदा। भो°। २ घ. ङ. सर्वभा°। ३ ङ. °नैः। क्ष्वेल°।

सो[1]ऽहं पतिस्त्वं च भार्या नाम्ना भोगवती पुरा । उमावाक्याज्जहासोच्चैः शंभुः प्रीतो रहोगतः॥
ममापि चाऽऽग[2]तं भद्रे हास्यं तद्देवसंनिधौ । ततस्तु कुपितः शंभुः प्रादाच्छापं ममेदृशम् ॥ ७४

शिव उवाच—

मनुष्ययोनौ त्वं सर्पो भविता ज्ञानवानिति ॥ ७५

सर्प उवाच—

ततः प्रसादितः शंभुस्त्वया [3]भद्रे मया सह । ततश्चोक्तं तेन भद्रे गौतम्यां मम पूजनम् ॥ ७६
[5]कुर्वतो ज्ञानमाधास्ये यदा सर्पाकृतेस्तव । तदा विशापो भविता भोगवत्याः प्रसादतः ॥ ७७
तस्मादिदं ममाऽऽपन्नं तव चापि शुभानने । तस्मान्नीत्वा गौतमीं मां पूजां कुरु मया सह ॥ ७८
ततो विशापो भविता आवां यावः शिवं पुनः । सर्वेषां सर्वदाऽऽर्तानां शिव एव परा गतिः ॥

ब्रह्मोवाच—

[+तच्छ्रुत्वा भर्तृवचनं सा भर्त्रा गौतमीं ययौ । ततः स्नात्वा तु गौतम्यां पूजां चक्रे शिवस्य तु
ततः प्रसन्नो भगवान्दिव्यरूपं ददौ मुने] । [*आपृच्छ्य पितरौ सर्पो भार्यया गन्तुमुद्यतः ॥
शिवलोकं ततो ज्ञात्वा पिता प्राह म[11]हामतिः] ॥ ८१

पितोवाच—

युवराज्यधरो ज्येष्ठः पुत्र एको भवानिति । तस्माद्राज्यमशेषेण कृत्वोत्पाद्य सुतान्बहून् ॥
याते मयि परं धाम ततो याहि शिवं [12]पुरम् ॥ ८२

ब्रह्मोवाच—

एतच्छ्रुत्वा पितृवचस्तथेत्याह स नागराट् । कामरूपमवाप्याथ भार्यया सह सुव्रतः ॥ ८३
पित्रा मात्रा तथा पुत्रैः राज्यं कृत्वा सुविस्तरम् । याते पितरि स्वर्लोकं पुत्रान्स्थाप्य स्वके पदे
भार्यामात्यादिसहितस्ततः शिवपुरं ययौ । ततःप्रभृति तत्तीर्थं नागतीर्थ[14]मिति श्रुतम् ॥ ८५
[13]यत्र नागेश्वरो देवो भोगवत्या प्रतिष्ठितः । तत्र स्नानं च दानं च सर्वक्रतुफलप्रदम् ॥ ८६

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये नागतीर्थवर्णनं नामैकादशाधिक-
शततमोऽध्यायः ॥ १११ ॥

गौतमीमाहात्म्ये द्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६५२१

+धनुश्चिह्नान्तर्गतग्रन्थस्थाने घ. पुस्तके—'एतच्छ्रुत्वा भर्तृवाक्यं तथा चक्रे यथोदितम् । शूरसेनसुतः सर्पो दिव्यरूपधरोऽभवत्' इति श्लोको विद्यते । * एतच्चिह्नान्तर्गतग्रन्थस्थाने 'तत आगत्य पितरं भार्यया सह सुव्रतः । त्रिदिवं च प्रजाम्यद्य तदनुज्ञातुमर्हसि । तत्पुत्रवचनं श्रुत्वा पिता प्राह महामतिः' इत्यर्धत्रयं विद्यते ।

---

१ घ. °हं भद्रे त्वं च । २ घ. °तं तत्र हसितं देव° । ३ घ. चैव । ४ क. ङ. ह । पुनश्चो° । ५ क. ङ. कुरुतां । ६ घ. °र्वती सर्वभावेन सहभक्तिपुरःसरम् । त° । ७ क. °मापद्ये य° । ८ ङ. तदा । ९ क. ङ. °व । त्रि° । १० क. °ता वत्स भग° । ङ. °ता वत्स भो° । ११ घ. °हामनाः । त्वं मे रा° । १२ घ. परम् । १३ क. घ. तत्र । १४ घ. °र्वकामफ° ।

अथ द्वादशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

मातृतीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् । आधिभिर्मुच्यते जन्तुस्तत्तीर्थस्मरणादपि ॥ १
देवानामसुराणां च संगरोऽभूत्सुदारुणः । नाशक्नुवंस्तदा जेतुं देवा दानवसंगरम् ॥ २
तदा[1]ऽहमगमं देवैस्तिष्ठन्तं शूलपाणिनम् । अस्तवं विविधैर्वाक्यैः कृताञ्जलिपुटः शनैः ॥ ३

+संमन्त्र्य देवैरसुरैश्च सर्वैर्यदाऽऽहृतं संमथितुं समुद्रम् ।
यत्कालकूटं समभून्महेश तत्त्वां विना को ग्रसितुं समर्थः ॥ ४
*पुष्पप्रहारेण जगत्त्रयं यः स्वाधीनमापादयितुं समर्थः ।
मारो हरेऽप्यन्यसुरादिवन्द्यो वितायमानो विलयं प्रयातः ॥ ५
विमथ्य वारीशमनङ्गशत्रो यदुत्तमं तत्तु दिवौकसेभ्यः ।
+दत्त्वा विषं संहरन्नीलकण्ठ को वा धर्तुं त्वामृते वै समर्थः ॥ ६

ततश्च तुष्टो भगवानादिकर्ता त्रिलोचनः । ७

शिव उवाच—

दास्येऽहं यदभीष्टं वो ब्रुवन्तु सुरसत्तमाः ॥ ८

देवा ऊचुः—

दानवेभ्यो भयं घोरं तत्रैहि वृषभध्वज । जहि शत्रून्सुरान्पाहि नाथवन्तस्त्वया प्रभो ॥ ९
*निष्कारणः सुहृच्छंभो नाभविष्यद्भवान्यदि । तदाऽकरिष्यन्किमिव दुःखार्ताः सर्वदेहिनः ॥

ब्रह्मोवाच—

इत्युक्तस्तत्क्षणात्प्रायाद्यत्र ते देवशत्रवः । तत्र तद्युद्धमभवच्छंकरेण सुराद्विषाम् ॥ ११
ततस्त्रिलोचन[3]ः श्रान्तस्तमोरूपधरः शिवः । ललाटा[4]द्व्यपतंस्तस्य युध्यतः स्वेदबिन्दवः ॥ १२
स संहरन्दैत्यग[5]णांस्तामसीं मूर्तिमाश्रितः । तां मूर्तिमसुरा दृष्ट्वा मेरुपृष्ठाद्भुवं ययुः ॥ १३
स संहरन्सर्वदैत्यांस्तदाऽगच्छद्भुवं हरः । इतश्चेतश्च भीतास्तेऽधावन्सर्वां महीमिमाम् ॥ १४
तथैव कोपाद्रुद्रोऽपि शत्रूंस्ताननुधावति । तथैव युध्यतः शंभोः पतिताः स्वेदबिन्दवः ॥ १५
यत्र यत्र भुवं प्राप्तो बिन्दुर्माहेश्वरो मुने । तत्र तत्र शिवाकारा मातरो जज्ञिरे ततः ॥ १६
प्रोचुर्महेश्वरं सर्वाः खादामस्त्वसुरानिति । ततः प्रोवाच भगवान्सर्वैः सुरगणैर्वृतः ॥ १७

शिव उवाच—

स्वर्गाद्भुवमनुप्राप्ता राक्षसास्ते रसातलम् । अनुप्राप्तास्ततः सर्वाः शृण्वन्तु मम भाषितम् ॥ १८
यत्र यत्र द्विषो यान्ति तत्र गच्छन्तु मातरः । रसातलमनुप्राप्ता इदानीं मद्भयाद्द्विषः ॥
भवत्योऽप्यनुगच्छन्तु रसातलमनु द्विषः ॥ १९

+ अयं श्लोकः क. ङ. पुस्तकयोर्नास्ति । * एतच्छ्लोकस्थाने घ. पुस्तके—'कामोऽप्यसौ यद्विषमाक्षिभासा जज्वाल सद्यो मरुतां मनोभिः । नाथो हरस्त्वं च सुरा विदन्तो वितायमाना विलयं प्रयाताः' इति श्लोको विद्यते । + एतदर्धस्थाने क. ङ. पुस्तकयोः—'दत्त्वा विषं संहरतेति शोभां धत्ते महत्त्वं त्वयि निश्चितं तत्' । इत्यर्धं वर्तते । * अयं श्लोकः क. ङ. पुस्तकयोर्नास्ति ।

१ घ. °दाऽहं दैवतैः सार्धमगमं शू° । २ ङ. °प्रणोदेन ज° । ३ क. °नः स्विन्नस्त° । ४ क. °टादगमंस्त° । ङ. °टाद्व्यगमंस्त° । ५ घ. ङ. °दैत्यानथाग° ।

ब्रह्मोवाच—

ताश्च जग्मुर्भुवं भित्त्वा यत्र ते दैत्यदानवाः । तान्हत्वा मातरः सर्वा[1]न्देवारीनतिभीषणान् ॥२०
पुनर्देवानुपाजग्मुः पथा तेनैव मातरः । गताश्च मातरो यावद्यावच्च पुनरागताः ॥ २१
तावद्देवाः स्थिता आसन्गौतमीतीरमाश्रिताः । प्रस्थानात्तत्र मातॄणां सुराणां च प्रतिष्ठितेः २२
प्रतिष्ठानं तु तत्क्षेत्रं पुण्यं विजयवर्धनम् । मातॄणां यत्र चोत्पत्तिर्मातृतीर्थं पृथक्पृथक् ॥ २३
तत्र तत्र बिलान्यासन्रसातलगतानि च । सुरास्ताभ्यो व[2]रान्प्रोचुर्लोके पूजां यथा शिवः ॥२४
प्राप्नोति तद्वन्मातृभ्यः पूजा भवतु सर्वदा । इत्युक्त्वाऽन्तर्दधुर्देवा आसंस्तत्रैव मातरः ॥ २५
यत्र यत्र स्थिता देव्यो मातृतीर्थं[3] ततो विदुः । सुराणामपि सेव्यानि किं पुनर्मानुषादिभिः २६
तेषु स्नानमथो दानं पितॄणां चैव तर्प[4]णम् । सर्वं तदक्षयं ज्ञेयं शिवस्य वचनं य[5]था ॥ २७
यस्त्विदं शृणुयान्नित्यं स्मरेदपि पठेत्तथा । आख्यानं मातृतीर्थानामायुष्मान्स सुखी भवेत् ॥

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे देवतीर्थमातृतीर्थप्रतिष्ठानवर्णनं नाम द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

गौतमीमाहात्म्ये त्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६५४९

अथ त्रयोदशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

इदमप्यपरं तीर्थं देवानामपि दुर्लभम् । ब्रह्मतीर्थमिति ख्यातं भुक्तिमुक्तिप्रदं नृणाम् ॥ १
स्थितेषु देवसैन्येषु प्रविष्टेषु रसातलम् । दैत्येषु च मुनिश्रेष्ठ तथा मातृषु तानु ॥ २
मदीयं पञ्चमं वक्त्रं गर्दभाकृति भीषणम् । तद्वक्त्रं देवसैन्येषु मयि तिष्ठत्युवाच ह ॥ ३
[6]हे दैत्याः किं पलायन्ते न भयं वोऽस्तु सत्वरम् । आगच्छन्तु सुरान्सर्वान्भक्षयिष्ये क्षणादि[7]ति
निवारयन्तं मामेवं भक्षणायोद्य[8]तं तथा । तं दृष्ट्वा विबुधाः सर्वे वित्रस्ता विष्णुमब्रुवन् ॥ ५
त्राहि विष्णो जगन्नाथ ब्रह्मणोऽस्य मु[10]खं लुन । चक्रधृग्विबुधानाह च्छेद्मि चक्रे[11]ण वै शिरः ॥ ६
किं तु तच्छिन्नमेवे[12]दं संहरेत्सचराचरम् । मन्त्रं ब्रूमोऽत्र विबुधाः श्रूयतां सर्वमेव हि ॥ ७
त्रिनेत्रः कशिरश्छेत्ता स[13] च धत्ते न संशयः । मया च[14] शंभुः सर्वैश्च स्तुतः प्रोक्तस्तथैव च* ॥८
यागः क्षणी दृष्टफलेऽसमर्थः स नैव कर्तुः फलतीति मत्वा ।
फलस्य दाने प्रतिभूर्जटीति निश्चित्य लोकः प्रतिकर्म यातः ॥ ९
ततः सुरेशः संतुष्टो देवानां कार्यसिद्धये । लोकानामुपकारार्थं तथेत्याह सुरान्प्रति ॥ १०
तद्वक्त्रं पापरूपं यद्रौद्रं[9] लोमहर्षणम् । निकृत्य नखशस्त्रैश्च क स्थाप्यं चेत्यथाब्रवीत् ॥ ११

---

* एतदनन्तरं घ. पुस्तके—'शंभोरार्तपरित्राणे नोद्वेगस्तस्य कस्यचित्' इत्यर्धं दृश्यते ।

---

१ घ. °र्वा ननृतुस्ततपलशनाः । उपागमंस्ततो देवान्पथा तेनैव मातृकाः । हत्वा दैत्यान्रणे या° । २ क. ङ. °रान्दत्त्वा लोके । ३ घ. °र्थे पृथक्पृथक् । ४ °र्षु° । ४ घ. तथा । ५ क. घ. °ठेत वा । आ° । ६ ङ. हा । ७ घ. °च्छत सु° । ८ घ. °दिव । नि° । ९ क. °तं शिरः । तद्दृष्ट्वा । घ. °तं शिरः । तं । १० घ. °खं हर । मुरारिर्विबु° । ११ घ. °ण कस्य कम् । किं । १२ क. घ. °वं एव । १३ ङ. स च्छेत्स्यति न । १४ घ. च सर्वैर्देवैश्च ।

सवेला विबुधानाह नाहं वोढुं शिरः क्षमा । रसातलमथो यास्ये उदधिश्चाप्यथाब्रवीत् ॥ १२
शोषं यास्ये क्षणादेव पुनश्चोचुः शिवं सुराः । त्वयैवैतद्ब्रह्मशिरो धार्यं लोकानुकम्पया ॥ १३
अच्छेदे जगतां नाशश्छेदे दोषश्च तादृशः । एवं विमृश्य सोमेशो दधार कशिरस्तदा ॥ १४
तद्दृष्ट्वा दुष्करं कर्म गौतमीं प्राप्य पावनीम् । अस्तुवञ्जगतामीशं प्रणयाद्भक्तितः सुराः ॥ १५

देवेष्वमित्रं कशिरोऽतिभीमं तान्भक्षणायोपगतं निकृत्य ।
नखाग्रसूच्या शकलेन्दुमौलिस्त्यागेऽपि दोषात्कृपयाऽनुधत्ते ॥ १६

तत्र ते विबुधाः सर्वे स्थिता ये ब्रह्मणोऽन्तिके । तुष्टुवुर्विबुधेशानं कर्म दृष्ट्वाऽतिदैवतम् ॥ १७
ततः प्रभृति तत्तीर्थं ब्रह्मतीर्थमिति श्रुतम् । अद्यापि ब्रह्मणो रूपं चतुर्मुखमवस्थितम् ॥ १८
शिरोमात्रं तु यः पश्येत्स गच्छेद्ब्रह्मणः पदम् । यत्र स्थित्वा स्वयं रुद्रो लूनवान्ब्रह्मणः शिरः॥
रुद्रतीर्थं तदेव स्यात्तत्र साक्षाद्दिवाकरः । देवानां च स्वरूपेण स्थितो यस्मात्तदुत्तमम् ॥ २०
सौर्यं [१]तीर्थं तदाख्यातं सर्वक्रतुफलप्रदम् । तत्र स्नात्वा रविं दृष्ट्वा पुनर्जन्म न विद्यते ॥ २१
महादेवेन यच्छिन्नं ब्रह्मणः पञ्चमं शिरः । क्षेत्रेऽविमुक्ते संस्थाप्य देवतानां हितं कृतम् ॥ २२
ब्रह्मतीर्थे शिरोमात्रं यो दृष्ट्वा गौतमीतटे । क्षेत्रेऽविमुक्ते तस्यैव स्थापितं योऽनुपश्यति ॥
कपालं ब्रह्मणः पुण्यं ब्रह्महा पूततां व्रजेत् ॥ २३

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये ब्रह्मतीर्थब्रह्मशिरोलिङ्गशिवतीर्थसूर्यतीर्थादिषडशीतितीर्थवर्णनं नाम त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

गौतमीमाहात्म्ये चतुश्चत्वारिंशत्तमोऽध्यायः ॥ ४४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६५७२

अथ चतुर्दशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

अविघ्नं तीर्थमाख्यातं सर्वविघ्नविनाशनम् । तत्रापि वृत्तमाख्यास्ये शृणु नारद भक्तितः ॥ १
देवसत्रे प्रवृत्ते तु गौतम्याश्चोत्तरे तटे । समाप्तिर्नैव सत्रस्य संजाता विघ्नदोषतः ॥ २
ततः सुरगणाः सर्वे मामवोचन्हरिं तदा । ततो ध्यानगतोऽहं तानवोचं[३] वीक्ष्य कारणम् ॥ ३
विनायककृतैर्विघ्नैर्नैतत्सत्रं समाप्यते । तस्मात्स्तुवन्तु ते सर्वे आदिदेवं विनायकम् ॥ ४
तथेत्युक्त्वा सुरगणाः स्नात्वा ते गौतमीतटे । अस्तुवन्भक्तितो देवा आदिदेवं गणेश्वरम् ॥ ५

देवा ऊचुः—

यः सर्वकार्येषु सदा सुराणामपीशविष्ण्वम्बुजसंभवानाम् ।
पूज्यो नमस्यः परिचिन्तनीयस्तं विघ्नराजं शरणं व्रजामः ॥ ६
न विघ्नराजेन समोऽस्ति कश्चिद्देवो मनोवाञ्छितसंप्रदाता ।
निश्चित्य चैतत्त्रिपुरान्तकोऽपि तं पूजयामास वधे पुराणाम् ॥ ७

---

१ ङ. °तमीतीरमाश्रितम् । २ घ. तीर्थमिति ख्या° । ३ क. °चं कारणान्तरे । वि° ।

करोतु सोऽस्माकमविघ्नमस्मिन्महाक्रतौ सत्वरमाम्बिकेयः ।
ध्यातेन येनाखिलदेहभाजां पूर्णा भविष्यन्ति मनोभिलाषाः ॥ ८
महोत्सवोऽभूदखिलस्य देव्या जातः सुतश्चिन्तितमात्र एव ।
अतोऽवदन्सुरसंघाः कृतार्थाः सद्योजातं विघ्नराजं नमन्तः ॥ ९
यो मातुरुत्सङ्गगतोऽथ मात्रा निवार्यमाणोऽपि बलाच्च चन्द्रम् ।
संगोपयामास पितुर्जटासु गणाधिनाथस्य विनोद एषः ॥ १०
पपौ स्तनं मातुरथापि तृप्तो यो भ्रातृमात्सर्यकषायबुद्धिः ।
लम्बोदरस्त्वं भव विघ्नराजो लम्बोदरं नाम चकार शंभुः ॥ ११
संवेष्टितो देवगणैर्महेशः प्रवर्ततां नृत्यमितीत्युवाच ।
संतोषितो नूपुररावमात्राद्गणेश्वरत्वेऽभिषिषेच पुत्रम् ॥ १२
यो विघ्नपाशं च करेण बिभ्रत्स्कन्धे कुठारं च तथा परेण ।
अपूजितो विघ्नमथोऽपि मातुः करोति को विघ्नपतेः समोऽन्यः ॥ १३
धर्मार्थकामादिषु पूर्वपूज्यो देवासुरैः पूज्यत एव नित्यम् ।
यस्यार्चनं नैव विनाशमस्ति तं पूर्वपूज्यं प्रथमं नमामि ॥ १४
यस्यार्चनात्प्रार्थनयाऽनुरूपां दृष्ट्वा तु सर्वस्य फलस्य सिद्धिम् ।
स्वतन्त्रसामर्थ्यकृतातिगर्वं भ्रातृप्रियं त्वाखुरथं तमीडे ॥ १५
यो मातरं सरसैर्नृत्यगीतैस्तथाऽभिलाषैरखिलैर्विनोदैः ।
संतोषयामास तदाऽतितुष्टं तं श्रीगणेशं शरणं प्रपद्ये ॥ १६
सुरोपकारैरसुरैश्च युद्धैः स्तोत्रैर्नमस्कारपरैश्च मन्त्रैः ।
पितृप्रसादेन सदा समृद्धं तं श्रीगणेशं शरणं प्रपद्ये ॥ १७
जये पुराणामकरोत्प्रतीपं पित्राऽपि हर्षात्प्रतिपूजितो यः ।
निर्विघ्नतां चापि पुनश्चकार तस्मै गणेशाय नमस्करोमि ॥ १८

ब्रह्मोवाच—

इति स्तुतः सुरगणैर्विघ्नेशः प्राह तान्पुनः ॥ १९

गणेश उवाच—

इतो निर्विघ्नता सत्रे मत्तः स्यादसुरारिणः ॥ २०

ब्रह्मोवाच—

देवसत्रे निवृत्ते तु गणेशः प्राह तान्सुरान् ॥ २१

गणेश उवाच—

स्तोत्रेणानेन ये भक्त्या मां स्तोष्यन्ति यतव्रताः । तेषां दारिद्र्यदुःखानि न भवेयुः कदाचन ॥
अत्र ये भक्तितः स्नानं दानं कुर्युरतन्द्रिताः । तेषां सर्वाणि कार्याणि भवेयुरिति मन्यताम् २३

ब्रह्मोवाच—

तद्वाक्यसमकालं तु तथेत्यूचुः सुरा अपि । निवृत्ते तु मखे तस्मिन्सुरा जग्मुः स्वमालयम् ॥ २४

---

१ घ. °र्चने नै° । २ घ. ङ. विमानम° । ३ ङ. सुराप° । ४ घ. सर्वैः । ङ. युद्धे । ५ घ. °परैश्च । ६ ङ. °न्त्रैः । तमं प्र° ।

ततः प्रभृति तत्तीर्थमविघ्नमिति गद्यते । सर्वकामप्रदं पुंसां सर्वविघ्नविनाशनम् ॥ २५

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्येऽविघ्नतीर्थवर्णनं नाम
चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥
गौतमीमाहात्म्ये पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६५९७

अथ पञ्चदशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

शेषतीर्थमिति ख्यातं सर्वकामप्रदायकम् । तस्य रूपं प्रवक्ष्यामि यन्मया परिभाषितम् ॥ १
शेषो नाम महानागो रसातलपतिः प्रभुः । सर्वनागैः परिवृतो रसातलमथाभ्यगात् ॥ २
राक्षसा दैत्यदनुजाः प्रविष्टा ये रसातलम् । तैर्निरस्तो भोगिपतिर्मामुवाचाथ विह्वलः ॥ ३

शेष उवाच—

रसातलं त्वया दत्तं राक्षसानां ममापि च । ते मे स्थानं न दास्यन्ति तस्मात्त्वां शरणं गतः ॥ ४
ततोऽहमब्रवं नागं गौतमीं याहि पन्नग । तत्र स्तुत्वा महादेवं लप्स्यसे त्वं मनोरथम् ॥ ५
नान्योऽस्ति लोकत्रितये मनोरथसमर्पकः । मद्वाक्यप्रेरितो नागो गङ्गामाप्लुत्य यत्नतः ॥
कृताञ्जलिपुटो भूत्वा तुष्टाव त्रिदशेश्वरम् ॥ ६

शेष उवाच—

नमस्त्रैलोक्यनाथाय दक्षयज्ञविभेदिने । आदिकर्त्रे नमस्तुभ्यं नमस्त्रैलोक्यरूपिणे ॥ ७
नमः सहस्रशिरसे नमः संहारकारिणे । सोमसूर्याग्निरूपाय जलरूपाय ते नमः ॥ ८
सर्वदा सर्वरूपाय कालरूपाय ते नमः । पाहि शंकर सर्वेश पाहि सोमेश सर्वग ॥
जगन्नाथ नमस्तुभ्यं देहि मे मनसेप्सितम् ॥ ९

ब्रह्मोवाच—

ततो महेश्वरः प्रीतः प्रादान्नागेप्सितान्वरान् । विनाशाय सुरारीणां दैत्यदानवरक्षसाम् ॥ १०
शेषाय प्रददौ शूलं जघ्नेनारिपुंगवान् । ततः प्रोक्तः शिवेनासौ शेषः शूलेन भोगिभिः ॥ ११
रसातलमथो गत्वा निजघान रिपून्रणे । निहत्य नागः शूलेन दैत्यदानवराक्षसान् ॥ १२
न्यवर्तत पुनर्देवो यत्र शेषेश्वरो हरः । पथा येन समायातो देवं द्रष्टुं स नागराट् ॥ १३
रसातलाद्यत्र देवो बिलं तत्र व्यजायत । तस्माद्बिलतलाद्यातं गाङ्गं वार्यतिपुण्यदम् ॥ १४
तद्वारि गङ्गामगमद्गङ्गायाः संगमस्ततः । देवस्य पुरतश्चापि कुण्डं तत्र सुविस्तरम् ॥ १५
नागस्तत्राकरोद्धोमं यत्र चाग्निः सदा स्थितः । सोष्णं तदभवद्वारि गङ्गायास्तत्र संगमः ॥ १६
देवदेवं समाराध्य नागः प्रीतो महायशाः । रसातलं ततोऽभीष्टं शिवात्प्राप्य तलं ययौ ॥ १७
ततः प्रभृति तत्तीर्थं नागतीर्थमुदाहृतम् । सर्वकामप्रदं पुण्यं रोगदारिद्र्यनाशनम् ॥ १८
आयुर्लक्ष्मीकरं पुण्यं स्नानदानाच्च मुक्तिदम् । शृणुयाद्वा पठेद्भक्त्या यो वाऽपि स्मरते तु तत् ॥

---

१ घ. °मफलप्रदम् । २ घ. °द्गङ्गयोः सं° । ३ झ. ङ. °त्तीर्थमुष्णतीं° ।

तीर्थं शेषेश्वरो यत्र यत्र शक्तिप्रदः शिवः । एकविंशतितीर्थानामुभयोस्तत्र तीरयोः ॥
शतानि मुनिशार्दूल सर्वसंपत्प्रदायिनाम् ॥ २०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्य उभयतीरगतशेषतीर्थशेषेश्वरशूलेश्वराग्निकुण्डरसातल-गङ्गासंगमोष्णतीर्थाद्येकविंशतिशततीर्थवर्णनं नाम पञ्चदशाधिकशततमोऽध्यायः ॥११५॥

गौतमीमाहात्म्ये षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६६१७

अथ षोडशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

महानलमिति ख्यातं वडवानलमुच्यते । महानलो यत्र देवो वडवा यत्र सा नदी ॥ १
तत्तीर्थं पुत्र वक्ष्यामि मृत्युदोषजरापहम् । पुराऽऽसन्नैमिषारण्ये ऋषयः सत्रकारिणः ॥ २
शमितारं च ऋषयो मृत्युं चक्रुस्तपस्विनः । वर्तमाने सत्रयागे मृत्यौ शमितरि स्थिते ॥ ३
न ममार तदा कश्चिदुभयं स्थास्नु जङ्गमम् । विना पशून्मुनिश्रेष्ठ मर्त्यं चामर्त्यतां गतम् ॥ ४
ततस्त्रिविष्टपे शून्ये मर्त्ये चैवातिसंभृते । मृत्युनोपेक्षिते देवा राक्षसानूचिरे तदा ॥ ५

देवा ऊचुः—

गच्छध्वमृषिसत्रं तन्नाशयध्वं महाध्वरम् ॥

ब्रह्मोवाच—

इति देववचः श्रुत्वा प्रोचुस्ते राक्षसाः सुरान् ॥ ६

असुरा ऊचुः—

विध्वंसयामस्तं यज्ञमस्माकं किं फलं ततः । प्रवर्तते विना हेतुं न कोऽपि क्वापि जातुचित् ॥ ७

ब्रह्मोवाच—

देवा अप्यसुरानूचुर्यज्ञार्धं भवतामपि । भवेदेव ततो यान्तु ऋषीणां सत्रमुत्तमम् ॥ ८
ते श्रुत्वा त्वरिताः सर्वे यत्र यज्ञः प्रवर्तते । जग्मुस्तत्र विनाशाय देववाक्याद्विशेषतः ॥ ९
तज्ज्ञात्वा ऋषयो मृत्युमाहुः किं कुर्महे वयम् । आगता देववचनाद्राक्षसा यज्ञनाशिनः ॥ १०
मृत्युना सह संमन्त्र्य नैमिषारण्यवासिनः । सर्वे त्यक्त्वा स्वाश्रमं तं शमित्रा सह नारद ॥ ११
अग्निमात्रमुपादाय त्यक्त्वा पात्रादिकं तु यत् । क्रतुनिष्पत्तये[2] जग्मुर्गौतमीं प्रति सत्वराः ॥ १२
तत्र स्नात्वा महेशानं रक्षणायोपतस्थिरे । कृताञ्जलिपुटास्ते तु तुष्टुवुस्त्रिदशेश्वरम् ॥ १३

ऋषय ऊचुः—

यो लीलया विश्वमिदं चकार धाता विधाता भुवनत्रयस्य ।
यो विश्वरूपः सदसत्परो यः सोमेश्वरं तं शरणं व्रजामः ॥ १४

मृत्युरुवाच—

इच्छामात्रेण यः सर्वं हन्ति पाति करोति च । तमहं त्रिदशेशानं शरणं यामि शंकरम् ॥ १५

---

१ क. तत् । २ घ. ङ. निष्कृतये ।

महानलं महाकायं महानागविभूषणम् । महामूर्तिधरं देवं शरणं यामि शंकरम् ॥ १६

ब्रह्मोवाच—

ततः प्रोवाच भगवान्मृत्यो का प्रीतिरस्तु ते । १७

मृत्युरुवाच—

राक्षसेभ्यो भयं घोरमापन्नं त्रिदशेश्वर । यज्ञमस्मांश्च रक्षस्व यावत्सत्रं समाप्यते ॥ १८

ब्रह्मोवाच—

तथा चकार भगवांस्त्रिनेत्रो वृषभध्वजः । शमित्रा मृत्युना सत्रमृषीणां पूर्णतां ययौ ॥ १९

हविषां भागधेयाय आजग्मुरमराः क्रमात् । तानवोचन्मुनिगणाः संक्षुब्धा मृत्युना सह ॥ २०

ऋषय ऊचुः—

अस्मन्मखविनाशाय राक्षसाः प्रेषिता यतः । तस्माद्वध्याः पापिष्ठा राक्षसाः सन्तु शत्रवः २१

ब्रह्मोवाच—

ततः प्रभृति देवानां राक्षसा वैरिणोऽभवन् । कृत्यां च वडवां तत्र देवाश्च ऋषयोऽमलाः ॥२२

मृत्योर्भार्या भव त्वं तामित्युक्त्वा तेऽभ्यषेचयन् । अभिषेकोदकं यत्तु सा नदी वडवाऽभवत् ॥

मृत्युना स्थापितं लिङ्गं महानलमिति श्रुतम् । ततः प्रभृति तत्तीर्थं वडवासंगमं विदुः ॥ २४

महानलो यत्र देवस्तत्तीर्थं भुक्तिमुक्तिदम् । सहस्रं तत्र तीर्थानां सर्वाभीष्टप्रदायिनाम् ॥

उभयोस्तीरयोस्तत्र स्मरणादघघातिनाम् ॥ २५

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये वडवादिसहस्रतीर्थवर्णनं नाम
षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

गौतमीमाहात्म्ये सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६६४२

अथ सप्तदशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

आत्मतीर्थमिति ख्यातं भुक्तिमुक्तिप्रदं नृणाम् । तस्य प्रभावं वक्ष्यामि यत्र ज्ञानेश्वरः शिवः॥१

दत्त इत्यपि विख्यातः सोऽत्रिपुत्रो हरप्रियः । दुर्वाससः प्रियो भ्राता सर्वज्ञानविशारदः ॥

स गत्वा पितरं प्राह विनयेन प्रणम्य च ॥ २

दत्त उवाच—

ब्रह्मज्ञानं कथं मे स्यात्कं पृच्छामि क्व यामि च ॥ ३

ब्रह्मोवाच—

तच्छ्रुत्वाऽत्रिः पुत्रवाक्यं ध्यात्वा वचनमब्रवीत् ॥ ४

अत्रिरुवाच—

गौतमीं पुत्र गच्छ त्वं तत्र स्तुहि महेश्वरम् । स तु प्रीतो यदैव स्यात्तदा ज्ञानमवाप्स्यसि ॥ ५

---

१ ङ. °हाबलं । २ क. हरिप्रि° ।

ब्रह्मोवाच—

तथेत्युक्त्वा तदाऽऽत्रेयो गङ्गां गत्वा शुचिर्यतः । कृताञ्जलिपुटो भूत्वा[1] भक्त्या तुष्टाव शंकरम् ६

दत्त उवाच—

संसार[2]कूपे पतितोऽस्मि दैवान्मोहेन गुप्तो भवदुःखपङ्के ।
अज्ञाननाम्ना तमसाऽऽवृतोऽहं परं न विन्दामि सुराधिनाथ ॥ ७
भिन्नस्त्रिशूलेन बलीयसाऽहं पापेन चिन्ताक्षुरपाटितश्च ।
तप्तोऽस्मि[3] पञ्चेन्द्रियतीव्रतापैः श्रान्तोऽस्मि संतारय सोमनाथ ॥ ८
बद्धोऽस्मि दारिद्र्यमयैश्च[4] बन्धैर्हतोऽस्मि रोगानलतीव्रतापैः ।
क्रान्तोऽस्म्यहं मृत्युभुजंगमेन भीतो भृशं किं करवाणि शंभो[5] ॥ ९
भवाभवाभ्यामतिपीडितोऽहं तृष्णाक्षुधाभ्यां च रजस्तमोभ्याम् ।
ई[6]र्ष्यया जरया[7] चा[8]भिभूतः पश्यावस्थां कृपया मेऽद्य नाथ ॥ १०
कामेन कोपेन च मत्सरेण दम्भेन दर्पादिभिरप्यनेकैः ।
एकैकशः[9] कष्टगतोऽस्मि विद्धं[10]स्त्वं नाथवद्वारय नाथ शत्रून् ॥ ११
कस्यापि कश्चित्पतितस्य पुंसो दुःखप्रणोदी भवतीति सत्यम् ।
विना भवन्तं मम सोमनाथ कुत्रापि कारुण्यवचोऽपि नास्ति ॥ १२
तावत्स कोपो भयमोहदुःखान्यज्ञानदारिद्र्यरुजस्तथैव ।
कामादयो मृत्युरपीह यावन्नमः शिवायेति न वच्मि वाक्यम् ॥ १३
न मेऽस्ति धर्मो न च मेऽस्ति भक्तिर्नाहं विवेकी करुणा कुतो मे ।
दाताऽसि तेनाऽऽशु शरण्य चित्ते निधेहि सोमेति पदं मदीये ॥ १४
याचे न चाहं सुरभूपतित्वं हृत्पद्ममध्ये मम सोमनाथ ।
श्रीसोमपादाम्बुजसंनिधानं याचे विचार्यैव च तत्कुरुष्व ॥ १५
यथा तवाहं विदितोऽस्मि पापस्तथाऽपि विज्ञापनमाशृणुष्व ।
संश्रूयते यत्र वचः शिवेति तत्र स्थितिः स्यान्मम सोमनाथ ॥ १६
गौरीपते शंकर सोमनाथ विश्वेश कारुण्यनिधेऽखिलात्मन् ।
संस्तूयते यत्र सदेति तत्र केषामपि स्यात्कृतिनां निवासः ॥ १७

ब्रह्मोवाच—

इत्यात्रेयस्तुतिं श्रुत्वा तुतोष भगवान्हरः । वरदोऽस्मीति तं प्राह योगिनं विश्वकृद्धरः ॥ १८

आत्रेय उवाच—

आत्मज्ञानं च मुक्तिं च भुक्तिं[11] च विपुलां त्वयि । तीर्थस्यापि च माहात्म्यं वरोऽयं त्रिदशार्चित

१ घ. ङ. °त्वा शिवं तुष्टाव भक्तितः । द° । २ ङ. °रपङ्के प° । ३ घ. °स्मि रोगावलिनी° । ४ घ. °श्च पाशैर्दष्टोऽस्मि । ५ घ. °भो । मायाभ° । ६ घ. दुःशीलया । ७ ङ. °या वाऽपि भूयः प° । ८ घ. चापि भूयः । ९ घ. ङ. °शः कृपण° । १० ङ. °द्धस्त्वनाथ° । ११ ङ. भक्तिं ।

ब्रह्मोवाच—

एवमस्त्विति तं शंभुरुक्त्वा चान्तरधीयत । ततः प्रभृति तत्तीर्थमात्मतीर्थं [1]विदुर्बुधाः ॥
तत्र स्नानेन दानेन मुक्तिः [2]स्यादिह नारद ॥ २०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्य आत्मतीर्थवर्णनं नाम
सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥
गौतमीमाहात्म्येऽष्टचत्वारिंशत्तमोऽध्यायः ॥ ४८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६६६२

अथाष्टादशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

अ[3]श्वत्थतीर्थमाख्यातं पिप्पलं च ततः परम् । उत्तरे मन्दतीर्थं तु[4] तत्र व्युष्टिमितः शृणु ॥ १
पुरा त्वगस्त्यो भगवान्दक्षिणाशापतिः प्रभुः । देवैस्तु प्रेरितः पूर्वं विन्ध्यस्य प्रार्थनं प्रति ॥ २
स शनैर्विन्ध्यमभ्यागात्सहस्रमुनिभिर्वृतः । तमागत्य नगश्रेष्ठं बहुवृक्षसमाकुलम् ॥ ३
स्पर्धिनं मेरुभानुभ्यां विन्ध्यं शृङ्गशतैर्वृतम् । अत्युन्नतं नगं धीरो लोपामुद्रापतिर्मुनिः ॥ ४
कृतातिथ्यो द्विजैः सार्धं प्रशस्य च नगं पुनः । इदमाह मुनिश्रेष्ठो देवकार्यार्थसिद्धये ॥ ५

अगस्त्य उवाच—

अहं यामि नगश्रेष्ठ मुनिभिस्तत्त्वदर्शिभिः । तीर्थयात्रां करोमीति दक्षिणाशां व्रजाम्यहम् ॥ ६
देहि मार्गं नगपते आतिथ्यं देहि याचते । यावदागमनं मे स्यात्स्थातव्यं तावदेव हि ॥ ७
नान्यथा भवितव्यं ते तथेत्याह नगोत्तमः । आक्रामन्दक्षिणामाशां तैर्वृतो मुनिभिर्मुनिः ॥ ८
शनैः स गौतमीमागात्सत्रयागाय दीक्षितः[5] । यावत्संवत्सरं सत्रमकरोदृषिभिर्वृतः ॥ ९
कैटभस्य सुतौ पापौ राक्षसौ धर्मकण्टकौ । अश्वत्थः पिप्पलश्चेति विख्यातौ त्रिदशालये ॥ १०
अश्वत्थोऽश्वत्थरूपेण पिप्पलो ब्रह्मरूपधृक् । तावुभावन्तरं प्रेप्सू यज्ञविध्वंसनाय तु ॥ ११
कुरुतां काङ्क्षितं रूपं दानवौ पापचेतसौ । अश्वत्थो वृक्षरूपेण पिप्पलो ब्राह्मणाकृतिः ॥ १२
उभौ तौ ब्राह्मणान्नित्यं पीडयेतां तपोधन । आलभन्ते च येऽश्वत्थं तांस्तानश्नात्यसौ तरुः १३
पिप्पलः सामगो भूत्वा शिष्यानश्नाति राक्षसः । तस्माद्यापि विप्रेषु सामगोऽतीव निष्कृपः ॥
क्षीयमाणान्द्विजान्दृष्ट्वा मुनयो राक्षसाविमौ । इति बुद्ध्वा महाप्राज्ञा दक्षिणं तीरमाश्रितम् १५
सौरिं शनैश्चरं मन्दं तपस्यन्तं धृतव्रतम् । गत्वा मुनिगणाः सर्वे रक्षःकर्म न्यवेदयन् ॥ १६
सौरिर्मुनिगणानाह पूर्णे तपसि मे द्विजाः । राक्षसौ हन्म्यपूर्णे[6] तु[7] त[8]पस्यक्षम एव हि ॥ १७
पुनः प्रोचुर्मुनिगणा दास्यामस्ते तपो महत् । इत्युक्तो ब्राह्मणैः सौरिः कृतमित्याह तानपि॥१८
सौरिर्ब्राह्मणवेषेण प्रायादश्वत्थरूपिणम् । राक्षसं ब्राह्मणो भूत्वा प्रदक्षिणमथाकरोत् ॥ १९
प्रदक्षिणं तु कुर्वाणं मेने ब्राह्मणमेव तम् । नित्यवद्राक्षसः पापो भक्षयामास मायया ॥ २०
तस्य कायं समाविश्य चक्षुषाऽन्त्राण्यपश्यत । दृष्टः स राक्षसः पापो मन्देन रविसूनुना ॥ २१

---

१ घ. तदुच्यते । २ घ. स्यात्किंत्वितः फलम् । इ° । ३ क. घ. ङ. °श्वतीर्थमिति ख्यातमश्वत्थं च । ४ घ. च ।
५ घ. ङ. °तः । सांवत्सरं तथा स° । ६ ङ. °र्णेन तपसाऽक्ष° । ७ घ. मे । ८ क. °पसि नैव सिध्यति । पु° ।

भस्मीभूतः क्षणेनैव गिरिर्वज्रहतो यथा । अश्वत्थं भस्मसात्कृत्वा अन्यं ब्राह्मणरूपिणम् ॥ २२
राक्षसं पापनिलयमेक एव तमभ्यगात् । अधीयानो विप्र इव शिष्यरूपो विनीतवत् ॥ २३
पिप्पलः पूर्ववच्चापि भक्षयामास भानुजम् । स भक्षितः पूर्ववच्च कुक्षावन्त्राण्यवैक्षत ॥ २४
तेनाऽऽलोकितमात्रोऽसौ राक्षसो भस्मसादभूत् । उभौ हत्वा भानुसुतः किं कृत्यं मे वदन्त्वथ॥
मुनयो जातसंहर्षाः सर्व एव तपस्विनः । ततः प्रसन्ना ह्यभवन्नृषयोऽगस्त्यपूर्वकाः ॥ २६
वरान्ददुर्यथाकामं सौरये मन्दगामिने । स प्रीतो ब्राह्मणानाह शनिः सूर्यसुतो बली ॥ २७

सौरिरुवाच—

मद्वारे नियता ये[१] च कुर्वन्त्यश्वत्थलम्भनम् । तेषां सर्वाणि कार्याणि स्युः पीडा मद्भवा न च
तीर्थे चाश्वत्थसंज्ञे वै स्नानं कुर्वन्ति ये नराः । तेषां सर्वाणि कार्याणि भवेयुरपरो वरः ॥ २९
मन्दवारे तु येऽश्वत्थं प्रातरुत्थाय मानवाः । आलभन्ते च तेषां वै ग्रहपीडा व्यपोहतु ॥ ३०

ब्रह्मोवाच—

ततः प्रभृति तत्तीर्थमश्वत्थं पिप्पलं विदुः । तीर्थं शनैश्वरं तत्र तत्रागस्त्यं च सात्रिकम्[२] ॥ ३१
याज्ञिकं चापि तत्तीर्थं सामगं तीर्थमेव च । इत्याद्यष्टोत्तराण्यासन्सहस्राण्यथ षोडश ॥
तेषु स्नानं च दानं च सत्रयागफलप्रदम् ॥ ३२

इति श्रीमहापुराणे आदिब्राह्मे गौतमीमाहात्म्येऽश्वत्थाद्यष्टोत्तरषोडशसहस्रतीर्थवर्णनं नामाष्टाधिकशततमोऽध्यायः ॥ ११८ ॥

गौतमीमाहात्म्य ऊनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६६९४

अथैकोनविंशत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

सोमतीर्थमिति ख्यातं तदप्युक्तं महात्मभिः[३] । तत्र स्नानेन दानेन सोमपानफलं लभेत् ॥ १
जगतां मातरः पूर्वमोषध्यो जीवसंमताः । ममापि मातरो देव्यः पूर्वासां[४] पूर्ववत्तराः ॥ २
आसु प्रतिष्ठितो धर्मः स्वाध्यायो यज्ञकर्म च । आभिरेव धृतं सर्वं त्रैलोक्यं सचराचरम् ॥ ३
अशेषरोगोपशमो भवत्याभिरसंशयम् । अन्नमेताभिरेव स्यादशेषप्राणरक्षणम्[५] ॥
अत्रौषध्यो जगद्वन्द्या मामूचुरनहंकृताः ॥ ४

ओषध्य ऊचुः—

अस्माकं त्वं पतिं देहि राजानं सुरसत्तम ॥ ५

ब्रह्मोवाच—

तच्छ्रुत्वा वचनं तासां मयोक्ता ओषधीरिदम् । *पतिं प्राप्स्यथ सर्वाश्च राजानं प्रीतिवर्धनम् ॥
राजानमिति तच्छ्रुत्वा ता मामूचुः पुनर्मुने । गन्तव्यं क पुनश्चोक्ता गौतमीं यान्तु मातरः ॥ ७

---

* एतदर्धस्थाने 'ममापि मातरो ह्यापस्ता गत्वा याचयाऽऽत्मनः' इत्यर्धं वर्तते ।

---

१ घ. येऽत्र कु° । २ क. सात्त्विकं । ३ क. ङ. सर्वया° । ४ घ. महाफलम् । ५ क. पूर्वेषां । ६ घ. °म् । तत्रौ° । ७ क. ङ. ताभ्यो ।

तुष्टायामथ तस्यां वो राजा स्याल्लोकपूजितः । ताश्च गत्वा मुनिश्रेष्ठ तुष्टुवुर्गौतमीं नदीम् ॥ ८
ओषध्य ऊचुः—
किं वाऽकरिष्यन्भववर्तिनो जना नानाघसंघाभिभवाच्च दुःखिताः ।
न चाऽऽगमिष्यद्भवती भुवं चेत्पुण्योदके गौतमि शंभुकान्ते ॥ ९
को वेत्ति भाग्यं नरदेहभाजां महीगतानां सरितामधीशे ।
एषां महापातकसंघहर्त्री त्वमम्ब गङ्गे सुलभा सदैव ॥ १०
न ते विभूतिं ननु वेत्ति कोऽपि त्रैलोक्यवन्द्ये जगदम्ब गङ्गे ।
गौरीसमालिङ्गितविग्रहोऽपि धत्ते स्मरारिः शिरसाऽपि यत्त्वाम् ॥ ११
नमोऽस्तु ते मातरभीष्टदायिनि नमोऽस्तु ते ब्रह्ममयेऽघनाशिनि ।
नमोऽस्तु ते विष्णुपदाब्जनिःसृते नमोऽस्तु ते शंभुजटाविनिःसृते ॥ १२
ब्रह्मोवाच—
इत्येवं स्तुवतामीशा किं ददामी[1]त्यवोचत । १३
ओषध्य ऊचुः—
पतिं देहि जगन्माता[2] राजानमतितेजसम् ॥ १४
ब्रह्मोवाच—
तदोवाच नदी गङ्गा ओषधीस्ता इदं वचः । १५
गङ्गोवाच—
अहं चामृतरूपाऽस्मि ओषध्यो मातरोऽमृताः । तादृशं चामृतात्मानं पतिं सोमं ददामि वः १६
ब्रह्मोवाच—
देवाश्च ऋषयो वाक्यं मेनिरे सोम एव च । ओषध्यश्चापि तद्वाक्यं ततो जग्मुः स्वमालयम् १७
यत्र चाऽऽपुर्महौषध्यो राजानममृतात्मकम् । सोमं समस्तसंतापपापसंघनिवारकम् ॥ १८
सोमतीर्थं तु तत्ख्यातं सोमपानफलप्रदम् । तत्र स्नानेन दानेन पितरः स्वर्गमाप्नुयुः ॥ १९
य इदं शृणुयान्नित्यं पठेद्वा भक्तितः स्मरेत् । दीर्घमायुरवाप्नोति स पुत्री धनवान्[3]भवेत् ॥ २०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये सोमतीर्थवर्णनं नामोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥

गौतमीमाहात्म्ये पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

आदितः श्लोकानां समष्ट्यङ्काः—६७१५

अथ विंशत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—
धान्यतीर्थमिति ख्यातं सर्वकामप्रदं नृणाम् । सुभिक्षं क्षेमदं पुंसां सर्वापद्विनिवारणम् ॥ १
ओषध्यः सोमराजानं पतिं प्राप्य मुदाऽन्विताः । ऊचुः सर्वस्य लोकस्य गङ्गायाश्चेप्सितं वचः २

---

१ घ. °मीति चाब्रवीत् । प° २ घ. °न्मातरस्माकमुचितं शिवे । त° । ३ घ. धनधान्यवान् ।

ओषध्य ऊचुः—

वैदिकी पुण्यगाथाऽस्ति यां वै वेदविदो विदुः । भूमिं सस्यवतीं कश्चिन्मातरं मातृसंमिताम् ॥ ३
गङ्गासमीपे यो दद्यात्सर्वकामानवाप्नुयात् । भूमिं सस्यवतीं गाश्च ओषधीश्च मुदाऽन्वितः ॥ ४
विष्णुब्रह्मेशरूपाय यो दद्याद्भक्तिमान्नरः । सर्वं तदक्षयं विद्यात्सर्वकामानवाप्नुयात् ॥ ५
ओषध्यः सोमराजन्याः सोमश्चाप्योषधीपतिः । इति ज्ञात्वा ब्रह्मविद ओषधीर्यः प्रदास्यति॥६
सर्वान्कामानवाप्नोति ब्रह्मलोके महीयते । ता एव सोमराजन्याः प्रीताः प्रोचुः पुनः पुनः ॥ ७

ओषध्य ऊचुः—

योऽस्मान्ददाति गङ्गायां तं राजन्पारयामसि । त्वमुत्तमश्चौषधीश त्वदधीनं चराचरम् ॥ ८
ओषधयः संवदन्ते सोमेन सह राज्ञा । योऽस्मान्ददाति विप्रेभ्य[1]स्तं राजन्पारयामसि ॥ ९
वयं च ब्रह्मरूपिण्यः प्राणरूपिण्य एव च । योऽस्मान्ददाति विप्रेभ्यस्तं राजन्पारयामसि ॥ १०
अस्मान्ददाति यो नित्यं[2] ब्राह्मणेभ्यो जितव्रतः । उपास्तिरस्ति साऽस्माकं तं राजन्पारयामसि॥
स्थावरं जङ्गमं किंचिदस्माभिर्व्याप्तं जगत् । योऽस्मान्ददाति[3] विप्रेभ्यस्तं राजन्पारयामसि १२
हव्यं कव्यं यदमृतं यत्किंचिदुपभुज्यते । तद्धरीयश्च यो दद्यात्तं राजन्पारयामसि ॥ १३
इत्येतां वैदिकीं गाथां यः शृणोति स्मरेत वा । पठते भक्तिमापन्नस्तं राजन्पारयामसि ॥ १४

ब्रह्मोवाच—

यत्रैषा पठिता गाथा सोमेन सह राज्ञा । गङ्गातीरे चौषधीभिर्धान्यतीर्थं तदुच्यते ॥ १५
ततः प्रभृति तत्तीर्थमौषध्यं सौम्यमेव च । अमृतं वेदगाथं च मातृतीर्थं तथैव च ॥ १६
एषु स्नानं जपो होमो दानं च पितृतर्पणम् । अन्नदानं तु यः कुर्यात्तदानन्त्याय कल्पते ॥ १७
षट्शताधिकसाहस्रं तीर्थानां तीरयोर्द्वयोः । सर्वपापनिहन्तॄणां सर्वसंपद्विवर्धनम् ॥ १८

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये धान्यतीर्थादिषट्शताधिकसहस्रतीर्थवर्णनं नाम विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

गौतमीमाहात्म्ये एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—६७३२

अथैकविंशत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

विदर्भासंगमं पुण्यं रेवतीसंगमं तथा । तत्र यद्वृत्तमाख्यास्ये यत्पुराणविदो विदुः ॥ १
भरद्वाज इति ख्यात ऋषिरासीत्तपोधिकः । तस्य स्वसा रेवतीति कुरूपा विकृतस्वरा ॥ २
तां दृष्ट्वा विकृतां भ्रातीं भरद्वाजः प्रतापवान् । चिन्तया परया युक्तो गङ्गाया दक्षिणे तटे ॥ ३
कस्मै दद्यामिमां कन्यां स्वसारं भीषणाकृतिम् । न कश्चित्प्रतिगृह्णाति दातव्या च स्वसा तथा
अहो भूयान्न कस्यापि कन्या दुःखैककारणम् । मरणं जीवतोऽप्यस्य प्राणिनस्तु पदे पदे ॥ ५
एवं विमृशतस्तस्य स्वाश्रमे चातिशोभने । द्रष्टुं मुनिवरः प्रायाद्भरद्वाजं यतव्रतम् ॥ ६

---

१ घ. 'ति चार्थिभ्य' । २ घ. 'त्यं दद्याद्द्विजेभ्य एव च । उ' । ३ घ. 'ति सर्वेभ्य' ।

द्व्यष्टवर्षः शुभवपुः शान्तो दान्तो गुणाकरः। नाम्ना कठ इति ख्यातो भरद्वाजं ननाम सः॥
विधिवत्पूज्य तं विप्रं भरद्वाजः कठं तदा। तस्याऽऽगमनकार्यं च पप्रच्छ पुरतः स्थितः॥ ८
कठोऽप्याह भरद्वाजं विद्यार्थ्यहमुपागतः। तथाच दर्शनाकाङ्क्षी यद्युक्तं तद्विधीयताम्॥ ९
भरद्वाजः कठं प्राह अधीष्व यदभीप्सितम्। पुराणं स्मृतयो वेदा धर्मस्थानान्यनेकशः॥ १०
सर्वं वेद्मि महाप्राज्ञ रुचिरं वद मा चिरम्। कुलीनो धर्मनिरतो गुरुशुश्रूषणे रतः॥
अभिमानी श्रुतधरः शिष्यः पुण्यैरवाप्यते॥ ११

कठ उवाच—

अध्यापयस्व भो ब्रह्मञ्शिष्यं मां वीतकल्मषम्। शुश्रूषणरतं भक्तं कुलीनं सत्यवादिनम्॥

ब्रह्मोवाच—

तथेत्युक्त्वा भरद्वाजः प्रादाद्विद्यामशेषतः। प्राप्तविद्यः कठः प्रीतो भरद्वाजमथाब्रवीत्॥ १३

कठ उवाच—

इच्छेयं दक्षिणां दातुं गुरो तव मनःप्रियाम्। वदस्व दुर्लभं वाऽपि गुरो तुभ्यं नमोऽस्तु ते॥१४
विद्यां प्राप्यापि ये मोहात्स्वगुरोः पारितोषिकम्। न प्रयच्छन्ति निरयं ते यान्त्याचन्द्रतारकम्

भरद्वाज उवाच—

गृहाण कन्यां विधिवद्भार्यां कुरु मम स्वसाम्। अस्यां प्रीत्या वर्तितव्यं याचेयं दक्षिणामिमाम्

कठ उवाच—

भ्रातृवत्पुत्रवच्चापि शिष्यः स्यात्तु गुरोः सदा। गुरुश्च पितृवच्च स्यात्संबन्धोऽत्र कथं भवेत्॥१७

भरद्वाज उवाच—

मद्वाक्यं कुरु सत्यं त्वं ममाऽऽज्ञा तव दक्षिणा। सर्वं स्मृत्वा कठाद्य त्वं रेवतीं भर तन्मनाः१८

ब्रह्मोवाच—

तथेत्युक्त्वा गुरोर्वाक्यात्कठो जग्राह पाणिना। रेवतीं विधिवद्दत्तां तां समीक्ष्य कठस्त्वथ॥ १९
तत्रैव पूजयामास देवेशं शंकरं तदा। रेवत्या रूपसंपत्त्यै शिवप्रीत्यै च रेवती॥ २०
सुरूपा चारुसर्वाङ्गी न रूपेणोपमीयते। अभिषेकोदकं तत्र रेवत्या यद्विनिःसृतम्॥ २१
साऽभवत्तत्र गङ्गायां तस्मात्तन्नामतो नदी। रेवतीति समाख्याता रूपसौभाग्यदायिनी॥ २२
पुनर्दर्भैश्च विविधैरभिषेकं चकार सः। पुण्यरूपत्वसंसिद्ध्यै विदर्भा तदभून्नदी॥ २३
श्रद्धया संगमे स्नात्वा रेवतीगङ्गयोर्नरः। सर्वपापविनिर्मुक्तो विष्णुलोके महीयते॥ २४
तथा विदर्भागौतम्योः संगमे श्रद्धया मुने। स्नानं करोत्यसौ याति भुक्तिं मुक्तिं च तत्क्षणात्॥
उभयोस्तीरयोस्तत्र तीर्थानां शतमुत्तमम्। सर्वपापक्षयकरं सर्वसिद्धिप्रदायकम्॥ २६

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये विदर्भासंगमरेवतीसंगमादितीर्थवर्णनं नामैक-
विंशत्यधिकशततमोऽध्यायः॥ १२१॥

गौतमीमाहात्म्ये द्विपञ्चाशत्तमोऽध्यायः॥ ५२॥

श्लोकानामादितः समष्ट्यङ्काः—६७५८

---

१ घ. तथैव। २ घ. मुदा।

अथ द्वाविंशत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

पूर्णतीर्थमिति ख्यातं गङ्गाया उत्तरे तटे । तत्र स्नात्वा नरोऽज्ञानात्तथाऽपि शुभमाप्नुयात् ॥ १
पूर्णतीर्थस्य माहात्म्यं वर्ण्यते केन जन्तुना । स्वयं संस्थीयते यत्र चक्रिणा च पिनाकिना ॥ २
पुरा धन्वन्तरिर्नाम कल्पादावायुषः सुतः । इष्ट्वा बहुविधैर्यज्ञैरश्वमेधपुरःसरैः ॥ ३
दत्त्वा दानान्यनेकानि भुक्त्वा भोगांश्च पुष्कलान् । विज्ञाय भोगवैषम्यं परं वैराग्यमाश्रितः ॥ ४
गिरिशृङ्गेऽम्बुधेः पारे तथा गङ्गानदीतटे । शिवविष्ण्वोर्गृहे वाऽपि विशेषात्पुण्यसंगमे ॥ ५
तप्तं हुतं च जप्तं च सर्वमक्षयतां व्रजेत् । धन्वन्तरिरिति ज्ञात्वा तत्र तेपे तपो महत् ॥ ६
ज्ञानवैराग्यसंपन्नो भीमेशचरणाश्रयः । तपश्चकार विपुलं गङ्गासागरसंगमे ॥ ७
पुरा च निकृतो राज्ञा रणं हित्वा महासुरः । सहस्रमेकं वर्षाणां समुद्रं प्राविशद्भयात् ॥ ८
धन्वन्तरौ वनं प्राप्ते राज्यं प्राप्ते तु तत्सुते । विरागं च गते राज्ञि ततः प्रायादथार्णवात् ॥ ९
तपस्यन्तं तमो नाम बलवानसुरो मुने । गङ्गातीरं समाश्रित्य राजा धन्वन्तरिर्यतः ॥ १०
जपहोमरतो नित्यं ब्रह्मज्ञानपरायणः । तं [2]रिपुं नाशयामीति तमः प्रायादथार्णवात् ॥ ११
नाशितो बहुशोऽनेन राज्ञा बलवता त्वहम् । तं [3]रिपुं नाशयामीति तमः प्रायादथार्णवात् ॥ १२
[4]मायया प्रमदारूपं कृत्वा राजानमभ्यगात् । नृत्यगीतवती सुभ्रूर्हसन्ती चारुदर्शना ॥ १३
तां दृष्ट्वा चारुसर्वाङ्गीं बहुकालं नयान्[5]विताम् । शान्तामनु[6]व्रतां भक्तां कृपया चाब्रवीन्[7]नृपः ॥ १४

नृप उवाच—

काऽसि त्वं कस्य हेतोर्वा वर्तसे गहने वने । कं दृष्ट्वा हर्षसीव त्वं वद कल्याणि पृच्छते ॥ १५

ब्रह्मोवाच—

प्रमदा चापि तद्वाक्यं श्रुत्वा राजानमब्रवीत् ॥ १६

प्रमदोवाच—

त्वयि तिष्ठति को लोके हेतुर्हर्षस्य मे भवेत् । अहमिन्द्रस्य या लक्ष्मीस्त्वां दृष्ट्वा कामसंभृतम् ॥ १७
हर्षाच्चरामि पुरतो राजंस्तव पुनः पुनः । अगण्यपुण्यविरहादहं सर्वस्य दुर्लभा ॥ १८

ब्रह्मोवाच—

एतद्वचो निशम्याऽऽशु तपस्त्यक्त्वा सुदु[8]ष्करम् । तामेव मनसा ध्यायंस्तन्निष्ठस्तत्[9]परायणः ॥ १९
तदेकशरणो राजा बभूव [10]स यदा तमः । अन्तर्धानं गतो ब्रह्मन्नाशयित्वा तपो [11]बृहत् ॥ २०
एतस्मिन्नन्तरेऽहं वै वरान्दातुं समभ्यगाम् । तं दृष्ट्वा विह्वलीभूतं तपोभ्रष्टं यथामृतम् ॥ २१
तमाश्वास्याथ विविधैर्हेतुभिर्नृपसत्तमम् । तव शत्रुस्तमो नाम कृत्वा तां तपसश्च्युतिम् ॥ २२
चरितार्थो गतो राजन्न त्वं शोचितुमर्हसि । आनन्दयन्ति प्रमदास्तापयन्ति च मानवम् ॥ २३
सर्वा एव विशेषेण किमु मायामयी तु सा । ततः कृताञ्जली राजा मामाह विगतभ्रमः ॥ २४

---

१ घ. देहिना । २ घ. नृपं । ३ घ. नृपं । ४ घ. तमस्तु । ५ घ. °न्वितः । शा° । ६ घ. °नुपमां भक्त्या कृ° । ७ क. ङ. °र्वा दिदम् । नृ° । ८ घ. ङ. °दुस्त्यजम् । ९ घ. °त्परोऽभवत् । अनाशयत्तपस्तस्य तमः केनापि हेतुना । त° । १० घ. च । ११ घ. ङ. महत् ।

राजोवाच—

*किं करोमि कथं ब्रह्मंस्तपसः पारमाप्नुयाम् ॥ २५

ब्रह्मोवाच—

ततस्तस्योत्तरं प्रादां देवदेवं जनार्दनम् । स्तुहि सर्वप्रयत्नेन ततः सिद्धिमवाप्स्यसि ॥ २६
स ह्यशेषजगत्स्रष्टा वेदवेद्यः पुरातनः । सर्वार्थसिद्धिदः पुंसां नान्योऽस्ति भुवनत्रये ॥ २७
स जगाम नगश्रेष्ठं हिमवन्तं नृपोत्तमः । कृताञ्जलिपुटो भूत्वा विष्णुं तुष्टाव भक्तितः ॥ २८

धन्वन्तरिरुवाच—

जय विष्णो जयाचिन्त्य जय जिष्णो जय[1]ाच्युत । जय गोपाल लक्ष्मीश जय कृष्ण जगन्मय ॥
जय भूतपते नाथ जय पन्नगशायिने । जय सर्वग गोविन्द जय विश्वकृते नमः ॥ ३०
जय [2]विश्वभुजे देव जय [3]विश्वधृते नमः । ज[4]येश सदसत्त्वं वै जय माधव धर्मिणे ॥ ३१
जय कामद काम त्वं जय राम गुणार्णव । जयपुष्टिद पुष्टीश जय कल्याणदायिने ॥ ३२
जय भूतप भूतेश जय मौ[5]नविधायिने । जय कर्मद कर्म त्वं जय पीताम्बरच्छद ॥ ३३
जय सर्वेश सर्वस्त्वं जय मङ्गलरूपिणे । जय स[6]त्त्वाधिनाथाय जय वेदविदे नमः ॥ ३४
जय जन्मद ज[7]न्मिस्थ परमात्मन्नमोऽस्तु ते । जय मुक्तिद मु[8]क्तिस्त्वं जय भुक्तिद केशव ॥ ३५
जय लोकद लोकेश जय पापविनाशन । जय वत्सल भक्तानां जय चक्र[9]धृते नमः ॥ ३६
जय मानद मानस्त्वं जय लोकनमस्कृत । जय धर्मद धर्मस्त्वं जय संसारपारग ॥ ३७
जय अन्नद अ[10]न्नं त्वं जय वाचस्पते नमः । जय शक्तिद श[11]क्तिस्त्वं जय जैत्रवरप्रद ॥ ३८
जय यज्ञद य[12]ज्ञस्त्वं जय पद्मदलेक्षण । जय दानद दानं त्वं जय कैटभसूदन ॥ ३९
जय कीर्तिद कीर्तिस्त्वं जय मूर्तिद मूर्तिधृक् । जय सौख्यद सौख्यात्मञ्जय पावनपावन ॥ ४०
जय शान्तिद शान्तिस्त्वं जय शंकरसंभव । जय पानद पानस्त्वं जय ज्योतिःस्वरूपिणे ॥ ४१
जय वामन वित्तेश जय धूमपताकिने । जय सर्वस्य जगतो दातृमूर्ते नमोऽस्तु ते ॥ ४२

त्वमेव लोकत्रयवर्तिजीवनिकायसंक्लेशविनाशदक्ष ॥
श्रीपुण्डरीकाक्ष कृपानिधे त्वं निधेहि पाणिं मम मूर्ध्नि विष्णो ॥ ४३

ब्रह्मोवाच—

एवं स्तुवन्तं भगवाञ्शङ्खचक्रगदाधरः । वरेण च्छन्दयामास सर्वकामसमृद्धिदः ॥ ४४
धन्वन्तरिः प्रीतमना वरदानेन चक्रिणः । वरदानाय देवेशं गोविन्दं संस्थितं पुरः ॥ ४५
तमाह नृपतिः प्रह्वः सुरराज्यं ममेप्सितम् । तच्च दत्तं त्वया विष्णो प्राप्तोऽस्मि कृतकृत्यताम् ॥ ४६
स्तुतः संपूजितो विष्णुस्तत्रैवान्तरधीयत । तथैव त्रिदशेशत्वमवाप नृपतिः क्रमात् ॥ ४७
प्रागर्जितानेककर्मपरिपाकवशात्ततः । त्रिःकृत्वो नाशमगमत्सहस्राक्षः स्वकात्पदात् ॥ ४८
नहुषाद्वृत्रहत्यायाः सिन्धुसेनवधात्ततः । अहल्यायां च गमनाद्येन केन च हेतुना ॥ ४९
स्मारं स्मारं तत्तदिन्द्रश्चिन्तासंतापदुर्मनाः । ततः सुरपतिः प्राह वाचस्पतिमिदं वचः ॥ ५०

* एतदर्धस्थाने घ. पुस्तके ‘ कथं समीहितप्राप्तिर्ब्रह्मन्मम भविष्यति ’ इत्यर्धं वर्तते ।

१ घ. च. °याव्यय । ज° । २ च. विश्वविदे । ३ घ. च. पाशभृते । ४ घ. ङ. जय सत्यद सत्य त्वं ज° । ५ घ. मायावि° । ६ घ. च. सत्त्वद सत्त्वस्थ ज° । ७ ङ. जन्म त्वं प° । ८ च. मुक्तीश जय सर्वद माधव । ९ घ. च. °क्रभृते । १० घ. च. अन्नात्मञ्जय । ११ घ. च. शक्त्यात्मञ्जय ज्ञानव° । १२ घ. च. यज्ञात्मञ्जय ।

इन्द्र उवाच—

हेतुना केन वागीश भ्रष्टराज्यो भवाम्यहम् । मध्ये मध्ये पदभ्रंशाद्वरं निःश्रीकता नृणाम् ॥ ५१
गहनां कर्मणां जीवगतिं को वेत्ति तत्त्वतः । रहस्यं सर्वभावानां ज्ञातुं नान्यः प्रगल्भते ॥ ५२

ब्रह्मोवाच—

बृहस्पतिर्हरिं प्राह ब्रह्माणं पृच्छ गच्छ तम् । स तु जानाति यद्भूतं भविष्यच्चापि वर्तनम् ॥ ५३
स तु वक्ष्यति येनेदं जातं[१] तच्च महामते । तावागत्य महाप्राज्ञौ नमस्कृत्य ममान्तिकम् ॥
कृताञ्जलिपुटौ भूत्वा मामूचतुरिदं वचः ॥ ५४

इन्द्रबृहस्पती ऊचतुः—

भगवन्केन दोषेण शचीभर्ता उदारधीः । राज्यात्प्रभ्रश्यते नाथ संशयं छेत्तुमर्हसि ॥ ५५

ब्रह्मोवाच—

तदाऽहमब्रवं ब्रह्मंश्चिरं ध्यात्वा बृहस्पतिम् । खण्डधर्माख्यदोषेण तेन राज्यपदाच्च्युतः ॥ ५६
देशकालादिदोषेण श्रद्धामन्त्रविपर्ययात् । यथावद्दक्षिणादानादसद्द्रव्यप्रदानतः ॥ ५७
देवभूदेवतावज्ञापातकाच्च विशेषतः । यत्खण्डत्वं स्वधर्मस्य देहिनामुपजायते ॥ ५८
तेनातिमानसस्तापः पदहानिश्च दुस्त्यजा । कृतोऽपि धर्मोऽनिष्टाय जायते क्षुब्धचेतसा ॥ ५९
कार्यस्य न भवेत्सिद्ध्यै तस्मादव्याकुलाय च । असंपूर्णे स्वधर्मे हि किमनिष्टं न जायते ॥ ६०
ताभ्यां यत्पूर्ववृत्तान्तं तदप्युक्तं मयाऽनघ । आयुषस्तु सुतः श्रीमान्धन्वन्तरिरुदारधीः ॥ ६१
तमसा च कृतं विघ्नं विष्णुना तच्च नाशितम् । पूर्वजन्मसु वृत्तान्तमित्यादि परिकीर्तितम् ॥ ६२
तच्छ्रुत्वा विस्मितौ चोभौ मामेव पुनरूचतुः ॥ ६३

इन्द्रबृहस्पती ऊचतुः—

तद्दोषप्रतिबन्धस्तु केन स्यात्सुरसत्तम ॥ ६४

ब्रह्मोवाच—

पुनर्ध्यात्वा तावदं श्रूयतां दोषका(हा)रकम् । कारणं सर्वसिद्धीनां दुःखसंसारतारणम् ॥ ६५
शरणं तप्तचित्तानां निर्वाणं जीवतामपि । गत्वा तु गौतमीं देवीं स्तूयेतां हरिशंकरौ ॥ ६६
नोपायोऽन्योऽस्ति संशुद्ध्यै तौ तां हित्वा जगत्त्रये । तदैव जग्मतुरुभौ गौतमीं मुनिसत्तम ॥
स्नातौ कृतक्षणौ[२] चोभौ देवौ तुष्टुवतुर्मुदा ॥ ६७

इन्द्र उवाच—

नमो मत्स्याय कूर्माय वराहाय नमो नमः । नरसिंहाय देवाय वामनाय नमो नमः ॥ ६८
नमोऽस्तु हयरूपाय त्रिविक्रम नमोऽस्तु ते । नमोऽस्तु[३] बुद्धरूपाय रामरूपाय कल्किने ॥ ६९
अनन्तायाच्युतायेश जामदग्न्याय ते नमः । वरुणेन्द्रस्वरूपाय यमरूपाय ते नमः ॥ ७०
परमेशाय देवाय नमस्त्रैलोक्यरूपिणे । बिभ्रत्सरस्वतीं वक्त्रे सर्वज्ञोऽसि नमोऽस्तु ते ॥ ७१
लक्ष्मीवानस्यतो लक्ष्मीं बिभ्रद्वक्षसि चानघ । बहुबाहूरुपादस्त्वं बहुकर्णाक्षिशीर्षकः ॥
त्वामेव सुखिनं प्राप्य बहवः सुखिनोऽभवन् । ७२
तावन्निःश्रीकता पुंसां मालिन्यं दैन्यमेव वा । यावन्न यान्ति शरणं हरे त्वां करुणार्णवम् ॥ ७३

१ घ. ज. °नं वक्ष्यति निष्कृतिम् । ता° । २ च. कृतेक्ष° । ३ घ. ज. °स्तु रामरामाय बौद्धरूपाय क° ।

बृहस्पतिरुवाच—

सूक्ष्मं परं जोतिरनन्तरूपमोंकारमात्रं प्रकृतेः परं यत् ।
चिद्रूपमानन्दमयं समस्तमेवं वदन्तीश मुमुक्षवस्त्वाम् ॥ ७४
आराधयन्त्यत्र भवन्तमीशं महामखैः पञ्चभिरप्यकामाः ।
संसारसिन्धोः परमाप्तकामा विशन्ति दिव्यं भुवनं वपुस्ते ॥ ७५
सर्वेषु सत्त्वेषु समत्वबुद्ध्या संवीक्ष्य षट्सूर्मिषु शान्तभावाः ।
ज्ञानेन ते कर्मफलानि हित्वा ध्यानेन ते त्वां प्रविशन्ति शंभो ॥ ७६
न जातिधर्माणि न वेदशास्त्रं न ध्यानयोगो न समाधिधर्मः ।
रुद्रं शिवं शंकरं शान्तचित्तं भक्त्या देवं सोममहं नमस्ये ॥ ७७
मूर्खोऽपि शंभो तव पादभक्त्या समाप्नुयान्मुक्तिमयीं तनुं ते ।
ज्ञानेषु यज्ञेषु तपःसु चैव ध्यानेषु होमेषु महाफलेषु ॥ ७८
संपन्नमेतत्फलमुत्तमं यत्सोमेश्वरे भक्तिरहर्निशं यत् ।
सर्वस्य जीवस्य सदा प्रियस्य फलस्य दृष्टस्य तथा श्रुतस्य ॥ ७९
स्वर्गस्य मोक्षस्य जगन्निवास सोपानपङ्क्तिस्तव भक्तिरेषा ।
त्वत्पादसंप्राप्तिफलाप्तये तु सोपानपङ्क्तिं न वदन्ति धीराः * ॥ ८०
तस्मादयालो मम भक्तिरस्तु नैवास्त्युपायस्तव रूपसेवा ।
आत्मीयमालोक्य महत्त्वमीश पापेषु चास्मासु कुरु प्रसादम् । ८१
स्थूलं च सूक्ष्मं त्वमनादि नित्यं पिता च माता यदसच्च सच्च ।
एवं स्तुतो यः श्रुतिभिः पुराणैर्नमामि सोमेश्वरमीशितारम् ॥ ८२

ब्रह्मोवाच—

ततः प्रीतौ हरिहरावूचतुस्त्रिदशेश्वरौ ॥ ८३

हरिहरावूचतुः—

व्रियतां यन्मनोभीष्टं यद्वरं चातिदुर्लभम् ॥ ८४

ब्रह्मोवाच—

इन्द्रः प्राह सुरेशानं मद्राज्यं तु पुनः पुनः । जायते भ्रश्यते चैव तत्पापमुपशाम्यताम् ॥ ८५
यथा स्थिरोऽहं राज्ये स्यां सर्वं स्यान्निश्चलं मम । सुप्रीतौ यदि देवेशौ सर्वं स्यान्निश्चलं सदा ॥
तथेति हरिवाक्यं तावभिनन्द्येदमूचतुः । परं प्रसादमापन्नौ तावालोक्य स्मिताननौ ॥ ८७
निरपायनिराधारनिर्विकारस्वरूपिणौ । शरण्यौ सर्वलोकानां भुक्तिमुक्तिप्रदावुभौ ॥ ८८

हरिहरावूचतुः—

त्रिदैवत्यं महातीर्थं गौतमी वाञ्छितप्रदा । तस्यामनेन मन्त्रेण कुरुतां स्नानमादरात् ॥ ८९
अभिषेकं महेन्द्रस्य मङ्गलाय बृहस्पतिः । करोतु संस्मरन्नावां संपदां स्थैर्यसिद्धये ॥ ९०
इह जन्मनि पूर्वस्मिन्यत्किंचित्सुकृतं कृतम् । तत्सर्वं पूर्णतामेतु गोदावरि नमोऽस्तु ते ॥ ९१

---

* एतदनन्तरं घ. पुस्तके—'यस्त्वन्तरात्मा सचराचरस्य कर्ता च हर्ता परिपोषकश्च । तथाऽपि मन्दा न विदन्ति हि त्वां त्वन्मायया मोहितचेतसोऽमी ' इत्यधिकः श्लोको वर्तते ।

---

१ घ. च. °धिकर्म । रु° ।

एवं स्मृत्वा तु यः कश्चिद्गौतम्यां स्नानमाचरेत् । आवाभ्यां तु प्रसादेन धर्मः संपूर्णतामियात् ॥
पूर्वजन्मकृताद्दोषात्स मुक्तः पुण्यवान्भवेत् ॥ ९२

ब्रह्मोवाच—

तथेति चक्रतुः प्रीतौ सुरेन्द्रधिषणौ ततः । महाभिषेकमिन्द्रस्य चकार द्युसदां गुरुः ॥ ९३
तेनाभूद्या नदी पुण्या मङ्गलेत्युदिता तु सा । तया च संगमः पुण्यो गङ्गायाः शुभदस्त्वसौ॥ ९४
इन्द्रेण संस्तुतो विष्णुः प्रत्यक्षोऽभूज्जगन्मयः । त्रिलोकसंमितां शक्रो भूमिं लेभे जगत्पतेः ॥
तन्नाम्ना चापि विख्यातो गोविन्द इति तत्र च । त्रिलोकसंमिता लब्धा तेन गौर्वज्रधारिणा ॥
दत्ता च हरिणा तत्र गोविन्दस्तदभूद्धरिः । त्रैलोक्यराज्यं य[1]त्प्राप्तं हरिणा च हरेर्मुने ॥ ९७
निश्चलं येन(तच्च)संजातं[2] देवदेवान्महेश्वरात् । बृहस्पतिर्देवगुरु[3]र्यत्रास्तौषीन्महेश्वरम् ॥ ९८
राज्यस्य स्थिर[4]भावाय देवेन्द्रस्य महात्मनः । सिद्धेश्वरस्तत्र देवो लिङ्गं तु त्रिदशार्चितम् ॥ ९९
ततः प्रभृति तत्तीर्थं गोविन्दमिति विश्रुतम् । मङ्गलासंगमं[5] चैव पूर्णतीर्थं ततः परम् ॥ १००
इन्द्रतीर्थमिति ख्यातं बार्हस्पत्यं च विश्रुतम् । य[6]त्र सिद्धेश्वरो देवो विष्णुर्गोविन्द एव च ॥
तेषु[7] स्नानं च दानं च यत्किंचित्सुकृतार्जनम्[8] । सर्वं तदक्षयं विद्यात्पितॄणामतिवल्लभम् ॥ १०२
शृणोति यश्चापि पठेद्यश्च स्मरति नित्यशः । तस्य तीर्थस्य माहात्म्यं भ्रष्टराज्यप्रदायकम् ॥
सप्तत्रिंशत्सहस्राणि तीर्थानां तीरयोर्द्वयोः । उभयोर्मुनिशार्दूल सर्वसिद्धिप्रदायिनाम् ॥ १०४
न पूर्णतीर्थसदृशं तीर्थमस्ति महाफलम् । निष्फलं तस्य जन्मादि यो न सेवेत तन्नरः ॥ १०५

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्य उभयोस्तीरयोः पूर्णतीर्थमङ्गलासंगमगोविन्दसिद्धेश्वरा-
दिसप्तत्रिंशत्सहस्रतीर्थवर्णनं नाम द्वाविंशाधिकशततमोऽध्यायः ॥ १२२ ॥

गौतमीमाहात्म्ये त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

आदितः श्लोकानां समष्ट्यङ्कः—६८६३

अथ त्रयोविंशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

रामतीर्थमिति ख्यातं[9] भ्रूणहत्याविनाशनम् । तस्य[10] श्रवणमात्रेण सर्वपापैः प्रमुच्यते ॥ १
इक्ष्वाकुवंश[11]प्रभवः क्षत्रियो लोकविश्रुतः । बलवान्मतिमाञ्शूरो यथा शक्रः पुरंदरः ॥ २
पितृपैतामहं राज्यं कुर्वन्नास्ते यथा बलिः । तस्य तिस्रो महिष्यः स्यू राज्ञो दशरथस्य हि ॥ ३
कौशल्या च सुमित्रा च कैकेयी च महामते । एताः कुलीनाः सुभगा रूपलक्षणसंयुताः ॥ ४
तस्मिन्राजनि राज्ये तु स्थितेऽयोध्यापतौ मुने । वसिष्ठे ब्रह्मविच्छ्रेष्ठे पुरोधसि विशेषतः ॥ ५
न च व्याधिर्न दुर्भिक्षं न चावृष्टिर्न चाऽऽधयः । ब्रह्मक्षत्रविशां नित्यं शूद्राणां च विशेषतः ॥६

---

१ घ. च. तत्प्राप्तं । २ क. °तं तद्वै देवा° । ३ घ. च. °रुस्तोषं नीत्वा महे° । ङ. °रुस्तत्र स्थाप्य महे° । ४ घ. च. °रतां प्रायाद्देवे° । ङ. °रतां प्राप दे° । ५ घ. च. °मं चेति तत्र स्नात्वा शुचिर्भवेत् । इ° । ६ ङ. च. तत्र । ७ क. तत्र. । ८ घ. ङ. च. °म् । यत्र सिद्धेश्वरो देवो गोविन्दो जनवल्लभः । स° । ९ ङ. च. °तं ब्रह्मह° । १० ङ. °स्य स्मरण° । ११ घ. ङ. च. °प्रवरः क्ष° ।

आश्रमाणां तु सर्वेषामानन्दोऽभूत्पृथक्पृथक् । तस्मिञ्शासति राजेन्द्र इक्ष्वाकूणां कुलोद्वहे[1] ॥ ७
देवानां दानवानां तु राज्यार्थे विग्रहोऽभवत् । क्वापि तत्र जयं प्रापुर्देवाः क्वापि तथेतरे ॥ ८
एवं प्रवर्तमाने तु त्रैलोक्यमतिपीडितम् । अभून्नारद तत्राहमवदं दैत्यदानवान् ॥ ९
देवांश्चापि विशेषेण न कृतं तैर्मदीरितम् । पुनश्च संगरस्तेषां बभूव सुमहान्मिथः ॥ १०
विष्णुं गत्वा सुराः प्रोचुस्तथेशानं जगन्मयम् । तावूचतुरुभौ देवानसुरान्दैत्यदानवान् ॥ ११
तपसा बलिनो यान्तु पुनः कुर्वन्तु संगरम् । तथेत्याहुर्ययुः सर्वे तपसे नियतव्रताः ॥ १२
ययुस्तु राक्षसान्देवाः पुनस्ते मत्सरान्विताः । देवानां दानवानां च संगरोऽभूत्सुदारुणः ॥ १३
न तत्र देवा जेतारो नैव दैत्याश्च दानवाः । संयुगे वर्तमाने तु वागुवाचाशरीरिणी ॥ १४

आकाशवागुवाच—

येषां दशरथो राजा ते जेतारो न चेतरे ॥ १५

ब्रह्मोवाच—

इति श्रुत्वा जयायोभौ जग्मतुर्देवदानवौ । तत्र वायुस्त्वरन्प्राप्तो राजानमवदत्तदा ॥ १६

वायुरुवाच—

आगन्तव्यं त्वया राजन्देवदानवसंगरे । यत्र राजा दशरथो जयस्तत्रेति विश्रुतम् ॥ १७
तस्मात्त्वं देवपक्षे स्या भवेयुर्जयिनः सुराः ॥ १८

ब्रह्मोवाच—

तद्वायुवचनं श्रुत्वा राजा दशरथो नृपः । आगम्यते मया सत्यं गच्छ वायो यथासुखम् ॥ १९
गते वायौ तदा दैत्या आजग्मुर्भूपतिं प्रति । तेऽप्यूचुर्भगवन्नस्मत्साहाय्यं कर्तुमर्हसि ॥ २०
राजन्दशरथ श्रीमन्विजयस्त्वयि संस्थितः । तस्मात्त्वं वै दैत्यपतेः साहाय्यं कर्तुमर्हसि ॥ २१
ततः प्रोवाच नृपतिर्वायुना प्रार्थितः पुरा । प्रतिज्ञातं मया तच्च यान्तु दैत्याश्च दानवाः ॥ २२
स तु राजा तथा चक्रे गत्वा चैव त्रिविष्टपम् । युद्धं चक्रे तथा दैत्यैर्दानवैः सह राक्षसैः ॥ २३
पश्यत्सु देवसंघेषु नमुचेर्भ्रातरस्तदा । विविधैर्निशितैर्बाणैरथाक्षं नृपतेस्तथा ॥ २४
भिन्नाक्षं तं रथं राजा न जानाति स संभ्रमात् । राजान्तिके स्थिता सुभ्रूः कैकेय्याऽज्ञायि नारद
न ज्ञापितं तया राज्ञे स्वयमालोक्य सुव्रता । भग्नमक्षं समालक्ष्य चक्रे हस्तं तदा स्वकम् ॥ २६
अक्षवन्मुनिशार्दूल तदेतन्महदद्भुतम् । रथेन रथिनां श्रेष्ठस्तया दत्तकरेण च ॥ २७
जितवान्दैत्यदनुजान्देवैः[3] प्राप्य वरान्बहून् । ततो देवैरनुज्ञातस्त्वयोध्यां पुनरभ्यगात् ॥ २८
स[4] तु मध्ये महाराजो मार्गे वीक्ष्य तदा प्रियाम् । कैकेय्याः कर्म तद्दृष्ट्वा विस्मयं परमं गतः ॥
ततस्तस्यै वरान्प्रादात्त्रींस्तु नारद सा अपि । अनुमान्य नृपप्रोक्तं कैकेयी वाक्यमब्रवीत् ॥ ३०

कैकेय्युवाच—

त्वयि तिष्ठन्तु राजेन्द्र त्वया दत्ता वरा अमी ॥ ३१

ब्रह्मोवाच—

विभूषणानि राजेन्द्रो दत्त्वा स प्रियया सह । रथेन विजयी राजा ययौ स्वनगरं सुखी ॥ ३२
योषितां किमदेयं हि प्रियाणामुचितागमे । स कदाचिद्दशरथो मृगयाशीलिभिर्वृतः ॥ ३३

---

१ ङ. च. °हे । एतस्मिन्नन्तरे तत्र महत्कार्यमुपस्थितम् । दे° । २ घ. च. तथा । ३ ङ. °न्देवात्प्राप्य । ४ घ. ङ. च. स तदा तु महा° ।

अटन्नरण्ये शर्वर्यां वारिबन्धमथाकरोत् । सप्तव्यसनहीनेन भवितव्यं तु भूभुजा ॥ ३४
इति जानन्नपि च तच्चकार तु विधेर्वशात् । गर्तं प्रविश्य पानार्थमागतान्निशितैः शरैः ॥ ३५
मृगान्हन्ति महाबाहुः शृणु कालविपर्ययम् । गर्ते प्रविष्टे नृपतौ तस्मिन्नेव नगोत्तमे ॥ ३६
वृद्धो वै श्रवणो नाम न शृणोति न पश्यति । तस्य भार्या तथाभूता तावब्रूतां तदा सुतम् ॥३७

मातापितरावूचतुः—

आवां तृषार्तौ रात्रिश्च कृष्णा चापि प्रवर्तते । वृद्धानां जीवितं कृत्स्नं बालस्त्वमसि पुत्रक ॥३८
अन्धानां बधिराणां च वृद्धानां धिक्च जीवितम् । जराजर्जरदेहानां धिग्धिक्पुत्रक जीवितम् ॥
तावत्पुंभिर्जीवितव्यं यावल्लक्ष्मीर्दृढं वपुः । यावदाज्ञाऽप्रतिहता तीर्थादावन्यथा मृतिः ॥ ४०

ब्रह्मोवाच—

इत्येतद्वचनं श्रुत्वा वृद्धयोर्गुरुवत्सलः । पुत्रः प्रोवाच तद्दुःखं गिरा मधुरया हरन् ॥ ४१

पुत्र उवाच—

मयि जीवति किं नाम युवयोर्दुःखमीदृशम् । न हरत्यात्मजः पित्रोर्यश्चरित्रैर्मनोरुजम् ॥ ४२
तेन किं तनुजेनेह कुलोद्वेगविधायिना ॥ ४३

ब्रह्मोवाच—

इत्युक्त्वा पितरौ नत्वा तावाश्वास्य महामनाः । *तरुस्कन्धे समारोप्य वृद्धौ च पितरौ तदा ॥
हस्ते गृहीत्वा कलशं जगाम ऋषिपुत्रकः । स ऋषिर्न तु राजानं जानाति नृपतिर्द्विजम् ॥ ४५
उभौ सरभसौ तत्र द्विजो वारि समाविशत् । सत्वरं कलशे न्युब्जे वारि गृह्णन्तमाशुगैः ॥ ४६
द्विजं राजा द्विपं मत्वा विव्याध निशितैः शरैः । वनद्विपोऽपि भूपानामवध्यस्तद्विदन्नपि ॥ ४७
विव्याध तं नृपः कुर्यान्न किं किं विधिवञ्चितः । स विद्धो मर्मदेशे तु दुःखितो वाक्यमब्रवीत् ॥

द्विज उवाच—

केनेदं दुःखदं कर्म कृतं सद्ब्राह्मणस्य मे । मैत्रो ब्राह्मण इत्युक्तो नापराधोऽस्ति कश्चन ॥ ४९

ब्रह्मोवाच—

तदेतद्वचनं श्रुत्वा मुनेरार्तस्य भूपतिः । निश्चेष्टश्च निरुत्साहो शनैस्तं देशमभ्यगात् ॥ ५०
तं तु दृष्ट्वा द्विजवरं ज्वलन्तमिव तेजसा । असावप्यभवत्तत्र सशल्य इव मूर्छितः ॥ ५१
आत्मानमात्मना कृत्वा स्थिरं राजाऽब्रवीदिदम् ॥ ५२

राजोवाच—

को भवान्द्विजशार्दूल किमर्थमिह चाऽऽगतः । वद पापकृते मह्यं वद मे निष्कृतिं पराम् ॥ ५३
ब्रह्महा वर्णिभिः किंतु श्वपचैरपि जातुचित् । न स्प्रष्टव्यो महाबुद्धे द्रष्टव्यो न कदाचन ॥ ५४

ब्रह्मोवाच—

तद्राजवचनं श्रुत्वा मुनिपुत्रोऽब्रवीद्वचः ॥ ५५

मुनिपुत्र उवाच—

उत्क्रमिष्यन्ति मे प्राणा अतो वक्ष्यामि किंचन । स्वच्छन्दवृत्तिताज्ञाने विद्धि पाकं च कर्मणाम् ॥
आत्मार्थं तु न शोचामि वृद्धौ तु पितरौ मम । तयोः शुश्रूषकः कः स्यादन्धयोरेकपुत्रयोः ॥५७

* इदमर्धं घ. पुस्तके नास्ति ।

१ घ. ङ. च. °म् । एतस्मिन्नन्तरे ब्रह्मंस्तस्मि° । २ घ. कष्टं । ३ घ. च दैवोपहतकर्मणाम् । अ° ।

विना मया महारण्ये कथं तौ जीवयिष्यतः । ममाभाग्यमहो कीदृक्पितृशुश्रूषणे क्षतिः ॥ ५८
जाता मेऽद्य विना प्राणैर्हा विधे किं कृतं त्वया । तथाऽपि गच्छ तत्र त्वं गृहीतकलशस्त्वरन् ॥
ताभ्यां देह्युदपानं त्वं यथा तौ न मरिष्यतः ॥ ६०

ब्रह्मोवाच—

इत्येवं ब्रुवतस्तस्य गताः प्राणा महावने । विसृज्य सशरं चापमादाय कलशं नृपः ॥ ६१
तत्रागात्स तु वेगेन यत्र वृद्धौ महावने । वृद्धौ चापि तदा रात्रौ तावन्योन्यं समूचतुः ॥ ६२

वृद्धावूचतुः—

उद्विग्नः कुपितो वा स्यादथ वा भक्षितः कथम् । न प्राप्तश्चाऽऽवयोर्यष्टिः किं कुर्मः का गतिर्भवेत्
न कोऽपि तादृशः पुत्रो विद्यते सचराचरे । यः पित्रोरन्यथा वाक्यं न करोत्यपि निन्दितः ६४
वज्रादपि कठोरं वा जीवितं तमपश्यतोः । शीघ्रं न यान्ति यत्प्राणास्तदेकायत्तजीवयोः ॥ ६५

ब्रह्मोवाच—

एवं बहुविधा वाचो वृद्धयोर्वदतोर्वने । तदा दशरथो राजा शनैस्तं देशमभ्यगात् ॥ ६६
पादसंचारशब्देन मेनाते सुतमागतम् ॥ ६७

वृद्धावूचतुः—

कुतो वत्स चिरात्प्राप्तस्त्वं दृष्टिस्त्वं परायणम् । न ब्रूषे किंतु रुष्टोऽसि वृद्धयोरन्धयोः सुतः ६८

ब्रह्मोवाच—

सशल्य इव दुःखार्तः शोचन्दुष्कृतमात्मनः । स भीत इव राजेन्द्रस्तावुवाचाथ नारद ॥ ६९
उदपानं च कुरुतां तच्छ्रुत्वा नृपभाषितम् । नायं वक्ता सुतोऽस्माकं को भवांस्त्वत्पुरा वद ७०
पश्चात्पिबावः पानीयं ततो राजाऽब्रवीच्च तौ ॥ ७१

राजोवाच—

तत्र तिष्ठति वां पुत्रो यत्र वारिसमाश्रयः ॥ ७२

ब्रह्मोवाच—

तच्छ्रुत्वोचतुरार्तौ तौ सत्यं ब्रूहि न चान्यथा । आचचक्षे ततो राजा सर्वमेव यथातथम् ॥ ७३
ततस्तु पतितौ वृद्धौ तत्राऽऽवां नय मा स्पृश । ब्रह्मघ्नस्पर्शनं पापं न कदाचिद्विनश्यति ॥ ७४
निन्ये वै श्रवणं वृद्धं सभार्यं नृपसत्तमः । यत्रासौ पतितः पुत्रस्तं स्पृष्ट्वा तौ विलेपतुः ॥ ७५

वृद्धावूचतुः—

यथा पुत्रवियोगेन मृत्युर्नौ विहितस्तथा । त्वं चापि पाप पुत्रस्य वियोगान्मृत्युमाप्स्यसि ॥ ७६

ब्रह्मोवाच—

एवं तु जल्पतोर्ब्रह्मन्गताः प्राणास्ततो नृपः । अग्निना योजयामास वृद्धौ च ऋषिपुत्रकम् ॥७७
ततो जगाम नगरं दुःखितो नृपतिर्मुने । वसिष्ठाय च तत्सर्वं न्यवेदयदशेषतः ॥ ७८
नृपाणां सूर्यवंश्यानां वसिष्ठो हि परा गतिः । वसिष्ठोऽपि द्विजश्रेष्ठैः संमन्त्र्याऽऽह च निष्कृतिम्

वसिष्ठ उवाच—

गालवं वामदेवं च जाबालिमथ कश्यपम् । एतानन्यान्समाहूय हयमेधाय यत्नतः ॥ ८०
यजस्व हयमेधैश्च बहुभिर्बहुदक्षिणैः ॥ ८१

---

१ क. तु ब्रुवतो° ।

ब्रह्मोवाच—

अकरोद्धयमेधांश्च राजा दशरथो द्विजैः । एतस्मिन्नन्तरे तत्र वागुवाचाशरीरिणी ॥ ८२

आकाशवाण्युवाच—

पूतं शरीरमभवद्राज्ञो दशरथस्य हि । व्यवहार्यश्च भविता भविष्यन्ति तथा सुताः ॥

ज्येष्ठपुत्रप्रसादेन राजाऽपापो भविष्यति ॥ ८३

ब्रह्मोवाच—

ततो बहुतिथे काले ऋष्यशृङ्गान्मुनीश्वरात् । देवानां कार्यसिद्ध्यर्थं सुता आसन्सुरोपमाः ॥८४

कौशल्यायां तथा रामः सुमित्रायां च लक्ष्मणः । शत्रुघ्नश्चापि कैकेय्यां भरतो मतिमत्तरः ॥८५

ते सर्वे मतिमन्तश्च प्रिया राज्ञो वशे स्थिताः । तं राजानमृषिः प्राप्य विश्वामित्रः प्रजापतिः ॥

रामं च लक्ष्मणं चापि अयाचत महामते । यज्ञसंरक्षणार्थाय ज्ञाततन्महिमा मुनिः ॥ ८७

चिरप्राप्तसुतो वृद्धो राजा नैवेत्यभाषत ॥ ८८

राजोवाच—

महता दैवयोगेन कथंचिद्वार्धके मुने । जातावानन्दसंदोहदायकौ मम बालकौ ॥ ८९

सशरीरमिदं राज्यं दास्ये नैव सुताविमौ ॥ ९०

ब्रह्मोवाच—

वसिष्ठेन तदा प्रोक्तो राजा दशरथस्त्विति ॥ ९१

वसिष्ठ उवाच—

रघवः प्रार्थनाभङ्गं न राजन्कापि शिक्षिताः ॥ ९२

ब्रह्मोवाच—

रामं च लक्ष्मणं चैव कथंचिदवदन्नृपः ॥ ९३

राजोवाच—

विश्वामित्रस्य ब्रह्मर्षेः कुरुतां(तं) यज्ञरक्षणम् ॥ ९४

ब्रह्मोवाच—

वदन्निति सुतौ सोष्णं निश्वसन्ग्लपिताधरः । पुत्रौ समर्पयामास विश्वामित्रस्य शास्त्रकृत् ॥ ९५

तथेत्युक्त्वा दशरथं नमस्य च पुनः पुनः । जग्मतू रक्षणार्थाय विश्वामित्रेण तौ मुदा ॥ ९६

ततः प्रहृष्टः स मुनिर्मुदा प्रादात्तदोभयोः । माहेश्वरीं महाविद्यां धनुर्विद्यापुरःसराम् ॥ ९७

शास्त्रीमास्त्रीं लौकिकीं च रथविद्यां गजोद्भवाम् । अश्वविद्यां गदाविद्यां मन्त्राह्वानविसर्जने॥९८

सर्वविद्यामथावाप्य उभौ तौ रामलक्ष्मणौ । वनौकसां हितार्थाय जघ्नतुस्ताटकां वने ॥ ९९

*अहल्यां शापनिर्मुक्तां पादस्पर्शाच्च चक्रतुः । यज्ञविध्वंसनायाताञ्जघ्नतुस्तत्र राक्षसान् ॥ १००

कृतविद्यौ धनुष्पाणी चक्रतुर्यज्ञरक्षणम् । ततो महामखे वृत्ते विश्वामित्रो मुनीश्वरः ॥ १०१

पुत्राभ्यां सहितो राज्ञो जनकं द्रष्टुमभ्यगात् । चित्रामदर्शयत्तत्र राजमध्ये नृपात्मजः ॥ १०२

रामः सौमित्रिसहितो धनुर्विद्यां गुरोर्मताम् । तत्प्रीतो जनकः प्रादात्सीतां लक्ष्मीमयोनिजाम्॥

---

* अयं श्लोकः क. घ. पुस्तकयोर्नास्ति ।

---

१ ङ. न. °स्त्रदृक् । २ घ. ङ. च. °हृष्टो गाधेयो मुदा । ३ घ. ङ. च. कृतास्त्रौ तौ ध° ।

तथैव लक्ष्मणस्यापि भरतस्यानुजस्य च(?) । शत्रुघ्नभरतादीनां वसिष्ठादिमते स्थितः ॥ १०४
राजा दशरथः श्रीमान्विवाहमकरोन्मुने । ततो बहुतिथे काले राज्यं तस्य प्रयच्छति ॥ १०५
नृपतौ सर्वलोकानामनुमत्या गुरोरपि । मन्थरात्मकदुर्दैवप्रेरिता मत्सराकुला ॥ १०६
कैकेयी विघ्नमातस्थे वनप्रव्राजनं तथा । भरतस्य च तद्राज्यं राजा नैव च दत्तवान् ॥ १०७
पितरं सत्यवाक्यं तं कुर्वन्रामो महावनम् । विवेश सीतया सार्धं तथा सौमित्रिणा सह ॥ १०८
सतां च मानसं शुद्धं स विवेश स्वकैर्गुणैः । तस्मिन्विनिर्गते रामे वनवासाय दीक्षिते ॥ १०९
समं लक्ष्मणसीताभ्यां राज्यतृष्णाविवर्जिते । तं रामं चापि सौमित्रिं सीतां च गुणशालिनीम् ॥
दुःखेन महताऽऽविष्टो ब्रह्मशापं च संस्मरन् । तदा दशरथो राजा प्राणांस्तत्याज दुःखितः ॥
कृतकर्मविपाकेन राजा नीतो यमानुगैः । *[1]तस्मै राज्ञे महाप्राज्ञ यावत्स्थावरजङ्[2]मे ॥ ११२
यमसद्मन्यनेकानि तामिस्रादीनि नारद । नरकाण्यथ घोराणि भीषणानि बहूनि च ॥ ११३
तत्र क्षिप्तस्तदा राजा नरकेषु पृथक्पृथक् । पच्यते छिद्यते राजा [3]पिष्यते चूर्ण्यते तथा ॥ ११४
शोष्यते दश्यते भूयो दह्यते च निमज्ज्यते । एवमादिषु घोरेषु नरकेषु स पच्यते ॥ ११५
रामोऽपि गच्छन्नध्वानं चित्रकूटमर्थागमत् । तत्रैव त्रीणि वर्षाणि व्यतीतानि महामते ॥ ११६
पुनः स दक्षिणामाशामाक्रामद्दण्डकं वनम् । विख्यातं त्रिषु लोकेषु देशानां तद्धि पुण्यदम् ११७
प्राविशत्तन्महारण्यं भीषणं दैत्यसेवितम् । तद्भयादृषिभिस्त्यक्तं हत्वा दैत्यांस्तु राक्षसान् ॥ ११८
विचरन्दण्डकारण्ये ऋषिसेव्यमथाकरोत् । तत्रेदं वृत्तमाख्यास्ये शृणु नारद यत्नतः ॥ ११९
तावच्छनैस्त्वगाद्रामो यावद्योजनपञ्चकम् । गौतमीं समनुप्राप्तो राजाऽपि नरके स्थितः ॥ १२०
यमः स्वकिंकरानाह रामो दशरथात्मजः । गौतमीमभितो याति पितरं तस्य धीमतः ॥ १२१
आकर्षन्त्वथ राजानं नरकान्नात्र संशयः । उत्तीर्य गौतमीं याति यावद्योजनपञ्चकम् ॥ १२२
रामस्तावत्तस्य पिता नरके नैव पच्यताम् । यदेतन्मद्वचः पुण्यं न कुर्युर्यदि दूतकाः ॥ १२३
ततश्च नरके घोरे यूयं सर्वे निमज्जथ । या काऽप्युक्ता परा शक्तिः शिवस्य समवायिनी ॥ १२४
तामेव गौतमीं सन्तो वदन्त्यम्भःस्वरूपिणीम् । हरिब्रह्ममहेशानां मान्या वन्द्या च सैव यत् १२५
निस्तीर्यते न केनापि तदतिक्रमजं त्वघम् । पापिनोऽप्यात्मजः कश्चिद्यश्च(स्य) गङ्गामनुस्मरेत् ॥
सोऽनेकदुर्गनिरयान्निर्गतो मुक्ततां व्रजेत् । किं पुनस्तादृशः पुत्रो गौतमीनिकटे स्थितः ॥ १२७
यस्यासौ नरके पक्तुं न कैरपि हि शक्यते । दक्षिणाशापतेर्वाक्यं निशम्य यमकिंकराः ॥ १२८
नरके पच्यमानं तमयोध्याधिपतिं नृपम् । उत्तार्य घोरनरकाद्वचनं चेदमब्रुवन् ॥ १२९

यमकिंकरा ऊचुः—

धन्योऽसि नृपशार्दूल यस्य पुत्रः स तादृशः । इह चामुत्र विश्रान्तिः सुपुत्रः केन लभ्यते ॥ १३०

ब्रह्मोवाच—

स विश्रान्तः शनैं राजा किंकरान्वाक्यमब्रवीत् ॥ १३१

राजोवाच—

नरकेष्वथ घोरेषु पच्यमानः पुनः पुनः । कथं त्वाकर्षितः शीघ्रं तन्मे वक्तुमिहार्हथ ॥ १३२

---

* इदमर्धमसंगतम् ।

---

१ ङ. च. तस्मिन्राज्ञि महाप्राज्ञे या° । २ घ. ङ. च °ङ्गमम् । य° । ३ क. घ. पेष्यते । ४ घ. ङ. °थाभ्यगात् ।

ब्रह्मोवाच—

तत्र कश्चिच्छान्तमना राजानमिदमब्रवीत् ॥ १३३

यमदूत उवाच—

वेदशास्त्रपुराणादावेतद्गोप्यं प्रयत्नतः । प्रकाश्यते तदपि ते सामर्थ्यं पुत्रतीर्थयोः ॥ १३४
रामस्तव सुतः श्रीमान्गौतमीतीरमागतः । तस्मात्त्वं नरकाद्धोरादाकृष्टोऽसि नरोत्तम ॥ १३५
यदि त्वां तत्र गौतम्यां स्मरेद्रामः सलक्ष्मणः । स्नानं कृत्वाऽथ पिण्डादि ते दद्यात्स नृपोत्तम॥
ततस्त्वं सर्वपापेभ्यो मुक्तो यासि त्रिविष्टपम् ॥ १३६

राजोवाच—

तत्र गत्वा भवद्वाक्यमाख्यास्ये स्वसुतौ प्रति । भवन्त एव शरणमनुज्ञां दातुमर्हथ ॥ १३७

ब्रह्मोवाच—

तद्राजवचनं श्रुत्वा कृपया यमकिंकराः । आज्ञां च प्रददुस्तस्मै राजा प्रागात्सुतौ प्रति ॥ १३८
भीषणं यातनादेहमापन्नो निःश्वसन्मुहुः । [1]निरीक्ष्य स्वं लज्जमानः कृतं कर्म च संस्मरन् १३९
स्वेच्छया विहरन्गङ्गामाससाद च राघवः । गौतम्यास्तटमाश्रित्य रामो लक्ष्मण एव च ॥१४०
सीतया सह वैदेह्या सस्नौ चैव यथाविधि । नैव तत्राभवद्भोज्यं भक्ष्यं वा गौतमीतटे॥ १४१
तद्दिने तत्र वसतां गौतमीतीरवासिनाम् । तद्दृष्ट्वा दुःखितो भ्राता लक्ष्मणो राममब्रवीत् ॥ १४२

लक्ष्मण उवाच—

पुत्रौ दशरथस्याऽऽवां तवापि बलमीदृशम् । नास्ति भोज्यमथास्माकं गङ्गातीरनिवासिनाम् ॥

राम उवाच—

भ्रातर्यद्विहितं कर्म नैव तच्चान्यथा भवेत् । पृथिव्यामन्नपूर्णायां वयमन्नाभिलाषिणः ॥ १४४
सौमित्रे नूनमस्माभिर्न ब्राह्मणमुखे हुतम् । अवज्ञया महीदेवांस्तर्पयन्त्यर्चयन्ति न ॥ १४५
ते वै लक्ष्मण जायन्ते सर्वदैव बुभुक्षिताः । स्नात्वा देवानथाभ्यर्च्य होतव्यश्च हुताशनः ॥
ततः स्वैसमये देवो विधास्यत्यशनं तु नौ ॥ १४६

ब्रह्मोवाच—

भ्रात्रोः संजल्पतोरेवं पश्यतोः कर्मणो गतिम् । शनैर्दशरथो राजा तं देशमुपजग्मिवान् ॥ १४७
तं दृष्ट्वा लक्ष्मणः शीघ्रं तिष्ठ तिष्ठेति चाब्रवीत् । धनुराकृष्य कोपेन रक्षस्त्वं दानवोऽथवा ॥
आसन्नं च पुनर्दृष्ट्वा याहि यात्यत्र पुण्यभाक् । रामो दाशरथी राजा धर्मभाक्पश्य वर्तते ॥
गुरुभक्तः सत्यसंधो देवब्राह्मणसेवकः । त्रैलोक्यरक्षादक्षोऽसौ वर्तते यत्र राघवः ॥ १५०
न तत्र त्वादृशामस्ति प्रवेशः पापकर्मणाम् । यदि प्रविशसे पाप ततो वधमवाप्स्यसि ॥ १५१
तत्पुत्रवचनं श्रुत्वा शनैराहूय वाचया । उवाचाधोमुखो भूत्वा स्नुषां पुत्रौ कृताञ्जलिः ॥
मुहुरन्तर्विनिध्यायन्गतिं दुष्कृतकर्मणः ॥ १२२

राजोवाच—

अहं दशरथो राजा पुत्रौ मे शृणुतं वचः । तिसृभिर्ब्रह्महत्याभिर्वृतोऽहं दुःखमागतः ॥
छिन्नं पश्यत मे देहं नरकेषु च पातितम् ॥ १५३

---

१ घ. ङ. निनिन्दन्स्वं ल° । २ घ. ङ. च. पुत्रो दशरथस्य त्वं त° । ३ घ. च । ४ ङ. च. स्वयमथो । ५ ङ. च. पातित° ।

ब्रह्मोवाच—

ततः कृताञ्जली रामः सीतया लक्ष्मणेन च । भूमौ प्रणेमुस्ते सर्वे वचनं चैतदब्रुवन् ॥ १५४

सीतारामलक्ष्मणा ऊचुः—

कस्येदं कर्मणस्तात फलं नृपतिसत्तम ॥ १५५

ब्रह्मोवाच—

स च प्राह यथावृत्तं ब्रह्महत्यात्रयं तथा ॥ १५६

राजोवाच—

निष्कृतिर्ब्रह्महन्तॄणां पुत्रौ क्वापि न विद्यते ॥ १५७

ब्रह्मोवाच—

ततो दुःखेन महताऽऽवृताः सर्वे भुवं गताः । राजानं वनवासं च मातरं पितरं तथा ॥ १५८
दुःखागमं कर्मगतिं नरके पातनं तथा । एवमाद्यथ संस्मृत्य मुमोह नृपतेः सुतः ॥
विसंज्ञं नृपतिं दृष्ट्वा सीता वाक्यमथाब्रवीत् ॥ १५९

सीतोवाच—

न शोचन्ति महात्मानस्त्वादृशा व्यसनागमे । चिन्तयन्ति प्रतीकारं दैव्यमप्यथ मानुषम् ॥१६०
शोचद्भिर्युगसाहस्रं विपत्तिर्नैव तीर्यते । व्यामोहमाप्नुवन्तीह न कदाचिद्विचक्षणाः ॥ १६१
किमनेनात्र दुःखेन निष्फलेन जनेश्वर । देहि हत्यां प्रथमतो या जाता ह्यतिभीषणा ॥ १६२
पितृभक्तः पुण्यशीलो वेदवेदाङ्गपारगः । अनागा यो हतो विप्रस्तत्पापस्यात्र निष्कृतिम् ॥१६३
आचरामि यथाशास्त्रं मा शोकं कुरुतं युवाम् । द्वितीयां लक्ष्मणो हत्यां गृह्णातु त्वपरां भवान् ॥

ब्रह्मोवाच—

एतद्धर्मयुतं वाक्यं सीतया भाषितं दृढम् । तथेति चाऽऽहतुरुभौ ततो दशरथोऽब्रवीत् ॥ १६५

दशरथ उवाच—

त्वं हि ब्रह्मविदः कन्या जनकस्य त्वयोनिजा । भार्या रामस्य किं चित्रं यद्युक्तमनुभाषसे १६६
न कोऽपि भवतां किंतु श्रमः स्वल्पोऽपि विद्यते । गौतम्यां स्नानदानेन पिण्डनिर्वपणेन च १६७
तिसृभिर्ब्रह्महत्याभिर्मुक्तो यामि त्रिविष्टपम् । त्वया जनकसंभूते स्वकुलोचितमीरितम् ॥ १६८
प्रापयन्ति परं पारं भवाब्धेः कुलयोषितः । गोदावर्याः प्रसादेन किं नामास्त्यत्र दुर्लभम् १६९

ब्रह्मोवाच—

तथेति क्रियमाणे तु पिण्डदानाय शत्रुहा । नैवापश्यद्भक्ष्यभोज्यं ततो लक्ष्मणमब्रवीत् ॥ १७०
लक्ष्मणः प्राह विनयादिङ्गुद्याश्च फलानि च । सन्ति तेषां च पिण्याकमानीतं तत्क्षणादिव १७१
पिण्याकेनाथ गङ्गायां पिण्डं दातुं तथा पितुः । मनः कुर्वंस्ततो रामो मन्दोऽभूद्दुःखितस्तदा १७२
दैवी वागभवत्तत्र दुःखं त्यज नृपात्मज । राज्यभ्रष्टो वनं प्राप्तः किं वै निष्किंचनो भवान् १७३
अशठो धर्मनिरतो न शोचितुमिहार्हसि । वित्तशाठ्येन यो धर्मं करोति स तु पातकी ॥ १७४
श्रूयते सर्वशास्त्रेषु यद्राम शृणु यत्नतः । यदन्नः पुरुषो राजंस्तदन्नास्तस्य देवताः ॥ १७५
पिण्डे निपतिते भूमौ नापश्यत्पितरं तदा । शवं च पतितं यत्र शवतीर्थमनुत्तमम् ॥ १७६

---

१ घ. ङ. च. भूमिं ।

महापातकसंघातविघातकृदनुस्मृतिः । तत्राऽऽगच्छँल्लोकपाला रुद्रादित्यास्तथाऽश्विनौ ॥ १७७
स्वं स्वं विमानमारूढास्तेषां मध्येऽतिदीप्तिमान् । विमानवरमारूढः स्तूयमानश्च किंनरैः ॥१७८
आदित्यसदृशाकारस्तेषां मध्ये बभौ पिता । तमदृष्ट्वा स्वपितरं देवान्दृष्ट्वा विमानिनः ॥ १७९
कृताञ्जलिपुटो रामः पिता मे क्वेत्यभाषत । इति(ततो) दिव्याऽभवद्वाणी रामं संबोध्य सीतया
तिसृभिर्ब्रह्महत्याभिर्मुक्तो दशरथो नृपः । वृतं पश्य सुरैस्तात देवा अप्यूचिरे च तम् ॥ १८१

देवा ऊचुः—

धन्योऽसि कृतकृत्योऽसि राम स्वर्गं गतः पिता । नानानिरयसंघातात्पूर्वजानुद्धरेत्तु यः ॥ १८२
स धन्योऽलंकृतं तेन कृतिना भुवनत्रयम् । एनं पश्य महाबाहो मुक्तपापं रविप्रभम् ॥ १८३
सर्वसंपत्तियुक्तोऽपि पापी दग्धद्रुमोपमः । निष्किंचनोऽपि सुकृती दृश्यते चन्द्रमौलिवत् ॥ १८४

ब्रह्मोवाच—

दृष्ट्वाऽब्रवीत्सुतं राजा आशीर्भिरभिनन्द्य च ॥ १८५

राजोवाच—

कृतकृत्योऽसि भद्रं ते तारितोऽहं त्वयाऽनघ । धन्यः स पुत्रो लोकेऽस्मिन्पितॄणां यस्तु तारकः

ब्रह्मोवाच—

ततः सुरगणाः प्रोचुर्देवानां कार्यसिद्धये । रामं च पुरुषश्रेष्ठं गच्छ तात यथासुखम् ॥
ततस्तद्वचनं श्रुत्वा रामस्तानब्रवीत्सुरान् ॥ १८७

राम उवाच—

गुरौ पितरि मे देवाः किं कृत्यमवशिष्यते ॥ १८८

देवा ऊचुः—

नदी न गङ्गया तुल्या न त्वया सदृशः सुतः । न शिवेन समो देवो न तारेण समो मनुः १८९
त्वया राम गुरूणां च कार्यं सर्वमनुष्ठितम् । तारिताः पितरो राम त्वया पुत्रेण मानद ॥
गच्छन्तु सर्वे स्वस्थानं त्वं च गच्छ यथासुखम् ॥ १९०

ब्रह्मोवाच—

तद्देववचनाद्धृष्टः सीतया लक्ष्मणाग्रजः । तदृष्ट्वा गङ्गामाहात्म्यं विस्मितो वाक्यमब्रवीत् ॥ १९१

राम उवाच—

अहो गङ्गाप्रभावोऽयं त्रैलोक्ये नोपमीयते । वयं धन्या यतो गङ्गा दृष्टाऽस्माभिस्त्रिपावनी ॥१९२

ब्रह्मोवाच—

हर्षेण महता युक्तो देवं स्थाप्य महेश्वरम् । तं षोडशभिरीशानमुपचारैः प्रयत्नतः ॥ १९३
संपूज्याऽऽवरणैर्युक्तं षट्त्रिंशत्कलमीश्वरम् । कृताञ्जलिपुटो भूत्वा रामस्तुष्टाव शंकरम् ॥ १९४

राम उवाच—

नमामि शंभुं पुरुषं पुराणं नमामि सर्वज्ञमपारभावम् ।
नमामि रुद्रं प्रभुमक्षयं तं नमामि शर्वं शिरसा नमामि ॥ १९५
नमामि देवं परमव्ययं तमुमापतिं लोकगुरुं नमामि ।
नमामि दारिद्र्यविदारणं तं नमामि रोगापहरं नमामि ॥ १९६

---

१ च. सुराणां ।

नमामि कल्याणमचिन्त्यरूपं नमामि विश्वोद्भवबीजरूपम् ।
नमामि विश्वस्थितिकारणं तं नमामि संहारकरं नमामि ॥ १९७
नमामि गौरीप्रियमव्ययं तं नमामि नित्यं क्षरमक्षरं तम् ।
नमामि चिद्रूपममेयभावं त्रिलोचनं तं शिरसा नमामि ॥ १९८
नमामि कारुण्यकरं भवस्य भयंकरं वाऽपि सदा नमामि ।
नमामि दातारमभीप्सितानां नमामि सोमेशमुमेशमादौ ॥ १९९
नमामि[1] वेदत्रयलोचनं तं नमामि मूर्तित्रयवर्जितं तम् ।
नमामि पुण्यं सदसद्व्यतीतं नमामि तं पापहरं नमामि ॥ २००
नमामि विश्वस्य हिते रतं तं नमामि रूपाणि बहूनि धत्ते ।
यो विश्वगोप्ता सदसत्प्रणेता नमामि तं विश्वपतिं नमामि ॥ २०१
यज्ञेश्वरं संप्रति हव्यकव्यं तथा गतिं लोकसदाशिवो यः ।
आराधितो यश्च ददाति सर्वं नमामि दानप्रियमिष्टदेवम् ॥ २०२
नमामि सोमेश्वरमस्वतन्त्रमुमापतिं तं विजयं नमामि ।
नमामि विघ्नेश्वरनन्दिनाथं पुत्रप्रियं तं शिरसा नमामि ॥ २०३
नमामि देवं भवदुःखशोकविनाशनं चन्द्रधरं नमामि ।
नमामि गङ्गाधरमीशमीड्यमुमाधवं देववरं नमामि ॥ २०४
नमाम्यजादीशपुरंदरादिसुरासुरैरर्चितपाद[2]पद्मम् ।
नमामि देवीमुखवादनानामीक्षार्थमक्षित्रितयं य ऐच्छत् ॥ २०५
पञ्चामृतैर्गन्धसुधूपदीपैर्विचित्रपुष्पैर्विविधैश्च मन्त्रैः ।
अन्नप्रकारैः सकलोपचारैः संपूजितं सोममहं नमामि ॥ २०६

ब्रह्मोवाच—

ततः स भगवानाह रामं शंभुः सलक्ष्मणम् । वरान्वृणीष्व भद्रं ते रामः प्राह वृषध्वजम् ॥ २०७

राम उवाच—

स्तोत्रेणानेन ये भक्त्या तोष्यन्ति त्वां सुरोत्तम । तेषां सर्वाणि कार्याणि[3] सिद्धिं यान्तु महेश्वर
येषां च पितरः शंभो पतिता नरकार्णवे । [4]तेषां पिण्डादिदानेन पूता यान्तु त्रिविष्टपम् ॥ २०९
जन्मप्रभृति पापानि (यच्चापि) मनोवाक्कायिकं[5] त्वघम् । अत्र तु स्नानमात्रेण [6]तत्सद्यो नाशमाप्नुयात्
अत्र ये भक्तितः शंभो ददत्यर्थिभ्य अण्वपि । सर्वं तदक्षयं शंभो [7]दातॄणां फलकृद्भवेत् ॥ २११

ब्रह्मोवाच—

एवमस्त्विति तं रामं शंकरो हृषितोऽब्रवीत् । [8]गते तस्मिन्सुरश्रेष्ठे रामोऽप्यनु[9]चरैः सह ॥ २१२
गौतमी यत्र चोत्पन्ना शनैस्तं देशमभ्यगात् । ततः प्रभृति तत्तीर्थं रामतीर्थमुदाहृतम् ॥ २१३
दयालोरपतत्त(त्र) त्र लक्ष्मणस्य कराच्छरः । तद्बाणतीर्थमभवत्सर्वापद्विनिवारणम् ॥ २१४
यत्र सौमित्रिणा स्नानं शंकरस्यार्चनं कृतम् । तत्तीर्थं लक्ष्मणं जातं तथा सीतासमुद्भवम् ॥ २१५

---

१ ङ. च. °मि देवत्र°। २ घ. ङ. च. °दयुग्मम् । ३ घ. ङ. च. °णि संसिद्धिं यान्तु शंकर । ४ घ. ङ. च. तेभ्यः। ५ क. °यिकानि च । अ°। ६ घ. ङ. च. तदर्थं । ७ घ. ङ. च. दातृभ्यः । ८ घ. ङ. च. याते । ९ घ. ङ. च. °नुगतैः स°।

नानाविधाशेषपापसंघनिर्मूलनक्षमम् । यदङ्घ्रिसङ्गादभवद्गङ्गा त्रैलोक्यपावनी ॥ २१६
स यत्र स्नानमकरोत्तद्वैशिष्ट्यं किमुच्यते । तद्रामतीर्थसदृशं तीर्थं क्वापि न विद्यते ॥ २१७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये रामतीर्थादितीर्थवर्णनं
नाम त्रयोविंशाधिकशततमोऽध्यायः ॥ १२३ ॥
गौतमीमाहात्म्ये चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥
आदितः श्लोकानां समष्ट्यङ्काः—७०८०

अथ चतुर्विंशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—
पुत्रतीर्थमिति ख्यातं पुण्यतीर्थं तदुच्यते । सर्वान्कामानवाप्नोति यन्महिम्नः श्रुतेरपि ॥ १
तस्य स्वरूपं वक्ष्यामि शृणु यत्नेन नारद । दितेः पुत्राश्च दनुजाः परिक्षीणा यदाऽभवन् ॥
अदितेस्तु सुता ज्येष्ठाः सर्वभावेन नारद ॥ २
तदा दितिः पुत्रवियोगदुःखात्संस्पर्धमाना दनुमाजगाम । ३
दितिरुवाच—
क्षीणाः सुता आवयोरेव भद्रे किं कुर्महे कर्म लोके गरीयः ।
पश्यादितेर्वंशमभिन्नमुत्तमं सौराज्ययुक्तं यशसा जयश्रिया ॥ ४
जितारिमभ्युन्नतकीर्तिधर्मं मच्चित्तसंहर्षविनाशदक्षम् ।
समानभर्तृत्वसमानधर्मे समानगोत्रेऽपि समानरूपे ॥ ५
न जीवयेयं श्रियमुन्नतिं च जीर्णाऽस्मि दृष्ट्वा त्वदितिप्रसूतान् ।
कामप्यवस्थामनुयामि दुःस्थाऽदितेर्विलोक्याथ परां समृद्धिम् ॥
दावप्रवेशोऽपि सुखाय नूनं स्वप्नेऽप्यवेक्ष्या न सपत्नलक्ष्मीः ॥ ६
ब्रह्मोवाच—
एवं ब्रुवाणामतिदीनवक्त्रां विनिश्वसन्तीं परमेष्ठिपुत्रः ।
कृताभिपूजो विगतश्रमस्तां स सान्त्वयन्नाह मनोभिरामाम् ॥ ७
परमेष्ठिपुत्र उवाच—
खेदो न कार्यः समभीप्सितं यत्तत्प्राप्यते पुण्यत एव भद्रे ।
तत्साधनं वेत्ति महानुभावः प्रजापतिस्ते स तु वक्ष्यतीति ॥ ८
[*साध्व्येतत्सर्वभावेन प्रश्रयावनता सती ॥+ ९
ब्रह्मोवाच—
एवं ब्रुवाणां च दितिं दनुः प्रोवाच नारद]॥ १०
दनुरुवाच—
भर्तारं कश्यपं भद्रे तोषयस्व निजैर्गुणैः । तुष्टो यदि भवेद्भर्ता ततः कामानवाप्स्यसि ॥ ११

---

* अयं श्लोको ङ. पुस्तके नास्ति । + अत्र किंचित्त्रुटितमिति प्रतिभाति ।

---

१ घ. ङ. च. सम्यक्तीर्थं ।

ब्रह्मोवाच—

तथेत्युक्त्वा सर्वभावैस्तोषयामास कश्यपम् । दितिं प्रोवाच भगवान्कश्यपोऽथ प्रजापतिः ॥१२

कश्यप उवाच—

किं ददामि वदाभीष्टं दिते वरय सुव्रते ॥ १३

ब्रह्मोवाच—

दितिरप्याह भर्तारं पुत्रं बहुगुणान्वितम् । जेतारं सर्वलोकानां सर्वलोकनमस्कृतम् ॥ १४

येन जातेन लोकेऽस्मिन्भवेयं वीरपुत्रिणी । तं वरेयं सुरपतिरित्याह विनयान्विता ॥ १५

कश्यप उवाच—

उपदेक्ष्ये व्रतं श्रेष्ठं द्वादशाब्दफलप्रदम् । तत आगत्य ते गर्भमाधास्ये यन्मनोगतम् ॥
निष्पापतायां जातायां सिध्यन्ति हि मनोरथाः ॥ १६

ब्रह्मोवाच—

भर्तृवाक्याद्दितिः प्रीता तं नमस्याऽऽयतेक्षणा । उपदिष्टं व्रतं चक्रे भर्त्राऽऽदिष्टं यथाविधि ॥१७
तीर्थसेवापात्रदानव्रतचर्यादिवर्जिताः । कथमासादयिष्यन्ति प्राणिनोऽत्र मनोरथान् ॥ १८
ततश्चीर्णे व्रते तस्यां दित्यां गर्भमधारयत् । पुनः कान्तामथोवाच कश्यपस्तां दितिं रहः ॥ १९

कश्यप उवाच—

न प्राप्नुवन्ति यत्कामान्मुनयोऽपि तपस्थिताः । यथाविहितकर्माज्ञावज्ञया तच्छुचिस्मिते ॥ २०
निन्दितं च न कर्तव्यं संध्ययोरुभयोरपि । न स्वप्तव्यं न गन्तव्यं मुक्तकेशी च नो भव ॥ २१
भोक्तव्यं सुभगे नैव क्षुतं वा जृम्भणं तथा । संध्याकाले न कर्तव्यं भूतसंघसमाकुले ॥ २२
सान्तर्धानं सदा कार्यं हसितं तु विशेषतः । गृहान्तदेशे संध्यासु न स्थातव्यं कदाचन ॥ २३
मुशलोलूखलादीनि शूर्पपीठपिधानकम् । नैवातिक्रमणीयानि दिवा रात्रौ सदा प्रिये ॥ २४
उदक्शीर्षं तु शयनं न संध्यासु विशेषतः । वक्तव्यं नानृतं किंचिन्नान्यगेहाटनं तथा ॥ २५
कान्तादन्यो न वीक्ष्यस्तु प्रयत्नेन नरः क्वचित् । इत्यादिनियमैर्युक्ता यदि त्वमनुवर्तसे ॥
ततस्ते भविता पुत्रस्त्रैलोक्यैश्वर्यभाजनम् ॥ २६

ब्रह्मोवाच—

तथेति प्रतिजज्ञे सा भर्तारं लोकपूजितम् । गतश्च कश्यपो ब्रह्मन्नितश्चेतः सुरान्प्रति ॥ २७
दितेर्गर्भोऽपि ववृधे बलवान्पुण्यसंभवः । एतत्सर्वं मयो दैत्यो मायया वेत्ति तत्त्वतः ॥ २८
इन्द्रस्य सख्यमभवन्मयेन प्रीतिपूर्वकम् । मयो गत्वा रहः प्राह इन्द्रं स विनयान्वितः ॥ २९
दितेर्देनोरभिप्रायं व्रतं गर्भस्य वर्धनम् । तस्य वीर्यं च विविधं प्रीत्येन्द्राय न्यवेदयत् ॥ ३०
विश्वासैकगृहं मित्रमपायत्रासवर्जितम् । अर्जितं सुकृतं नानाविधं चेत्तदवाप्यते ॥ ३१

नारद उवाच—

नमुचेश्च प्रियो भ्राता मयो दैत्यो महाबलः । भ्रातृहन्त्रा कथं मैत्र्यं मयस्याऽऽसीत्सुरेश्वर ॥ ३२

ब्रह्मोवाच—

दैत्यानामधिपश्चाऽऽसीद्बलवान्नमुचिः पुरा । इन्द्रेण वैरमभवद्भीषणं लोमहर्षणम् ॥ ३३

१ ख. ङ. च. सर्वसैन्यानां । २ क. सुतं ब्रह्मन्निता° । ङ. सुरपतिमित्या° । ३ ङ. च. °ये तु प्री° ।

युद्धं हित्वा कदाचिन्द्रो गच्छन्तं तु शतक्रतुम् । दृष्ट्वा दैत्यपतिः शूरो नमुचिः पृष्ठतोऽन्वगात् ३४
तमायान्तमभिप्रेक्ष्य शचीभर्ता भयातुरः । ऐरावतं गजं त्यक्त्वा इन्द्रः फेनमथाऽऽविशत् ॥ ३५
स वज्रपाणिस्तरसा फेनेनैवाहनद्रिपुम् । नमुचिर्नाशमगमत्तस्य भ्राता मयोऽनुजः ॥ ३६
भ्रातृहन्तृविनाशाय तपस्तेपे मयो महत् । मायां च विविधामाप देवानामतिभीषणाम् ॥ ३७
वरांश्चावाप्य तपसा विष्णोर्लोकपरायणात् । दानशौण्डः प्रियालापी तदाऽभवदसौ मयः ॥ ३८
अग्नींश्च ब्राह्मणान्पूज्य जेतुमिन्द्रं कृतक्षणः । दातारं च तदाऽर्थिभ्यः स्तूयमानं च बन्दिभिः ३९
विदित्वा मघवा वायोर्मयं मायाविनं रिपुम् । उपक्रान्तं सुयुद्धाय विप्रो भूत्वा तमभ्यगात् ॥
शचीभर्ता मयं दैत्यं प्रोवाचेदं पुनः पुनः ॥ ४०

इन्द्र उवाच—

देहि दैत्यपते मह्यमर्थिनेऽपेक्षितं वरम् । त्वां श्रुत्वा दातृतिलकमागतोऽहं द्विजोत्तमः ॥ ४१

ब्रह्मोवाच—

मयोऽपि ब्राह्मणं मत्वाऽवदद्दत्तं मया तव । विचारयन्ति कृतिनो बह्वल्पं वा पुरोऽर्थिनि ॥ ४२
इत्युक्ते तु हरिः प्राह सख्यमिच्छे ह्यहं त्वया । इन्द्रं मयः पुनः प्राह किमनेन द्विजोत्तम ॥ ४३
न त्वया मम वैरं भोः स्वस्तीत्याह हरिर्मयम् । तत्त्वं वदेति स हरिर्दैत्येनोक्तः स्वकं वपुः ॥४४
दर्शयामास दैत्याय सहस्राक्षं यदुच्यते । ततः सविस्मयो दैत्यो मयो हरिमुवाच ह ॥ ४५

मय उवाच—

किमिदं वज्रपाणिस्त्वं तवायोग्या कृतिः सखे ॥ ४६

ब्रह्मोवाच—

परिष्वज्य विहस्याथ वृत्तमित्यब्रवीद्धरिः । केनापि साधयन्त्यत्र पण्डिताश्च समीहितम् ॥ ४७
ततः प्रभृति शक्रस्य मयेन महती ह्यभूत् । सुप्रीतिर्मुनिशार्दूल मयो हरिहितः सदा ॥ ४८
इन्द्रस्य भवनं गत्वा तस्मै सर्वं न्यवेदयत् । किं मे कृत्यमिति प्राह मयं मायाविनं हरिः ॥ ४९
हरये च मयो मायां प्रादात्प्रीत्या तथा हरिः । प्राप्तः संप्रीतिमानाह किं कृत्यं मय तद्वद ॥५०

मय उवाच—

अगस्त्यस्याऽऽश्रमं गच्छ तत्राऽऽस्ते गर्भिणी दितिः। तस्याः शुश्रूषणं कुर्वन्नास्स्व तत्र कियन्ति च
अहानि मघवंस्तस्या गर्भमाविश्य वज्रधृक् । वर्धमानं च तं छिन्धि यावद्वश्योऽथवा मृतिम् ॥
प्राप्नोति तावद्वज्रेण ततो न भविता रिपुः ॥ ५२

ब्रह्मोवाच—

तथेत्युक्त्वा मयं पूज्य मघवानेक एव हि । विनीतवत्तदा प्रायाद्दितिं मातरमञ्जसा ॥ ५२
शुश्रूषमाणस्तां देवीं शक्रो दैतेयमातरम् । सा न जानाति तच्चित्तं शक्रस्य द्विषतो दितिः ॥५३
गर्भे स्थितं तु यद्भूतं देवेन्द्रस्य विचेष्टितम् । अमोघं तन्मुनेस्तेजः कश्यपस्य दुरासदम् ॥ ५४
ततः प्रगृह्य कुलिशं सहस्राक्षः पुरंदरः । अन्तःप्रवेशकामोऽसौ बहुकालं समावसन् ॥ ५५
संध्योदक्शीर्षनिद्रां तामवेक्ष्य कुलिशायुधः । इदमन्तरमित्युक्त्वा दित्याः कुक्षिं समाविशत् ॥
अन्तर्वर्ति च यद्भूतमिन्द्रं दृष्ट्वा धृतायुधम् । हन्तुकामं तदोवाच पुनः पुनरभीतवत् ॥ ५७

---

१ ङ. च. °क्रियामिन्द्रस्य । २ घ. °रः । गर्भैरेशमक° ।

गर्भस्थ उवाच—

किं मां न रक्षसे वज्रिन्भ्रातरं त्वं जिघांससि । नारणे मारणादन्यत्पातकं विद्यते महत् ॥ ५८
ऋते युद्धान्महाबाहो शक्र युध्यस्व निर्गते । मयि तस्मान्नैतदेवं तव युक्तं भविष्यति ॥ ५९
शतक्रतुः सहस्राक्षः शचीभर्ता पुरंदरः । वज्रपाणिः सुरेन्द्रस्त्वं ते न युक्तं भवेत्प्रभो ॥ ६०
अथवा युद्धकामस्त्वं मम निष्क्रमणं यथा । तथा कुरु महाबाहो मार्गादस्मादपासर ॥ ६१
कुमार्गे न प्रवर्तन्ते महान्तोऽपि विपद्गताः । अविद्यश्चाप्यशस्त्रश्च नैव चाऽऽयुधसंग्रहः ॥ ६२
त्वं विद्यावान्वज्रपाणे मां निघ्नन्किं न लज्जसे । कुर्वन्ति गर्हितं कर्म न कुलीनाः कदाचन॥ ६३
हत्वा वा किं तु जायेत यशो वा पुण्यमेव वा । वध्यन्ते भ्रातरः कामाद्गर्भस्थाः किं नु पौरुषम्
यदि वा युद्धभक्तिस्ते मयि भ्रातरसंशयम् । ततो मुष्टिं पुरस्कृत्य वज्रिणेऽसौ व्यवस्थितः॥ ६५
[+बालघाती[3] ब्रह्मघाती तथा विश्वासघातकः । एवंभूतं फलं शक्र कस्मान्मां हन्तुमुद्यतः ॥६६
यस्याऽऽज्ञया सर्वमिदं वर्तते सचराचरम् । स हन्ता बालकं मां वै किं यशः किंतु पौरुषम्]६७

ब्रह्मोवाच—

एवं ब्रुवन्तं तं गर्भं चिच्छेद कुलिशेन सः । क्रोधान्धानां लोभिनां च न घृणा क्वापि विद्यते॥
न ममार ततो दुःखादाहुस्ते भ्रातरो वयम् । पुनश्चिच्छेद तान्खण्डान्मा वधीरिति चाब्रुवन् ॥
विश्वस्तान्मातृगर्भस्थान्निजभ्रातॄञ्शतक्रतो । द्वेषविध्वस्तबुद्धीनां न चित्ते करुणाकणः ॥ ७०
एवं तु खण्डितं खण्डं हस्तपादादिजीववत् । निर्विकारं ततो दृष्ट्वा सप्तसप्त सुविस्मितः ॥ ७१
एकैकवद्बहुरूपाणि गर्भस्थानि शुभानि च । रुदन्ति बहुरूपाणि मा रुतेत्यब्रवीद्धरिः ॥ ७२
ततस्ते मरुतो जाता बलवन्तो महौजसः । गर्भस्था एव तेऽन्योन्यमूचुः शक्रं गतभ्रमाः ॥ ७३
अगस्त्यं मुनिशार्दूलं माता यस्याऽऽश्रमे स्थिता । अस्मत्पिता तव भ्राता सख्यं ते बहु मन्यते ॥
अस्मानुपरि सस्नेहं मनस्ते विद्महे मुने । न यत्करोति श्वपचः प्रवृत्तस्तत्र वज्रधृक् ॥ ७५
इत्येतद्वचनं श्रुत्वा अगस्त्योऽगात्ससंभ्रमः । दितिं संबोधयामास व्यथितां गर्भवेदनात् ॥ ७६
तत्रागस्त्यः शचीकान्तमशपत्कुपितो भृशम् ॥ ७७

अगस्त्य उवाच—

सङ्ग्रामे रिपवः पृष्ठं पश्येयुस्ते सदा हरे । जीवतामेव मरणमेतदेव हि मानिनाम् ॥
पृष्ठं पलायमानानां यत्पश्यन्त्यहिता रणे ॥ ७८

ब्रह्मोवाच—

साऽपि तं गर्भसंस्थं च शशापेन्द्रं रुषा दितिः ॥ ७९

दितिरुवाच—

न पौरुषं कृतं तस्माच्छापोऽयं भविता तव । स्त्रीभिः परिभवं प्राप्य राज्यात्प्रभ्रश्यसे हरे ॥८०

ब्रह्मोवाच—

एतस्मिन्नन्तरे तत्र कश्यपो वै प्रजापतिः । प्रायाच्च व्यथितोऽगस्त्याच्छ्रुत्वा शक्रविचेष्टितम् ॥
गर्भान्तरगतः शक्रः पितरं प्राह भीतवत् ॥ ८१

+ धनुश्चिह्नान्तर्गतः पाठो घ. च. पुस्तकयोर्नास्ति ।

---

१ घ. ङ. ° स्त्वं नैतद्युक्तं । २ ङ. च. मां । ३ ङ. °ती भ्रातृघा° । ४ क. °कस्य बहु° ।

शक्र उवाच—

अगस्त्याच्च दितेश्चैव बिभेमि क्रमितुं बहिः ॥ ८२

ब्रह्मोवाच—

एतस्मिन्नन्तरे प्राप्य कश्यपोऽपि प्रजापतिः । पुत्रकर्म च तद्दृष्ट्वा गर्भान्तःस्थितिमेव च ॥
दितिशापमगस्त्यस्य श्रुत्वाऽसौ दुःखितोऽभवत् ॥ ८३

कश्यप उवाच—

निर्गच्छ शक्र पुत्रैतत्पापं किं कृतवानसि । न निर्मलकुलोत्पन्ना मनः कुर्वन्ति पातके ॥ ८४

ब्रह्मोवाच—

स निर्गतो वज्रपाणिः सव्रीडोऽधोमुखोऽब्रवीत् । तन्मूर्तिरेव वदति सदसच्चेष्टितं नृणाम् ॥ ८५

शक्र उवाच—

यदुक्तमत्र श्रेयः स्यात्तत्कर्ताऽहमसंशयम् ॥ ८६

ब्रह्मोवाच—

ततो ममान्तिकं प्रायाल्लोकपालैः स कश्यपः । सर्वं वृत्तमथोवाच पुनः पप्रच्छ मां सुरैः ॥ ८७
दितिगर्भस्य वै शान्तिं सहस्राक्षविशापताम् । गर्भस्थानां च सर्वेषामिन्द्रेण सह मित्रताम् ॥ ८८
तेषामारोग्यतां चापि शचीभर्तुरदोषताम् । अगस्त्यदत्तशापस्य विशापत्वमपि क्रमात् ॥ ८९
ततोऽहमब्रवं वाक्यं कश्यपं विनयान्वितम् । प्रजापते कश्यप त्वं वसुभिर्लोकपालकैः ॥ ९०
इन्द्रेण सहितः शीघ्रं गौतमीं याहि मानद । तत्र स्नात्वा महेशानं स्तुहि सर्वैः समन्वितः ॥ ९१
ततः शिवप्रसादेन सर्वं श्रेयो भवेदिति । तथेत्युक्त्वा जगामासौ कश्यपो गौतमीं तदा ॥ ९२
स्नात्वा तुष्टाव देवेशमेभिरेव पदक्रमैः । सर्वदुःखापनोदाय द्वयमेव प्रकीर्तितम् ॥
गौतमी वा पुण्यनदी शिवो वा करुणाकरः ॥ ९३

कश्यप उवाच—

पाहि शंकर देवेश पाहि लोकनमस्कृत । पाहि पावन वागीश पाहि पन्नगभूषण ॥ ९४
पाहि धर्म वृषारूढ पाहि वेदत्रयेक्षण । पाहि गोधरलक्ष्मीश पाहि शर्व गजाम्बर ॥ ९५
पाहि त्रिपुरहन्नाथ पाहि सोमार्धभूषण । पाहि यज्ञेश सोमेश पाह्यभीष्टप्रदायक ॥ ९६
पाहि कारुण्यनिलय पाहि मङ्गलदायक । पाहि प्रभव सर्वस्य पाहि पालक वासव ॥ ९७
पाहि भास्कर वित्तेश पाहि ब्रह्मनमस्कृत । पाहि विश्वेश सिद्धेश पाहि पूर्ण नमोऽस्तु ते ॥ ९८
घोरसंसारकान्तारसंचारोद्विग्नचेतसाम् । शरीरिणां कृपासिन्धो त्वमेव शरणं शिव ॥ ९९

ब्रह्मोवाच—

एवं संस्तुवतस्तस्य पुरतोऽभूद्वृषध्वजः । वरेण च्छन्दयामास कश्यपं तं प्रजापतिम् ॥ १००
कश्यपोऽपि शिवं प्राह विनीतवदिदं वचः । स प्राह विस्तरेणाथ इन्द्रस्य तु विचेष्टितम् ॥ १०१
शापं नाशं च पुत्राणां परस्परममित्रताम् । पापप्राप्तिं तु शक्रस्य शापप्राप्तिं तथैव च ॥
ततो वृषाकपिः प्राह दितिं चागस्त्यमेव च ॥ १०२

---

१ ङ. 'क्त्वा तैर्जगाम क' ।

शिव उवाच—

मरुतो ये भवत्पुत्राः पञ्चाशच्चैकवर्जिताः । सर्वे भवेयुः सुभगा भवेयुर्यज्ञभागिनः ॥ १०३
इन्द्रेण सहिता नित्यं वर्तयेयुर्मुदाऽन्विताः ॥ १०४
इन्द्रस्य तु हविर्भागो यत्र यत्र मखे भवेत् । आदौ तु मरुतस्तत्र भवेयुर्नात्र संशयः ॥ १०५
मरुद्भिः सहितं शक्रं न जयेयुः कदाचन । जेता भवेत्सर्वदैव सुखं तिष्ठ प्रजापते ॥ १०६
अद्यप्रभृति ये कुर्युरनयाद्भ्रातृघातनम् । वंशच्छेदो विपत्तिश्च नित्यं तेषां भविष्यति ॥ १०७

ब्रह्मोवाच—

अगस्त्यमृषिशार्दूलं शंभुरप्याह यत्नतः ॥ १०८

शंभुरुवाच—

न कुर्यास्त्वं च कोपं च शचीभर्तरि वै मुने । शमं व्रज महाप्राज्ञ मरुतस्त्वमरा *भवन् ॥ १०९

ब्रह्मोवाच—

दितिं चापि शिवः प्राह प्रसन्नो वृषभध्वजः ॥ ११०

शिव उवाच—

एको भूयान्मम सुतस्त्रैलोक्यैश्वर्यमण्डितः । इत्येवं चिन्तयन्ती त्वं तपसे नियताऽभवः ॥ १११
तदेतत्सफलं तेऽद्य पुत्रा बहुगुणाः शुभाः । अभवन्बलिनः शूरास्तस्माज्जहि मनोरुजम् ॥
अन्यानपि वरान्सुभ्रूर्याचस्व गतसंभ्रमा ॥ ११२

ब्रह्मोवाच—

तदेतद्वचनं श्रुत्वा देवदेवस्य सा दितिः । कृताञ्जलिपुटा नत्वा शंभुं वाक्यमथाब्रवीत् ॥ ११३

दितिरुवाच—

लोके यदेतत्परमं यत्पित्रोः पुत्रदर्शनम् । विशेषेण तु तन्मातुः प्रियं स्यात्सुरपूजित ॥ ११४
तत्रापि रूपसंपत्तिशौर्यविक्रमवान्भवेत् । एकोऽपि तनयः किंतु बहवश्चेत्किमुच्यते ॥ ११५
मत्पुत्रास्ते प्रभावाच्च जेतारो बलिनो ध्रुवम् । इन्द्रस्य भ्रातरः सत्यं पुत्राश्चैव प्रजापतेः ॥ ११६
अगस्त्यस्य प्रसादाच्च गङ्गायाश्च प्रसादतः । यत्र देव प्रसादस्ते तच्छुभं कोऽत्र संशयः ॥ ११७
कृतार्थाऽहं तथाऽपि त्वां भक्त्या विज्ञापयाम्यहम् । शृणुष्व देव वचनं कुरुष्व च जगद्धितम् ॥

ब्रह्मोवाच—

यदेत्युक्ता जगद्धात्रा दितिर्नम्राऽब्रवीदिदम् ॥ ११९

दितिरुवाच—

सन्ततिप्रापणं लोके दुर्लभं सुरवन्दित । विशेषेण प्रियं मातुः पुत्रश्चेत्किं नु वर्ण्यते ॥ १२०
स चापि गुणवाञ्श्रीमानायुष्मान्यदि जायते । किंतु स्वर्गेण [1]देवेश पारमेष्ठ्यपदेन वा ॥ १२१
सर्वेषामपि भूतानामिहामुत्र फलैषिणाम् । गुणवत्पुत्रसंप्राप्तिरभीष्टा सर्वदैव हि ॥
तस्मादाप्लवनादत्र क्रियतां समनुग्रहः ॥ १२२

शंकर उवाच—

महापापफलं चेदं यदेतदनपत्यता । स्त्रिया वा पुरुषस्यापि वन्ध्यत्वं यदि जायते ॥ १२३

---

* अडभाव आर्षः ।

---

१ घ. ङ. च. मोक्षेण ।

तदत्र स्नानमात्रेण तद्दोषो नाशमाप्नुयात्। स्नात्वा तत्र फलं दद्यात्स्तोत्रमेतच्च यः पठेत् ॥ १२४
स तु पुत्रमवाप्नोति[1] त्रिमासस्नानदानतः। अपुत्रिणी त्वत्र स्नानं कृत्वा पुत्रमवाप्नुयात् ॥ १२५
ऋतुस्नाता तु या काचित्तत्र स्नाता सुताँल्लभेत्। त्रिमासाभ्यन्तरं या तु गुर्विणी भक्तितस्त्विह ॥
फलैः स्नात्वा तु मां पश्येत्स्तोत्रेण स्तौति मां तथा। तस्याः शक्रसमः पुत्रो जायते नात्र संशयः
पितृदोषैश्च ये पुत्रं न लभन्ते दिते शृणु। धनापहारदोषैश्च तत्रैषा निष्कृतिः परा ॥ १२८
तत्रैषां पिण्डदानेन पितॄणां प्रीणनेन च। किंचित्सुवर्णदानेन ततः पुत्रो भवेद्ध्रुवम् ॥ १२९
ये न्यासाद्यपहर्तारो रत्नापह्नवकारकाः। श्राद्धकर्मविहीनाश्च तेषां वंशो न वर्धते ॥ १३०
दोषिणां तु परेतानां गतिरेषा भवेदिति। संततिर्जायतां श्लाघ्या जीवतां तीर्थसेवनात् ॥ १३१
संगमे दितिगङ्गायाः स्नात्वा सिद्धेश्वरं प्रभुम्। अनाद्यपारमजरं चित्सदानन्दविग्रहम् ॥ १३२
देवर्षिसिद्धगन्धर्वयोगीश्वरनिषेवितम्। लिङ्गात्मकं महादेवं ज्योतिर्मयमनामयम् ॥ १३३
पूजयित्वोपचारैश्च नित्यं भक्त्या यतव्रतः। स्तोत्रेणानेन यः स्तौति चतुर्दश्यष्टमीषु च ॥ १३४
यथाशक्त्या(क्ति) स्वर्णदानं ब्राह्मणानां च भोजनम्। यः करोत्यत्र गङ्गायां स पुत्रशतमाप्नुयात्
संप्राप्य सकलान्कामानन्ते शिवपुरं व्रजेत्। स्तोत्रेणानेन यः कश्चिद्यत्र क्वापि स्तवीति माम् ॥
षण्मासात्पुत्रमाप्नोति अपि वन्ध्याऽप्यशङ्कितम् ॥ १३६

ब्रह्मोवाच—

ततः प्रभृति तत्तीर्थं पुत्रतीर्थमुदाहृतम्। तत्र तु स्नानदानाद्यैः सर्वकामानवाप्नुयात् ॥ १३७
मरुद्भिः सह मैत्र्येण मित्रतीर्थं तदुच्यते। निष्पापत्वेन चेन्द्रस्य शक्रतीर्थं तदुच्यते ॥ १३८
ऐन्द्रीं श्रियं यत्र लेभे तत्तीर्थं कमलाभिधम्। एतानि सर्वतीर्थानि सर्वाभीष्टप्रदानि हि ॥ १३९
सर्वं भविष्यतीत्युक्त्वा शिवश्चान्तरधीयत। कृतकृत्याश्च ते जग्मुः सर्व एव यथागतम् ॥
तीर्थानां पुण्यदं तत्र लक्षमेकं प्रकीर्तितम् ॥ १४०

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभ्वृषिसंवादे तीर्थमाहात्म्ये पुत्रतीर्थादिलक्षतीर्थवर्णनं नाम चतुर्विंशाधिकशततमोऽध्यायः ॥ १२४ ॥

गौतमीमाहात्म्ये पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७२२१

अथ पञ्चविंशाधिकशततमोऽध्यायः।

ब्रह्मोवाच—

यमतीर्थमिति ख्यातं पितॄणां प्रीतिवर्धनम्। दृष्टादृष्टेष्टदं सर्वदेवर्षिगणसेवितम् ॥ १
तस्य प्रभावं वक्ष्यामि सर्वपापप्रणाशनम्। अनुह्राद इति ख्यातः कपोतो बलवानभूत् ॥ २
तस्य भार्या हेतिनाम्नी पक्षिणी कामरूपिणी। मृत्योः पौत्रो ह्यनुह्रादो दौहित्री हेतिरेव च ॥ ३
कालेनाथ तयोः पुत्राः पौत्राश्चैव बभूविरे। तस्य शत्रुश्च बलवानुलूको नाम पक्षिराट् ॥ ४
तस्य पुत्राश्च पौत्राश्च आग्नेयास्ते बलोत्कटाः। तयोश्च वैरमभवद्बहुकालं द्विजन्मनोः ॥ ५

---

१ क. °ति मासेन स्ना°। २ क. तिलैः। ३ ङ. च. °पहारका°। ४ घ. ङ. च. °रसहृजं चि°। ५ घ. ङ. च. स तु पुत्रमवाप्नु°। ६ क. °न्थ्या ह्यर्शातिका। त°। ७ घ. ङ. च. °र्थमिति श्रुतम्। ८ क. पुत्रो।

गङ्गाया उत्तरे तीरे कपोतस्याऽऽश्रमोऽभवत् । तस्याश्च दक्षिणे कूल उलूको नाम पक्षिराट् ॥ ६
वासं चक्रे तत्र पुत्रैः पौत्रैश्च द्विजसत्तम । तयोश्च युद्धमभवद्बहुकालं विरुद्धयोः ॥ ७
पुत्रैः पौत्रैश्च वृतयोर्बलिनोर्बलिभिः सह । उलूको वा कपोतो वा नैवाऽऽप्नोति जयाजयौ ॥ ८
कपोतो यममाराध्य मृत्युं पैतामहं तथा । याम्यमस्त्रमवाप्याथ सर्वेभ्योऽप्यधिकोऽभवत् ॥ ९
तथोलूकोऽग्निमाराध्य बलवानभवद्भृशम् । वरैरुन्मत्तयोर्युद्धमभवच्चातिभीषणम् ॥ १०
तत्राऽऽग्नेयमुलूकोऽपि कपोतायास्त्रमाक्षिपत् । कपोतोऽप्यथ पाशान्वै याम्यानाक्षिप्य शत्रवे ॥ ११
उलूकायाथ दण्डं च मृत्युपाशानवासृजत् । पुनस्तदभवद्युद्धं पुराऽऽडीबकयोर्यथा ॥ १२
हेतिः कपोतकी दृष्ट्वा ज्वलनं प्राप्तमन्तिके । पतिव्रता महायुद्धे भर्तुः सा दुःखविह्वला ॥ १३
अग्निना वेष्ट्यमानांश्च पुत्रान्दृष्ट्वा विशेषतः । सा गत्वा ज्वलनं हेतिस्तुष्टाव विविधोक्तिभिः ॥ १४

हेतिरुवाच—

रूपं न दानं न परोक्षमस्ति यस्याऽऽत्मभूतं च पदार्थजातम् ।
अश्नन्ति हव्यानि च येन देवाः स्वाहापतिं यज्ञभुजं नमस्ये ॥ १५

मुखभूतं च देवानां देवानां हव्यवाहनम् । होतारं चापि देवानां देवानां दूतमेव च ॥ १६
तं देवं शरणं यामि आदिदेवं विभावसुम् । अन्तःस्थितः प्राणरूपो बहिश्चान्नप्रदो हि यः ॥
यो यज्ञसाधनं यामि शरणं तं धनंजयम् ॥ १७

अग्निरुवाच—

अमोघमेतदस्त्रं मे न्यस्तं युद्धे कपोतकि । यत्र विश्रमयेदस्त्रं तन्मे ब्रूहि पतिव्रते ॥ १८

कपोत्युवाच—

मयि विश्रम्यतामस्त्रं न पुत्रे न च भर्तरि । सत्यवाग्भव हव्येश जातवेदो नमोऽस्तु ते ॥ १९

जातवेदा उवाच—

तुष्टोऽस्मि तव वाक्येन भर्तृभक्त्या पतिव्रते । तवापि भर्तृपुत्राणां हेति क्षेमं ददाम्यहम् ॥ २०
आग्नेयमेतदस्त्रं मे न भर्तारं सुतानपि । न त्वां दहेत्ततो याहि सुखेन त्वं कपोतकि ॥ २१

ब्रह्मोवाच—

एतस्मिन्नन्तरे तत्र उलूकी ददृशे पतिम् । वेष्ट्यमानं याम्यपाशैर्यमदण्डेन ताडितम् ॥
उलूकी दुःखिता भूत्वा यमं प्रायाद्भयातुरा ॥ २२

उलूक्युवाच—

त्वद्भीता अनुद्रवन्ते जनास्त्वद्भीता ब्रह्मचर्यं चरन्ति ।
त्वद्भीताः साधु चरन्ति धीरास्त्वद्भीताः कर्मनिष्ठा भवन्ति ॥ २३
त्वद्भीता अनाशकमाचरन्ति ग्रामादरण्यमभि यच्चरन्ति ।
त्वद्भीताः सौम्यतामाश्रयन्ते त्वद्भीताः सोमपानं भजन्ते ॥
त्वद्भीताश्चान्नगोदाननिष्ठास्त्वद्भीता ब्रह्मवादं वदन्ति ॥ २४

ब्रह्मोवाच—

एवं ब्रुवत्यां तस्यां तामाह दक्षिणदिक्पतिः ॥ २५

---

१ घ. ङ. गङ्गाया । २ घ. च. स्तुवत्यां ।

यम उवाच—

वरं वरय भद्रं ते दास्येऽहं मनसः प्रियम् ॥ २६

ब्रह्मोवाच—

यमस्येति वचः श्रुत्वा सा तमाह पतिव्रता ॥ २७

उलूक्युवाच—

भर्ता मे वेष्टितः पाशैर्दण्डेनाभिहतस्तव । तस्माद्रक्ष सुरश्रेष्ठ पुत्रान्भर्तारमेव च ॥ २८

ब्रह्मोवाच—

तद्वाक्यात्कृपया युक्तो यमः प्राह पुनः पुनः ॥ २९

यम उवाच—

पाशानां चापि दण्डस्य स्थानं वद शुभानने ॥ ३०

ब्रह्मोवाच—

सा प्रोवाच यमं देवं मयि पाशास्त्वयेरिताः । आविशन्तु जगन्नाथ दण्डो मय्येव संविशेत् ॥
ततः प्रोवाच भगवान्यमस्तां कृपया पुनः ॥ ३१

यम उवाच—

तव भर्ता च पुत्राश्च सर्वे जीवन्तु विज्वराः ॥ ३२

ब्रह्मोवाच—

न्यवारयद्यमः पाशानाग्नेयास्त्रं तु हव्यवाट् । कपोतोलूकयोश्चापि प्रीतिं वै चक्रतुः सुरौ ॥
आहतुश्च द्विजन्मानौ व्रियतां वर ईप्सितः ॥ ३३

पक्षिणावूचतुः—

भवतोर्दर्शनं लब्धं वैरव्याजेन दुष्करम् । वयं च पक्षिणः पापाः किं वरेण सुरोत्तमौ ॥ ३४
अथ देयो वरोऽस्माकं भवद्भ्यां प्रीतिपूर्वकम् । नाऽऽत्मार्थमनुयाचावो दीयमानं वरं शुभम्॥ ३५
आत्मार्थं यस्तु याचेत स शोच्यो हि सुरेश्वरौ । जीवितं सफलं तस्य यः परार्थोद्यतः सदा ३६
अग्निरापो रविः पृथ्वी धान्यानि विविधानि च । परार्थं वर्तनं तेषां सतां चापि विशेषतः॥३७
ब्रह्मादयोऽपि हि यतो युज्यन्ते मृत्युना सह । एवं ज्ञात्वा तु देवेशौ वृथा स्वार्थपरिश्रमः॥३८
जन्मना सह यत्पुंसां विहितं परमेष्ठिना । कदाचिन्नान्यथा तद्वै वृथा क्लिश्यन्ति जन्तवः ॥ ३९
तस्माद्याचावहे किंचिद्धिताय जगतां शुभम् । गुणदायि तु सर्वेषां तद्युवा(युवाभ्या)मनुमन्यताम्

ब्रह्मोवाच—

तावाहतुरुभौ देवौ पक्षिणौ लोकविश्रुतौ । धर्मस्य यशसोऽवाप्त्ये लोकाना हितकाम्यया ॥ ४१

पक्षिणावूचतुः—

आवाभ्यामाश्रमौ तीर्थे गङ्गाया उभये तटे । भवेतां जगतां नाथावेष एव परो वरः ॥ ४२
स्नानं दानं जपो होमः पितॄणां चापि पूजनम् । सुकृती दुष्कृती वाऽपि यः करोति यथा तथा ॥
सर्वं तदक्षयं पुण्यं स्यादित्येष परो वरः ॥ ४३

देवावूचतुः—

एवमस्तु तथाचान्यत्सुप्रीतौ तु ब्रवावहे ॥ ४४

---

१ क. °क्यार्ततया ।

यम उवाच—

उत्तरे गौतमीतीरे यमस्तोत्रं पठन्ति ये । तेषां सप्तसु वंशेषु नाकाले मृत्युमाप्नुयात् ॥ ४५
पुरुषो भाजनं च स्यात्सर्वदा सर्वसंपदाम् । यस्त्विदं पठते नित्यं मृत्युस्तोत्रं जितात्मवान्॥४६
अष्टाशीतिसहस्रैश्च व्याधिभिर्न स बाध्यते । अस्मिंस्तीर्थे द्विजश्रेष्ठौ त्रिमासाद्गुर्विणी सती ॥४७
अर्वाग्वन्ध्या च षण्मासात्सप्ताहं स्नानमाचरेत् । वीरसूः सा भवेन्नारी शतायुः स सुतो भवेत्॥
लक्ष्मीवान्मतिमाञ्शूरः पुत्रपौत्रविवर्धनः । तत्र पिण्डादिदानेन पितरो मुक्तिमाप्नुयुः ॥
मनोवाक्कायजात्पापात्स्नानान्मुक्तो भवेन्नरः ॥ ४९

ब्रह्मोवाच—

यमवाक्यादनु तथा हव्यवाडाह पक्षिणौ ॥ ५०

अग्निरुवाच—

मत्स्तोत्रं दक्षिणे तीरे ये पठन्ति यतव्रताः । तेषामारोग्यमैश्वर्यं लक्ष्मीं रूपं ददाम्यहम् ॥ ५१
इदं स्तोत्रं तु यः कश्चिद्यत्र क्वापि पठेन्नरः । नैवाग्नितो भयं तस्य लिखितेऽपि गृहे स्थिते ॥५२
स्नानं दानं च यः कुर्यादग्नितीर्थे शुचिर्नरः । अग्निष्टोमफलं तस्य भवेदेव न संशयः ॥ ५३

ब्रह्मोवाच—

ततः प्रभृति तत्तीर्थं याम्यमाग्नेयमेव च । कपोतं च तथोलूकं हेत्युलूकं विदुर्बुधाः ॥ ५४
तत्र त्रीणि सहस्राणि तावन्त्येव शतानि च । पुनर्नवतितीर्थानि प्रत्येकं मुक्तिभाजनम् ॥ ५५
तेषु स्नानेन दानेन प्रेतीभूताश्च ये नराः । पूतास्ते पुत्रवित्ताढ्या आक्रमेयुर्दिवं शुभाः ॥ ५६

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये यमाग्न्यादिनवत्युत्तरत्रिशताधिकत्रिसहस्रतीर्थवर्णनं नाम पञ्चविंशाधिकशततमोऽध्यायः ॥ १२५ ॥

गौतमीमाहात्म्ये षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७२७७

अथ षाड्विंशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

तपस्तीर्थमिति ख्यातं तपोवृद्धिकरं महत् । सर्वकामप्रदं पुण्यं पितॄणां प्रीतिवर्धनम् ॥ १
तस्मिंस्तीर्थे तु यद्वृत्तं शृणु पापप्रणाशनम् । अपामग्नेश्च संवादमृषीणां च परस्परम् ॥ २
अपो ज्येष्ठतमाः केचिन्मेनिरेऽग्निं तथाऽपरे । एवं ब्रुवन्तो मुनयः संवादं चाग्निवारिणोः ॥ ३
विनाऽग्निं जीवनं क्व स्याज्जीवभूतो यतोऽनलः । आत्मभूतो हव्यभूतश्चाग्निना जायतेऽखिलम् ४
अग्निना ध्रियते लोको ह्यग्निर्ज्योतिर्मयं जगत् । तस्मादग्नेः परं नास्ति पावनं दैवतं महत् ॥ ५
अन्तर्ज्योतिः स एवोक्तः परं ज्योतिः स एव हि । विनाऽग्निना किंचिदस्ति यस्य धाम जगत्रयम्
तस्मादग्नेः परं नास्ति भूतानां ज्यैष्ठ्यभाजनम् । योषित्क्षेत्रेऽर्पितं बीजं पुरुषेण यथा तथा ॥ ७
तस्य देहादिका शक्तिः कृशानोरेव नान्यथा । देवानां हि मुखं वह्निस्तस्मान्नातः परं विदुः ॥८

---

१ ङ. भवेत् । २ घ. ङ. ॰नां ज्येष्ठभा॰ । ३ घ. च. व्यक्तिः ।

अपरे तु ह्यपां ज्यैष्ठ्यं मेनिरे वेदवादिनः । अद्भिः संपत्स्यते ह्यन्नं शुचिरद्भिः प्रजायते ॥ ९
अद्भिरेव धृतं सर्वमापो वै मातरः स्मृताः । त्रैलोक्यजीवनं वारि वदन्तीति पुराविदः ॥ १०
उत्पन्नममृतं ह्यद्भ्यस्ताभ्यश्चौषधिसंभवः । अग्निर्ज्येष्ठ इति प्राहुरापो ज्येष्ठतमाः परे ॥ ११
एवं मीमांसमानास्ते ऋषयो वेदवादिनः । विरुद्धवादिनो मां च समभ्येत्येदमब्रुवन् ॥ १२

ऋषय ऊचुः—

अग्नेरपां वद ज्यैष्ठ्यं त्रैलोक्यस्य भवान्प्रभुः ॥ १३

ब्रह्मोवाच—

अहमप्यब्रवं प्राप्तानृषीन्सर्वान्यतव्रतान् । उभौ पूज्यतमौ लोक उभाभ्यां जायते जगत् ॥ १४
उभाभ्यां जायते हव्यं कव्यं चामृतमेव च । उभाभ्यां जीवनं लोके शरीरस्य च धारणम् १५
नानयोश्च विशेषोऽस्ति ततो ज्यैष्ठ्यं समं मतम् । ततो मद्वचनाज्ज्यैष्ठ्यमुभयोर्नैव कस्यचित् १६
ज्यैष्ठ्यमन्यतरस्येति मेनिरे ऋषिसत्तमाः । न तृप्ता मम वाक्येन जग्मुर्वायुं तपस्विनः ॥ १७

मुनय ऊचुः—

कस्य ज्यैष्ठ्यं भवान्प्राणो वायो सत्यं त्वयि स्थितम् ॥ १८

ब्रह्मोवाच—

वायुराहानलो ज्येष्ठः सर्वमग्नौ प्रतिष्ठितम् । नेत्युक्त्वाऽन्योन्यमृषयो जग्मुस्तेऽपि वसुंधराम् ॥ १९

मुनय ऊचुः—

सत्यं भूमे वद ज्यैष्ठ्यमाधाराऽसि चराचरे ॥ २०

ब्रह्मोवाच—

भूमिरप्याह विनयादागतांस्तानृषीनिदम् ॥ २१

भूमिरुवाच—

ममाप्याधारभूताः स्युरापो देव्यः सनातनाः । अद्भ्यस्तु जायते सर्वं ज्यैष्ठ्यमप्सु प्रतिष्ठितम् २२

ब्रह्मोवाच—

नेत्युक्त्वाऽन्योन्यमृषयो जग्मुः क्षीरोदशायिनम् । तुष्टुवुर्विविधैः स्तोत्रैः शङ्खचक्रगदाधरम् ॥ २३

ऋषय ऊचुः—

यो वेद सर्वं भुवनं भविष्यद्यज्जायमानं च गुहानिविष्टम् ।
लोकत्रयं चित्रविचित्ररूपमन्ते समस्तं च यमाविवेश ॥ २४
यदक्षरं शाश्वतमप्रमेयं यं वेदवेद्यमृषयो वदन्ति ।
यमाश्रिताः स्वेप्सितमाप्नुवन्ति तद्वस्तु सत्यं शरणं व्रजामः ॥ २५
भूतं महाभूतजगत्प्रधानं न विन्दते योगिनो विष्णुरूपम् ।
तद्ब्रूमेते ऋषयोऽत्र याताः सत्यं वदस्वेह जगन्निवास ॥ २६
त्वमन्तरात्माऽखिलदेहभाजां त्वमेव सर्वं त्वयि सर्वमीश ।
तथाऽपि जानन्ति न केऽपि कुत्राप्यहो भवन्तं प्रकृतिप्रभावात् ॥
अन्तर्बहिः सर्वत एव सन्तं विश्वात्मना संपरिवर्तमानम् ॥ २७

---

१ क. ङ. °न्तीह पु° । २ क. तुष्टा ।

ब्रह्मोवाच—

ततः प्राह जगद्धात्री दैवी वागशरीरिणी ॥ २८

दैवी वागुवाच—

उभावाराध्य तपसा भक्त्या च नियमेन च । यस्य स्यात्प्रथमं सिद्धिस्तद्भूतं ज्येष्ठमुच्यते ॥ २९

ब्रह्मोवाच—

तथेत्युक्त्वा ययुः सर्वे ऋषयो लोकपूजिताः । श्रान्ताः खिन्नान्तरात्मानः परं वैराग्यमाश्रिताः ॥

सर्वलोकैकजननीं भुवनत्रयपावनीम् । गौतमीमगमन्सर्वे तपस्तप्तुं यतव्रताः ॥ ३१

अब्दैवतं तथाऽग्निं च पूजनायोद्यतास्तदा । अग्नेश्च पूजका ये च अपां वै पूजने स्थिताः ॥

तत्र वागब्रवीद्दैवी वेदमाता सरस्वती ॥ ३२

दैवी वागुवाच--

अग्नेरापस्तथा योनिरद्भिः शौचमवाप्यते । अग्नेश्च पूजका ये च विनाऽद्भिः पूजनं कथम् ॥ ३३

अप्सु जातासु सर्वत्र कर्मण्यधिकृतो भवेत् । तावत्कर्मण्यनर्होऽयमशुचिर्मलिनो नरः ॥ ३४

न मग्नः श्रद्धया यावदप्सु शीतासु वेदवित् । तस्मादापो वरिष्ठाः स्युर्मातृभूता यतः स्मृताः ॥

तस्माज्ज्यैष्ठ्यमपामेव जनन्योऽग्नेर्विशेषतः ॥ ३५

ब्रह्मोवाच—

एतद्वचः शुश्रुवुस्ते ऋषयो वेदवादिनः । निश्चयं च ततश्चक्रुर्भवेज्ज्यैष्ठ्यमपामिति ॥ ३६

यत्र तीर्थे वृत्तमिदमृषिसत्रे च नारद । तपस्तीर्थं तु तत्प्रोक्तं सत्रतीर्थं तदुच्यते ॥ ३७

अग्नितीर्थं च तत्प्रोक्तं तथा सारस्वतं विदुः । तेषु स्नानं च दानं च सर्वकामप्रदं शुभम् ॥ ३८

चतुर्दश शतान्यत्र तीर्थानां पुण्यदायिनाम् । तेषु स्नानं च दानं च स्वर्गमोक्षप्रदायकम् ॥ ३९

कृतं संदेहहरणमृषीणां यत्र भाषया । सरस्वत्यभवत्तत्र गङ्गया संगता नदी ॥

माहात्म्यं तस्य को वक्तुं संगमस्य क्षमो नरः ॥ ४०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये तपस्तीर्थादिचतुर्दशशततीर्थवर्णनं नाम षड्विंशाधिकशततमोऽध्यायः ॥ १२६ ॥

गौतमीमाहात्म्ये सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७३१७

अथ सप्तविंशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

देवतीर्थमिति ख्यातं गङ्गाया उत्तरे तटे । तस्य प्रभावं वक्ष्यामि सर्वपापप्रणाशनम् ॥ १

आर्ष्टिषेण इति ख्यातो राजा सर्वगुणान्वितः । तस्य भार्या जया नाम साक्षाल्लक्ष्मीरिवापरा २

तस्य पुत्रो भरो नाम मतिमान्पितृवत्सलः । धनुर्वेदे च वेदे च निष्णातो दक्ष एव च ॥ ३

तस्य भार्या रूपवती सुप्रभेत्यभिविश्रुता । आर्ष्टिषेणस्ततो राजा पुत्रे राज्यं निवेश्य सः ॥ ४

---

१ च. मतः । २ क. °भूताः सनातनाः । त° ।

पुरोधसा च मुख्येन दीक्षां चक्रे नरेश्वरः । सरस्वत्यास्ततस्तीरे हयमेधाय यत्नवान् ॥ ५
ऋत्विग्भिर्ऋषिमुख्यैश्च वेदशास्त्रपरायणैः । दीक्षितं तं नृपश्रेष्ठं ब्राह्मणाग्निसमीपतः ॥ ६
मिथुर्दानवराट्शूरः पापबुद्धिः प्रतापवान् । मखं विध्वस्य नृपतिं सभार्यं सपुरोहितम् ॥ ७
आदाय वेगात्स प्रागाद्रसातलतलं मुने । नीते तस्मिन्नृपवरे यज्ञे नष्टे ततोऽमराः ॥ ८
ऋत्विजश्च ययुः सर्वे स्वं स्वं स्थानं मखात्ततः । पुरोहितसुतो राज्ञो देवापिरिति विश्रुतः ॥ ९
बालस्तां मातरं दृष्ट्वा आत्मनः पितरं न च । दृष्ट्वा सविस्मयो भूत्वा दुःखितोऽतीव चाभवत् १०
स मातरं तु पप्रच्छ पिता मे क्व गतोऽम्बिके । पितृहीनो न जीवेयं मातः सत्यं वदस्व मे ॥ ११
धिग्धिक्पितृविहीनानां जीवितं पापकर्मणाम् । न वक्षि यदि मे मातर्जलमग्निमथाऽऽविशे ॥ १२
पुत्रं प्रोवाच सा माता राज्ञो भार्या पुरोधसः । दानवेन तलं नीतो राज्ञा सह पिता तव ॥ १३

देवापिरुवाच—

क्व नीतः केन वा नीतः कथं नीतः क्व कर्मणि । केषु पश्यत्सु किं स्थानं दानवस्य वदस्व मे ॥ १४

मातोवाच—

दीक्षितं यज्ञसदसि सभार्यं सपुरोधसम् । राजानं तं मिथुर्दैत्यो नीतवान्स रसातलम् ॥
पश्यत्सु देवसंघेषु वह्निब्राह्मणसंनिधौ ॥ १५

ब्रह्मोवाच—

तन्मातृवचनं श्रुत्वा देवापिः कृत्यमस्मरत् । देवान्पश्येऽथवाऽग्निं वा ऋत्विजो वाऽसुरांस्तथा १६
एतेष्वेव पिताऽन्वेष्यो नान्यत्रेति मतिर्मम । इति निश्चित्य देवापिर्भरं प्राह नृपात्मजम् ॥ १७

देवापिरुवाच—

तपसा ब्रह्मचर्येण व्रतेन नियमेन च । आनेतव्या मया सर्वे नीता ये च रसातलम् ॥ १८
जाते पराभवे घोरे यो न कुर्यात्प्रतिक्रियाम् । नराधमेन किं तेन जीवता वा मृतेन वा ॥ १९
त्वं प्रशाधि महीं कृत्स्नामार्ष्टिषेणः पिता यथा । माता मम त्वया पाल्या राजन्यावन्ममाऽऽगतिः
भवेच्च कृतकार्यस्य अनुजानीहि मां भर ॥ २०

ब्रह्मोवाच—

भरेणोक्तः स देवापिः सर्वं निश्चित्य यत्नतः ॥ २१

भर उवाच—

सिद्धिं कुरु सुखं याहि मा चिन्तामल्पिकां भज ॥ २२

ब्रह्मोवाच—

ततो देवापिरमरराजाङ्घ्रिध्यानतत्परः । ऋत्विजोऽन्वेष्य यत्नेन नत्वा तानृत्विजः पृथक् ॥
कृताञ्जलिपुटो बालो देवापिर्वाक्यमब्रवीत् ॥ २३

देवापिरुवाच—

भवद्भिश्च मखो रक्ष्यो यजमानश्च दीक्षितः । पुरोधाश्च तथा रक्ष्यः पत्नी या दीक्षितस्य तु ॥ २४
भवत्सु तत्र पश्यत्सु यज्ञं विध्वस्य दैत्यराट्(ऋत्विजः) । राजादयस्तेन नीतास्तत्र युक्ततमं भवेत्
अथाप्येतदहं मन्ये भवन्तस्तानरोगिणः । दातुमर्हन्ति तान्स(वै स)र्वानन्यथा शापमर्हथ ॥ २६

---

१ घ. ङ. च. जनेश्वरः । २ क. बालानां पितरं ।

ऋत्विज ऊचुः—

मखेऽग्निः प्रथमं पूज्यो ह्यग्निरेवात्र दैवतम् । तस्माद्वयं न जानीमो ह्यग्नीनां परिचारकाः ॥ २७

स एव दाता भोक्ता च हर्ता कर्ता च हव्यवाट् ॥ २८

ब्रह्मोवाच—

ऋत्विजः पृष्ठतः कृत्वा देवापिर्जातवेदसम् । पूजयित्वा यथान्यायमग्नये तन्न्यवेदयत् ॥ २९

अग्निरुवाच—

यथर्त्विजस्तथा चाहं देवानां परिचारकः । हव्यं वहामि देवानां भोक्तारो रक्षकाश्च ते ॥ ३०

देवापिरुवाच—

देवानाहूय यत्नेन हविर्भागान्पृथक्पृथक् । दास्येऽहमेष दोषो मे तस्माद्याहि सुरान्प्रति ॥ ३१

ब्रह्मोवाच—

देवापिः स सुरान्प्राप्य नत्वा तेभ्यः पृथक्पृथक् । ऋत्विग्वाक्यं चाग्निवाक्यं शापं चापि न्यवेदयत्

देवा ऊचुः—

आहूता वैदिकैर्मन्त्रैर्ऋत्विग्भिश्च यथाक्रमम् । भोक्ष्यामहे हविर्भागान्न स्वतन्त्रा द्विजोत्तम ॥ ३३

तस्माद्वेदानुगा नित्यं वयं वेदेन चोदिताः । परतन्त्रास्ततो विप्र वेदेभ्यस्तन्निवेदय ॥ ३४

ब्रह्मोवाच—

स देवापिः शुचिर्भूत्वा वेदानाहूय यत्नतः । ध्यानेन तपसा युक्तो वेदाश्चापि पुरोऽभवन् ॥ ३५

वेदानुवाच देवापिर्नमस्य तु पुनः पुनः । ऋत्विग्वाक्यं चाग्निवाक्यं देववाक्यं न्यवेदयत् ॥ ३६

वेदा ऊचुः—

परतन्त्रा वयं तात ईश्वरस्य वशानुगाः । अशेषजगदाधारो निराधारो निरञ्जनः ॥ ३७

सर्वशक्त्यैकसदनं निधानं सर्वसंपदाम् । स तु कर्ता महादेवः संहर्ता स महेश्वरः ॥ ३८

वयं शब्दमया ब्रह्मन्वदामो विप्र एव च । अस्माकमेतत्कृत्यं स्याद्वदामो यत्तु पृच्छसि ॥ ३९

केन नीतास्तस्य नाम तत्पुरं तद्बलं तथा । भक्षिताः किंतु नो[1] नष्टा[2] एतज्जानीमहे वयम् ॥ ४०

यथा च तव सामर्थ्यं यमाराध्य च यत्र च । स्यादित्येतच्च जानीमो यथा प्राप्स्यसि तान्पुरः ॥

ब्रह्मोवाच—

एतच्छ्रुत्वाऽवदद्वेदान्विचार्य सुचिरं हृदि ॥ ४२

देवापिरुवाच—

वेदा वदन्त्वेतदेव सर्वमेव यथार्थतः । सर्वान्प्राप्स्ये तलं नीतानलं तेभ्यो नमोऽस्तु वः ॥ ४३

वेदा ऊचुः—

गौतमीं गच्छ देवापे तत्र स्तुहि महेश्वरम् । सुप्रसन्नस्तवाभीष्टं दास्यत्येव कृपाकरः ॥ ४४

भवेदेवः शिवः प्रीतः स्तुतः सत्यं महामते । आर्ष्टिषेणश्च नृपतिस्तस्य जाया जया सती ॥ ४५

पिता तवाप्युपमन्युस्तले तिष्ठन्त्यरोगिणः । वरदानान्महेशस्य मिथुं हत्वा च राक्षसम् ॥

यशः प्राप्स्यसि धर्मं च एतच्छक्यं न चेतरत् ॥ ४६

ब्रह्मोवाच—

तद्वेदवचनाद्बालो देवापिर्गौतमीं गतः । स्नात्वा कृतक्षणो विप्रस्तुष्टाव च महेश्वरम् ॥ ४७

१ घ. च. ते । २ घ. °ष्टा नैत° ।

देवापिरुवाच—

बालोऽहं देवदेवेश गुरूणां त्वं गुरुर्मम । न मे शक्तिस्त्वत्स्तवने तुभ्यं शंभो नमोऽस्तु ते ॥ ४८
न त्वां जानन्ति निगमा न देवा मुनयो न च । न ब्रह्मा नापि वैकुण्ठो योऽसि सोऽसि नमोऽस्तु ते
येऽनाथा ये च कृपणा ये दरिद्राश्च रोगिणः । पापात्मानो ये च लोके तांस्त्वं पासि महेश्वर ५०
तपसा नियमैर्मन्त्रैः पूजितास्त्रिदिवौकसः । त्वया दत्तं फलं तेभ्यो दास्यन्ति जगतां पते ॥ ५१
याचितारश्च दातारस्तेभ्यो यद्यन्मनीषितम् । भवतीति न चित्रं स्यात्त्वं विपर्ययकारकः ॥ ५२
येऽज्ञानिनो ये च पापा ये मग्ना नरकार्णवे । शिवेति वचनान्नाथ तान्पासि त्वं जगद्गुरो ॥ ५३

ब्रह्मोवाच—

एवं तु स्तुवतस्तस्य पुरः प्राह त्रिलोचनः ॥ ५४

शिव उवाच—

वरं ब्रूह्यथ देवापे अलं दैन्येन बालक ॥ ५५

देवापिरुवाच—

राजानं राजपत्नीं च पितरं च गुरुं मम । प्राप्तुमिच्छे जगन्नाथ निधनं च रिपोर्मम ॥ ५६

ब्रह्मोवाच—

देवापिवचनं श्रुत्वा तथेत्याहाखिलेश्वरः । देवापेः सर्वमभवदाज्ञया शंकरस्य तत् ॥ ५७
पुनरप्याह तं(आहूय स्वगणं)शंभुर्देवापिकरुणाकरः । नन्दिनं प्रेषयामास शंभुः(ततः)शूलेन नारद
रसातलं मिथुं नन्दी हत्वा चासुरपुंगवान् । तत्पित्रादीन्समानीय तस्मै तान्स न्यवेदयत् ॥ ५९
हयमेधश्च तत्राऽऽसीदार्ष्टिषेणस्य धीमतः । अग्निश्च ऋत्विजो देवा वेदाश्च ऋषयोऽब्रुवन् ॥ ६०

अग्न्यादय ऊचुः—

यत्र साक्षादभूच्छंभुर्देवापे भक्तवत्सलः । देवदेवो जगन्नाथो देवतीर्थमभूच्च तत् ॥ ६१
सर्वपापक्षयकरं सर्वसिद्धिप्रदं नृणाम् । पुण्यदं तीर्थमेतत्स्यात्तव कीर्तिश्च शाश्वती ॥ ६२

ब्रह्मोवाच—

अश्वमेधे निवृत्ते तु सुरास्तेभ्यो वरान्ददुः । स्नात्वा कृतार्था गङ्गायां ततस्ते दिवमाक्रमन् ॥ ६३
ततः प्रभृति तत्राऽऽसंस्तीर्थानि दश पञ्च च । सहस्राणि शतान्यष्टावुभयोरपि तीरयोः ॥
तेषु स्नानं च दानं च ह्यतीव फलदं विदुः ॥ ६४

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्य आर्ष्टिषेणाद्यष्टोत्तरशताधिकपञ्चदशसहस्रतीर्थवर्णनं नाम सप्तविंशाधिकशततमोऽध्यायः ॥ १२७ ॥

गौतमीमाहात्म्येऽष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७३८१

अथाष्टाविंशाधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

तपोवनमिति ख्यातं नन्दिनीसंगमं तथा । सिद्धेश्वरं तत्र तीर्थं गौतम्या दक्षिणे तटे ॥ १

---

१ घ. °मेतः । न ।

शार्दूलं चेति विख्यातं तेषां वृत्तमिदं शृणु । यस्याऽऽकर्णनमात्रेण सर्वपापैः प्रमुच्यते ॥ २
अग्निर्होता पुरा त्वासिद्देवानां हव्यवाहनः । भार्यां प्राप्तो दक्षसुतां स्वाहानाम्नीं सुरूपिणीम् ३
साऽनपत्या पुरा चाऽऽसीत्पुत्रार्थं तप आविशत् । तपश्चरन्तीं विपुलं तोषयन्तीं हुताशनम् ॥
स भर्ता हुतभुक्प्राह भार्यां स्वाहामनिन्दिताम् ॥ ४

अग्निरुवाच—

अपत्यानि भविष्यन्ति मा तपः कुरु शोभने ॥ ५

ब्रह्मोवाच—

एतच्छ्रुत्वा भर्तृवाक्यं निवृत्ता तपसोऽभवत् । स्त्रीणामभीष्टदं नान्यद्भर्तृवाक्यं विना क्वचित् ॥ ६
ततः कतिपये काले तारकाद्भय आगते । अनुत्पन्ने कार्तिकेये चिरकालरहोगते ॥ ७
महेश्वरे भवान्या च त्रस्ता देवाः समागताः । देवानां कार्यसिद्ध्यर्थमग्निं प्रोचुर्दिवौकसः ॥ ८

देवा ऊचुः—

देव गच्छ महाभाग शंभुं त्रैलोक्यपूजितम् । तारकाद्भयमुत्पन्नं शंभवे त्वं निवेदय ॥ ९

अग्निरुवाच—

न गन्तव्यं तत्र देशे दंपत्योः स्थितयो रहः । सामान्यमात्रतो न्यायः किं पुनः शूलपाणिनि १०
एकान्तस्थितयोः स्वैरं जल्पतोर्यः सरागयोः । दंपत्योः शृणुयाद्वाक्यं निरयात्तस्य नोद्धृतिः ११
स स्वाम्यखिललोकानां महाकालस्त्रिशूलवान् । निरीक्षणीयः केन स्याद्भवान्या रहसि स्थितः ॥

देवा ऊचुः—

महाभये चानुगते न्यायः कोऽन्वत्र वर्ण्यते । तारकाद्भय आपन्ने गच्छ त्वं तारको भवान् ॥ १३
महाभयाब्धौ साधूनां यत्परार्थाय जीवितम् । रूपेणान्येन वा गच्छ वाचं वद यथा तथा ॥ १४
विश्राव्य देववचनं शंभुमागच्छ सत्वरः । ततो दास्यामहे पूजामुभयोर्लोकयोः कवे ॥ १५

ब्रह्मोवाच—

शुको भूत्वा जगामाऽऽशु देववाक्याद्धुताशनः । यत्राऽऽसीज्जगतां नाथो रममाणस्तदोमया ॥ १६
स भीतवदथ प्रायाच्छुको भूत्वा तदाऽनलः । नाशकद्द्वारदेशे तु प्रवेष्टुं हव्यवाहनः ॥ १७
ततो गवाक्षदेशे तु तस्थौ धुन्वन्नधोमुखः । तं दृष्ट्वा प्रहसञ्शंभुरुमां प्राह रहोगतः ॥ १८

शंभुरुवाच—

पश्य देवि शुकं प्राप्तं देववाक्याद्धुताशनम् ॥ १९

ब्रह्मोवाच—

लज्जिता चावददेवमलं देवेति पार्वती । पुरश्चरन्तं देवेशो ह्यग्निं तं द्विजरूपिणम् ॥ २०
आहूय बहुशश्चापि ज्ञातोऽस्यग्नेऽत्र मा वद । विदारयस्व स्वमुखं गृहाणेदं नयस्व तत् ॥ २१
इत्युक्त्वा तस्य चाऽऽस्येऽग्ने रेतः स प्राक्षिपद्बहु । रेतोगर्भस्तदा चाग्निर्गन्तुं नैव च शक्तवान् ॥
सुरनद्यास्ततस्तीरं श्रान्तोऽग्निरुपतस्थिवान् । कृत्तिकासु च तद्रेतःप्रक्षेपात्कार्तिकोऽभवत् ॥ २३
अवशिष्टं च यत्किंचिदग्नेर्देहे च शांभवम् । तदेव रेतो वह्निस्तु स्वभार्यायां द्विधाऽक्षिपत् ॥ २४
स्वाहायां प्रियभूतायां पुत्रार्थिन्यां विशेषतः । पुरा साऽऽश्वासिता तेन संततिस्ते भविष्यति २५

---

१ घ. च. नैवाशकद्दिवम् । सु॰ ।

तद्वह्निनाऽथ संस्मृत्य तत्क्षिप्तं शांभवं महः। तदग्ने रेतसस्तस्यां जज्ञे मिथुनमुत्तमम् ॥ २६
सुवर्णश्च सुवर्णा च रूपेणाप्रतिमं भुवि। अग्नेः प्रीतिकरं नित्यं लोकानां प्रीतिवर्धनम् ॥ २७
अग्निः प्रीत्या सुवर्णा तां प्रादाद्धर्माय धीमते। सुवर्णस्याथ पुत्रस्य संकल्पामकरोत्प्रियाम् ॥
एवं पुत्रस्य पुत्र्याश्च विवाहमकरोत्कविः ॥ २८

अन्योन्यरेतोव्यतिषङ्गदोषादग्नेरपत्यमुभयं तथैव।
पुत्रः सुवर्णो बहुरूपरूपी रूपाणि कृत्वा सुरसत्तमानाम् ॥ २९
इन्द्रस्य वायोर्धनदस्य भार्या जलेश्वरस्यापि मुनीश्वराणाम्।
भार्यास्तु गच्छत्यनिशं सुवर्णो यस्याः प्रियं यच्च वपुः स कृत्वा ॥ ३०
याति क्वचिच्चापि कवेस्तनूजस्तद्भर्तृरूपं च पतिव्रतासु।
कृत्वाऽनिशं ताभिरुदारभावः कुर्वन्कृतार्थं मदनं स रेमे ॥ ३१
कृत्वा गता क्वापि चैवं सुवर्णा धर्मस्य भार्याऽपि सुवर्णनाम्नी।
स्वाहासुता स्वैरिणी सा बभूव यस्यापि यस्यापि मनोगता या ॥ ३२
भार्यास्वरूपा सैव भूत्वा सुवर्णा रेमे पतीन्मानुषानासुरांश्च।
देवानृषींन्पितृरूपांस्तथाऽन्यान्नृपौदार्यस्थैर्यगाम्भीर्ययुक्तान् ॥ ३३
याऽभिप्रेता यस्य देवस्य भार्या तद्रूपा सा रमते तेन सार्धम्।
नानाभेदैः करणैश्चाप्यनेकैराकर्षन्ती तन्मनःकामसिद्धिम् ॥ ३४
एवं सुवर्णस्य निरीक्ष्य चेष्टामग्नेः सूनोः पुत्रिकायास्तथाऽग्नेः।
सर्वे च शेपुः कुपितास्तदाऽग्नेः पुत्रं च पुत्रीं च सुरासुरास्ते ॥ ३५

सुरासुरा ऊचुः—

कृतं यदेतद्व्यभिचाररूपं यच्छद्मना वर्तनं पापरूपम्।
तस्मात्सुतस्ते व्यभिचारवांश्च सर्वत्र गामी जायतां हव्यवाह ॥ ३६
तथा सुवर्णाऽपि न चैकनिष्ठा भूयादग्ने नैकतृप्ता बहूंश्च।
नानाजातीन्निन्दितान्देहभाजो भजित्री स्यादेष दोषश्च पुत्र्याः ॥ ३७

ब्रह्मोवाच—

इत्येतच्छापवचनं श्रुत्वाऽग्निरतिभीतवत्। मामभ्येत्य तदोवाच निष्कृतिं वद पुत्रयोः। ३८
तदाऽहमब्रवं वह्ने गौतमीं गच्छ शंकरम्। स्तुत्वा तत्र महाबाहो निवेदय जगत्पतेः ॥ ३९
माहेश्वरेण वीर्येण तव देहस्थितेन च। एवंविधं त्वपत्यं ते जातं वह्ने ततो भवान् ॥ ४०
निवेदयस्व(तु) देवाय देवानां शापमीदृशम्। स्वापत्यरक्षणायासौ शंभुः श्रेयः करिष्यति ॥ ४१
स्तुहि देवं च देवीं च भक्त्या प्रीतो भवेच्छिवः। ततस्त्वपत्यविषये प्रियान्कामानवाप्स्यसि ४२
ततो मद्वचनादग्निर्गङ्गां गत्वा महेश्वरम्। तुष्टाव नियतो वाक्यैः स्तुतिभिर्वेदसंमितैः ॥ ४३

अग्निरुवाच—

विश्वस्य जगतो धाता विश्वमूर्तिर्निरञ्जनः। आदिकर्ता स्वयंभूश्च तं नमामि जगत्पतिम् ॥ ४४
योऽग्निर्भूत्वा संहरति स्रष्टा वै जलरूपतः। सूर्यरूपेण यः पाति तं नमामि च त्र्यम्बकम् ॥ ४५

ब्रह्मोवाच—

ततः प्रसन्नो भगवाननन्तः शंभुरव्ययः। वरेण च्छन्दयामास पावकं सुरपूजितम् ॥ ४६

स विनीतः शिवं प्राह तव वीर्यं मयि स्थितम्। तेन जातः सुतो रम्यः सुवर्णो लोकविश्रुतः ४७
तथा सुवर्णा पुत्री च तस्मादेव जगत्प्रभो । अन्योन्यवीर्यसङ्गाच्च तदोपादुभयं त्विदम् ॥ ४८
व्यभिचारात्सदोषं च अपत्यमभवच्छिव । शापं ददुः सुराः सर्वे तयोः शान्तिं कुरु प्रभो ॥४९
तदग्निवचनाच्छम्भुः प्रोवाचेदं शुभोदयम् ॥ ५०

शंभुरुवाच—

मद्वीर्यादभवत्त्वत्तः सुवर्णो भूरिविक्रमः । समग्रा ऋद्धयः सर्वाः सुवर्णेऽस्मिन्समाहिताः ॥ ५१
भविष्यन्ति न संदेहो वह्ने शृणु वचो मम । त्रयाणामपि लोकानां पावनः स भविष्यति ॥ ५२
स एव चामृतं लोके स एव सुरवल्लभः । स एव भुक्तिमुक्ती च स एव मखदक्षिणा ॥ ५३
स एव रूपं सर्वस्य गुरूणामप्यसौ गुरुः । वीर्यं श्रेष्ठतमं विद्याद्वीर्यं मत्तो यदुत्तमम् ॥ ५४
विशेषतस्त्वयि क्षिप्तं तस्य का स्याद्विचारणा । हीनं तेन विना सर्वं संपूर्णास्तेन संपदः ॥ ५५
जीवन्तोऽपि मृताः सर्वे सुवर्णेन विना नराः । निर्गुणोऽपि धनी मान्यः सगुणोऽप्यधनो नहि॥
तस्मान्नातः परं किंचित्सुवर्णाद्धि भविष्यति । तथा चैषा सुवर्णाऽपि स्यादुत्कृष्टाऽपि चञ्चला ॥
अनया वीक्षितं सर्वं न्यूनं पूर्णं भविष्यति । तपसा जपहोमैश्च [1]येयं प्राप्या जगत्त्रये ॥ ५८
तस्याः प्रभावं प्राशस्त्यमग्ने किंचिच्च कीर्त्यते । सर्वत्र या तु संतिष्ठेदायातु विचरिष्यति ॥ ५९
सुवर्णा कमला साक्षात्पवित्रा च भविष्यति । अद्य प्रभृत्यात्मजयोस्तथा स्वैरं विचेष्टतोः ॥ ६०
तथाऽपि चैतयोः पुण्यं न भूतं न भविष्यति ॥ ६१

ब्रह्मोवाच—

एवमुक्त्वा ततः शंभुः साक्षात्तत्राभवच्छिवः । लिङ्गरूपेण सर्वेषां लोकानां हितकाम्यया ॥ ६२
वरान्प्राप्य सुताभ्यां स अग्निस्तुष्टोऽभवत्ततः । स्वभर्त्रा च सुवर्णा सा धर्मेणाग्निसुता मुदा ॥६३
वर्तयामास पुत्रोऽपि वह्नेः संकल्पया मुदा । एतस्मिन्नन्तरे स्वर्णामग्नेर्दुहितरं मुने ॥ ६४
परिभूय च धर्मं तं शार्दूलो दानवेश्वरः । अहरद्भाग्यसौभाग्यविलासवसतिं छलात् ॥ ६५
नीता रसातलं तेन सुवर्णा लोकविश्रुता । जामाताऽग्नेः स धर्मश्च अग्निश्चैव स हव्यवाट् ॥ ६६
विष्णवे लोकनाथाय स्तुत्वा चैव पुनः पुनः । कार्यविज्ञापनं चोभौ चक्रतुः प्रभविष्णवे ॥ ६७
ततश्चक्रेण चिच्छेद शार्दूलस्य शिरो हरिः । साऽऽनीता विष्णुना देवी सुवर्णा लोकसुन्दरी ६८
महेश्वरसुता चैव अग्नेश्चैव तथा प्रिया । महेश्वराय तां विष्णुर्दर्शयामास नारद ॥ ६९
प्रीतोऽभवन्महेशोऽपि सस्वजे तां पुनः पुनः । चक्रं प्रक्षालितं यत्र शार्दूलच्छेदि दीप्तिमत् ॥७०
चक्रतीर्थं तु विख्यातं शार्दूलं चेति तद्विदुः । यत्र नीता सुवर्णा सा विष्णुना शंकरान्तिकम् ७१
तत्तीर्थं शांकरं ज्ञेयं वैष्णवं सिद्धमेव तु । यत्राऽऽनन्दमनुप्राप्तो ह्यग्निर्धर्मश्च शाश्वतः ॥ ७२
आनन्दाश्रूणि न्यपतन्यत्राग्नेर्मुनिसत्तम । आनन्देति नदी जाता तथा वै नन्दिनीति च ॥ ७३
तस्याश्च संगमः पुण्यो गङ्गायां तत्र वै शिवः । तत्रैव संगमे साक्षात्सुवर्णाऽद्यापि संस्थिता॥७४
दाक्षायणी सैव शिवा आग्नेयी चेति विश्रुता । अम्बिका जगदाधारा शिवा कात्यायनीश्वरी ॥
भक्ताभीष्टप्रदा नित्यमलंकृत्योभयं तटम् । तपस्तेपे यत्र चाग्निस्तत्तीर्थं तु तपोवनम् ॥ ७६
एवमादीनि तीर्थानि तीरयोरुभयोर्मुने । तेषु स्नानं च दानं च सर्वकामप्रदं शुभम् ॥ ७७

---

१ ङ. नेयं । २ घ च. ंता नन्दा वै ।

उत्तरे चैव पारे च सहस्राणि चतुर्दश । दक्षिणे च तथा पारे सहस्राण्यथ षोडश ॥ ७८
तत्र तत्र च तीर्थानि साभिज्ञानानि सन्ति वै । नामानि च पृथक् सन्ति संक्षेपात्तन्मयोच्यते ७९
एतानि यश्च शृणुयाद्यश्च वा पठति स्मरेत् । सर्वेषु तत्र काम्येषु परिपूर्णो भवेन्नरः ॥ ८०
एतद्वृत्तं तु यो ज्ञात्वा तत्र स्नानादिकं चरेत् । लक्ष्मीवाञ्जायते नित्यं धर्मवांश्च विशेषतः॥ ८१
अञ्जकात्पश्चिमे तीर्थं तच्छार्दूलमुदाहृतम् । वाराणस्यादितीर्थेभ्यः सर्वेभ्यो ह्यधिकं भवेत् ॥ ८२
तत्र स्नात्वा पितॄन्देवान्वन्दते तर्पयत्यपि । सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥ ८३
तपोवनाच्च शार्दूलान्मध्ये तीर्थान्यशेषतः । तस्यैकैकस्य माहात्म्यं न केनाप्यत्र वर्ण्यते ॥ ८४

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये तपोवननन्दिनीसंगमेश्वरदेवीदाक्षायणीसिद्धेश्वरवैष्णवशार्दूलाग्निचक्रतीर्थादित्रिंशत्सहस्रतीर्थवर्णनं नामाष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

गौतमीमाहात्म्य एकोनषष्टितमोऽध्यायः । ५९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७४६५

अथैकोनत्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

इन्द्रतीर्थमिति ख्यातं तत्रैव च वृषाकपम् । फेनायाः संगमो यत्र हनूमतं तथैव च ॥ १
अञ्जकं चापि यत्प्रोक्तं यत्र देवस्त्रिविक्रमः । तत्र स्नानं च दानं च पुनरावृत्तिदुर्लभम् ॥ २
तत्र वृत्तान्यथाऽऽख्यास्ये गङ्गाया दक्षिणे तटे । इन्द्रेश्वरं चोत्तरे च शृणु भक्त्या यतव्रतः ॥ ३
नमुचिर्बलवानासीदिन्द्रशत्रुर्मदोत्कटः । तस्येन्द्रेणाभवद्युद्धं फेनेनेन्द्रोऽहरच्छिरः ॥ ४
अपां च नमुचेः शत्रोस्तत्फेनवज्ररूपधृक् । शिरश्छित्वा तच्च फेनं गङ्गाया दक्षिणे तटे ॥ ५
न्यपतद्भूमिं भित्त्वा तु रसातलमथाऽऽविशत् । रसातलभवं गाङ्गं वारि यद्विश्वपावनम् ॥ ६
वज्रादिष्टेन मार्गेण व्यगमद्भूमिमण्डलम् । तज्जलं फेननाम्ना तु नदी फेनेति गद्यते ॥ ७
तस्यास्तु संगमः पुण्यो गङ्गया लोकविश्रुतः । सर्वपापक्षयकरो गङ्गायमुनयोरिव ॥ ८
हनूमदुपमाता वै यत्राऽऽप्लवनमात्रतः । मार्जारत्वादभून्मुक्ता विष्णुगङ्गाप्रसादतः ॥ ९
मार्जारं चेति तत्तीर्थं पुरा प्रोक्तं मया तव । हनूमतं च तत्प्रोक्तं तत्राऽऽख्यानं पुरोदितम् ॥ १०
वृषाकपं चाञ्जकं च तत्रेदं प्रयतः शृणु । हिरण्य इति विख्यातो दैत्यानां पूर्वजो बली ॥ ११
तपस्तप्त्वा सुरैः सर्वैरजेयोऽभूत्सुदारुणः । तस्यापि बलवान्पुत्रो देवानां दुर्जयः सदा ॥ १२
महाशनिरिति ख्यातस्तस्य भार्या पराजिता । तेनेन्द्रस्याभवद्युद्धं बहुकालं निरन्तरम् ॥ १३
महाशनिर्महावीर्यः सततं रणमूर्धनि । जित्वा नागेन सहितं शक्रं पित्रे न्यवेदयत् ॥ १४
बद्ध्वा हस्तिसमायुक्तं स्वसारं वीक्ष्य तां तदा । विहाय क्रूरतां दैत्यो हिरण्याय न्यवेदयत् ॥
महाशनिपिता दैत्यः पूर्वेषां पूर्ववत्तरः । शचीकान्तं तले स्थाप्य तस्य रक्षामथाकरोत् ॥ १६
महाशनिर्हरिं जित्वा जेतुं वरुणमभ्यगात् । वरुणोऽपि महाबुद्धिः प्रादात्कन्यां महाशनेः ॥ १७
उदधिं स्वालयं प्रादाद्वरुणस्तु महाशनेः । तयोश्च सख्यमभवद्वरुणस्य महाशनेः ॥ १८
वारुणी चापि या कन्या सा प्रियाऽभून्महाशनेः। वीर्येण यशसा चापि शौर्येण च बलेन च १९

---

१ ध. च. तीर्थेषु । २ क. कार्येषु । ३ ङ. च. वार्षाकं । ४ घ. °ण तपसा तथा । म° ।

महाशनिर्महादैत्यस्त्रैलोक्ये नोपमीयते । निरिन्द्रत्वं गते लोके देवाः सर्वे न्यमन्त्रयन् ॥ २०

देवा ऊचुः—

विष्णुरेवेन्द्रदाता स्याद्दैत्यहन्ता स एव च । मन्त्रदृग्वा स एव स्यादिन्द्रं चान्यं करिष्यति ॥ २१

ब्रह्मोवाच—

एवं संमन्त्र्य ते देवा विष्णोर्मन्त्रं न्यवेदयन् । ममावध्यो महादैत्यो महाशनिरिति ब्रुवन् ॥ २२
प्रायाद्वारीश्वरं विष्णुः श्वशुरं वरुणं तदा । केशवो वरुणं गत्वा प्राहेन्द्रस्य पराभवम् ॥ २३
तथा त्वयैतत्कर्तव्यं यथाऽऽयाति पुरंदरः । तद्विष्णुवचनाच्छीघ्रं ययौ जलपतिर्मुने ॥ २४
सुतापतिं हिरण्यसुतं विक्रान्तं तं महाशनिम् । अतिसंमानितस्तेन जामात्रा वरुणः प्रभुः ॥ २५
पप्रच्छाऽऽगमनं दैत्यो विनयाच्छ्वशुरं तदा । वरुणः प्राह तं दैत्यं यदागमनकारणम् ॥ २६

वरुण उवाच—

इन्द्रं देहि महाबाहो यस्त्वया निर्जितः पुरा । बद्धं रसातलस्थं तं देवानामधिपं सखे ॥ २७
अस्माकं सर्वदा मान्यं देहि त्वं मम शत्रुहन् । बद्ध्वा विमोक्षणं शत्रोर्महते यशसे सताम् ॥ २८

ब्रह्मोवाच—

तथेत्युक्त्वा कथंचित्स दैत्येशो वरुणाय तम् । प्रादादिन्द्रं शचीकान्तं वारणेन समन्वितम् ॥२९

स दैत्यमध्येऽतिविराजमानो हरिं तदोवाच जलेशसंनिधौ ।
संपूज्य चैवाथ महोपचारैर्महाशनिर्मघवन्तं बभाषे ॥ ३०

महाशनिरुवाच[1]—

केन त्वमिन्द्रोऽद्य कृतोऽसि केन वीर्यं तवेदृग्बहु भाषसे च ।
[2]त्वं संगरे शत्रुभिर्[3]बाध्[4]यसे च तथाऽपि चेन्द्रो भवसीति चित्रम् ॥ ३१
अथापि बद्धा पुरुषेण काचित्तस्याः पतिस्तां मोचयतीति युक्तम् ।
स्त्रियोऽस्वतन्त्राः पुरुषप्रधानास्त्वं वै पुमान्[5]भविता शक्र साधो ॥ ३२
बद्धो मया संगरे वाहनेन[6] क्वाप्यस्त्रं ते वज्रमुदामशक्ति ।
चिन्तारत्नं नन्दनं योषितस्ता यशो बलं देवराजोपभोग्यम् ॥
सर्वं हि त्वा(त्वं) किंतु मुक्तो जलेशादाकाङ्क्षसे जीवितं धिक्तवेदम् ॥ ३३
तज्जीवनं यत्तु यशोनिधानं स एव मृत्युर्यशसो यद्विरोधि ।
एवं जानञ्शक्र कथं जलेशान्मुक्तिं प्राप्तो नैव लज्जां भजेथाः[7] ॥ ३४
त्रिविष्टपस्थः परिवेष्टितः सन्सर्वैः सुरैः कान्तया वीज्यमानः ।
संस्तूयमानश्च तथाऽप्सरोभिर्नूनं लज्जा ते बिभेतीति मन्ये ॥ ३५
त्वं वृत्रहा नमुचेश्चापि हन्ता पुरां भेत्ता गोत्रभिद्वज्रबाहुः ।
एवं सुरास्त्वां परिपूज[8]यन्तीत्यतो जिष्णो सर्वमेतत्त्यजस्व ॥ ३६

---

१ घ. च. °च—दत्तं पदं ते वद केन शक्र त्वं वा सृष्टः केन जम्भासुरारे । के° । २ घ. ङ. च. यः । ३ घ. च. °भिर्बध्यतेऽसौ त° । ४ ङ. °ध्यतेऽसौ त° । ५ च. °मान्शक्र लोकत्रयेऽपि । ब° । ६ क. ङ. °न पुष्टो रणे क्षत्रधर्मेण शक्र । यशो बलं देवराज्योपयोग्यं सर्वं हित्वा किंतु मुक्तो जलेशात् ॥ ३३ ॥ तज्जी° । ७ घ. भजेस्त्वम् । ८ च. °यन्तिं कुतो जिष्णो सर्वमेतत्त्यजेस्त्वम् । वि° ।

विकारमाप्याप्यहितोद्भवं ये जीवन्ति लोकाननुसंविशन्ति ।
भवादृशां दुश्च्यवनाब्जजन्मा कथं न हृद्भेदमवाप कर्ता ॥ ३७

ब्रह्मोवाच—

एवमुक्त्वा तु दैत्येशो वरुणाय महात्मने । प्रादादिन्द्रं पुनश्चेदं वचनं तदभाषत ॥ ३८

महाशनिरुवाच—

अद्य प्रभृत्यसौ शिष्य इन्द्रः स्याद्वरुणो गुरुः । श्वशुरो मम येन त्वं मुक्तिमाप्तोऽसि वासव ॥ ३९
तथा त्वं भृत्यभावेन वर्तेथा वरुणं प्रति । नो चेद्बद्ध्वा पुनस्त्वां वै क्षेप्स्ये चैव रसातलम् ॥ ४०

ब्रह्मोवाच—

एवं निर्भर्त्स्य तं शक्रं हसंश्चापि पुनः पुनः । अब्रवीद्गच्छ गच्छेति वरुणं चानुमन्य[1]तु ॥ ४१
स तु प्राप्तः स्वनिलयं लज्जया कलुषीकृतः । पौलो[2]म्यां प्राह तत्सर्वं यत्तच्छत्रुपराभवम् ॥ ४२

इन्द्र उवाच—

एवमुक्तः कृतश्चैव शत्रुणाऽहं वरानने । निर्वापयामि [3]येन स्वमात्मानं सुभगे वद ॥ ४३

इन्द्राण्युवाच—

दानवानामथोद्भूतिं [4]शक्र मायां पराभवम् । वरदानं तथा मृत्युं जानेऽहं बलसूदन ॥ ४४
तस्माद्यस्मात्तस्य मृत्युरथवाऽपि पराभवः । जायेत शृणु तत्सर्वं वक्ष्येऽहं प्रीतये तव ॥ ४५
हिरण्यस्य सुतो वीरः पितृव्यस्य सुतो बली । तस्मान्मम स्यात्स भ्राता वरदानाच्च दर्पितः ॥
ब्रह्माणं तोषयामास तपसा नियमेन च । ईदृशं बलमापन्नं तपसा किं न सिध्यति ॥ ४७
तस्मात्त्वयो[5] चित्तरागो विस्मयो वा कथंचन । न कार्यः शृणु तत्रेदं कार्यं यत्तु क्रमागतम् ॥ ४८

ब्रह्मोवाच—

एवमुक्त्वा तु पौलोमी प्राहेन्द्रं विनयान्विता ॥ ४९

इन्द्राण्युवाच—

नासाध्यमस्ति तपसो नासाध्यं यज्ञकर्मणः । नासाध्यं लोकनाथस्य विष्णोर्भक्त्या हरस्य च ॥
पुनश्चेदं मया कान्त श्रुतमस्त्यतिशोभनम् । स्त्रीणां स्वभावं जानन्ति स्त्रिय एव सुराधिप ॥ ५१
तस्माद्भूमेस्तथा चापां नासाध्यं विद्यते प्रभो । तपो वा यज्ञकर्मादि ताभ्यामेव यतो भवेत् ॥ ५२
तत्रापि तीर्थभूता तु या भूमिस्तां व्रजेद्भवान् । तत्र विष्णुं शिवं पूज्य सर्वान्कामानवाप्स्यसि ॥
श्रुतमस्ति पुनश्चेदं स्त्रियो याश्च पतिव्रताः । ता एव सर्वं जानन्ति धृतं ताभिश्चराचरम् ॥ ५४
पृथिव्यां सारभूतं स्यात्तन्मध्ये दण्डकं वनम् । तत्र गङ्गा जगद्धात्री तत्रेशं पूजय प्रभो ॥ ५५
विष्णुं वा जगतामीशं दीनार्तार्तिहरं विभुम् । अनाथानामिह नृणां मज्जतां दुःखसागरे ॥ ५६
हरो हरिर्वा गङ्गा वा काप्यन्यच्छरणं नहि । तस्मात्सर्वप्रयत्नेन तोषयैतान्समाहितः ॥ ५७
भक्त्या स्तोत्रैश्च तपसा कुरु चैव मया सह । ततः प्राप्स्यसि कल्याणमीशविष्णुप्रसादजम् ॥
अज्ञात्वैकगुणं कर्म फलं दास्यति कर्मिणः । ज्ञात्वा शतगुणं तत्स्याद्भार्यया च तदक्षयम् ॥ ५९
पुंसः सर्वेषु कार्येषु भार्यैवेह सहायिनी । स्वल्पानामपि कार्याणां नहि सिद्धिस्तया विना ॥ ६०

---

१ घ. च. °न्य च ॥ ४१ ॥ स । २ क. °लोम्याः प्रा° । ३ ङ. येनाऽऽशु चाऽऽत्मा° । ४ घ. शाक्तं । ५ घ. °या न चिन्ताऽत्र कार्या शक्र कदाचन । एकाग्रः शृणु तत्रेदं कार्यं ।

एकेन यत्कृतं कर्म तस्मादर्धफलं भवेत् । जायया तु कृतं नाथ पुष्कलं पुरुषो लभेत् ॥ ६१
तस्मादेतत्सुविदितम्[1]र्धो जाया इति श्रुतेः । श्रूयते दण्डकारण्ये सरिच्छ्रेष्ठाऽस्ति गौतमी ॥ ६२
अशेषाघप्रशमनी सर्वाभीष्टप्रदायिनी । तस्माद्गच्छ मया तत्र कुरु पुण्यं महाफलम् ॥ ६३
ततः शत्रून्निहत्याऽऽजौ महत्सुखमवाप्स्यसि ॥ ६४

ब्रह्मोवाच—

तथेत्युक्त्वा स गुरुणा भार्यया च शतक्रतुः । ययौ गङ्गां जगद्धात्रीं गौतमीं चेति विश्रुताम् ॥
दण्डकारण्यमध्यस्थां ययौ स (दृष्ट्वा तां) प्रीतिमान्हरिः । तपः कर्तुं मनश्चक्रे देवदेवाय शंभवे॥
गङ्गां नत्वा तु प्रथमं स्नात्वा च स कृताञ्जलिः । शिवैकशरणो भूत्वा स्तोत्रं चेदं ततोऽब्रवीत्॥

इन्द्र उवाच—

स्वमायया यो ह्यखिलं चराचरं सृजत्यवत्यत्ति न सज्जतेऽस्मिन् ।
एकः स्वतन्त्रोऽद्वयचित्सुखात्मकः स नः प्रसन्नोऽस्तु पिनाकपाणिः ॥ ६८
न यस्य तत्त्वं सनकादयोऽपि जानन्ति वेदान्तरहस्यविज्ञाः ।
स पार्वतीशः सकलाभिलाषदाता प्रसन्नोऽस्तु ममान्धकारिः ॥ ६९
सृष्ट्वा स्वयंभूर्भगवान्विरिञ्चि भयंकरं चास्य शिरोऽन्वपश्यत् ।
छित्त्वा नखाग्रैर्नखसक्तमेतच्चिक्षेप तस्मादभवत्त्रिवर्गः ॥ ७०
पापं दरिद्रं त्वथ लोभयाच्ञे मोहो विपच्चेति ततोऽप्यनन्तम् ।
जातप्रभावं भवदुःखरूपं बभूव तैर्व्याप्तमिदं समस्तम् ॥ ७१
अवेक्ष्य सर्वं चकितः सुरेशो देवीमवोचज्जगदस्तमेति ।
त्वं पाहि लोकेश्वरि लोकमातरुमे शरण्ये सुभगे सुभद्रे ॥ ७२
जगत्प्रतिष्ठे वरदे जय त्वं भुक्तिः समाधिः परमा च मुक्तिः ।
स्वाहा स्वधा स्वस्तिरनादिसिद्धिर्गीर्बुद्धिरासीरजरामरे त्वम् ॥ ७३
विद्यादिरूपेण जगत्त्रये त्वं रक्षां करोष्येव म[2]दाज्ञया च ।
त्वयैव सृष्टं भुवनत्रयं स्याद्यतः प्रकृत्यैव तथैव चित्रम् ॥ ७४
इत्येवमुक्ता दयिता हरेण संश्लेषसंलापपरा बभूव ।
श्रान्ता भवस्यार्धतनौ सुलग्ना चिक्षेप च स्वेदजलं कराग्रैः ॥ ७५
तस्माद्बभूव प्रथमं स धर्मो लक्ष्मीरथो दानमथो सुवृष्टिः ।
सत्त्वं सुसंपन्नधरं सरांसि धान्यानि पुष्पाणि फलानि चैव ॥ ७६
सौभाग्यवस्तूनि वपुः सुवेषः शृङ्गारभाजीनि महौषधानि ।
नृत्यानि गीतान्यमृतं पुराणं श्रुतिस्मृती नीतिरथान्नपाने ॥ ७७
शस्त्राणि शास्त्राणि गृहोपयोग्यान्यस्त्राणि तीर्थानि च काननानि ।
इष्टानि पूर्तानि च मङ्गलानि यानानि शुभ्राभरणासनानि ॥ ७८
भवाङ्गसंसर्गसुसंप्रहाससुस्वेदसंलापरहःप्रकारैः ।
तथैव जातं सचराचरं च अपापकं देवि ततश्च जातम् ॥ ७९

१ क. °मर्ध जा° । २ ङ. सदाऽक्षया ।

सुखं प्रभूतं च शुभं च नित्यं विराजि चैतत्तव देवि भावात् ।
तस्मात्तु मां रक्ष जगज्जनित्रि भीतं भयेभ्यो जगतां प्रधाने ॥ ८०
एके तर्कैर्विमुह्यन्ति लीयन्ते तत्र चापरे । शिवशक्त्योस्तदाऽद्वैतं सुन्दरं नौमि विग्रहम् ॥ ८१

ब्रह्मोवाच—

एवं तु स्तुवतस्तस्य पुरस्तादभवच्छिवः ॥ ८२

शिव उवाच—

किमभीष्टं वरयसे हरे वद परायणम् ॥ ८३

इन्द्र उवाच —

बलवान्मे रिपुश्चाऽऽसीद्दर्शनैश्च[2] शनिर्यथा । तेन बद्धस्तलं नीतः परिभूतस्त्वनेकधा ॥ ८४
वाक्सायकैस्तथा विद्धस्तद्वधाय त्वियं कृतिः । तदर्थं जगतामीश येन जेष्ये रिपुं प्रभो ॥ ८५
तदेव देहि वीर्यं मे यच्चान्यद्रिपुनाशनम् । जातः पराभवो यस्मात्तद्विनाशे कृते सति ॥
पुनर्जातमहं मन्ये वरं कीर्तिर्जयश्रियोः ॥ ८६

ब्रह्मोवाच—

स शिवः शक्रमाहेदं न मयैकेन ते रिपुः । वधमाप्नोति तस्मात्त्वं विष्णुमप्यव्ययं हरिम् ॥ ८७
आराधयस्व पौलोम्या सह देवं जनार्दनम् । लोकत्रयैकशरणं नारायणमनन्यधीः ॥ ८८
ततः प्राप्स्यसि तस्माच्च मत्तश्चापि प्रियं हरे । पुनश्चोवाच भगवानादिकर्ता महेश्वरः ॥ ८९
मन्त्राभ्यासस्तपो वाऽपि योगाभ्यसनमेव च । संगमे यत्र कुत्रापि सिद्धिदं मुनयो विदुः ॥ ९०
किं पुनः संगमे विप्र गौतमीसिन्धुफेनयोः । गिरीणां गह्वरे यद्वा सरितामथ संगमे ॥ ९१
विप्रो धियैव भवति मुकुन्दाङ्घ्रिनिविष्टया । गङ्गाया दक्षिणे तीर आपस्तम्बो मुनीश्वरः ॥ ९२
आस्ते तस्याप्यहं तोषमगमं बलसूदन । तेन त्वं भार्यया चैव तोषयस्व गदाधरम् ॥ ९३

ब्रह्मोवाच—

आपस्तम्बेन सहितो गङ्गाया दक्षिणे तटे । तुष्टाव देवं प्रयतः स्नात्वा पुण्येऽथ संगमे ॥ ९४
फेनायाश्चैव गङ्गायास्तत्र देवं जनार्दनम् । वैदिकैर्विविधैर्मन्त्रैस्तपसाऽतोषयत्तदा ॥ ९५
ततस्तुष्टोऽभवद्विष्णुः किं देयं चेत्यभाषत । देहि मे शत्रुहन्तारमित्याह भगवान्हरिः ॥ ९६
दत्तमित्येव जानीहि तमुवाच जनार्दनः । तत्राभवच्छिवस्यैव गङ्गाविष्ण्वोः प्रसादतः ॥ ९७
अम्भसा पुरुषो जातः शिवविष्णुस्वरूपधृक् । चक्रपाणिः शूलधरः स गत्वा तु रसातलम् ॥
निजघान तदा दैत्यमिन्द्रशत्रुं महाशनिम् । सखाऽभवत्स चेन्द्रस्य अब्जकः स वृषाकपिः ॥ ९९
दिविस्थोऽपि सदा चेन्द्रस्तमन्वेति वृषाकपिम् । कुपिता प्रणयेनाभूदन्यासक्तं विलोक्य तम् ॥
शचीं तां सान्त्वयन्नाह शतमन्युर्हसन्निदम् ॥ १००

इन्द्र उवाच—

नाहमिन्द्राणि शरणमृते सख्युर्वृपाकपेः । वारि वाऽपि हविर्यस्य अग्नेः प्रियकरं सदा ॥ १०१
नाहमन्यत्र गन्ताऽस्मि प्रिये चाङ्गेन ते शपे । तस्मान्नार्हसि मां वक्तुं शङ्कयाऽन्यत्र भामिनि १०२
पतिव्रता प्रिया मे त्वं धर्मे मन्त्रे सहायिनी । सापत्या च कुलीना च त्वत्तोऽन्या का प्रिया मम

१ घ. च. °सीद्शनिश्चाश° । २ ङ. °नैश्चाश° ।

तस्मात्तवोपदेशेन गङ्गां प्राप्य महानदीम् । प्रसादाद्देवदेवस्य विष्णोर्वै चक्रपाणिनः ॥ १०४
तथा शिवस्य देवस्य प्रसादाच्च वृषाकपेः । जलोद्भवाच्च मे मित्रादब्जकाल्लोकविश्रुतात् ॥ १०५
उत्तीर्णदुःखः सुभगे इत इन्द्रोऽहमच्युतः । किं न साध्यं यत्र भार्या भर्तृचित्तानुगामिनी ॥ १०६
दुष्करा तत्र नो मुक्तिः किंत्वर्थादित्रयं शुभे । जायैव परमं मित्रं लोकद्वयहितैषिणी ॥ १०७

सा चेत्कुलीना प्रियभाषिणी च पतिव्रता रूपवती गुणाढ्या ।
संपत्सु चाऽऽपत्सु समानरूपा तया ह्यसाध्यं किमिह त्रिलोक्याम् ॥ १०८

तस्मात्तव धिया कान्ते ममेदं शुभमागतम् । इतस्त्वोदितं चैव कर्तव्यं नान्यदस्ति मे ॥ १०९
परलोके च धर्मे च सत्पुत्रसदृशं न च । आर्तस्य पुरुषस्येह भार्यावद्भेषजं न हि ॥ ११०
निःश्रेयसपदप्राप्त्यै तथा पापस्य मुक्तये । गङ्गया सदृशं नास्ति शृणु चान्यद्वरानने ॥ १११
धर्मार्थकाममोक्षाणां प्राप्तये पापमुक्तये । शिवविष्ण्वोरनन्यत्वज्ञानान्नास्त्यत्र मुक्तये ॥ ११२
तस्मात्तव धिया साध्वि सर्वमेतन्मनोगतम् । अवाप्तं च शिवाद्विष्णोर्गङ्गायाश्च प्रसादतः ॥ ११३
इन्द्रत्वं मे स्थिरं चेतो मन्ये मित्रबलात्पुनः । वृषाकपिर्मम सखा यो जातस्त्वप्सु भामिनि ॥
त्वं च प्रियसखी नित्यं नान्यत्प्रियतरं मम । तीर्थानां गौतमी गङ्गा देवानां हरिशंकरौ ॥ ११५
तस्मादेभ्यः प्रसादेन सर्वं चेप्सितमाप्तवान् । मम प्रीतिकरं चेदं तीर्थं त्रैलोक्यविश्रुतम् ॥ ११६
तस्मादेतद्धि याचिष्ये देवान्सर्वाननुक्रमात् । अनुमन्यन्तु ऋषयो गङ्गा च हरिशंकरौ ॥ ११७
इन्द्रेश्वरे चाब्जके च उभयोस्तीरयोः सुराः । एकत्र शंकरो देवो ह्यपरत्र जनार्दनः ॥ ११८
पावयन्दण्डकारण्यं साक्षाद्विष्णुस्त्रिविक्रमः । अन्तरे यानि तीर्थानि सर्वपुण्यप्रदानि च ॥ ११९
अत्र तु स्नानमात्रेण सर्वे ते मुक्तिमाप्नुयुः । पापिष्ठाः पापतो मुक्तिमाप्नुयुर्ये च धर्मिणः ॥ १२०
तेषां तु परमा मुक्तिः पितृभिः पञ्चपञ्चभिः । अत्र किंचिच्च ये दद्युरर्थिभ्यस्तिलमात्रकम् १२१
दातृभ्यो ह्यक्षयं तत्स्यात्कामदं मोक्षदं तथा । धन्यं यशस्यमायुष्यमारोग्यं पुण्यवर्धनम् ॥ १२२
आख्यानं विष्णुशंभ्वोश्च ज्ञात्वा स्नानाच्च मुक्तिदम् । अस्य तीर्थस्य माहात्म्यं ये शृण्वन्ति पठन्ति च
पुण्यभाजो भवेयुस्ते तेभ्योऽत्रैव स्मृतिर्भवेत् । शिवविष्ण्वोरशेषाघसंघविच्छेदकारिणी ॥
यां प्रार्थयन्ति मुनयो विजितेन्द्रियमानसाः ॥ १२४

ब्रह्मोवाच—

भविष्यत्येवमेवेति तं देवा ऋषयोऽब्रुवन् । गौतम्या उत्तरे पारे तीर्थानां मोक्षदायिनाम् ॥ १२५
देवर्षिसिद्धसेव्यानां सहस्राण्यथ सप्त वै । तथैव दक्षिणे तीरे तीर्थान्येकादशैव तु ॥ १२६
अब्जकं हृदयं प्रोक्तं गोदावर्या मुनीश्वरैः । विश्रामस्थानमीशस्य विष्णोर्ब्रह्मण एव च ॥ १२७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये गौतम्युत्तरकूलस्थेन्द्रेश्वरादिसप्तसहस्रतीर्थदक्षिण-कूलस्थापस्तम्बसोमेश्वरफेनासंगमवृषाकपाब्जकवैष्णवहनूमत्तीर्थमार्जारेत्याद्येकादशतीर्थवर्णनं नामैकोनत्रिंशधिकशततमोऽध्यायः ॥ १२९ ॥

गौतमीमाहात्म्ये षष्टितमोऽध्यायः ॥ ६० ॥

आदितः श्लोकानां समष्ट्यङ्काः—७५९२

अथ त्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

आपस्तम्बमिति ख्यातं तीर्थं त्रैलोक्यविश्रुतम् । स्मरणादप्यशेषाघसंघविध्वंसनक्षमम् ॥ १

आपस्तम्बो महाप्राज्ञो मुनिरासीन्महायशाः । तस्य भार्याऽक्षसूत्रेति पतिधर्मपरायणा ॥ २

तस्य पुत्रो महाप्राज्ञः कर्किनामाऽथ तत्त्ववित् । तस्याऽऽश्रममनुप्राप्तो ह्यगस्त्यो मुनिसत्तमः ॥ ३

तमगस्त्यं पूजयित्वा आपस्तम्बो मुनीश्वरः । शिष्यैरनुगतो धीमांस्तं प्रष्टुमुपचक्रमे ॥ ४

आपस्तम्ब उवाच—

त्रयाणां को नु पूज्यः स्याद्देवानां मुनिसत्तम । भुक्तिर्मुक्तिश्च कस्माद्वा स्यादनादिश्च को भवेत्५

अनन्तश्चापि को विप्र देवानामपि दैवतम् । यज्ञैः क इज्यते देवः को वेदेष्वनुगीयते ॥

एतं मे संशयं छेत्तुं वदागस्त्य महामुने ॥ ६

अगस्त्य उवाच—

धर्मार्थकाममोक्षाणां प्रमाणं शब्द उच्यते । तत्रापि वैदिकः शब्दः प्रमाणं परमं मतः ॥ ७

वेदेन गीयते यस्तु पुरुषः स परात्परः । मूर्तोऽपरः स विज्ञेयो ह्यमूर्तः पर उच्यते ॥ ८

योऽमूर्तः स परो ज्ञेयो ह्यपरो मूर्त उच्यते । गुणाभिव्याप्तिभेदेन मूर्तोऽसौ त्रिविधो भवेत् ॥ ९

ब्रह्मा विष्णुः शिवश्चेति एक एव त्रिधोच्यते । त्रयाणामपि देवानां वेद्यमेकं परं हि तत् ॥ १०

एकस्य बहुधा व्याप्तिर्गुणकर्मविभेदतः । लोकानामुपकारार्थमाकृतित्रितयं भवेत् ॥ ११

यस्तत्त्वं वेत्ति परमं स च विद्वान्न चेतरः । तत्र यो भेदमाचष्टे लिङ्गभेदी स उच्यते ॥ १२

प्रायश्चित्तं न तस्यास्ति यश्चैषां व्याहरेद्भिदम् । त्रयाणामपि देवानां मूर्तिभेदः पृथक्पृथक् ॥१३

वेदाः प्रमाणं सर्वत्र साकारेषु पृथक्पृथक् । निराकारं च यत्त्वेकं तत्तेभ्यः परमं मतम् ॥ १४

आपस्तम्ब उवाच—

नानेन निर्णयः कश्चिन्मयाऽत्र विदितो भवेत् । तत्राप्यत्र रहस्यं यत्तद्विमृश्याऽऽशु कीर्त्यताम् ॥

निःसंशयं निर्विकल्पं भाजनं सर्वसंपदाम् ॥ १५

ब्रह्मोवाच—

एतदाकर्ण्य भगवानगस्त्यो वाक्यमब्रवीत् ॥ १६

अगस्त्य उवाच—

यद्यप्येषां न भेदोऽस्ति देवानां तु परस्परम् । तथाऽपि सर्वसिद्धिः स्याच्छिवादेव सुखात्मनः

प्रपञ्चस्य निमित्तं यत्तज्ज्योतिश्च परं शिवः । तमेव साधय हरं भक्त्या परमया मुने ॥

गौतम्यां सकलाघौघसंहर्ता दण्डके वने ॥ १८

ब्रह्मोवाच—

एतच्छ्रुत्वा मुनेर्वाक्यं परां प्रीतिमुपागतः । भुक्तिदो मुक्तिदः पुंसां साकारोऽथ निराकृतिः॥१९

सृष्ट्याकारस्ततः शक्तः पालनाकार एव च । दाता[3] च हन्ति सर्वं यो यस्मादेतत्समाप्यते ॥२०

अगस्त्य उवाच—

ब्रह्माकृतिः कर्तृरूपा वैष्णवी पालनी तथा । रुद्राकृतिर्निहन्त्री सा सर्ववेदेषु पठ्यते ॥ २१

१ घ. च. स्थित्याकारस्तत्र । २ ङ. प्रोक्तः । ३ घ. °तास्याहन्तृशक्तिर्वा य° । च. °तास्याहं त्रिशक्तिर्वा य° ।

ब्रह्मोवाच—

आपस्तम्बस्तदा गङ्गां गत्वा स्नात्वा यतव्रतः । तुष्टाव शंकरं देवं स्तोत्रेणानेन नारद ॥ २२

आपस्तम्ब उवाच—

काष्ठेषु वह्निः कुसुमेषु गन्धो बीजेषु वृक्षादि दृषत्सु हेम ।
भूतेषु सर्वेषु तथाऽस्ति यो वै तं सोमनाथं शरणं व्रजामि ॥ २३
यो लीलया विश्वमिदं चकार धाता विधाता भुवनत्रयस्य ।
यो विश्वरूपः सदसत्परो यः सोमेश्वरं तं शरणं व्रजामि ॥ २४
यं स्मृत्य दारिद्र्यमहाभिशापरोगादिभिर्न स्पृश्यते शरीरी ।
यमाश्रिताश्चेप्सितमाप्नुवन्ति सोमेश्वरं तं शरणं व्रजामि ॥ २५
येन त्रयीधर्ममवेक्ष्य पूर्वं ब्रह्मादयस्तत्र समीहिताश्च ।
एवं द्विधा येन कृतं शरीरं सोमेश्वरं तं शरणं व्रजामि ॥ २६
यस्मै नमो गच्छति मन्त्रपूतं हुतं हविर्या च कृता च पूजा ।
दत्तं हविर्येन सुरा भजन्ते सोमेश्वरं तं शरणं व्रजामि ॥ २७
यस्मात्परं नान्यदस्ति प्रशस्तं यस्मात्परं नैव सुसूक्ष्ममन्यत् ।
यस्मात्परं नो महतां महच्च सोमेश्वरं तं शरणं व्रजामि ॥ २८
यस्याऽऽज्ञया विश्वमिदं विचित्रमचिन्त्यरूपं विविधं महच्च ।
एकक्रियं यद्वदनुप्रयाति सोमेश्वरं तं शरणं व्रजामि ॥ २९
यस्मिन्विभूतिः सकलाधिपत्यं कर्तृत्वदातृत्वमहत्त्वमेव ।
प्रीतिर्यशः सौख्यमनादिधर्मः सोमेश्वरं तं शरणं व्रजामि ॥ ३०
नित्यं शरण्यः सकलस्य पूज्यो नित्यं प्रियो यः शरणागतस्य ।
नित्यं शिवो यः सकलस्य रूपं सोमेश्वरं तं शरणं व्रजामि ॥ ३१

ब्रह्मोवाच—

ततः प्रसन्नो भगवानाह नारद तं मुनि(न्वरं वृण्विति चाऽऽह त)म् । आत्मार्थं च परार्थं च आपस्तम्बोऽब्रवीच्छिवम् ॥ ३२
सर्वान्कामानाप्नुयुस्ते ये स्नात्वा देवमीश्वरम् । पश्येयुर्जगतामीशमस्त्वित्याह शिवो मुनिम् ॥ ३३
ततः प्रभृति तत्तीर्थमापस्तम्बमुदाहृतम् । अनाद्यविद्यातिमिरव्रातनिर्मूलनक्षमम् ॥ ३४

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये दक्षिणकूलस्थापस्तम्बसोमेश्वरतीर्थवर्णनं नाम त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

गौतमीमाहात्म्य एकषष्टितमोऽध्यायः ॥ ६१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७३२६

---

१ घ. च. प्रपद्ये । २ च. समर्पिताश्च । ३ घ. च. °वो नित्यमशेषरू° ।

अथैकत्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

यमतीर्थमिति ख्यातं पितॄणां प्रीतिवर्धनम् । अशेषपापशमनं तत्र वृत्तमिदं शृणु ॥ १
तत्राऽऽख्यानमिदं त्वासीदितिहासं पुरातनम् । सरमेति प्रसिद्धाऽस्ति नाम्ना देवशुनी मुने ॥ २
तस्याः पुत्रौ महाश्रेष्ठौ श्वानौ नित्यं जनानतु । गामिनौ पवनाहारौ चतुरक्षौ यमप्रियौ ॥ ३
गा रक्षति स्म देवानां यज्ञार्थे कल्पितान्पशून् । रक्षन्तीमनुजग्मुस्ते राक्षसा दैत्यदानवाः ॥ ४
रक्षन्तीं तां महाप्राज्ञाः श्वानयोर्मातरं शुनीम् । प्रलोभयित्वा विविधैर्वाक्यैर्दानैश्च यत्नतः ॥ ५
हृता गा राक्षसैः पापैः पश्वर्थे कल्पिताः शुभाः । तत आगत्य सा देवानिदमाह क्रमाच्छुनी ॥६

सरमोवाच—

मां बद्ध्वा राक्षसैः पाशैस्ताडयित्वा प्रहारकैः । नीता गा यज्ञसिद्ध्यर्थं कल्पिताः पशवः सुराः ७

ब्रह्मोवाच—

तस्या वाचं निशम्याऽऽशु सुरान्प्राह बृहस्पतिः ॥ ८

बृहस्पतिरुवाच—

इयं विकृतरूपाऽऽस्ते अस्याः पापं च लक्षये । अस्या मतेन ता गावो नीता नान्येन हेतुना ॥
पापेयं सुकृतीवेति लक्ष्यते देहचेष्टितैः ॥ ९

ब्रह्मोवाच—

तद्गुरोर्वचनाच्छक्रः पदा तां प्राहरच्छुनीम् । पदाघातात्तदा तस्या मुखात्क्षीरं प्रसुस्रुवे ॥ १०
पुनः प्राह शचीभर्ता क्षीरं पीतं त्वया शुनि । राक्षसैश्च तदा दत्तं तस्मान्नीतास्तु गा मम ॥ ११

सरमोवाच—

नापराधोऽस्ति मे नाथ न चान्यस्यापि कस्यचित् । नापराधो न[1] चोपेक्षा ममास्ति त्रिदशेश्वर ॥
तस्माद्दुष्टोऽसि किं नाथ रिपवो बलिनस्तु ते ॥ १२

ब्रह्मोवाच—

ततो ध्यात्वा देवगुरुर्ज्ञात्वा तस्या विचेष्टितम् । सत्यं शक्र त्वियं दुष्टा रिपूणां पक्षकारिणी ॥ १३
ततः शशाप तां शक्रः पापिष्ठे त्वं शुनी भव । मर्त्यलोके पापभूता अज्ञानात्पापकारिणी ॥ १४
तदेन्द्रस्य तु शापेन मानुषे सा व्यजायत । यथा शप्ता मघवता पापात्सा ह्यतिभीषणा ॥ १५
गावो या राक्षसैर्नीतास्तासामानयनाय च । यत्नं कुर्वन्सुरपतिर्विष्णवे तन्न्यवेदयत् ॥ १६
विष्णुर्दैत्यांश्च दनुजान्गोहर्तॄंश्चैव राक्षसान् । हन्तुं प्रयत्नमकरोज्जगृहे च महद्धनुः ॥ १७
शार्ङ्गं यल्लोकविख्यातं दैत्यनाशनमेव च । जितारिः पूजितो देवैः स्वयं स्थित्वा जनार्दनः ॥ १८
यत्र वै दण्डकारण्ये शार्ङ्गपाणिर्जगत्प्रभुः । तत्रस्थान्दैत्यदनुजान्राक्षसांश्च बलीयसः ॥ १९
पुनर्जह्रे स वै विष्णुर्गा यैर्नीताश्च राक्षसैः । तत्र वै दण्डकारण्ये शार्ङ्गपाणिरिति श्रुतः ॥ २०
युध्यमानस्ततो विष्णुर्दितिजै राक्षसैः सह । ते जग्मुर्दक्षिणामाशां विष्णोस्त्रासान्महामुने ॥ २१
अन्वगच्छत्ततो विष्णुस्तानेव परमेश्वरः । गरुत्मता तानवाप्य शार्ङ्गमुक्तैर्मनोजवैः ॥ २२
बाणैस्तान्व्याहनद्विष्णुर्गङ्गाया उत्तरे तटे । देवारयः क्षयं नीता विष्णुना प्रभविष्णुना ॥ २३

१ घ. न चापेक्षा ।

शार्ङ्गमुक्तैर्महावेगैः सुस्वनैश्च सुमन्त्रितैः । क्षयं प्राप्ता विष्णुबाणैस्ततस्ते देवशत्रवः ॥ २४
गावो लब्धा यत्र देवैर्बाणतीर्थं तदुच्यते । वैष्णवं लोकविदितं गोतीर्थं चेति विश्रुतम् ॥ २५
पश्वर्थे कल्पिता गावो गङ्गाया दक्षिणे तटे । [1]प्रद्रुतास्ते सुराः सर्वे गङ्गायां संन्यवेशयन् ॥ २६
तन्मध्ये कारयामासुर्द्वीपं चैवाऽऽश्रयं गवाम् । तैर्गोभिस्तत्र गङ्गायां सुरयज्ञो व्यजायत ॥ २७
यज्ञतीर्थं तु तत्प्रोक्तं गोद्वीपं गाङ्गमध्यतः । देवानां यजनं तच्च सर्वकामप्रदं शुभम् ॥ २८
स्वयं मूर्तिमती भूत्वा गङ्गाशक्तिर्महाद्युते । असारापारसंसारसागरोत्तरणे तरिः ॥ २९
विश्वेश्वरी योगमाया सद्भक्ताभयदायिनी । गोरक्षं तु ततस्तीर्थं गङ्गाया दक्षिणे तटे ॥ ३०
तौ श्वानौ सरमापुत्रौ चतुरक्षौ यमप्रियौ । मातुः शापं चापराधं सर्वं चापि सविस्तरम् ॥ ३१
निवेद्य तु यथान्यायं कार्यं चापि सुखप्रदम् । विशापकरणं चापि पप्रच्छतुरुभौ यमम् ॥ ३२
स ताभ्यां सहितः सौरिः पित्रे सूर्याय चाब्रवीत् । श्रुत्वा सूर्यः सुतं प्राह गङ्गायां सुरसत्तम ॥
लोकत्रयैकपावन्यां गौतम्यां दण्डके वने । श्रद्धया परया वत्स सुस्नातः सुसमाहितः ॥ ३४
ब्रह्माणं चैव विष्णुं च मामीशं च यथाक्रमम् । स्तुहि त्वं सर्वभावेन भृत्यौ प्रीतिमवाप्स्यतः ३५
तत्पितुर्वचनं श्रुत्वा यमः प्रीतमनास्तदा । तयोश्च प्रीतये प्रायाद्देवतर्पणयोर्यमः ॥ ३६
गौतम्यामघहारिण्यां सुसमाहितमानसः । तथैव तोषयामास गङ्गायां सुरसत्तमान् ॥ ३७
श्वभ्यां च सहितः श्रीमान्दक्षिणाशापतिः प्रभुः । ब्रह्माणं तोषयामास भानुं वै दक्षिणे तटे ३८
ईशानमुत्तरे विष्णुं स्वयं धर्मः प्रतापवान् । दत्तवन्तो वरं श्रेष्ठं सरमाया विशापकम् ॥
वरानयाचत बहूँल्लोकानामुपकारकान् ॥ ३९

यम उवाच—

एषु स्नानं तु ये कुर्युर्ब्रह्मविष्णुमहेश्वराः । आत्मार्थं च परार्थं च ते कामानाप्नुयुः शुभान् ॥ ४०
बाणतीर्थे तु ये स्नात्वा शार्ङ्गपाणिं स्मरन्ति वै । तेभ्यो दारिद्र्यदुःखानि न भवेयुर्युगे युगे ॥ ४१
गोतीर्थे ब्रह्मतीर्थे वा यस्तु स्नात्वा यतव्रतः । ब्रह्माणं तं नमस्याथ द्वीपस्यापि प्रदक्षिणम् ॥ ४२
यः कुर्यात्तेन पृथिवी सप्तद्वीपा वसुंधरा । प्रदक्षिणीकृता तत्र किंचिद्दत्त्वा वसु द्विजम् ॥ ४३
तद्देवयजनं प्राप्य किंचिद्धुत्वा हुताशने । अश्वमेधादियज्ञानां फलं प्राप्नोति पुष्कलम् ॥ ४४
यः सकृत्तत्र पठति गायत्रीं वेदमातरम् । अधीतास्तेन वेदा वै निष्कामो मुक्तिभाजनम् ॥ ४५
स्नात्वा तु दक्षिणे कूले शक्तिं देवीं तु भक्तितः । पूजयित्वा यथान्यायं सर्वान्कामानवाप्नुयात् ॥
ब्रह्मविष्णुमहेशानां शक्तिर्माता त्रयीमयी । सर्वान्कामानवाप्नोति(स्नात्वाऽत्र पूजयेद्यस्तां) पुत्र-
वान्धनवान्भवेत् ॥ ४७
आदित्यं भक्तितो यस्तु दक्षिणे नियतो नरः । स्नात्वा पश्येत तेनेष्टा यज्ञा विविधदक्षिणाः[2] ४८
कूले यश्चोत्तरे चैव गङ्गाया दैत्यसूदनम् । स्नात्वा पश्येत तं नत्वा तस्य विष्णोः परं पदम् ॥ ४९
यमेश्वरं ततो यस्तु यमतीर्थे तु पूजितम् । स्नातः पश्यति युक्तात्मा स करोत्यचिरेण हि ॥ ५०
पितॄणामक्षयं पुण्यं फलदं कीर्तिवर्धनम् । तत्र स्नानेन दानेन जपेन स्तवनेन च ॥
अपि दुष्कृतकर्माणः पितरो मोक्षमाप्नुयुः ॥ ५१

ब्रह्मोवाच—

इत्याद्य[3]ष्ट सहस्राणि तीर्थानि त्रीणि नारद । तेषु स्नानं च दानं च सर्वमक्षयपुण्यदम् ॥ ५२

---

१ क. घ. ङ. प्रददुस्ते । २ घ. ङ. च. °णाः । भवेयुश्चो° । ३ क. च. °यथ स° ।

एतेषां स्मरणं पुण्यं नानाजन्माघनाशनम् । श्रवणात्पितृभिः सार्धं पठनात्स्वकुलैः सह ॥ ५३
तेषामप्यतिपापानि नाशं यान्ति ममाऽऽज्ञया । तत्र स्नानादि यः कृत्वा किंचिद्दत्त्वा यतात्मवान्
पितॄणां पिण्डदानादि कृत्वा नत्वा सुरानिमान् । धनं धान्यं यशो वीर्यमायुरारोग्यसंपदः ॥५५
पुत्रान्पौत्रान्प्रियां भार्यां लब्ध्वा चान्यन्मनीषितम् । अवियुक्तः प्रीतमना बन्धुभिश्चातिमानितः ॥
नरकस्थानपि पितॄंस्तारयित्वा कुलानि च । पावयित्वा प्रियैर्युक्तो ह्यन्ते विष्णुं शिवं स्मरेत् ॥
ततो मुक्तिपदं गच्छेद्देवानां वचनं यथा ॥ ५७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये बाणतीर्थशार्ङ्गपाणीयगोद्वीपदेवयजनब्रह्मतीर्थशक्तियमादित्यसुपर्णदैत्यसूदनयमेश्वरपितृतीर्थादित्र्यधिकाष्टसहस्रतीर्थवर्णनं नामैकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

गौतमीमाहात्म्ये द्विषष्टितमोऽध्यायः ॥ ६२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७६८३

अथ द्वात्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

यक्षिणीसंगमं नाम तीर्थं सर्वफलप्रदम् । तत्र स्नानेन दानेन सर्वान्कामानवाप्नुयात् ॥ १
यत्र यक्षेश्वरो देवो दर्शनाद्भुक्तिमुक्तिदः । तत्र च स्नानमात्रेण सैत्रयागफलं लभेत् ॥ २
विश्वावसोः स्वसा नाम्ना पिप्पला गुरुहासिनी । ऋषीणां सत्रमगमद्गौतमीतीरवर्तिनाम् ॥ ३
*दृष्ट्वा तत्र ऋषीन्क्षामान्सा जहासातिगर्विता । या गत्वाऽऽश्रावय वौषडस्तु श्रौषडिति स्थिरम्
त्रिस्वरेण ब्रुवती तां ते शेपुः स्राविणी भव । ततो ह्यभवत्तत्र यक्षिणीति सुविश्रुता ॥ ५
ततो विश्वावसुः पूज्य ऋषीन्देवं त्रिलोचनम् । संगम्य चैव गौतम्या तां विशापामथाकरोत् ॥६
ततः प्रभृति तत्तीर्थं यक्षिणीसंगमं स्मृतम् । तत्र स्नानादिदानेन सर्वान्कामानवाप्नुयात् ॥ ७
विश्वावसोः प्रसन्नोऽभूद्यत्र शंभुः शिवान्वितः । शैवं तत्परमं तीर्थं दुर्गातीर्थं च विश्रुतम् ॥ ८
सर्वपापौघहरणं सर्वदुर्गतिनाशनम् । सर्वेषां तीर्थमुख्यानां तद्धि सारं महामुने ॥
तीर्थं मुनिवरैः ख्यातं सर्वसिद्धिप्रदं नृणाम् ॥ ९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये यक्षिणीसंगमदुर्गादितीर्थवर्णनं नाम द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥

गौतमीमाहात्म्ये त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७६९२

---

* इदमर्धं घ. च. पुस्तकयोर्नास्ति ।

१ क. च. 'दिगहस्रत्रयव' । २ क. ङ. सर्वयज्ञफ' ।

अथ त्रयस्त्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

शुक्रतीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् । यस्य स्मरणमात्रेण सर्वकामानवाप्नुयात् ॥ १
भरद्वाज इति ख्यातो मुनिः परमधार्मिकः । तस्य पैठीनसी नाम भार्या सुकुलभूषणा ॥ २
गौतमीतीरमध्यास्ते पतिव्रतपरायणा । अग्नीषोमीयमैन्द्राग्नं पुरोडाशमकल्पयत् ॥ ३
पुरोडाशे श्रप्यमाणे धूमात्कश्चिदजायत । पुरोडाशं [1]भक्षयित्वा लोकत्रितयभीषणः ॥ ४
यज्ञं मे ह्यत्र को हंसि कोपात्त्वमिति तं मुनिः । प्रोवाच सत्वरं क्रुद्धो भरद्वाजो द्विजोत्तमः ॥
तदृषेर्वचनं श्रुत्वा राक्षसः प्रत्युवाच तम् ॥ ५

राक्षस उवाच—

हव्यघ्न इति विख्यातं भरद्वाज निबोध माम् । संध्यासुतोऽहं ज्येष्ठश्च सुतः प्राचीनबर्हिषः ॥ ६
ब्रह्मणा मे वरो दत्तो यज्ञान्खाद यथासुखम् । ममानुजः कलिश्चापि बलवानतिभीषणः ॥ ७
अहं कृष्णः पिता कृष्णो माता कृष्णा तथाऽनुजः । अहं मखं हनिष्यामि यूपं छेत्स्यि कृतान्तकः

भरद्वाज उवाच—

रक्ष्यतां मे त्वया यज्ञः प्रियो धर्मः सनातनः । जाने त्वां यज्ञहन्तारं सद्विजं रक्ष मे क्रतुम् ॥ ९

यज्ञघ्न उवाच—

भरद्वाज निबोधेदं वाक्यं मम समासतः । ब्रह्मणाऽहं पुरा शप्तो देवदानवसंनिधौ ॥ १०
ततः प्रसादितो देवो मया लोकपितामहः । अमृतैः प्रोक्षयिष्यन्ति यदा त्वां मुनिसत्तमाः ॥ ११
तदा विशापो भविता हव्यघ्न त्वं न चान्यथा । एवं करिष्यसि यदा ततः सर्वं भविष्यति ॥
यद्यदाकाङ्क्षितं ब्रह्मन्नैतन्मिथ्या कदाचन ॥ १२

ब्रह्मोवाच—

भरद्वाजः पुनः प्राह सखा मेऽसि महामते । मखसंरक्षणं येन स्यान्मे वद करोमि तत् ॥ १३
संभूय देवा दैतेया ममन्थुः क्षीरसागरम् । अलभन्तामृतं कष्टात्तदस्मत्सुलभं कथम् ॥ १४
प्रीत्या यदि प्रसन्नोऽसि सुलभं यद्वदस्व तत् । तदृषेर्वचनं श्रुत्वा रक्षः प्राह तदा मुदा ॥ १५

रक्ष उवाच—

अमृतं गौतमीवारि अमृतं स्वर्णमुच्यते । अमृतं गोभवं चाऽऽज्यममृतं सोम एव च ॥ १६
एतैर्मामभिषिञ्चस्व अथ [2]वैतैस्तथा त्रिभिः । गङ्गाया वारिणाऽऽज्येन हिरण्येन तथैव च ॥
सर्वेभ्योऽप्यधिकं दिव्यममृतं गौतमीजलम् ॥ १७

ब्रह्मोवाच—

एतदाकर्ण्य स ऋषिः परं संतोषमागतः । पाणावादाय गङ्गायाः सलिलामृतमादरात् ॥ १८
तेनाकरोदृषी रक्षो ह्यभिषिक्तं तदा मखे । पुनश्च यूपं च पशाद्दृत्विक्षु मखमण्डले ॥ १९
सर्वमेवाभवच्छुक्लमभिषेकान्महात्मनः । तद्रक्षोऽपि तदा शुक्लो भूत्वोत्पन्नो महाबलः ॥ २०
यः पुरा कृष्णरूपोऽभूत्स तु शुक्लोऽभवत्क्षणात् । यज्ञं सर्वं समाप्याथ भरद्वाजः प्रतापवान् ॥ २१
ऋत्विजोऽपि विसृज्याथ यूपं गङ्गोदकेऽक्षिपत् । गङ्गामध्ये तद्धि यूपमद्याप्यास्ते महामते ॥ २२

---

१ क. ङ. भेदयित्वा । २ ङ. वैकं तथा ।

अभिषिक्तं चामृतेन अभिज्ञानं तु तन्महत् । तत्र तीर्थे पुना रक्षो भरद्वाजमुवाच ह ॥ २३

रक्ष उवाच—

अहं यामि भरद्वाज कृतः शुक्रस्त्वया पुनः । तस्मात्त्वत्र तीर्थे ये स्नानदानादिपूजनम् ॥ २४
कुर्युस्तेषामभीष्टानि भवेयुर्यत्फलं मखे । स्मरणादपि पापानि नाशं यान्तु सदा मुने ॥ २५
ततः प्रभृति तत्तीर्थं शुक्रतीर्थमिति स्मृतम् । गौतम्यां दण्डकारण्ये स्वर्गद्वारमपावृतम् ॥ २६
उभयोस्तीरयोः सप्त सहस्राण्यपराणि च । तीर्थानां मुनिशार्दूल सर्वसिद्धिप्रदायिनाम् ॥ २७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये शुक्रतीर्थाद्युभयतीरस्थसप्तसहस्रतीर्थवर्णनं नाम त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

गौतमीमाहात्म्ये चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७७१९

अथ चतुस्त्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

चक्रतीर्थमिति ख्यातं स्मरणात्पापनाशनम् । तस्य प्रभावं वक्ष्यामि शृणु यत्नेन नारद ॥ १
ऋषयः सप्त विख्याता वसिष्ठप्रमुखा मुने । गौतम्यास्तीरमाश्रित्य सत्रयज्ञमुपासते ॥ २
तत्र विघ्न उपक्रान्ते रक्षोभिरतिभीषणे । मामभ्येत्याथ मुनयो रक्षःकृत्यं न्यवेदयन् ॥ ३
सदाऽहं प्रमदारूपं माययाऽऽसृज्य नारद । यस्याश्च दर्शनादेव नाशं यान्त्यथ राक्षसाः ॥ ४
एवमुक्त्वा तु तां प्रादामृषिभ्यः प्रमदां मुने । मद्वाक्यादृषयो मायामादाय पुनरागमन् ॥ ५
अजैका या समाख्याता कृष्णलोहितरूपिणी । मुक्तकेशीत्यभिधया साऽऽस्तेऽद्यापि स्वरूपिणी
लोकत्रितयसंमोहदायिनी कामरूपिणी । तद्बलात्स्वस्थमनसः सर्वे च मुनिपुंगवाः ॥ ७
गौतमीं सरितां श्रेष्ठां पुनर्यज्ञाय दीक्षिताः । पुनस्तन्मखनाशाय राक्षसाः समुपागमन् ॥ ८
पक्षवाटान्तिके मायां दृष्ट्वा राक्षसपुंगवाः । ततो नृत्यन्ति गायन्ति हसन्ति च रुदन्ति च ॥ ९
माहेश्वरी महामाया प्रभावेणातिदर्पिता । तेषां मध्ये दैत्यपतिः शम्बरो नाम वीर्यवान् ॥ १०
मायारूपां तु प्रमदां भक्षयामास नारद । तदद्भुतमतीवाऽऽसीत्तन्मायाबलदर्शिनाम् ॥ ११
मखे विध्वंस्यमाने तु ते विष्णुं शरणं ययुः । प्रादाद्विष्णुश्चक्रमथो मुनीनां रक्षणाय तु ॥ १२
चक्रं तद्राक्षसानाजौ दैत्यांश्च दनुजांस्तथा । चिच्छेद तद्भयादेव मृता राक्षसपुंगवाः ॥ १३
ऋषिभिस्तन्महासत्रं संपूर्णमभवत्तदा । विष्णोः प्रक्षालितं चक्रं गङ्गाम्भोभिः सुदर्शनम् ॥ १४
ततः प्रभृति तत्तीर्थं चक्रतीर्थमुदाहृतम् । तत्र स्नानेन दानेन सत्रयागफलं लभेत् ॥ १५
तत्र पञ्च शतान्यासंस्तीर्थानां पापहारिणाम् । तेषु स्नानं तथा दानं प्रत्येकं मुक्तिदायकम् ॥१६

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये चक्रतीर्थादिपञ्चशततीर्थवर्णनं नाम चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

गौतमीमाहात्म्ये पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७७३५

---

१ घ. °षयस्ते च वि° ।

अथ पञ्चत्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

वाणीसंगममाख्यातं यत्र वागीश्वरो हरः । तत्तीर्थं सर्वपापानां मोचनं सर्वकामदम् ॥ १
तत्र स्नानेन दानेन ब्रह्महत्यादिनाशनम् । ब्रह्मविष्ण्वोश्च संवादे महत्त्वे च परस्परम् ॥ २
तयोर्मध्ये महादेवो ज्योतिर्मूर्तिरभूत्किल । तत्रैव वागुवाचेदं दैवी पुत्र तयोः शुभा ॥ ३
अहमस्मि महांस्तत्र अहमस्मीति वै मिथः । दैवी वाक्तावुभौ प्राह यस्त्वस्यान्तं तु पश्यति ॥ ४
स तु ज्येष्ठो भवेत्तस्मान्मा वादं कर्तुमर्हथः । तद्वाक्याद्विष्णुरगमदधोऽहं चोर्ध्वमेव च ॥ ५
ततो विष्णुः शीघ्रमेत्य ज्योतिःपार्श्वे उपाविशत् । अप्राप्यान्तमहं प्रायां दूराद्दूरतरं मुने ॥ ६
ततः श्रान्तो निवृत्तोऽहं द्रष्टुमीशं तु तं प्रभुम् । तदैवं मम धीरासीद्दृष्टश्चान्तो मया भृशम् ॥ ७
अस्य देवस्य तद्विष्णोर्मम ज्यैष्ठ्यं स्फुटं भवेत् । पुनश्चापि मम त्वेवं मतिरासीन्महामते ॥ ८
सत्यैर्वक्त्रैः कथं वक्ष्ये पीडितोऽप्यनृतं वचः । नानाविधेषु पापेषु नानृतात्पातकं परम् ॥ ९
सत्यैर्वक्त्रैरसत्यां वा वाचं वक्ष्ये कथं त्विति । ततोऽहं पञ्चमं वक्त्रं गर्दभाकृतिभीषणम् ॥ १०
कृत्वा तेनानृतं वक्ष्य इति ध्यात्वा चिरं तदा । अब्रवं तं हरिं तत्र आसीनं जगतां प्रभुम्॥ ११
अस्य चान्तो मया दृष्टस्तेन ज्यैष्ठ्यं जनार्दन । ममेति वदतः पार्श्वे उभौ तौ हरिशंकरौ ॥ १२
एकरूपत्वमापन्नौ सूर्याचन्द्रमसाविव । तौ दृष्ट्वा विस्मितो भीतश्चास्तवं तावुभावपि ॥
ततः क्रुद्धौ जगन्नाथौ वाचं तामिदमूचतुः ॥ १३

हरिहरावूचतुः—

दुष्टे त्वं निम्नगा भूया नानृतादस्ति पातकम् ॥ १४

ब्रह्मोवाच—

ततः सा विह्वला भूत्वा नदीभावमुपागता । तद्दृष्ट्वा विस्मितो भीतस्तामब्रवमहं तदा ॥ १५
यस्मादसत्यमुक्ताऽसि ब्रह्मवाचि स्थिता सती । तस्माददृश्या त्वं भूयाः पापरूपाऽस्यसंशयम् ॥
एतच्छापं विदित्वा तु तौ देवौ प्रणता तदा । विशापत्वं प्रार्थयन्ती तुष्टाव च पुनः पुनः ॥ १७
ततस्तुष्टौ देवदेवौ प्रार्थितौ त्रिदशार्चितौ । प्रीत्या हरिहरावेवं वाचं वाचमथोचतुः ॥ १८

हरिहरावूचतुः—

गङ्गया संगता भद्रे यदा त्वं लोकपावनी । तदा पुनर्वपुस्ते स्यात्पवित्रं हि सुशोभने ॥ १९

ब्रह्मोवाच—

तथेत्युक्त्वा साऽपि देवी गङ्गया संगताऽभवत् । भागीरथी गौतमी च ततश्चापि स्वकं वपुः २०
देवी सा व्यगमद्ब्रह्मन्देवानामपि दुर्लभम् । गौतम्यां सैव विख्याता नाम्ना वाणीति पुण्यदा ॥
भागीरथ्यां सैव देवी सरस्वत्यभिधीयते । उभयत्रापि विख्यातः संगमो लोकपूजितः ॥ २२
सरस्वतीसंगमश्च वाणीसंगम एव च । गौतम्या संगता देवी वागी वाचा सरस्वती ॥ २३
सर्वत्र पूजितं तीर्थं तत्र वाचा शिवं प्रभुम् । देवेश्वरं पूजयित्वा विशापमगमत्ततः ॥ २४
ब्रह्मा विधूय वाग्दौष्ट्यं स्वं च धामागमत्पुनः । तस्मात्तत्र शुचिर्भूत्वा स्नात्वा तत्र च संगमे २५
वागीश्वरं ततो दृष्ट्वा तावता मुक्तिमाप्नुयात् । दानहोमादिकं किंचिदुपवासादिकां क्रियाम् ॥२६

१ घ. च. वाक्संगममिति ख्या° ।

यः कुर्यात्संगमे पुण्ये संसारे न भवेत्पुनः । एकोनविंशतिशतं तीर्थानां तीरयोर्द्वयोः ॥
नानाजन्मार्जिताशेषपापक्षयविधायिनाम् ॥ २७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये वाणीसंगमवागीश्वराद्युभयतटस्थैकोनविंशति-[1]
शततीर्थवर्णनं नाम पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

गौतमीमाहात्म्ये षट्षष्ठितमोऽध्यायः ॥ ६६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७७६२

अथ षट्त्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

विष्णुतीर्थमिति ख्यातं तत्र वृत्तमिदं शृणु । मौद्गल्य इति विख्यातो मुद्गलस्य सुतो ऋषिः ॥१
तस्य भार्या तु जाबाला नाम्ना[2] ख्याता सुपुत्रिणी । पिता ऋषिस्तथा वृद्धो मुद्गलो लोकविश्रुतः
तस्य भार्या तथा ख्याता नाम्ना भागीरथी शुभा । स मौद्गल्यः प्रातरेव गङ्गां स्नाति यतव्रतः ३
नित्यमेव त्विदं कर्म तस्याऽऽसीन्मुनिसत्तम । गङ्गातीरे कुशैर्मृद्भिः शमीपुष्पैरहर्निशम्[3] ॥ ४
गुरूदितेन मार्गेण स्वमानससरोरुहे । आवाहनं नित्यमेव विष्णोश्चक्रे स मौद्गलिः ॥ ५
तेनाऽऽहूतस्त्वरन्नेति लक्ष्मीभर्ता जगत्पतिः । वैनतेयमथाऽऽरुह्य शङ्खचक्रगदाधरः ॥ ६
पूजितस्तेन ऋषिणा स मौद्गल्येन यत्नतः । प्रब्रूते च कथाश्चित्रा मौद्गल्याय जगत्प्रभुः ॥ ७
ततोऽपराह्णसमये विष्णुः प्राह स मौद्गलिम् । याहि वत्स स्वभवनं श्रान्तोऽसीति पुनः पुनः ८
एवमुक्तः स देवेन विष्णुना याति स द्विजः । जगत्प्रभुस्ततो याति देवैर्युक्तः स्वमन्दिरम् ॥ ९
मौद्गल्योऽपि तथाऽभ्येत्य किंचिदादाय नित्यशः । स्वमेव भवनं विद्वान्भार्यायै स्वार्जितं धनम्
ददाति स महाविष्णुचरणाब्जपरायणः । मौद्गल्यस्य प्रिया साऽपि पतिव्रतपरायणा ॥ ११
शाकं मूलं फलं वाऽपि भर्त्राऽऽनीतं तु यत्नतः । सुसंस्कृत्याप्यतिथीनां बालानां भर्तुरेव च ॥
दत्त्वा तु भोजनं तेभ्यः पश्चाद्भुङ्क्ते यतव्रता । भुक्तवत्स्वथ सर्वेषु रात्रौ नित्यं स मौद्गलिः ॥ १३
विष्णोः श्रुताः कथाश्चित्रास्तेभ्यो वक्त्यथ हर्षितः । एवं बहुतिथे काले व्यतीते चातिविस्मिता
मौद्गल्यस्य रहो भार्या भर्तारं वाक्यमब्रवीत् ॥ १४

जाबालोवाच—

यदि ते विष्णुरभ्येति समीपं त्रिदशार्चितः । तथाऽपि कष्टमस्माकं कस्मादिति जगत्प्रभुम् ॥ १५
तत्पृच्छ त्वं महाप्राज्ञ यदाऽसौ विष्णुरेति च । यस्मिंश्च स्मृतमात्रे तु जराजन्मरुजो मृतिः ॥
नाशं यान्ति कुतो दृष्टे तस्मात्पृच्छ जगत्पतिम् ॥ १६

ब्रह्मोवाच—

तथेत्युक्त्वा प्रियावाक्यान्मौद्गल्यो नित्यवद्धरिम् । पूजयित्वा विनीतश्च पप्रच्छ स कृताञ्जलिः॥

मौद्गल्य उवाच—

त्वयि स्मृते जगन्नाथ शोकदारिद्र्यदुष्कृतम् । नाशं याति विपत्तिर्मे त्वयि दृष्टे कथं स्थिता॥ १८

---

१ च. तिस्तत्र ती । २ घ. च. तिती । ३ घ. मीपत्रैर ।

श्रीविष्णुरुवाच—

स्वकृतं भुज्यते भूतैः सर्वैः सर्वत्र सर्वदा । न कोऽपि कस्यचित्किंचित्करोत्यत्र हिताहिते ॥ १९
यादृशं चोप्यते बीजं फलं भवति तादृशम् । रसालः स्यान्न निम्बस्य बीजाज्जात्वपि कुत्रचित् ॥
न कृता गौतमीसेवा नार्चितौ हरिशंकरौ । न दत्तं यैश्च विप्रेभ्यस्ते कथं भाजनं श्रियः ॥ २१
त्वया न दत्तं किंचिच्च ब्राह्मणेभ्यो ममापि च । यद्दीयते तदेवेह परस्मिंश्चोपतिष्ठति ॥ २२
शुद्धिर्वार्भिः कुशैर्मन्त्रैः शुचिकर्म सदैव यत् । करोति तस्मात्पूतात्मा शरीरस्य च शोषणात् २३
विना दानेन न क्वापि भोगावाप्तिर्नृणां भवेत् । सत्कर्माचरणाच्छुद्धो विरक्तः स्यात्ततो नरः ॥
ततोऽप्रतिहतज्ञानो जीवन्मुक्तस्ततो भवेत् । सर्वेषां सुलभा मुक्तिर्मद्भक्त्या चेह पूर्ततः ॥ २५
भुक्तिर्दानादिना सर्वभूतदुःखनिबर्हणात् । अथवा लप्स्यसे मुक्तिं भक्त्या भुक्तिं न लप्स्यसे२६

मौद्गल्य उवाच—

भक्त्या मुक्तिः कथं भूयाद्भुक्तेर्मुक्तिः सुदुर्लभा । जाता चेद्देहिनां मुक्तिः किमन्येन प्रयोजनम्२७
भक्त्या मुक्तिः सर्वपूज्या तामिच्छेयं जगन्मय ॥ २८

विष्णुरुवाच—

एतदेवान्तरं ब्रह्मन्दीयते मामनुस्मरन् । ब्राह्मणायाथवाऽर्थिभ्यस्तदेवाक्षयतां व्रजेत् ॥ २९
मामध्यात्वाऽथ यद्दत्तं तत्तन्मात्रफलप्रदम् । तत्पुनर्दत्तमेवेह न भोगायात्र कल्पते ॥ ३०
तस्माद्देहि महाबुद्धे भोज्यं किंचिन्मम ध्रुवम् । अथवा विप्रमुख्याय गौतमीतीरमाश्रितः ॥ ३१

ब्रह्मोवाच—

मौद्गल्यः प्राह तं विष्णुं देयं मम न विद्यते । नान्यत्किंचन देहादि यत्त्वयि समर्पितम् ॥ ३२
ततो विष्णुर्गरुत्मन्तं प्राह शीघ्रं जगत्पतिः । इहाऽऽनयस्व कणिशं ममायं चार्पयिष्यति ॥ ३३
ततो योग्यानयं भोगान्प्राप्स्यते मनसः प्रियान् । आकर्ण्य स्वामिनाऽऽदिष्टं तथा चक्रे स पक्षिराट्
विष्णुहस्ते कणान्प्रादात्स मौद्गल्यो यतव्रतः । एतस्मिन्नन्तरे विष्णुर्विश्वकर्माणमब्रवीत् ॥ ३५

विष्णुरुवाच—

यावच्चास्य कुले सप्त पुरुषास्तावदेव तु । भवितारो महाबुद्धे तावत्कामा मनीषिताः ॥
गावो हिरण्यं धान्यानि वस्त्राण्याभरणानि च ॥ ३६

ब्रह्मोवाच—

यच्च किंचिन्मनःप्रीत्यै लोके भवति भूषणम् । तत्सर्वमाप मौद्गल्यो विष्णुगङ्गाप्रभावतः ॥ ३७
गृहं गच्छेति मौद्गल्यो विष्णुनोक्तस्ततो ययौ । आश्रमे स्वस्य सर्वार्धि दृष्ट्वा ऋषिरभाषत ॥ ३८

ऋषिरुवाच—

अहो दानप्रभावोऽयमहो विष्णोरनुस्मृतिः । अहो गङ्गाप्रभावश्च कैर्विचार्यो महानयम् ॥ ३९

ब्रह्मोवाच—

मौद्गल्यो भार्यया सार्धं पुत्रैः पौत्रैश्च बन्धुभिः । पितृभ्यां बुभुजे भोगान्भुक्तिं मुक्तिमवाप च ४०
ततः प्रभृति तत्तीर्थं मौद्गल्यं वैष्णवं तथा । तत्र स्नानं च दानं च भुक्तिमुक्तिफलप्रदम् ॥ ४१
तत्र श्रुतिः स्मृतिर्वाऽपि तीर्थस्य स्यात्कथंचन । तस्य विष्णुर्भवेत्प्रीतः पापैर्मुक्तः सुखी भवेत्४२

---

१ घ. ङ. च. °त् । न मां ध्यात्वा° । २ घ. ङ. च. °धात्तावन्मा° । ३ घ. ङ. च. शोभनम् । ४ च. °ष्णुसङ्गप्र° । ५ घ. च. °स्मृतेः । अ° । ६ घ. ङ. च. पुत्रैरिष्टैश्च ।

एकादश सहस्राणि तीर्थानां तीरयोर्द्वयोः । सर्वार्थदायिनां तत्र स्नानदानजपादिभिः ॥ ४१

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये मौद्गल्यविष्णुतीर्थाद्येकादशसहस्रतीर्थवर्णनं नाम षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

गौतमीमाहात्म्ये सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७८०९

अथ सप्तत्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

लक्ष्मीतीर्थमिति ख्यातं साक्षाल्लक्ष्मीविवर्धनम् । अलक्ष्मीनाशनं पुण्यमाख्यानं शृणु नारद ॥ १

संवादश्च पुरा त्वासील्लक्ष्म्याः पुत्र दरिद्रया । परस्परविरोधिन्यावुभे विश्वं समीयतुः ॥ २

ताभ्यामव्यापृतं वस्तु तन्नास्ति भुवनत्रये । मम ज्येष्ठ्यं मम ज्यैष्ठ्यमित्यूचतुरुभे मिथः ॥

अहं पूर्वं समुद्भूता इत्याह श्रियमोजसा ॥ ३

श्रीलक्ष्मीरुवाच—

कुलं शीलं जीवितं वा देहिनामहमेव तु । मया विना देहभाजो जीवन्तोऽपि मृता इव ॥ ४

ब्रह्मोवाच—

दरिद्रया च सा प्रोक्ता सर्वेभ्यो ह्यधिका ह्यहम् । मुक्तिर्मदाश्रिता नित्यं दरिद्रैवं वचोऽब्रवीत् ५

कामः क्रोधश्च लोभश्च मदो मात्सर्यमेव च । यत्राहमस्मि तत्रैते न तिष्ठन्ति कदाचन ॥ ६

न भयोद्भूतिरुन्माद ईर्ष्या उद्धतवृत्तिता । यत्राहमस्मि तत्रैते न तिष्ठन्ति कदाचन ॥ ७

दरिद्राया वचः श्रुत्वा लक्ष्मीस्तां प्रत्यभाषत ॥ ८

लक्ष्मीरुवाच—

अलंकृतो मया जन्तुः सर्वो भवति पूजितः । निर्धनः शिवतुल्योऽपि सर्वैरप्यभिभूयते ॥ ९

देहीति वचनद्वारा देहस्थाः पञ्च देवताः । सद्यो निर्गत्य गच्छन्ति [1]धीश्रीह्रीशान्तिकीर्तयः॥१०

तावद्गुणा गुरुत्वं च यावन्नार्थयते परम् । अर्थी चेत्पुरुषो जातः क्व गुणाः क्व च गौरवम् ॥ ११

तावत्सर्वोत्तमो जन्तुस्तावत्सर्वगुणालयः । नमस्यः सर्वलोकानां यावन्नार्थयते परम् ॥ १२

कष्टमेतन्महापापं निर्धनत्वं शरीरिणाम् । न मानयति नो वक्ति न स्पृशत्यधनं जनः ॥ १३

अहमेव ततः श्रेष्ठा दरिद्रे शृणु मे वचः ॥ १४

ब्रह्मोवाच—

तल्लक्ष्मीवचनं श्रुत्वा दरिद्रा वाक्यमब्रवीत् ॥ १५

दरिद्रोवाच—

वक्तुं न लक्ष्मीर्ज्येष्ठाऽहमिति वै लज्जसे मुहुः । पापेषु रमसे नित्यं विहाय पुरुषोत्तमम् ॥ १६

विश्वस्तवञ्चका नित्यं भवती श्लाघसे कथम् । सुखं न तादृक्त्वत्प्राप्तौ पश्चात्तापो यथा गुरुः १७

न तथा जायते पुंसां सुरया दारुणो मदः । त्वत्संनिधानमात्रेण यथा वै विदुषामपि ॥ १८

---

[1] घ. धीह्रीश्रीकान्ति° ।

सदैव रमसे लक्ष्मीः प्रायस्त्वं पापकारिषु । अहं वसामि योग्येषु धर्मशीलेषु सर्वदा ॥ १९
शिवविष्ण्वनुरक्तेषु कृतज्ञेषु महत्सु च । सदाचारेषु शान्तेषु गुरुसेवोद्यतेषु च ॥ २०
सत्सु विद्वत्सु शूरेषु कृतबुद्धिषु साधुषु । निवसामि सदा लक्ष्मीस्तस्माज्ज्यैष्ठ्यं मयि स्थितम् २१
ब्राह्मणेषु शुचिष्मत्सु व्रतचारिषु भिक्षुषु । निर्भयेषु वसिष्यामि लक्ष्मीस्त्वं शृणु [1]ते स्थितिम् २२
राजवर्तिषु पापेषु निष्ठुरेषु खलेषु च । +पिशुनेषु च लुब्धेषु विकृतेषु शठेषु च ॥ २३
अनार्येषु कृतघ्नेषु धर्मघातिषु सर्वदा । मित्रद्रोहिष्वनिष्टेषु भग्नचित्तेषु वर्तसे ॥ २४

ब्रह्मोवाच—

एवं विवदमाने ते जग्मतुर्मामुभे अपि । तयोर्वाक्यमुपश्रुत्य मयोक्ते ते उभे अपि ॥ २५
मत्तः पूर्वतरा पृथ्वी आपः पूर्वतरास्ततः । स्त्रीणां विवादं ता एव स्त्रियो जानन्ति नेतरे ॥ २६
विशेषतः पुनस्ता[2]भ्यः कमण्डलुभवाश्च याः । तत्रापि गौतमी देवी निश्चयं कथयिष्यति ॥ २७
सैव सर्वार्तिसंहर्त्री सैव संदेहकर्तरी । ते मद्वाक्याद्ध्रुवं गत्वा भूम्या च सहिते अपि ॥ २८
अद्भिश्च सहिताः सर्वा गौतमीं ययुरापगाम् । भूमिरापस्तयोर्वाक्यं गौतम्यै क्रमशः स्फुटम्॥२९
सर्वं निवेदयामासुर्यथावृत्तं प्रणम्य ताम् । दरिद्रायाश्च लक्ष्म्याश्च वाक्यं मध्यस्थवत्तदा ॥ ३०
शृण्वत्सु लोकपालेषु शृण्वत्यां भुवि नारद । शृण्वतीष्वप्सु सा गङ्गा दरिद्रां वाक्यमब्रवीत् ॥
संभ्रमस्य तथा लक्ष्मीं गौतमी वाक्यमब्रवीत् ॥ ३१

गौतम्युवाच—

ब्रह्मश्रीश्च तपःश्रीश्च यज्ञश्रीः कीर्तिसंज्ञिता । धनश्रीश्च यशश्रीश्च विद्या प्रज्ञा सरस्वती ॥ ३२
भुक्तिश्रीश्चाथ मुक्तिश्च स्मृतिर्लज्जा धृतिः क्षमा । सिद्धिस्तुष्टिस्तथा पुष्टिः शान्तिरापस्तथा मही
अहंशक्तिरथौषध्यः श्रुतिः शुद्धिर्विभावरी। द्यौर्ज्योत्स्ना आशिषः स्वस्तिर्व्याप्तिर्माया उषा शिवा
यत्किंचिद्विद्यते लोके लक्ष्म्या व्याप्तं चराचरम् । ब्राह्मणेष्वथ धीरेषु क्षमावत्स्वथ साधुषु ॥३५
विद्यायुक्तेषु चान्येषु भुक्तिमुक्त्यनुसारिषु । यद्यद्रम्यं सुन्दरं वा तत्तल्लक्ष्मीविजृम्भितम् ॥ ३६
किमत्र बहुनोक्तेन सर्वं लक्ष्मीमयं जगत् । यस्मिन्कस्मिंश्च यत्किंचिदुत्कृष्टं परिदृश्यते ॥ ३७
लक्ष्मीमयं तु तत्सर्वं तया हीनं न किंचन । अत्रेमां सुन्दरीं देवीं स्पर्धयन्ती न लज्जसे ॥ ३८
गच्छ गच्छेति तां गङ्गा दरिद्रां वाक्यमब्रवीत् । ततः प्रभृति गङ्गाम्भो दरिद्रावैरकार्यभूत् ॥ ३९
तावद्दरिद्राभिभवो गङ्गा यावन्न सेव्यते । ततः प्रभृति तत्तीर्थमलक्ष्मीनाशनं शुभम् ॥ ४०
तत्र स्नानेन दानेन लक्ष्मीवान्पुण्यवान्भवेत् । तीर्थानां षट्सहस्राणि तस्मिंस्तीर्थे महामते ॥
देवर्षिमुनिजुष्टानां सर्वसिद्धिप्रदायिनाम् ॥ ४१

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये लक्ष्मीतीर्थादिषट्सहस्रतीर्थवर्णनं नाम सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

गौतमीमाहात्म्येऽष्टषष्टितमोऽध्यायः ॥ ६८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७८४६

+ इदमर्धं घ. च. पुस्तकयोर्नास्ति ।

१ क. घ. च. मे । २ क. ङ. 'स्ताभ्यां क' ।

अथाष्टात्रिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

भानुतीर्थमिति ख्यातं सर्वसिद्धिकरं नृणाम् । तत्रेदं वृत्तमाख्यास्ये महापातकनाशनम् ॥ १

शर्यातिरिति विख्यातो राजा परमधार्मिकः । तस्य भार्या [1]स्थविष्ठेति रूपेणाप्रतिमा भुवि ॥ २

मधुच्छन्दा इति ख्यातो वैश्वामित्रो द्विजोत्तमः । पुरोधास्तस्य नृपतेर्ब्रह्मर्षिः शमिनां प्रभुः ॥ ३

दिशो विजेतुं स जगाम राजा पुरोधसा तेन नृपप्रवीरः ।
पुरोधसं प्राह महानुभावं जित्वा दिशश्चाध्वनि संनिविष्टः ॥ ४
पप्रच्छेदं केन खेदं गतोऽसि हेतुं वदस्वेति महानुभाव ।
त्वमेव राज्ये मम सर्वमान्यः समस्तविद्यानिरवद्यबोधः ॥ ५
विधूतपापः परितापशून्यः किमन्यचेता इव लक्ष्यसे त्वम् ।
जितेयमुर्वी विजिता नरेन्द्रा हर्षस्य हेतौ महतीह जाते ॥ ६
किं त्वं कृशो मे वद सत्यमेव द्विजातिवर्यातिमहानुभाव ।
संबोध्य शर्यातिमुवाच विप्रश्छन्दोमधुः प्रेममयीं प्रियोक्तिम् ॥ ७

मधुच्छन्दा उवाच—

शृणु भूपाल मद्वाक्यं भार्यया यदुदीरितम् । स्थिते यामे वयं यामो यामिनी चार्धगामिनी ॥ ८

स्वामिनी चास्य देहस्य कामिनी मां प्रतीक्षते । स्मृत्वा तत्कामिनीवाक्यं शोषं याति कलेवरम्
विकारे स्मरसंजाते जीवातुर्नलिनानना ॥ ९

ब्रह्मोवाच—

विहस्य चाब्रवीद्राजा पुरोधसमरिंदमः ॥ १०

राजोवाच—

त्वं गुरुर्मम मित्रं च किमात्मानं विडम्बसे । किमनेन महाप्राज्ञ मम वाक्येन मानद ॥
क्षणविध्वंसिनि सुखे का नामाऽऽस्था महात्मनाम् ॥ ११

ब्रह्मोवाच—

एतदाकर्ण्य मतिमान्मधुच्छन्दा वचोऽब्रवीत् ॥ १२

मधुच्छन्दा उवाच—

यत्राऽऽनुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्धते । न चेदं दूषणं राजन्भूषणं चातिमन्यताम् ॥ १३

ब्रह्मोवाच—

आजगाम स्वकं देशं महत्या सेनया वृतः । परीक्षार्थं च तत्प्रेम पुर्यां वार्तामदीदिशत् ॥ १४

दिशो विजेतुं शर्यातौ याते राक्षसपुंगवः । हत्वा रसातलं यातो राजानं सपुरोधसम् ॥ १५

राज्ञो भार्या निश्चयाय प्रवृत्ता मुनिसत्तम । वार्तां श्रुत्वा दूतमुखान्मधुच्छन्दःप्रिया पुनः ॥ १६

[2]तदैवाभूद्गतप्राणा तद्विचित्रमिवाभवत् । तस्या वृत्तं तु ते दृष्ट्वा दूता राज्ञे न्यवेदयन् ॥ १७

---

१ ङ. प्रतिष्ठेति । च. छविश्वेति । २ क. ङ. च. पुर्यां ।

यत्कृतं राजपत्नीभिः प्रियया च पुरोधसः । विस्मितो दुःखितो राजा पुनर्दूतानभाषत ॥ १८

राजोवाच—

शीघ्रं गच्छन्तु हे दूता ब्राह्मण्या यत्कलेवरम् । रक्षन्तु वार्तां कुरुत राजाऽऽगन्ता पुरोधसा ॥ १९

ब्रह्मोवाच—

इति चिन्तातुरे राज्ञि वागुवाचाशरीरिणी ॥ २०

आकाशवागुवाच—

विधास्यत्यखिलं गङ्गा राजंस्तव समीहितम् । सर्वाभिषङ्गशमनी पावनी भुवि गौतमी ॥ २१

ब्रह्मोवाच—

एतच्छ्रुत्वा स शर्यातिर्गौतमीतटमाश्रितः । ब्राह्मणेभ्यो धनं दत्त्वा तर्पयित्वा पितॄन्द्विजान् ॥ २२
पुरोहितं द्विजश्रेष्ठं प्रेषयित्वा धनान्वितम् । अन्यत्र तीर्थे सार्थेषु दानं देहि(ददौ) प्रयत्नतः २३
एतत्सर्वं न जानाति राज्ञः कृत्यं पुरोहितः । गते तस्मिन्गुरौ राजा वैश्वामित्रे महात्मनि ॥ २४
सर्वं बलं प्रेषयित्वा गङ्गातीरेऽग्निमाविशत् । इत्युक्त्वा स तु राजेन्द्रो गङ्गां भानुं सुरानपि ॥ २५
यदि दत्तं यदि हुतं यदि त्राता प्रजा मया । तेन सत्येन सा साध्वी ममाऽऽयुष्येण जीवतु २६
इत्युक्त्वाऽग्नौ प्रविष्टे तु शर्यातौ नृपसत्तमे । तदैव जीविता भार्या राज्ञस्तस्य पुरोधसः ॥ २७
अग्निप्रविष्टं राजानं श्रुत्वा विस्मयकारणम् । पतिव्रतां तथा भार्यां मृतां जीवान्वितां पुनः ॥ २८
तदर्थं चापि राजानं त्यक्तात्मानं विशेषतः । आत्मनश्च पुनः कृत्यमस्मरन्नृपतेर्गुरुः ॥ २९
अहमप्यग्निमाविक्ष्य उत यास्ये प्रियान्तिकम् । अथवेह तपस्तप्स्ये ततो निश्चयवान्द्विजः ॥ ३०
एतदेवाऽऽत्मनः कृत्यं मन्ये सुकृतमेव च । जीवयामि च राजानं ततो यामि प्रियां पुनः ॥ ३१
एतदेव शुभं मे स्यात्ततस्तुष्टाव भास्करम् । न ह्यन्यः कोऽपि देवोऽस्ति सर्वाभीष्टप्रदो रवेः ॥ ३२

मधुच्छन्दा उवाच—

नमोऽस्तु तस्मै सूर्याय मुक्तयेऽमिततेजसे । छन्दोमयाय देवाय ओंकारार्थाय ते नमः ॥ ३३
विरूपाय सुरूपाय त्रिगुणाय त्रिमूर्तये । स्थित्युत्पत्तिविनाशानां हेतवे प्रभविष्णवे ॥ ३४

ब्रह्मोवाच—

ततः प्रसन्नः सूर्योऽभूद्वरयस्वेत्यभाषत ॥ ३५

मधुच्छन्दा उवाच—

राजानं देहि देवेश भार्यां च प्रियवादिनीम् । आत्मनश्च शुभान्पुत्रान्राज्ञश्चैव शुभान्वरान् ॥ ३६

ब्रह्मोवाच—

ततः प्रादाज्जगन्नाथः शर्यातिं रत्नभूषितम् । तां च भार्यां वरानन्यान्सर्वं क्षेममयं तथा ॥ ३७
ततो यातः प्रियाविष्टः प्रीतेन च पुरोधसा । ययौ सुखी स्वकं देशं तत्तु तीर्थं शुभं स्मृतम् ॥ ३८
तत्र त्रीणि सहस्राणि तीर्थानि गुणवन्ति च । ततः प्रभृति तत्तीर्थं भानुतीर्थमुदाहृतम् ॥ ३९
मृतसंजीवनं चैव शार्यातं चेति विश्रुतम् । माधुच्छन्दसमाख्यातं स्मरणात्पापनुन्मुने ॥ ४०

---

१ घ. च. चिन्तापरे । ङ. चिन्तायुते । २ घ. ङ. पुरोधसं । ३ घ. च. चोत्थिता । ४ घ. च. त्यक्तजीवं । ५ घ. ङ. च. °तिं स्वर्णभू° । ६ घ. °पनाशनम् । ते° । ङ. च. °पहं स्मृतम् । ते° ।

तेषु स्नानं च दानं च सर्वक्रतुफलप्रदम् । मृतसंजीवनं तत्स्यादायुरारोग्यवर्धनम् ॥ ४१

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये भान्वादित्रिसहस्रतीर्थवर्णनं नामाष्टात्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥

गौतमीमाहात्म्य एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७८८७

अथैकोनचत्वारिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

खड्गतीर्थमिति ख्यातं गौतम्या उत्तरे तटे । तत्र स्नानेन दानेन मुक्तिभागी[1] भवेन्नरः ॥ १

तत्र वृत्तं प्रवक्ष्यामि शृणु नारद यत्नतः । पैलूष इति विख्यातः कवषस्य सुतो द्विजः ॥ २

कुटुम्बभारात्परितो ह्यर्थार्थी परिधावति । न किंचित्प्राप्तवान्नासौ ततो वैराग्यमास्थितः ॥ ३

अत्यन्तविमुखे दैवे व्यर्थीभूते तु पौरुषे । न वैराग्यादन्यदस्ति[2] पण्डितस्यावलम्बनम् ॥ ४

इति संचिन्तयामास तदाऽसौ निःश्वसन्मुहुः । क्रमागतं धनं नास्ति पोष्याश्च बहवो मम ॥ ५

मानी चाऽऽत्मा न कष्टार्हो हा धिग्दुर्दैवचेष्टितम् । स कदाचिद्वृत्तियुतो वृत्तिभिः परिवर्तयन्॥६

न लेभे तद्धनं वृत्तेर्विरागमगमत्तदा । सेवा निषिद्धा या काचिद्गहना दुष्करं तपः ॥ ७

बलादाकर्षतीयं मां तृष्णा सर्वत्र दुष्कृते । त्वयाऽपकृतमज्ञानात्तस्मात्तृष्णे नमोऽस्तु ते ॥ ८

एवं विचिन्त्य मेधावी[3] तृष्णाछेदाय किं भवेत् । इत्यालोच्य स पैलूषः पितरं वाक्यमब्रवीत् ॥९

पैलूष उवाच—

ज्ञानासिना क्रोधलोभौ संसृतिं चातिदुस्तराम् । छेत्स्यामि केन हे तात तदुपायं वद प्रभो ॥ १०

कवष उवाच—

ईश्वराज्ज्ञानमन्विच्छेदित्येषा वैदिकी श्रुतिः । तस्मादाराधयेशानं ततो ज्ञानमवाप्स्यसि ॥ ११

ब्रह्मोवाच—

तथेत्युक्त्वा स पैलूषो ज्ञानायेश्वरमार्चयत् । ततस्तुष्टो महेशानो ज्ञानं प्रादाद्द्विजातये ॥

प्राप्तज्ञानो महाबुद्धिर्गाथाः प्रोवाच मुक्तिदाः ॥ १२

पैलूष उवाच—

क्रोधस्तु प्रथमं शत्रुर्निष्फलो देहनाशनः । ज्ञानखड्गेन तं छित्त्वा परमं सुखमाप्नुयात् ॥ १३

तृष्णा बहुविधा माया बन्धनी पापकारिणी । छित्त्वैतां ज्ञानखड्गेन सुखं तिष्ठति मानवः ॥१४

सङ्गस्तु परमोऽधर्मो[4] देवादीनामिति श्रुतिः । असङ्गस्याऽऽत्मनोऽप्यस्य[5] सङ्गोऽयं परमो रिपुः १५

छित्त्वैनं ज्ञानखड्गेन शिवैकत्वमवाप्नुयात् । संशयः परमो नाशो धर्मार्थानां विनाशकृत् ॥ १६

छित्त्वैनं संशयं जन्तुः परमेप्सितमाप्नुयात् । पिशाचीव विशल्याशा निर्दहत्यखिलं सुखम् ॥

पूर्णाहन्तासिना छित्त्वा जीवन्मुक्तिमवाप्नुयात् ॥ १७

---

१ क. ङ. °भाजी भ° । २ घ. °स्ति पीडित° । ३ घ. ङ. च. °वी बन्धच्छेदा° । ४ घ. °मो बन्धो दे° । ५ घ. °नो ह्यस्य संयोगः स कथं भवेत् । छि° ।

ब्रह्मोवाच—
ततो ज्ञानमवाप्यासौ गङ्गातीरं समाश्रितः। ज्ञानखड्गेन निर्मोहस्ततो मुक्तिमवाप सः॥ १८
ततः प्रभृति तत्तीर्थं खड्गतीर्थमिति स्मृतम्। ज्ञानतीर्थं च कवषं पैलूषं सर्वकामदम्॥ १९
इत्यादिषट्सहस्राणि तीर्थान्याहुर्महर्षयः। अशेषपापतापौघहराणीष्टप्रदानि च॥ २०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये खड्गतीर्थवर्णनं नामैकोनचत्वारिंशदधिकशततमोऽध्यायः॥ १३९॥

गौतमीमाहात्म्ये सप्ततितमोऽध्यायः॥ ७०॥

आदितः श्लोकानां समष्ट्यङ्काः—७९०७

अथ चत्वारिंशदधिकशततमोऽध्यायः।

ब्रह्मोवाच—
आत्रेयमिति विख्यातमन्विन्द्रं तीर्थमुत्तमम्। तस्य प्रभावं वक्ष्यामि भ्रष्टराज्यप्रदायकम्॥ १
गौतम्या उत्तरे तीर आत्रेयो भगवानृषिः। अन्वारेभेऽथ सत्राणि ऋत्विग्भिर्मुनिभिर्वृतः॥ २
तस्य होताऽभवत्त्वग्निर्हव्यवाहन एव च। एवं सत्रे तु संपूर्ण इष्टिं माहेश्वरीं पुनः॥ ३
कृत्वैश्वर्यमगाद्विप्रः सर्वत्र गतिमेव च। ईन्द्रस्य भवनं रम्यं स्वर्गलोकं रसातलम्॥ ४
स्वेच्छया याति विप्रेन्द्रः प्रभावात्तपसः शुभात्। स कदाचिद्दिवं गत्वा इन्द्रलोकमगात्पुनः॥ ५
तत्रापश्यत्सहस्राक्षं सुरैः परिवृतं शुभैः। स्तूयमानं सिद्धसाध्यैः प्रेक्षन्तं नृत्यमुत्तमम्॥
शृण्वानं मधुरं गीतमप्सरोभिश्च वीजितम्॥ ६

उपोपविष्टैः सुरनायकैस्तैः संपूज्यमानं महदासनस्थम्।
जयन्तमङ्के विनिधाय सूनुं शच्या युतं प्राप्तरतिं महिष्ठम्॥ ७
सतां शरण्यं वरदं महेन्द्रं समीक्ष्य विप्राधिपतिर्महात्मा।
विमोहितोऽसौ मुनिरिन्द्रलक्ष्म्या समीहयामास तदिन्द्रराज्यम्॥ ८
संपूजितो देवगणैर्यथावत्स्वमाश्रमं वै पुनराजगाम।
समीक्ष्य तां शक्रपुरीं सुरम्यां रत्नैर्युतां पुण्यगुणैः सुपूर्णाम्॥ ९
स्वमाश्रमं निष्प्रभहेमवर्ज्यं समीक्ष्य विप्रो विरमं जगाम।
समीहमानः सुरराज्यमाशु प्रियां तदोवाच महात्रिपुत्रः॥ १०

आत्रेय उवाच—
भोक्तुं न शक्तोऽस्मि फलानि मूलान्यनुत्तमान्यप्यतिसंस्कृतानि।
स्मृत्वाऽमृतं पुण्यतमं च तत्र भक्ष्यं च भोज्यं च वरासनानि॥
स्तुतिं च दानं च सभां शुभां च अस्त्रं च वासांसि पुरीं वनानि॥ ११

ब्रह्मोवाच—
ततो महात्मा तपसः प्रभावात्त्वष्टारमाहूय वचो बभाषे॥ १२

---

१ घ. च. चन्द्रस्य।

आत्रेय उवाच—

इच्छेयमिन्द्रत्वमहं महात्मन्कुरुष्व शीघ्रं पदमैन्द्रमत्र ।
ब्रूषेऽन्यथा चेन्मदुदीरितं त्वं भस्मी करोम्येव न संशयोऽत्र ॥ १३

ब्रह्मोवाच—

तदत्रिवाक्यात्त्वरितः प्रजानां स्रष्टा विभुर्विश्वकर्मा तदैव ।
चकार मेरुं च पुरीं सुराणां कल्पद्रुमान्कल्पलतां च धेनुम् ॥ १४
चकार वज्रादिविभूषितानि गृहाणि शुभ्राण्यतिचित्रितानि ।
चकार सर्वावयवानवद्यां शचीं स्मरस्येव विहारशालाम् ॥ १५
सभां सुधर्माणमहो क्षणेन तथा चकाराप्सरसो मनोज्ञाः ।
चकार चोच्चैःश्रवसं गजं च वज्रादि[1] चास्त्राणि सुरानशेषान् ॥ १६
निवार्यमाणः प्रिययाऽत्रिपुत्रः शचीसमामात्मवधूं चकार ।
तदाऽत्रिपुत्रोऽत्रिमुखैः समेतो वज्रादिरूपं च चकार चास्त्रम् ॥ १७
नृत्यादि गीतादि च सर्वमेव चकार शक्रस्य पुरे च दृष्टम् ।
तत्सर्वमासाद्य तदा मुनीन्द्रः प्रहृष्टचेताः सुतरां बभूव ॥ १८
आपातरम्येष्वपि कस्य नाम भवत्यपेक्षा न हि गोचरेषु ।
श्रुत्वा च दैत्या दनुजाः समेता रक्षांसि कोपेन युतानि सद्यः ॥ १९
स्वर्गं परित्यज्य कुतो हरिर्भुवं समागतो न्वेष मिथः सुखाय ।
तस्माद्वयं याम इतो नु योद्धुं वृत्रस्य हन्तारमदीर्घसत्रम्[1] ॥ २०
ततः समागत्य तदाऽत्रिपुत्रं संवेष्टयामासुरथासुरास्ते ।
संवेष्टयित्वा पुरमत्रिपुत्रकृतं तथा चेन्द्रपुराभिधानम् ॥
तैर्वध्यमानः शस्त्रपातैर्महद्भिस्ततो[2] भीतो वाक्यमिदं जगाद ॥ २१

आत्रेय उवाच—

यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् ।
यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना सजना स इन्द्रः ॥ २२

ब्रह्मोवाच—

इत्यादिसूक्तेन रिपूनुवाच हरिं च तुष्टाव तदाऽत्रिपुत्रः ॥ २३

आत्रेय उवाच—

नाहं हरिर्नैव शची मदीया नेयं पुरी नैव वनं तदैन्द्रम् ।
स एव चेन्द्रो वृत्रहन्ता स वज्री सहस्राक्षो गोत्रभिद्वज्रबाहुः ॥ २४
अहं तु विप्रो वेदविद्ब्रह्मवृन्दैः समाविष्टो गौतमीतीरसंस्थः ।
यत्राऽऽयत्यां नाद्य वा सौख्यहेतुस्तच्चाकार्षं कर्म दुर्दैवयोगात् ॥ २५

असुरा ऊचुः—

संहरस्वेदमात्रेय यदिन्द्रस्य विडम्बनम् । क्षेमस्ते भविता सत्यं नान्यथा मुनिसत्तम ॥ २६

---

१ घ. च. °र्घसूत्र° । २ क. ङ. °तो हरिर्वाक्य° ।

ब्रह्मोवाच—
तदाऽऽत्रेयोऽब्रवीद्वाक्यं यथा वक्ष्यन्ति मामिह । करोम्येव महाभागाः सत्येनाग्निं समालभे २७
एवमुक्त्वा स दैतेयांस्त्वष्टारं पुनरब्रवीत् ॥ २८
आत्रेय उवाच—
यत्कृतं त्वत्र मत्प्रीत्या ऐन्द्रं त्वष्टः पदं त्वया । संहरस्व पुनः शीघ्रं रक्ष मां ब्राह्मणं मुनिम्॥२९
पुनर्देहि पदं मह्यमाश्रमं मृगपक्षिणः । वृक्षांश्च वारि यत्राऽऽसीन्न मे दिव्यैः प्रयोजनम् ॥
सर्वमक्रममायातं न सुखाय मनीषिणाम् ॥ ३०
ब्रह्मोवाच—
तथेत्युक्त्वा प्रजानाथस्त्वष्टा संहृतवांस्तदा । दैत्याश्च जग्मुः स्वस्थानं कृत्वा देशमकण्टकम्॥३१
त्वष्टा चापि ययौ स्थानं स्वकं संप्रहसन्निव । आत्रेयोऽपि तदा शिष्यैः संवृतः सह भार्यया ३२
गौतमीतीरमाश्रित्य तपोनिष्ठोऽखिलैर्वृतः । वर्तमाने महायज्ञे लज्जितो वाक्यमब्रवीत् ॥ ३३
आत्रेय उवाच—
अहो मोहस्य महिमा ममापि भ्रान्तचित्तता । किं महेन्द्रपदं लब्धं किं मयाऽत्र पुरा कृतम्॥३४
ब्रह्मोवाच—
एवं वदन्तमात्रेयं लज्जितं प्राब्रुवन्सुराः ॥ ३५
सुरा ऊचुः—
लज्जां जहि महाबाहो भविता[1] ख्यातिरुत्तमा । आत्रेयतीर्थे ये स्नानं प्राणिनः कुर्युरञ्जसा ॥३६
इन्द्रास्ते भवितारो वै स्मरणात्सुखभागिनः । तत्र पञ्च सहस्राणि तीर्थान्याहुर्मनीषिणः ॥ ३७
अग्निन्द्रात्रेयदैतेयनामभिः कीर्तितानि च । तेषु स्नानं च दानं च सर्वमक्षयपुण्यदम् ॥ ३८
ब्रह्मोवाच—
इत्युक्त्वा विबुधा याताः संतुष्टश्चाभवन्मुनिः ॥ ३९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्येऽग्निन्द्रात्रेयादिपञ्चसहस्रतीर्थवर्णनं नाम चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

गौतमीमाहात्म्ये एकसप्ततितमोऽध्यायः ॥ ७१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७९४६

अथैकचत्वारिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—
कपिलासंगमं नाम तीर्थं त्रैलोक्यविश्रुतम् । तत्र नारद वक्ष्यामि कथां पुण्यामनुत्तमाम्* ॥ १
कपिलो नाम तत्त्वज्ञो मुनिरासीन्महायशाः । क्रूरश्चापि प्रसन्नश्च तपोव्रतपरायणः ॥ २

---

* एतदग्रे घ. च. पुस्तकयोः 'तिलोत्तमायास्तत्रैव संगमो लोकविश्रुतः । स्मरणात्सर्वपापानां नाशनः किंनु दर्शनात्' इत्यधिकः श्लोको वर्तते ।

---

१ घ. च. भवित्री ।

तपस्यन्तं मुनिश्रेष्ठं गौतमीतीरमाश्रितम् । तमागत्य महात्मानं वामदेवादयोऽब्रुवन् ॥ ३
हत्वा वेनं ब्रह्मशापैर्नष्टधर्मे त्वराजके । कपिलं सिद्धमाचार्यमूचुर्मुनिगणास्तदा ॥ ४

मुनिगणा ऊचुः—

गते वेदे गते धर्मे किं कर्तव्यं मुनीश्वर ॥ ५

ब्रह्मोवाच—

ततोऽब्रवीन्मुनिर्ध्यात्वा कपिलस्त्वागतान्मुनीन् ॥ ६

कपिल उवाच—

वेनस्योरुर्विमथ्योऽभूत्ततः कश्चिद्भविष्यति ॥ ७

ब्रह्मोवाच—

तथैव चक्रुर्मुनयो वेनस्योरुं विमथ्य वै । तत्रोत्पन्नो महापापः कृष्णो रौद्रपराक्रमः ॥ ८
तं दृष्ट्वा मुनयो भीता निषीदस्वेति चाब्रुवन् । निषादः सोऽभवत्तस्मान्निषादाश्चाभवंस्ततः ॥ ९
वेनबाहुं ममन्थुस्ते दक्षिणं धर्मसंहितम् । ततः पृथुस्वरश्चैव सर्वलक्षणलक्षितः ॥ १०
राजाऽभवत्पृथुः श्रीमान्ब्रह्मसामर्थ्यसंयुतः । तमागत्य सुराः सर्वे अभिनन्द्य वराञ्शुभान् ॥ ११
तस्मै ददुस्तथाऽस्त्राणि मन्त्राणि गुणवन्ति च । ततोऽब्रुवन्मुनिगणास्तं पृथुं कपिलेन च ॥ १२

मुनय ऊचुः—

आहारं देहि जीवेभ्यो भुवा ग्रस्तौषधीरपि ॥ १३

ब्रह्मोवाच—

ततः स धनुरादाय भुवमाह नृपोत्तमः ॥ १४

पृथुरुवाच—

ओषधीर्देहि या ग्रस्ताः प्रजानां हितकाम्यया ॥ १५

ब्रह्मोवाच—

तमुवाच मही भीता पृथुं तं पृथुलोचनम् ॥ १६

मह्युवाच—

मयि जीर्णा महौषध्यः कथं दातुमहं क्षमा ॥ १७

ब्रह्मोवाच—

ततः सकोपो नृपतिस्तामाह पृथिवीं पुनः ॥ १८

पृथुरुवाच—

नो चेद्दास्यद्य त्वां वै हत्वा दास्ये महौषधीः ॥ १९

भूमिरुवाच—

कथं हंसि स्त्रियं राजञ्ज्ञानी भूत्वा नृपोत्तम । विना मया कथं चेमाः प्रजाः संधारयिष्यसि २०

पृथुरुवाच—

यत्रोपकारोऽनेकानामेकनाशे भविष्यति । न दोषस्तत्र पृथिवि तपसा धारये प्रजाः ॥ २१
न दोषमत्र पश्यामि नाऽऽचक्षेऽनर्थकं वचः । यस्मिन्निपातिते सौख्यं बहूनामुपजायते ॥
मुनयस्तद्वधं प्राहुरश्वमेधशताधिकम् ॥ २२

---

१ घ. न. 'मथ्याऽऽशु ततः । २ घ. न. ग्रस्ता महौषधीः । त° ।

ब्रह्मोवाच—
ततो देवाश्च ऋषयः सान्त्वयित्वा नृपोत्तमम् । महीं च मातरं देवीमूचुः सुरगणास्तदा ॥ २३
देवा ऊचुः—
भूमे गोरूपिणी भूत्वा पयोरूपा महौषधीः । देहि त्वं पृथवे राज्ञे ततः प्रीतो भवेन्नृपः ॥
प्रजासंरक्षणं च स्यात्ततः क्षेमं भविष्यति ॥ २४
ब्रह्मोवाच—
ततो गोरूपमास्थाय[1] भूम्यासीत्कपिलान्तिके । दुदोह च महौषध्यो(धी)राजा वेनकरोद्भवः॥२५
यत्र देवाः सगन्धर्वा ऋषयः कपिलो मुनिः । महीं गोरूपमापन्नां नर्मदायां महामुने ॥ २६
सरस्वत्यां भागीरथ्यां गोदावर्यां विशेषतः । महानदीषु सर्वासु दुदुहेऽसौ पयो महत् ॥ २७
सा दुह्यमाना[2] पृथुना पुण्यतोयाऽभवन्नदी । गौतम्या संगता चाभूत्तदद्भुतमिवाभवत् ॥ २८
ततः प्रभृति तत्तीर्थं कपिलासंगमं विदुः । तत्राष्टाशीतिः पूज्यानि सहस्राणि महामते ॥ २९
तीर्थान्याहुर्मुनिगणाः स्मरणादपि नारद । पावनानि जगत्यस्मिंस्तानि सर्वाण्यनुक्रमात् ॥ ३०

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभूऋषिसंवादे तीर्थमाहात्म्ये कपिलासंगमाद्यष्टाशीतिसहस्रतीर्थवर्णनं नामैकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

गौतमीमाहात्म्ये द्विसततितमोऽध्यायः ॥ ७२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७९७६

अथ द्विचत्वारिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—
देवस्थानमिति ख्यातं तीर्थं त्रैलोक्यविश्रुतम् । तस्य प्रभावं वक्ष्यामि शृणु यत्नेन नारद ॥ १
पुरा कृतयुगस्याऽऽदौ देवदानवसंगरे । प्रवृत्ते वा सिंहिकेति विख्याता दैत्यसुन्दरी ॥ २
तस्याः पुत्रो महादैत्यो राहुर्नाम महाबलः । अमृते तु समुत्पन्ने सैंहिकेये च भेदिते ॥ ३
तस्य पुत्रो महादैत्यो मेघहास इति श्रुतः । पितरं घातितं श्रुत्वा तपस्तेपेऽतिदुःखितः ॥ ४
तपस्यन्तं राहुसुतं गौतमीतीरमाश्रितम् । देवाश्च ऋषयः सर्वे तमूचुरतिभीतवत् ॥ ५
देवर्षय ऊचुः—
तपो जहि महाबाहो यत्ते मनसि संस्थितम् । सर्वं भवतु नामेदं शिवगङ्गाप्रसादतः ॥
शिवगङ्गाप्रसादेन किं नामास्त्यत्र दुर्लभम् ॥ ६
मेघहास उवाच—
परिभूतः पिता पूज्यो युष्माभिर्मम दैवतम् । तस्यापि मम चात्यन्तं प्रीतिश्च क्रियते यदि ॥ ७
भवद्भिस्तपसोऽस्माच्च अहं वैरान्निवर्तये । वैरनिर्यातनं कार्यं पुत्रेण पितुरादरात् ॥
प्रार्थयन्ते भवन्तश्चेत्पूर्णास्तन्मे मनोरथाः ॥ ८
ब्रह्मोवाच—
ततः सुरगणाः सर्वे राहुं चक्रुर्ग्रहानुगम्[3] । तं चापि मेघहासं ते चक्रू राक्षसपुंगवम् ॥ ९

---

१ क. घ. ङ. °य कपिला कपिलान्ति° । २ घ. च. दोह्यमाना । ३ घ. च. °ग्रहाधिपम् ।

ततोऽभवद्राहुसुतो नैर्ऋताधिपतिः प्रभुः । पुनश्चाऽऽह सुरान्दैत्यो मम ख्यातिर्यथा भवेत् ॥ १०
तीर्थस्यास्य प्रभावश्च दातव्य इति मे मतिः । तथेत्युक्त्वा ददुर्देवाः सर्वमेव मनोगतम् ॥ ११
दैत्येश्वरस्य देवर्षे तन्नाम्ना तीर्थ[1]मुच्यते । देवा यतोऽभवन्सर्वे तत्र स्थाने महामते ॥ १२
देवस्थानं तु तत्तीर्थं देवानामपि दुर्लभम् । यत्र देवेश्वरो देवो देवतीर्थं ततः स्मृतम् ॥ १३
तत्राष्टादश तीर्थानि दैत्यपूज्यानि नारद । तेषु स्नानं च दानं च महापातकनाशनम् ॥ १४

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये देवस्थानाद्यष्टादशतीर्थवर्णनं नाम
द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥
गौतमीमाहात्म्ये त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—७९९०

अथ त्रिचत्वारिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

सिद्धतीर्थमिति ख्यातं यत्र सिद्धेश्वरो हरः । तस्य प्रभावं वक्ष्यामि सर्वसिद्धिकरं नृणाम् ॥ १
पुलस्त्यवंशसंभूतो रावणो लोकरावणः । दिशो विजित्य सर्वांश्च[2] सोमलोकमजीगमत् ॥ २
सोमेन सह योत्स्यन्तं दशास्यमहमब्रवम् । मन्त्रं दास्ये निवर्तस्व सोमयुद्धाद्दशानन ॥ ३
इत्युक्त्वाऽष्टोत्तरं मन्त्रं शतनामभिरान्वितम् । शिवस्य राक्षसेन्द्राय प्रादां नारद शान्तये ॥ ४
निःश्रीकाणां विपन्नानां नानाक्लेशजुषां नृणाम् । शरणं शिव एवात्र संसारेऽन्यो न कश्चन ॥ ५

ततो निवृत्तः स ह मन्त्रियुक्तस्तत्सोमलोकाज्जयमाप्य रक्षः ।
स पुष्पकारूढगतिः सगर्वो[3] लोकान्पुनः प्राप जवाद्दशास्यः ॥ ६
स प्रेक्षमाणो दिवमन्तरिक्षं भुवं च नागांश्च गजांश्च [4]विप्रान् ।
आलोकयामास नगं महान्तं कैलासमावास उमापतेर्यः ॥ ७
दृष्ट्वा स्मयोत्फुल्लदृगद्रिराजं स मन्त्रिणौ रावण इत्युवाच ॥ ८

रावण उवाच—

को वा गिरावत्र वसेन्महात्मा गिरिं नयाम्येनमथाधि भूमेः ।
लङ्कागतोऽयं गिरिराशु शोभां लङ्काऽपि सत्यं श्रियमातनोति ॥ ९

ब्रह्मोवाच—

इत्थं वचो राक्षसमन्त्रिणौ तौ निशम्य रक्षोधिपतेश्च भावम् ।
न युक्तमित्यूचतुरिष्टबुद्ध्या निशाचरस्तद्वचनं न मेने ॥ १०
संस्थाप्य तत्पुष्पकमाशु रक्षः पुप्लाव कैलासगिरेश्च मूले ।
हिन्दोलयामास गिरिं दशास्यो ज्ञात्वा भवः कृत्यमिदं चकार ॥ ११
जित्वा दिगीशांश्च सगर्वितस्य कैलासमान्दोलयतः [5]सुरारेः ।
अङ्गुष्ठकृत्यैव रसातलादिलोकांश्च यातस्य दशाननस्य ॥ १२

---

१ क. °मुत्तमम् । दे° । २ क. ङ. °श्च देवलो° । ३ ङ. °वों लङ्कां पुनः । ४ घ. च. भूपान् । ५ घ. ङ. पुरारेः ।

आलूनकायस्य गिरं निशम्य विहस्य देव्या सह दत्तमिष्टम् ।
तस्मै प्रसन्नः कुपितोऽपि शंभुरयुक्तदातेति न संशयोऽत्र ॥ १३
ततोऽप्रमावाप्य वरान्सुवीरो भवप्रसादात्कुसुमं जगाम ।
गच्छन्स लङ्कां भवपूजनाय गङ्गामगाच्छंभुजटाप्रसूताम् ॥ १४
संपूजयित्वा विविधैश्च मन्त्रैर्गङ्गाजलैः शंभुमदीनसत्त्वः ।
असिं स लेभे शशिखण्डभूषात्सिद्धिं च सर्वार्थिमभीप्सितां च ॥ १५
मदत्तमन्त्रं शशिरक्षणाय स साधयामास भवं प्रपूज्य ।
सिद्धे तु मन्त्रे पुनरेव लङ्कामयात्स रक्षोधिपतिः स तुष्टः ॥ १६
ततः प्रभृत्येतदतिप्रभावं तीर्थं महासिद्धिदमिष्टदं च ।
समस्तपापौघविनाशनं च सिद्धैरशेषैः परिसेवितं च ॥ १७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये सिद्धतीर्थाद्यष्टोत्तरशतीर्थवर्णनं नाम त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

गौतमीमाहात्म्ये चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८००७

अथ चतुश्चत्वारिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

परुष्णीसंगमं चेति तीर्थं[1] त्रैलोक्यविश्रुतम् । तस्य स्वरूपं वक्ष्यामि शृणु पापविनाशनम् ॥ १
अत्रिराराधयामास ब्रह्मविष्णुमहेश्वरान् । तेषु तुष्टेषु स प्राह पुत्रा यूयं भविष्यथ ॥ २
तथा चैका रूपवती कन्या मम भवेत्सुराः । तथा पुत्रत्वमापुस्ते ब्रह्मविष्णुमहेश्वराः ॥ ३
कन्यां च जनयामास शुभाऽऽत्रेयीति नामतः । दत्तः सोमोऽथ दुर्वासाः पुत्रास्तस्य महात्मनः ४
अग्ने[2]रङ्गिरसो जातो ह्यङ्गारैरङ्गिरा यतः । तस्मादङ्गिरसे प्रादादात्रेयीमतिरोचिषम् ॥ ५
अग्नेः प्रभावात्परुषमात्रेयीं सर्वदाऽवदत् । आत्रेय्यपि च शुश्रूषां कुर्वती सर्वदाऽभवत् ॥ ६
तस्यामाङ्गिरसा जाता महाबलपराक्रमाः । अङ्गिराः परुषं वादीदात्रेयीं नित्यमेव च ॥ ७
पुत्रास्त्वाङ्गिरसा नित्यं पितरं शमयन्ति ते । सा कदाचिद्भर्तृवाक्यादुद्विग्ना परुषाक्षरात् ॥
कृताञ्जलिपुटा दीना प्राब्रवीच्छ्वशुरं गुरुम् ॥ ८

आत्रेय्युवाच—

अत्रिजाऽहं हव्यवाह भार्या तव सुतस्य वै । शुश्रूषणपरा नित्यं पुत्राणां भर्तुरेव च ॥ ९
पतिर्मां परुषं वक्ति वृथैवोद्वीक्षते रुषा । प्रशाधि मां सुरज्येष्ठ भर्तारं मम दैवतम् ॥ १०

ज्वलन उवाच—

अङ्गारेभ्यः समुद्भूतो भर्ता ते ह्यङ्गिरा ऋषिः । यथा शान्तो भवेद्भद्रे तथा नीतिर्विधीयताम् ॥ ११
आग्नेयोऽग्निं समायातो तव भर्ता वरानने । तदा त्वं जलरूपेण प्लावयेथा मदाज्ञया ॥ १२

---

१ घ. ङ. च. र्थं वेदेषु वि° । २ च. °ग्नेराङ्गि° ।

आत्रेय्युवाच—

सहेयं परुषं वाक्यं मा भर्ताऽग्निं समाविशेत् । भर्तरि प्रतिकूलानां योषितां जीवनेन किम् ॥१३
इच्छेयं शान्तिवाक्यानि भर्तारं लभते तथा ॥ १४

ज्वलन उवाच—

अग्निस्त्वप्सु शरीरेषु स्थावरे जङ्गमे तथा । तव भर्तुरहं धाम नित्यं च जनको मतः ॥ १५
योऽहं सोऽहमिति ज्ञात्वा न चिन्तां कर्तुमर्हसि । किंचाऽऽपो मातरो देव्यो ह्यग्निः श्वशुर इत्यपि
इति बुद्ध्या विनिश्चित्य मा विषण्णा भव स्नुषे ॥ १६

स्नुषोवाच—

आपो जनन्य इति यद्बभाषे अग्नेरहं तव पुत्रस्य भार्या ।
कथं भूत्वा जननी चापि भार्या विरुद्धमेतज्जलरूपेण नाथ ॥ १७

ज्वलन उवाच—

आदौ तु पत्नी भरणात्तु भार्या जनेस्तु जाया स्वगुणैः[1] कलत्रम् ।
इत्यादिरूपाणि बिभर्षि भद्रे कुरुष्व वाक्यं मदुदीरितं यत् ॥ १८
योऽस्यां प्रजातः स तु पुत्र एव सा तस्य मातैव न संशयोऽत्र ।
तस्माद्वदन्ति श्रुतितत्त्वविज्ञाः सा नैव योषित्तनयेऽभिजाते ॥ १९

ब्रह्मोवाच—

श्वशुरस्य तु तद्वाक्यं श्रुत्वाऽऽत्रेयी तदैव तत् । आग्नेयं रूपमापन्नमम्भसाऽप्लावयत्पतिम् ॥ २०
उभौ तौ दंपती ब्रह्मन्संगतौ गाङ्गवारिणा । शान्तरूपधरौ चोभौ दंपती संबभूवतुः ॥ २१
लक्ष्म्या युक्तो यथा विष्णुरुमया शंकरो यथा । रोहिण्या च यथा चन्द्रस्तथाऽभून्मिथुनं तदा ॥
भर्तारं प्लावयन्ती सा दधाराम्बुमयं वपुः । परुष्णी चेति विख्याता गङ्गया संगता नदी ॥ २३
गोशतार्पणजं पुण्यं परुष्णीस्नानतो भवेत् । तत्र चाऽऽङ्गिरसाश्चक्रुर्यज्ञांश्च बहुदक्षिणान् ॥ २४
तत्र त्रीणि सहस्राणि तीर्थान्याहुः पुराणगाः[2] । उभयोस्तीरयोस्तात पृथग्यागफलं विदुः ॥ २५
तेषु स्नानं च दानं च वाजपेयाधिकं मतम् । विशेषतस्तु गङ्गायाः परुष्ण्या सह संगमे ॥ २६
स्नानदानादिभिः पुण्यं यत्तद्वक्तुं न शक्यते ॥ २७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये परुष्णीसंगमादित्रिसहस्रतीर्थवर्णनं नाम चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥

गौतमीमाहात्म्ये पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८०३४

अथ पञ्चचत्वारिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

मार्कण्डेयं नाम तीर्थं सर्वपापविमोचनम् । सर्वक्रतुफलं पुण्यमघौघविनिवारणम् ॥ १

---

१ ङ. सुगुणैः । २ ब. पुराविदः ।

तस्य प्रभावं वक्ष्यामि शृणु नारद यत्नतः । मार्कण्डेयो भरद्वाजो वसिष्ठोऽत्रिश्च गौतमः ॥ २
याज्ञवल्क्यश्च जाबालिर्मुनयोऽन्येऽपि नारद । एते शास्त्रप्रणेतारो वेदवेदाङ्गपारगाः ॥ ३
पुराणन्यायमीमांसाकथासु परिनिष्ठिताः । मिथः समूचुर्विद्वांसो मुक्तिं प्रति यथामति ॥ ४
केचिज्ज्ञानं प्रशंसन्ति केचित्कर्म तथोभयम् । एवं विवदमानास्ते मामूचुरुभयं मतम् ॥ ५
मदीयं तु मतं ज्ञात्वा ययुश्चक्रगदाधरम् । तस्य चापि मतं ज्ञात्वा ऋषयस्ते महौजसः ॥ ६
पुनर्विवदमानास्ते शंकरं प्रष्टुमुद्यताः । गङ्गायां च भवं पूज्य तमेवार्थं शशंसिरे ॥ ७
कर्मणस्तु प्रधानत्वमुवाच त्रिपुरान्तकः । क्रियारूपं च तज्ज्ञानं क्रिया [1]सैव तदुच्यते ॥ ८
तस्मात्सर्वाणि भूतानि कर्मणा सिद्धिमाप्नुयुः । कर्मैव विश्वतोव्यापि तद्दते नास्ति किंचन ॥ ९
[3]विद्याभ्यासो यज्ञकृतिर्योगाभ्यासः शिवार्चनम् । सर्वं कर्मैव नाकर्मी प्राणी काप्यत्र विद्यते १०
कर्मैव कारणं तस्मादन्यदुन्मत्तचेष्टितम् । ऋषीणां यत्र संवादो यत्र देवो महेश्वरः ॥ ११
चकार निर्णयं सर्वं कर्मणाऽत्राप्यते नृभिः । मार्कण्डं मुख्यतः कृत्वा ततो मार्कण्डमुच्यते ॥ १२
तीर्थमृषिगणाकीर्णं गङ्गाया [4]उत्तरे तटे । पितॄणां पावनं पुण्यं स्मरणादपि सर्वदा ॥ १३
तत्राष्टौ नवतिस्तात तीर्थान्याह जगन्मयः । वेदेन[5] चापि तत्प्रोक्तमृषयो मेनिरे च तत् ॥ १४

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये मार्कण्डेयाद्यष्टनवतितीर्थवर्णनं नाम पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

गौतमीमाहात्म्ये षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८०४९

षट्चत्वारिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

यायातमपरं तीर्थं यत्र कालंजरः शिवः । सर्वपापप्रशमनं [6]तद्वृत्तमुच्यते मया ॥ १
ययातिर्नाहुषो राजा साक्षादिन्द्र इवापरः । तस्य भार्याद्वयं चाऽऽसीत्कुललक्षणभूषितम् ॥ २
ज्येष्ठा तु देवयानीति नाम्ना शुक्रसुता शुभा । शर्मिष्ठेति द्वितीया सा सुता स्याद्वृषपर्वणः ॥ ३
ब्राह्मण्यपि महाप्राज्ञा देवयानी सुमध्यमा । ययातेरभवद्भार्या सा तु शुक्रप्रसादतः ॥ ४
शर्मिष्ठा चापि तस्यैव भार्या या वृषपर्वजा । देवयानी शुक्रसुता द्वौ पुत्रौ समजीजनत् ॥ ५
यदुं च तुर्वसुं चैव देवपुत्रसमावुभौ । शर्मिष्ठा च नृपाल्लेभे त्रीन्पुत्रान्देवसंनिभान् ॥ ६
द्रुह्युं चानुं च पूरुं च ययातेर्नृपसत्तमात् । देवयान्याः सुतौ ब्रह्मन्सदृशौ शुक्ररूपतः ॥ ७
शर्मिष्ठायास्तु तनयाः शक्राग्निवरुणप्रभाः । देवयानी कदाचित्तु पितरं प्राह दुःखिता ॥ ८

देवयान्युवाच—

मम त्वपत्यद्वितयमभाग्याया भृगूद्वह । मम दास्याः सभाग्याया अपत्यत्रितयं पितः ॥ ९
तदेतदनुमृश्यायं दुःखमत्यन्तमा[7]गता । मरिष्ये दानवगुरो ययातिकृतविप्रियात् ॥
मानभङ्गाद्वरं तात मरणं हि मनस्विनाम् ॥ १०

---

१ घ. ङ. कर्म । २ क. ङ. कार्याणि । ३ घ. वेदाभ्यासे । ४ घ. दक्षिणे । ५ घ. देवेन । ६ घ. ङ. च. व्युष्टिस्तत्रोच्यते । ७ क. ङ. °गतम् । म° ।

ब्रह्मोवाच—

तदेतत्पुत्रिकावाक्यं श्रुत्वा शुक्रः प्रतापवान् । कुपितोऽभ्याययौ शीघ्रं ययातिमिदमब्रवीत् ॥११

शुक्र उवाच—

यदिदं विप्रियं मे त्वं सुतायाः कृतवानसि । रूपोन्मत्तेन राजेन्द्र तस्माद्वृद्धो भविष्यसि ॥ १२

न च भोक्तुं न च त्यक्तुं शक्नोति विषयातुरः । स्पृहयन्मनसैवाऽऽस्ते निःश्वासोच्छ्वासनष्टधीः ॥

वृद्धत्वमेव मरणं जीवतामपि देहिनाम् । तस्माच्छीघ्रं प्रयाहि त्वं जरां भूपातिदुर्धराम् ॥ १४

ब्रह्मोवाच—

एतच्छ्रुत्वा ययातिस्तु शापं शुक्रस्य धीमतः । कृताञ्जलिपुटो राजा ययातिः शुक्रमब्रवीत् ॥१५

ययातिरुवाच—

नापराध्ये न संकुप्ये नैवाधर्मे प्रवर्तये । अधर्मकारिणः पापाः शास्या एव महात्मनाम् ॥ १६

धर्ममेव चरन्तं वै कथं मां शप्तवानसि । देवयानी द्विजश्रेष्ठ वृथा मां वक्ति किंचन ॥ १७

तस्मान्न मम विप्रेन्द्र शापं दातुं त्वमर्हसि । विद्वांसोऽपि हि निर्दोषे यदि कुप्यन्ति मोहिताः ॥

तदा न दोषो मूर्खाणां द्वेषाग्निप्लुष्टचेतसाम् ॥ १८

ब्रह्मोवाच—

ययातिवाक्याच्छुक्रोऽपि सस्मार सुतया कृतम् । असकृद्विप्रियं तस्य दिवा रात्रौ प्रचण्डया १९

गतकोपोऽहमित्युक्त्वा काव्यो राजानमब्रवीत् ॥ २०

शुक्र उवाच—

ज्ञातं मयाऽनयाऽकारि विप्रियं न वदेऽनृतम् । शापस्येमं करिष्यामि शृणुष्वानुग्रहं नृप ॥ २१

यस्मै पुत्राय संदातुं जरामिच्छसि मानद । तस्य सा यात्वियं राजञ्जरा पुत्राय मद्वरात् ॥ २२

ब्रह्मोवाच—

पुनर्ययातिः श्वशुरं शुक्रं प्राह विनीतवत् ॥ २३

ययातिरुवाच—

यो गृह्णाति मया दत्तां जरां भक्तिसमन्वितः । स राजा स्याद्दैत्यगुरो तदेतदनुमन्यताम् ॥ २४

यो मद्वाक्यं नाभिनन्देत्सुतो दैत्यगुरो दृढम् । तं शपेयमनुज्ञाऽत्र दातव्यैव त्वया गुरो ॥ २५

ब्रह्मोवाच—

एवमस्त्विति राजानमुवाच भृगुनन्दनः । ततो ययातिः स्वं पुत्रमाहूयेदं वचोऽब्रवीत् ॥ २६

ययातिरुवाच—

यदो गृहाण मे शापाज्जरां जातां सुतो भवान् । ज्येष्ठः सर्वार्थवित्प्रौढः पुत्राणां धुरि संस्थितः ॥

पुत्री तेनैव जनको यस्तदाज्ञावशे स्थितः ॥ २७

ब्रह्मोवाच—

नेत्युवाच यदुस्तातं ययातिं भूरिदक्षिणम् । ययातिश्च यदुं शप्त्वा तुर्वसुं काममब्रवीत् ॥ २८

नागृह्णात्तुर्वसुश्चापि पित्रा दत्तां जरां तदा । तं शप्त्वा चाब्रवीद्द्रुह्युं गृहाणेमां जरां मम ॥ २९

द्रुह्युश्च नैच्छत्तां दत्तां जरां रूपविनाशिनीम् । अनुमप्यब्रवीद्राजा गृहाणेमां जरां मम ॥ ३०

अनुर्नेति तदोवाच शप्त्वा तं पूरुमब्रवीत् । अभिनन्द्य तदा पूरुर्जरां तां जगृहे पितुः ॥ ३१

---

१ घ. ङ. च. शप्तुमर्हसि ।

सहस्रमेकं वर्षाणां यावत्प्रीतोऽभवत्पिता । यौवने यानि भोग्यानि वस्तूनि विविधानि च ॥ ३२
पुत्रयौवनसंतुष्टो ययातिर्बुभुजे सुखम् । ततस्तृप्तोऽभवद्राजा सर्वभोगेषु नाहुषः ॥
ततो हर्षात्समाहूय पूरुं पुत्रमथाब्रवीत् ॥ ३३

ययातिरुवाच—

तृप्तोऽस्मि सर्वभोगेषु यौवनेन तवानघ । गृहाण यौवनं पुत्र जरां मे देहि कश्मलाम् ॥ ३४

ब्रह्मोवाच—

नेत्युवाच तदा पूरुर्जरया क्षीयते मया । विकारास्तात भावानां दुर्निवाराः शरीरिणाम् ॥ ३५
बलात्कालागता सह्या जराऽप्यखिलदेहिभिः । सा चेदुरुपकाराय गृहीता त्यज्यते कथम् ॥ ३६
स्वीकृतत्यागपापाद्धि देहिनां मरणं वरम् । अथवा तु जरां राजंस्तपसा नाशयाम्यहम् ॥ ३७

ब्रह्मोवाच—

एवमुक्त्वा तु पितरं ययौ गङ्गामनुत्तमाम् । गौतम्या दक्षिणे पारे ततस्तेपे तपो महत् ॥ ३८
ततः प्रीतोऽभवद्देवः कालेन महता शिवः । लोकातीतमहोदारगुणसन्मणिभूषितम् ॥
किं ददामीति तं प्राह पूरुं स सुरसत्तमः ॥ ३९

पूरुरुवाच—

शापप्राप्तां जरां नाथ पितुर्मम सुराधिप । तां नाशयस्व देवेश पितृशप्तांश्च कोपतः ॥
मद्भ्रातॄञ्शापतो मुक्तान्कुरुष्व सुरपूजित ॥ ४०

ब्रह्मोवाच—

तथेत्युक्त्वा जगन्नाथः शापाज्जातां जरां तथा । अनाशयज्जगन्नाथो भ्रातॄंश्चक्रे विशापिनः ४१
ततः प्रभृति तत्तीर्थं जरारोगविनाशनम् । अकालजजरादीनां स्मरणादपि नाशनम् ॥ ४२
तन्नाम्ना चापि विख्यातं कालंजरमुदाहृतम् । यायातं नाहुषं पौरं शौक्रं शार्मिष्ठमेव च ॥ ४३
एवमादीनि तीर्थानि तत्राष्टोत्तरमेव च । शतं विद्यान्महाबुद्धे सर्वसिद्धिकरं तथा ॥ ४४
तेषु स्नानं च दानं च श्रवणं पठनं तथा । सर्वपापप्रशमनं भुक्तिमुक्तिप्रदं भवेत् ॥ ४५

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये कालंजराद्यष्टोत्तरशततीर्थवर्णनं नाम षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

गौतमीमाहात्म्ये सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८०९३

अथ सप्तचत्वारिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

अप्सरोयुगमाख्यातमप्सरासंगमं ततः । तीरे च दक्षिणे पुण्यं स्मरणात्सुभगो भवेत् ॥ १
मुक्तो भवत्यसंदेहं तत्र स्नानादिना नरः । स्त्री सती संगमे तस्मिन्नृतुस्नाता च नारद ॥ २
वन्ध्याऽपि जनयेत्पुत्रं त्रिमासात्पतिना सह । स्नानदानेन वर्तन्ती नान्यथा मद्वचो भवेत् ॥ ३

---

१ घ. ङ. च. अनीनशज्ज॰ । २ क. पौरं ।

अप्सरोयुगमाख्यातं तीर्थं येन च हेतुना । तत्रेदं कारणं वक्ष्ये शृणु नारद यत्नतः ॥ ४
स्पर्धाऽऽसीन्महती ब्रह्मन्विश्वामित्रवसिष्ठयोः । तपस्यन्तं गाधिसुतं ब्राह्मण्यार्थे यतव्रतम् ॥ ५
गङ्गाद्वारे समासीनं प्रेरितेन्द्रेण मेनका । तं गत्वा तपसो भ्रष्टं कुरु भद्रे ममाऽऽज्ञया ॥ ६
तदोक्तेन्द्रेण सा मेना विश्वामित्रं तपश्च्युतम् । कृत्वा कन्यां तथा दत्त्वा जगामेन्द्रपुरं पुनः ॥ ७
तस्यां गतायां सस्मार गाधिपुत्रोऽखिलं कृतम् । तं तु देशं परित्यज्य तीर्थं तु सुरवल्लभम् ॥ ८
जगाम दक्षिणां गङ्गां यत्र कालंजरो हरः । तपस्यन्तं तदोवाच पुनरिन्द्रः सहस्रदृक् ॥ ९
उर्वशीं च ततो मेनां रम्भां चापि तिलोत्तमाम् । नैवेत्यूचुर्भयत्रस्ताः पुनराह शचीपतिः ॥ १०
गम्भीरां चातिगम्भीरामुभे ये गर्विते तदा । ते ऊचतुरुभे देवं सहस्राक्षं पुरंदरम् ॥ ११

गम्भीरातिगम्भीरे ऊचतुः—

आवां गत्वा तपस्यन्तं गाधिपुत्रं महाद्युतिम् । च्यावयावो नृत्यगीतै रूपयौवनसंपदा ॥ १२
यासामपाङ्गे हसिते वाचि विभ्रमसंपदि । नित्यं वसति पञ्चेषुस्ताभिः कोऽत्र न जीयते ॥ १३

ब्रह्मोवाच—

तथेत्युक्ते सहस्राक्षे ते आगत्य महानदीम् । ददृशाते तपस्यन्तं[3] विश्वामित्रं महामुनिम् ॥ १४
मृत्योरपि दुराधर्षं भूमिस्थमिव धूर्जटिम् । सहस्रमेकं वर्षाणामीक्षितुं न च शक्नुतः ॥ १५
दूरे स्थिते नृत्यगीतचाटुकाररते तदा । विलोक्य मुनिशार्दूलस्ततः कोपाकुलोऽभवत् ॥ १६
प्रतीपाचरणं दृष्ट्वा क्रोधः कस्य न जायते । निस्पृहोऽपि महाबाहुस्तमिन्द्रं प्रहसन्निव ॥ १७
आभ्यां मुक्तः सहस्राक्षो ह्यप्सरोभ्यां ब्रुवन्निव । शशाप ते स गाधेयो द्रवरूपे भविष्यथः ॥ १८
द्रवितुं मां समायाते यतस्त्विह ततो लघु । ततः प्रसादितस्ताभ्यां शापमोक्षं चकार सः ॥ १९
भवेतां दिव्यरूपे वां गङ्गया संगते यदा । तच्छापात्ते नदीरूपे तत्क्षणात्संबभूवतुः ॥ २०
अप्सरोयुगमाख्यातं नदीद्वयमतोऽभवत् । ताभ्यां परस्परं चापि ताभ्यां गङ्गासु संगमः ॥ २१
सर्वलोकेषु विख्यातो भुक्तिमुक्तिप्रदः शिवः । तत्राऽऽस्ते दृष्ट एवासौ सर्वसिद्धिप्रदायकः ॥ २२
तत्र स्नात्वा तु तं दृष्ट्वा मुच्यते सर्वबन्धनात्[4] ॥ २३

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्येऽप्सरोयुगसंगमतीर्थवर्णनं नाम सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

गौतमीमाहात्म्येऽष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८११६

अथाष्टचत्वारिंशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

कोटितीर्थमिति ख्यातं गङ्गाया दक्षिणे[5] तटे । यस्यानुस्मरणादेव सर्वपापैः प्रमुच्यते ॥ १
यत्र कोटीश्वरो देवः सर्वं कोटिगुणं भवेत् । कोटिद्वयं तत्र पूर्णं तीर्थानां शुभदायिनाम् ॥ २
तत्र व्युष्टिं प्रवक्ष्यामि शृणु नारद तन्मनाः । कण्वस्य तु सुतो ज्येष्ठो बाह्लीक इति विश्रुतः ॥ ३

---

१ घ. °प्सरासंगमं ख्या° । २ घ. च. °नभापणैः । या° । ३ घ. ङ. च. °न्तं दिवाकरमिवापरम् । ४ घ. ङ. च. भवबन्धनैः । ५ घ. च. उत्तरे ।

काण्वश्चेति जनैः ख्यातो वेदवेदाङ्गपारगः । इष्टीः पार्वायणानीर्याः सभार्यो वेदपारगः ॥ ४
कुर्वन्नास्ते स गौतम्यास्तीरस्थो लोकपूजितः । प्रातःकाले सभार्योऽसौ जुह्वदग्नौ समाहितः ॥ ५
सर्वदाऽऽस्ते कदाचित्तु हवनाय समुद्यतः । एकाहुतिं स हुत्वा तु समिद्धे हव्यवाहने ॥ ६
आहुत्यन्तरदानाय हविर्द्रव्यं करेऽग्रहीत् । एतस्मिन्नन्तरे वह्निरुपशान्तोऽभवत्तदा ॥ ७
ततश्चिन्तापरः काण्वः कर्तव्यं किं भवेदिति । अन्तर्विचारयामास विषादं परमं गतः ॥ ८
आहुत्योश्च द्वयोर्मध्य उपशान्तो हुताशनः । अग्न्यन्तरमुपादेयं वैदिकं लौकिकं तथा ॥ ९
क होष्यं स्याद्द्वितीयं तु आहुत्यन्तरमेव च । एवं मीमांसमाने तु दैवी वागब्रवीत्तदा ॥ १०
अग्न्यन्तरं नैव तेऽत्र उपादेयं भविष्यति । यानि तत्र भविष्यन्ति शकलानि समीपतः ॥ ११
अर्धदग्धेषु काष्ठेषु विप्रराज प्रहूयताम् । नेत्युवाच तदा काण्वः सैव वागब्रवीत्पुनः ॥ १२
अग्नेः पुत्रो हिरण्यस्तु पिता पुत्रः स एव तु । पुत्रे दत्तं प्रियायैव पितुः प्रीत्यै भविष्यति ॥ १३
पित्रे देयं सुते दद्यात्कोटिप्रीतिगुणं भवेत् । दैवी वागब्रवीदेवं ततः सर्वे महर्षयः ॥ १४
निश्चित्य धर्मसर्वस्वं तथा चक्रुर्यथोदितम् । एतज्ज्ञात्वा जगत्यत्र पुत्रे दत्तं पितुर्भवेत् ॥ १५
अपत्याद्युपकारेण पित्रोः प्रीतिर्यथा भवेत् । तथा नान्येन केनापि जगत्येतद्धि विश्रुतम् ॥ १६
सुप्रसिद्धं जगत्येतत्सर्वलोकेषु पूजितम् । तस्मिन्दत्ते भवेत्पुण्यं सर्वं कोटिगुणं सुत ॥ १७
मनोग्लानिनिवृत्तिश्च जायते च महत्सुखम् । पुनरप्याह सा वाणी काण्वेऽस्मिंस्तीर्थ उत्तमे॥ १८
अभवत्तन्महत्तीर्थं काण्व पुण्यप्रभावतः । लोकत्रयाश्रयाशेषतीर्थेभ्योऽपि महाफलम् ॥ १९
स्नानदानादिकं किंचिद्भक्त्या कुर्वन्समाहितः । फलं प्राप्स्यस्यशेषेण सर्वं कोटिगुणं मुने ॥ २०
यत्किंचित्क्रियते चात्र स्नानदानादिकं नरैः । सर्वं कोटिगुणं विद्यात्कोटितीर्थं ततो विदुः॥ २१
यत्रैतद्वृत्तमाग्नेयं काण्वं पौत्रं हिरण्यकम् । वाणीसंज्ञं कोटितीर्थं कोटितीर्थफलं यतः ॥ २२
कोटितीर्थस्य माहात्म्यमत्र वक्तुं न शक्यते । वाचस्पतिप्रभृतिभिरथ वाऽन्यैः सुरैरपि ॥ २३
यत्रानुष्ठीयमानं हि सर्वं कर्म यथा तथा । गोदावर्याः प्रसादेन सर्वं कोटिगुणं भवेत् ॥ २४
कोटितीर्थे द्विजाग्र्याय गामेकां यः प्रयच्छति । तस्य तीर्थस्य माहात्म्याद्गोकोटिफलमश्नुते ॥ २५
तस्मिंस्तीर्थे शुचिर्भूत्वा भूमिदानं करोति यः । श्रद्धायुक्तेन मनसा स्यात्तत्कोटिगुणोत्तरम् ॥ २६
सर्वत्र गौतमीतीरे पितॄणां दानमुत्तमम् । विशेषतः कोटितीर्थे तदनन्तफलप्रदम् ॥
अत्रैकन्यूनपञ्चाशत्तीर्थानि मुनयो विदुः ॥ २७

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये काण्वाद्येकोनपञ्चाशत्तीर्थवर्णनं नामाष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

गौतमीमाहात्म्ये ऊनाशीतितमोऽध्यायः ॥ ७९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८१४३

---

१ क. ॰व्यतमं ततः ।

अथैकोनपञ्चाशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

नारसिंहमिति ख्यातं गङ्गाया उत्तरे तटे । तस्यानुभावं वक्ष्यामि सर्वरक्षाविधायकम् ॥ १
हिरण्यकशिपुः पूर्वमभवद्बलिनां वरः । तपसा विक्रमेणापि देवानामपराजितः ॥ २
हरिभक्तात्मजद्वेषकलुषीकृतमानसः । आविर्भूय सभास्तम्भाद्विश्वात्मत्वं प्रदर्शयन् ॥ ३
तं हत्वा नरसिंहस्तत्सैन्यमद्रावयत्तदा । सर्वान्हत्वा महादैत्यान्क्रमेणाऽऽजौ महामृगः ॥ ४
रसातलस्थाञ्शत्रूंश्च जित्वा स्वर्लोकमीयिवान् । तत्र जित्वा भुवं गत्वा दैत्यान्हत्वा नगस्थितान्
समुद्रस्थान्नदीसंस्थान्ग्रामस्थान्वनवासिनः । नानारूपधरान्दैत्यान्निजघान मृगाकृतिः ॥ ६
आकाशगान्वायुसंस्थाञ्ज्योतिर्लोकमुपागतान् । वज्रपाताधिकनखः समुद्धूतमहासटः ॥ ७
दैत्यगर्भस्रावगर्जी निर्जिताशेषराक्षसः । महानादैर्वीक्षितैश्च प्रलयानलसंनिभैः ॥ ८
चपेटैरङ्गविक्षेपैरसुरान्पर्यचूर्णयत् । एवं हत्वा बहुविधान्गौतमीमगमद्धरिः ॥ ९
स्वपदाम्बुजसंभूतां मनोनयननन्दिनीम् । तत्रांम्बर्य इति ख्यातो दण्डकाधिपते रिपुः ॥ १०
देवानां दुर्जयो योद्धा बलेन महताऽऽवृतः । तेनाभवन्महारौद्रं भीषणं लोमहर्षणम् ॥ ११
शस्त्रास्त्रवर्षणं युद्धं हरिणा दैत्यसूनुना । निजघान हरिः श्रीमांस्तं रिपुं ह्युत्तरे तटे ॥ १२
गङ्गायां नारसिंहं तु तीर्थं त्रैलोक्यविश्रुतम् । स्नानदानादिकं तत्र सर्वपापप्रहार्दनम् ॥ १३
सर्वरक्षाकरं नित्यं जरामरणवारणम् । यथा सुराणां सर्वेषां न कोऽपि हरिणा समः ॥ १४
तीर्थानामप्यशेषाणां तथा तत्तीर्थमुत्तमम् । तत्र तीर्थे नरः स्नात्वा कुर्यान्नृहरिपूजनम् ॥ १५
स्वर्गे मर्त्ये तले वाऽपि तस्य किंचिन्न दुर्लभम् । इत्याद्यष्टौ मुने तत्र महातीर्थानि नारद ॥ १६
पृथक्पृथक्तीर्थकोटिफलमाहुर्मनीषिणः । अश्रद्धयाऽपि यन्नाम्नि स्मृते सर्वाघसंक्षयः ॥ १७
भवेत्साक्षान्नृसिंहोऽसौ सर्वदा यत्र संस्थितः । तत्तीर्थसेवासंजातं फलं कैरिह वर्ण्यते ॥ १८
यथा न देवो नृहरेरधिकः क्वापि वर्तते । तथा नृसिंहतीर्थेन समं तीर्थं न कुत्रचित् ॥ १९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये नारसिंहाद्यष्टतीर्थवर्णनं नामैकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

गौतमीमाहात्म्येऽशीतितमोऽध्यायः ॥ ८० ॥

आदितः श्लोकानां समष्ट्यङ्काः—८१६२

अथ पञ्चाशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

पैशाचं तीर्थमाख्यातं गङ्गाया उत्तरे तटे । पिशाचत्वात्पुरा विप्रो मुक्तिमाप महामते ॥ १
सुयवस्याऽऽत्मजो लोकेऽजीगर्तिरिति विश्रुतः । कुटुम्बभारदुःखार्तो दुर्भिक्षेण तु पीडितः ॥ २
मध्यमं तु शुनःशेपं पुत्रं ब्रह्मविदां वरम् । विक्रीतवान्क्षत्रियाय वधाय बहुलैर्धनैः ॥ ३

१ घ. 'त्रावर्य । च. 'त्रावर्ज इ' । २ ङ. 'पती रि' । ३ क. 'म् । युद्धं परमकं चैव हरेर्वै दै' । ४ च. 'यन्नाम्या' ।

किं नामाऽऽपद्गतः पापं नाऽऽचरत्यपि पण्डितः । [*शमितृत्वे धनं चापि जगृहे बहुलं मुनिः ४
विदारणार्थं च धनं जगृहे ब्राह्मणाधमः । ततोऽप्रतिसमाधेयमहारोगनिपीडितः] ॥ ५
स मृतः कालपर्याये नरकेष्वथ पातितः । भोगादृते न क्षयोऽस्ति प्राक्तनानामिहांहसाम् ॥ ६
किंकरैर्यमवाक्येन बहुयोन्यन्तरं गतः । ततः पिशाचो ह्यभवद्दारुणो दारुणाकृतिः ॥ ७
शुष्ककाष्ठेष्वथारण्ये निर्जले निर्जने तथा । ग्रीष्मे ग्रीष्मदवव्याप्ते क्षिप्यते यमकिंकरैः ॥ ८
कन्यापुत्रमहीवाजिगवां विक्रयकारिणः । नरकान्न निवर्तन्ते यावदाभूतसंप्लवम् ॥ ९
स्वकृताघविपाकेन दारुणैर्यमकिंकरैः । संघाते पच्यमानोऽसौ रुरोदोच्चैः कृतं स्मरन् ॥ १०
पथि गच्छन्कदाचित्स जीगर्तेर्मध्यमः सुतः । शुश्राव रुदतो वाणीं पिशाचस्य मुहुर्मुहुः ॥ ११
पुत्रक्रेतुर्ब्रह्महन्तुर्जीगर्तेस्तु पितुस्तदा । +पापिनः पुत्रविक्रेतुर्ब्रह्महन्तुः पितुश्च ताम् ॥ १२
शुनःशेपस्तदोवाच को भवानतिदुःखितः । जीगर्तिरब्रवीद्दुःखाच्छुनःशेपपिता ह्यहम् ॥ १३
पापीयसीं क्रियां कृत्वा योनिं प्राप्तोऽस्मि दारुणाम् । नरकेष्वथ पक्वश्च पुनः प्राप्तोऽन्तरालकम् ॥
ये ये दुष्कृतकर्माणस्तेषां तेषामियं गतिः ॥ १४

जीगर्तिपुत्रस्तमुवाच दुःखात्सोऽहं सुतस्ते मम दोषेण तात ।
विक्रीत्वा मां नरकानेवमाप्तस्ततः करिष्ये स्वर्गतं त्वामिदानीम् ॥ १५
एवं प्रतिज्ञाय स गाधिपुत्रपुत्रत्वमाप्तोऽथ मुनिप्रवीरः ।
गङ्गामभिध्याय पितुश्च लोकाननुत्तमानीहमानो जगाम ॥ १६
अशेषदुःखानलधूपितानां निमज्जतां मोहमहासमुद्रे ।[1]
शरीरिणां नान्यदहो त्रिलोक्यामालम्बनं विष्णुपदीं विहाय ॥ १७
एवं विनिश्चित्य मुनिर्महात्मा समुद्दिधीर्षुः पितरं स दुर्गतेः ।
शुचिस्ततो गौतमीमाशु गत्वा तत्र स्नात्वा संस्मरञ्छंभुविष्णू ॥ १८
ददौ जलं प्रेतरूपाय पित्रे पिशाचरूपाय सुदुःखिताय ।
तद्दानमात्रेण तदैव पूतोऽजीगर्तिरावाप वपुः सुपुण्यम् ॥ १९
विमानयुक्तः सुरसंघजुष्टं विष्णोः पदं प्राप सुतप्रभावात् ।
गङ्गाप्रभावाच्च हरेश्च शंभोर्विधातुरर्कायुततुल्यतेजाः ॥ २०
ततः प्रभृत्येतदतिप्रसिद्धं पैशाचनाशं च महागदं च ।
महान्ति पापानि च नाशमाशु प्रयान्ति यस्य स्मरणेन पुंसाम् ॥ २१
तीर्थस्य चेदं गदितं तवाद्य माहात्म्यमेतत्त्रिशतानि यत्र[2] ।
तीर्थान्यथान्यानि भवन्ति भुक्तिमुक्तिप्रदायीनि किमन्यदत्र ॥ २२

सर्वसिद्धिदमाख्यातमित्याद्यत्र शतत्रयम् । तीर्थानां मुनिजुष्टानां स्मरणादप्यभीष्टदम् ॥ २३

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये पैशाचादिशतत्रयतीर्थवर्णनं नाम पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

गौतमीमाहात्म्य एकाशीतितमोऽध्यायः ॥ ८१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८१८५

---

* धनुश्चिह्नान्तर्गतः पाठो घ. च. पुस्तकयोर्नास्ति । + इदमर्धमधिकम् ।

---

१ घ. च. नाशाय म । २ घ. ङ. च. तत्र ।

अथैकपञ्चाशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

निम्नभेदमिति ख्यातं सर्वपापप्रणाशनम् । गङ्गाया उत्तरे पारे तीर्थं त्रैलोक्यविश्रुतम् ॥ १
यस्य संस्मरणेनापि सर्वपापक्षयो भवेत् । वेदद्वीपश्च[1] तत्रैव दर्शनाद्वेदविद्भवेत् ॥ २
उर्वशीं चकमे राजा ऐलः परमधार्मिकः । को न मोहमुपायाति विलोक्य मदिरेक्षणाम् ॥ ३
सा प्रायाद्यत्र राजाऽसौ घृतं स्तोकं समश्नुते । आनग्नदर्शनात्कृत्वा तस्याः कालावधिं नृपः ४
तां स्वीचकार ललनां यूनां रम्यां नवां नवाम् । सुप्तायां शयने तस्यां समुत्तस्थौ पुरूरवाः ॥ ५
विलोक्य तं विवसनं तदैवासौ विनिर्गता । विद्युच्चञ्चलचित्तानां क स्थैर्यं ननु योषिताम् ॥ ६
ईक्षांचक्रे स शर्वर्यां विवस्त्रो विस्मितो महान् । एतस्मिन्नन्तरे राजा युद्धायागाद्रिपून्प्रति ॥ ७
ताञ्जित्वा पुनरप्यागाद्देवलोकं सुपूजितम् । स चाऽऽगत्य महाराजो वासिष्ठाच्च पुरोधसः ॥ ८
उर्वश्या गमनं श्रुत्वा ततो दुःखसमन्वितः । न जुहोति न चाश्नाति न शृणोति न पश्यति ॥९
एतस्मिन्नन्तरे तत्र मृतावस्थं नृपोत्तमम् । बोधयामास वाक्यैश्च हेतुभूतैः पुरोहितः ॥ १०

वसिष्ठ उवाच—

सा मृताऽद्य महाराज मा व्यथस्व महामते । एवं स्थितं तु मा त्वां वै अशिवाः स्पृश्युराशुगाः
न वै स्त्रैणानि जानीषे हृदयानि महामते । शालावृकाणां यादृंशि तस्मात्त्वं भूप मा शुचः ॥१२
को नाम लोके राजेन्द्र कामिनीभिर्न वञ्चितः । वञ्चकत्वं नृशंसत्वं चञ्चलत्वं कुशीलता ॥ १३
इति स्वाभाविकं यासां ताः कथं सुखहेतवः । कालेन को न निहतः कोऽर्थी गौरवमागतः १४
श्रिया न भ्रामितः को वा योषिद्भिः को न खण्डितः । स्वप्नमायोपमा राजन्मदविप्लुतचेतसः ॥
सुखाय योषितः कस्य ज्ञात्वैतद्द्विज्वरो भव । विहाय शंकरं विष्णुं गौतमीं वा महामते ॥
दुःखिनां शरणं नान्यद्विद्यते भुवनत्रये ॥ १६

ब्रह्मोवाच—

एतच्छ्रुत्वा ततो राजा दुःखं संहृत्य यत्नतः । गौतम्या मध्यसंस्थोऽसावैलः परमधार्मिकः ॥१७
तत्र चाऽऽराधयामास शिवं देवं जनार्दनम् । ब्रह्माणं भास्करं गङ्गां देवानन्यांश्च यत्नतः ॥१८
यो विपन्नो न तीर्थानि देवताश्च न सेवते । स कालवशगो[2] जन्तुः कां दशामनुयास्यति ॥ १९
तदीश्वरैकशरणो गौतमीसेवनोत्सुकः । परां श्रद्धामुपगतः संसारास्थापराङ्मुखः ॥ २०
ईजे यज्ञांश्च बहुलानृत्विग्भिर्बहुदक्षिणान् । वेदद्वीपोऽभवत्तेन यज्ञद्वीपः स उच्यते ॥ २१
पौर्णमास्यां तु शर्वर्यां तत्राऽऽयाति सदोर्वशी । तस्य दीपस्य यः कुर्यात्प्रदक्षिणमथो नरः॥२२
प्रदक्षिणीकृता तेन पृथिवी सागराम्बरा । वेदानां स्मरणं तत्र यज्ञानां स्मरणं तथा ॥ २३
सुकृती तत्र यः कुर्याद्वेदयज्ञफलं लभेत् । ऐलतीर्थं तु तज्ज्ञेयं तदेव च पुरूरवम् ॥ २४
वासिष्ठं चापि तत्तु स्यान्निम्नभेदं तदुच्यते । ऐले राज्ञि न किंचित्स्यान्निम्नं सर्वेषु कर्मसु ॥२५
यदेतन्निम्नमुर्वश्यां सर्वभावेन वर्तनम् । तच्चापि भेदितं निम्नं वसिष्ठेन च गङ्गया ॥ २६
निम्नभेदमभूत्तेन दृष्टादृष्टेष्टसिद्धिदम् । तत्र सप्त शतान्याहुस्तीर्थानि गुणवन्ति च ॥ २७

---

१ ङ. °पस्य त° । २ घ. ङ. च. °लदूतवशगः कां ।

तेषु स्नानं च दानं च सर्वक्रतुफलप्रदम् । स्नानं कृत्वा निम्नभेदे यः पश्यति सुरानिमान् ॥२८
इह चामुत्र वा निम्नं न किंचित्तस्य विद्यते । सर्वोन्नतिमवाप्यासौ मोदते दिवि शक्रवत् ॥ २९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये निम्नभेदादिसप्तशततीर्थवर्णनं नामैकपञ्चाशदधिकशततमोऽध्यायः ॥ १९१ ॥

गौतमीमाहात्म्ये द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८२१४

अथ द्विपञ्चाशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

नन्दीतटमिति ख्यातं तीर्थं वेदविदो विदुः । तस्य प्रभावं वक्ष्यामि शृणु यत्नेन नारद ॥ १
अत्रिपुत्रो महातेजाश्चन्द्रमा इति विश्रुतः । सर्वान्वेदांश्च विधिवद्धनुर्वेदं यथाविधि ॥ २
अधीत्य जीवात्सर्वांश्च विद्याश्चान्या महामते । गुरुपूजां करोमीति जीवमाह स चन्द्रमाः ॥
बृहस्पतिस्तदा प्राह चन्द्रं शिष्यं मुदाऽन्वितः ॥ ३

बृहस्पतिरुवाच—

मम प्रिया तु जानीते तारा रतिसमप्रभा ॥ ४

ब्रह्मोवाच—

प्रष्टुं तां च तदा प्रायादन्तर्वेश्म स चन्द्रमाः । तारां तारामुखीं दृष्ट्वा जगृहे तां करेण सः ॥ ५
स्ववेश्म प्रति तां लोभाद्बलादाकर्षयत्तदा । तावद्धैर्यनिधिर्ज्ञानी मतिमान्विजितेन्द्रियः ॥ ६
यावन्न कामिनीनेत्रवागुराभिर्निबध्यते । विशेषतो रहःसंस्थां कामिनीमायतेक्षणाम् ॥ ७
विलोक्य न मनो याति कस्य कामेषु वश्यताम् । अत एवान्यपुरुषदर्शनं न कदाचन ॥ ८
कुलवध्वा रहः कार्यं भीतया शीलविप्लुतेः । विज्ञाय तत्परिजनात्सहसोत्थाय निर्गतः ॥ ९
दृष्ट्वा तद्दुष्कृतं कर्म बृहस्पतिरुदारधीः । शशाप कोपाच्चाऽऽक्षिप्य वाग्भिर्विप्रियकारिभिः ॥ १०
पराभिभूतामालोक्य कान्तां कः सोढुमीश्वरः । युयुधे तेन जीवोऽपि देवश्चन्द्रमसा रुषा ॥ ११
न शापैर्हन्यते चन्द्रो नाऽऽयुधैः सुरमन्त्रितैः । बृहस्पतिप्रणीतैश्च न मन्त्रैर्हन्यते शशी ॥ १२
तदा चन्द्रस्तु तां तारां नीत्वा संस्थाप्य मन्दिरे । बुभुजे बहुवर्षाणि रोहिणीं चाकुतोभयः ॥ १३
न [1]जीयेत तदा देवैर्न कोपैः शापमन्त्रकैः । न राजभिर्न ऋषिभिर्न साम्ना भेददण्डनैः ॥ १४
यदा भार्यां न लेभेऽसौ गुरुः सर्वप्रयत्नतः । सर्वोपायक्षये जीवस्तदा नीतिमथास्मरत् ॥ १५
अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः । स्वार्थमुद्धरते प्राज्ञः स्वार्थभ्रंशो हि मूर्खता ॥ १६
साध्यं केनाप्युपायेन जानद्भिः पुरुषैः फलम् । वृथाभिमानिनः शीघ्रं विपद्यन्ते विमोहिताः १७
एवं निश्चित्य मेधावी शुक्रं गत्वा न्यवेदयत् । तमागतं कविर्ज्ञात्वा संमानेनाभ्यनन्दयत् ॥ १८
उपविष्टं सुविश्रान्तं पूजितं च यथाविधि । पर्यपृच्छद्दैत्यगुरुस्तदागमनकारणम् ॥ १९
गृहागतस्य विमुखाः शत्रवोऽप्युत्तमा न हि । तस्मै स विस्तरेणाऽऽह भार्याहरणमादितः ॥ २०

---

१ घ. ङ. च. जीवेन । २ घ. च. तथा । ३ घ. °र्थमभ्युद्धरेत्प्राज्ञः ।

बृहस्पतेस्तदा वाक्यं श्रुत्वा कोपान्वितः कविः । अपराधं तु चन्द्रस्य मेने शिष्यस्य नारद ॥
अतिक्रममिमं श्रुत्वा कोपात्कविरथाब्रवीत् ॥ २१

शुक्र उवाच—

तदा भोक्ष्ये तदा पास्ये तदा स्वप्स्ये तदा वदे । यदाऽऽनये प्रियां भ्रातस्तव भार्यां परार्दिताम्
तामानीय भवं पूज्य चन्द्रं शप्त्वा गुरुद्रुहम् । पश्चाद्भोक्ष्ये महाबाहो शृणु वाचं ग्रहेश्वर ॥ २३

ब्रह्मोवाच—

एवमुक्त्वा स जीवेन दैत्याचार्यो जगाम ह । शिवमाराध्य यत्नेन परं सामर्थ्यमाप्तवान् ॥ २४
वरानवाप्य विविधाञ्शंकराद्भावपूजितात् । शिवप्रसादात्किं नाम देहिनामिह दुर्लभम् ॥ २५
जगाम शुक्रो जीवेन तारया यत्र चन्द्रमाः । वर्तते तं शशापोच्चैः शृणु त्वं चन्द्र मे वचः ॥ २६
यस्मात्पापतरं कर्म त्वया पाप मदात्कृतम् । कुष्ठी भूयास्ततश्चन्द्रं शशापैवं रुषा कविः ॥ २७
कविशापप्रदग्धोऽभूत्तदैव मृगलाञ्छनः । प्रायुः क्षयं न के नाम गुरुस्त्रामित्रखिद्रुहः ॥ २८
तत्याज तां स चन्द्रोऽपि तां तारां जगृहे कविः । शुक्रोऽपि देवानाहूय ऋषीन्पितृगणांस्तथा २९
नदीर्नदांश्च विविधानोषधीश्च पतिव्रताः । ततः संप्रष्टुमारेभे तारावृत्तविनिष्क्रयम् ॥ ३०
ततः श्रुतिः सुरानाह गौतम्यां भक्तितस्त्वियम् । स्नानं करोतु जीवेन तारा पूता भविष्यति ३१
रहस्यमेतत्परमं न कथ्यं यस्य कस्यचित् । सर्वास्वपि दशास्वेह शरणं गौतमी नृणाम् ॥ ३२
तथाऽकरोच्चैव तारा भर्त्रा स्नानं यथाविधि । पुष्पवृष्टिरभूत्तत्र जयशब्दो व्यवर्तत ॥ ३३
पुनर्वै देवा अददुः पुनर्मनुष्या उत । राजानः सत्यं कृण्वाना ब्रह्मजायां पुनर्ददुः ॥ ३४
पुनर्दत्त्वा ब्रह्मजायां कृतां देवैरकल्मषाम् । सर्वं क्षेममभूत्तत्र तस्मात्तीर्थं महामुने ॥ ३५
तदभूत्सकलाघौघध्वंसनं सर्वकामदम् । आनन्दं क्षेममभवत्सुराणामसुरारिणाम् ॥ ३६
बृहस्पतेश्च शुक्रस्य तारायाश्च विशेषतः । परमानन्दमापन्नो गुरुर्गङ्गामभाषत ॥ ३७

गुरुरुवाच—

त्वं गौतमि सदा पूज्या सर्वेषामपि मुक्तिदा । विशेषतस्तु सिंहस्थे मयि त्रैलोक्यपावनी ॥ ३८
भविष्यसि सरिच्छ्रेष्ठे सर्वतीर्थैः समन्विता । यानि कानि च तीर्थानि स्वर्गमृत्युरसातले ॥
त्वां स्नातुं तानि यास्यन्ति मयि सिंहस्थितेऽम्बिके ॥ ३९

ब्रह्मोवाच—

धन्यं यशस्यमायुष्यमारोग्यश्रीविवर्धनम् । सौभाग्यैश्वर्यजननं तीर्थमानन्दनामकम् ॥ ४०
तत्र पञ्च सहस्राणि तीर्थान्याह स गौतमः । स्मरणात्पठनाद्वाऽपि इष्टैः संयुज्यते सदा ॥ ४१
शिवस्यात्र निविष्टस्य नन्दी गङ्गातटेऽनिशम् । साक्षाच्चरत्यसौ धर्मस्तस्मान्नन्दीतटं स्मृतम् ॥
आनन्दमपि तत्तीर्थं सर्वानन्दविवर्धनात् ॥ ४२

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये आनन्दतीर्थादिपञ्चसहस्रतीर्थवर्णनं नाम
द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥

गौतमीमाहात्म्ये त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८२५६

---

१ घ. °हो यामि यत्र महेश्वरः । ए° । २ क. जीवं तं दै° । ३ क. ङ. राजानं ।

अथ त्रिपञ्चाशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

भावतीर्थमिति प्रोक्तं यत्र साक्षाद्भवः स्थितः । अशेषजगदन्तस्थो भूतात्मा सच्चिदाकृतिः ॥ १
तत्रेमां शृणु वक्ष्यामि कथां पुण्यतमां शुभाम् । सूर्यवंशकरः श्रीमान्क्षत्रियाणां धुरंधरः ॥ २
प्राचीनबर्हिराख्यातः सर्वधर्मेषु पारगः । तिस्रः कोट्योऽर्धकोटिश्च वर्षाणां राज्य आस्थितः ॥ ३
तस्येदृशं व्रतं चाऽऽसीद्यदहं यौवनच्युतः । भवेयं प्रियया वाऽपि पुत्रैर्वा प्रियवस्तुभिः ॥ ४
वियुज्येयं ततो राज्यं त्यक्ष्येऽहं नात्र संशयः । विवेकिनां कुलीनानामिदमेवोचितं नृणाम् ॥ ५
स्थीयते विजने क्वापि विरक्तैर्विभवक्षये । तस्मिन्प्रशासति महीं न वियोगः प्रियैः क्वचित् ॥ ६
नाऽऽधिव्याधी न दुर्भिक्षं न बन्धुकलहो नृणाम् । तस्मिञ्शासति राज्यं तु न च कश्चिद्वियुज्यते
ततः पुत्रार्थमकरोद्यज्ञं राजा महामतिः । ततः प्रसन्नो भगवान्वरं प्रादाद्यथेप्सितम् ॥ ८
गौतमीतीरसंस्थाय राज्ञे देवो महेश्वरः । पुत्रं देहीति राजा वै भवं प्राह स भार्यया ॥ ९
भवः प्राह नृपं प्रीत्या पश्य नेत्रं तृतीयकम् । ततः पश्यति राजेन्द्रे भवस्याक्षि तु मानद ॥ १०
चक्षुर्दीप्त्याऽभवत्पुत्रो महिमा नाम विश्रुतः । येनाकारि स्तुतिः पुण्या महिम्न(?) इति विश्रुता
किमलभ्यं भगवति प्रसन्ने त्रिपुरान्तके । यं नित्यमनुवर्तन्ते हरिब्रह्मादयः सुराः ॥ १२
प्राप्तपुत्रश्च नृपतिस्तीर्थश्रैष्ठ्यमयाचत । महापापमहारोगमहाव्यसनिनां नृणाम् ॥ १३
नानाविपद्गणार्तानां सर्वाभिमतलब्धये । प्रादाज्ज्यैष्ठ्यं भवश्चापि भावतीर्थं तदुच्यते ॥ १४
तत्र स्नानेन दानेन सर्वान्कामानवाप्नुयात् । भवप्रसादादभवत्सुतः प्राचीनबर्हिषः ॥ १५
महिमा गौतमीतीरे भावतीर्थं तदुच्यते । तत्र सप्ततितीर्थानि पुण्यान्यखिलदानि च ॥ १६

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये भावतीर्थादिसप्ततितीर्थवर्णनं नाम त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥

गौतमीमाहात्म्ये चतुरशीतितमोऽध्यायः ॥ ८४ ॥

आदितः श्लोकानां समष्ट्यङ्काः--८२७२

अथ चतुष्पञ्चाशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

सहस्रकुण्डमाख्यातं तीर्थं वेदविदो विदुः । यस्य स्मरणमात्रेण सुखी संपद्यते नरः ॥ १
पुरा दाशरथी रामः सेतुं बद्ध्वा महार्णवे । लङ्कां दग्ध्वा रिपून्हत्वा रावणादींत्रणे शरैः ॥ २
वैदेहीं च समासाद्य रामो वचनमब्रवीत् । पश्यत्सु लोकपालेषु तस्याऽऽचार्ये पुरः स्थिते ॥ ३
अग्नौ शुद्धिगतां सीतां रामो लक्ष्मणसंनिधौ । एहि वैदेहि शुद्धाऽसि अङ्कमारोढुमर्हसि ॥ ४
नेत्युवाच तदा श्रीमानङ्गदो हनुमांस्तथा । अयोध्यायां तु वैदेहि सार्धं यामः सुहृज्जनैः ॥ ५
तत्र शुद्धिमवाप्याथ पुनर्भ्रातृषु मातृषु । लौकिकेष्वपि पश्यत्सु ततः शुद्धा नृपात्मजा ॥ ६

---

१ घ. इव ।

अयोध्यायां सुपुण्येऽह्नि अङ्कमारोढुमर्हसि । अस्याश्चरित्रविषये संदेहः कस्य जायते ॥ ७
लोकापवादस्तदपि निरस्यः स्वजनेषु हि । तयोर्वाक्यमनादृत्य लक्ष्मणः सविभीषणः ॥ ८
रामश्च जाम्बवांश्चैव तामाह्वयन्नृपात्मजाम् । स्वस्तीत्युक्त्वा देवताभी राज्ञोऽङ्कं चाऽऽरुरोह सा ॥
मुदितास्ते ययुः शीघ्रं पुष्पकेण विराजता । अयोध्यां नगरीं प्राप्य तथा राज्यं स्वकं तु यत्१०
मुदितास्तेऽभवन्सर्वे सदा रामानुवर्तिनः । ततः कतिपयाहेषु अनार्येभ्यो विरूपिकाम् ॥ ११
वाचं श्रुत्वा स तत्याज गुर्विणीं तामयोनिजाम् । मिथ्यापवादमपि हि न सहन्ते कुलोन्नताः१२
वाल्मीकेर्मुनिमुख्यस्य आश्रमस्य समीपतः । तत्याज लक्ष्मणः सीतामदुष्टां रुदतीं रुदन् ॥ १३
नोल्लङ्घ्याऽऽज्ञा गुरूणामित्यसौ तदकरोद्धिया । ततः कतिपयाहेषु व्यतीतेषु नृपात्मजः ॥ १४
रामः सौमित्रिणा सार्धं हयमेधाय दीक्षितः । तत्रैवाऽऽजग्मतुरुभौ रामपुत्रौ यशस्विनौ ॥ १५
लवः कुशश्च विख्यातौ नारदाविव गायकौ । रामायणं समग्रं तद्गन्धर्वाविव सुस्वरौ ॥ १६
रामस्य चरितं सर्वं गायमानौ समीयतुः । यज्ञवाटं राजसुतौ हेतुभिर्लक्षितौ तदा ॥ १७
रामपुत्रावुभौ शूरौ वैदेह्यास्तनयाविति । तावानीय ततः पुत्रावभिषिच्य यथाक्रमम् ॥ १८
अङ्कारूढौ ततः कृत्वा सस्वजे तौ पुनः पुनः । संसारदुःखखिन्नानामगतीनां शरीरिणाम् ॥ १९
पुत्रालिङ्गनमेवात्र परं विश्रान्तिकारणम् । मुहुरालिङ्ग्य तौ पुत्रौ मुहुः स्वजति चुम्बति ॥ २०
किमप्यन्तर्ध्यायति च निःश्वसत्यपि वै मुहुः । एतस्मिन्नन्तरे प्राप्ता राक्षसा लङ्कवासिनः ॥ २१
सुग्रीवो हनुमांश्चैव अङ्गदो जाम्बवांस्तथा । अन्ये च वानराः सर्वे विभीषणपुरःसराः ॥ २२
ते चाऽऽगत्य नृपं प्राप्ताः सिंहासनमुपस्थितम् । सीतामदृष्ट्वा हनुमानङ्गदः कनकाङ्गदः* ॥ २३
क गताऽयोनिजा माता एको रामोऽत्र दृश्यते । रामेण सा परित्यक्ता इत्यूचुर्द्वारपालकाः ॥२४
पश्यत्सु लोकपालेषु आर्ये तत्र प्रवादिनि । अग्नौ शुद्धिगतां(ता) सीतां(ता) किंतु राजा निरङ्कुशः
उत्पन्नैर्लौकिकैर्वाक्यै रामस्त्यजति तां प्रियाम् । मरिष्याव इति ह्युक्त्वा गौतमीं पुनरीयतुः॥२६
रामस्तौ पृष्ठताऽभ्येत्य(?) अयोध्यावासिभिः सह । आगत्य गौतमीं तत्राकुर्वंस्ते परमं तपः २७
स्मारं स्मारं निश्वसन्तस्तां सीतां लोकमातरम् । संसारास्थाविरहिता गौतमीसेवनोत्सुकाः॥२८
लोकत्रयपतिः साक्षाद्रामोऽनुजसमन्वितः । प्राप्तः स्नात्वा च गौतम्यां शिवाराधनतत्परः ॥ २९
परितापं जहौ सर्वं सहस्रपरिवारितः । यत्र चाऽऽसीत्स[1] वृत्तान्तः सहस्रकुण्डमुच्यते ॥ ३०
दशापराणि तीर्थानि तत्र सर्वार्थदानि च । तत्र स्नानं च दानं च सहस्रफलदायकम् ॥ ३१
यत्र श्रीगौतमीतीरे वसिष्ठादिमुनीश्वरैः । सर्वोपत्तारकं होममकारयदघान्तकम् ॥ ३२
सहस्रसंख्यायुक्तेषु कुण्डेषु वसुधारया । सर्वानपेक्षितान्कामानवापासौ महातपाः ॥ ३३
गौतम्याः सरिदम्बायाः प्रसादाद्राक्षसान्तकः । सहस्रकुण्डाभिधं तद्भूत्तीर्थं महाफलम् ॥ ३४

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये सहस्रकुण्डादिदशतीर्थवर्णनं नाम चतुष्पञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

गौतमीमाहात्म्ये पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८३०६

---

* अत्र किंचित्त्रुटितम् ।

---

१ घ. ङ. °त्सर्ववृतः स° ।

अथ पञ्चपञ्चाशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

कपिलातीर्थमाख्यातं तदेवाऽऽङ्गिरसं स्मृतम् । तदेवाऽऽदित्यमाख्यातं सैंहिकेयं तदुच्यते ॥ १
गौतम्या दक्षिणे पारे आदित्यान्मुनिसत्तम । अयाजयन्नङ्गिरसो दक्षिणां ते भुवं ददुः ॥ २
अङ्गिरोभ्यस्तदाऽऽदित्यास्तपसेऽङ्गिरसो ययुः । सा भूमिः सैंहिकी भूत्वा जनान्सर्वानभक्षयत् ३
तत्रसुस्ते जनाः सर्वे अङ्गिरोभ्यो न्यवेदयन् । विभीता ज्ञानतो ज्ञात्वा भुवं तां सैंहिकीमिति॥४
आदित्याननुगत्वाऽथ वाचमङ्गिरसोऽब्रुवन् । भुवं गृह्णन्तु या दत्ता नेत्यादित्यास्तदाऽब्रुवन् ॥ ५
निवृत्तां दक्षिणां नैव प्रतिगृह्णन्ति सूरयः । स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ॥ ६
षष्टिर्वर्षसहस्राणि विष्ठायां जायते कृमिः । भूमेः स्वपरदत्ताया हरणान्नाधिकं क्वचित् ॥ ७
पापमस्ति महारौद्रं न स्वीकुर्मः पुनस्तु ताम् । एवं यदा स्वदत्ताया हरणे किं तदा भवेत् ॥ ८
तथाऽपि क्रयरूपेण गृह्णीमो दक्षिणां भुवम् । तथेत्युक्ते तु ते देवाः कपिलां शुभलक्षणाम् ॥ ९
गङ्गाया दक्षिणे पारे भुवः स्थाने तु तां ददुः । भुक्तिमुक्तिप्रदः साक्षाद्विष्णुस्तिष्ठति मूर्तिमान्१०
कपिलासंगमं तच्च सर्वाघौघविनाशनम् । तत्राभवद्दानतोयादापगा कपिलाभिधा ॥ ११
सस्यवत्या अपि भुवो दानाद्गोदानमुत्तमम् । लोकरक्षां चकारासौ कृत्वा विनिमयं मुनिः ॥ १२
यत्र तीर्थे च तद्वृत्तं गोतीर्थं तदुदाहृतम् । पुण्यदं तत्र तीर्थानां शतमुक्तं मनीषिभिः ॥ १३
तत्र स्नानेन दानेन भूमिदानफलं लभेत् । संगता गङ्गया तच्च कपिलासंगमं विदुः ॥ १४

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये कपिलासंगमादिशततीर्थवर्णनं नाम पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

गौतमीमाहात्म्ये षडशीतितमोऽध्यायः ॥ ८६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८३२०

अथ षट्पञ्चाशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

शङ्खह्रदं नाम तीर्थं यत्र शङ्खगदाधरः । तत्र स्नात्वा च तं दृष्ट्वा मुच्यते भवबन्धनात् ॥ १
तत्रेदं वृत्तमाख्यास्ये भुक्तिमुक्तिप्रदायकम् । पुरा कृतयुगस्याऽऽदौ ब्रह्मणः सामगायिनः ॥ २
ब्रह्माण्डागारसंभूता राक्षसा बहुरूपिणः । ब्रह्माणं खादितुं प्राप्ता बलोन्मत्ता धृतायुधाः ॥ ३
तदाऽहमब्रवं विष्णुं रक्षणाय जगद्गुरुम् । स विष्णुस्तानि रक्षांसि हन्तुं चक्रेण चोद्यतः ॥ ४
छित्त्वा चक्रेण रक्षांसि शङ्खमापूरयत्तदा । निष्कण्टकं तलं कृत्वा स्वर्गं निर्वैरमेव च ॥ ५
ततो हर्षप्रकर्षेण शङ्खमापूरयद्धरिः । ततो रक्षांसि सर्वाणि ह्यनीनशुरशेषतः ॥ ६
यत्रैतद्वृत्तमखिलं विष्णुशङ्खप्रभावतः । शङ्खतीर्थं तु तत्प्रोक्तं सर्वक्षेमकरं नृणाम् ॥ ७
सर्वाभीष्टप्रदं पुण्यं स्मरणान्मङ्गलप्रदम् । आयुरारोग्यजननं लक्ष्मीपुत्रप्रवर्धनम् ॥ ८

१ घ. च. °क्षिणार्थे भु° । २ घ. °दा । राज्यं निष्कण्टकं कृ° । ३ च. तटं ।

स्मरणात्पठनाद्वाऽपि सर्वकामानवाप्नुयात् । तीर्थानामयुतं तत्र सर्वपापनुदं मुने ॥ ९
तीर्थान्ययुतसंख्यानि सर्वपापहराणि च । येषां प्रभावं जानाति वक्तुं देवो महेश्वरः ॥ १०
पापक्षयप्रतिनिधिर्नैतेभ्योऽस्त्यपरः क्वचित् ॥ ११

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये शङ्खतीर्थाद्ययुततीर्थवर्णनं नाम षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

गौतमीमाहात्म्ये सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८३३१

अथ सप्तपञ्चाशदधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

किष्किन्धातीर्थमाख्यातं सर्वकामप्रदं नृणाम् । सर्वपापप्रशमनं यत्र संनिहितो भवः ॥ १
तस्य स्वरूपं वक्ष्यामि यत्नेन शृणु नारद । पुरा दाशरथी रामो रावणं लोकरावणम् ॥ २
किष्किन्धावासिभिः सार्धं जघान रणमूर्धनि । सपुत्रं सबलं हत्वा सीतामादाय शत्रुहा ॥ ३
भ्रात्रा सौमित्रिणा सार्धं वानरैश्च महाबलैः । विभीषणेन बलिना देवैः प्रत्यागतो नृपः ॥ ४
कृतस्वस्त्ययनः श्रीमान्पुष्पकेण विराजितः । यदासीद्धनराजस्य कामगेनाऽऽशुगामिना ॥ ५
अयोध्यामगमन्सर्वे गच्छन्गङ्गामपश्यत । रामो विरामः शत्रूणां शरण्यः शरणार्थिनाम् ॥ ६
गौतमीं तु जगत्पुण्यां सर्वकामप्रदायिनीम् । मनोनयनसंतापनिवारणपरायणाम् ॥ ७
तां दृष्ट्वा नृपतिः श्रीमान्गङ्गातीरमथाऽऽविशत् । तां दृष्ट्वा माह नृपतिर्हर्षगद्गदया गिरा ॥
हरीन्सर्वानथाऽऽमन्त्र्य हनुमत्प्रमुखान्मुने ॥ ८

राम उवाच—

अस्याः प्रभावाद्धरयो योऽसौ मम पिता प्रभुः । सर्वपापविनिर्मुक्तस्ततो यातस्त्रिविष्टपम् ॥ ९

इयं जनित्री सकलस्य जन्तोर्भुक्तिप्रदा मुक्तिमथाऽपि दद्यात् ।
पापानि हन्यादपि दारुणानि काऽन्याऽनयाऽस्त्यत्र नदी समाना ॥ १०
हतानि शश्वद्दुरितानि चैव अस्याः प्रभावादरयः सखायः ।
विभीषणो मैत्रमुपैति नित्यं सीता च लब्धा हनुमांश्च बन्धुः ॥ ११
लङ्का च भग्ना सगणं हि रक्षो हतं हि यस्याः परिसेवनेन ।
यां गौतमो देववरं प्रपूज्य शिवं शरण्यं सजटामवाप ॥ १२
सेयं जनित्री सकलेप्सितानाममङ्गलानामपि संनिहन्त्री ।
जगत्पवित्रीकरणैकदक्षा दृष्टाऽद्य साक्षात्सरितां सवित्री ॥ १३
कायेन वाचा मनसा सदैनां व्रजामि गङ्गां शरणं शरण्याम् ॥ १४

ब्रह्मोवाच—

एतत्समाकर्ण्य वचो नृपस्य तत्राऽऽप्लुवन्हरयः सर्व एव ।
पूजां चक्रुर्विधिवत्ते पृथक्च पुष्पैरनेकैः सर्वलोकोपहारैः ॥ १५

---

१ घ. °गत्पूज्यां स° । २ च. °कैः शक्रलो° ।

संपूज्य शर्वं नृपतिर्यथावत्स्तुत्वा वाक्यैः सर्वभावोपयुक्तैः ।
ते वानरा मुदिताः सर्व एव नृत्यं च गीतं च तथैव चक्रुः ॥ १६
सुखोषितस्तां रजनीं महात्मा प्रियानुयुक्तः संवृतः प्रेमवद्भिः ।
दुःखं जहौ सर्वममित्रसंभवं किं नाऽऽप्यते गौतमीसेवनेन ॥ १७
सविस्मयः पश्यति भृत्यवर्गं गोदावरीं स्तौति च संप्रहृष्टः ।
संमानयन्भृत्यगणं समग्रमवाप रामः कमपि प्रमोदम् ॥
पुनः प्रभाते विमले तु सूर्ये विभीषणो दाशरथिं बभाषे ॥ १८

विभीषण उवाच—

नाद्यापि तृप्तास्तु भवाम तीर्थे कंचिच्च कालं निवसाम चात्र ।
वत्स्या(सा)म चात्रैव पराश्वतस्रो रात्रीरथो याम वृतास्त्वयोध्याम् ॥ १९

ब्रह्मोवाच—

तस्याथ वाक्यं हरयोऽनुमेनिरे तथैव रात्रीरपराश्वतस्रः ।
संपूज्य देवं सकलेश्वरं तं भ्रातृप्रियं तीर्थमथो जगाम ॥ २०
सिद्धेश्वरं नाम जगत्प्रसिद्धं यस्य प्रभावात्प्रबलो दशास्यः ।
एवं तु पश्चाहमथोषिरे ते स्वं स्वं प्रतिष्ठापितलिङ्गमर्च्य ॥ २१
शुश्रूषणं तत्र करोति वायोः सुतोऽनुगामी हनुमान्नृपस्य ।
गच्छन्नृपेन्द्रो हनुमन्तमाह लिङ्गानि सर्वाणि विसर्जयस्व ॥ २२
मत्स्थापितान्युत्तममन्त्रविद्भिस्तथेतरैः शंकरकिंकरैश्च ।
नोद्वास्य पूजां परशंकरेण बाह्यं[1] समायोज्यमहो भवस्य (?) ॥ २३
तिष्ठन्ति सुस्थास्तदनादरेण ते खड्गपत्रादिषु संभवन्ति ।
येऽश्रद्दधानाः शिवलिङ्गपूजां विधाय कृत्यं न समाचरन्ति ॥ २४
यथोचितं ते यमकिंकरैर्हि पच्यन्त एवाखिलदुर्गतीषु ।
रामाज्ञया वायुसुतो जगाम दोर्भ्यां न चोत्पाटयितुं शशाक ॥ २५
ततः स्वपुच्छेन ग्रहीतुकामः संवेष्ट्य लिङ्गं तु विसृष्टकामः ।
नैवाशकत्तन्महदद्भुतं स्यात्कपीश्वराणां नृपतेस्तथैव ॥ २६
कश्चालयेल्लब्धमहानुभावं महेशलिङ्गं पुरुषो मनस्वी ।
तन्निश्चलं प्रेक्ष्य महानुभावो नृपप्रवीरः सहसा जगाम ॥ २७
विप्रानथाऽऽमन्त्र्य विधाय पूजां प्रदक्षिणीकृत्य च रामचन्द्रः ।
शुद्धातिशुद्धेन हृदाऽखिलैस्तैर्लिङ्गानि सर्वाणि ननाम रामः ॥ २८
किष्किन्धवासिप्रवरैरशेषैः संसेवितं तीर्थमतो बभूव ।
अत्राऽऽप्लवादेव महान्ति पापान्यपि क्षयं यान्ति न संशयोऽत्र ॥ २९
पुनश्च गङ्गां प्रणनाम भक्त्या प्रसीद मातर्मम गौतमीति ।
जल्पन्मुहुर्विस्मितचित्तवृत्तिर्विलोकयन्प्रणमन्गौतमीं ताम् ॥ ३०

---

१ च. बाह्यां ।

ततः प्रभृत्येतदतीव पुण्यं किष्किन्धतीर्थं विबुधा वदन्ति।
पठेत्स्मरेद्वाऽपि शृणोति भक्त्या पापापहं किं पुनः स्नानदानैः॥ ३१

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये किष्किन्धतीर्थवर्णनं
नाम सप्तपञ्चाशदधिकशततमोऽध्यायः॥ १५७॥
गौतमीमाहात्म्येऽष्टाशीतितमोऽध्यायः॥ ८८॥

आदितः श्लोकानां समष्ट्यङ्काः—८३६२

अथाष्टपञ्चाशदधिकशततमोऽध्यायः।

ब्रह्मोवाच—

व्यासतीर्थमिति ख्यातं प्राचेतसमतः परम्। नातः परतरं किंचित्पावनं सर्वसिद्धिदम्॥ १
दश मे मानसाः पुत्राः स्रष्टारो जगतामपि। अन्तं जिज्ञासवस्ते वै पृथिव्या जग्मुरोजसा॥ २
पुनः सृष्टाः पुनस्तेऽपि यातास्तान्समवेक्षितुम्। नैव तेऽपि समायाता ये गतास्ते गता गताः॥ ३
तदोत्पन्ना महाप्राज्ञा दिव्या आङ्गिरसो(सा) मुने। वेदवेदाङ्गतत्त्वज्ञाः सर्वशास्त्रविशारदाः॥ ४
तेऽनुज्ञाता अङ्गिरसा गुरुं नत्वा तपोधनाः। तपसे निश्चिताः सर्वे नैव पृष्ट्वा तु मातरम्॥ ५
सर्वेभ्यो ह्यधिका माता गुरुभ्यो गौरवेण हि। तदा नारद कोपेन सा शशाप तदाऽऽत्मजान्॥ ६

मातोवाच—

मामनादृत्य ये पुत्राः प्रवृत्ताश्चरितुं तपः। सर्वैरपि प्रकारैस्तन्न तेषां सिद्धिमेष्यति॥ ७

ब्रह्मोवाच—

नानादेशांश्च चिन्वानास्तपःसिद्धिं न यान्ति च। विघ्नमन्वेति तान्सर्वानितश्चेतश्च धावतः॥ ८
क्वापि तद्राक्षसैर्विघ्नं क्वापि तन्मानुषैरभूत्। प्रमदाभिः क्वचिच्चापि क्वापि तद्देहदोषतः॥ ९
एवं तु भ्रममाणास्ते ययुः सर्वे तपोनिधिम्। अगस्त्यं तपतां श्रेष्ठं कुम्भयोनिं जगद्गुरुम्॥ १०
नमस्कृत्वा ह्याङ्गिरसा ह्यग्निवंशसमुद्भवाः। दक्षिणाशापतिं शान्तं विनीताः प्रष्टुमुद्यताः॥ ११

आङ्गिरसा ऊचुः—

भगवन्केन दोषेण तपोऽस्माकं न सिध्यति। नानाविधैरप्युपायैः कुर्वतां च पुनः पुनः॥ १२
किं कुर्मः कः प्रकारोऽत्र तपस्येव भवाम किम्। उपायं ब्रूहि विप्रेन्द्र ज्येष्ठोऽसि तपसा ध्रुवम्॥
ज्ञाताऽसि ज्ञानिनां ब्रह्मन्वक्ताऽसि वदतां वरः। शान्तोऽसि यमिनां नित्यं दयावान्प्रियकृत्तथा
अक्रोधनश्च न द्वेष्टा तस्माद्ब्रूहि विवक्षितम्। साहंकारा दयाहीना गुरुसेवाविवर्जिताः॥
असत्यवादिनः क्रूरा न ते तत्त्वं विजानते॥ १५

ब्रह्मोवाच—

अगस्त्यः प्राह तान्सर्वान्क्षणं ध्यात्वा शनैः शनैः॥ १६

अगस्त्य उवाच—

शान्तात्मानो भवन्तो वै स्रष्टारो ब्रह्मणा कृताः। न पर्याप्तं तपश्चा[1]भूत्स्मरध्वं स्मयकारणम्॥ १७

---

१ घ. च. °भूच्छृणुध्वं।

ब्रह्मणा निर्मिताः पूर्वं ये गताः सुखमेधते । ये गताः पुनरन्वेष्टुं ते च त्वाङ्गिरसोऽभवन् ॥ १८
ते यूयं च पुनः काले याता याताः शनैः शनैः । प्रजापतेरप्यधिका भवितारो न संशयः ॥ १९
इतो यान्तु तपस्तप्तुं गङ्गां त्रैलोक्यपावनीम् । नोपायोऽन्योऽस्ति संसारे विना गङ्गां शिवप्रियाम्
तत्राऽऽश्रमे पुण्यदेशे ज्ञानदं पूजयिष्यथ । स च्छेदयिष्यत्यखिलं संशयं वो महामतिः ॥
न सिद्धिः क्वापि केषांचिद्विना सद्गुरुणा यतः ॥ २१

ब्रह्मोवाच—

ते तमूचुर्मुनिवरं ज्ञानदः कोऽभिधीयते । ब्रह्मा विष्णुर्महेशो वा आदित्यो वाऽपि चन्द्रमाः॥२२
अग्निश्च वरुणः कः स्याज्ज्ञानदो मुनिसत्तम । अगस्त्यः पुनरप्याह ज्ञानदः श्रूयतामयम् ॥ २३
या आपः सोऽग्निरित्युक्तो योऽग्निः सूर्यः स उच्यते । यश्च सूर्यः स वै विष्णुर्यश्च विष्णुः स
भास्करः ॥ २४
यश्च ब्रह्मा स वै रुद्रो यो रुद्रः सर्वमेव तत् । यस्य सर्वं तु तज्ज्ञानं ज्ञानदः सोऽत्र कीर्त्यते २५
देशिकप्रेरकव्याख्याकृदुपाध्यायदेहदाः । गुरवः सन्ति बहवस्तेषां ज्ञानप्रदो महान् ॥ २६
तदेव ज्ञानमत्रोक्तं येन भेदो विहन्यते । एक एवाद्वयः शंभुरिन्द्रमित्राग्निनामभिः ॥
वदन्ति बहुधा विप्रा भ्रान्तोपकृतिहेतवे ॥ २७

ब्रह्मोवाच—

एतच्छ्रुत्वा मुनेर्वाक्यं गाथा गायन्त एव ते । जग्मुः पञ्चोत्तरां गङ्गां पञ्च जग्मुश्च दक्षिणाम् २८
अगस्त्येनोदितान्देवान्पूजयन्तो यथाविधि । आसनेषु विशेषेण ह्यासीनास्तत्त्वचिन्तकाः ॥ २९
तेषां सर्वे सुरगणाः प्रीतिमन्तोऽभवन्मुने । स्रष्टृत्वं तु युगादौ यत्कल्पितं विश्वयोनिना ॥ ३०
अधर्माणां निवृत्त्यर्थं वेदानां स्थापनाय च । लोकानामुपकारार्थं धर्मकामार्थसिद्धये ॥ ३१
पुराणस्मृतिवेदार्थधर्मशास्त्रार्थनिश्चये । स्रष्टृत्वं जगतामिष्टं तादृग्रूपा भविष्यथ ॥ ३२
प्रजापतित्वं तेषां वै भविष्यति शनैः क्रमात् । यदा ह्यधर्मो भविता वेदानां च पराभवः ॥ ३३
वेदानां व्यसनं तेभ्यो भाविव्यासास्ततस्तु ते । यदा यदा तु धर्मस्य ग्लानिर्वेदस्य दृश्यते॥३४
तदा तदा तु ते व्यासा भविष्यन्त्युपकारिणः । तेषां यत्तपसः स्थानं गङ्गायास्तीरमुत्तमम् ३५
तत्र तत्र शिवो विष्णुरहमादित्य एव च । अग्निरापः सर्वमिति तत्र संनिहितं सदा ॥ ३६
नैतेभ्यः पावनं किंचिन्नैतेभ्यस्त्वधिकं क्वचित् । तत्तदाकारतां प्राप्तं परं ब्रह्मैव केवलम् ॥ ३७
सर्वात्मकः शिवो व्यापी सर्वभावस्वरूपधृक् । विशेषतस्तत्र तीर्थे सर्वप्राण्यनुकम्पया ॥ ३८
सर्वैर्देवैरनुवृतस्तदनुग्रहकारकः । धर्मव्यासास्तु ते ज्ञेया वेदव्यासास्तथैव च ॥ ३९
तेषा तीर्थं तेन नाम्ना व्यपदिष्टं जगत्त्रये । पापपङ्कक्षालनाम्भो मोहध्वान्तप्रदापहम् ॥
सर्वसिद्धिप्रदं पुंसां व्यासतीर्थमनुत्तमम् ॥ ४०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये व्यासतीर्थवर्णनं नामाष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

गौतमीमाहात्म्य एकोननवतितमोऽध्यायः ॥ ८९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८४०२

---

१ घ. देवानां ।

अथैकोनषष्ट्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

वंजरासंगमं नाम तीर्थं त्रैलोक्यविश्रुतम् । ऋषिभिः सेवितं नित्यं सिद्धै राजर्षिभिस्तथा ॥ १

दासत्वमगमत्पूर्वं नागानां गरुडः खगः । मातृदास्यात्तदा दुःखपरिसंतप्तमानसः ॥

कदाचिच्चिन्तयामास रहः स्थित्वा विनिश्वसन् ॥ २

गरुड उवाच—

त एव धन्या लोकेऽस्मिन्कृतपुण्यास्त एव हि । नान्यसेवा कृता यैस्तु न येषां व्यसनागमः॥ ३

सुखं तिष्ठन्ति गायन्ति स्वपन्ति च हसन्ति च। स्वदेहप्रभवो धन्या धिग्धिगन्यवशे स्थितान्॥ ४

ब्रह्मोवाच—

इति चिन्तासमाविष्टो जननीमेत्य दुःखितः । पर्यपृच्छदमेयात्मा वैनतेयोऽथ मातरम् ॥ ५

गरुड उवाच—

कस्यापराधान्मातस्त्वं पितुर्वा मम वाऽन्यतः । दासीत्वमाप्ता वद तत्कारणं मम पृच्छतः ॥ ६

ब्रह्मोवाच—

साऽब्रवीत्पुत्रमात्मीयमरुणस्यानुजं प्रियम् ॥ ७

विनतोवाच—

नैव कस्यापराधोऽस्ति स्वापराधो मयोदितः। यस्या वाक्यं विपर्येति सा दासी स्यान्मयोदितम्

कद्रूश्चापि तथैवाहं सा मया संयुता ययौ । कद्र्वा ममाभवद्वादश्छद्मनाऽहं तया जिता ॥ ९

विधिर्हि बलवांस्तात कां कां चेष्टां न चेष्टते । एवं दासीत्वमगमं कद्र्वाः कश्यपनन्दन ॥

यदा दासी तु जाताऽहं दासोऽभूस्त्वं द्विजन्मज ॥ १०

ब्रह्मोवाच—

तूष्णीं तदा बभूवासौ गरुडोऽतीव दुःखितः । न किंचिदूचे जननीं चिन्तयंन्भवितव्यताम्॥ ११

कद्रूः कदाचित्सा प्राह पुत्राणां हितमिच्छती । आत्मनो भूतिमिच्छन्ती विनतां खगमातरम् १२

कद्रूरुवाच—

पुत्रः सूर्यं नमस्कर्तुं तव यात्यनिवारितः । अहो लोकत्रयेऽप्यस्मिन्धन्याऽसि बत दास्यपि ॥ १३

ब्रह्मोवाच—

स्वदुःखं गूहमाना सा कद्रूं प्राह सुविस्मिता । १४

विनतोवाच—

तव पुत्रास्तु किमिति रविं द्रष्टुं न यान्ति च ॥ १५

कद्रूरुवाच—

पुत्रान्मदीयान्सुभगे नय नागालयं प्रति । समुद्रस्य समीपे तु तदास्ते शीतलं सरः ॥ १६

ब्रह्मोवाच—

सुपर्णस्त्ववहन्नागान्कद्रूं च विनता तथा । ततः प्रोवाच मुदिता वैनतेयस्य मातरम् ॥ १७

---

१ क. ङ. °त्तथा दुः° । २ घ. °यन्निव तथ्यता° ।

सुराणां नेतु निलयं गरुडो मत्सुतानिति । पुनः प्राह सर्पमाता गरुडं विनयान्वितम् ॥ १८

सर्पमातोवाच—

पुत्रा मे द्रष्टुमिच्छन्ति हंसं त्रिजगतां गुरुम् । नमस्कृत्वा ततः सूर्यमेष्यन्ति निलयं मम ॥
हण्डे त्वं नय पुत्रान्मे सूर्यमण्डलमन्वहम् ॥ १९

ब्रह्मोवाच—

सा वेपमाना विनता दीना कद्रूमभाषत ॥ २०

विनतोवाच—

नाहं क्षमा सर्पमातः पुत्रो मे नेष्यते सुतान् । दृष्ट्वा दिनकरं देवं पुनरेव प्रयान्तु ते ॥ २१

ब्रह्मोवाच—

विनता स्वसुतं प्राह विहगानामधीश्वरम् । नमस्कर्तुमथेच्छन्ति नागाः स्वामित्वमागताः ॥ २२
भास्वन्तमित्युवाचेयं मां सर्पजननी हठात् । तथेत्युक्त्वा स गरुडो मामारोहन्तु पन्नगाः ॥ २३
तदाऽऽरूढं सर्पसैन्यं गरुडं विहगाधिपम् । शनैः शनैरुपगमद्यत्र देवो दिवाकरः ॥
ते दह्यमानास्तीक्ष्णेन भानुतापेन विव्यथुः ॥ २४

सर्पा ऊचुः—

निवर्तस्व महाप्राज्ञ पतङ्गाय नमो नमः । अलं सूर्यस्य सदनं दग्धाः सूर्यस्य तेजसा ॥
यामस्त्वया वा गरुड विहाय त्वामथापि वा ॥ २५

ब्रह्मोवाच—

एवं नागैरुच्यमान आदित्यं दर्शयामि वः । इत्युक्त्वा गगनं शीघ्रं जगामाऽऽदित्यसंमुखः ॥ २६
दग्धभोगा[1] निपेतुस्ते द्वीपं तं वीरणं प्रति । बहवः शतसाहस्राः पीडिता दग्धविग्रहाः ॥ २७
पुत्राणामार्तसंनादं पतितानां महीतले(?) । आश्वासितुं समायाता तान्सा कद्रूः सुविह्वला ॥ २८
उवाच विनतां कद्रूस्तव पुत्रोऽतिदुष्कृतम् । कृतवानतिदुर्मेधा येषां शान्तिर्न विद्यते ॥ २९
नान्यथा कर्तुमायाति स्वामिवाक्यं फणीश्वरः । स काश्यपो बृहत्तेजा यद्यत्र स्यादनामयम् ३०
भवेच्चैवं कथं शान्तिः पुत्राणां मम भामिनि । कद्र्वास्तद्वचनं श्रुत्वा विनता ह्यतिभीतवत् ॥ ३१
पुत्रमाह महात्मानं गरुडं विहगाधिपम् ॥ ३२

विनतोवाच—

नेदं युक्ततरं पुत्र भूषणं विनयेन हि । वर्तितुं[2] युक्तमित्युक्तं वैपरीत्यं न युज्यते ॥ ३३
नामित्रेष्वपि कर्तव्यं सद्भिर्जिह्मं कदाचन । श्रोत्रिये चान्त्यजे वाऽपि समं चन्द्रः प्रकाशते ॥ ३४
कुर्वन्त्यनिष्टं कपटैस्त एव मम पुत्रक । प्रसह्य कर्तुं ये साक्षादशक्ताः पुरुषाधमाः ॥ ३५

ब्रह्मोवाच—

विनता च ततः प्राह कद्रूं तां सर्पमातरम् ॥ ३६

विनतोवाच—

किं कृत्वा शान्तिरभ्येति पुत्राणां ते करोमि तत् । जरया तु गृहीतास्ते वद शान्तिं करोमि तत्

ब्रह्मोवाच—

कद्रूरप्याह विनतां रसातलगतं पयः । तेनाभिषेचितानां मे पुत्राणां शान्तिरेष्यति ॥ ३८

---

१ घ. ङ. च. 'गास्ततो नागा निपेतुर्धरणीं प्र' । २ घ. ङ. च. वर्तनं ।

कद्र्वास्तद्वचनं श्रुत्वा रसातलगतं पयः । क्षणेनैव समानीय नागांस्तानभ्यषेचयत् ॥
ततः प्रोवाच गरुडो मघवानं शतक्रतुम् ॥ ३९

गरुड उवाच—

मेघाश्चाप्यत्र वर्षन्तु त्रैलोक्यस्योपकारिणः ॥ ४०

ब्रह्मोवाच—

तथा ववर्ष पर्जन्यो नागानामभवच्छिवम् । रसातलभवं गाङ्गं नागसंजीवनं पयः ॥ ४१
जराशोकविनाशार्थमानीतं गरुडेन यत् । यत्राभिषेचिता नागास्तन्नागालयमुच्यते ॥ ४२
गरुडेन यतो वारि आनीतं तद्रसातलात् । तद्गाङ्गं वारि सर्वेषां सर्वपापप्रणाशनम् ॥ ४३
जराया वारणं यस्मान्नागानामभवच्छिवम् । रसातलभवं गाङ्गं नागसंजीवनं यतः ॥ ४४
जराशोकविनाशार्थं गङ्गाया दक्षिणे तटे । साक्षादमृतसंवाहा वंजरा साऽभवन्नदी ॥ ४५
जरादारिद्र्यसंतापहारिणी क्लेशवारिणी । रसातलभवा गङ्गा मर्त्यलोकभवा तु या ॥ ४६
तयोश्च संगमो यः स्यात्किं पुनस्तत्र वर्ण्यते । यस्यानुस्मरणादेव नाशं यान्त्यघसंचयाः ॥ ४७
तत्र च स्नानदानानां फलं को वक्तुमीश्वरः । सपादं तत्र तीर्थानां लक्षमाहुर्मनीषिणः ॥ ४८
सर्वसंपत्तिदातॄणां सर्वपापौघहारिणाम् । वंजरासंगमसमं तीर्थं क्वापि न विद्यते ॥
यदनुस्मरणेनापि विपद्यन्ते विपत्तयः ॥ ४९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये वंजरासंगमादिसपादलक्षतीर्थवर्णनं नामैकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥

गौतमीमाहात्म्ये नवतितमोऽध्यायः ॥ ९० ॥

आदितः श्लोकानां समष्ट्यङ्काः—८४५१

अथ षष्ठ्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

देवागमं नाम तीर्थं सर्वकामप्रदं शिवम् । भुक्तिमुक्तिप्रदं नृणां पितॄणां तृप्तिकारकम् ॥ १
तत्र वृत्तं समाख्यास्ये तव यत्नेन नारद । देवानामसुराणां च स्पर्धाऽभूद्धनहेतवे ॥ २
स्वर्गः सुराणामभवदसुराणामिलाऽभवत् । कर्मभूमिमवष्टभ्य असुराः सर्वतोऽभवन् ॥ ३
देवानां यज्ञभागांश्च दातॄन्घ्नन्त्यसुरास्ततः । ततः सुरगणाः सर्वे यज्ञभागैर्विना कृताः ॥ ४
व्यथिता मामुपाजग्मुः किं कृत्यमिति चाब्रुवन् । मया चोक्ताः सुरगणा युद्धे जित्वाऽसुरान्बलात् ॥
भुवं प्राप्स्यथ कर्माणि हवींषि च यशांसि च । तथेत्युक्त्वा गता देवा भूमिं ते समरार्थिनः ॥६
दैत्याश्च दानवाश्चैव राक्षसा बलदर्पिताः । एकीभूत्वा ययुस्तेऽपि जयिनो युद्धकाङ्क्षिणः ॥ ७
अहिर्वृत्रो बलिस्त्वाष्ट्रिर्नमुचिः शम्बरो मयः । एते चान्ये च बहवो योद्धारो बलदर्पिताः ॥ ८
अग्निरिन्द्रोऽथ वरुणस्त्वष्टा पूषा तथाऽश्विनौ । मरुतो लोकपालाश्च नानायुद्धविशारदाः ॥ ९
ते दानवाः सर्व एव याम्यां वै दिशि संगरे । अकुर्वन्त महायत्नं दक्षिणार्णवसंस्थिताः ॥ १०

---

१ घ. ततो । २ घ. ङ. सर्वाघौघविनाश° ।

त्रिकूटः पर्वतश्रेष्ठो राक्षसानां पुराऽभवत् । तद्वनेन ययुः सर्वे तैः सार्धं दक्षिणार्णवम् ॥ ११
सर्वेषां मेलनं यत्र पर्वतो मलयस्तु सः । मलयस्यापि देशोऽसौ देवारीणामभूत्तदा ॥ १२
देवानां गौतमीतीरे तत्र संनिहितः शिवः । इति तेषां समायोगो देवानामभवत्किल ॥ १३
देवाः स्वरथमारूढास्तत्र तत्र समागमन् । गौतम्याः सरिदम्बायाः पुलिने विमलाशयाः ॥ १४
प्रसन्नाऽभीष्टदा या स्यात्पितॄणामखिलस्य तु । ततो देवगणाः सर्वे स्तुत्वा देवं महेश्वरम् ॥
अभयं चिन्तयामासुस्ते सर्वेऽथ परस्परम् ॥ १५

देवा ऊचुः—

अत्राप्युपायः कोऽस्माकं निर्जितानां परैर्हठात् । एकमेवात्र नः श्रेयो विजयो वाऽथवा मृतिः ॥
सपत्नैरभिभूतानां जीवितं धिङ्मनस्विनाम् ॥ १६

ब्रह्मोवाच—

एतस्मिन्नन्तरे पुत्र वागुवाचाशरीरिणी ॥ १७

आकाशवागुवाच—

क्लेशेनालं सुरगणा गौतमीमाशु गच्छत । भक्त्या हरिहरौ तत्र समाराधयतेश्वरौ ॥ १८
गोदावर्यास्तयोश्चैव प्रसादात्किंतु दुष्करम् ॥ १९

ब्रह्मोवाच—

प्रसन्नाभ्यां हरीशाभ्यां देवा जयमभीप्सितम् । अवाप्य सर्वतो जग्मुः पालयन्तो दिवौकसः ॥
यत्र देवागमो जातस्तत्तीर्थं तेन विश्रुतम् । देवागमं प्रशंसन्ति मुनयस्तत्त्वदर्शिनः ॥ २१
तत्राशीतिसहस्राणि शिवलिङ्गानि नारद । देवागमः पर्वतोऽसौ प्रियं[3] इत्यपि कथ्यते ॥
ततः प्रभृति तत्तीर्थं देवप्रियमतो विदुः ॥ २२

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये देवागमतीर्थवर्णनं नाम षष्ठ्यधिक-
शततमोऽध्यायः ॥ १६० ॥

गौतमीमाहात्म्य एकनवतितमोऽध्यायः ॥ ९१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८४७३

अथैकषष्ठ्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

कुशतर्पणमाख्यातं प्रणीतासंगमं तथा । तीर्थं सर्वेषु लोकेषु भुक्तिमुक्तिप्रदायकम् ॥ १
तस्य स्वरूपं वक्ष्यामि शृणु पापहरं शुभम् । विन्ध्यस्य दक्षिणे पार्श्वे सह्यो नाम महागिरिः ॥२
यदङ्घ्रिभ्योऽभवन्नद्यो गोदाभीमरथीमुखाः । यत्राभवत्तद्विरजमेकवीरा च यत्र सा ॥ ३
न तस्य महिमा कैश्चिदपि शक्योऽनुवर्णितुम् । तस्मिन्गिरौ पुण्यदेशे शृणु नारद यत्नतः ॥ ४
गुह्याद्गुह्यतरं वक्ष्ये साक्षाद्वेदोदितं शुभम् । यन्न जानन्ति मुनयो देवाश्च पितरोऽसुराः ॥ ५
तदहं प्रीतये वक्ष्ये श्रवणात्सर्वकामदम् । परः स पुरुषो ज्ञेयो ह्यव्यक्तोऽक्षर एव तु ॥ ६

१ घ. ङ. °यश्चापि । २ घ. च. °त्वा विष्णुमहेश्वरौ । अभेदं चि° । ३ घ. °यक्र्चापि ।

अपरश्च क्षरस्तस्मात्प्रकृत्यन्वित एव च । निराकारात्सावयवः पुरुषः समजायत ॥ ७
तस्मादापः समुद्भूता अद्भ्यश्च पुरुषस्तथा । ताभ्यामब्जं समुद्भूतं तत्राहमभवं मुने ॥ ८
पृथिवी वायुराकाश आपो ज्योतिस्तथैव च । एते मत्तः पूर्वतरा एकदैवाभवन्मुने ॥ ९
एतानेव प्रपश्यामि नान्यत्स्थावरजङ्गमम् । नैव वेदास्तदा चाऽऽसन्नाहं द्रष्टाऽस्मि किंचन ॥ १०
यस्मादहं समुद्भूतो न पश्येयं तमप्यथ । तूष्णीं स्थिते मयि तदा अश्रौषं वाचमुत्तमाम् ॥ ११

आकाशवागुवाच—

ब्रह्मन्कुरु जगत्सृष्टिं स्थावरस्य चरस्य च ॥ १२

ब्रह्मोवाच—

ततोऽहमब्रवं वाचं [1]पौरुषीं तत्र नारद । कथं स्रक्ष्ये क्व वा स्रक्ष्ये केन स्रक्ष्य इदं जगत् ॥ १३
सैव वागब्रवीद्देवी प्रकृतिर्याऽभिधीयते । विष्णुना प्रेरिता माता जगदीशा जगन्मयी ॥ १४

आकाशवागुवाच—

यज्ञं कुरु ततः शक्तिस्ते भवित्री न संशयः । यज्ञो वै विष्णुरित्येषा श्रुतिर्ब्रह्मन्सनातनी ॥ १५
किं यज्वनामसाध्यं स्यादिह लोके परत्र च ॥ १६

ब्रह्मोवाच—

पुनस्तामब्रवं देवीं क्व वा केनेति तद्वद । यज्ञः कार्यो महाभागे ततः सोवाच मां प्रति ॥ १७

आकाशवागुवाच—

ओंकारभूता या देवी मातृकल्पा जगन्मयी । कर्मभूमौ यजस्वेह यज्ञेशं यज्ञपूरुषम् ॥ १८
स एव साधनं ते स्यात्तेन तं यज सुव्रत । यज्ञः स्वाहा स्वधा मन्त्रा ब्राह्मणा हविरादिकम् ॥ १९
हरिरेवाखिलं तेन सर्वं विष्णोरवाप्यते ॥ २०

ब्रह्मोवाच—

पुनस्तामब्रवं देवीं कर्मभूः क्व विधीयते । तदा नारद नैवाऽऽसीद्भागीरथ्यथ नर्मदा ॥ २१
यमुना नैव तापी सा सरस्वत्यथ गौतमी । समुद्रो वा नदः कश्चिन्न सरः सरितोऽमलाः ॥
सा शक्तिः पुनरप्येवं मामुवाच पुनः पुनः ॥ २२

दैवी वागुवाच—

सुमेरोर्दक्षिणे पार्श्वे तथा हिमवतो गिरेः । दक्षिणे चापि विन्ध्यस्य सह्याच्चैवाथ दक्षिणे ॥
सर्वस्य सर्वकाले तु कर्मभूमिः शुभोदया ॥ २३

ब्रह्मोवाच—

तत्तु वाक्यमथो श्रुत्वा त्यक्त्वा मेरुं महागिरिम् । तं प्रदेशमथाऽऽगत्य स्थातव्यं क्वेत्यचिन्तयम्
ततो मामब्रवीत्सैव विष्णोर्वाण्यशरीरिणी ॥ २४

आकाशवागुवाच—

इतो गच्छ इतस्तिष्ठ तथोपविश चात्र हि । संकल्पं कुरु यज्ञस्य स ते यज्ञः समाप्यते ॥ २५
कृते चैवाथ संकल्पे यज्ञार्थे सुरसत्तम । यद्वदन्त्यखिला वेदा [2]विधे तत्तत्समाचर ॥ २६

ब्रह्मोवाच—

इतिहासपुराणानि यदन्यच्छब्दगोचरम् । स्वतो [3]मुखे मम प्रायादभूच्च स्मृतिगोचरम् ॥ २७

१ च. पौरुषीं । २ घ. विधिना तत्स° । ३ घ. च. मुखं ।

वेदार्थश्च मया सर्वो ज्ञातोऽसौ तत्क्षणेन च । ततः पुरुषसूक्तं तदस्मरं लोकविश्रुतम् ॥ २८
यज्ञोपकरणं सर्वं तदुक्तं च त्वकल्पयम् । *तदुक्तेन प्रकारेण यज्ञपात्राण्यकल्पयम् ॥ २९
अहं स्थित्वा यत्र देशे शुचिर्भूत्वा यतात्मवान् । दीक्षितो विप्रदेशोऽसौ मन्नाम्ना तु प्रकीर्तितः॥
मद्देवयजनं पुण्यं नाम्ना ब्रह्मगिरिः स्मृतः । चतु[1]रशीतिपर्यन्तं योजनानि महामुने ॥ ३१
मद्देवयजनं पुण्यं पूर्वतो ब्रह्मणो गिरेः । तत्र मध्ये वेदिका स्याद्गार्हप[2]त्योऽस्य(?) दक्षिणे ॥ ३२
तत्र चाऽऽहवनीयस्य एवमग्नींस्त्वकल्पयम्(?) । विना पत्न्या न सिध्येत यज्ञः श्रुतिनिदर्शनात्
शरीरमात्मनोऽहं वै द्वेधा चाकरवं मुने । पूर्वार्धेन ततः पत्नी ममाभूद्यज्ञसिद्धये ॥ ३४
उत्तरेण त्वहं तद्व[3]दर्धो जाया इति श्रुतेः । कालं वसन्तमुत्कृष्टमाज्यरूपेण नारद ॥ ३५
अकल्पयं तथा चेध्मं ग्रीष्मं चापि शरद्धविः । ऋतुं च प्रावृषं पुत्र तदा बर्हिरकल्पयम् ॥ ३६
छन्दांसि सप्त वै तत्र तदा परिधयोऽभवन् । कलाकाष्ठानिमेषा हि समित्पात्रकुशाः स्मृताः ३७
योऽनादिश्च त्वनन्तश्च स्वयं कालोऽभवत्तदा । यूपरूपेण देवर्षे योक्त्रं च पशुबन्धनम् ॥ ३८
सत्त्वादिस्त्रि[4]गुणाः पाशा नैव तत्राभवत्पशुः । ततोऽहमब्रवं वाचं वैष्णवीमशरीरिणीम् ॥ ३९
विनैव पशुना नायं यज्ञः परिसमाप्यते । ततो मामवदद्देवी सैव नित्याऽशरीरिणी ॥ ४०

आकाशवागुवाच—

पौरुषेणाथ सूक्तेन स्तुहि तं पुरुषं परम् ॥ ४१

ब्रह्मोवाच—

तथेत्युक्त्वा स्तूयमाने देवदेवे जनार्दने । मम चोत्पादके भक्त्या सूक्तेन पुरुषस्य हि ॥ ४२
सा च मामब्रवीद्देवी ब्रह्मन्मां त्वं पशुं कुरु । तदा विज्ञाय पुरुषं जनकं मम चाव्ययम् ॥ ४३
कालयूपस्य पार्श्वे तं गुणपाशैर्निवेशितम् । बर्हिस्थितमहं प्रोक्षं पुरुषं जातमग्रतः ॥ ४४
एतस्मिन्नन्तरे तत्र तस्मात्सर्वमभूदिदम् । ब्राह्मणास्तु मुखात्तस्याभवन्बाह्वोश्च क्षत्रियाः ॥ ४५
मुखादिन्द्रस्तथाऽग्निश्च श्वसनः प्राणतोऽभवत् । दिशः श्रोत्रात्तथा शीर्ष्णः सर्वः स्वर्गोऽभवत्तदा॥
मनसश्चन्द्रमा जातः सूर्योऽभूच्चक्षुषस्तथा । अन्तरिक्षं तथा नाभेरूरुभ्यां विश एव च ॥ ४७
पद्भ्यां शूद्रश्च संजातस्तथा भूमिरजायत । ऋषयो रोमकूपेभ्य ओषध्यः केशतोऽभवन् ॥ ४८
ग्राम्यारण्याश्च पश[5]वो न[6]खेभ्यः सर्वतोऽभवन् । कृमिकीटपतङ्गादि पायूपस्थादजायत ॥ ४९
स्थावरं जङ्गमं किंचिद्दृश्याद[7]दृश्यं च किंचन । तस्मात्सर्वमभूद्देवा मत्तश्चाप्यभवन्पुनः ॥
एतस्मिन्नन्तरे सैव विष्णोर्वागब्रवीच्च माम् ॥ ५०

आकाशवागुवाच—

सर्वं संपूर्णमभवत्सृष्टिर्जाता तथेप्सिता । इदानीं जुहुधि ह्यग्नौ पात्राणि च समानि च ॥ ५१
विसर्जय तथा यूपं प्रणीतां च कुशांस्तथा । ऋत्विग्रूपं यज्ञरूपमुद्देश्यं ध्येयमेव च ॥ ५२
स्रुवं च पुरुषं पाशान्सर्वं ब्रह्मन्विसर्जय ॥ ५३

ब्रह्मोवाच—

तद्वाक्यसमकालं तु क्रमशो यज्ञयोनिषु । गार्हपत्ये दक्षिणाग्नौ तथा चैव महामुने ॥ ५४

---

* इदमर्धं घ. च. पुस्तकयोर्नास्ति ।

---

१ ङ. °तुर्विंशांतिं° । २ घ. ङ. च. °पत्नस्य । ३ क. °दर्धं जा° । ४ घ. च. °गुणा चाऽऽसीत्सैव । ५ क. °शवस्त-स्त्वेभ्यः । ६ घ. मखेभ्यः । ७ घ. ङ. °दृश्यादि किं° ।

पूर्वस्मिन्नपि चैवाग्नौ क्रमशो जुह्वतस्तदा । तत्र तत्र जगद्योनिमनुसंधाय पूरुषम् ॥ ५५
मन्त्रपूतं शुचिः सम्यग्यज्ञदेवो जगन्मयः । लोकनाथो विश्वकर्ता कुण्डानां तत्र संनिधौ ॥ ५६
शुक्लरूपधरो विष्णुर्भवेदाहवनीयके । श्यामो विष्णुर्दक्षिणाग्नेः पीतो गृहपतेः कवेः ॥ ५७
सर्वकालं तेषु विष्णुरतो देशेषु संस्थितः । न तेन रहितं किंचिद्विष्णुना विश्वयोनिना ॥ ५८
प्रणीतायाः प्रणयनं मन्त्रैश्चाकरवं ततः । प्रणीतोदकमप्येतत्प्रणीतेति नदी शुभा ॥ ५९
व्यसर्जयं प्रणीतां तां मार्जयित्वा कुशैरथ । मार्जने क्रियमाणे तु प्रणीतोदकबिन्दवः ॥ ६०
पतितास्तत्र तीर्थानि जातानि गुणवन्ति च । संजाता मुनिशार्दूल स्नानात्क्रतुफलप्रदा ॥ ६१
याऽलंकृता सर्वकालं देवदेवेन शार्ङ्गिणा । सोपानपङ्क्तिः सर्वेषां वैकुण्ठारोहणाय सा ॥ ६२
संमार्जिताः कुशा यत्र पतिता भूतले शुभे । कुशतर्पणमाख्यातं बहुपुण्यफलप्रदम् ॥ ६३
कुशैश्च तर्पिताः सर्वे कुशतर्पणमुच्यते । पश्चाच्च संगता तत्र गौतमी कारणान्तरात् ॥ ६४
प्रणीतायां[1] महाबुद्धे प्रणीतासंगमोऽभवत् । कुशतर्पणदेशे तु तत्तीर्थं कुशतर्पणम् ॥ ६५
तत्रैव कल्पितो यूपो मया विन्ध्यस्य चोत्तरे । विसृष्टो लोकपूज्योऽसौ विष्णोरासीत्समाश्रयः ॥
अक्षयश्चाभवच्छ्रीमानक्षयोऽसौ वटोऽभवत् । नित्यश्च कालरूपोऽसौ स्मरणात्क्रतुपुण्यदः ॥ ६७
मद्देवयजनं चेदं दण्डकारण्यमुच्यते । संपूर्णे तु क्रतौ विष्णुर्मया भक्त्या प्रसादितः ॥ ६८
यो विराडुच्यते वेदे यस्मान्मूर्तमजायत । यस्माच्च मम चोत्पत्तिर्यस्येदं विकृतं जगत् ॥ ६९
तमहं देवदेवेशमभिवन्द्य व्यसर्जयम् । योजनानि चतुर्विंशन्मद्देवयजनं शुभम् ॥ ७०
तस्माद्यापि कुण्डानि सन्ति च त्रीणि नारद । यज्ञेश्वरस्वरूपाणि विष्णोर्वै चक्रपाणिनः ॥७१
ततः प्रभृति चाऽऽख्यातं मद्देवयजनं च तत् । तत्रस्थः कृमिकीटादिः सोऽप्यन्ते मुक्तिभाजनम् ॥
धर्मबीजं मुक्तिबीजं दण्डकारण्यमुच्यते । विशेषाद्गौतमीश्लिष्टो देशः पुण्यतमोऽभवत् ॥ ७३
प्रणीतासंगमे चापि कुशतर्पण एव वा । स्नानदानादि यः कुर्यात्स गच्छेत्परमं पदम् ॥ ७४
स्मरणं पठनं वाऽपि श्रवणं चापि भक्तितः । सर्वकामप्रदं पुंसां भुक्तिमुक्तिप्रदं विदुः ॥ ७५
उभयोस्तीरयोस्तत्र तीर्थान्याहुर्मनीषिणः । षडशीतिसहस्राणि तेषु पुण्यं पुरोदितम् ॥ ७६
वाराणस्या अपि मुने कुशतर्पणमुत्तमम् । नानेन सदृशं तीर्थं विद्यते सचराचरे ॥ ७७
ब्रह्महत्यादिपापानां स्मरणादपि नाशनम् । तीर्थमेतन्मुने प्रोक्तं स्वर्गद्वारं महीतले ॥ ७८

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये प्रणीतासंगमकुशतर्पणादिषडशीतिसहस्रतीर्थवर्णनं नामैकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

गौतमीमाहात्म्ये द्विनवतितमोऽध्यायः ॥ ९२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८५५१

अथ द्विषष्ट्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

मन्युतीर्थमिति ख्यातं सर्वपापप्रणाशनम् । सर्वकामप्रदं नॄणां[4] स्मरणादघनाशनम् ॥ १

---

१ च. प्रणीतया । २ क. यज्ञो । ३ घ. च. °लयूरो । ४ घ. ङ. च. पुंसां ।

तस्य प्रभावं वक्ष्यामि शृणुष्वावहितो मुने । देवानां दानवानां च संगरोऽभून्मिथः पुरा ॥ २
तत्राजयन्नैव सुरा दानवा जयिनोऽभवन् । पराङ्मुखाः सुरगणाः संगराद्गतचेतसः ॥ ३
मामभ्येत्य समूचुस्ते देहि नोऽभयकारणम् । तानहं प्रत्यवोचं वै गङ्गां गच्छत सर्वशः ॥ ४
तत्र वै गौतमीतीरे स्तुत्वा देवं महेश्वरम् । अनपायनिरायाससहजानन्दसुन्दरम् ॥ ५
लप्स्यते सर्वविबुधा जयहेतुर्महेश्वरात् । तथेत्युक्त्वा सुरगणाः स्तुवन्ति स्म महेश्वरम् ॥ ६
तपोऽतप्यन्त केचिद्वै ननृतुश्च तथाऽपरे । अस्नापयंश्च केचिच्चापूजयंश्च तथाऽपरे ॥ ७
ततः प्रसन्नो भगवाञ्शूलपाणिर्महेश्वरः । देवानथाब्रवीत्तुष्टो व्रियतां यदभीप्सितम् ॥ ८
देवा ऊचुः सुरपतिं विजयाय ददस्व नः । पुरुषं परमश्लाघ्यं रणेषु पुरतः स्थितम् ॥ ९
यद्बाहुबलमाश्रित्य भवामः सुखिनो वयम् । तथेत्युवाच भगवान्देवान्प्रति महेश्वरः ॥ १०
आत्मनस्तेजसा कश्चिन्निर्मितः परमेष्ठिना । मन्युनामानमत्युग्रं देवसैन्यपुरोगमम् ॥ ११
तं नत्वा त्रिदशाः सर्वे शिवं नत्वा स्वमालयम् । मन्युना सह चाभ्येत्य पुनर्युद्धाय तस्थिरे॥१२
युद्धे स्थित्वा तु दनुजैर्दैतेयैश्च महाबलैः । विबुधा जातसंनद्धा मन्युमूचुः पुरः स्थिताः ॥ १३

देवा ऊचुः—

सामर्थ्यं तव पश्यामः पश्चाद्योत्स्यामहे परैः । तस्माद्दर्शय चाऽऽत्मानं मन्योऽस्माकं युयुत्सताम्

ब्रह्मोवाच—

तद्देववचनं श्रुत्वा मन्युराह स्मयन्निव ॥ १५

मन्युरुवाच—

जनिता मम देवेशः सर्वज्ञः सर्वदृक्प्रभुः । यः सर्वं वेत्ति सर्वेषां धामनाम[1] मनःस्थितम् ॥ १६
नैव कश्चिच्च तं वेत्ति यः सर्वं वेत्ति सर्वदा । अमूर्तं मूर्तमप्येतद्वेत्ति कर्ता जगन्मयः ॥ १७
परोऽसौ भगवान्साक्षात्तथा दिव्यन्तरिक्षगः । कस्तस्य रूपं यो वेद केऽस्य[2] कर्ता जगन्मयः॥१८
एवंविधादहं जातो मां कथं वेत्तुमर्हथ । अथवा द्रष्टुकामा वै भवन्तो माऽनुपश्यत ॥ १९

ब्रह्मोवाच—

इत्युक्त्वा दर्शयामास मन्यू रूपं स्वकं महत् । तार्तीयचक्षुषोद्भूतं भवस्य परमेष्ठिनः ॥ २०
तेजसा संभृतं रूपं यतः सर्वं तदुच्यते । पौरुषं पुरुषेष्वेव अहंकारश्च जन्तुषु ॥ २१
क्रोधः सर्वस्य यो भीम उपसंहारकृद्भवेत् । तं शंकरप्रतिनिधिं ज्वलन्तं निजतेजसा ॥ २२
सर्वायुधधरं दृष्ट्वा प्रणेमुः सर्वदेवताः । वित्रेसुर्दैत्यदनुजाः कृताञ्जलिपुटाः सुराः ॥ २३
भूत्वा मन्युमथोचुस्ते त्वं सेनानीः प्रभो भव । त्वया दत्तमिदं राज्यं मन्यो भोक्ष्यामहे वयम्२४
तस्मात्सर्वेषु कार्येषु [3]जेता त्वं जयवर्धनः । त्वमिन्द्रस्त्वं च वरुणो लोकपालास्त्वमेव च ॥ २५
अस्मासु सर्वदेवेषु प्रविश त्वं जयाय वै । मन्युः प्रोवाच तान्सर्वान्विना मत्तो न किंचन ॥ २६
सर्वेष्वन्तः प्रविष्टोऽहं न मां जानाति कश्चन । स एव भगवान्मन्युस्ततो जातः पृथक्पृथक् ॥२७
स एव रुद्ररूपी स्याद्रुद्रो मन्युः शिवोऽभवत् । स्थावरं जङ्गमं चैव सर्वं व्याप्तं हि मन्युना ॥२८
तमवाप्य सुराः सर्वे जयमापुश्च संगरे । जयो मन्युश्च शौर्यं च ईशतेजःसमुद्भवम् ॥ २९
मन्युना जयमाप्याथ कृत्वा दैत्यैश्च संगमम् । यथागतं ययुः सर्वे मन्युना परिरक्षिताः ॥ ३०

---

१ घ. °म जनस्थि° । ङ. च. °म जनस्थितिम् । २ ङ. नास्य । ३ घ. च. नेता ।

यत्र वै गौतमीतीरे शिवमाराध्य ते सुराः । मन्युमापुर्जयं चैव मन्युतीर्थं तदुच्यते ॥ ३१
उत्पत्तिं च तथा मन्योर्यो नरः प्रयतः स्मरेत् । विजयो जायते तस्य न कैश्चित्परिभूयते ॥ ३२
न मन्युतीर्थसदृशं पावनं हि महामुने । यत्र साक्षान्मन्युरूपी सर्वदा शंकरः स्थितः ॥
तत्र स्नानं च दानं च स्मरणं सर्वकामदम् ॥ ३३

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये मन्युतीर्थवर्णनं
नाम द्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥
गौतमीमाहात्म्ये त्रिनवतितमोऽध्यायः ॥ ९३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८५८४

अथ त्रिषष्ट्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

सारस्वतं नाम तीर्थं सर्वकामप्रदं शुभम् । भुक्तिमुक्तिप्रदं नॄणां सर्वपापप्रणाशनम् ॥ १
सर्वरोगप्रशमनं सर्वसिद्धिप्रदायकम् । तत्रेमं शृणु वृत्तान्तं विस्तरेणाथ नारद ॥ २
पुष्पोत्कटात्पूर्वभागे पर्वतो लोकविश्रुतः । शुभ्रो नाम गिरिश्रेष्ठो गौतम्या दक्षिणे तटे ॥ ३
शाकल्य इति विख्यातो मुनिः परमनैष्ठिकः । तस्मिञ्शुभ्रे पुण्यगिरौ तपस्तेपे ह्यनुत्तमम् ॥ ४
तपस्यन्तं द्विजश्रेष्ठं गौतमीतीरमाश्रितम् । सर्वे भूतगणा नित्यं प्रणमन्ति स्तुवन्ति तम् ॥ ५
अग्निशुश्रूषणपरं वेदाध्यनतत्परम् । ऋषिगन्धर्वसुमनःसेविते तत्र पर्वते ॥ ६
तस्मिन्गिरौ महापुण्ये देवद्विजभयंकरः । यज्ञद्वेषी ब्रह्महन्ता परशुर्नाम राक्षसः ॥ ७
कामरूपी विचरति नानारूपधरो वने । क्षणं च ब्रह्मरूपेण कदाचिद्व्याघ्ररूपधृक् ॥ ८
कदाचिद्देवरूपेण कदाचित्पशुरूपधृक् । कदाचित्प्रमदारूपः कदाचिन्मृगरूपतः ॥ ९
कदाचिद्बालरूपेण एवं चरति पापकृत् । यत्राऽऽस्ते ब्राह्मणो विद्वाञ्शाकल्यो मुनिसत्तमः॥१०
तमायाति महापापी परशू राक्षसाधमः । शुचिष्मन्तं द्विजश्रेष्ठं परशुर्नित्यमेव च ॥ ११
नेतुं हन्तुं प्रवृत्तोऽपि न शशाक स पापकृत् । स कदाचिद्द्विजश्रेष्ठो देवानभ्यर्च्य यत्नतः ॥ १२
भोक्तुकामः किलाऽऽयातस्तत्रायात्परशुर्मुने । ब्रह्मरूपधरो भूत्वा शिथिलः पलितोऽबली ॥
कन्यामादाय कांचिच्च शाकल्यं वाक्यमब्रवीत् ॥ १३

परशुरुवाच—

भोजनस्यार्थिनं विद्धि मां च कन्यामिमां द्विज । आतिथ्यकाले संप्राप्तं कृतकृत्योऽसि मानद१४
त एव धन्या लोकेऽस्मिन्येषामतिथयो गृहात् । पूर्णाभिलाषा निर्यान्ति जीवन्तोऽपि मृताः परे
भोजने तूपविष्टे तु आत्मार्थं कल्पितं तु यत् । अतिथिभ्यस्तु यो दद्याद्दत्ता तेन वसुंधरा ॥ १६

ब्रह्मोवाच—

एतच्छ्रुत्वा तु शाकल्यो ददामीत्येवमब्रवीत् । आसने चोपवेश्याथाज्ञानात्तं परशुं द्विजम् ॥ १७
यथान्यायं पूजयित्वा शाकल्यो भोजनं ददौ । आपोशनं करे कृत्वा परशुर्वाक्यमब्रवीत् ॥ १८

---

१ घ. च. नित्यं । २ घ. च. °शं तीर्थं कुत्रापि विद्यते । य° ।

परशुरुवाच—

दूरादभ्यागतं श्रान्तमनुगच्छन्ति देवताः । तस्मिंस्तृप्ते तु तृप्ताः स्युरतृप्ते तु विपर्ययः ॥ १९
अतिथिश्चापवादी च द्वावेतौ विश्वबान्धवौ । अपवादी हरेत्पापमतिथिः स्वर्गसंक्रमः ॥ २०
अभ्यागतं पथि श्रान्तं सावज्ञं योऽभिवीक्षते । तत्क्षणादेव नश्यन्ति तस्य धर्मयशःश्रियः ॥ २१
तस्मादभ्यागतः श्रान्तो याचेऽहं त्वां द्विजोत्तम । दास्यसे यदि मे कामं तद्भोक्ष्येऽहं न चान्यथा

ब्रह्मोवाच—

दत्तमित्येव शाकल्यो भुङ्क्ष्वेत्येवाऽऽह राक्षसम् । ततः प्रोवाच परशुरहं राक्षससत्तमः ॥ २३
नाहं द्विजस्तव रिपुर्न वृद्धः पलितः कृशः । बहूनि मे व्यतीतानि वर्षाणि त्वां प्रपश्यतः ॥ २४
शुष्यन्ति मम गात्राणि ग्रीष्मे स्वल्पोदकं यथा । तस्मान्नेष्ये सानुगं त्वां भक्षयिष्ये द्विजोत्तम २५

ब्रह्मोवाच—

श्रुत्वा परशुवाक्यं तच्छाकल्यो वाक्यमब्रवीत् ॥ २६

शाकल्य उवाच—

ये महाकुलसंभूता विज्ञातसकलागमाः । तत्प्रतिश्रुतमभ्येति न जात्वत्र विपर्ययम् ॥ २७
यथोचितं कुरु सखे तथाऽपि शृणु मे वचः । निहन्तुमप्युद्यतेषु वक्तव्यं हितमुत्तमैः ॥ २८
ब्राह्मणोऽहं वज्रतनुः सर्वतो रक्षको हरिः । पादौ रक्षतु मे विष्णुः शिरो देवो जनार्दनः ॥ २९
बाहू रक्षतु वाराहः पृष्ठं रक्षतु कूर्मराट् । हृदयं रक्षतात्कृष्णो ह्यङ्गुली रक्षतान्मृगः ॥ ३०
मुखं रक्षतु वागीशो नेत्रे रक्षतु पक्षिगः । श्रोत्रं रक्षतु वित्तेशः सर्वतो रक्षताद्भवः ॥
नानापत्स्वेकशरणं देवो नारायणः स्वयम् ॥ ३१

ब्रह्मोवाच—

एवमुक्त्वा तु शाकल्यो नय वा भक्ष वा सुखम् । मां राक्षसेन्द्र परशो त्वमिदानीमतन्द्रितः ३२
राक्षसस्तस्य वचनाद्भक्षणाय समुद्यतः । नास्त्येव हृदये नूनं पापिनां करुणाकणः ॥ ३३
दंष्ट्राकरालवदनो गत्वा तस्यान्तिकं तदा । ब्राह्मणं तं निरीक्ष्यैवं परशुर्वाक्यमब्रवीत् ॥ ३४

परशुरुवाच—

शङ्खचक्रगदापाणिं त्वां पश्येऽहं द्विजोत्तम । सहस्रपादशिरसं सहस्राक्षकरं विभुम् ॥ ३५
सर्वभूतैकनिलयं छन्दोरूपं जगन्मयम् । त्वामद्य विप्र पश्यामि नास्ति ते पूर्वकं वपुः ॥ ३६
तस्मात्प्रसादये विप्र त्वमेव शरणं भव । ज्ञानं देहि महाबुद्धे तीर्थं ब्रूह्यघनिष्कृतिम् ॥ ३७
महतां दर्शनं ब्रह्मञ्जायते नहि निष्फलम् । द्वेषादज्ञानतो वाऽपि प्रसङ्गाद्वा प्रमादतः ॥ ३८
अयसः स्पर्शसंस्पर्शो रुक्मत्वायैव जायते ॥ ३९

ब्रह्मोवाच—

एतद्वाक्यं समाकर्ण्य राक्षसेन समीरितम् । शाकल्यः कृपया प्राह वरदा सा सरस्वती ॥ ४०
तवाचिराद्दैत्यपते ततः स्तुहि जनार्दनम् । मनोरथफलप्राप्तौ नान्यन्नारायणस्तुतेः ॥ ४१
किंचिदप्यस्ति लोकेऽस्मिन्कारणं शृणु राक्षस । प्रसन्ना तव सा देवी मद्वाक्याच्च भविष्यति ४२

---

१ ङ. स्वर्गदायकः । २ घ. ङ. च. °म् । कुरु वा मा कु° । ३ क. °न्मूढः । ना° । ४ घ. वित्तेशः । ५ घ. शनैः । ६ घ. च. °वेदैक° । ७ घ. ङ. च. °ह्यघ नि° ।

ब्रह्मोवाच—

तथेत्युक्त्वा स परशुर्गङ्गां त्रैलोक्यपावनीम् । स्नात्वा शुचिर्यतमना गङ्गामभिमुखः स्थितः ॥ ४३

तत्रापश्यद्दिव्यरूपां दिव्यगन्धानुलेपनाम् । सरस्वतीं जगद्धात्रीं शाकल्यवचने स्थिताम् ॥ ४४

जगज्जाड्यहरां विश्वजननीं भुवनेश्वरीम् । तामुवाच विनीतात्मा परशुर्गतकल्मषः ॥ ४५

परशुरुवाच—

गुरुः शाकल्य इत्याह माकान्तं स्तुहि विध्वजम् । तव प्रसादात्सा शक्तिर्यथा मे स्यात्तथा कुरु ॥

ब्रह्मोवाच—

तथाऽस्त्विति च सा प्राह परशुं श्रीसरस्वती । सरस्वत्याः प्रसादेन परशुस्तं जनार्दनम् ॥ ४७

तुष्टाव विविधैर्वाक्यैस्ततस्तुष्टोऽभवद्धरिः । वरं प्रादाद्राक्षसाय कृपासिन्धुर्जनार्दनः ॥ ४८

जनार्दन उवाच—

यद्यन्मनोगतं रक्षस्तत्तत्सर्वं भविष्यति ॥ ४९

ब्रह्मोवाच—

शाकल्यस्य प्रसादेन गौतम्याश्च प्रसादतः । सरस्वत्याः प्रसादेन नरसिंहप्रसादतः ॥ ५०

पापिष्ठोऽपि तदा रक्षः परशुर्दिवमेयिवान् । सर्वतीर्थाङ्घ्रिपद्मस्य प्रसादाच्छार्ङ्गधन्वनः ॥ ५१

ततः प्रभृति तत्तीर्थं सारस्वतमिति श्रुतम् । तत्र स्नानेन दानेन विष्णुलोके महीयते ॥ ५२

वाग्जवैष्णवशाकल्यपरशुप्रभवाणि हि । बहून्यभूवंस्तीर्थानि [1]तस्मिन्वै श्वेतपर्वते ॥ ५३

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये श्वेतपर्वतस्थशाकल्यादितीर्थवर्णनं नाम
त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

गौतमीमाहात्म्ये चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८६३७

अथ चतुःषष्ट्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच[2]—

चिचिका(क)तीर्थमित्युक्तं सर्वरोगविनाशनम् । सर्वचिन्ताप्रहरणं सर्वशान्तिकरं नृणाम् ॥ १

तस्य स्वरूपं वक्ष्यामि शुभ्रे तस्मिन्नगोत्तमे । गङ्गाया उत्तरे पारे यत्र देवो गदाधरः ॥ २

[3]चिचिकः पक्षिराट्तत्र भेरुण्डो योऽभिधीयते । सदा वसति तत्रैवं मांसाशी श्वेतपर्वते ॥ ३

नानापुष्पफलाकीर्णैः सर्वर्तुकुसुमैर्नगैः । सेविते द्विजमुख्यैश्च गौतम्या चोपशोभिते ॥ ४

सिद्धचारणगन्धर्वकिंनरामरसंकुले । तत्समीपे नगः कश्चिद्द्विपदां च चतुष्पदाम् ॥ ५

रोगार्तिक्षुत्तृषाचिन्तामरणानां न भाजनम् । एवं गुणान्विते शैले नानामुनिगणावृते ॥ ६

पूर्वदेशाधिपः कश्चित्पवमान इति श्रुतः । क्षत्रधर्मरतः श्रीमान्देवब्राह्मणपालकः ॥ ७

बलेन महता युक्तः सपुरोधा वनं ययौ । रेमे स्त्रीभिर्मनोज्ञाभिर्नृत्यवादित्रजैः सुखैः ॥ ८

स च एवं धनुष्पाणिर्मृगयाशीलिभिर्वृतः । एवं भ्रमन्कदाचित्स श्रान्तो द्रुममुपागतः ॥ ९

---

१ घ. श्रेष्ठानि । ङ. च. पुण्यानि । २ क. °च—चर्चिका° । ३ क. चर्चिकः । ४ घ ङ. च. °व सार्वकामिकम्° ।

गौतमीतीरसंभूतं नानापक्षिगणैर्वृतम् । आश्रमाणां गृहपतिं धर्मज्ञमिव सेवितम् ॥ १०
तमाश्रित्य नगश्रेष्ठं पवमानो नृपोत्तमः । स विश्रान्तो जनवृत ईक्षां चक्रे नगोत्तमम् ॥ ११
तत्रापश्यद्द्विजं स्थूलं द्विमुखं शोभनाकृतिम् । चिन्ताविष्टं तथा श्रान्तं तमपृच्छन्नृपोत्तमः ॥ १२

राजोवाच—

को भवान्द्विमुखः पक्षी चिन्तावानिव लक्ष्यसे । नैवात्र कश्चिदुःखार्तः कस्मात्त्वं दुःखमागतः १३

ब्रह्मोवाच—

ततः प्रोवाच नृपतिं पवमानं शनैः शनैः । समाश्वस्तमनाः पक्षी [1]चिच्चिको निःश्वसन्मुहुः ॥१४

चिच्चिक उवाच—

मत्तो भयं न चान्येषां मम वाऽन्योपपादितम् । नानापुष्पफलाकीर्णं मुनिभिः परिसेवितम्॥१५
पश्येयं शून्यमेवाद्रिं ततः शोचामि मामहम् । न लभामि सुखं किंचिन्न तृप्यामि कदाचन ॥
निद्रां प्राप्नोमि न क्वापि न विश्रान्तिं न निर्वृतिम् । १६

ब्रह्मोवाच—

द्विमुखस्य द्विजस्योक्तं श्रुत्वा राजाऽतिविस्मितः ॥ १७

राजोवाच—

को भवान्किं कृतं पापं कस्माच्छून्यश्च पर्वतः । एकेनाऽऽस्येन तृप्यन्ति प्राणिनोऽत्र नगोत्तमे १८
किमुताऽऽस्यद्वयेन त्वं न तृप्तिमुपयास्यसि । किंवा ते दुष्कृतं प्राप्तमिह जन्मन्यथो पुरा ॥ १९
तत्सर्वं शंस मे सत्यं त्रास्ये त्वां महतो भयात् ॥ २०

ब्रह्मोवाच—

राजानं तं द्विजः प्राह निःश्वसन्नथ [2]चिच्चिकः ॥ २१

चिच्चिक उवाच—

वक्ष्येऽहं त्वां पूर्ववृत्तं पवमान शृणुष्व तत् । अहं द्विजातिप्रवरो वेदवेदाङ्गपारगः ॥ २२
कुलीनो विदितप्राज्ञः कार्यहन्ता कलिप्रियः । वदे पुरस्तथा पृष्ठे अन्यदन्यच्च जन्तुषु ॥ २३
परवृद्ध्या सदा दुःखी मायया विश्ववञ्चकः । कृतघ्नः सत्यरहितः परनिन्दाविचक्षणः ॥ २४
मित्रस्वामिगुरुद्रोही दम्भाचारोऽतिनिर्घृणः । मनसा कर्मणा वाचा तापयामि जनान्बहून् ॥ २५
अयमेव विनोदो मे सदा यत्परहिंसनम् । युग्मभेदं गणोच्छेदं मर्यादाभेदनं सदा ॥ २६
करोमि निर्विचारोऽहं विद्वत्सेवापराङ्मुखः । न मया सदृशः कश्चित्पातकी भुवनत्रये ॥ २७
तेनाहं द्विमुखो जातस्तापनादुःखभाग्यहम् । तस्मादुःखेन संतप्तः शून्योऽयं पर्वतो मम ॥ २८
अन्यच्च शृणु भूपाल वाक्यं धर्मार्थसंहितम् । ब्रह्महत्यासमं पापं तद्विना तदवाप्यते ॥ २९
क्षत्रियः संगरं गत्वा अथवाऽन्यत्र संगरात् । पलायन्तं न्यस्तशस्त्रं विश्वस्तं च पराङ्मुखम् ॥३०
अविज्ञातं चोपविष्टं बिभेमीति च वादिनम् । तं यदि क्षत्रियो हन्यात्स तु स्याद्ब्रह्मघातकः ३१
अधीतं विस्मरति यस्त्वं करोति तथोत्तमम् । अनादरं च गुरुषु तमाहुर्ब्रह्मघातकम् ॥ ३२
प्रत्यक्षे च प्रियं वक्ति परोक्षे परुषाणि च । अन्यद्धृदि वचस्यन्यत्करोत्यन्यत्सदैव यः ॥ ३३
गुरूणां शपथं कर्ता द्वेष्टा ब्राह्मणनिन्दकः । मिथ्या विनीतः पापात्मा स तु स्याद्ब्रह्मघातकः ३४

---

१ क. चर्चिको । २ क. चर्चिकः ।

देवं वेदमथाध्यात्मं धर्मब्राह्मणसंगतिम् । एतान्निन्दति यो द्वेषात्स तु स्याद्ब्रह्मघातकः ॥ ३५
एवं भूतोऽप्यहं राजन्दम्भार्थं लज्जया तथा । सद्वृत्त इव वर्तेऽहं तस्माद्राजन्द्विजोऽभवम् ॥ ३६
एवं भूतोऽपि सत्कर्म किंचित्कर्ताऽस्मि कुत्रचित् । तेनाहं कर्मणा राजन्स्वतः स्मर्ता पुरा कृतम्

ब्रह्मोवाच—

तंचिच्चिकवचः श्रुत्वा पवमानः सुविस्मितः । कर्मणा केन ते मुक्तिरित्याह नृपतिर्द्विजम् ॥ ३८
इति तस्य वचः श्रुत्वा नृपतिं प्राह पक्षिराट् ॥ ३९

चिच्चिक उवाच—

अस्मिन्नेव नगश्रेष्ठे गौतम्या उत्तरे तटे । गदाधरं नाम तीर्थं तत्र मां नय सुव्रत ॥ ४०
तद्धि तीर्थं पुण्यतमं सर्वपापप्रणाशनम् । सर्वकामप्रदं चेति महद्भिर्मुनिभिः श्रुतम् ॥ ४१
न गौतम्यास्तथा विष्णोरपरं क्लेशनाशनम् । सर्वभावेन तत्तीर्थं पश्येयमिति मे मतिः ॥ ४२
मत्कृतेन प्रयत्नेन नैतच्छक्यं कदाचन । कथमाकाङ्क्षितप्राप्तिर्भवेद्दुष्कृतकर्मणाम् ॥ ४३
सप्रयत्नोऽप्यहं वीर न पश्ये तत्सुदुष्करम् । तस्मात्तव प्रसादाच्च पश्येयं हि गदाधरम् ॥ ४४
अविज्ञापितदुःखज्ञं करुणावरुणालयम् । यस्मिन्दृष्टे भवक्लेशा न दृश्यन्ते पुनर्नरैः ॥ ४५
दृष्ट्वैव तं दिवं यास्ये प्रसादात्तव सुव्रत ॥ ४६

ब्रह्मोवाच—

एवमुक्तः स नृपतिश्[2]चिच्चिकेन द्विजन्मना । दर्शयामास तं देवं तां च गङ्गां द्विजन्मने ॥ ४७
ततः स [3]चिच्चिकः स्नात्वा(प्राह) गङ्गां त्रैलोक्यपावनीम् ॥ ४८

चिच्चिक उवाच—

गङ्गे गौतमि यावत्त्वां त्रिजगत्पावनीं नरः । न पश्यत्युच्यते तावदिहामुत्रापि पातकी ॥ ४९
तस्मात्सर्वागसमपि मामुद्धर सरिद्वरे । संसारे देहिनामन्या न गतिः काऽपि कुत्रचित् ॥
त्वां विना विष्णुचरणसरोरुहसमुद्भवे ॥ ५०

ब्रह्मोवाच—

इति श्रद्धाविशुद्धात्मा गङ्गैकशरणो द्विजः । स्नानं चक्रे स्मरन्नन्तर्गङ्गे त्रायस्व मामिति ॥ ५१
गदाधरं ततो नत्वा पश्यत्सु नगवासिषु । पवमानाभ्यनुज्ञातस्तदैव दिवमाक्रमत् ॥ ५२
पवमानः स्वनगरं प्रययौ सानुगस्ततः । ततः प्रभृति तत्तीर्थं पावमानं [4]सचिच्चिकम् ॥ ५३
गदाधरं कोटितीर्थमिति वेदविदो विदुः । कोटिकोटिगुणं कर्म कृतं तत्र भवेन्नृणाम् ॥ ५४

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये पावमानचिच्चिकगदाधरकोटितीर्थवर्णनं नाम चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

गौतमीमाहात्म्ये पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८६९१.

---

१ क. तर्चाचिक°। २ क. °तिश्चर्चिके ३ क. चर्चिकः। ४ क. सचर्चिक°।

अथ पञ्चषष्ट्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

भद्रतीर्थमिति प्रोक्तं सर्वानिष्टनिवारणम् । सर्वपापप्रशमनं महाशान्तिप्रदायकम् ॥ १
आदित्यस्य प्रिया भार्या उषा त्वाष्ट्री पतिव्रता । छायाऽपि भार्या सवितुस्तस्याः पुत्रः शनैश्चरः
तस्य स्वसा विष्टिरिति भीषणा पापरूपिणी। तां कन्यां सविता कस्मै ददामीति मतिं दधे॥ ३
यस्मै यस्मै दातुकामः सूर्यो लोकगुरुः प्रभुः । तच्छ्रुत्वा भीषणा चेति किं कुर्मो भार्ययाऽनया॥
एवं तु वर्तमाने सा पितरं प्राह दुःखिता ॥ ५

विष्टिरुवाच—

बालामेव पिता यस्तु दद्यात्कन्यां सुरूपिणे । स कृतार्थो भवेल्लोके न चेद्दुष्कृतवान्पिता ॥ ६
चतुर्थाद्वत्सरादूर्ध्वं यावन्न दशमात्ययः । तावद्विवाहः कन्यायाः पित्रा कार्यः प्रयत्नतः ॥ ७
श्रीमते विदुषे यूने कुलीनाय यशस्विने । उदाराय सनाथाय कन्या देया वराय वै ॥ ८
एतच्चेदन्यथा कुर्यात्पिता स निरयी सदा । धर्मस्य साधनं कन्या विदुषामपि भास्कर ॥ ९
नरक[1]स्यैव मूर्खाणां कामोपहतचेतसाम् । एकतः पृथिवी कृत्स्ना सशैलवनकानना ॥ १०
स्वलंकृतोपाधिहीना सुकन्या चैकतः स्मृता । विक्रीणीते यश्च कन्यामश्वं वा गां तिलानपि॥ ११
न तस्य रौरवादिभ्यः कदाचिन्निष्कृतिर्भवेत् । विवाहातिक्रमः कार्यो न कन्यायाः कदाचन १२
तस्मिन्कृते यत्पितुः स्यात्पापं तत्केन कथ्यते। यावल्लज्जां न जानाति यावत्क्रीडति पांशुभिः १३
तावत्कन्या प्रदातव्या नो चेत्पित्रोरधोगतिः । पितुः स्वरूपं पुत्रः स्याद्यः पिता पुत्र एव सः॥
आत्मनः सुखितां लोके को न कुर्यात्करोति च । यत्कन्या[2]यां पिता कुर्याद्दानं पूजनमीक्षणम् ॥
यत्कृतं तत्कृतं विद्यात्तासु दत्तं तदक्षयम् । *यद्दत्तं तासु कन्यासु [3]तदानन्त्याय कल्पते ॥ १६
पुत्रेषु चैव पौत्रेषु को न कुर्यात्सुखं रवे । करोति यः कन्यकानां स संपद्भाजनं भवेत् ॥ १७

ब्रह्मोवाच—

एवं तां वादिनीं कन्यां विष्टिं प्रोवाच भास्करः ॥ १८

सूर्य उवाच—

किं करोमि न गृह्णाति त्वां कश्चिद्भीषणाकृतिम्। कुलं रूपं वयो वित्तं विद्यां वृत्तं सुशीलताम्॥
मिथः पश्यन्ति संबन्धे विवाहे स्त्रीषु पुंसु च । अस्मासु सर्वमप्यस्ति विना तव गुणैः शुभे ॥
किं करोमि क्व दास्यामि वृथा मां धिक्करोषि किम् ॥ २०

ब्रह्मोवाच—

एवमुक्त्वा पुनस्तां च विष्टिं प्रोवाच भास्करः ॥ २१

सूर्य उवाच—

यस्मै कस्मै च दातव्या त्वं वै यद्यनुमन्यसे । दीयसेऽद्य मया विष्टे अनुजानीहि मां ततः ॥ २२

---

* इदमर्धं घ. पुस्तके नास्ति ।

---

१ घ. च. °कस्यैव । २ घ. °न्यार्थे पि° । ङ. °न्यायाः पि° । ३ ङ. तद्दानं कृष्यमुच्यते । च. तद्दानं पुण्यमुच्यते ।

ब्रह्मोवाच—

पितरं प्राह सा विष्टिर्भर्ता पुत्रा धनं सुखम् । आयू रूपं च संप्रीतिर्जायते प्राक्तनानुगम् ॥ २३

यत्पुरा विहितं कर्म प्राणिना साध्वसाधु वा । फलं तदनुरोधेन प्राप्यतेऽपि भवान्तरे ॥ २४

स्वदोष एव तत्पित्रा परिहर्तव्य आदरात् । तादृगेव फलं तु स्याद्यादृगाचरितं पुरा ॥ २५

तस्मात्तद्दानसंबन्धं स्ववंशानुगतं पिता । करोति शेषं दैवेन यद्भाव्यं तद्भविष्यति ॥ २६

ब्रह्मोवाच—

तच्छ्रुत्वा दुहितुर्वाक्यं त्वष्टुः पुत्राय भीषणाम् । विश्वरूपाय तां प्रादाद्विष्टिं लोकभयंकरीम्॥२७

विश्वरूपोऽपि तद्वच्च भीषणो भीषणाकृतिः । एवं मिथः संचरतोः शीलरूपसमानयोः ॥ २८

प्रीतिः कदाचिद्वैषम्यं दंपत्योरभवन्मिथः । गण्डो नामाभवत्पुत्रो ह्यतिगण्डस्तथैव च ॥ २९

रक्ताक्षः[1] क्रोधनश्चैव व्ययो दुर्मुख एव च । तेभ्यः कनीयानभवद्धर्षणो नाम पुण्यभाक् ॥ ३०

सुतः सुशीलः सुभगः शान्तः शुद्धमतिः शुचिः । स कदाचिद्यमगृहं द्रष्टुं मातुलमभ्यगात् ॥ ३१

स ददर्श बहूञ्जन्तून्स्वर्गस्थानिव दुःखिनः । स मातुलं तु पप्रच्छ नत्वा धर्मं सनातनम् ॥ ३२

हर्षण उवाच—

क इमे सुखिनस्तात पच्यन्ते नरके च के ॥ ३३

ब्रह्मोवाच—

एवं पृष्टो धर्मराजः सर्वं प्राह यथार्थवत् । तत्कर्मणां गतिं सर्वामशेषेण न्यवेदयत् ॥ ३४

यम उवाच—

विहितस्य न कुर्वन्ति ये कदाचिदतिक्रमम् । न ते पश्यन्ति निरयं कदाचिदपि मानवाः ॥ ३५

न मानयन्ति ये शास्त्रं नाऽऽचारं न बहुश्रुतान् । विहितातिक्रमं कुर्युर्ये ते नरकगामिनः ॥ ३६

ब्रह्मोवाच—

स तु श्रुत्वा धर्मवाक्यं हर्षणः पुनरब्रवीत् ॥ ३७

हर्षण उवाच—

पिता त्वाष्ट्रो भीषणश्च माता विष्टिश्च भीषणा । भ्रातरश्च महात्मानो येन ते शान्तबुद्धयः ॥३८

सुरूपाश्च भविष्यन्ति निर्दोषा मङ्गलप्रदाः । तन्मे कर्म वदस्वाद्य तत्कर्ताऽस्मि सुरोत्तम ॥ ३९

अन्यथा तान्न गच्छेयमित्युक्तः प्राह धर्मराट् । हर्षणं शुद्धबुद्धिं तं हर्षणोऽसि न संशयः ॥ ४०

*बहवः स्युः सुताः केचिन्नैव ते कुलतन्तवः । एक एव सुतः कश्चिद्येन तद्ध्रियते कुलम्॥ ४१

कुलस्याऽऽधारभूतो यो यः पित्रोः प्रियकारकः । यः पूर्वजानुद्धरति स पुत्रस्त्वितरो गदः॥४२

यस्मात्त्वयाऽनुरूपं मे प्रोक्तं मातामह प्रियम् । तस्मात्त्वं गौतमीं गच्छ स्नात्वा नियतमानसः ४३

स्तुहि विष्णुं जगद्योनिं शान्तं प्रीतेन चेतसा । स तु प्रीतो यदि भवेत्सर्वमिष्टं प्रदास्यति ॥ ४४

ब्रह्मोवाच—

इति श्रुत्वा धर्मवाक्यं हर्षणो गौतमीं ययौ । शुचिस्तुष्टाव देवेशं हरिं प्रीतोऽभवद्धरिः ॥ ४५

हर्षणाय ततः प्रादात्कुलभद्रं ततस्तु सः । सर्वाभद्रप्रशमनपूर्वकं[2] भद्रमस्तु ते ॥ ४६

---

* एतदर्धस्थाने घ. च. पुस्तकयोः 'किमन्यैर्बहुभिः पुत्रैः शोकसंतापकारकैः' इत्यर्धं वर्तते ।

---

१ घ. ङ. च. रक्ताक्षी । २ घ. ङ. च. °णावगतं प्रा° ।

तद्भद्रा मोच्यते विष्टिः पिता भद्रस्तथा सुताः । ततः प्रभृति तत्तीर्थं भद्रतीर्थं तदुच्यते ॥ ४७
सर्वमङ्गलदं पुंसां तत्र भद्रपतिर्हरिः । तत्तीर्थसेविनां पुंसां सर्वसिद्धिप्रदायकम् ॥
मङ्गलैकनिधिः साक्षाद्देवदेवो जनार्दनः ॥ ४८

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये भद्रतीर्थवर्णनं नाम पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

गौतमीमाहात्म्ये षण्णवतितमोऽध्यायः ॥ ९६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८७३९

अथ षट्षष्ट्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

पतत्रितीर्थमाख्यातं रोगघ्नं पापनाशनम् । तस्य श्रवणमात्रेण कृतकृत्यो भवेन्नरः ॥ १
बभूवतुः कश्यपस्य सुतावरुणवीश्वरौ । संपातिश्च जटायुश्च संभवेतां तदन्वये ॥ २
तार्क्ष्यप्रजापतेः पुत्रावरुणो गरुडस्तथा । तदन्वये च संभूतः संपातिः पतगोत्तमः ॥ ३
जटायुरिति विख्यातो ह्यपरः सोदरोऽनुजः । अन्योन्यस्पर्धया युक्तावुन्मत्तौ स्वबलेन तौ ॥ ४
संजग्मतुर्दिनकरं नमस्कर्तुं विहायसि । यावत्सूर्यस्य सामीप्यं प्राप्तौ तौ विहगोत्तमौ ॥ ५
दग्धपक्षावुभौ श्रान्तौ पतितौ गिरिमूर्धनि । बान्धवौ पतितौ दृष्ट्वा निश्चेष्टौ गतचेतसौ ॥ ६
तावद्दुःखाभिभूतोऽसावरुणः प्राह भास्करम् । तौ दृष्ट्वा त्वरुणः सूर्यं प्राहेदं पतितौ भुवि ॥
आश्वासयैतौ तिग्मांशो यावन्नैतौ मरिष्यतः ॥ ७

ब्रह्मोवाच—

तथेत्युक्त्वा दिनकरो जीवयामास तौ खगौ । गरुडोऽपि तयोः श्रुत्वा अवस्थां सह विष्णुना ८
आगत्याऽऽश्वासयामास सुखं चक्रे च नारद । सर्व एव तदा जग्मुर्गङ्गां तापापनुत्तये ॥ ९
जटायुश्चारुणश्चैव संपातिर्गरुडस्तथा । सूर्यो विष्णुस्तत्प्रययौ तत्तीर्थं बहुपुण्यदम् ॥ १०
पतत्रितीर्थमाख्यातं विषघ्नं सर्वकामदम् । स्वयं सूर्यस्तथा विष्णुः सुपर्णेनारुणेन च ॥ ११
आसते गौतमीतीरे तथैव वृषभध्वजः । त्रयाणामपि देवानां स्थितेस्तत्तीर्थमुत्तमम् ॥ १२
तत्र स्नात्वा शुचिर्भूत्वा नमस्कुर्यात्सुरानिमान् । आधिव्याधिविनिर्मुक्तः स परं सौख्यमाप्नुयात्

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये पतत्रितीर्थवर्णनं नाम षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

गौतमीमाहात्म्ये सप्तनवतितमोऽध्यायः ॥ ९७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८७५२

अथ सप्तषष्ट्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

विप्रतीर्थमिति ख्यातं तथा नारायणं विदुः । तस्याऽऽख्यानं प्रवक्ष्यामि शृणु विस्मयकारकम् ॥

अन्तर्वेद्यां द्विजः कश्चिद्ब्राह्मणो वेदपारगः । तस्य पुत्रा[1] महाप्राज्ञा गुणरूपदयान्विताः ॥ २
तेषां कनीयान्यो भ्राता शान्तो गुणगणैर्वृतः । आसन्दिव इति ख्यातः सर्वज्ञानो महामतिः ॥ ३
विवाहाय पिता तस्मा आसन्दिवाय यत्नवान् । एतस्मिन्नन्तरे रात्रौ सुप्तं तं द्विजपुत्रकम् ॥ ४
अविष्णुस्मरणं सौम्यशिरस्कमसमाहितम् । आसन्दिवं क्रूररूपा राक्षसी कामरूपिणी ॥ ५
तमादायागमच्छीघ्रं गौतम्या दक्षिणे तटे । श्रीगिरेरुत्तरे पारे बहुब्राह्मणसेवितम् ॥ ६
नगरं धर्मनिलयं लक्ष्म्या निलयमेव च । तत्र राजा बृहत्कीर्तिः सर्वक्षत्रगुणान्वितः ॥ ७

तस्यामितक्षेमसुभिक्षयुक्तं निशावसाने द्विजपुत्रयुक्ता ।
सा राक्षसी तत्पुरमाससाद मनोज्ञरूपाणि बिभर्ति नित्यम् ॥ ८
सा कामरूपेण चरत्यशेषां महीमिमां तेन समं द्विजेन ।
गोदावरीदक्षिणतीरभागे वृद्धाकृतिस्तं द्विजमाह भीमा ॥ ९

राक्षस्युवाच—

एषा तु गङ्गा द्विजमुख्य संध्या उपास्यतां विप्रवरैः समेत्य ।
यथोचितं विप्रवरास्तु काले नोपासते यत्नत एव संध्याम् ॥ १०
नीचास्त एवाभिहिताः सुरेशैरन्त्यावसायिप्रवरास्त एते ।
अहं जनित्री तव चेति वाच्यं नो चेदिदानीं त्वमुपैषि नाशम् ॥ ११
मद्वाक्यकर्ताऽसि यदि द्विजेन्द्र सुखं करिष्ये तव यत्प्रियं च ।
पुनश्च देशं निलयं गुरूंश्च संप्रापयिष्ये ननु सत्यमेतत् ॥ १२

ब्रह्मोवाच—

स प्राह का त्वं द्विजपुंगवोऽपि सोवाच तं राक्षसी कामरूपा ।
विश्वासयन्ती शपथैरनेकैस्तं भ्रान्तचित्तं मुनिराजपुत्रम् ॥ १३
कङ्कालिनी नाम जगत्प्रसिद्धा विप्रोऽपि तामाह निवेदितं यत् ।
तदेव कर्ताऽस्मि न संशयोऽत्र यत्तत्प्रियं वच्मि करोमि चैव ॥ १४

ब्रह्मोवाच—

तद्विप्रवचनं श्रुत्वा राक्षसी कामरूपिणी । वृद्धा तथाऽपि चार्वङ्गी दिव्यालंकारभूषणा ॥ १५
द्विजमादाय सर्वत्र मत्सुतोऽयं गुणाकरः । एवं वदन्ती सर्वत्र याति वक्ति करोति च ॥ १६
तं विप्रं रूपसौभाग्यवयोविद्याविभूषितम् । तां च वृद्धां गुणोपेतामस्य मातेति मेनिरे ॥ १७
तत्र द्विजवरः कश्चित्स्वां कन्यां भूषणान्विताम् । राक्षसीं तां पुरस्कृत्य प्रादात्तस्मै द्विजातये ॥
सा कन्या तं पतिं प्राप्य कृतार्थाऽस्मीत्यचिन्तयत् । स द्विजोऽपि गुणैर्युक्तां पत्नीं दृष्ट्वा सुदुःखितः

द्विज उवाच—

मामियं भक्षयेदेव राक्षसी पापरूपिणी । किं करोमि क्व गच्छामि कस्यैतत्कथयामि वा ॥ २०
महत्संकटमापन्नं रक्षयिष्यति कोऽत्र माम् । भार्या ममेयं कल्याणी गुणरूपवयोयुता ॥
एनामप्यशुभाऽकस्माद्भक्षयिष्यति राक्षसी ॥ २१

ब्रह्मोवाच—

एतस्मिन्नन्तरे तत्र भार्या सा गुणशालिनी । वृद्धाऽप्यतिदुराधर्षा सा गता कुत्रचित्तदा ॥ २२

---

1 च. पादे ।

प्रश्रयावनता भूत्वा बाला चापि पतिव्रता । भर्तारं दुःखितं ज्ञात्वा पतिं प्राह रहः शनैः ॥२३

भार्योवाच—

कस्मात्ते दुःखमापन्नं स्वामिंस्तत्त्वं वदस्व मे ॥ २४

ब्रह्मोवाच—

शनैः प्रोवाच तां भार्यां यथावत्पूर्वविस्तरम् । किमकथ्यं प्रिये मित्रे कुलीनायां च योषिति २५

भर्तृवाक्यं निशम्येदं प्रोवाच वदतां वरा ॥ २६

भार्योवाच—

अनात्मनः सर्वतोऽपि भयमस्ति गृहेष्वपि । कुतो भयं ह्यात्मवतां किं पुनर्गौतमीतटे ॥ २७

वसतां विष्णुभक्तानां विरक्तानां विवेकिनाम् । अत्र स्नात्वा शुचिर्भूत्वा स्तुहि देवमनामयम्२८

ब्रह्मोवाच—

एतदाकर्ण्य गङ्गायां स्नात्वा विगतकल्मषः । तुष्टाव गौतमीतीरे द्विजो नारायणं तथा ॥ २९

द्विज उवाच—

त्वमन्तरात्मा जगतोऽस्य नाथ त्वमेव कर्ताऽस्य मुकुन्द हर्ता ।
त्वं पालकः पालयसे न दीनमनाथबन्धो नरसिंह कस्मात् ॥ ३०

श्रुत्वैतत्प्रार्थनं तस्य जगच्छोकनिवारणः । नारायणोऽपि तां पापां निजघान स राक्षसीम् ॥

सुदर्शनेन चक्रेण सहस्रारेण भास्वता । तस्मै प्रादाद्वरानिष्टान्प्रापयच्च गुरुं प्रभुः ॥ ३२

ततः प्रभृति तत्तीर्थं विप्रं नारायणं विदुः । स्नानदानेन पूजाद्यैर्यत्र सिध्यति वाञ्छितम् ॥ ३३

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये विप्रनारायणतीर्थवर्णनं नाम सप्तषष्ठ्यधिकशततमोऽध्यायः ॥ १६७ ॥

गौतमीमाहात्म्येऽष्टनवतितमोऽध्यायः ॥ ९८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८७८९

अथाष्टषष्ठ्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

भानुतीर्थमिति ख्यातं त्वाष्ट्रं माहेश्वरं तथा । ऐन्द्रं याम्यं तथाऽऽग्नेयं सर्वपापप्रणाशनम् ॥ १

अभिष्टुत इति ख्यातो राजाऽऽसीत्प्रियदर्शनः । हयमेधेन पुण्येन यष्टुमारब्धवान्सुरान् ॥ २

तत्रर्त्विजः षोडश स्युर्वसिष्ठात्रिपुरोगमाः । क्षत्रिये यजमाने तु यज्ञभूमिः कथं भवेत् ॥ ३

ब्राह्मणे दीक्षिते राजा भुवं दास्यति यज्ञियाम् । भूपतौ दीक्षिते दाता को भवेत्को नु याचते ॥

याच्ञेयमखिलाशर्मजननी पापरूपिणी । केनाप्यतो न कार्यैव क्षत्रियेण विशेषतः ॥ ५

एवं मीमांसमानेषु ब्राह्मणेषु परस्परम् । तत्र प्राह महाप्राज्ञो वसिष्ठो धर्मवित्तमः ॥ ६

वसिष्ठ उवाच—

राज्ञि दीक्षायमाणे तु सूर्यो याच्यो भुवं प्रति । देहि मे देव सवितर्यजनं देवतोचितम् ॥ ७

---

१ ङ. °गदेकपरायणः । घ. च. °गदेकपरायणम् । ना° । २ घ. च. °न्प्राहिणोच्च ।

दैवं क्षत्रमसि ब्रह्मन्भूतनाथ नमोऽस्तु ते । याचितः सविता राज्ञा देवानां यजनं शुभम् ॥ ८
ददात्येव ततो राजन्प्रार्थयेशं दिवाकरम् ॥ ९

ब्रह्मोवाच—

तथेत्युक्त्वाऽभिष्टुतोऽपि देवदेवं दिवाकरम् । श्रद्धया प्रार्थयामास हरीशाजात्मकं रविम् ॥ १०

राजोवाच—

देवानां यजनं देहि सवितस्ते नमोऽस्तु ते ॥ ११

ब्रह्मोवाच—

क्षत्रं दैवं यतः सूर्यो दत्ता भूर्भूपतेस्ततः । सविता देवदेवेशो ददामीत्यभ्यभाषत ॥ १२
एवं करोति यो यज्ञं तस्य रिष्टिर्न काचन । तथा वाजिमखे सत्रे ब्राह्मणैर्वेदपारगैः ॥ १३
प्रारब्धेऽभिष्टुता राज्ञा यत्रागाद्भूपतिं रविः । देवानां यजनं दातुं भानुतीर्थं तदुच्यते ॥ १४
तं देवक्रतुमुत्कृष्टं हयमेधं सुरैर्युतम् । दैत्याश्च दनुजाश्चैव तथाऽन्ये यज्ञघातकाः ॥ १५
ब्रह्मवेषधराः सर्वे गायन्तः सामगा इव । तेऽपि तत्र महाप्राज्ञाः प्राविशन्ननिवारिताः ॥ १६
चमसानि च पात्राणि सोमं चषालमेव च । सोमपानं हविस्त्यागमृत्विजो भूपतिं तथा ॥ १७
निन्दन्ति निक्षिपन्त्यन्ये हसन्त्यन्ये तथाऽसुराः । तेषां चेष्टां न जानन्ति विश्वरूपं विना मुने ॥
विश्वरूपोऽपि पितरं प्राह दैत्या इमे इति । तत्पुत्रवचनं श्रुत्वा त्वष्टा प्राह सुरानिदम् ॥ १९

त्वष्टोवाच—

गृहीत्वा वारिदर्भांश्च प्रोक्षयध्वं समन्ततः । ये निन्दन्ति मखं पुण्यं चमसं सोममेव च ॥ २०
मया त्वपहताः सर्व इत्युक्त्वा परिषिञ्चत ॥ २१

ब्रह्मोवाच—

तथा चक्रुः सुरगणास्त्वष्टा चापि तथाऽकरोत् । भस्मीभूतास्ततः सर्वे कांदिशीकास्ततोऽभवन् ॥
हता मया महापापा इत्युक्त्वा वार्यवाक्षिपत् । ततः क्षीणायुषो दैत्याः प्रातिष्ठन्कुपितास्ततः ॥ २३
यत्रैतत्प्राक्षिपद्वारि त्वष्टा लोकप्रजापतिः । त्वाष्ट्रं तीर्थं तदाख्यातं सर्वपापप्रणाशनम् ॥ २४
त्वष्टुर्वाक्याच्च्युतान्दैत्यान्निजघान यमस्तदा । कालदण्डेन चक्रेण कालपाशेन मन्युना[1] ॥ २५
यत्र ते निहता दैत्यास्तत्तीर्थं याम्यमुच्यते । यत्राभवत्क्रतुः पूर्णो हुत्वाऽग्नौ चामृतं बहु ॥ २६
धाराभिः शरमानाभिरखण्डाभिर्महाध्वरे । यत्राभवद्धव्यवाहस्तृप्तस्तस्य ह्यभिष्टुतः ॥ २७
अग्नितीर्थं तदाख्यातमश्वमेधफलप्रदम् । इन्द्रो मरुद्भिर्नृपतिं प्राहेदं वचनं शुभम् ॥ २८
त्वं संम्राड्भविता राजन्नुभयोरपि लोकयोः । सखा मम प्रियो नित्यं भविता नात्र संशयः २९
स कृतार्थो मर्त्यलोक इन्द्रतीर्थे च तर्पणम् । कुर्यात्पितॄणां प्रीत्यर्थं यमतीर्थे विशेषतः ॥ ३०
माहेश्वरं तु तत्तीर्थं पूजितोऽभिष्टुतः शिवः । भक्तियुक्तेन विप्रैश्च सर्वकर्मविशारदैः ॥ ३१
वैदिकैर्लौकिकैश्चैव मन्त्रैः पूज्यं महेश्वरम् । नृत्यैर्गीतैस्तथा वाद्यैरमृतैः पञ्चसंभवैः ॥ ३२
उपचारैश्च बहुभिर्दण्डपातप्रदक्षिणैः । धूपैर्दीपैश्च नैवेद्यैः पुष्पैर्गन्धैः सुगन्धिभिः ॥ ३३
पूजयामास देवेशं विष्णुं शंभुं धियैकया । ततः प्रसन्नौ देवेशौ वरान्ददतुरोजसा ॥ ३४
अभिष्टुते नरेन्द्राय भुक्तिमुक्ती उभे अपि । माहात्म्यमस्य तीर्थस्य तथा ददतुरुत्तमम् ॥ ३५

---

१ ङ. मृत्युना ।

ततःप्रभृति तत्तीर्थं शैवं वैष्णवमुच्यते । तत्र स्नानं च दानं च सर्वकामप्रदं विदुः ॥ ३६
इमानि सर्वतीर्थानि स्मरेदपि पठेत वा । विमुक्तः सर्वपापेभ्यः शिवविष्णुपुरं व्रजेत् ॥ ३७
भानुतीर्थे विशेषेण स्नानं सर्वार्थसिद्धिदम् । तत्र तीर्थे महापुण्यं तीर्थानां शतमत्र हि ॥ ३८

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये भान्वादिशततीर्थवर्णनं
नामाष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥
गौतमीमाहात्म्ये नवनवतितमोऽध्यायः ॥ ९९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८८२३

अथैकोनसप्तत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

भिल्लतीर्थमिति ख्यातं रोगघ्नं पापनाशनम् । महादेवपदाम्भोजयुगभक्तिप्रदायकम् ॥ १
तत्राप्येवंविधां पुण्यां कथां शृणु महामते । गङ्गाया दक्षिणे तीरे श्रीगिरेरुत्तरे तटे ॥ २
आदिकेश इति ख्यात ऋषिभिः परिपूजितः । महादेवो लिङ्गरूपी सदाऽऽस्ते सर्वकामदः ॥ ३
सिन्धुद्वीप इति ख्यातो मुनिः परमधार्मिकः । तस्य भ्राता वेद इति स चापि परमो ऋषिः ॥४
तमादिकेशं वै देवं त्रिपुरारिं त्रिलोचनम् । नित्यं पूजयते भक्त्या प्राप्ते मध्यंदिने रवौ ॥ ५
भिक्षाटनाय वेदोऽपि याति ग्रामं विचक्षणः । याते तस्मिन्द्विजवरे व्याधः परमधार्मिकः ॥ ६
तस्मिन्गिरिवरे पुण्ये मृगयां याति नित्यशः । अटित्वा विविधान्देशान्मृगान्हत्वा यथासुखम्॥७
+मुखे गृहीत्वा पानीयमभिषेकाय शूलिनः । न्यस्य मांसं धनुष्कोट्यां श्रान्तो व्याधः शिवं प्रभुम्
आदिकेशं समागत्य न्यस्य मांसं ततो बहिः । गङ्गां गत्वा मुखे वारि गृहीत्वाऽऽगत्य तं शिवम्
यस्य कस्यापि पत्राणि करेणाऽऽदाय भक्तितः । अपरेण च मांसानि नैवेद्यार्थं च तन्मनाः १०
आदिकेशं समागत्य वेदेनार्चितमोजसा । पादेनाऽऽहत्य तां पूजां मुखानीतेन वारिणा ॥ ११
स्नापयित्वा शिवं देवमर्चयित्वा तु पत्रकैः। कल्पयित्वा तु(समर्पयति) तन्मांसं शिवो मे प्रीयतामिति
नैव किंचित्स जानाति शिवभक्तिं विना शुभाम् । ततो याति स्वकं स्थानं मांसेन तु यथागतम्
करोत्येतादृगागत्याऽऽगत्य प्रत्यहमेव सः । तथाऽपीशस्तुतोषास्य विचित्रा हीश्वरस्थितिः॥ १४
यावन्नायात्यसौ भिल्लः शिवस्तावन्न सौख्यभाक् । भक्तानुकम्पितां शंभोर्मानातीतां तु वेत्ति कः
संपूजयत्यादिकेशमुमया प्रत्यहं शिवम् । एवं बहुतिथे काले याते वेदश्चुकोप ह ॥ १६
पूजां मन्त्रवतीं चित्रां शिवभक्तिसमन्विताम् । को नु विध्वंसते पापो मत्तः स वधमाप्नुयात् १७
गुरुदेवद्विजस्वामिद्रोही वध्यो मुनेरपि । सर्वस्यापि वधार्होऽसौ शिवस्य द्रोहकृन्नरः॥ १८
एवं निश्चित्य मेधावी वेदः सिन्धोस्तथाऽनुजः । कस्येयं पापचेष्टा स्यात्पापिष्ठस्य दुरात्मनः १९
पुष्पैर्वन्यभवैर्दिव्यैः कन्दैर्मूलफलैः शुभैः । कृतां पूजां स विध्वस्य ह्यन्यां पूजां करोति यः ॥२०
मांसेन तरुपत्रैश्च स च वध्यो भवेन्मम । एवं संचिन्त्य मेधावी गोपयित्वा तनुं तदा ॥ २१
तं पश्येयमहं पापं पूजाकर्तारमीश्वरे । एतस्मिन्नन्तरे प्रायाद्व्याधो देवं यथा पुरा॥ २२
नित्यवत्पूजयन्तं तमादिकेशस्तदाऽब्रवीत् ॥ २३

\+ इदमर्धमधिकम् ।

आदिकेश उवाच—

भो भो व्याध महाबुद्धे श्रान्तोऽसीति पुनः पुनः । चिराय कथमायातस्त्वां विना तात दुःखितः
न विन्दामि सुखं किंचित्समाश्वसिहि पुत्रक ॥ २४

ब्रह्मोवाच—

तमेवंवादिनं देवं वेदः श्रुत्वा विलोक्य तु । चुकोप विस्मयाविष्टो न च किंचिदुवाच ह ॥ २५
व्याधश्च नित्यवत्पूजां कृत्वा स्वभवनं ययौ । वेदश्च कुपितो भूत्वा आगत्येशमुवाच ह ॥ २६

वेद उवाच—

अयं व्याधः पापरतः क्रियाज्ञानविवर्जितः । प्राणिहिंसारतः क्रूरो निर्दयः सर्वजन्तुषु ॥ २७
हीनजातिरकिंचिज्ज्ञो गुरुक्रमविवर्जितः । सदाऽनुचितकारी चानिर्जिताखिलगोगणः ॥ २८
तस्याऽऽत्मानं दर्शितवान्न मां किंचन वक्ष्यसि । पूजां मन्त्रविधानेन करोमीश यतव्रतः ॥ २९
त्वदेकशरणो नित्यं भार्यापुत्रविवर्जितः । व्याधो मांसेन दुष्टेन पूजां तत्र करोत्यसौ ॥ ३०
तस्य प्रसन्नो भगवान्न ममेति महाद्भुतम् । शास्तिमस्य करिष्यामि भिल्लस्य ह्यपकारिणः ॥ ३१
मृदोः कोऽपि भवेत्प्रीतः कोऽपि तद्वद्दुरात्मनः । तस्मादहं मूर्ध्नि शिलां पातयेयमसंशयम् ॥ ३२

ब्रह्मोवाच—

इत्युक्तवति वै वेदे विहस्येशोऽब्रवीदिदम् । ३३

आदिकेश उवाच—

श्वः प्रतीक्षस्व पश्चान्मे शिलां पातय मूर्धनि ॥ ३४

ब्रह्मोवाच—

तथेत्युक्त्वा स वेदोऽपि शिलां संत्यज्य बाहुना । उपसंहृत्य तं कोपं श्वः करोमीत्युवाच ह ३५
ततः प्रातः समागत्य कृत्वा स्नानादिकर्म च । वेदोऽपि नित्यवत्पूजां कुर्वन्पश्यति मस्तके ॥ ३६
लिङ्गस्य सव्रणां भीमां धारां च रुधिरप्लुताम् । वेदः स विस्मितो भूत्वा किमिदं लिङ्गमूर्धनि ३७
महोत्पातो भवेत्कस्य सूचयेदित्यचिन्तयत् । मृद्भिश्च गोमयेनापि कुशैस्तं गाङ्गवारिभिः ॥ ३८
प्रक्षालयित्वा तां पूजां कृतवान्नित्यवत्तदा । एतस्मिन्नन्तरे प्रायाद्व्याधो विगतकल्मषः ॥ ३९
मूर्धानं व्रणसंयुक्तं सरक्तं लिङ्गमस्तके । शंकरस्याऽऽदिकेशस्य ददर्शेऽन्तर्गतस्तदा ॥ ४०
दृष्ट्वैव किमिदं चित्रमित्युक्त्वा निशितैः शरैः । आत्मानं भेदयामास शतधा च सहस्रधा ॥ ४१
स्वामिनो वैकृतं दृष्ट्वा कः क्षमेतोत्तमाशयः । मुहुर्निनिन्द चाऽऽत्मानं मयि जीवत्यभूदिदम्॥४२
कष्टमापतितं कीदृगहो दुर्विधिवैशसात्[1] । तत्कर्म तस्य संवीक्ष्य महादेवोऽतिविस्मितः ॥
ततः प्रोवाच भगवान्वेदं वेदविदां वरम् ॥ ४३

आदिकेश उवाच—

पश्य व्याधं महाबुद्धे भक्तं भावेन संयुतम् । त्वं तु मृद्भिः कुशैर्वार्भिर्मूर्धानं स्पृष्टवानसि ॥ ४४
अनेन सहसा ब्रह्मन्ममाऽऽत्माऽपि निवेदितः । भक्तिः प्रेमाथवा शक्तिर्विचारो यत्र विद्यते ॥
तस्मादस्मै वरान्दास्ये पश्चात्तुभ्यं द्विजोत्तम ॥ ४५

ब्रह्मोवाच—

वरेण च्छन्दयामास व्याधं देवो महेश्वरः । व्याधः प्रोवाच देवेशं निर्माल्यं तत्र यद्भवेत् ॥ ४६

---

१ घ. च. °त् । निश्चयं तस्य तं वी° ।

तदस्माकं भवेन्नाथ मन्नाम्ना तीर्थमुच्यताम् । सर्वक्रतुफलं तीर्थे स्मरणादेव जायताम् ॥ ४७
ब्रह्मोवाच—
तथेत्युवाच देवेशस्ततस्तत्तीर्थमुत्तमम् । भिल्लतीर्थं समस्ताघसंघविच्छेदकारणम् ॥ ४८
श्रीमहादेवचरणमहाभक्तिविधायकम् । अभवत्स्नानदानाद्यैर्भुक्तिमुक्तिप्रदायकम् ॥
वेदस्यापि वरान्प्रादाच्छिवो नानाविधान्बहून् ॥ ४९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये भिल्लतीर्थमहिमवर्णनं नामैकोनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

गौतमीमाहात्म्ये शततमोऽध्यायः ॥ १०० ॥

आदितः श्लोकानां समष्ट्यङ्काः—८८७२

अथ सप्तत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—
चक्षुस्तीर्थमिति ख्यातं रूपसौभाग्यदायकम् । यत्र योगेश्वरो देवो गौतम्या दक्षिणे तटे ॥ १
पुरं भौवनमाख्यातं गिरिमूर्ध्न्यभिधीयते । यत्रासौ भौवनो राजा क्षत्रधर्मपरायणः ॥ २
तस्मिन्पुरवरे कश्चिद्ब्राह्मणो वृद्धकौशिकः । तत्पुत्रो गौतम इति ख्यातो वेदविदुत्तमः ॥ ३
तस्य मातुर्मनोदोषाद्विपरीतोऽभवद्द्विजः । सखा तस्य वणिक्कश्चिन्मणिकुण्डल उच्यते ॥ ४
तेन सख्यं द्विजस्याऽऽसीद्विषमं द्विजवैश्ययोः । श्रीमदरिद्रयोर्नित्यं परस्परहितैषिणोः ॥ ५
कदाचिद्गौतमो वैश्यं वित्तेशं मणिकुण्डलम् । प्राहेदं वचनं प्रीत्या रहः स्थित्वा पुनः पुनः ॥ ६
गौतम उवाच—
गच्छामो धनमादातुं पर्वतानुदधीनपि । यौवनं तद्वृथा ज्ञेयं विना सौख्यानुकूल्यतः[1] ॥
धनं विना तत्कथं स्यादहो धिङ्निर्धनं नरम् ॥ ७
ब्रह्मोवाच—
कुण्डलो द्विजमाहेदं मत्पित्रोपार्जितं धनम् । बह्वस्ति किं धनेनाद्य करिष्ये द्विजसत्तम ॥
द्विजः पुनरुवाचेदं मणिकुण्डलमोजसा ॥ ८
गौतम उवाच—
धर्मार्थज्ञानकामानां को नु तृप्तः प्रशस्यते[2] । उत्कर्षप्राप्तिरेवैषां[3] सखे श्लाघ्या शरीरिणाम् ॥ ९
स्वेनैव व्यवसायेन धन्या जीवन्ति जन्तवः । परदत्तार्थसंतुष्टाः कष्टजीविन एव ते ॥ १०
स पुत्रः शस्यते लोके पितृभिश्चाभिनन्द्यते । यः पैत्र्यमभिलिप्सेत न वाचाऽपि तु कुण्डल ॥ ११
स्वबाहुबलमाश्रित्य योऽर्थानर्जयते सुतः । स कृतार्थो भवेल्लोके पैत्र्यं वित्तं न तु स्पृशेत् ॥ १२
स्वयमार्ज्य सुतो वित्तं पित्रे दास्यति बन्धवे । तं तु पुत्रं विजानीयादितरो योनिकीटकः ॥ १३
ब्रह्मोवाच—
एतच्छ्रुत्वा तु तद्वाक्यं ब्राह्मणस्याभिलाषिणः । तथेति मत्वा तद्वाक्यं रत्नान्यादाय सत्वरः १४

---

१ घ. च. सौख्यं कुतः कुलम् ॥ ध° । २ घ. च. प्रदृश्यते । ३ क. ङ. °वैषा स° ।

आत्मकीयानि वित्तानि गौतमाय न्यवेदयत् । धनेनैतेन देशांश्च परिभ्रम्य यथासुखम् ॥ १५
धनान्यादाय वित्तानि पुनरेष्यामहे गृहम् । सत्यमेव वणिग्वक्ति स तु विप्रः प्रतारकः ॥ १६
पापात्मा पापचित्तं च न बुबोध वणिग्द्विजम् । तौ परस्परमामन्त्र्य माता पित्रोरजानतोः ॥ १७
देशाद्देशान्तरं यातौ धनार्थं तौ वणिग्द्विजौ । वणिग्घस्तस्थितं वित्तं ब्राह्मणो हर्तुमिच्छति १८

ब्राह्मण उवाच—

येन केनाप्युपायेन तद्धनं हि समाहरे । अहो पृथिव्यां रम्याणि नगराणि सहस्रशः ॥ १९
इष्टमदाढ्यः कामस्य देवता इव योषितः । मनोहरास्तत्र तत्र सन्ति किं क्रियते मया ॥ २०
धनमाहृत्य यत्नेन योषिद्भ्यो यदि दीयते । भुज्यन्ते तास्ततो नित्यं सफलं जीवितं हि तत् ॥
नृत्यगीतरतो नित्यं पण्यस्त्रीभिरलंकृतः । भोक्ष्ये कथं तु तद्वित्तं वैश्यान्मद्धस्तमागतम् ॥ २२

ब्रह्मोवाच—

एवं चिन्तयमानोऽसौ गौतमः प्रहसन्निव । मणिकुण्डलमाहेदमधर्मादेव जन्तवः ॥ २३
वृद्धिं सुखमभीष्टानि प्राप्नुवन्ति न संशयः । धर्मिष्ठाः प्राणिनो लोके दृश्यन्ते दुःखभागिनः २४
तस्माद्धर्मेण किं तेन दुःखैकफलहेतुना ॥ २५

ब्रह्मोवाच—

नेत्युवाच ततो वैश्यः सुखं धर्मे प्रतिष्ठितम् । पापे दुःखं भयं शोको दारिद्र्यं क्लेश एव च ॥
यतो धर्मस्ततो मुक्तिः स्वधर्मः किं विनश्यति ॥ २६

ब्रह्मोवाच—

एवं विवदतोस्तत्र संपरायस्तयोरभूत् । यस्य पक्षो भवेज्ज्यायान्स परार्थमवाप्नुयात् ॥ २७
पृच्छावः कस्य प्राबल्यं धर्मिणो वाऽप्यधर्मिणः । वेदात्तु लौकिकं ज्येष्ठं लोके धर्मात्सुखं भवेत्॥
एवं विवदमानौ तावूचतुः सकलाञ्जनान् । धर्मस्य वाऽप्यधर्मस्य प्राबल्यमनयोर्भुवि ॥ २९
तद्वदन्तु यथावृत्तमेवमूचतुरोजसा । एवं तत्रोचिरे केचिद्ये धर्मेणानुवर्तिनः ॥ ३०
तैर्दुःखमनुभूयते पापिष्ठाः सुखिनो जनाः । संपराये धनं सर्वं जितं विप्रे न्यवेदयत् ॥ ३१
मणिमान्धर्मविच्छ्रेष्ठः पुनर्धर्मं प्रशंसति । मणिमन्तं द्विजः प्राह किं धर्ममनुशंससि ॥

ब्रह्मोवाच—

तथेति चेत्याह वैश्यो ब्राह्मणः पुनरब्रवीत् ॥ ३२

ब्राह्मण उवाच—

जितं मया धनं वैश्य निर्लज्जः किंनु भाषसे । मयैव विजितो धर्मो यथेष्टचरणात्मना ॥ ३३

ब्रह्मोवाच—

तद्ब्राह्मणवचः श्रुत्वा वैश्यः सस्मित ऊचिवान् ॥ ३४

वैश्य उवाच—

पुलाका इव धान्येषु पुत्तिका इव पक्षिषु । तथैव तान्सखे मन्ये येषां धर्मो न विद्यते ॥ ३५
चतुर्णां पुरुषार्थानां धर्मः प्रथम उच्यते । पश्चादर्थश्च कामश्च स धर्मो मयि तिष्ठति ॥
कथं ब्रूषे द्विजश्रेष्ठ मया विजितमित्यदः ॥ ३६

---

१ घ. च. °ष्यावहे । २ घ. च. रत्नानि रम्याणि च सहस्रशः । नगराणि च रम्याणि गुणयुक्तानि सर्वशः । इ° ।
३ घ. °मनुष्य° ।

ब्रह्मोवाच—

द्विजो वैश्यं पुनः प्राह हस्ताभ्यां जायतां पणः । तथेति मन्यते वैश्यस्तौ गत्वा पुनरूचतुः ॥ ३७

पूर्ववल्लौकिकान्गत्वा जितमित्यब्रवीद्द्विजः । करौ छित्वा ततः प्राह कथं धर्मं तु मन्यसे ॥

आक्षिप्तो ब्राह्मणेनैवं वैश्यो वचनमब्रवीत् ॥ ३८

वैश्य उवाच—

धर्ममेव परं मन्ये प्राणैः कण्ठगतैरपि । माता पिता सुहृद्बन्धुर्धर्म एव शरीरिणाम् ॥ ३९

ब्रह्मोवाच—

एवं विवदमानौ तावर्थवान्ब्राह्मणोऽभवत् । विमुक्तो वैश्यकस्तत्र बाहुभ्यां च धनेन च ॥ ४०

एवं भ्रमन्तौ संप्राप्तौ गङ्गां योगेश्वरं हरिम् । यदृच्छया मुनिश्रेष्ठ मिथस्तावूचतुः पुनः ॥ ४१

वैश्यो गङ्गां तु योगेशं धर्ममेव प्रशंसति । अतिकोपाद्द्विजो वैश्यमाक्षिपन्पुनरब्रवीत् ॥ ४२

ब्राह्मण उवाच—

गतं धनं करौ छिन्नाववशिष्टोऽसुभिर्भवान् । त्वमन्यथा यदि ब्रूष आहरिष्येऽसिना शिरः ॥ ४३

ब्रह्मोवाच—

विहस्य पुनराहेदं वैश्यो गौतममञ्जसा ॥ ४४

वैश्य उवाच—

धर्ममेव परं मन्ये यथेच्छसि तथा कुरु । ब्राह्मणांश्च गुरून्देवान्वेदान्धर्मं जनार्दनम् ॥ ४५

यस्तु निन्दयते पापो नासौ स्पृश्योऽथ पापकृत् । उपेक्षणीयो दुर्वृत्तः पापात्मा धर्मदूषकः ॥ ४६

ब्रह्मोवाच—

ततः प्राह स कोपेन धर्मं यद्यनुशंससि । आवयोः प्राणयोरत्र पणः स्यादिति वै मुने ॥ ४७

एवमुक्ते गौतमेन तथेत्याह वणिक्तदा । पुनरप्यूचतुरुभौ लोकाल्लौकास्तथोचिरे ॥ ४८

योगेश्वरस्य पुरतो गौतम्या दक्षिणे तटे । तं निपात्य विशं विप्रश्चक्षुरुत्पाट्य चाब्रवीत् ॥ ४९

विप्र उवाच—

गतोऽसीमां दशां वैश्य नित्यं धर्मप्रशंसया । गतं धनं गतं चक्षुश्छेदितौ करपल्लवौ ॥

पृष्टोऽसि मित्र गच्छामि मैवं ब्रूयाः कथान्तरे ॥ ५०

ब्रह्मोवाच—

तस्मिन्प्रयाते वैश्योऽसौ चिन्तयामास चेतसि । हा कष्टं मे किमभवद्धर्मैकमनसो हरे ॥ ५१

स कुण्डलो वणिक्श्रेष्ठो निर्धनो गतबाहुकः । गतनेत्रः[1] शुचं प्राप्तो धर्ममेवानुसंस्मरन् ॥ ५२

एवं बहुविधां चिन्तां कुर्वन्नास्ते महीतले । निश्चेष्टोऽथ निरुत्साहः पतितः शोकसागरे ॥ ५३

दिनावसाने शर्वर्यामुदिते चन्द्रमण्डले । एकादश्यां शुक्लपक्षे तत्राऽऽयाति विभीषणः ॥ ५४

स तु योगेश्वरं देवं पूजयित्वा यथाविधि । स्नात्वा तु गौतमीं गङ्गां सपुत्रो राक्षसैर्वृतः ॥ ५५

विभीषणस्य हि सुतो विभीषण इवापरः । वैभीषणिरिति ख्यातस्तमपश्यदुवाच ह ॥ ५६

वैश्यस्य वचनं श्रुत्वा यथावृत्तं स धर्मवित् । पित्रे निवेदयामास लङ्केशाय महात्मने ॥

स तु लङ्केश्वरः प्राह पुत्रं प्रीत्या गुणाकरम् ॥ ५७

---

१ घ. ङ. च. °नेत्रो भुवं प्रा° ।

विभीषण उवाच—

श्रीमान्रामो मम गुरुस्तस्य मान्यः सखा मम । हनुमानिति विख्यातस्तेनाऽऽनीतो गिरिर्महान् ॥
पुरा कार्यान्तरे प्राप्ते सर्वौषध्याश्रयोऽचलः । जाते कार्ये तमादाय हिमवन्तमथागमत् ॥ ५९
विशल्यकरणी चेति मृतसंजीवनीति च । तदाऽऽनीय महाबुद्धी रामायाक्लिष्टकर्मणे ॥ ६०
निवेदयित्वा तत्साध्यं तस्मिन्वृत्ते समागतः । पुनर्गिरिं समादाय आगच्छद्देवपर्वतम् ॥ ६१
तामानीयास्य हृदये निवेशय हरिं स्मरन् । ततः प्राप्स्यत्ययं सर्वमपेक्षितमुदारधीः ॥ ६२
गच्छतस्तस्य वेगेन विशल्यकरणी पुनः । अपतद्गौतमीतीरे यत्र योगेश्वरो हरिः ॥ ६३

वैभीषणिरुवाच—

तामोषधीं मम पितर्दर्शयाऽऽशु विलम्ब मा । परार्तिशमनादन्यच्छ्रेयो न भुवनत्रये ॥ ६४

ब्रह्मोवाच—

विभीषणस्तथेत्युक्त्वा तां पुत्रस्याप्यदर्शयत् । इषे त्वेत्यस्य वृक्षस्य शाखां चिच्छेद तत्सुतः ॥
वैश्यस्य चापि वै प्रीत्या सन्तः परहिते रताः ॥ ६५

विभीषण उवाच—

यत्रापतन्नगे चास्मिन्स वृक्षस्तु प्रतापवान् । तस्य शाखां समादाय हृदयेऽस्य निवेशय ॥
तत्स्पृष्टमात्र एवासौ स्वकं रूपमवाप्नुयात् ॥ ६६

ब्रह्मोवाच—

एतच्छ्रुत्वा पितुर्वाक्यं वैभीषणिरुदारधीः । तथा चकार वै सम्यक्काष्ठखण्डं न्यवेशयत् ॥ ६७
हृदये स तु वैश्योऽपि सचक्षुः सकरोऽभवत् । मणिमन्त्रौषधीनां हि वीर्यं कोऽपि न बुध्यते॥६८
तदेव काष्ठमादाय धर्ममेवानुसंस्मरन् । स्नात्वा तु गौतमीं गङ्गां तथा योगेश्वरं हरिम् ॥ ६९
नमस्कृत्वा पुनरगात्काष्ठखण्डेन वैश्यकः । परिभ्रमन्नृपपुरं महापुरमिति श्रुतम् ॥ ७०
महाराज इति ख्यातस्तत्र राजा महाबलः । तस्य नास्ति सुतः कश्चित्पुत्रिका नष्टलोचना ॥
सैव तस्य सुता पुत्रस्तस्यापि व्रतमीदृशम् । देवो वा दानवो वाऽपि ब्राह्मणः क्षत्रियो भवेत् ॥
वैश्यो वा शूद्रयोनिर्वा सगुणो निर्गुणोऽपि वा । तस्मै देया इयं पुत्री यो नेत्रे आहरिष्यति ७३
राज्येन सह देयेयमिति राजा ह्यघोषयत् । अहर्निशमसौ वैश्यः श्रुत्वा घोषमथाब्रवीत् ॥ ७४

वैश्य उवाच—

अहं नेत्रे आहरिष्ये राजपुत्र्या असंशयम् ॥ ७५

ब्रह्मोवाच—

तं वैश्यं तरसाऽऽदाय महाराज्ञे न्यवेदयत् । तत्काष्ठस्पर्शमात्रेण सनेत्राऽभून्नृपात्मजा ॥ ७६
ततः सविस्मयो राजा को भवानिति चाब्रवीत् । वैश्यो राज्ञे यथावृत्तं न्यवेदयदशेषतः ॥ ७७

वैश्य उवाच—

ब्राह्मणानां प्रसादेन धर्मस्य तपसस्तथा । दानप्रभावाद्यज्ञैश्च विविधैर्भूरिदक्षिणैः ॥
दिव्यौषधिप्रभावेन मम सामर्थ्यमीदृशम् ॥ ७८

ब्रह्मोवाच—

एतद्वैश्यवचः श्रुत्वा विस्मितोऽभून्महीपतिः ॥ ७९

---

१ घ. ङ. च. °स्तस्यामात्यः स° । २ घ. च. यत्साध्यं । ३ ङ. स्वीयं । ४ क. ङ. °काऽऽस्त्यन्यलो° ।

राजोवाच—

अहो महानुभावोऽयं प्रायो वृन्दारको भवेत् । अन्यथैतादृगन्यस्य सामर्थ्यं दृश्यते कथम् ॥
तस्मादस्मै तु तां कन्यां प्रदास्ये राज्यपूर्विकाम् ॥ ८०

ब्रह्मोवाच

इति संकल्प्य मनसि कन्यां राज्यं च दत्तवान् । विहारार्थं गतः स्वैरं परं खेदमुपागतः ॥ ८१
न मित्रेण विना राज्यं न मित्रेण विना सुखम् । तमेव सततं विप्रं चिन्तयन्वैश्यनन्दनः ॥ ८२
एतदेव सुजानानां लक्षणं भुवि देहिनाम् । कृपार्द्रं यन्मनो नित्यं तेषामप्यहितेषु हि ॥ ८३
महानृपो वनं प्रायात्स राजा मणिकुण्डलः । तस्मिञ्शासति राज्यं तु कदाचिद्गौतमं द्विजम् ८४
हृतस्वं द्यूतकैः पापैरपश्यन्मणिकुण्डलः । तमादाय द्विजं मित्रं पूजयामास धर्मवित् ॥ ८५
धर्माणां तु प्रभावं तं तस्मै सर्वं न्यवेदयत् । स्नापयामास गङ्गायां तं सर्वाघनिवृत्तये ॥ ८६
तेन विप्रेण सर्वैस्तैः स्वकीयैर्गोत्रजैर्वृतः । वैश्यैः स्वदेशसंभूतैर्ब्राह्मणस्य तु बान्धवैः ॥ ८७
वृद्धकौशिकमुख्यैश्च तस्मिन्योगेश्वरान्तिके । यज्ञानिष्ट्वा सुरान्पूज्य ततः स्वर्गमुपेयिवान् ॥ ८८
ततः प्रभृति तत्तीर्थं मृतसंजीवनं विदुः । चक्षुस्तीर्थं सयोगेशं स्मरणादपि पुण्यदम् ॥
मनःप्रसादजननं सर्वदुर्भावनाशनम् ॥ ८९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये चक्षुस्तीर्थादिवर्णनं नाम सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥

गौतमीमाहात्म्य एकाधिकशततमोऽध्यायः ॥ १०१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—८९६०

अथैकसप्तत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

उर्वशीतीर्थमाख्यातमश्वमेधफलप्रदम् । स्नानदानमहादेववासुदेवार्चनादिभिः ॥ १
महेश्वरो यत्र देवो यत्र शार्ङ्गधरो हरिः । प्रमतिर्नाम राजाऽऽसीत्सार्वभौमः प्रतापवान् ॥ २
रिपूञ्जित्वा जगामाऽऽशु इन्द्रलोकं सुरैर्वृतम् । तत्रापश्यत्सुरपतिं मरुद्भिः सह नारद ॥ ३
जहासेन्द्रं पाशहस्तं प्रमतिः क्षत्रियर्षभः । तं हसन्तमथाऽऽलक्ष्य हरिः प्रमतिमब्रवीत् ॥ ४

इन्द्र उवाच—

देवालये महाबुद्धे मरुद्भिः क्रीडितैरलम् । दिशो जित्वा दिवं प्राप्तः कुरु क्रीडां मया सह ॥ ५

ब्रह्मोवाच—

सकषायं हरिवचो निशम्य प्रमतिर्नृपः । तथेत्युवाच देवेन्द्रं निष्कृतिं कां तु मन्यसे ॥
तच्छ्रुत्वा प्रमतेर्वाक्यं सुरराण्नृपमब्रवीत् ॥ ६

---

१ घ. सज्जनानां । २ घ. च. °ष्ट्वा प्रजाः पूज्य । ३ घ. °र्थं च यो° । ४ ङ. °र्वदुःखविना° । ५ घ. च. मृगेश्वरो । ङ. मृडेश्वरो ।

इन्द्र उवाच—

उर्वश्येव पणोऽस्माकं प्राप्या या निखिलैर्मखैः ॥ ७

ब्रह्मोवाच—

एतच्छ्रुत्वेन्द्रवचनं प्रमतिः प्राह गर्वितः । उर्वशीं निष्कृतिं मन्ये त्वं राजन्किं नु[1] मन्यसे ॥ ८
यद्ब्रवीषि सुरेशान तन्मन्येऽहं शतक्रतो । प्राहेन्द्रं[2] प्रमतिस्तद्वन्निष्कृत्यै दक्षिणं करम् ॥
सवर्मं सशरं धर्म्यं [3]देहि(मन्ये) दीव्यामहे वयम्[4] ॥ ९

ब्रह्मोवाच—

तावेवं संविदं कृत्वा देवनायोपतस्थतुः । प्रमतिर्जितवांस्तत्र उर्वशीं दैवतस्त्रियम् ॥
तां जित्वा प्रमतिः प्राह संरम्भात्तं शतक्रतुम् ॥ १०

प्रमतिरुवाच—

निष्कृत्यै पुनरन्यन्मे पश्चाद्दीव्ये त्वया विभो ॥ ११

इन्द्र उवाच—

देवयोग्यमथो वज्रं जैत्रं सरथमुत्तमम् । दीव्येऽहं तेन नृपते करेणाप्यविचारयन् ॥ १२

ब्रह्मोवाच—

स गृहीत्वा तदा पाशानन्यांश्च मणिभूषितान् । जितमित्यब्रवीच्छक्रं प्रमतिः प्रहसंस्तदा ॥ १३
एतस्मिन्नन्तरे प्रायादक्षज्ञस्तत्र नारद । विश्वावसुरिति ख्यातो गन्धर्वाणां महेश्वरः ॥ १४

विश्वावसुरुवाच—

गन्धर्वविद्यया राजंस्तया दीव्यामहे त्वया । तथेत्युक्त्वा स नृपतिर्जितमित्यब्रवीत्तदा ॥ १५
तौ जित्वा नृपतिर्मौर्ख्याद्देवेन्द्रं प्राह कश्मलम्[5] ॥ १६

प्रमतिरुवाच—

रणे वा देवने वाऽपि न त्वं जेता कथंचन । महेन्द्र सततं तस्मादस्मदाराधको भव ॥
वद केन प्रकारेण जाता देवेन्द्रता तव ॥ १७

ब्रह्मोवाच—

तथा प्राहोर्वशीं गर्वाद्गच्छ कर्मकरी भव । उर्वशी प्राह देवेषु यथा वर्ते तथा त्वयि ॥
वर्तेय सर्वभावेन न मां धिक्कर्तुमर्हसि ॥ १८

ब्रह्मोवाच—

ततस्तां प्रमतिः प्राह त्वादृश्यः सन्ति चारिकाः । त्वं किं विलज्जसे भद्रे[6] गच्छ कर्मकरी भव१९
एतच्छ्रुत्वा नृपेणोक्तं गन्धर्वाधिपतिस्तदा । चित्रसेन इति ख्यातः(प्राह) सुतो विश्वावसोर्बली ॥

चित्रसेन उवाच—

दीव्येऽहं वै त्वया राजन्सर्वेणानेन भूपते । राज्येन जीवितेनापि मदीयेन तवापि च ॥ २१

ब्रह्मोवाच—

तथेत्युक्त्वा पुनरुभौ चित्रसेननृपोत्तमौ । दीव्येतामभिसंरब्धौ चित्रसेनोऽजयत्तदा ॥ २२
गान्धर्वैस्तं महापाशैर्बबन्ध नृपतिं तदा । चित्रसेनोऽजयत्सर्वमुर्वशीमुख्यतः पणैः ॥ २३

---

१ क. न । २ ङ. प्रायच्छत्प्रम° । ३ घ. देव । ४ क. घ. च. तव । ५ क. काश्यपम् । ६ ङ. °द्रे त्वं तु क° ।

राज्यं कोशं बलं चैव यदन्यद्वसु किंचन । चित्रसेनस्य तज्जातं यदासीत्प्रमतेर्धनम् ॥ २४
तस्य पुत्रो बाल एव पुरोधसमुवाच ह । वैश्वामित्रं महाप्राज्ञं मधुच्छन्दसमोजसा ॥ २५

प्रमतिपुत्र उवाच—

किं मे पित्रा कृतं पापं क वा बद्धो महामतिः । कथमेष्यति स्वं स्थानं कथं पाशैर्विमोक्ष्यते ॥ २६

ब्रह्मोवाच—

सुमतेर्वचनं श्रुत्वा ध्यात्वा स मुनिसत्तमः । मधुच्छन्दा जगादेदं[1] प्रमतेर्वर्तनं तदा ॥ २७

मधुच्छन्दा उवाच—

देवलोके तव पिता बद्ध आस्ते महामते । कैतवैर्बहुदोषैश्च भ्रष्टराज्यो बभूव ह ॥ २८
यो याति कैतवसभां स चापि क्लेशभाग्भवेत् । द्यूतमद्यामिषादीनि व्यसनानि नृपात्मज ॥ २९
पापिनामेव जायन्ते सदा पापात्मकानि हि । एकैकमप्यनर्थाय पापाय नरकाय च ॥ ३०
यानासनाभिलाषाद्यैः कृतैः कैतववर्तिभिः । कुलीनाः कलुषीभूताः किं पुनः कितवो जनः॥ ३१
कितवस्य तु या जाया तप्यते नित्यमेव सा । स चापि कितवः पापो योषितं वीक्ष्य तप्यते ३२
तां दृष्ट्वा विगतानन्दो नित्यं वदति पापकृत् । अहो संसारचक्रेऽस्मिन्मया तुल्यो न पातकी ३३
न किंचिदपि यस्याऽऽस्ते लोके विषयजं सुखम् । लोकद्वयेऽपि न सुखी कितवः कोऽपि दृश्यते
विभाति च तथा नित्यं लज्जया दग्धमानसः । गतधर्मो निरानन्दो ग्रस्तगर्वस्तथाऽटति ॥ ३५
अकैतवी च या वृत्तिः सा प्रशस्ता द्विजन्मनाम् । कृषिगोरक्ष्यवाणिज्यमपि कुर्यान्न कैतवम् ३६
यस्तु कैतववृत्त्या हि धनमाहर्तुमिच्छति । धर्मार्थकामाभिजनैः स विमुच्येत पौरुषात् ॥ ३७
वेदेऽपि दूषितं कर्म तव पित्रा तदाऽऽदृतम् । तस्मात्किं कुर्महे वत्स यदुक्तं ते विधीयते ॥ ३८
विधातृविहितं मार्गं को नु वाऽत्येति पण्डितः ॥ ३९

ब्रह्मोवाच—

एतत्पुरोधसो वाक्यं श्रुत्वा सुमतिरब्रवीत् । ४०

सुमतिरुवाच—

किं कृत्वा प्रमतिस्तातः पुना राज्यमवाप्नुयात् ॥ ४१

ब्रह्मोवाच—

पुनर्ध्यात्वा मधुच्छन्दाः सुमतिं चेदमब्रवीत् ॥ ४२

मधुच्छन्दा उवाच—

गौतमीं याहि वत्स त्वं तत्र पूजय शंकरम् । अदितिं[2] वरुणं विष्णुं ततः पाशाद्विमोक्ष्यते ॥ ४३

ब्रह्मोवाच—

तथेत्युक्त्वा जगामाऽऽशु गङ्गां नत्वा जनार्दनम् । पूजयामास शंभुं च तपस्तेपे यतव्रतः ॥ ४४
सहस्रमेकं वर्षाणां बद्धं पितरमात्मनः । मोचयामास देवेभ्यः पुना राज्यमवाप सः[3] ॥ ४५
शिवे(हरी)शाभ्यां मुक्तपाशो राज्यं प्राप सुतात्स्वकात् । अवाप्य विद्यां गान्धर्वीं प्रियश्चाऽऽसी-
च्छतक्रतोः ॥ ४६
शांभवं वैष्णवं चैव उर्वशीतीर्थमेव च । ततःप्रभृति तत्तीर्थं कैतवं चेति विश्रुतम् ॥ ४७

---

१ घ. च. °दं सुमतिं वचनं त° । २ घ. आदित्यं । ३ घ. सः । दिवे ।

शिवविष्णुसरिन्मातृप्रसादादाप्यते न किम् । तत्र स्नानं च दानं च बहुपुण्यफलप्रदम् ॥
पापपाशविमोक्षं तु सर्वदुर्गतिनाशनम् ॥ ४८

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्य उर्वश्यादितीर्थवर्णनं नामैकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

गौतमीमाहात्म्ये द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९००७

अथ द्विसप्तत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

सामुद्रं तीर्थमाख्यातं सर्वतीर्थफलप्रदम् । तस्य स्वरूपं वक्ष्यामि शृणु नारद तन्मनाः ॥ १
विसृष्टा गौतमेनासौ गङ्गा पापप्रणाशनी । लोकानामुपकारार्थं प्रायात्पूर्वार्णवं प्रति ॥ २
आगच्छन्ती देवनदी कमण्डलुधृता मया । शिरसा च धृता देवी शंभुना परमात्मना ॥ ३
विष्णुपादात्प्रसूतां तां ब्राह्मणेन महात्मना । आनीतां मर्त्यभवनं स्मरणादघनाशनीम् ॥ ४
गुरोर्गुरुतमां सिन्धुर्दृष्ट्वा कृत्यमचिन्तयत् । या वन्द्या जगतामीशा ब्रह्मेशाद्यैर्नमस्कृता ॥ ५
तामहं प्रतिगच्छेयं नो चेत्स्याद्धर्मदूषणम् । आगच्छन्तं महात्मानं यो मोहान्नोपतिष्ठते ॥ ६
न तस्य कोऽपि त्राताऽस्ति पापिनो लोकयोर्द्वयोः । एवं विमृश्य रत्नेशो मूर्तिमान्विनयान्वितः
कृताञ्जलिपुटो गङ्गामाहेदं सरितांपतिः ॥ ७

सिन्धुरुवाच—

रसातलगतं वारि पृथिव्यां यन्नभस्तले । तन्मामेवात्र विशतु नाहं वक्ष्यामि किंचन ॥ ८
मयि रत्नानि पीयूषं पर्वता राक्षसासुराः । एतानप्यखिलानन्यान्भीमान्संधारयाम्यहम् ॥ ९
ममान्तः कमलायुक्तो विष्णुः स्वपिति नित्यदा । ममाशक्यं न किमपि विद्यते सचराचरे ॥ १०
महत्यभ्यागते कुर्यात्प्रत्युत्थानं न यो मदात् । स धर्मादिपरिभ्रष्टो निरयं तु समाप्नुयात् ॥ ११
न तान्मे बिभ्रतः खेदो विनाऽगस्त्यपराभवात् । किं तु त्वं गौरवेणैषामतिरिक्ता ततस्त्वहम् १२
ब्रवीमि देवि गङ्गे मां त्वं साम्यात्संगता भव । नैकरूपामहं शक्तः संगन्तुं बहुधा यदि ॥ १३
सङ्गमेष्यसि देवि त्वं संगच्छेऽहं न चान्यथा । *गङ्गे समेष्यसि यदि बहुधा तद्विचारये ॥ १४

ब्रह्मोवाच—

तमेवंवादिनं सिन्धुमपामीशं तदाऽब्रवीत् । गङ्गा सा गौतमी देवी कुरु चैतद्वचो मम ॥ १५
सप्तर्षीणां च या भार्या अरुन्धतिपुरोगमाः । भर्तृभिः सहिताः सर्वा आनय त्वं तदा त्वहम् ॥
अल्पभूता भविष्यामि ततः स्यां तव संगता । तथेत्युक्त्वा सप्तर्षीणां भार्याभिर्ऋ(श्च ऋ)षिभिर्वृ(र्यु)तः(ताः) ॥ १७
आनयामास तां(ता) देवी सप्तधा सा व्यभज्यत । सा चेयं गौतमी गङ्गा सप्तधा सागरं गता ॥

---

* इदमर्धमधिकम् ।

१ घ. ङ. च. °लभवं ना° । २ घ. ङ च. °रय । त° । ३ क. °वृंताम् । आ° । घ. °वृंतम् । आ° ।

सप्तर्षीणां तु नाम्ना तु सप्त गङ्गास्ततोऽभवन् । तत्र स्नानं च दानं च श्रवणं पठनं तथा ॥ १९
स्मरणं चापि यद्भक्त्या सर्वकामप्रदं भवेत् । नास्मादन्यत्परं तीर्थं समुद्राद्भुवनत्रये ॥
पापहानौ भुक्तिमुक्तिप्राप्तौ च मनसो मुदे ॥ २०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये सप्तधागोदावरीसमुद्रागमनवर्णनं नाम द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

गौतमीमाहात्म्ये त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९०२७

अथ त्रिसप्तत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

ऋषिसत्त्रमिति ख्यातमृषयः सप्त नारद । निषेदुस्तपसे यत्र यत्र भीमेश्वरः शिवः ॥ १
तत्रेदं वृत्तमाख्यास्ये देवर्षिपितृबृंहितम् । शृणु यत्नेन वक्ष्यामि सर्वकामप्रदं शुभम् ॥ २
सप्तधा व्यभजन्गङ्गामृषयः सप्त नारद । वासिष्ठी दाक्षिणेयी स्याद्वैश्वामित्री तदुत्तरा ॥ ३
वामदेव्यपरा ज्ञेया गौतमी मध्यतः शुभा । भारद्वाजी स्मृता चान्या आत्रेयी चेत्यथापरा ॥ ४
जामदग्नी तथा चान्या व्यपदिष्टा तु सप्तधा । तैः सर्वैर्ऋषिभिस्तत्र यष्टुमिष्टैर्महात्मभिः ॥ ५
निष्पादितं महासत्रमृषिभिः पारदर्शिभिः । एतस्मिन्नन्तरे तत्र देवानां प्रबलो रिपुः ॥ ६
विश्वरूप इति ख्यातो मुनीनां सत्रमभ्यगात् । ब्रह्मचर्येण तपसा तानाराध्य यथाविधि ॥
विनयेनाथ पप्रच्छ ऋषीन्सर्वाननुक्रमात् ॥ ७

विश्वरूप उवाच—

ध्रुवं सर्वे यथाकामं मम स्वास्थ्येन हेतुना । यथा स्याद्बलवान्पुत्रो देवानामपि दुर्धरः ॥
यज्ञैर्वा तपसा वाऽपि मुनयो वक्तुमर्हथ ॥ ८

ब्रह्मोवाच—

तत्र प्राह महाबुद्धिर्विश्वामित्रो महामनाः ॥ ९

विश्वामित्र उवाच—

कर्मणा तात लभ्यन्ते फलानि विविधानि च । त्रयाणां कारणानां च कर्म प्रथमकारणम् ॥ १०
ततश्च कारणं कर्ता ततश्चान्यत्प्रकीर्तितम् । उपादानं तथा बीजं न च कर्म विदुर्बुधाः ॥ ११
कर्मणां कारणत्वं च कारणे पुष्कले सति । भावाभावौ फले दृष्टौ तस्मात्कर्माश्रितं फलम् ॥ १२
कर्मापि द्विविधं ज्ञेयं क्रियमाणं तथा कृतम् । कर्तव्यं क्रियमाणस्य साधनं यद्यदुच्यते ॥ १३
तद्भावाः कर्मसिद्धौ च उभयत्रापि कारणम् । यद्यद्भावयते जन्तुः कर्म कुर्वन्विचक्षणः ॥ १४
तद्भावनानुरूपेण फलनिष्पत्तिरुच्यते । करोति कर्म विधिवद्विना भावनया यदि ॥ १५
अन्यथा स्यात्फलं सर्वं तस्य भावानुरूपतः । तस्मात्तपो व्रतं दानं जपयज्ञादिकाः क्रियाः १६
कर्मणस्त्वनुरूपेण फलं दास्यन्ति भावतः । तस्माद्भावानुरूपेण कर्म वै दास्यते फलम् ॥ १७
भावस्तु त्रिविधो ज्ञेयः सात्त्विको राजसस्तथा । तामसस्तु तथा ज्ञेयः फलं कर्मानुसारतः ॥ १८
भावनानुगुणं चेति विचित्रा कर्मणां स्थितिः । तस्मादिच्छानुसारेण भावं कुर्याद्विचक्षणः ॥ १९

पश्चात्कर्मापि कर्तव्यं फलदाताऽपि तद्विधम् । फलं ददाति फलिनां फले यदि प्रवर्तते ॥ २०
कर्मकारो न तत्रास्ति कुर्यात्कर्म स्वभावतः । त देव चोपदानादि सत्त्वादिगुणभेदतः ॥ २१
भावात्प्रारभते तद्वद्भावैः फलमवाप्यते । धर्मार्थकाममोक्षाणां कर्म चैव हि कारणम् ॥ २२
भावस्थितं भवेत्कर्म मुक्तिदं बन्धकारणम् । स्वभावानुगुणं कर्म स्वस्यैवेह परत्र च ॥ २३
फलानि विविधान्याशु करोति संमतानुगम् । एक एव पदार्थोऽसौ भावैर्भेदः प्रदृश्यते ॥ २४
क्रियते भुज्यते वाऽपि तस्माद्भावो विशिष्यते । यथाभावं कर्म कुरु यथेप्सितमवाप्स्यसि ॥ २५

ब्रह्मोवाच—

एतच्छ्रुत्वा ऋषेर्वाक्यं विश्वामित्रस्य धीमतः । तपस्तप्त्वा बहुकालं तामसं भावमाश्रितः ॥ २६
विश्वरूपः कर्म भीमं चकार सुरभीषणम् । पश्यत्सु ऋषिमुख्येषु वार्यमाणोऽपि नित्यशः ॥ २७
आत्मकोपानुसारेण भीमं कर्म तथाऽकरोत् । भीषणे कुण्डखाते तु भीषणे जातवेदसि ॥ २८
[*भीषणं रौद्रपुरुषं ध्यात्वाऽऽत्मानं गुहाशयम् । एवं तपन्तमालक्ष्य वागुवाचाशरीरिणी ॥ २९
जटाजूटं विनाऽऽत्मानं न च वृत्रो व्यजीयत । वृथाऽऽत्मानं विश्वरूपो जुहुयाज्जातवेदसि(?)]
स एवेन्द्रः स वरुणः स च स्यात्सर्वमेव च । त्यक्त्वाऽऽत्मानं जटामात्रं हुतवान्वृजिनोद्भवः ॥
वृत्र इत्युच्यते वेदे स चापि वृजिनोऽभवत् । भीमस्य महिमानं को जानाति जगदीशितुः ॥ ३२
सृजत्यशेषमपि यो न च सङ्गेन लिप्यते । विररामेति संकीर्त्य सा वाण्येनं मुनिश्वराः ॥ ३३
भीमेश्वरं नमस्कृत्य जग्मुः स्वं स्वमथाऽऽश्रमम् । विश्वरूपो महाभीमो भीमकर्मा तथाकृतिः॥३४
भीमभावो भीमतनुं ध्यात्वाऽऽत्मानं जुहाव ह । तस्माद्भीमेश्वरो देवः पुराणे परिपठ्यते ॥
तत्र स्नानं च दानं च मुक्तिदं नात्र संशयः ॥ ३५

इति पठति शृणोति यश्च भक्त्या विबुधपतिं शिवमत्र भीमरूपम् ।
जगति विदितमशेषपापहारिस्मृतिपदशरणेन मुक्तिदश्च(?) ॥ ३६
गोदावरी तावदशेषपापसमूहहन्त्री परमार्थदात्री ।
सदैव सर्वत्र विशेषतस्तु यत्राम्बुराशिं समनुप्रविष्टा ॥ ३७
स्नात्वा तु तस्मिन्सुकृती शरीरी गोदावरीवारिधिसंगमे यः ।
उद्धृत्य तीव्रान्निरयादशेषात्स पूर्वजान्याति पुरं पुरारेः ॥ ३८
वेदान्तवेद्यं यदुपासितव्यं तद्ब्रह्म साक्षात्खलु भीमनाथः ।
दृष्टे हि तस्मिन्न पुनर्विशन्ति शरीरिणः संसृतिमुग्रदुःखाम् ॥ ३९

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये ऋषिसत्रभीमेश्वरतीर्थवर्णनं नाम त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥

गौतमीमाहात्म्ये चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९०६५

* धनुश्चिह्नान्तर्गतः पाठो घ. च. पुस्तकयोर्नास्ति ।

१ घ. फलं तत्रापि । २ क. ङ. फलेच्छैव । च. फलेच्छीव । ३ क. घ. च. °न्याद्गुः क° । ४ क. ममतानुगम् । ५ ङ. °नं नव पुत्रोऽभ्यजायत । तथाऽऽत्मा° । ६ घ. च. °क्त्वाऽऽत्मनो ज° । ७ क. °टानौलिं हवनाद्वृजिनोऽभवत् । वृ° । ८ घ. °त्रं हवनादवजितो भवान् । वृ° । च. °त्रं हवनाद्वृजिनोद्भव । वृ° । ९ क. वेदः । ङ. देवे । १० घ. °पि व्रजि-नोऽभ° । च. °पि व्रजिनोऽभ° । ११ क. °रणमुक्तिदश्च पुंसाम् । गो° । १२ घ. ङ. °ति पदं मुरा° ।

अथ चतुःसप्तत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

सा संगता पूर्वमपांपतिं तं गङ्गा सुराणामपि वन्दनीया ॥
देवैश्च सर्वैरनुगम्यमाना संस्तूयमाना मुनिभिर्मरुद्भिः ॥ १
वसिष्ठजाबालियाज्ञवल्क्यक्रत्वङ्गिरोदक्षमरीचि[1]वैष्णवाः ।
शातातपः शौनकदेवरातभृग्वग्निवेश्यात्रिमरीचिमुख्याः ॥ २
सुधूतपापा मनुगौतमादयः सकौशिकास्तुम्बरुपर्वताद्याः ।
अगस्त्यमार्कण्डसपिप्पलाद्याः सगालवा योगपरायणाश्च ॥ ३
सवामदेवाङ्गिरसोऽथ भार्गवाः स्मृतिप्रवीणाः श्रुतिभिर्मनोज्ञाः ।
सर्वे पुराणार्थविदो बहुज्ञास्ते गौतमीं देवनदीं तु गत्वा ॥ ४
स्तोष्यन्ति मन्त्रैः श्रुतिभिः प्रभूतैर्हृद्यैश्च तुष्टैर्मुदितैर्मनोभिः ।
तां संगतां वीक्ष्य शिवो हरिश्च आत्मानमादर्शयतां मुनिभ्यः ॥ ५
तथाऽमरास्तौ पितृभिश्च दृष्टौ स्तुवन्ति देवौ सकलार्तिहारिणौ ॥ ६

आदित्या वसवो रुद्रा मरुतो लोकपालकाः । कृताञ्जलिपुटाः सर्वे स्तुवन्ति हरिशंकरौ ॥ ७
संगमेषु प्रसिद्धेषु नित्यं सप्तसु नारद । समुद्रस्य च गङ्गाया नित्यं देवौ प्रतिष्ठितौ ॥ ८
गौतमेश्वर आख्यातो यत्र देवो महेश्वरः । नित्यं संनिहितस्तत्र माधवो र[2]मया सह ॥ ९
ब्रह्मेश्वर इति ख्यातो मयैव स्थापितः शिवः । लोकानामुपकारार्थमात्मनः कारणान्तरे ॥ १०
चक्रापाणिरिति ख्यातः स्तुतो देवैर्मया सह । तत्र संनिहितो विष्णुर्देवैः सह मरुद्गणैः ॥ ११
ऐन्द्रतीर्थमिति ख्यातं तदेव हयमूर्धकम् । हयमूर्धा तत्र विष्णुस्तन्मूर्धनि सुरा अपि ॥
सोमतीर्थमिति ख्यातं यत्र सोमेश्वरः शिवः ॥ १२

इन्द्रस्य सोमश्रवसो देवैश्च ऋषिभिस्तथा ।
प्रार्थितः सोम एवाऽऽदाविन्द्रायेन्दो परिस्रव ॥ १३
सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ।
देवा आदित्या ये सप्त तेभिः सोमाभिरक्ष न इन्द्रायेन्दो परिस्रव ॥ १४
यत्ते राजञ्छृतं हविस्तेन सोमाभिरक्ष नः ।
अराती वा मा नस्तारीन्मो च नः किंचनाममदिन्द्रायेन्दो परिस्रव ॥ १५
ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः ।
सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिन्द्रायेन्दो परिस्रव ॥ १६
कारुरहं ततो भिषगुपलप्रक्षिणी नना ।
नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परिस्रव ॥ १७

एवमुक्त्वा च ऋषिभिः सोमं प्राप्य च वज्रिणे । तेभ्यो दत्त्वा ततो यज्ञः पूर्णो जातः शतक्रतोः
तत्सोमतीर्थमाख्यातमाग्नेयं पुरतस्तु त[3]त् । अग्निरिष्ट्वा महायज्ञैर्मामाराध्य मनीषितम् ॥ १९
संप्राप्तवान्मत्प्रसादादहं तत्रैव नित्यशः । स्थितो लोकोपकारार्थं तत्र विष्णुः शिवस्तथा ॥ २०
तस्मादाग्नेयमाख्यातमादित्यं तदनन्तरम् । यत्राऽऽदित्यो वेदमयो नित्यमेति उपासितुम् ॥ २१

---

१ क. घ. च. °चिविष्णवः । शा° । २ क. घ. च. मायया । ३ क. यत् ।

रूपान्तरेण मध्याह्ने द्रष्टुं मां शंकरं हरिम् । नमस्कार्यस्तत्र सदा मध्याह्ने सकलो जनः ॥ २२
रूपेण केन सविता समायातीत्यनिश्चयात् । तस्मादादित्यमाख्यातं बार्हस्पत्यमनन्तरम् ॥ २३
बृहस्पतिः सुरैः पूजां तस्मात्तीर्थादवाप ह । ईजे च यज्ञान्विविधान्बार्हस्पत्यं ततो विदुः ॥ २४
तत्तीर्थस्मरणादेव ग्रहशान्तिर्भविष्यति । तस्मादप्यपरं तीर्थमिन्द्रगोपे नगोत्तमे ॥ २५
प्रतिष्ठितं महालिङ्गं कस्मिंश्चित्कारणान्तरे । हिमालयेन तत्तीर्थमद्रितीर्थं तदुच्यते ॥ २६
तत्र स्नानं च दानं च सर्वकामप्रदं शुभम् । एवं सा गौतमी गङ्गा ब्रह्माद्रेश्च विनिःसृता ॥ २७
यावत्सागरगा देवी तत्र तीर्थानि कानिचित् । संक्षेपेण मयोक्तानि रहस्यानि शुभानि च ॥ २८

वेदे पुराणे ऋषिभिः प्रसिद्धा या गौतमी लोकनमस्कृता च ।
वक्तुं कथं तामतिसुप्रभावामशेषतो नारद कस्य शक्तिः ॥ २९
भक्त्या प्रवृत्तस्य यथाकथंचिन्नैवापराधोऽस्ति न संशयोऽत्र ।
तस्माच्च दिङ्मात्रमतिप्रयासात्संसूचितं लोकहिताय तस्याः ॥ ३०

कस्तस्याः प्रतितीर्थं तु प्रभावं वक्तुमीश्वरः । अपि लक्ष्मीपतिर्विष्णुरलं सोमेश्वरः शिवः ॥ ३१
कचित्कस्मिंश्च तीर्थानि कालयोगे भवन्ति हि । गुणवन्ति महाप्राज्ञ गौतमी तु सदा नृणाम् ३२
सर्वत्र सर्वदा पुण्या को न्वस्या गुणकीर्तनम् । वक्तुं शक्तस्ततस्तस्यै नम इत्येवं युज्यते ॥ ३३

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये गङ्गासागरसंगमवर्णनं नाम चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

गौतमीमाहात्म्ये पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९०९८

अथ पञ्चसप्तत्यधिकशततमोऽध्यायः ।

नारद उवाच—

त्रिदैवत्यां सुरेशान गङ्गां ब्रूषे सुरेश्वर । ब्राह्मणेनाऽऽहृतां पुण्यां जगतः पावनीं शुभाम् ॥ १
आदिमध्यावसाने च उभयोस्तीरयोरपि । या व्याप्ता विष्णुनेशेन त्वया च सुरसत्तम ॥
पुनः संक्षेपतो ब्रूहि न मे तृप्तिः प्रजायते ॥ २

ब्रह्मोवाच—

कमण्डलुस्थिता पूर्वं ततो विष्णुपदानुगा । महेश्वरजटाजूटे स्थिता सैव नमस्कृता ॥ ३
ब्रह्मतेजःप्रभावेण शिवमाराध्य यत्नतः । ततः प्राप्ता गिरिं पुण्यं ततः पूर्वार्णवं प्रति ॥ ४
आगत्य संगता देवी सर्वतीर्थमयी नृणाम् । ईप्सितानां तथा दात्री प्रभावोऽस्या विशिष्यते ॥५
एतस्या नाधिकं मन्ये किंचित्तीर्थं जगत्त्रये । अस्याश्चैव प्रभावेण भाव्यं यच्च मनःस्थितम् ॥ ६
अद्याप्यस्या हि माहात्म्यं वक्तुं कैश्चिन्न शक्यते । भक्तितो वक्ष्यते नित्यं या ब्रह्म परमार्थतः॥७
तस्याः परतरं तीर्थं न स्यादिति मतिर्मम । अन्यतीर्थेन साधर्म्यं न युज्येत कथंचन ॥ ८

---

१ ङ. °नि: सुरैर्। २ क. ङ. °वमुच्यते। ३ घ. ङ. च. वन्द्यते। ४ घ ङ. च. °मार्थिभिः । त°। ५ क. कदाचन।

श्रुत्वा मद्वाक्यपीयूषैर्गङ्गाया गुणकीर्तनम् । सर्वेषां न मतिः कस्मात्तत्रैवोपरतिं गता ॥
इति भाति विचित्रं मे मुने खलु जगत्त्रये ॥ ९

नारद उवाच—

धर्मार्थकाममोक्षाणां त्वं वेत्ता चोपदेशकः । छन्दांसि सरहस्यानि पुराणस्मृतयोऽपि च ॥ १०
धर्मशास्त्राणि यच्चान्यत्तव वाक्ये प्रतिष्ठितम् । तीर्थानामथ दानानां यज्ञानां तपसां तथा ॥ ११
देवतामन्त्रसेवानामधिकं किं वद प्रभो । यद्ब्रूषे भगवन्भक्त्या तथा भाव्यं न चान्यथा ॥ १२
एतं मे संशयं ब्रह्मन्वाक्यात्त्वं छेत्तुमर्हसि । इष्टं मनोगतं श्रुत्वा तस्माद्विस्मयमागतः ॥ १३

ब्रह्मोवाच—

शृणु नारद वक्ष्यामि रहस्यं धर्ममुत्तमम् । चतुर्विधानि तीर्थानि तावन्त्येव युगानि च ॥ १४
गुणास्त्रयश्च पुरुषास्त्रयो देवाः सनातनाः । वेदाश्च स्मृतिभिर्युक्ताश्चत्वारस्ते प्रकीर्तिताः ॥ १५
पुरुषार्थाश्च चत्वारो वाणी चापि चतुर्विधा । गुणा ह्यपि तु चत्वारः समत्वेनेति नारद ॥ १६
सर्वत्र धर्मः सामान्यो यतो धर्मः सनातनः । साध्यसाधनभावेन स एव बहुधा मतः ॥ १७
तस्याऽऽश्रयश्च द्विविधो देशः कालश्च सर्वदा । कालाश्रयश्च यो धर्मो हीयते वर्धते सदा ॥ १८
युगानामनुरूपेण पादः पादोऽस्य हीयते । [1]धर्मस्येति महाप्राज्ञ [2]देशापेक्षा तथोभयम् ॥ १९
कालेन चाऽऽश्रितो धर्मो देशे नित्यं प्रतिष्ठितः । युगेषु क्षीयमाणेषु न देशे[3]षु स हीयते ॥ २०
उभयत्र विहीने च धर्मस्य स्यादभावता । तस्माद्देशाश्रितो धर्मश्चतुष्पात्सुप्रतिष्ठितः ॥ २१
स चापि धर्मो देशेषु तीर्थरूपेण तिष्ठति । कृते देशं च कालं च धर्मोऽवष्टभ्य तिष्ठति ॥ २२
त्रेतायां पादहीनेन स तु [4]पादः प्रदेशतः । द्वापरे चार्धतः काले धर्मो[5] देशे समास्थितः ॥ २३
कलौ पादेन चैकेन धर्मश्चलति संकटम् । एवंविधं तु यो धर्मं वेत्ति तस्य न हीयते ॥ २४
युगानामनुभावे[6]न [7]जातिभेदाश्च संस्थिताः । गुणेभ्यो गुणकर्तृभ्यो विचित्रा धर्मसंस्थितिः ॥ २५
गुणानामनुभावेन उद्भवाभिभवौ तथा । तीर्थानामपि [8]वर्णानां [9]वेदानां स्वर्गमोक्षयोः ॥ २६
तादृग्रूपप्रवृत्त्या तु तदेव च विशिष्यते । कालोऽभिव्यञ्जकः प्रोक्तो देशोऽभिव्यङ्ग्य उच्यते २७
यदा यदा अभि[10]व्यक्तिं कालो [11]धत्ते तदा तदा । तदेव [12]व्यञ्जनं ब्रह्मंस्तस्मा[13]न्नास्त्यत्र [14]संशयः ॥
युगानुरूपा मूर्तिः स्याद्देवानां वैदिकी तथा । कर्मणामपि तीर्थानां जातीनामाश्रमस्य तु ॥ २९
त्रिदैवत्यं सत्ययुगे तीर्थं लोकेषु पूज्यते । द्विदैवत्यं[15] युगेऽन्यस्मिन्द्वापरे चैकदैविकम् ॥ ३०
कलौ न किंचिद्विज्ञेयमथान्यदपि तच्छृणु । दैवं कृतयुगे तीर्थं त्रेतायामासुरं विदुः ॥ ३१
आर्षं च द्वापरे प्रोक्तं कलौ मानुषमुच्यते । अथान्यदपि वक्ष्यामि शृणु नारद कारणम् ॥ ३२
गौतम्यां यत्त्वया पृष्टं तत्ते वक्ष्यामि विस्तरात् । यदा चेयं हरशिरः प्राप्ता गङ्गा महामुने ॥ ३३
तदा प्रभृति सा गङ्गा शंभोः प्रियतराऽभवत् । तदेवस्य मतं ज्ञात्वा गजवक्त्रमुवाच सा ॥ ३४
उमा लोकत्रयेशाना माता च जगतो हिता । शान्ता श्रुतिरिति ख्याता भुक्तिमुक्तिप्रदायिनी ३५

---

१ क. ङ. ॰र्मस्यैव म॰ । २ क. ङ. देशे नैव त॰ । ३ क. ङ. ॰षु मही॰ । ४ क. ङ. पादप्र॰ । ५ क. ङ. ॰र्मो हीयेत्समग्रतः । क॰ । ६ क. ॰न याति भेदांश्च संस्थितिम् । गु॰ । ७ घ. ॰तिवेदासमास्थितिः । गु॰ । ८ घ. ॰नां दर्शनात्स्वर्ग॰ । ९ ङ. देवानां । १० क. ॰व्यक्तिः का॰ । घ. ङ. च. ॰व्यक्तिका॰ । ११ क. ङ. धर्म । च. धर्मस्तदा । १२ क. ङ. च. व्यज्यते । १३ घ. ॰स्मादस्त्य॰ । १४ घ. च. विस्मयः । १५ ङ. ॰त्यं त्रेतयुगे द्वाप॰ ।

ब्रह्मोवाच—

तन्मातुर्वचनं श्रुत्वा गजवक्त्रोऽभ्यभाषत ॥ ३६

गजवक्त्र उवाच—

किं कृत्यं शाधि मां मातस्तत्कर्ताऽहमसंशयम् ॥ ३७

ब्रह्मोवाच—

उमा सुतमुवाचेदं महेश्वरजटास्थिता । त्वयाऽवतार्यतां गङ्गा सत्यमीशप्रिया सती ॥ ३८

पुनश्चेशस्तत्र [1]चित्रमध्यास्ते सर्वदा सुत । शिवो यत्र सुरास्तत्र तत्र वेदाः सनातनाः ॥ ३९

तत्रैव ऋषयः सर्वे मनुष्याः पितरस्तथा । तस्मान्निवर्तयेशानं देवदेवं महेश्वरम् ॥ ४०

तस्या निवर्तिते देवे गङ्गायाः सर्व एव हि । निवृत्तास्ते भविष्यन्ति शृणु चेदं वचो मम ॥

निवर्तय ततस्तस्याः सर्वभावेन शंकरम् ॥ ४१

ब्रह्मोवाच—

मातुस्तद्वचनं श्रुत्वा पुनराह गणेश्वरः ॥ ४२

गणेश्वर उवाच—

नैव शक्यः शिवो देवो मया तस्या निवर्तितुम् । अनिवृत्ते शिवे तस्या देवा अपि निवर्तितुम् ॥

न शक्या जगतां मातरथान्यच्चापि कारणम् । गङ्गाऽवतारिता पूर्वं गौतमेन महात्मना ॥ ४४

ऋषिणा लोकपूज्येन त्रैलोक्यहितकारिणा । सामोपायेन तद्वाक्यात्पूज्येन ब्रह्मतेजसा ॥ ४५

आराधयित्वा देवेशं तपोभिः स्तुतिभिर्भवम् । तुष्टेन शंकरेणेदमुक्तोऽसौ गौतमस्तदा ॥ ४६

शंकर उवाच—

वरान्वरय पुण्यांश्च प्रियांश्च मनसेप्सितान् । यद्यदिच्छसि तत्सर्वं दाता तेऽद्य महामते ॥ ४७

ब्रह्मोवाच—

एवमुक्तः शिवेनासौ गौतमो मयि शृण्वति । इदमेव तदोवाच सजटां देहि शंकर ॥

गङ्गां मे याचते पुण्यां किमन्येन वरेण मे ॥ ४८

ब्रह्मोवाच—

पुनः प्रोवाच तं शंभुः सर्वलोकोपकारकः । ४९

शंभुरुवाच—

उक्तं न चाऽऽत्मनः किंचित्तस्माद्याचस्व दुष्करम् ॥ ५०

ब्रह्मोवाच—

गौतमोऽदीनसत्त्वस्तं भवमाह कृताञ्जलिः ॥ ५१

गौतम उवाच—

एतदेव च सर्वेषां दुष्करं तव दर्शनम् । मया तदद्य संप्राप्तं कृपया तव शंकर ॥ ५२

स्मरणादेव ते पद्भ्यां कृतकृतया मनीषिणः । भवन्ति किं पुनः साक्षात्त्वयि दृष्टे महेश्वरे ॥ ५३

ब्रह्मोवाच—

एवमुक्ते गौतमेन भवो हर्षसमन्वितः । त्रयाणामुपकारार्थं लोकानां याचितं त्वया ॥ ५४

---

१ ङ. [चित्रम] । २ ङ. [क्तं तवाऽऽत्म] ।

न चाऽऽत्मनो महाबुद्धे याचेत्याह शिवो द्विजम् । एवं प्रोक्तः पुनर्विप्रो ध्यात्वा प्राह शिवं तथा
विनीतवददीनात्मा शिवभक्तिसमन्वितः । सर्वलोकोपकाराय पुनर्याचितवानिदम् ॥
शृण्वत्सु लोकपालेषु जगादेदं स गौतमः ॥ ५६

गौतम उवाच—

यावत्सागरगा देवी निसृष्टा ब्रह्मणो गिरेः । सर्वत्र सर्वदा तस्यां स्थातव्यं वृषभध्वज ॥ ५७
फलेप्सूनां फलं दाता त्वमेव जगतः प्रभो । तीर्थान्यन्यानि देवेश क्वापि क्वापि शुभानि च ५८
यत्र ते संनिधिर्नि[२]त्यं तदेव शुभदं विदुः[३] । यत्र गङ्गा त्वया दत्ता जटामुकुटसंस्थिता ॥
[१]सर्वत्र तव सांनिध्यात्सर्वतीर्थानि शंकर ॥ ५९

ब्रह्मोवाच—

तद्गौतमवचः श्रुत्वा पुनर्हर्षाच्छिवोऽब्रवीत् ॥ ६०

शिव उवाच—

यत्र क्वापि च यत्किंचिद्यो वा भवति भक्तितः(?) । यात्रां स्नानमथो दानं पितृणां वाऽपि तर्पणम्
श्रवणं पठनं वाऽपि स्मरणं वाऽपि गौतम । यः करोति नरो भक्त्या गोदावर्यां यतव्रतः* ॥६२
सप्तद्वीपवती पृथ्वी सशैलवनकानना । सरत्ना सौषधी रम्या सार्णवा धर्मभूषिता ॥ ६३
दत्त्वा भवति यो धर्मः स भवेद्गौतमीस्मृतेः । एवं विधा इला विप्र गोदानाद्याऽभिधीयते ॥ ६४
चन्द्रसूर्यग्रहे काले मत्सांनिध्ये यतव्रतः । भूभृते विष्णवे भक्त्या सर्वकालं कृता सुधीः ॥ ६५
गाः सुन्दराः सवत्साश्च संगमे लोकविश्रुते । यो ददाति द्विजश्रेष्ठ तत्र यत्पुण्यमाप्नुयात् ॥ ६६
तस्माद्वरं पुण्यमेति स्नानदानादिना नरः । गौतम्यां विश्ववन्द्यायां महानद्यां तु भक्तितः ॥ ६७
तस्माद्गोदावरी गङ्गा त्वया नीता भविष्यति । सर्वपापक्षयकरी सर्वाभीष्टप्रदायिनी ॥ ६८

गणेश्वर उवाच—

एतच्छ्रुतं मया मातर्वदतो गौतमं शिवात् । एतस्मात्कारणाच्छंभुर्गङ्गायां नियतः स्थितः ॥ ६९
को निवर्तयितुं शक्तस्तमम्ब करुणोदधिम् । अथापि मातरेतत्स्यान्मानुषा विघ्नपाशकैः ॥ ७०
विनिबद्धा न गच्छन्ति गोदामप्यन्तिकस्थिताम् । न नमन्ति शिवं देवं न स्मरन्ति स्तुवन्ति न
तथा मातः करिष्यामि तत्र संतोषहेतवे । संनिरोद्धुमथो[४] क्लेशस्तव वाक्यं क्षमस्व मे ॥ ७२

ब्रह्मोवाच—

ततः प्रभृति विघ्नेशो मानुषान्प्रति किंचन । विघ्नमाचरते यस्तु तमुपास्य प्रवर्तते ॥ ७३
अथो विघ्नमनादृत्य गौतमीं याति भक्तितः । स कृतार्थो भवेल्लोके न कृत्यमवशिष्यते ॥ ७४

विघ्नान्यनेकानि भवन्ति गेहान्निर्गन्तुकामस्य नराधमस्य ।
निधाय तन्मूर्ध्नि पदं प्रयाति गङ्गां न किं तेन फलं प्रलब्धम् ॥ ७५

अस्याः प्रभावं को ब्रूयादपि साक्षात्सदाशिवः । संक्षेपेण मया प्रोक्तमितिहासपदानुगम् ॥ ७६
धर्मार्थकाममोक्षाणां साधनं यच्चराचरे । तदत्र विद्यते सर्वमितिहासे सविस्तरे ॥ ७७

---

* अत्र किंचित्त्रुटितमिति भाति ।

---

१ घ. च. सर्वे च तत्र सां° । २ ङ. च. °निध्यं सर्व° । ३ घ. च. °तीर्थेऽस्तु शं° । ङ. °तीर्थेषु शं° । ४ क. ङ. च. °थोऽशक्तस्तव वाक्यात्क्षम° ।

वेदोदितं श्रुतिसकलरहस्यमुक्तं सत्कारणं समभिधानमिदं सदैव ।
सम्यक्च दृष्टं जगतां हिताय प्रोक्तं पुराणं बहुधर्मयुक्तम् ॥ ७८
अस्य श्लोकं पदं वाऽपि भक्तितः शृणुयात्पठेत् । गङ्गा गङ्गेति वा वाक्यं स तु पुण्यमवाप्नुयात्॥
कलिकलङ्कविनाशनदक्षमिदं सकलसिद्धिकरं शुभदं शिवम् ।
जगति पूज्यमभीष्टफलप्रदं गाङ्गमेतदुदीरितमुत्तमम् ॥ ८०
[*साधु गौतम भद्रं ते कोऽन्योऽस्ति सदृशस्त्वया । य एनां गौतमीं गङ्गां दण्डकारण्यमाप्नुयात्
गङ्गा गङ्गेति यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ८२
तिस्रः कोट्योऽर्धकोटी च तीर्थानि भुवनत्रये । तानि स्नातुं समायान्ति गङ्गायां सिंहगे गुरौ ॥
षष्टिर्वर्षसहस्राणि भागीरथ्यवगाहनम् । सकृद्गोदावरीस्नानं सिंहयुक्ते बृहस्पतौ ॥ ८४
इयं तु गौतमी पुत्र यत्र क्वापि ममाऽऽज्ञया । सर्वेषां सर्वदा नृणां स्नानान्मुक्तिं प्रदास्यति]॥८५
अश्वमेधसहस्राणि वाजपेयशतानि च । कृत्वा यत्फलमाप्नोति तदस्य श्रवणाद्भवेत् ॥ ८६
यस्यैतत्तिष्ठति गृहे पुराणं ब्रह्मणोदितम् । न भयं विद्यते तस्य कलिकालस्य नारद ॥ ८७
यस्य कस्यापि नाऽऽख्येयं पुराणमिदमुत्तमम् । श्रद्दधानाय शान्ताय वैष्णवाय महात्मने ॥ ८८
इदं कीर्त्यं भुक्तिमुक्तिदायकं पापनाशकम् । एतच्छ्रवणमात्रेण कृतकृत्यो भवेन्नरः ॥ ८९
†लिखित्वा पुस्तकमिदं ब्राह्मणाय प्रयच्छति । सर्वपापविनिर्मुक्तः पुनर्गर्भं न संविशेत् ॥ ९०

इति श्रीमहापुराणे आदिब्राह्मे तीर्थमाहात्म्ये ब्रह्मनारदसंवादे गङ्गामाहात्म्यश्रवणादिफलवर्णनं नाम पञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥

गौतमीमाहात्म्ये षडधिकशततमोऽध्यायः ॥ १०६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९१८८

समाप्तं गौतमीमाहात्म्यम् ।

अथ षट्सप्तत्यधिकशततमोऽध्यायः ।

मुनय ऊचुः—
न हि नस्तृप्तिरस्तीह शृण्वतां भगवत्कथाम् । पुनरेव परं गुह्यं वक्तुमर्हस्यशेषतः ॥ १
अनन्तवासुदेवस्य न सम्यग्वर्णितं त्वया । श्रोतुमिच्छामहे देव विस्तरेण वदस्व नः ॥ २
ब्रह्मोवाच—
प्रवक्ष्यामि मुनिश्रेष्ठाः सारात्सारतरं परम् । अनन्तवासुदेवस्य माहात्म्यं भुवि दुर्लभम् ॥ ३
आदिकल्पे पुरा विप्रास्त्वहमव्यक्तजन्मवान् । विश्वकर्माणमाहूय वचनं प्रोक्तवानिदम् ॥ ४

---

* धनुश्चिह्नान्तर्गतः पाठो घ. च. पुस्तकयोर्नास्ति । तथाऽत्रत्योऽयमादिमः श्लोकोऽत्रासंगतः । † अयं श्लोको घ. पुस्तकस्थः ।

वरिष्ठं देवशिल्पीन्द्रं विश्वकर्माग्रकर्मिणम् । प्रतिमां वासुदेवस्य कुरु शैलमयीं भुवि ॥ ५
यां प्रेक्ष्य विधिवद्भक्ताः सेन्द्रा वै मानुषादयः । येन दानवरक्षोभ्यो विज्ञाय सुमहद्भयम् ॥ ६
त्रिदिवं समनुप्राप्य सुमेरुशिखरं चिरम् । वासुदेवं समाराध्य निरातङ्का वसन्ति ते ॥ ७
मम तद्वचनं श्रुत्वा विश्वकर्मा तु तत्क्षणात् । चकार प्रतिमां शुद्धां शङ्खचक्रगदाधराम् ॥ ८
सर्वलक्षणसंयुक्तां पुण्डरीकायतेक्षणाम् । श्रीवत्सलक्ष्मसंयुक्तामत्युग्रां प्रतिमोत्तमाम् ॥ ९
वनमालावृतोरस्कां मुकुटाङ्गदधारिणीम् । पीतवस्त्रां सुपीनांसां कुण्डलाभ्यामलंकृताम् ॥ १०
एवं सा प्रतिमा दिव्या गुह्यमन्त्रैस्तदा स्वयम् । प्रतिष्ठाकालमासाद्य मयाऽसौ निर्मिता पुरा॥ ११
तस्मिन्काले तदा शक्रो देवराट्खेचरैः सह । जगाम ब्रह्मसदनमारुह्य गजमुत्तमम् ॥ १२
प्रसाद्य प्रतिमां शक्रः स्नानदानैः पुनः पुनः । प्रतिमां तां समाराध्य(दाय) स्वपुरं पुनरागमत् ॥
तां समाराध्य सुचिरं यतवाक्कायमानसः । वृत्राद्यानसुरान्क्रूरान्नमुचिप्रमुखान्स च ॥ १४
निहत्य दानवान्भीमान्भुक्तवान्भुवनत्रयम् । द्वितीये च युगे प्राप्ते त्रेतायां राक्षसाधिपः ॥ १५
बभूव सुमहावीर्यो दशग्रीवः प्रतापवान् । दश वर्षसहस्राणि निराहारो जितेन्द्रियः ॥ १६
चचार व्रतमत्युग्रं तपः परमदुश्चरम् । तपसा तेन तुष्टोऽहं वरं तस्मै प्रदत्तवान् ॥ १७
अवध्यः सर्वदेवानां स दैत्योरगरक्षसाम् । शापप्रहरणैरुग्रैरवध्यो यमकिंकरैः ॥ १८
वरं प्राप्य तदा रक्षो यक्षान्सर्वगणानिमान् । धनाध्यक्षं विनिर्जित्य शक्रं जेतुं समुद्यतः ॥ १९
संग्रामं सुमहाघोरं कृत्वा देवैः स राक्षसः । देवराजं विनिर्जित्य तदा इन्द्रजितेति वै ॥ २०
राक्षसैस्तत्सुतो नाम मेघनादः प्रलब्धवान् । अमरावतीं ततः प्राप्य देवराजगृहे शुभे ॥ २१
ददर्शाञ्जनसंकाशां रावणस्तु बलान्वितः । प्रतिमां वासुदेवस्य सर्वलक्षणसंयुताम् ॥ २२
श्रीवत्सलक्ष्मसंयुक्तां पद्मपत्रायतेक्षणाम् । वनमालावृतोरस्कां मुकुटाङ्गदभूषिताम् ॥ २३
शङ्खचक्रगदाहस्तां पीतवस्त्रां चतुर्भुजाम् । सर्वाभरणसंयुक्तां सर्वकामफलप्रदाम् ॥ २४
विहाय रत्नसङ्घांश्च प्रतिमां शुभलक्षणाम् । पुष्पकेण विमानेन लङ्कां प्रास्थापयद्द्रुतम् ॥ २५
पुराध्यक्षः स्थितः श्रीमान्धर्मात्मा स विभीषणः । रावणस्यानुजो मन्त्री नारायणपरायणः ॥ २६
दृष्ट्वा तां प्रतिमां दिव्यां देवेन्द्रभवनच्युताम् । रोमाञ्चिततनुर्भूत्वा विस्मयं समपद्यत ॥ २७
प्रणम्य शिरसा देवं प्रहृष्टेनान्तरात्मना । अद्य मे सफलं जन्म अद्य मे सफलं तपः ॥ २८
इत्युक्त्वा स तु धर्मात्मा प्रणिपत्य मुहुर्मुहुः । ज्येष्ठं भ्रातरमासाद्य कृताञ्जलिरभाषत ॥ २९
राजन्प्रतिमया त्वं मे प्रसादं कर्तुमर्हसि । यामाराध्य जगन्नाथ निस्तरेयं भवार्णवम् ॥ ३०
भ्रातुर्वचनमाकर्ण्य रावणस्तं तदाऽब्रवीत् । गृहाण प्रतिमां वीर त्वनया किं करोम्यहम् ॥ ३१
स्वयंभुवं समाराध्य त्रैलोक्यं विजये त्वहम् । नानाश्चर्यमयं देवं सर्वभूतभवोद्भवम् ॥ ३२
विभीषणो महाबुद्धिस्तदा तां(रासाद्य) प्रतिमां शुभाम्। शतमष्टोत्तरं चाब्दं समाराध्य जनार्दनम्
अजरामरणं प्राप्तमणिमादिगुणैर्युतम् । राज्यं लङ्काधिपत्यं च भोगान्भुङ्क्ते यथेप्सितान् ॥ ३४

मुनय ऊचुः—

अहो नो विस्मयो जातः श्रुत्वेदं परमामृतम् । अनन्तवासुदेवस्य संभवं भुवि दुर्लभम् ॥ ३५

---

१ ख. °कर्मन्सुकर्मकृत् । प्र° । २ ख. °दिवेशमनुप्रा° । ३ ख. गिरेः । ४ क. ग. शुभ्रां । ५ क. ख. °चरैर्वृतः । ज° । ६ ख. °दुष्कर° । ७ ख. ग. °सस्तु ततो । ८ ख. °शाञ्जुतसं° । ९ ख. °वनागता° । १० ख. °णस्तु त°।

श्रोतुमिच्छाम हे देव विस्तरेण यथातथम् । तस्य देवस्य माहात्म्यं वक्तुमर्हस्यशेषतः ॥ ३६

ब्रह्मोवाच—

तदा स राक्षसः क्रूरो देवगन्धर्वकिंनरान् । लोकपालान्समनुजान्मुनिसिद्धांश्[1] पापकृत् ॥ ३७
विजित्य समरे सर्वानाजहार तदङ्गनाः । संस्थाप्य नगरीं लङ्कां पुनः सीतार्थ(तां च) मोहितः॥
[2]शङ्कितो मृगरूपेण सौवर्णेन च रा[3]वणः । ततः क्रुद्धेन रामेण रणे सौमित्रिणा सह ॥ ३९
रावणस्य वधार्थाय हत्वा वालिं [4]मनोजवम् । अभिषिक्तश्च सुग्रीवो युवराजोऽङ्गदस्तथा ॥ ४०
हनुमान्नलनीलश्च जाम्बवान्[5]पनसस्तथा । गवय[6]श्च गवाक्षश्च पाठीनः परमौजसः ॥ ४१
एतैश्चान्यैश्च बहुभिर्वानरैः समहाबलैः । समावृतो महा[7]घोरै रामो राजीवलोचनै[8]ः ॥ ४२
गिरीणां सर्वसंघातैः सेतुं बद्ध्वा महोदधौ । बलेन महता रामः समुत्तीर्य महोदधिम् ॥ ४३
संग्राममतुलं चक्रे रक्षोगणसमन्वितः । [9]यमहस्तं प्रहस्तं च निकुम्भं कुम्भमेव च ॥ ४४
नरान्तकं महावीर्यं तथा चैव यमान्तकम् । [10]मालाढ्यं मालिकाढ्यं च हत्वा रामस्तु वीर्यवान्॥४५
पुनरिन्द्रजितं हत्वा कुम्भकर्णं सरावणम् । वैदेहीं चाग्निनाऽऽशोध्य दत्त्वा राज्यं विभीषणे॥४६
वासुदेवं समादाय यानं पुष्पकमारुहत्* । लीलया समनुप्रापदयोध्यां पूर्वपालिताम् ॥ ४७
कनिष्ठं भरतं स्नेहाच्छत्रुघ्नं भक्तवत्सलः । अभिषिच्य तदा रामः सर्वराज्येऽधिराजवत् ॥ ४८
पुरातनीं स्वमूर्तिं च समाराध्य ततो हरिः । दश वर्षसहस्राणि दश वर्षशतानि च ॥ ४९
भुक्त्वा सागरपर्यन्तां मेदिनीं स तु राघवः । राज्य[11][12]मासाद्य सुगतिं वैष्णवं पदमाविशत् ॥ ५०
तां चापि प्रतिमां रा[13]मः समुद्रेशाय दत्तवान् । धन्यो रक्षयितासि त्वं तोयरत्नसमन्वितः ॥ ५१
द्वापरं युगमासाद्य यदा देवो जगत्पतिः । धरण्याश्चानुरोधेन भावशैथिल्यकारणात् ॥ ५२
अवतीर्णः स भगवान्वसुदेवकुले प्रभुः । कंसादीनां वधार्थाय संकर्षणसहायवान् ॥ ५३
तदा तां प्रतिमां विप्राः सर्ववाञ्छाफलप्रदाम् । सर्वलोकहितार्थाय कस्यचित्कारणान्तरे ॥ ५४
तस्मिन्क्षेत्रवरे पुण्ये दुर्लभे पुरुषोत्तमे । उज्जहार स्वयं तोयात्समुद्रः सरितां पतिः ॥ ५५
तदा प्रभृति तत्रैव क्षेत्रे मुक्तिप्रदे द्विजाः । आस्ते स देवो दे[14]वानां सर्वकामफलप्रदः ॥ ५६
ये संश्रयन्ति चानन्तं भक्त्या सर्वेश्वरं प्रभुम् । वाङ्मनःकर्मभिर्नित्यं ते यान्ति परमं पदम् ॥५७
दृष्ट्वाऽनन्तं सकृद्भक्त्या संपूज्य प्रणिपत्य च । राजसूयाश्वमेधाभ्यां फलं दशगुणं लभेत् ॥ ५८
सर्वकामसमृद्धेन कामगेन सुवर्चसा । विमानेनार्कवर्णेन किङ्किणीजालमालिना ॥ ५९
त्रिःसप्तकुलमुद्धृत्य दिव्यस्त्रीगणसेवितः । उपगीयमानो गन्धर्वैर्नरो विष्णुपुरं व्रजेत् ॥ ६०
तत्र भुक्त्वा वरान्भोगाञ्जरामरणवर्जितः । दिव्यरूपधरः श्रीमान्यावदाभूतसंप्लवम् ॥ ६१
पुण्यक्षयादिहाऽऽयातश्चतुर्वेदी द्विजोत्तमः । वैष्णवं योगमास्थाय ततो मोक्षमवाप्नुयात् ॥ ६२

---

* गुणाभावः संज्ञापूर्वकविधेरनित्यत्वात् ।

---

१ क. ख. °र्थमुद्यतः । २ क. चलितो । ग. चरित्वा । ३ ग. राघवम् । ४ क. प्लवङ्गमम् । ५ भ. °न्पवनस्त° । ६ ख. °यश्चैव मैन्दश्च वानरेशा महौज° । ७ ख. °हात्माऽसौ रा° । ८ ग. °नः । ५२ । शतशः शाल्वसं° । ९ क. महोदरं । १० क. मालिनं माल्यवन्तं च । ११ ग. °मादाय सु° । १२ ख. राज्ञे । १३ ख. तद्दत्तां प्र° । १४ ख. °वानामार्तिहा सर्वकामदः ।

एवं मया त्वनन्तोऽसौ कीर्तितो मुनिसत्तमाः । कः शक्नोति गुणान्वक्तुं तस्य वर्षशतैरपि ॥ ६३

इति श्रीमहापुराणे आदिब्राह्मे स्वयंम्वृषिसंवादेऽनन्तवासुदेवमाहात्म्यनिरूपणं नाम षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९२५१

अथ सप्तसप्तत्यधिकशततमोऽध्यायः ।

ब्रह्मोवाच—

एवं वोऽनन्तमाहात्म्यं क्षेत्रं च पुरुषोत्तमम् । भुक्तिमुक्तिप्रदं नृणां मया प्रोक्तं सुदुर्लभम् ॥ १
यत्राऽऽस्ते पुण्डरीकाक्षः शङ्खचक्रगदाधरः । पीताम्बरधरः कृष्णः कंसकेशिनिषूदनः ॥ २
ये तत्र कृष्णं पश्यन्ति सुरासुरनमस्कृतम् । संकर्षणं सुभद्रां च धन्यास्ते नात्र संशयः ॥ ३
त्रैलोक्याधिपतिं देवं सर्वकामफलप्रदम् । ये ध्यायन्ति सदा कृष्णं मुक्तास्ते नात्र संशयः ॥ ४

कृष्णे रताः कृष्णमनुस्मरन्ति रात्रौ च कृष्णं पुनरुत्थिता ये ।
ते भिन्नदेहाः प्रविशन्ति कृष्णं हविर्यथा मन्त्रहुतं हुताशम् ॥ ५

तस्मात्सदा मुनिश्रेष्ठाः कृष्णः कमललोचनः । तस्मिन्क्षेत्रे प्रयत्नेन द्रष्टव्यो मोक्षकाङ्क्षिभिः ६
शयनोत्थापने कृष्णं ये पश्यन्ति मनीषिणः । हलायुधं सुभद्रां च हरेः स्थानं व्रजन्ति ते ॥ ७
सर्वकालेऽपि ये भक्त्या पश्यन्ति पुरुषोत्तमम् । रौहिणेयं सुभद्रां च विष्णुलोकं व्रजन्ति ते ॥८
आस्ते यश्चतुरो मासान्वार्षिकान्पुरुषोत्तमे । पृथिव्यास्तीर्थयात्रायाः फलं प्राप्नोति चाधिकम् ९
ये सर्वकालं तत्रैव निवसन्ति मनीषिणः । जितेन्द्रिया जितक्रोधा लभन्ते तपसः फलम् ॥ १०
तपस्तप्त्वाऽन्यतीर्थेषु वर्षाणामयुतं नरः । यदाप्नोति तदाप्नोति मासेन पुरुषोत्तमे ॥ ११
तपसा ब्रह्मचर्येण सङ्गत्यागेन यत्फलम् । तत्फलं सततं तत्र प्राप्नुवन्ति मनीषिणः ॥ १२
सर्वतीर्थेषु यत्पुण्यं स्नानदानेन कीर्तितम् । तत्फलं सततं तत्र प्राप्नुवन्ति मनीषिणः ॥ १३
सम्यक्तीर्थेन यत्प्रोक्तं व्रतेन नियमेन च । तत्फलं लभते तत्र प्रत्यहं प्रयतः शुचिः ॥ १४
यस्तु नानाविधैर्यज्ञैर्यत्फलं लभते नरः । तत्फलं लभते तत्र प्रत्यहं संयतेन्द्रियः ॥ १५
देहं त्यजन्ति पुरुषास्तत्र ये पुरुषोत्तमे । कल्पवृक्षं समासाद्य मुक्तास्ते नात्र संशयः ॥ १६
वटसागरयोर्मध्ये ये त्यजन्ति कलेवरम् । ते दुर्लभं परं मोक्षं प्राप्नुवन्ति न संशयः ॥ १७
अनिच्छन्नपि यस्तत्र प्राणांस्त्यजति मानवः । सोऽपि दुःखविनिर्मुक्तो मुक्तिं प्राप्नोति दुर्लभाम्
कृमिकीटपतङ्गाद्यास्तिर्यग्योनिगताश्च ये । तत्र देहं परित्यज्य ते यान्ति परमां गतिम् ॥ १९
भ्रान्तिं लोकस्य पश्यध्वमन्यतीर्थं प्रति द्विजाः । पुरुषाख्येन यत्प्राप्तमन्यतीर्थफलादिकम् ॥ २०
सकृत्पश्यति यो मर्त्यः श्रद्धया पुरुषोत्तमम् । पुरुषाणां सहस्रेषु स भवेदुत्तमः पुमान् ॥ २१
प्रकृतेः स परो यस्मात्पुरुषादपि चोत्तमः । तस्माद्वेदे पुराणे च लोकेऽस्मिन्पुरुषोत्तमः ॥ २२
योऽसौ पुराणे वेदान्ते परमात्मेत्युदाहृतः । आस्ते विश्वोपकाराय तेनासौ पुरुषोत्तमः ॥ २३

१ क. °ष्णं धन्यास्ते । २ क. विष्णुं । ३ ख. °यने बोधने । ४ क. ख. हरिस्था° । ५ क. °के च यान्ति । ६ क. ग. विप्राः । ७ ग. विप्राः । ८ ख. °म्यग्धियां च य° । ९ ग. विप्राः । १० क. ख. °स्ते तत्रोप° । ११ क. ख. प्रदेशे ।

पथि श्मशाने गृहमण्डपे वा रथ्याप्रदेशेष्वपि यत्र कुत्र ।
इच्छन्ननिच्छन्नपि तत्र देहं संत्यज्य मोक्षं लभते मनुष्यः ॥ २४

तस्मात्सर्वप्रयत्नेन तस्मिन्क्षेत्रे द्विजोत्तमाः । देहत्यागो नरैः कार्यः सम्यङ्मोक्षाभिकाङ्क्षिभिः ॥
पुरुषाख्यस्य माहात्म्यं न भूतं न भविष्यति । त्यक्त्वा यत्र नरो देहं मुक्तिं प्राप्नोति दुर्लभाम् ॥
गुणानामेकदेशोऽयं मया क्षेत्रस्य कीर्तितः । कः समस्तान्गुणान्वक्तुं शक्तो वर्षशतैरपि ॥ २७
यदि यूयं मुनिश्रेष्ठा मोक्षमिच्छथ शाश्वतम् । तस्मिन्क्षेत्रवरे पुण्ये निवसध्वमतन्द्रिताः ॥ २८

व्यास उवाच—

ते तस्य वचनं श्रुत्वा ब्रह्मणोऽव्यक्तजन्मनः । निवासं चक्रिरे तत्र अवापुः परमं पदम् ॥ २९
तस्माद्यूयं प्रयत्नेन निवसध्वं द्विजोत्तमाः । पुरुषाख्ये वरे क्षेत्रे यदि मुक्तिमभीप्सथ ॥ ३०

इति श्रीमहापुराणे आदिब्राह्मे ब्रह्मऋषिसंवादे क्षेत्रमाहात्म्यवर्णनं नाम
सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९२८१

अथाष्टसप्तत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

तस्मिन्क्षेत्रे मुनिश्रेष्ठाः सर्वसत्त्वसुखावहे । धर्मार्थकाममोक्षाणां फलदे पुरुषोत्तमे ॥ १
कण्डुर्नाम महातेजा ऋषिः परमधार्मिकः । सत्यवादी शुचिर्दान्तः[1] सर्वभूतहिते रतः ॥ २
जितेन्द्रियो जितक्रोधो वेदवेदाङ्गपारगः । अवाप परमां सिद्धिमाराध्य पुरुषोत्तमम् ॥ ३
अन्येऽपि तत्र संसिद्धा मुनयः [2]संशितव्रताः । सर्वभूतहिता दान्ता जितक्रोधा विमत्सराः ॥ ४

मुनय ऊचुः—

कोऽसौ कण्डुः कथं तत्र जगाम[3] परमां गतिम् । श्रोतुमिच्छामहे तस्य चरितं ब्रूहि सत्तम ॥ ५

व्यास उवाच—

शृणुध्वं मुनिशार्दूलाः कथां तस्य मनोहराम् । प्रवक्ष्यामि समासेन मुनेस्तस्य विचेष्टितम् ॥ ६
[4]पवित्रे गोमतीतीरे विजने सुमनोहरे । कन्दमूलफलैः[5] पूर्णे समित्पुष्प[6]कुशान्वितैः ॥ ७
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते । नानापक्षिरुते रम्ये नानामृगगणान्विते ॥ ८
तत्राऽऽश्रमपदं कण्डोर्बभूव मुनिसत्तमाः । सर्वर्तुफलपुष्पाढ्यं कदलीखण्डमण्डितम् ॥ ९
तपस्तेपे मुनिस्तत्र सुमहत्परमाद्भुतम् । व्रतोपवासैर्नियमैः स्नानमौनसुसंयमैः ॥ १०
ग्रीष्मे पञ्चतपा भूत्वा वर्षासु स्थण्डिलेशयः । आर्द्रवासास्तु हेमन्ते स तेपे सुमहत्तपः ॥ ११
दृष्ट्वा तु तपसो वीर्यं मुनेस्तस्य सुविस्मिताः । बभूवुर्देवगन्धर्वाः सिद्धविद्याधरास्तथा ॥ १२
भूमिं तथाऽन्तरिक्षं च दिवं च मुनिसत्तमाः । कण्डुः संतापयामास त्रैलोक्यं तपसो बलात् ॥ १३

---

१ क. ख. °द्धिमवाप्य पु°। २ क. ख. संयतेन्द्रियाः । ३ ख. °म यदिमां । ४ क. प्रसिद्धे । ५ क. ग. °फलैर्मेध्यैः स° । ६ ख. °ष्पजलैः कुशैः । ना° ।

*अहोऽस्य परमं धैर्यमहोऽस्य परमं तपः । इत्यब्रुवंस्तदा दृष्ट्वा देवास्तं तपसि स्थितम् ॥ १४
मन्त्रयामासुरव्यग्राः शक्रेण सहितास्तदा । भयात्तस्य समुद्विग्नास्तपोविघ्नमभीप्सवः ॥ १५
ज्ञात्वा तेषामभिप्रायं शक्रस्त्रिभुवनेश्वरः । प्रम्लोचाख्यां वरारोहां रूपयौवनगर्विताम् ॥ १६
सुमध्यां चारुजङ्घां तां पीनश्रोणिपयोधराम् । सर्वलक्षणसंपन्नां प्रोवाच फलसूदनः ॥ १७

शक्र उवाच—

प्रम्लोचे गच्छ शीघ्रं त्वं यदाऽसौ तप्यते मुनिः । विघ्नार्थं तस्य तपसः क्षोभयस्वां(स्वाऽऽ)शु सुप्रभे

प्रम्लोचोवाच—

तव वाक्यं सुरश्रेष्ठ करोमि सततं प्रभो । किंतु शङ्का ममैवात्र जीवितस्य च संशयः ॥ १९
बिभेमि तं मुनिवरं ब्रह्मचर्यव्रते स्थितम् । अत्युग्रं दीप्ततपसं ज्वलनार्कसमप्रभम् ॥ २०
ज्ञात्वा मां स मुनिः क्रोधाद्विघ्नार्थं समुपागताम् । कण्डुः परमतेजस्वी शापं दास्यति दुःसहम् २१
उर्वशी मेनका रम्भा घृताची पुञ्जिकस्थला । विश्वाची सहजन्या च पूर्वचित्तिस्तिलोत्तमा ॥ २२
अलम्बुषा मिश्रकेशी शशिलेखा च वामना । अन्याश्चाप्सरसः सन्ति रूपयौवनगर्विताः ॥ २३
सुमध्याश्चारुवदनाः पीनोन्नतपयोधराः । कामप्रधानकुशलास्तास्तत्र संनियोजय ॥ २४

ब्रह्मोवाच—

तस्यास्तद्वचनं श्रुत्वा पुनः प्राह शचीपतिः । तिष्ठन्तु नाम चान्यास्तास्त्वं चात्र कुशला शुभे २५
कामं वसन्तं वायुं च सहायार्थे ददामि ते । तैः सार्धं गच्छ सुश्रोणि यत्राऽऽस्ते स महामुनिः २६
शक्रस्य वचनं श्रुत्वा तदा सा चारुलोचना । जगामाऽऽकाशमार्गेण तैः सार्धं चाऽऽश्रमं मुनेः २७
गत्वा सा तत्र रुचिरं ददर्श वनमुत्तमम् । मुनिं च दीप्ततपसमाश्रमस्थमकल्मषम् ॥ २८
अपश्यत्सा वनं रम्यं तैः सार्धं नन्दनोपमम् । सर्वर्तुवरपुष्पाढ्यं शाखामृगगणाकुलम् ॥ २९
पुण्यं पद्मबलोपेतं सपल्लवमहाबलम् । श्रोत्ररम्यान्सुमधुराञ्शब्दान्खगमुखेरितान् ॥ ३०
सर्वर्तुफलभाराढ्यान्सर्वर्तुकुसुमोज्ज्वलान् । अपश्यत्पादपांश्चैव विहङ्गैरनुनादितान् ॥ ३१
आम्रानाम्रातकान्भव्यान्नारिकेरान्सतिन्दुकान् । अथ बिल्वांस्तथा जीवान्दाडिमान्बीजपूरकान् ॥
पनसाँल्लकुचान्नीपाञ्शिरीषान्सुमनोहरान् । पारावतांस्तथा कोलानरिमेदाम्लवेतसान् ॥ ३३
भल्लातकानामलकाञ्शतपर्णांश्च किंशुकान् । इङ्गुदान्करवीरांश्च हरीतकीविभीतकान् ॥ ३४
एतानन्यांश्च सा वृक्षान्ददर्श पृथुलोचना । तथैवाशोकपुन्नागकेतकीबकुलानथ ॥ ३५
पारिजातान्कोविदारान्मन्दारेन्दीवरांस्तथा । पाटलाः पुष्पिता रम्या देवदारुद्रुमांस्तथा ॥ ३६
शालांस्तालांस्तमालांश्च निचुलाँल्लोमकांस्तथा । अन्यांश्च पादपश्रेष्ठानपश्यत्फलपुष्पितान् ॥ ३७
चकोरैः शतपत्रैश्च भृङ्गराजैस्तथा शुकैः । कोकिलैः कलविङ्कैश्च हारीतैर्जीवजीवकैः ॥ ३८
प्रियपुत्रैश्चातकैश्च तथाऽन्यैर्विविधैः खगैः । श्रोत्ररम्यं सुमधुरं कूजद्भिश्चाप्यधिष्ठितम् ॥ ३९
सरांसि च मनोज्ञानि प्रसन्नसलिलानि च । कुमुदैः पुण्डरीकैश्च तथा नीलोत्पलैः शुभैः ॥ ४०
कह्लारैः कमलैश्चैव आचितानि समन्ततः । कादम्बैश्चक्रवाकैश्च तथैव जलकुक्कुटैः ॥ ४१
कारण्डवैर्बकैर्हंसैः कूर्मैर्मद्गुभिरेव च । एतैश्चान्यैश्च कीर्णानि समन्ताज्जलचारिभिः ॥ ४२
क्रमेणैव तथा सा तु वनं बभ्राम तैः सह । एवं दृष्ट्वा वनं रम्यं तैः सार्धं परमाद्भुतम् ॥ ४३

* संधिरार्ष एवमुत्तरत्रापि ।

विस्मयोत्फुल्लनयना सा बभूव वराङ्गना । प्रोवाच वायुं कामं च वसन्तं च द्विजोत्तमाः ॥ ४४

प्रम्लोचोवाच—

कुरुध्वं मम साहाय्यं यूयं सर्वे पृथक्पृथक् ॥ ४५

ब्रह्मोवाच—

एवमुक्त्वा तदा सा तु तथेत्युक्ता सुरैर्द्विजाः । प्रत्युवाचाद्य यास्यामि यत्रासौ संस्थितो मुनिः
अद्य तं [1]देहयन्तारं प्रयुक्तेन्द्रियवाजिनम् । स्मरशस्त्रगलद्रश्मिं करिष्यामि कुसारथिम् ॥ ४७
ब्रह्मा जनार्दनो वाऽपि यदि वा नीललोहितः । तथाऽऽप्यद्य करिष्यामि कामबाणक्षतान्तरम् ॥
इत्युक्त्वा [2]प्रययौ साऽथ यत्रासौ तिष्ठते मुनिः । मुनेस्तपःप्रभावेण प्रशान्तश्वापदाश्रमम् ॥ ४९
सा पुंस्कोकिलमाधुर्ये नदीतीरे व्यवस्थिता । [3]स्तोकमात्रं स्थिता तस्मादगायत वराऽप्सराः॥५०
ततो वसन्तः [4]सहर्षो बलं समकरोत्तदा । कोकिलारावमधुरमकालिकमनोहरम् ॥ ५१
ववौ गन्धवहश्चैव मलयाद्रिनिकेतनः । पुष्पानुच्चावचान्मेध्यान्पातयंश्च शनैः शनैः ॥ ५२
पुष्पबाणधरश्चैव गत्वा तस्य समीपतः । मुनेश्च क्षोभयामास कामस्तस्यापि मानसम् ॥ ५३
ततो गीतध्वनिं श्रुत्वा मुनिर्विस्मितमानसः । [5]जगाम यत्र सा सुभ्रूः कामबाणप्रपीडितः ॥ ५४
दृष्ट्वा तामाह संहृष्टो विस्मयोत्फुल्ललोचनः । भ्रष्टोत्तरीयो विकलः पुलकाञ्चितविग्रहः ॥ ५५

ऋषिरुवाच—

काऽसि कस्यासि सुश्रोणि सुभगे चारुहासिनि । मनो हरसि मे सुभ्रु ब्रूहि सत्यं सुमध्यमे॥५६

प्रम्लोचोवाच—

तव कर्मकरा चाहं [6]पुष्पार्थमहमागता । आदेशं देहि मे क्षिप्रं किं करोमि तवाऽऽज्ञया ॥ ५७

व्यास उवाच—

श्रुत्वैवं वचनं तस्यास्त्यक्त्वा धैर्यं विमोहितः । आदाय हस्ते तां बालां प्रविवेश स्वमाश्रमम्५८
ततः कामश्च वायुश्च वसन्तश्च द्विजोत्तमाः । जग्मुर्यथागतं सर्वे कृतकृत्यास्त्रिविष्टपम् ॥ ५९
शशंसुश्च हरिं गत्वा तस्यास्तस्य च चेष्टितम् । श्रुत्वा शक्रस्तदा देवाः प्रीताः सुमनसोऽभवन् ॥
स च कण्डुस्तया सार्धं प्रविशन्नेव चाऽऽश्रमम् । आत्मनः परमं रूपं चकार [7]मदनाकृति ॥ ६१
रूपयौवनसंपन्नमतीव सुमनोहरम् । दिव्यालंकारसंयुक्तं षोडशवत्सराकृति ॥ ६२
दिव्यवस्त्रधरं कान्तं दिव्यस्रग्गन्धभूषितम् । सर्वोपभोगसंपन्नं सहसा तपसो बलात् ॥ ६३
दृष्ट्वा सा तस्य तद्वीर्यं परं विस्मयमागता । अहोऽस्य तपसो वीर्यमित्युक्त्वा मुदिताऽभवत्॥६४
स्नानं संध्यां जपं होमं स्वाध्यायं देवतार्चनम् । व्रतोपवासनियमं ध्यानं च मुनिसत्तमाः ॥ ६५
त्यक्त्वा स रेमे मुदितस्तया सार्धमहर्निशम् । मन्मथाविष्टहृदयो न बुबोध तपःक्षयम् ॥ ६६
संध्यारात्रिदिवापक्षमासर्त्वयनहायनम् । न बुबोध गतं कालं विषयासक्तमानसः ॥ ६७
सा च तं कामजैर्भावैर्विदग्धा रहसि द्विजाः । वरयामास सुश्रोणिः [8]प्रलापकुशला तदा ॥ ६८
एवं कण्डुस्तया सार्धं वर्षाणामधिकं शतम् । अतिष्ठन्मन्दरद्रोण्यां ग्राम्यधर्मरतो मुनिः ॥ ६९
सा तं प्राह महाभागं गन्तुमिच्छाम्यहं दिवम् । प्रसादसुमुखो ब्रह्मन्ननुज्ञातुं त्वमर्हसि ॥ ७०

---

१ ग. देवय॰। २ क. ख. प्रजगामाथ य॰। ३ क. स्तोमसंत्रासिता। ४ ग. ॰सा वसन्तम॰। ५ ख ॰म तत्र नैवाऽऽशु का॰। ६ ख. पुष्पकामाऽह॰। ७ ख. मन्मथाकृ॰। ८ ग. प्रचारकु॰।

तयैवमुक्तः स मुनिस्तस्यामासक्तमानसः । दिनानि कतिचिद्भद्रे स्थीयतामित्यभाषत ॥ ७१
एवमुक्ता ततस्तेन साग्रं वर्षशतं पुनः । बुभुजे विषयांस्तन्वी तेन सार्धं महात्मना ॥ ७२
अनुज्ञां देहि भगवन्व्रजामि त्रिदशालयम् । उक्तस्तयेति स पुनः स्थीयतामित्यभाषत ॥ ७३
पुनर्गते वर्षशते साधिके सा शुभानना । याम्यहं त्रिदिवं ब्रह्मन्प्रणयस्मितशोभनम् ॥ ७४
उक्तस्तयैवं स मुनिः पुनराहाऽऽयतेक्षणाम् । इहाऽऽस्यतां मया सुभ्रु चिरं कालं गमिष्यसि ७५
तच्छापभीता सुश्रोणी सह तेनर्षिणा पुनः । शतद्वयं किंचिदूनं वर्षाणां समतिष्ठत ॥ ७६
गमनाय महाभागो देवराजनिवेशनम् । प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥ ७७
तस्य शापभयाद्भीरुर्दाक्षिण्येन च दक्षिणा । प्रोक्ता प्रणयभङ्गार्तिवेदिनी न जहौ मुनिम् ॥ ७८
तया च रमतस्तस्य परमर्षेरहर्निशम् । नवं नवमभूत्प्रेम मन्मथासक्तचेतसः ॥ ७९
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः । निष्क्रामन्तं च कुत्रेति गम्यते प्राह सा शुभा ॥ ८०
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे । संध्योपास्तिं करिष्यामि क्रियालोपोऽन्यथा भवेत् ८१
ततः प्रहस्य मुदिता सा तं प्राह महामुनिम् । किमद्य सर्वधर्मज्ञ परिवृत्तमहस्तव ॥
गतमेतन्न कुरुते विस्मयं कस्य कथ्यते ॥ ८२

मुनिरुवाच—

प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभम् । मया दृष्टाऽसि सुश्रोणि प्रविष्टा च ममाऽऽश्रमम् ८३
इयं च वर्तते संध्या परिणाममहो गतम् । अवहासः किमर्थोऽयं सद्भावः कथ्यतां मम ॥ ८४

प्रम्लोचोवाच—

प्रत्यूषस्यागता ब्रह्मन्सत्यमेतन्न मे मृषा । किं त्वद्य तस्य कालस्य गतान्यब्दशतानि ते ॥ ८५
ततःससाध्वसो विप्रस्तां पप्रच्छाऽऽयतेक्षणाम् । कथ्यतां भीरु कः कालस्त्वया मे रमतः सदा

प्रम्लोचोवाच—

सप्तोत्तराण्यतीतानि नववर्षशतानि च । मासाश्च षट्तथैवान्यत्समतीतं दिनत्रयम् ॥ ८७

ऋषिरुवाच—

सत्यं भीरु वदस्येतत्परिहासोऽथवा शुभे । दिनमेकमहं मन्ये त्वया सार्धमिहोषितम् ॥ ८८

प्रम्लोचोवाच—

वदिष्याम्यनृतं ब्रह्मन्कथमत्र तवान्तिके । विशेषादद्य भवता पृष्टा मार्गानुगामिना ॥ ८९

व्यास उवाच—

निशम्य तद्वचस्तस्याः स मुनिर्द्विजसत्तमाः । धिग्धिङ्मामित्यनाचारं विनिन्द्याऽऽत्मानमात्मना

मुनिरुवाच—

तपांसि मम नष्टानि हतं ब्रह्मविदां धनम् । हृतो विवेकः केनापि योषिन्मोहाय निर्मिता ॥ ९१
ऊर्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे । गतिरेषा कृता येन धिक्तं काममहाग्रहम् ॥ ९२
व्रतानि सर्ववेदाश्च कारणान्यखिलानि च । नरकग्राममार्गेण कामेनाद्य हतानि मे ॥ ९३
विनिन्द्येत्थं स धर्मज्ञः स्वयमात्मानमात्मना । तामप्सरसमासीनामिदं वचनमब्रवीत् ॥ ९४

---

१ ग. च वसत॰ । २ ख. सप्तन्यूनान्यती॰ । ३ ख. ॰श्च षोडशैवात्र सम॰ । ४ क. ॰माः । विदित्वा इत्य॰ । ५ क. ॰पि या मे मोहा॰ । ६ ख. ॰नि च समस्तानि का॰ । ७ ग. ॰नापकृता॰ । ८ ख. ॰निन्द्यात्यन्तध॰ ।

ऋषिरुवाच—

गच्छ पापे यथाकामं यत्कार्यं तत्त्वया कृतम् । देवराजस्य[1] यत्क्षोभं कुर्वन्त्या भावचेष्टितैः ॥ ९४
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना । सतां साप्तपदं[2] मैत्र्य[3]मुषितोऽहं त्वया सह ॥ ९५
अथवा तव दोषः कः किंवा कुर्यामहं[4] तव । ममैव दोषो नितरां येनाहमजितेन्द्रियः ॥ ९६
यथा शक्रप्रियार्थिन्या कृतो मत्तपसो व्ययः । त्वया दृष्टिमहामोहमतुनाऽहं जुगुप्सितः ॥ ९७

व्यास उवाच—

यावदित्थं स विप्रर्षिस्तां ब्रवीति सुमध्यमाम् । तावत्स्खलत्स्वेदजला सा बभूवातिवेपथुः ॥९८
प्रवेपमानां स च तां स्विन्नगात्रलतां सतीम् । गच्छ गच्छेति सक्रोधमुवाच मुनिसत्तमः ॥ ९९
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् । आकाशगामिनी स्वेदं ममार्ज तरुपल्लवैः १००
वृक्षाद्वृक्षं ययौ बाला उदग्रारुणपल्लवैः । निर्ममार्ज च गात्राणि गलत्स्वेदजलानि वै ॥ १०१
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः । निर्जगाम सरोमाञ्चस्वेदरूपी तदङ्गतः ॥ १०२
तं वृक्षा जगृहुर्गर्भमेकं चक्रे च मारुतः । सोमेनाऽऽप्यायितो गोभिः स तदा ववृद्धे शनैः १०३
मारिषा नाम कन्याऽभूद्वृक्षाणां चारुलोचना । प्राचेतसानां सा भार्या दक्षस्य जननी द्विजाः ॥
स चापि भगवान्कण्डुः क्षीणे तपसि सत्तमः । पुरुषोत्तमाख्यं भो विप्रा विष्णोरायतनं ययौ ॥
ददर्श परमं क्षेत्रं मुक्तिदं भुवि दुर्लभम् । दक्षिणस्योदधेस्तीरे सर्वकामफलप्रदम् ॥ १०६
सुरम्यं वालुकाकीर्णं केतकीवनशोभितम् । नानाद्रुमलताकीर्णं नानापक्षिरुतं शिवम् ॥ १०७
सर्वत्र सुखसंचारं सर्वर्तुकुसुमान्वितम् । सर्वसौख्यप्रदं नृणां धन्यं सर्वगुणाकरम् ॥ १०८
भृग्वाद्यैः सेवितं पूर्वं मुनिसिद्धवरैस्तथा । गन्धर्वैः किंनरैर्यक्षैस्तथाऽन्यैर्मोक्षकाङ्क्षिभिः ॥१०९
ददर्श च हरिं तत्र देवैः सर्वैरलंकृतम् । ब्राह्मणाद्यैस्तथा वर्णैराश्रमस्थैर्निषेवितम् ॥ ११०
दृष्ट्वैव स तदा[5] क्षेत्रं देवं च पुरुषोत्तमम् । कृतकृत्यमिवाऽऽत्मानं मेने स मुनिसत्तमः ॥ १११
तत्रैकाग्रमना[6] भूत्वा चकाराऽऽराधनं हरेः । ब्रह्मपारमयं कुर्वञ्जपमेकाग्रमानसः ॥
ऊर्ध्वबाहुर्महायोगी स्थित्वाऽसौ मुनिसत्तमः ॥ ११२

मुनय ऊचुः—

ब्रह्मपारं मुने[7] श्रोतुमिच्छामः परमं शुभम्[8] । जपता कण्डुना देवो येनाऽऽराध्यत केशवः ॥११३

व्यास उवाच—

पारं परं विष्णुरपारपारः परः परेभ्यः परमात्मरूपः[9] ।
स ब्रह्मपारः परपारभूतः परः पराणामपि पारपारः ॥ ११४
स कारणं कारणं[10]संश्रितोऽपि तस्यापि हेतुः[13] परहेतुहेतुः[11] ।
कार्ये[12]ऽपि चैष सह कर्मकर्तृ………रूपैरनेकैरवतीह सर्वम्[14] ॥ ११५
ब्रह्म प्रभुर्ब्रह्म स सर्वभूतो ब्रह्म प्रजानां पतिरच्युतोऽसौ ।
ब्रह्माव्ययं नित्यमजं स विष्णुरपक्षयाद्यैरखिलैरसङ्गः ॥ ११६

१क. °स्य तु क्षेमं कु°। २ ख. साप्तपदी । ३ ख. मैत्री ह्युषि° । ४ ग. कुप्याम्यहं । ५ ख. °दा देवं क्षेत्रे वै पुरुषोत्तमे । कृ° । ६ क. ख. °मतिर्भूत्वा । ७ ग. मुनेः । ८ क. ख स्तवम् । ९ ग. परमार्थरूपी । १० क. °णतस्ततो° । ११ ख. °रपारहे° । १२ क. ग. कार्येषु चैवं ग° । १३ क. ख. °रशेषैर° । १४ क. विष्णुः ।

ब्रह्माक्षरमजं नित्यं यथाऽसौ पुरुषोत्तमः । तथा रागादयो दोषाः प्रयान्तु प्रशमं मम ॥ ११७

व्यास उवाच—

श्रुत्वा तस्य मुने[1]र्जाप्यं ब्रह्मपारं द्विजोत्तमाः । भक्तिं च परमां ज्ञात्वा सुदृढां पुरुषोत्तमः ॥ ११८
प्रीत्या स परया देवस्तदाऽसौ भक्तवत्सलः । गत्वा तस्य स[2]मीपं तु प्रोवाच मधुसूदनः ॥ ११९
मेघगम्भीरया वाचा दिशः संनादयन्निव । आरुह्य गरुडं विप्रा विनताकुलनन्दनम् ॥ १२०

श्रीभगवानुवाच—

मुने ब्रूहि परं कार्यं यत्ते मनसि वर्तते । वरदोऽहमनुप्राप्तो वरं वरय सुव्रत ॥ १२१
श्रुत्वैवं वचनं तस्य देवदेवस्य चक्रिणः । चक्षुरुन्मील्य सहसा ददर्श पुरतो हरिम् ॥ १२२
अतसीपुष्पसंकाशं पद्मपत्रायतेक्षणम् । शङ्खचक्रगदापाणिं मुकुटाङ्गदधारिणम् ॥ १२३
चतुर्बाहुमुदाराङ्गं पीतवस्त्रधरं शुभम् । श्रीवत्सलक्ष्मसंयुक्तं वनमालाविभूषितम् ॥ १२४
सर्वलक्षणसंयुक्तं सर्वरत्नविभूषितम् । दिव्यचन्दनलिप्ताङ्गं दिव्यमाल्यविभूषितम् ॥ १२५
ततः स विस्मयाविष्टो रोमाञ्चिततनूरुहः । दण्डवत्प्रणिपत्योर्व्यां प्रणाममकरोत्तदा ॥ १२६
अद्य मे सफलं जन्म अद्य मे सफलं तपः । इत्युक्त्वा मुनिशार्दूला[3]स्तं स्तोतुमुपचक्रमे ॥ १२७

कण्डुरुवाच—

नारायण हरे कृष्ण श्रीवत्साङ्क जगत्पते । जग[4]द्बीज जगद्धाम जगत्साक्षिन्नमोऽस्तु ते ॥ १२८
अव्यक्त [5]जिष्णो प्रभव प्रधानपुरुषोत्तम । पुण्डरीकाक्ष गोविन्द[6] लोकनाथ नमोऽस्तु ते ॥ १२९
हिरण्यगर्भ श्रीनाथ पद्मनाथ सनातन । भूगर्भ ध्रुव ईशान हृषीकेश नमोऽस्तु ते ॥ १३०
अनाद्यन्तामृताजेय जय त्वं जयतां वर । अजिताखण्ड श्रीकृष्ण श्रीनिवास नमोऽस्तु ते १३१
पर्जन्यधर्मकर्ता च दुष्पार दुरधिष्ठित । दुःखार्तिनाशन हरे जलशायिन्नमोऽस्तु ते ॥ १३२
भूतपाव्यक्त भूतेश भूततत्त्वैरनाकुल । भूताधिवास भूतात्मन्भूतगर्भ नमोऽस्तु ते ॥ १३३
यज्ञयज्वन्यज्ञधर यज्ञधाताऽभयप्रद । यज्ञगर्भ हिरण्याङ्ग पृ[7]श्निगर्भ नमोऽस्तु ते ॥ १३४
क्षेत्रज्ञः क्षेत्रभृत्क्षेत्री क्षेत्रहा क्षेत्रकृद्वशी । क्षेत्रात्मन्क्षेत्ररहित क्षेत्रस्रष्ट्रे नमोऽस्तु ते ॥ १३५
गुणालय गुणावास गुणाश्रय गुणावह । गुणभोक्तृ गुणाराम गुणत्यागिन्नमोऽस्तु ते ॥ १३६
त्वं विष्णुस्त्वं हरिश्चक्री त्वं जिष्णुस्त्वं जनार्दनः ।त्वं भूतस्त्वं वषट्कारस्त्वं भव्यस्त्वं भवत्प्रभुः
त्वं भूतकृत्त्वमव्यक्तस्त्वं भवो भूतभृद्भवान् । त्वं भूतभावनो देवस्त्वामाहुरजमीश्वरम् ॥ १३८
त्वमनन्तः कृतज्ञस्त्वं प्रकृतिस्त्वं वृषाकपिः । त्वं रुद्रस्त्वं दुराधर्षस्त्वममोघस्त्वमीश्वरः ॥ १३९
त्वं विश्वकर्मा जिष्णुस्त्वं त्वं शंभुस्त्वं वृषाकृतिः । त्वं शंकरस्त्वमुशना त्वं सत्यं त्वं तपो जनः
त्वं विश्व[9]जेता त्वं शर्म त्वं शरण्यस्त्वमक्षरम् । त्वं शंभुस्त्वं स्वयंभूश्च त्वं ज्येष्ठस्त्वं परायणः ॥
त्वमादित्य[10]स्त्वमोंकारस्त्वं प्राणस्त्वं तमिस्रहा । त्वं पर्जन्यस्त्वं प्रथितस्त्वं वेधास्त्वं सुरेश्वरः ॥
त्वमृग्यजुः साम चैव त्वमात्मा संमतो भवान् । त्वमग्निस्त्वं च पवनस्त्वमापो वसुधा भवान् ॥

---

१ क. °नेर्वाक्यं ब्र°। ख. °नेर्जप्यं । २ ख. समीपे । ३ क. ख. °लाः संस्तो°। ४ ख. °गद्धातर्जग°। ५ क. विष्णो । ६ क. °न्द जगन्नाथ जगत्पते । ७ ख. पृथ्वीग° । ८ क. °ष्णुस्त्वमश्विनौ त्वं जनार्दनः । त्वं । ९ क. ख. °श्वरेतास्त्वं श°। १० ख. °स्त्वमाकाशस्त्वं ।

त्वं स्रष्टा त्वं तथा भोक्ता होता त्वं च हविः क्रतुः । त्वं प्रभुस्त्वं विभुः श्रेष्ठस्त्वं लोकपतिरच्युतः
त्वं सर्वदर्शनः श्रीमांस्त्वं सर्वदमनोऽरिहा । त्वमहस्त्वं तथा रात्रिस्त्वामाहुर्वत्सरं बुधाः ॥१४५
त्वं कालस्त्वं कला काष्ठा त्वं मुहूर्तः क्षणा लवाः । त्वं बालस्त्वं तथा वृद्धस्त्वं पुमान्स्त्री नपुंसकः
त्वं विश्वयोनिस्त्वं चक्षुस्त्वं स्थाणुस्त्वं शुचिश्रवाः । त्वं शाश्वतस्त्वमजितस्त्वमुपेन्द्रस्त्वमुत्तमः ॥
त्वं सर्वविश्वसुखदस्त्वं वेदाङ्गं त्वमव्ययः । त्वं वेदवेदस्त्वं धाता विधाता त्वं समाहितः॥ १४८
त्वं जलनिधिरामूलं त्वं धाता त्वं पुनर्वसुः । त्वं वैद्यस्त्वं धृतात्मा च त्वमतीन्द्रियगोचरः १४९
त्वमग्रणीर्ग्रामणीस्त्वं त्वं सुपर्णस्त्वमादिमान् । त्वं संग्रहस्त्वं सुमहत्त्वं धृतात्मा त्वमच्युतः १५०
त्वं यमस्त्वं च नियमस्त्वं प्रांशुस्त्वं चतुर्भुजः । त्वमेवान्नान्तरात्मा त्वं परमात्मा त्वमुच्यते १५१
त्वं गुरुस्त्वं गुरुतमस्त्वं वामस्त्वं प्रदक्षिणः । त्वं पिप्पलस्त्वमगमस्त्वं व्यक्तस्त्वं प्रजापतिः १५२
हिरण्यनाभस्त्वं देवस्त्वं शशी त्वं प्रजापतिः । अनिर्देश्यवपुस्त्वं वै त्वं यमस्त्वं सुरारिहा १५३
त्वं च संकर्षणो देवस्त्वं कर्ता त्वं सनातनः । त्वं वासुदेवोऽमेयात्मा त्वमेव गुणवर्जितः ॥१५४
त्वं ज्येष्ठस्त्वं वरिष्ठस्त्वं त्वं सहिष्णुश्च माधवः । सहस्रशीर्षा त्वं देवस्त्वमव्यक्तः सहस्रदृक् १५५
सहस्रपादस्त्वं देवस्त्वं विराट्त्वं सुरप्रभुः । त्वमेव तिष्ठसे भूयो देवदेव दशाङ्गुलः ॥ १५६
यद्भूतं तत्त्वमेवोक्तः पुरुषः शक्र उत्तमः । यद्भाव्यं तत्त्वमीशानस्त्वममृतस्त्वं तथाऽमृतः ॥ १५७
त्वत्तो रोहत्ययं लोको महीयांस्त्वमनुत्तमः । त्वं ज्यायान्पुरुषस्त्वं च त्वं देव दशधा स्थितः ॥
विश्वभूतश्चतुर्भागो नवभागोऽमृतो दिवि । नवभागोऽन्तरिक्षस्थः पौरुषेयः सनातनः ॥ १५९
भागद्वयं च भूसंस्थं चतुर्भागोऽप्यभूदिह । त्वत्तो यज्ञाः संभवन्ति जगतो वृष्टिकारणम् ॥१६०
त्वत्तो विराट्समुत्पन्नो जगतो हृदि यः पुमान् । सोऽतिरिच्यत भूतेभ्यस्तेजसा यशसा श्रिया ॥
त्वत्तः सुराणामाहारः पृषदाज्यमजायत । ग्राम्यारण्याश्चौषधयस्त्वत्तः पशुमृगादयः ॥ १६२
ध्येयध्यानपरस्त्वं च कृतवानसि चौषधीः । त्वं देवदेव सप्तास्य कालाख्यो दीप्तविग्रहः ॥१६३
जङ्गमाजङ्गमं सर्वं जगदेतच्चराचरम् । त्वत्तः सर्वमिदं जातं त्वयि सर्वं प्रतिष्ठितम् ॥ १६४
अनिरुद्धस्त्वं माधवस्त्वं प्रद्युम्नः सुरारिहा । देव सर्वसुरश्रेष्ठ सर्वलोकपरायण ॥ १६५
त्राहि मामरविन्दाक्ष नारायण नमोऽस्तु ते । नमस्ते भगवन्विष्णो नमस्ते पुरुषोत्तम ॥ १६६
नमस्ते सर्वलोकेश नमस्ते कमलालय । गुणालय नमस्तेऽस्तु नमस्तेऽस्तु गुणाकर ॥ १६७
वासुदेव नमस्तेऽस्तु नमस्तेऽस्तु सुरोत्तम । जनार्दन नमस्तेऽस्तु नमस्तेऽस्तु सनातन ॥ १६८
नमस्ते योगिनां गम्य योगावास नमोऽस्तु ते । गोपते श्रीपते विष्णो नमस्तेऽस्तु मरुत्पते १६९
जगत्पते जगत्सूते नमस्ते ज्ञानिनां पते । दिवस्पते नमस्तेऽस्तु नमस्तेऽस्तु महीपते ॥ १७०
नमस्ते मधुहन्त्रे च नमस्ते पुष्करेक्षण । कैटभघ्न नमस्तेऽस्तु सुब्रह्मण्य नमोऽस्तु ते ॥ १७१
नमोऽस्तु ते महामीन श्रुतिपृष्ठधराच्युत । समुद्रसलिलक्षोभ पद्मजाह्लादकारिणे ॥ १७२
अश्वशीर्ष महाघोण महापुरुषविग्रह । मधुकैटभहन्त्रे च नमस्ते तुरगानन ॥ १७३
महाकमठभोगाय पृथिव्युद्धरणाय च । विधृताद्रिस्वरूपाय महाकूर्माय ते नमः ॥ १७४
नमो महावराहाय पृथिव्युद्धारकारिणे । नमश्चाऽऽदिवराहाय विश्वरूपाय वेधसे ॥ १७५

---

१ ख. द्विजाः । २ ग. °दान्तस्त्वम° । ३ ख. °स्त्वं पशु° । ४ क. ख. °स्त्वं बालस्त्वं । ५ क. °भागान्त° । ६ क. ग. °क्षस्थाः पौं° । ७ क. ग. °षेयाः स° । ८ क. ग. °तनाः । भा° । ९ ख. °तो व्युष्टि° । १० क. तुरगानन । ११ ख. °से । जगन्नाथाय सु° ।

नमोऽनन्ताय सूक्ष्माय मुख्याय च वराय च । परमाणुस्वरूपाय योगिगम्याय ते नमः ॥ १७६

तस्मै नमः कारणकारणाय योगीन्द्रवृत्तनिलयाय सुदुर्विदाय ।

क्षीरार्णवाश्रितमहाहिसुतल्पगाय तुभ्यं नमः कनकरत्नसुकुण्डलाय ॥ १७७

व्यास उवाच—

इत्थं स्तुतस्तदा तेन प्रीतः प्रोवाच माधवः । क्षिप्रं ब्रूहि मुनिश्रेष्ठ मत्तो यदभिवाञ्छसि ॥ १७८

कण्डुरुवाच—

संसारेऽस्मिञ्जगन्नाथ दुस्तरे लोमहर्षणे । अनित्ये दुःखबहुले कदलीदलसंनिभे ॥ १७९

निराश्रये निरालम्बे जलबुद्बुदचञ्चले । सर्वोपद्रवसंयुक्ते दुस्तरे चातिभैरवे ॥ १८०

भ्रमामि सुचिरं कालं मायया मोहितस्तव । न चान्तमभिगच्छामि विषयासक्तमानसः ॥ १८१

त्वामहं चाद्य देवेश संसारभयपीडितः । गतोऽस्मि शरणं कृष्ण मामुद्धर भवार्णवात् ॥ १८२

गन्तुमिच्छामि परमं पदं यत्ते सनातनम् । प्रसादात्तव देवेश पुनरावृत्तिदुर्लभम् ॥ १८३

श्रीभगवानुवाच—

भक्तोऽसि मे मुनिश्रेष्ठ मामाराधय नित्यशः । मत्प्रसादाद्ध्रुवं मोक्षं प्राप्स्यसि त्वं समीहितम् १८४

मद्भक्ताः क्षत्रिया वैश्याः स्त्रियः शूद्रान्त्यजातिजाः । प्राप्नुवन्ति परां सिद्धिं किं पुनस्त्वं द्विजोत्तम

श्वपाकोऽपि च मद्भक्तः सम्यक्श्रद्धासमन्वितः । प्राप्नोत्यभिमतां सिद्धिमन्येषां तत्र का कथा ॥

व्यास उवाच—

एवमुक्त्वा तु तं विप्राः स देवो भक्तवत्सलः । दुर्विज्ञेयगतिर्विष्णुस्तत्रैवान्तरधीयत ॥ १८७

गते तस्मिन्मुनिश्रेष्ठाः कण्डुः संहृष्टमानसः । सर्वान्कामान्परित्यज्य स्वस्थचित्तो भवत्पुनः ॥ १८८

सर्वेन्द्रियाणि संयम्य निर्ममो निरहंकृतिः । एकाग्रमानसः सम्यग्ध्यात्वा तं पुरुषोत्तमम् ॥ १८९

निर्लेपं निर्गुणं शान्तं सत्तामात्रव्यवस्थितम् । अवाप परमं मोक्षं सुराणामपि दुर्लभम् ॥ १९०

यः पठेच्छृणुयाद्वाऽपि कथां कण्डोर्महात्मनः । विमुक्तः सर्वपापेभ्यः स्वर्गलोकं स गच्छति ॥

एवं मया मुनिश्रेष्ठाः कर्मभूमिरुदाहृता । मोक्षक्षेत्रं च परमं देवं च पुरुषोत्तमम् ॥ १९२

ये पश्यन्ति विभुं स्तुवन्ति वरदं ध्यायन्ति मुक्तिप्रदं

भक्त्या श्रीपुरुषोत्तमाख्यमजरं संसारदुःखापहम् । १९३

ते भुक्त्वा मनुजेन्द्रभोगममलाः स्वर्गे च दिव्यं सुखं

पश्चाद्यान्ति समस्तदोषरहिताः स्थानं हरेरव्ययम् ॥ १९४

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे कण्डोरुपाख्याननिरूपणं नामाष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९४७५

---

१ क. °दसंनिभे । स° । २ क. न शान्तिम° । ३ ग. °न्येषामत्र । ४ ग. °त्तो जितेन्द्रियः । स° । ५ क. ख. °म्यग्ज्ञात्वा । ६ क सुचिरं ।

अथोनाशीत्यधिकशततमोऽध्यायः ।

लोमहर्षण उवाच—

व्यासस्य वचनं श्रुत्वा मुनयः संयतेन्द्रियाः[1] । प्रीता बभूवुः संहृष्टा विस्मिताश्च पुनः पुनः ॥ १

मुनय ऊचुः—

अहो[2] भारतवर्षस्य त्वया संकीर्तिता गुणाः । तद्वच्छ्रीपुरुषाख्यस्य क्षेत्रस्य पुरुषोत्तम ॥ २
विस्मयो हि न चैकस्य श्रुत्वा माहात्म्यमुत्तमम् । पुरुषाख्यस्य क्षेत्रस्य प्रीतिश्च वदतां वर ॥ ३
चिरात्प्रभृति चास्माकं संशयो हृदि वर्तते । त्वदृते संशयस्यास्य च्छेत्ता नान्योऽस्ति भूतले ॥ ४
उत्पत्तिं बलदेवस्य कृष्णस्य च महीतले । भद्रायाश्चैव कात्स्न्येंन पृच्छामस्त्वां महामुने ॥ ५
किमर्थं तौ समुत्पन्नौ कृष्णसंकर्षणावुभौ । वसुदेवसुतौ वीरौ[3] स्थितौ नन्दगृहे मुने ॥ ६
निःसारे मृत्युलोकेऽस्मिन्दुःखप्रायेऽतिचञ्चले । जलबुद्बुदसंकाशे भैरवे लोमहर्षणे ॥ ७
विण्मूत्रपिच्छलं कष्टं संकटं दुःखदायकम् । कथं घोरतरं तेषां *गर्भवासमरोचत ॥ ८
यानि कर्माणि चक्रुस्ते समुत्पन्ना महीतले । विस्तरेण मुने तानि ब्रूहि नो वदतां वर ॥ ९
समग्रं चरितं तेषामद्भुतं चातिमानुषम् । कथं स भगवान्देवः सुरेशः सुरसत्तमः ॥ १०
वसुदेवकुले धीमान्वासुदेवत्वमागतः । अमरैश्चाऽऽवृतं पुण्यं पुण्यकृद्भिरलंकृतम् ॥ ११
देवलोकं किमुत्सृज्य मर्त्यलोक इहाऽऽगतः । देवमानुषयोर्नेता द्योर्भुवः प्रभवोऽव्ययः ॥ १२
किमर्थं दिव्यमात्मानं मानुषेषु न्ययोजयत् । यश्चक्रं वर्तयत्येको मानुषाणामनामयम् ॥ १३
स मानुष्ये कथं बुद्धिं चक्रे चक्रगदाधरः । गोपायनं यः कुरुते जगतः सार्वभौतिकम् ॥ १४
स कथं गां गतो विष्णुर्गोपत्वमकरोत्प्रभुः । महाभूतानि भूतात्मा यो दधार चकार च ॥ १५
श्रीगर्भः स कथं गर्भे स्त्रिया भूचरया धृतः । येन लोकान्क्रमैर्जित्वा त्रिभिर्वै त्रिदशेप्सया ॥ १६
स्थापिता जगतो मार्गास्त्रिवर्गाश्चाभवंस्त्रयः । योऽन्तकाले जगत्पीत्वा कृत्वा तोयमयं वपुः ॥ १७
लोकमेकार्णवं चक्रे दृश्यादृश्येन चाऽऽत्मना । यः पुराणः पुराणात्मा वाराहं रूपमास्थितः १८
विषाणाग्रेण वसुधामुज्जहारारिसूदनः । यः पुरा पुरुहूतार्थे त्रैलोक्यमिदमव्ययम् ॥ १९
ददौ जित्वा वसुमतीं सुराणां सुरसत्तमः । येन सैंहवपुः कृत्वा द्विधा कृत्वा च तत्पुनः ॥ २०
पूर्वदैत्यो महावीर्यो हिरण्यकशिपुर्हतः । यः पुरा ह्यनलो भूत्वा औरवः संवर्तको विभुः ॥ २१
पातालस्थोऽर्णवरसं पपौ तोयमयं हरिः । सहस्रचरणं ब्रह्म सहस्रांशुसहस्रदम् ॥ २२
सहस्रशिरसं देवं यमाहुर्वै युगे युगे । नाभ्यां पद्मं समुद्भूतं यस्य पैतामहं गृहम् ॥ २३
एकार्णवे नागलोके सद्धिरण्मयपङ्कजम् । येन ते निहता दैत्याः संग्रामे तारकामये ॥ २४
येन देवमयं कृत्वा सर्वायुधधरं वपुः । गुहासंस्थेन चोत्सिक्तः कालनेमिर्निपातितः ॥ २५
उत्तरान्ते समुद्रस्य क्षीरोदस्यामृतोदधौ । यः शेते शाश्वतं योगमास्थाय तिमिरं महत् ॥ २६

सुरारणी गर्भमधत्त दिव्यं तपःप्रकर्षाददितिः पुराणम्[11] ।
शक्रं च यो दैत्यगणावरुद्धं[12] गर्भावधानेन कृतं चकार ॥ २७

* गर्भस्थानमिति तूचितम् ।

१ ग. सर्जितें । २ ग. विस्मये । ३ क. °रौ सा च न° । ख. °रौ सा च तत्र गृ° । ४ ख. °न्दुःखे पापेऽति° । ५ क. त्वं । ६ ख. भूचर° । ७ ग. °न चर्मणा । ८ क. चोद्रिक्तः । ९ ग. सुगावली । १० ग. °प्रहर्षा° । ११ क. सुराणाम् । १२ क. °वबुद्धी ग° ।

पदानि यो योगमयानि कृत्वा चकार दैत्यान्सलिलेशयस्थान् ।
कृत्वा च देवांस्त्रिदशेश्वरांस्तु चक्रे सुरेशं पुरुहूतमेव ॥ २८
गार्हपत्येन विधिना अन्वाहार्येण कर्मणा । अग्निमावहनीयं च वेदं दीक्षां समिद्ध्रुवम् ॥ २९
प्रोक्षणीयं स्रुवं चैव आवभृथ्यं तथैव च । अवाक्पाणिस्तु यश्चक्रे हव्यभागभुजस्तथा ॥ ३०
हव्यादांश्च सुरांश्चक्रे कव्यादांश्च पितॄनथ । भोगार्थे यज्ञविधिनाऽयोजयद्यज्ञकर्मणि ॥ ३१
पात्राणि दक्षिणां दीक्षां चरूंश्चोलूखलानि च । यूपं समित्स्रुवं सोमं पवित्रान्परिधीनपि ॥ ३२
यज्ञियानि च द्रव्याणि चमसांश्च तथाऽपरान् । सदस्यान्यजमानांश्च मेधादींश्च क्रतूत्तमान् ॥३३
विबभाज पुरा यस्तु पारमेष्ठ्येन कर्मणा । युगानुरूपं यः कृत्वा लोकाननुपराक्रमात् ॥ ३४
क्षणा निमेषाः काष्ठाश्च कलास्त्रैकाल्यमेव च । मुहूर्तास्तिथयो मासा दिनं संवत्सरस्तथा ॥ ३५
ऋतवः कालयोगाश्च प्रमाणं [1]त्रिविधं त्रिषु । आयुःक्षेत्राण्युपचयो लक्षणं रूपसौष्ठवम् ॥ ३६
त्रयो लोकास्त्रयो देवास्त्रैविद्यं पावकास्त्रयः । त्रैकाल्यं त्रीणि कर्माणि त्रयो वर्णास्त्रयो गुणाः ३७
सृष्टा लोकाः पुरा सर्वे येनानन्तेन कर्मणा । सर्वभूतगतः स्रष्टा सर्वभूतगुणात्मकः ॥ ३८
नृणामिन्द्रियपूर्वेण योगेन रमते च यः । गतागताभ्यां योगेन य एव विधिरीश्वरः ॥ ३९
यो गतिर्धर्मयुक्तानामगतिः पापकर्मणाम् । चातुर्वर्ण्यस्य प्रभवश्चातुर्वर्ण्यस्य रक्षिता ॥ ४०
चातुर्विद्यस्य यो वेत्ता चातुराश्रम्यसंश्रयः । दिगन्तरं नभो भूमिर्वायुर्वाऽपि विभावसुः ॥ ४१
चन्द्रसूर्यमयं ज्योतिर्युगेशः क्षणदाचरः । यः परं श्रूयते ज्योतिर्यः परं श्रूयते तपः ॥ ४२
यं परं प्राहुरपरं यः परः परमात्मवान् । आदित्यानां तु यो देवो यश्च दैत्यान्तको विभुः ॥४३
युगान्तेष्वन्तको यश्च यश्च लोकान्तकान्तकः । सेतुर्यो लोकसेतूनां मेध्यो यो मेध्यकर्मणाम् ॥
वेद्यो यो वेदविदुषां प्रभुर्यः प्रभवात्मनाम् । सोमभूतश्च सौम्यानामग्निभूतोऽग्निवर्चसाम् ॥ ४५
यः शक्राणामीशभूतस्तपोभूतस्तपस्विनाम् । विनयो नयवृत्तीनां तेजस्तेजस्विनामपि ॥ ४६
विग्रहो विग्रहार्हाणां गतिर्गतिमतामपि । आकाशप्रभवो वायुर्वायोः [3]प्राणाद्धुताशनः ॥ ४७
दिवो हुताशनः प्राणः प्राणोऽग्निर्मधुसूदनः । रसाच्छोणितसंभूतिः शोणितान्मांसमुच्यते ॥ ४८
मांसात्तु मेदसो जन्म मेदसोऽस्थि निरुच्यते । अस्थ्नो मज्जा समभवन्मज्जातः शुक्रसंभवः ॥
शुक्राद्गर्भः समभवद्रसमूलेन कर्मणा । [4]तत्रापां प्रथमो भागः स सौम्यो राशिरुच्यते ॥ ५०
गर्भोष्मसंभवो ज्ञेयो द्वितीयो राशिरुच्यते । शुक्रं सोमात्मकं विद्यादार्तवं पावकात्मकम् ॥ ५१
[6]भावा रसानु[7]गाश्चैषां बीजे च शशिपावकौ । कफवर्गे भवेच्छुक्रं पित्तवर्गे च शोणितम् ॥ ५२
कफस्य हृदयं स्थानं नाभ्यां पित्तं प्रतिष्ठितम् । देहस्य मध्ये हृदयं स्थानं तन्मनसः स्मृतम् ॥
नाभिकोष्ठान्तरं यत्तु तत्र देवो हुताशनः । मनः प्रजापतिर्ज्ञेयः कफः सोमो विभाव्यते ॥ ५४
पित्तमग्निः स्मृतं त्वेवमग्निसोमात्मकं जगत् । एवं प्रवर्तिते गर्भे वर्धितेऽर्बुदसंनिभे ॥ ५५
वायुः प्रवेशं संचक्रे संगतः परमात्मनः । स पञ्चधा शरीरस्थो भिद्यते [8]वर्तते पुनः ॥ ५६
प्राणापानौ समानश्च उदानो व्यान एव च । प्राणोऽस्य परमात्मानं वर्धयन्परिवर्तते ॥ ५७
अपानः पश्चिमं कायमुदानोऽर्ध्वं शरीरिणः । व्यानस्तु व्याप्यते येन समानः संनिवर्तते ॥ ५८

---

१ क. विविधं । २ ख. यो नेता स ए° । ३ ख. ग. प्राणो हुता° । ४ ख. तत्र यः प्र° । ५ ख. गर्भः । ६ ख. भावौ । ७ ख. °नुगौ ज्ञेयौ वीर्ये च श° । ८ ख. वर्धते ।

भूतावाप्तिस्ततस्तस्य जायेतेन्द्रियगोचरा । पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ॥ ५९
तस्येन्द्रियनिविष्टानि स्वं स्वं भागं प्रचक्रिरे । पार्थिवं देहमाहुस्तु प्राणात्मानं च मारुतम् ॥६०
छिद्राण्याकाशयोनीनि जलात्स्रावः प्रवर्तते । ज्योतिश्चक्षूंषि तेजश्च आत्मा तेषां मनः स्मृतम् ६१
ग्रामाश्च विषयाश्चैव यस्य वीर्यात्प्रवर्तिताः । इत्येतान्पुरुषः सर्वान्सृजँलोकान्सनार्तनः ॥ ६२
नैधनेऽस्मिन्कथं लोके नरत्वं विष्णुरागतः । एष नः संशयो ब्रह्मन्नेष नो विस्मयो महान् ॥६३
कथं गतिर्गतिमतामापन्नो मानुषीं तनुम् । आश्चर्यं परमं विष्णुर्देवैर्दैत्यैश्च कथ्यते ॥ ६४
विष्णोरुत्पत्तिमाश्चर्यं कथयस्व महामुने । प्रख्यातबलवीर्यस्य विष्णोरमिततेजसः ॥ ६५
कर्मणाऽऽश्चर्यभूतस्य विष्णोस्तत्त्वमिहोच्यताम् । कथं स देवो देवानामार्तिहा पुरुषोत्तमः ॥ ६६
सर्वव्यापी जगन्नाथः सर्वलोकमहेश्वरः । सर्गस्थित्यन्तकृद्देवः सर्वलोकसुखावहः ॥ ६७
अक्षयः शाश्वतोऽनन्तः क्षयवृद्धिविवर्जितः । निर्लेपो निर्गुणः सूक्ष्मो निर्विकारो निरञ्जनः ६८
सर्वोपाधिविनिर्मुक्तः सत्तामात्रव्यवस्थितः । अविकारी विभुर्नित्यः परमात्मा सनातनः ॥ ६९
अचलो निर्मलो व्यापी नित्यतृप्तो निराश्रयः । विशुद्धं श्रूयते यस्य हरित्वं च कृते युगे ॥ ७०
वैकुण्ठत्वं च देवेषु कृष्णत्वं मानुषेषु च । ईश्वरस्य हि तस्येमां गहनां कर्मणो गतिम् ॥ ७१
समतीतां भविष्यं च श्रोतुमिच्छा प्रवर्तते । अव्यक्तो व्यक्तलिङ्गस्थो य एष भगवान्प्रभुः ॥७२
नारायणो ह्यनन्तात्मा प्रभवोऽव्यय एव च । एष नारायणो भूत्वा हरिरासीत्सनातनः ॥ ७३
ब्रह्मा शक्रश्च रुद्रश्च धर्मः शुक्रो बृहस्पतिः । प्रधानात्मा पुरा ह्येष ब्रह्माणमसृजत्प्रभुः ॥ ७४
सोऽसृजत्पूर्वपुरुषः पुरा कल्पे प्रजापतीन् । एवं स भगवान्विष्णुः सर्वलोकमहेश्वरः ॥
किमर्थं मर्त्यलोकेऽस्मिन्यातो यदुकुले हरिः ॥ ७५

इति श्रीमहापुराणे आदिब्राह्मे स्वयंभुऋषिसंवादे ऋषिप्रश्ननिरूपणं नामोनाशीत्यधिकशततमोऽध्यायः ॥ १७९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९५५०

अथाशीत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

नमस्कृत्वा सुरेशाय विष्णवे प्रभविष्णवे । पुरुषाय पुराणाय शाश्वतायाव्ययाय च ॥ १
चतुर्व्यूहात्मने तस्मै निर्गुणाय गुणाय च । वरिष्ठाय गरिष्ठाय वरेण्यायामिताय च ॥ २
यज्ञाङ्गायाखिलाङ्गाय देवाद्यैरीप्सिताय च । यस्मादणुतरं नास्ति यस्मान्नास्ति बृहत्तरम् ॥ ३
येन विश्वमिदं व्याप्तमजेन सचराचरम् । आविर्भावतिरोभावदृष्टादृष्टविलक्षणम् ॥ ४
वदन्ति यत्सृष्टमिति तथैवाप्युपसंहृतम् । ब्रह्मणे चाऽऽदिदेवाय नमस्कृत्य समाधिना ॥ ५
अविकाराय शुद्धाय नित्याय परमात्मने । सदैकरूपरूपाय जिष्णवे विष्णवे नमः ॥ ६
नमो हिरण्यगर्भाय हरये शंकराय च । वासुदेवाय ताराय सर्गस्थित्यन्तकारिणे ॥ ७
एकानेकस्वरूपाय स्थूलसूक्ष्मात्मने नमः । अव्यक्तव्यक्तभूताय विष्णवे मुक्तिहेतवे ॥ ८

---

१ ख. योग । २ ग. देवमा । ३ ग. यन्ना । ४ ग. तनान् । नै । ५ ख. विष्णुत्वं । ६ क. यामृता । ७ ख. न्तकर्मणे।

सर्गस्थितिविनाशानां जगतो यो जगन्मयः । मूलभूतो नमस्तस्मै विष्णवे परमात्मने ॥ ९
आधारभूतं विश्वस्याप्यणीयांसमणीयसाम् । प्रणम्य सर्वभूतस्थमच्युतं पुरुषोत्तमम् ॥ १०
[1]ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः । तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥ ११
विष्णुं ग्रसिष्णुं विश्वस्य स्थितिसर्गे तथा प्रभुम् । अनादिं जगतामीशमजमक्षयमव्ययम् ॥ १२
कथयामि यथा पूर्वं यक्षाद्यैर्मुनिसत्तमैः । पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ॥ १३
ऋक्सामान्युद्गिरन्वक्त्रैर्यः पुनाति जगत्त्रयम् । प्रणिपत्य तथेशानमेकार्णवविनिर्गतम् ॥ १४
यस्यासुरगणा यज्ञान्विलुम्पन्ति न याजिनाम् । प्रवक्ष्यामि मतं कृत्स्नं ब्रह्मणोऽव्यक्तजन्मनः १५
येन सृष्टिं समुद्दिश्य धर्माद्याः प्रकटीकृताः । आपो नारा इति [2]प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः १६
अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः । स देवो भगवान्सर्वं व्याप्य नारायणो विभुः १७
चतुर्धा संस्थितो ब्रह्मा सगुणो निर्गुणस्तथा । एका मूर्तिरनुद्देश्या शुक्लां पश्यन्ति तां बुधाः १८
ज्वालामाला[3]वनद्धाङ्गी निष्ठा सा योगिनां परा । दूरस्था चान्तिकस्था च विज्ञेया सा गुणा[4]तिगा
वासुदेवाभिधाना[5]ऽसौ निर्ममत्वेन दृश्यते । रूपवर्णादयस्तस्या न भावाः [6]कल्पनामयाः ॥ २०
आस्ते च सा सदा शुद्धा सुप्रतिष्ठैकरूपिणी । द्वितीया पृथिवीं मूर्ध्ना शेषाख्या धारयत्यधः २१
तामसी सा समाख्याता तिर्यक्त्वं समुपागता । तृतीया कर्म कुरुते प्रजापालनतत्परा ॥ २२
सत्त्वोद्रिक्ता तु सा ज्ञेया धर्मसंस्थानकारिणी । चतुर्थी जलमध्यस्था शेते पन्नग[7]तल्पगा ॥ २३
रजस्तस्या गुणः सर्गं सा करोति सदैव हि । या तृतीया हरेर्मूर्तिः प्रजापालनतत्परा ॥ २४
सा तु धर्मव्यवस्थानं करोति नियतं भुवि । प्रोद्धतानसुरान्हन्ति धर्मव्युच्छित्तिकारिणः ॥ २५
पाति देवान्[8]सगन्धर्वान्धर्मरक्षापरायणान् । यदा यदा च धर्मस्य ग्लानिः समुपजायते ॥ २६
अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजत्यसौ । भूत्वा पुरा वराहेण तुण्डेनापो निरस्य च ॥ २७
एकया दंष्ट्रयोत्खाता नलिनीव वसुंधरा । कृत्वा नृसिंहरूपं च हिरण्यकशिपुर्हतः ॥ २८
विप्रचित्तिमुखाश्चान्ये दानवा विनिपातिताः । वामनं रूपमास्थाय बलिं [9]संयम्य मायया ॥ २९
त्रैलोक्यं[10] क्रान्तवानेव विनिर्जित्य दितेः [11]सुतान् । भृगोर्वंशे समुत्पन्नो जामदग्न्यः प्रतापवान् ३०
जघान क्षत्रियान्रामः पितुर्वधमनुस्मरन् । तथाऽत्रितनयो भूत्वा दत्तात्रेयः प्रतापवान् ॥ ३१
योगमष्टाङ्गमाचख्यावलर्काय महात्मने । रामो दाशरथिर्भूत्वा स तु देवः प्रतापवान् ॥ ३२
जघान रावणं संख्ये त्रैलोक्यस्य भयंकरम् । यदा चैकार्णवे सुप्तो देवदेवो जगत्पतिः ॥ ३३
सहस्रयुगपर्यन्तं नागपर्यङ्कगो विभुः । योगनिद्रां समास्थाय स्वे महिम्नि व्यवस्थितः ॥ ३४
त्रैलोक्यमुदरे कृत्वा जगत्स्थावरजङ्गमम् । जनलोक[12]गतैः सिद्धैः स्तूयमानो महर्षिभिः ॥ ३५
तस्य नाभौ समुत्पन्नं पद्मं [13]दिक्पत्रमण्डितम्[14] । मरुत्किञ्जल्कसंयुक्तं गृहं पैतामहं [15]वरम् ॥ ३६
यत्र ब्रह्मा समुत्पन्नो देवदेवश्चतुर्मुखः । तदा कर्णमलोद्भूतौ दानवौ मधुकैटभौ ॥ ३७
महाबलौ महावीर्यौ ब्रह्माणं हन्तुमुद्यतौ । जघान तौ दुराधर्षौ उत्थाय[16] शयनोदधेः ॥ ३८

---

१ ख. ज्ञानाद्यरू° । २ ख. ख्याता । ३ ख. °लाज्वलद्देहा नि° । ४ क. °णानुगा । ५ ख. °ना सा नि° । ६ क. ख. कल्पिता मया । आ° । ७ क. ख. °गमध्यगा । ८ ख. °न्सतश्चान्यान्ध° । ९ क. संयाच्य । १० क. °क्यं क्रमता तेन निर्जिताश्च दि° । ११ क. सुताः । १२ ख. °गणैः सि° । १३ क. दिव्यमखण्डि° । १४ ग. °मू । ज्वलनार्कप्रतीकाशं शैलकेशरमण्डितम् । मेरुकिञ्ज° । १५ क शुभम् । १६ ख. °य स महोदधौ । ए° ।

एवमादींस्तथैवान्यानसंख्यातुमिहोत्सहे । अवतारो ह्यजस्येह माथुरः सांप्रतस्त्वयम् ॥ ३९
इति सा सात्त्विकी मूर्तिरवतारं करोति च । प्रद्युम्नेति समाख्याता रक्षाकर्मण्यवस्थिता ॥ ४०
देवत्वेऽथ मनुष्यत्वे तिर्यग्योनौ च संस्थिता । गृह्णाति तत्स्वभावश्च वासुदेवेच्छया सदा ॥ ४१
ददात्यभिमतान्कामान्पूजिता सा द्विजोत्तमाः । एवं मया समाख्यातः कृतकृत्योऽपि यः प्रभुः ॥
मानुषत्वं गतो विष्णुः शृणुध्वं चोत्तरं पुनः ॥ ४२

इति श्रीमहापुराणे आदिब्राह्मे व्यासऋषिसंवादे चतुर्व्यूहवर्णनं नामाशीत्यधिकशततमोऽध्यायः ॥ १८० ॥

आदितः श्लोकानां समष्ट्यङ्काः—९५९२

अथैकाशीत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

शृणुध्वं मुनिशार्दूलाः प्रवक्ष्यामि समासतः । अवतारं हरेश्चात्र भारावतरणेच्छया ॥ १
यदा यदा त्वधर्मस्य वृद्धिर्भवति भो द्विजाः । धर्मश्च ह्रासमभ्येति तदा देवो जनार्दनः ॥ २
अवतारं करोत्यत्र द्विधा कृत्वाऽऽत्मनस्तनुम् । साधूनां रक्षणार्थाय धर्मसंस्थापनाय च ॥ ३
दुष्टानां निग्रहार्थाय अन्येषां च सुरद्विषाम् । प्रजानां रक्षणार्थाय जायतेऽसौ युगे युगे ॥ ४
पुरा किल मही विप्रा भूरिभारावपीडिता । जगाम धरणी मेरौ समाजे त्रिदिवौकसाम् ॥ ५
सब्रह्मकान्सुरान्सर्वान्प्रणिपत्याथ मेदिनी । कथयामास तत्सर्वं[2] खेदात्करुणभाषिणी ॥ ६

धरण्युवाच—

अग्निः सुवर्णस्य गुरुर्गवां सूर्योऽपरो गुरुः । ममाप्यखिल लोकानां वन्द्यो नारायणो गुरुः ॥ ७
तत्सांप्रतमिमे दैत्याः कालनेमिपुरोगमाः । मर्त्यलोकं समागम्य[3] बाधन्तेऽहर्निशं प्रजाः ॥ ८
कालनेमिर्हतो योऽसौ विष्णुना प्रभविष्णुना । उग्रसेनसुतः कंसः संभूतः सुमहासुरः ॥ ९
अरिष्टो धेनुकः केशी प्रलम्बो नरकस्तथा । सुन्दोऽसुरस्तथाऽत्युग्रो बाणश्चापि बलेः सुतः १०
तथाऽन्ये च महावीर्या नृपाणां भवनेषु ये । समुत्पन्ना दुरात्मानस्तान्न संख्यातुमुत्सहे ॥ ११
अक्षौहिण्यो हि बहुला दिव्यमूर्तिधृताः सुराः । महाबलानां दृप्तानां दैत्येन्द्राणां ममोपरि ॥ १२
तद्भूरिभारपीडार्ता न शक्नोम्यमरेश्वराः । विभर्तुमात्मानमहमिति विज्ञापयामि वः ॥ १३
क्रियतां तन्महाभागा मम भारावतारणम् । यथा रसातलं नाहं गच्छेयमतिविह्वला ॥ १४

व्यास उवाच—

इत्याकर्ण्य धरावाक्यमशेषैस्त्रिदशैस्ततः । भुवो भारावतारार्थं ब्रह्मा प्राह च चोदितः ॥ १५

ब्रह्मोवाच—

यदाह वसुधा सर्वं सत्यमेतद्दिवौकसः । अहं भवो भवन्तश्च सर्वं नारायणात्मकम् ॥ १६
विभूतयस्तु यास्तस्य तासामेव परस्परम् । आधिक्यं न्यूनता बाध्यबाधकत्वेन वर्तते ॥ १७
तदागच्छत गच्छामः क्षीराब्धेस्तटमुत्तमम् । तत्राऽऽराध्य हरिं तस्मै सर्वं विज्ञापयाम वै ॥ १८
सर्वदैव जगत्यर्थे स सर्वात्मा जगन्मयः । स्वल्पांशेनावतीर्योर्व्यां धर्मस्य कुरुते स्थितिम् ॥ १९

१ क. ख. वै । २ क. °र्वं तेभ्यः करु° । ३ क. °म्य लुम्पन्तेऽ° ।

व्यास उवाच—

इत्युक्त्वा प्रययौ तत्र सह देवैः पितामहः । समाहितमना भूत्वा तुष्टाव गरुडध्वजम् ॥ २०

ब्रह्मोवाच—

नमो नमस्तेऽस्तु सहस्रमूर्ते सहस्रबाहो बहुवक्त्रपाद ।
नमो नमस्ते जगतः प्रवृत्तिविनाशसंस्थानपराप्रमेय ॥ २१
सूक्ष्मातिसूक्ष्मं च बृहत्प्रमाणं गरीयसामप्यतिगौरवात्मन् ।
प्रधानबुद्धीन्द्रियवाक्प्रधानमूलापरात्मन्भगवन्प्रसीद ॥ २२
एषा मही देव महीप्रसूतैर्महासुरैः पीडितशैलबन्धा ।
परायणं त्वां जगतामुपैति भारावतारार्थमपारपारम् ॥ २३
एते वयं वृत्ररिपुस्तथाऽयं नासत्यदस्रौ वरुणस्तथैषः ।
इमे च रुद्रा वसवः ससूर्याः समीरणाग्निप्रमुखास्तथाऽन्ये ॥ २४
सुराः समस्ताः सुरनाथ कार्यमेभिर्मया यच्च तदीश सर्वम् ।
आज्ञापयाऽऽज्ञां प्रतिपालयन्तस्तवैव तिष्ठाम सदाऽस्तदोषाः ॥ २५

व्यास उवाच—

एवं संस्तूयमानस्तु भगवान्परमेश्वरः । उज्जहाराऽऽत्मनः केशौ सितकृष्णौ द्विजोत्तमाः ॥ २६
उवाच च सुरानेतौ मत्केशौ वसुधातले । अवतीर्य भुवो भारक्लेशहानिं करिष्यतः ॥ २७
सुराश्च सकलाः स्वांशैरवतीर्य महीतले । कुर्वन्तु युद्धमुन्मत्तैः पूर्वोत्पन्नैर्महासुरैः ॥ २८
ततः क्षयमशेषास्ते दैतेया धरणीतले । प्रयास्यन्ति न संदेहो[2] नानायुधविचूर्णिताः ॥ २९
वसुदेवस्य या पत्नी देवकी देवतोपमा । तस्या गर्भोऽष्टमोऽयं तु मत्केशो भविता सुराः ॥ ३०
अवतीर्य च तत्रायं कंसं घातयिता भुवि । कालनेमिसमुद्भूतमित्युक्त्वाऽन्तर्दधे हरिः ॥ ३१
अदृश्याय ततस्तेऽपि प्रणिपत्य महात्मने । मेरुपृष्ठं सुरा जग्मुरवतेरुश्च[3] भूतले ॥ ३२
कंसाय चाष्टमो गर्भो देवक्या धरणीतले[4] । भविष्यतीत्याचचक्षे भगवान्नारदो मुनिः ॥ ३३
कंसोऽपि तदुपश्रुत्य नारदात्कुपितस्ततः । देवकीं वसुदेवं च गृहे गुप्तावधारयत् ॥ ३४
जातं जातं च कंसाय तेनैवोक्तं यथा पुरा । तथैव वसुदेवोऽपि पुत्रमर्पितवान्द्विजाः ॥ ३५
हिरण्यकशिपोः पुत्राः षड्गर्भा इति विश्रुताः । विष्णुप्रयुक्ता तान्निद्रा क्रमाद्गर्भे न्ययोजयत् ३६
योगनिद्रा महामाया वैष्णवी मोहितं यया । अविद्यया जगत्सर्वं तामाह भगवान्हरिः ॥ ३७

विष्णुरुवाच—

गच्छ निद्रे ममाऽऽदेशात्पातालतलसंश्रयान् । एकैकश्येन षड्गर्भान्देवकीजठरे नय ॥ ३८
हतेषु तेषु कंसेन शेषाख्योंऽशस्ततोऽनघः[5] । अंशांशेनोदरे तस्याः सप्तमः संभविष्यति ॥ ३९
गोकुले वसुदेवस्य भार्या वै रोहिणी स्थिता । तस्याः प्रसूतिसमये गर्भो नेयस्त्वयोदरम् ॥ ४०
सप्तमो भोजराजस्य भयाद्रोधोपरोधतः । देवक्याः पतितो गर्भ इति लोको वदिष्यति ॥ ४१
गर्भसंकर्षणात्सोऽथ लोके संकर्षणेति वै । संज्ञामवाप्स्यते वीरः श्वेताद्रिशिखरोपमः ॥ ४२

---

१ ख. °मतिश्चैव तु° । २ ग. °हो मद्दक्पातविवर्णि° । ३ क. ख. °रुर्महीत° । ४ क. ग. धरणीधरः । ५ ग. °स्ततो मम । अं° ।

ततोऽहं संभविष्यामि देवकीजठरे शुभे । गर्भे त्वया यशोदाया गन्तव्यमविलम्बितम् ॥ ४३
प्रावृट्काले च नभसि कृष्णाष्टम्यामहं[1] निशि । उपत्स्यामि नवम्यां च प्रसूतिं त्वमवाप्स्यसि ॥
यशोदाशयने मां तु देवक्यास्त्वामनिन्दिते । मच्छक्तिप्रेरितमतिर्वसुदेवो नयिष्यति ॥ ४५
कंसश्च त्वामुपादाय देवि शैलशिलातले । प्रक्षेप्स्यत्यन्तरिक्षे च त्वं स्थानं समवाप्स्यसि ॥ ४६
ततस्त्वां शतधा शक्रः[2] प्रणम्य मम गौरवात् । प्रणिपातानतशिरा भगिनीत्वे ग्रहीष्यति ॥ ४७
ततः शुम्भनिशुम्भादीन्हत्वा दैत्यान्सहस्रशः । स्थानैरनेकैः पृथिवीमशेषां मण्डयिष्यसि ॥ ४८
त्वं भूतिः संनतिः कीर्तिः कान्तिर्वै पृथिवी धृतिः । लज्जा पुष्टिरुषा या च काचिदन्या त्वमेव सा
ये त्वामार्येति दुर्गेति वेदगर्भेऽम्बिकेति च । भद्रेति भद्रकालीति [3]क्षेम्या क्षेमंकरीति च ॥ ५०
प्रातश्चैवापराह्णे च स्तोष्यन्त्यानम्रमूर्तयः । तेषां हि वाञ्छितं[4] सर्वं मत्प्रसादाद्भविष्यति ॥ ५१
सुरामांसोपहारैस्तु भक्ष्यभोज्यैश्च पूजिता । नृणामशेषकामांस्त्वं प्रसन्नायां प्रदास्यसि ॥ ५२
ते सर्वे सर्वदा भद्रा मत्प्रसादादसंशयम् । असंदिग्धं भविष्यन्ति गच्छ देवि यथोदितम् ॥ ५३

इति श्रीमहापुराणे आदिब्राह्मे हरेरंशावतारनिरूपणं नामैकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९६४५

अथ द्व्यशीत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

यथोक्तं सा जगद्धात्री देवदेवेन वै पुरा । षड्गर्भ[5]गर्भविन्यासं चक्रे चान्यस्य कर्षणम् ॥ १
सप्तमे रोहिणीं प्राप्ते गर्भे गर्भे ततो हरिः । लोकत्रयोपकाराय देवक्याः प्रविवेश वै ॥ २
योगनिद्रा यशोदायास्तस्मिन्नेव ततो दिने । संभूता जठरे तद्वद्यथोक्तं परमेष्ठिना ॥ ३
ततो ग्रहगणः सम्यक्प्रचचार दिवि द्विजाः । विष्णोरंशे महीं यात ऋतवोऽप्यभवञ्शुभाः ॥ ४
नोत्सेहे देवकीं द्रष्टुं कश्चिदप्यतितेजसा । जाज्वल्यमानां तां दृष्ट्वा मनांसि क्षोभमाययुः ॥ ५
अदृष्टां पुरुषैः स्त्रीभिर्देवकीं देवतागणाः[7] । बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम् ॥ ६

देवा ऊचुः—

त्वं स्वाहा त्वं स्वधा विद्या सुधा त्वं ज्योतिरेव च । त्वं सर्वलोकरक्षार्थमवतीर्णा महीतले ॥ ७
प्रसीद देवि सर्वस्य जगतस्त्वं शुभं कुरु । प्रीत्यर्थं धारयेशानं धृतं येनाखिलं जगत् ॥ ८

व्यास उवाच—

एवं संस्तूयमाना सा [8]देवैर्देवमधारयत् । गर्भेण पुण्डरीकाक्षं जगतां त्राणकारणम् ॥ ९
ततोऽखिलजगत्पद्मबोधायाच्युतभानुना । देवक्याः पूर्वसंध्यायामाविर्भूतं महात्मना ॥ १०
मध्यरात्रेऽखिलाधारे जायमाने जनार्दने । मन्दं जगर्जुर्जलदाः पुष्पवृष्टिमुचः सुराः ॥ ११
फुल्लेन्दीवरपत्राभं चतुर्बाहुमुदीक्ष्य तम् । श्रीवत्सवक्षसं जातं तुष्टावाऽऽनकदुन्दुभिः ॥ १२

---

१ ख. °ष्टम्यां महानि° । २ ख. °तद्दकशक्रः । ३ ख. क्षेमा । ४ क. ख. प्रार्थितं । ५ ग. °रा । चक्रे ष° । ६ ग. °र्भाव° । ७ क. °णाः । चित्राभिः स्तुतिभिर्विष्णुं । ८ ख. देवदेव° । ९ क. ख. °गद्रक्षणका° ।

अभिष्टूय च तं वाग्भिः प्रसन्नाभिर्महामतिः । विज्ञापयामास तदा कंसाद्भीतो द्विजोत्तमाः ॥१३
वसुदेव उवाच—
ज्ञातोऽसि देवदेवेश शङ्खचक्रगदाधर । दिव्यं रूपमिदं देव प्रसादेनोपसंहर ॥ १४
अद्यैव देव कंसोऽयं कुरुते मम यातनाम् । अवतीर्णमिति ज्ञात्वा त्वामस्मिन्मन्दिरे मम ॥ १५
देवक्युवाच—
योऽनन्तरूपोऽखिलविश्वरूपो गर्भेऽपि लोकान्वपुषा बिभर्ति ।
प्रसीदतामेष स देवदेवः स्वमाययाऽऽविष्कृतबालरूपः ॥ १६
उपसंहर सर्वात्मन्रूपमेतच्चतुर्भुजम् । जानातु माऽवतारं ते कंसोऽयं दितिजान्तक ॥ १७
श्रीभगवानुवाच—
स्तुतोऽहं यत्त्वया पूर्वं पुत्रार्थिन्या तदद्य ते । सफलं देवि संजातं जातोऽहं यत्तवोदरात् ॥ १८
व्यास उवाच—
इत्युक्त्वा भगवांस्तूष्णीं बभूव मुनिसत्तमाः । वसुदेवोऽपि तं रात्रावादाय प्रययौ बहिः ॥ १९
मोहिताश्चाभवंस्तत्र रक्षिणो योगनिद्रया । मथुराद्वारपालाश्च व्रजत्यानकदुन्दुभौ ॥ २०
वर्षतां जलदानां च तत्तोयमुल्बणं निशि । संछाद्य तं ययौ शेषः फणैरानकदुन्दुभिम् ॥ २१
यमुनां चातिगम्भीरां नानावर्तशताकुलाम् । वसुदेवो वहन्विष्णुं जानुमात्रवहां ययौ ॥ २२
कंसस्य करमादाय तत्रैवाभ्यागतांस्तटे । नन्दादीन्गोपवृद्धांश्च यमुनायां ददर्श सः ॥ २३
तस्मिन्काले यशोदाऽपि मोहिता योगनिद्रया । तामेव कन्यां मुनयः प्रासूत मोहिते जने ॥ २४
वसुदेवोऽपि विन्यस्य बालमादाय दारिकाम् । यशोदाशयने तूर्णमाजगामामितद्युतिः ॥ २५
ददर्श च विबुद्ध्वा सा यशोदा जातमात्मजम् । नीलोत्पलदलश्यामं ततोऽत्यर्थं मुदं ययौ ॥२६
आदाय वसुदेवोऽपि दारिकां निजमन्दिरम् । देवकीशयने न्यस्य यथापूर्वमतिष्ठत ॥ २७
ततो बालध्वनिं श्रुत्वा रक्षिणः सहसोत्थिताः । कंसमावेदयामासुर्देवकीप्रसवं द्विजाः ॥ २८
कंसस्तूर्णमुपेत्यैनां ततो जग्राह बालिकाम् । मुञ्च मुञ्चेति देवक्याऽऽसन्नकण्ठं निवारितः ॥ २९
चिक्षेप च शिलापृष्ठे सा क्षिप्ता वियति स्थितिम् । अवाप रूपं च महत्सायुधाष्टमहाभुजम् ॥
प्रजहास तथैवोच्चैः कंसं च रुषिताऽब्रवीत् । ३०
योगमायोवाच—
किं मयाऽऽक्षिप्तया कंस जातो यस्त्वां हनिष्यति । सर्वस्वभूतो देवानामासीन्मृत्युः पुरा स ते ॥
तदेतत्संप्रधार्याऽऽशु क्रियतां हितमात्मनः ॥ ३१
व्यास उवाच—
इत्युक्त्वा प्रययौ देवी दिव्यस्रग्गन्धभूषणा । पश्यतो भोजराजस्य स्तुता सिद्धैर्विहायसा ॥३२

इति श्रीमहापुराणे आदिब्राह्मे श्रीकृष्णोत्पत्तिकथानिरूपणं नाम द्व्यशीत्यधिकशततमोऽध्यायः ॥ ८२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९६७७

---

१ ख. °तिः । चिन्तया° । २ ख. °स कंसाय तदा भीतो द्वि° । ३ ख. जातोऽसि । ४ क. °गमायया । ५ ग. °या । माथुरा द्वा° । ६ क. दारिकाम् । ७ क. ख. स्थिता । ८ क. °रा तव । त° ।

अथ त्र्यशीत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

कंसस्त्वथोद्विग्नमना: प्राह सर्वान्महासुरान् । प्रलम्बकेशिप्रमुखानाहूयासुरपुंगवान् ॥ १

कंस उवाच—

हे प्रलम्ब महाबाहो केशिन्धेनुक पूतने । अरिष्टाद्यैस्तथा[2] चान्यैः श्रूयतां वचनं मम[1] ॥ २

मां हन्तुममरैर्यत्नः कृतः किल दुरात्मभिः । मद्वीर्यतापितान्वीरान्न त्वेतान्गणयाम्यहम्[3] ॥ ३

आश्चर्यं कन्यया चोक्तं जायते दैत्यपुंगवाः । हास्यं मे जायते वीरास्तेषु यत्नपरेष्वपि ॥ ४

तथाऽपि खलु दुष्टानां तेषाम[4]प्यधिकं मया[5] । अपकाराय दैत्येन्द्रा यतनीयं दुरात्मनाम् ॥ ५

उत्पन्नश्चापि मृत्युर्मे भूत[6]भव्यभवत्प्रभुः । इत्येतद्बालिका प्राह देवकीगर्भसंभवा ॥ ६

तस्माद्बालेषु परमो यत्नः कार्यो महीतले । यत्रोद्रिक्तं बलं बाले स हन्तव्यः प्रयत्नतः ॥ ७

व्यास उवाच—

इत्याज्ञाप्यासुरान्कंसः प्रविश्याऽऽत्मगृहं ततः[7] । उवाच वसुदेवं च देवकीमविरोधतः ॥ ८

कंस उवाच—

युवयोर्घातिता गर्भा वृथैवैते[9] मयाऽधुना । कोऽप्यन्य एव नाशाय बालो मम समुद्गतः[8] ॥ ९

तदलं परितापेन नूनं यद्भाविनो हि ते । अर्भका युवयोः को वा आयुषोऽन्ते न हन्यते ॥ १०

व्यास उवाच—

इत्याश्वास्य विमुच्यैव कंसस्तौ परितोष्य च । अन्तर्गृहं द्विजश्रेष्ठाः प्रविवेश पुनः स्वकम् ॥ ११

इति श्रीमहापुराणे आदिब्राह्मे श्रीकृष्णबालचरिते कंसविचारकथनं नाम त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९६८८

अथ चतुरशीत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

विमुक्तो वसुदेवोऽपि नन्दस्य शकटं गतः । प्रहृष्टं दृष्टवान्नन्दं पुत्रो जातो ममेति वै ॥ १

वसुदेवोऽपि तं प्राह दिष्ट्या दिष्ट्येति सादरम् । वार्धकेऽपि समुत्पन्नस्तनयोऽयं तवाधुना ॥ २

दत्तो हि वार्षिकः सर्वो भवद्भिर्नृपतेः करः । यदर्थमागतस्तस्मान्नात्र स्थेयं महात्मना ॥ ३

यदर्थमागतः कार्यं तन्निष्पन्नं किमास्यते । भवद्भिर्गम्यतां नन्द तच्छीघ्रं निजगोकुलम् ॥ ४

ममापि बालकस्तत्र रोहिणीप्रसवो हि यः । स रक्षणीयो भवता यथाऽयं तनयो निजः ॥ ५

व्यास उवाच—

इत्युक्ताः प्रययुर्गोपा नन्दगोपपुरोगमाः । शकटारोपितैर्भाण्डैः करं दत्त्वा महाबलाः ॥ ६

---

१ ख. °म । धरावाक्येन देवैश्च प्रेरितो वासवानुजः । म° । २ ख. °पितैर्वीरा नन्वेतान्मृदया° । ३ ग. °म् । असरेषु ममावज्ञा जा° । ४ ख °मप्याधि° । ५ ख. धिया । ६ ख. ग. °तपूर्वश्च वै किल । इ° । ७ ख. तदा । ८ ख. समुद्यतः । ९ क. °था ते त° ।

वसतां गोकुले तेषां पूतना बालघातिनी । सुप्तं कृष्णमुपादाय रात्रौ च प्रददौ स्तनम् ॥ ७
यस्मै यस्मै स्तनं रात्रौ पूतना संप्रयच्छति । तस्य तस्य क्षणेनाङ्गं बालकस्योपहन्यते ॥ ८
कृष्णस्तस्याः स्तनं गाढं कराभ्यामतिपीडितम् । गृहीत्वा प्राणसहितं पपौ क्रोधसमन्वितः ॥ ९
सा विमुक्तमहारावा विच्छिन्नस्नायुबन्धना । पपात पूतना भूमौ म्रियमाणाऽतिभीषणा ॥ १०
तन्नादश्रुतिसंत्रासाद्विबुद्धास्ते व्रजौकसः । ददृशुः पूतनोत्सङ्गे कृष्णं तां च निपातिताम् ॥ ११
आदाय कृष्णं संत्रस्ता यशोदा च ततो द्विजाः । गोपुच्छभ्रामणाद्यैश्च बालदोषमपाकरोत् ॥ १२
गोपुरीषमुपादाय नन्दगोपोऽपि मस्तके । कृष्णस्य प्रददौ रक्षां कुर्वन्निदमुदैरयत् ॥ १३

नन्दगोप उवाच—

रक्षतु त्वामशेषाणां भूतानां प्रभवो हरिः । यस्य नाभिसमुद्भूतात्पङ्कजादभवज्जगत् ॥ १४
येन दंष्ट्राग्रविधृता धारयत्यवनी जगत् । वराहरूपधृग्देवः स त्वां रक्षतु केशवः ॥ १५
गुह्यं स जठरं विष्णुर्जङ्घा पादौ जनार्दनः । वामनो रक्षतु सदा भवन्तं यः क्षणादभूत् ॥ १६
त्रिविक्रमक्रमाक्रान्तत्रैलोक्यस्फुरदायुधः । शिरस्ते पातु गोविन्दः कण्ठं रक्षतु केशवः ॥ १७
मुखबाहू प्रबाहू च मनः सर्वेन्द्रियाणि च । रक्षत्वव्याहतैश्वर्यस्तव नारायणोऽव्ययः ॥ १८
त्वां दिक्षु पातु वैकुण्ठो विदिक्षु मधुसूदनः । हृषीकेशोऽम्बरे भूमौ रक्षतु त्वां महीधरः ॥ १९

व्यास उवाच—

एवं कृतस्वस्त्ययनो नन्दगोपेन बालकः । शायितः शकटस्याधो बालपर्यङ्किकातले ॥ २०
ते च गोपा महद्दृष्ट्वा पूतनायाः कलेवरम् । मृतायाः परमं त्रासं विस्मयं च तदा ययुः ॥ २१
कदाचिच्छकटस्याधः शयानो मधुसूदनः । चिक्षेप चरणावूर्ध्वं स्तनार्थी प्ररुरोद च ॥ २२
तस्य पादप्रहारेण शकटं परिवर्तितम् । विध्वस्तभाण्डकुम्भं तद्विपरीतं पपात वै ॥ २३
ततो हाहाकृतः सर्वो गोपगोपीजनो द्विजाः । आजगाम तदा ज्ञात्वा बालमुत्तानशायिनम् ॥ २४
गोपाः केनेति जगदुः शकटं परिवर्तितम् । तत्रैव बालकाः प्रोचुर्बालेनानेन पातितम् ॥ २५
रुदता दृष्टमस्माभिः पादविक्षेपताडितम् । शकटं परिवृत्तं वै नैतदन्यस्य चेष्टितम् ॥ २६
ततः पुनरतीवाऽऽसन्गोपा विस्मितचेतसः । नन्दगोपोऽपि जग्राह बालमत्यन्तविस्मितः ॥ २७
यशोदा विस्मयारूढा भग्नभाण्डकपालकम् । शकटं चार्चयामास दधिपुष्पफलाक्षतैः ॥ २८
गर्गश्च गोकुले तत्र वसुदेवप्रचोदितः । प्रच्छन्न एव गोपानां संस्कारमकरोत्तयोः ॥ २९
ज्येष्ठं च राममित्याह कृष्णं चैव तथाऽपरम् । गर्गो मतिमतां श्रेष्ठो नाम कुर्वन्महामतिः ॥ ३०
अल्पेनैव हि कालेन विज्ञातौ तौ महाबलौ । घृष्टजानुकरौ विप्रा बभूवतुरुभावपि ॥ ३१
करीषभस्मदिग्धाङ्गौ भ्रममाणावितस्ततः । न निवारयितुं शक्ता यशोदा तौ न रोहिणी ॥ ३२
गोवाटमध्ये क्रीडन्तौ वत्सवाटगतौ पुनः । तदहर्जातगोवत्सपुच्छाकर्षणतत्परौ ॥ ३३
यदा यशोदा तौ बालावेकस्थानचरावुभौ । शशाक नो वारयितुं क्रीडन्तावतिचञ्चलौ ॥ ३४
दाम्ना बद्ध्वा तदा मध्ये निबबन्ध उलूखले । कृष्णमक्लिष्टकर्माणमाह चेदममर्षिता ॥ ३५

---

१ क. ख. °न्द उ° । २ क. ह । ३ ग. °गामाथ ददृशे बा° । ४ क. °टं प्रार्थयामास तदा सा वेपती मुहुः । ग° । ख. °टं बन्धयामास दृढे सदसि दारुणि । ग° । ५ क. °प्रणोदि° । ६ क. °न्नरूपो मुनयः सं° । ७ ग. सेहे । ८ ख. °ह चैवं प्रहर्षि° ।

यशोदोवाच—

यदि शक्तोऽसि गच्छ त्वमतिचञ्चलचेष्टित ॥ ३६

व्यास उवाच—

इत्युक्त्वा च निजं कर्म सा चकार कुटुम्बिनी[1] । व्यग्रायामथ तस्यां स कर्षमाण उलूखलम् ३७
यमलार्जुनयोर्मध्ये जगाम कमलेक्षणः । कर्षता वृक्षयोर्मध्ये तिर्यगेवमुलूखलम् ॥ ३८
भग्नावुत्तुङ्गशाखाग्रौ तेन तौ यमलार्जुनौ । ततः[2] कटकटाशब्दसमाकर्णनकातरः ॥ ३९
आजगाम व्रजजनो ददृशे च महाद्रुमौ । भग्नस्कन्धौ निपतितौ भग्नशाखौ महीतले ॥ ४०
ददर्श चाल्पदन्तास्यं स्मितहासं च बालकम् । तयोर्मध्यगतं बद्धं दाम्ना गाढं तथोदरे ॥ ४१
ततश्च दामोदरतां स ययौ दामबन्धनात् । गोप[3]वृद्धास्ततः सर्वे नन्दगोपपुरोगमाः ॥ ४२
मन्त्रयामासुरुद्विग्ना महो[4]त्पातातिभीरवः । स्थानेनेह न नः कार्यं व्रजामोऽन्यन्महावनम् ॥ ४३
उत्पाता बहवो ह्यत्र दृश्यन्ते नाशहेतवः । पूतनाया विनाशश्च शकटस्य विपर्ययः ॥ ४४
विना वातादिदोषेण द्रुमयोः पतनं तथा । वृन्दावनमितः स्थानात्तस्माद्गच्छाम मा चिरम् ॥ ४५
यावद्भौममहोत्पातदोषो[5] नाभिभवेद्व्रजम् । इति कृत्वा मतिं सर्वे गमने ते व्रजौकसः ॥ ४६
ऊचुः स्वं स्वं कुलं शीघ्रं गम्यतां मा विलम्ब्यताम् । ततः क्षणेन प्रययुः शकटैर्गोधनैस्तथा ॥
यूथशो वत्सपालीश्च कालयन्तो व्रजौकसैः[6] । सर्वावयवनिर्धूतं क्षणमात्रेण तत्तदा ॥ ४८
काककाकीसमाकीर्णं व्रजस्थानमभूद्द्विजाः । वृन्दावनं भगवता कृष्णेनाक्लिष्टकर्मणा ॥ ४९
शुभेन मनसा ध्यातं[7] गवां वृद्धिमभीप्सता । ततस्तत्रातिरूक्षेऽपि धर्मकाले द्विजोत्तमाः ॥ ५०
प्रावृट्काल इवाभूच्च नवशष्पं समन्ततः । स समावासितः सर्वो व्रजो वृन्दावने ततः ॥ ५१
शकटीवाटपर्यन्तचन्द्रार्धाकारसंस्थितिः । वत्सबालौ च संवृत्तौ रामदामोदरौ ततः ॥ ५२
तत्र[8] स्थितौ तौ गोष्ठे चेरतुर्बाललीलया । बर्हिपत्रकृतापीडौ वन्य[9]पुष्पावतंसकौ ॥ ५३
गोपवेणुकृतां[10]तोद्यपत्रवाद्यकृतस्वनौ । काकपक्षधरौ बालौ कुमाराविव पावकौ ॥ ५४
हसन्तौ च रमन्तौ च चेरतुस्तन्महद्वनम् । क्वचिद्धसन्तावन्योन्यं क्रीडमानौ तथा परैः ॥ ५५
गोपपुत्रैः समं वत्सांश्चारयन्तौ विचेरतुः । कालेन गच्छता तौ तु सप्तवर्षौ बभूवतुः ॥ ५६
सर्वस्य जगतः पालौ वत्सपालौ महाव्रजे । प्रावृट्कालस्ततोऽतीव मेघौघस्थगिताम्बरः ॥ ५७
बभूव वारिधाराभिरैक्यं कुर्वन्दिशामिव । प्र[11]रूढनव[12]पुष्पाढ्या शक्रगोपवृता मही ॥ ५८
यथा मारकते वाऽऽसीत्पद्मरागविभूषिता । ऊहुरुन्मार्गगामीनि निम्नगाम्भांसि सर्वतः ॥ ५९
मनांसि दुर्विनीतानां प्राप्य लक्ष्मीं नवामिव । विकाले च यथाकामं व्रजमेत्य महाबलौ ॥
गोपैः समानैः सहितौ चिक्रीडातेऽमराविव । ६०

इति श्रीमहापुराणे आदिब्राह्मे बालचरिते वृन्दावनप्रवेशवर्णनं नाम चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९७४८

---

१ ख. नितम्बिनी । २ ख. तयोः । ३ क. °पमुख्यास्त° । ४ ख. °तिशङ्किताः । स्था° । ५ ख. °षो गर्गवचोद्भवः । षे° । ६ क. ख. °सः । द्रव्याव° । ७ क. ख. व्याप्तं । ८ ग. °त्र स्थानाप्लुतौ । ९ क. गुञ्जाहारविभूषितौ । १० क. °ताभ्यासौ नानावाद्यविशारदौ । का° । ११ क. प्रभूतन° । १२ क. ख. °वशष्पाढ्या ।

अथ पञ्चाशीत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

एकदा तु विना रामं कृष्णो वृन्दावनं ययौ । विचचार वृतो गोपैर्वन्यपुष्पस्रगुज्ज्वलः ॥ १
स जगामाथ कालिन्दीं लोलकल्लोल[1]शालिनीम् । तीरसंलग्नफेनौघैर्हसन्तीमिव सर्वतः ॥ २
तस्यां चातिमहाभीमं विषाग्निकणदूषितम् । ह्रदं कालीयनागस्य ददर्शातिविभीषणम् ॥ ३
विषाग्निना विसरता दग्धतीरमहातरुम् । वाताहताम्बुविक्षेपस्पर्शदग्धविहङ्गमम् ॥ ४
तमतीव महारौद्रं मृत्युवक्त्रमिवापरम् । विलोक्य चिन्तयामास भगवान्मधुसूदनः ॥ ५
अस्मिन्वसति दुष्टात्मा कालीयोऽसौ विषायुधः । यो मया निर्जितस्त्यक्त्वा दुष्टो नष्टः पयोनिधौ
तेनेयं दूषिता सर्वा यमुना [2]सागरंगमा । न नरैर्गोधनैर्वाऽपि तृषार्तैरुपभुज्यते ॥ ७
तदस्य [3]नागराजस्य कर्तव्यो निग्रहो मया । [4]नित्यत्रस्ताः सुखं येन चरेयुर्व्रजवासिनः ॥ ८
एतदर्थं नृलोकेऽस्मिन्नवतारो मया कृतः । यदेषामुत्पथस्थानां कार्या [5]शास्तिर्दुरात्मनाम् ॥ ९
तदेतन्नातिदूरस्थं कदम्बमुरुशाखिनम् । अधिरुह्योत्पतिष्यामि ह्रदेऽस्मिञ्जीवनाशिनः ॥ १०

व्यास उवाच—

इत्थं विचिन्त्य बद्ध्वा च[6] गाढं परिकरं ततः । निपपात ह्रदे तत्र सर्पराजस्य वेगतः ॥ ११
तेनापि पतता तत्र क्षोभितः स महाह्रदः । अत्यर्थदूरजातांश्च तांश्चासिञ्चन्महीरुहान् ॥ १२
तेऽहिदुष्टविषज्वालातप्ताम्बुतपनोक्षिताः । जज्वलुः पादपाः सद्यो ज्वालाव्याप्तदिगन्तराः ॥ १३
आस्फोटयामास तदा कृष्णो नागह्रदं[7] भुजैः । तच्छब्दश्रवणाच्चाथ नागराजोऽभ्युपागमत् ॥ १४
आताम्रनयनः कोपाद्विषज्वालाकुलैः फणैः । वृतो महाविषैश्चान्यैररुणैरनिलाशनैः ॥ १५
नागपत्न्यश्च शतशो हारिहारोपशोभिताः । प्रकम्पित[9]तनूत्क्षेपचलत्कुण्ड[10]लकान्तयः ॥ १६
ततः प्रवेष्टितः सर्पैः स कृष्णो भोगबन्धनैः । ददंशुश्चापि ते कृष्णं विषज्वालाविलैर्मुखैः ॥ १७
तं तत्र पतितं दृष्ट्वा नागभोगनिपीडितम् । गोपा व्रजमुपागत्य चुक्रुशुः शोकलालसाः ॥ १८

गोपा ऊचुः—

एष कृष्णो गतो मो[11]हमग्नो वै कालिये ह्रदे । भक्ष्यते सर्पराजेन तदागच्छत मा चिरम् ॥ १९

व्यास उवाच—

एतच्छ्रुत्वा ततो गोपा वज्रपातोपमं वचः । गोप्यश्च त्वरिता जग्मुर्यशोदाप्रमुखा [12]ह्रदम् ॥ २०
हा हा क्वासाविति जनो गोपीनामतिविह्वलः । यशोदया समं भ्रान्तो द्रुतः प्रस्खलितो ययौ २१
नन्दगोपश्च गोपाश्च रामश्चाद्भुतविक्रमः । त्वरितं यमुनां जग्मुः कृष्णदर्शनलालसाः ॥ २२
ददृशुश्चापि ते तत्र सर्पराजवशंगतम् । निष्प्रयत्नं कृतं कृष्णं सर्पभोगेन वेष्टितम् ॥ २३
नन्दगोपश्च निश्चेष्टः पश्यन्पुत्रमुखं [13]भृशम् । यशोदा च महाभागा बभूव मुनिसत्तमाः ॥ २४

---

१ क. °लमालि° । २ ख. सागराङ्गना । ३ क. सर्पराजस्य । ४ ग. नित्यात्रस्थाः सु° । ५ ग. शान्तिर्दु° । ६ ख. स । ७ ग °हृरदे भुजम् । त° । ८ ख. °ताः । ययुः प्र° । ९ ख. °म्पितास्तत्र च° । १० ख. °लजातयः । ११ ख. °हमुग्रे वै । १२ क. द्रुतम् । १३ क. तदा ।

गोप्यस्त्वन्या रुदत्यश्च ददृशुः शोककातराः । प्रोचुश्च केशवं प्रीत्या भयकातरगद्गदम् ॥ २५
सर्वा यशोदया सार्धं विशामोऽत्र महाह्रदे । नागराजस्य नो गन्तुमस्माकं युज्यते व्रजे ॥ २६
दिवसः को विना सूर्यं विना चन्द्रेण का निशा । विना दुग्धेन का गावो विना कृष्णेन को व्रजः
विना कृता न यास्यामः कृष्णेनानेन गोकुलम् ॥ २७

व्यास उवाच—

इति गोपीवचः श्रुत्वा रौहिणेयो महाबलः । उवाच गोपान्विधुरान्विलोक्य स्तिमितेक्षणः ॥२८
नन्दं च दीनमत्यर्थं न्यस्तदृष्टिं सुतानने । मूर्छाकुलां यशोदां च कृष्णमाहात्म्यसंज्ञया ॥ २९

बलराम उवाच—

किमयं देवदेवेश भावोऽयं मानुषस्त्वया । व्यज्यते स्वं तमात्मानं किमन्यं त्वं न वेत्सि यत् ३०
त्वमस्य जगतो[3] नाभिः सुराणामेव चाऽऽश्रयः । कर्ताऽपहर्ता पाता च [4]त्रैलोक्यं त्वं त्रयीमयः
अत्रावतीर्णयोः कृष्ण गोपा एव हि बान्धवाः । गोप्यश्च सीदतः कस्मात्त्वं बन्धूनसमुपेक्षसे ॥३२
दर्शितो मानुषो भावो दर्शितं बालचेष्टितम् । तदयं दम्यतां कृष्ण दुरात्मा दशनायुधः ॥ ३३

व्यास उवाच—

इति संस्मारितः कृष्णः स्मितभिन्नौष्ठसंपुटः । आँस्फाल्य मोचयामास स्वं देहं भोगबन्धनात् ॥
आनाम्य चापि हस्ताभ्यामुभाभ्यां मध्यमं फणम् । आरुह्य भुग्नशिरसः प्रननर्तोरुविक्रमः ॥ ३५
व्रणाः फणेऽभवंस्तस्य कृष्णस्याङ्घ्रिविकुट्टनैः । यत्रोन्नतिं च कुरुते ननामास्य ततः शिरः ॥ ३६
मूर्छामुपाययौ भ्रान्त्या नागः कृष्णस्य कुँट्टनैः । दण्डपातनिपातेन ववाम रुधिरं बहु ॥ ३७
तं निर्भुग्नशिरोग्रीवमास्य प्रस्रुतशोणितम् । विलोक्य शरणं जग्मुस्तत्पत्न्यो मधुसूदनम् ॥ ३८

नागपत्न्य ऊचुः—

ज्ञातोऽसि देवदेवेश सर्वेशस्त्वमनुत्तम । परं ज्योतिरचिन्त्यं यत्तदंशः परमेश्वरः ॥ ३९
न समर्थाः सुर स्तोतुं यमनन्यभवं प्रभुम् । स्वरूपवर्णनं तस्य कथं योषित्करिष्यति ॥ ४०
यस्याखिलमहीव्योमजलाग्निपवनात्मकम् । ब्रह्माण्डमल्पकांशांशः स्तोष्यामस्तं कथं वयम् ॥ ४१
ततः कुरु जगत्स्वामिन्प्रसादमवसीदतः । प्राणांस्त्यजति नागोऽयं भर्तृभिक्षा प्रदीयताम् ॥ ४२

व्यास उवाच—

इत्युक्त[10] ताभिराश्वास्य क्लान्तदेहोऽपि पन्नगः । प्रसीद देवदेवेति प्राह वाक्यं शनैः शनैः ॥ ४३

कालीय उवाच—

तवाष्टगुणमैश्वर्यं नाथ स्वाभाविकं परम् । निरस्तातिशयं यस्य[11] तस्य स्तोष्यामि किन्वहम् ॥ ४४
त्वं परस्त्वं परस्याऽऽद्यः परं त्वं तत्परात्मकम् । परस्मात्परमो यस्त्वं तस्य स्तोष्यामि किन्वहम्
यथाऽहं भवता सृष्टो जात्या रूपेण चेश्वरः । स्वभावेन च संयुक्तस्तथेदं चेष्टितं मया ॥ ४६
यद्यन्यथा प्रवर्तेय देवदेव ततो मयि । न्याय्यो दण्डनिपातस्ते तवैव वचनं यथा ॥ ४७
तथाऽपि यं जगत्स्वामी दण्डं पातितवान्मयि । स सोढोऽयं वरो दण्डस्त्वत्तो नान्योऽस्तु मे वरः
हतवीर्यो हतविषो दमितोऽहं त्वयाऽच्युत । जीवितं दीयतामेकमाज्ञापय करोमि किम् ॥ ४९

---

१ ग. वृषेण । २ ख. °क्षणान् । न° । ३ क. °तो योनिश्वराणामपि संश्र° । ४ क. त्रैलोक्ये । ५ ख. ग. आस्फोट्य
६ ख. ग. °ह्य भग्न° । ७ ग. रेचकैः । ८ क. °ह कृपां नाथ प्रसा° । ९ क. °न्प्रसीद शरणं भव । प्रा° । १० ख. °क्ते
कान्तया तस्य । ११ ख. °मोजस्त्वं ।

श्रीभगवानुवाच—

नात्र स्थेयं त्वया सर्प कदाचिद्यमुनाजले । [1]सभृत्यपरिवारस्त्वं समुद्रसलिलं व्रज ॥ ५०
मत्पदानि च ते सर्प दृष्ट्वा मूर्धनि [2]सागरे । गरुडः पन्नगरिपुस्त्वयि न प्रहरिष्यति ॥ ५१

व्यास उवाच—

इत्युक्त्वा +सर्पराजानं मुमोच भगवान्हरिः । प्रणम्य सोऽपि कृष्णाय जगाम पयसांनिधिम् ५२
पश्यतां सर्वभूतानां सभृत्यापत्यबन्धवः । समस्तभार्यासहितः परित्यज्य स्वकं ह्रदम् ॥ ५३
गते सर्पे परिष्वज्य मृतं पुनरिवाऽऽगतम् । गोपा मूर्धनि गोविन्दं सिषिचुर्नेत्रजैर्जलैः ॥ ५४
कृष्णमक्लिष्टकर्माणमन्ये विस्मितचेतसः । तुष्टुवुर्मुदिता गोपा दृष्ट्वा [3]शिवजलां नदीम् ॥ ५५
गीयमानोऽथ गोपीभिश्चरितैश्चारुचेष्टितैः । संस्तूयमानो गोपालैः [4]कृष्णो व्रजमुपागमत् ॥ ५६

इति श्रीमहापुराणे आदिब्राह्मे बालचरिते कालीयदमननिरूपणं नाम
पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९८०४

अथ षडशीत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

गाः पालयन्तौ च पुनः सहितौ [5]रामकेशवौ । भ्रममाणौ वने तत्र रम्यं तालवनं गतौ ॥ १
तच्च तालवनं नित्यं धेनुको नाम दानवः । नृगोमांसकृताहारः सदाऽध्यास्ते खराकृतिः ॥ २
तत्र तालवनं रम्यं फलसंपत्समन्वितम् । दृष्ट्वा स्पृहान्विता गोपाः फलादानेऽब्रुवन्वचः ॥ ३

गोपा ऊचुः—

हे राम हे कृष्ण सदा धेनुकेनैव रक्ष्यते । भूप्रदेशो यतस्तस्मा[6]त्यक्तानीमानि सन्ति वै ॥ ४
फलानि पश्य तालानां गन्धमोदयुतानि वै । वयमेतान्यभीप्सामः पात्यन्तां यदि रोचते ॥ ५
इति गोपकुमाराणां श्रुत्वा संकर्षणो वचः । कृष्णश्च पातयामास भुवि तालफलानि वै ॥ ६
तालानां पततां शब्दमाकर्ण्यासुरराट्ततः । आजगाम स दुष्टात्मा कोपाद्दैतेयगर्दभः ॥ ७
पद्भ्यामुभाभ्यां स तदा पश्चिमाभ्यां च तं बली । जघानोरसि ताभ्यां च स च तेनाप्यगृह्यत॥
गृहीत्वा भ्रामणेनैव चाम्बरे गतजीवितम् । तस्मिन्नेव प्रचिक्षेप वेगेन तृणराजनि ॥ ९
ततः फलान्यनेकानि तालाग्रान्निपतन्खरः । पृथिव्यां पातयामास महावातोऽम्बुदानिव ॥ १०
अन्यानप्यस्य वै ज्ञातीनागतान्दैत्यगर्दभान् । कृष्णश्चिक्षेप तालाग्रे बलभद्रश्च लीलया ॥ ११
क्षणेनालंकृता पृथ्वी पक्वैस्तालफलैस्तदा । दैत्यगर्दभदेहैश्च मुनयः शुशुभेऽधिकम् ॥ १२

+ समासान्तविधेरनित्यत्वान्न टच् ।

---

१ ख. सपुत्रप° । २ ख. नागहा । ३ ख. क्षुब्धजलां । ४ क. ख. हृष्टो । ५ क. ख. °तौ बलके° । ६ क. ग. °स्मा-त्पक्वानी° ।

ततो गावो निराबाधास्तस्मिंस्तालवने द्विजाः। नवंशष्पं सुखं चेरुर्यत्र भुक्तमभूत्पुरा॥ १३

इति श्रीमहापुराणे आदिब्राह्मे बालचरिते धेनुकवधवर्णनं नाम षडशीत्यधिकशततमोऽध्यायः॥ १८६॥

आदितः श्लोकानां समष्ट्यङ्काः—९८१७

अथ सप्ताशीत्यधिकशततमोऽध्यायः।

व्यास उवाच—

तस्मिन्रासभदैतेये सानुजे विनिपातिते। सर्वगोपालगोपीनां रम्यं तालवनं बभौ॥ १
ततस्तौ जातहर्षौ तु वसुदेवसुतावुभौ। शुशुभाते महात्मानौ बालशृङ्गाविवर्षभौ॥ २
चारयन्तौ च गा दूरे व्याहरन्तौ च नामभिः। नियोगपाशस्कन्धौ तौ वनमालाविभूषितौ॥ ३
सुवर्णाञ्जनचूर्णाभ्यां तदा तौ भूषिताम्बरौ। महेन्द्रायुधसंकाशौ श्वेतकृष्णाविवाम्बुदौ॥ ४
चेरतुर्लोकसिद्धाभिः क्रीडाभिरितरेतरम्। समस्तलोकनाथानां नाथभूतौ भुवं गतौ॥ ५
मनुष्यधर्माभिरतौ मानयन्तौ मनुष्यताम्। तज्जातिगुणयुक्ताभिः क्रीडाभिश्चेरतुर्वनम्॥ ६
ततस्त्वान्दोलिकाभिश्च नियुद्धैश्च महाबलौ। व्यायामं चक्रतुस्तत्र क्षेपणीयैस्तथाऽश्मभिः॥ ७
तल्लिप्सुरसुरस्तत्र उभयो रममाणयोः। आजगाम प्रलम्बाख्यो गोपवेषतिरोहितः॥ ८
सोऽवगाहत निःशङ्कं तेषां मध्यममानुषः। मानुषं रूपमास्थाय प्रलम्बो दानवोत्तमः॥ ९
तयोश्छिद्रान्तरप्रेप्सुरतिशीघ्रममन्यत। कृष्णं ततो रौहिणेयं हन्तुं चक्रे मनोरथम्॥ १०
हरिणा क्रीडनं नाम बालक्रीडनकं ततः। प्रक्रीडितास्तु ते सर्वे द्वौ द्वौ युगपदुत्पतन्॥ ११
श्रीदाम्ना सह गोविन्दः प्रलम्बेन तथा बलः। गोपालैरपरैश्चान्ये गोपालाः सह पुप्लुवुः॥ १२
श्रीदामानं ततः कृष्णः प्रलम्बं रोहिणीसुतः। जितवान्कृष्णपक्षीयैर्गोपैरन्यैः पराजिताः॥ १३
ते वाहयन्तस्त्वन्योन्यं भाण्डीरस्कन्धमेत्य वै। पुनर्निवृत्तास्ते सर्वे ये ये तत्र पराजिताः॥ १४
संकर्षणं तु स्कन्धेन शीघ्रमुत्क्षिप्य दानवः। न तस्थौ प्रजगामैव सचन्द्र इव वारिदः॥ १५
अशक्तो वहने तस्य संरम्भाद्दानवोत्तमः। ववृधे सुमहाकायः प्रावृषीव बलाहकः॥ १६
संकर्षणस्तु तं दृष्ट्वा दग्धशैलोपमाकृतिम्। स्रग्दामलम्बाभरणं मुकुटाटोपमस्तकम्॥ १७
रौद्रं शकटचक्राक्षं पादन्यासचलत्क्षितिम्। ह्रियमाणस्ततः कृष्णमिदं वचनमब्रवीत्॥ १८

बलराम उवाच—

कृष्ण कृष्ण ह्रिये ह्येष पर्वतोदग्रमूर्तिना। केनापि पश्य दैत्येन गोपालच्छद्मरूपिणा॥ १९
यदत्र सांप्रतं कार्यं मया मधुनिषूदन। तत्कथयतां प्रयात्येष दुरात्माऽतित्वरान्वितः॥ २०

व्यास उवाच—

तमाह रामं गोविन्दः स्मितभिन्नोष्ठसंपुटः। महात्मा रौहिणेयस्य बलवीर्यप्रमाणवित्॥ २१

---

१ ख. °वमस्यं गु°। २ ख. °मू। तौ जाते°। ३ क. °ह्यो नरै°। ४ क °ध्यगतो रुषा। मा°। ५ क. न। ६ क. °सहताक्षि°।

कृष्ण उवाच—

किमयं मानुषो भावो व्यक्तमेवावलम्ब्यते। सर्वात्मन्सर्वगुह्यानां गुह्याद्गुह्यात्मना त्वया ॥ २२
स्मराशेषजगदीश कारणं कारणाग्रज। आत्मानमेकं तद्वच्च जगत्येकार्णवे च यः ॥ २३
भवानहं च विश्वात्मन्नेकमेव हि कारणम्। जगतोऽस्य जगत्यर्थे भेदेनाऽऽवां व्यवस्थितौ ॥२४
तत्स्मर्यताममेयात्मंस्त्वयाऽऽत्मा जहि दानवम्। मानुष्यमेवमालम्ब्य बन्धूनां क्रियतां हितम् ॥

व्यास उवाच—

इति संस्मारितो विप्राः कृष्णेन सुमहात्मना। विहस्य पीडयामास प्रलम्बं बलवान्बलः ॥ २६
मुष्टिना चाहन्मूर्ध्नि कोपसंरक्तलोचनः। तेन चास्य प्रहारेण बहिर्याते विलोचने ॥ २७
स निष्कासितमस्तिष्को मुखाच्छोणितमुद्वमन्। निपपात महीपृष्ठे दैत्यवर्यो ममार च ॥ २८
प्रलम्बं निहतं दृष्ट्वा बलेनाद्भुतकर्मणा। प्रहृष्टास्तुष्टुवुर्गोपाः साधु साध्विति चाब्रुवन् ॥ २९
संस्तूयमानो रामस्तु गोपैर्दैत्ये निपातिते। प्रलम्बे सह कृष्णेन पुनर्गोकुलमाययौ ॥ ३०

व्यास उवाच—

तयोर्विहरतोरेवं रामकेशवयोर्व्रजे। प्रावृड्व्यतीता विकसत्सरोजा चाभवच्छरत् ॥ ३१
विमलाम्बरनक्षत्रे काले चाभ्यागते व्रजम्। ददर्शेन्द्रोत्सवारम्भप्रवृतान्व्रजवासिनः ॥ ३२
कृष्णस्तानुत्सुकान्दृष्ट्वा गोपानुत्सवलालसान्। कौतूहलादिदं वाक्यं प्राह वृद्धान्महामतिः ॥

कृष्ण उवाच—

कोऽयं शक्रमहो नाम येन वो हर्ष आगतः। प्राह तं नन्दगोपश्च पृच्छन्तमतिसादरम् ॥ ३४

नन्द उवाच—

मेघानां पयसामीशो देवराजः शतक्रतुः। येन संचोदिता मेघा वर्षन्त्यम्बुमयं रसम् ॥ ३५
तद्वृष्टिजनितं सस्यं वयमन्ये च देहिनः। वर्तयामोपभुञ्जानास्तर्पयामश्च देवताः ॥ ३६
क्षीरवत्य इमा गावो वत्सवत्यश्च निर्वृताः। तेन संवर्धितैः सस्यैः पुष्टास्तुष्टा भवन्ति वै ॥ ३७
नासस्या नातृणा भूमिर्न बुभुक्षार्दितो जनः। दृश्यते यत्र दृश्यन्ते वृष्टिमन्तो बलाहकाः ॥ ३८
भौममेतत्पयो गोभिर्धत्ते सूर्यस्य वारिदः। पर्जन्यः सर्वलोकस्य भवाय भुवि वर्षति ॥ ३९
तस्मात्प्रावृषि राजानः शक्रं सर्वे मुदाऽन्विताः। महे सुरेशमर्चन्ति वयमन्ये च देहिनः ॥ ४०

व्यास उवाच—

नन्दगोपस्य वचनं श्रुत्वेत्थं शक्रपूजने। कोपाय त्रिदशेन्द्रस्य प्राह दामोदरस्तदा ॥ ४१

कृष्ण उवाच—

न वयं कृषिकर्तारो वणिज्याजीविनो न च। गावोऽस्मद्दैवतं तात वयं वनचरा यतः ॥ ४२
आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथाऽपरा। विद्याचतुष्टयं त्वेतद्वार्तामत्र शृणुष्व मे ॥ ४३
कृषिर्वणिज्या तद्वच्च तृतीयं पशुपालनम्। विद्या ह्येता(षा) महाभागा वार्ता वृत्तित्रयाश्रया ॥४४
कर्षकाणां कृषिर्वृत्तिः पण्यं तु पणजीविनाम्। अस्माकं गाः परा वृत्तिर्वार्ता भेदैरियं त्रिभिः४५
विद्यया यो यया युक्तस्तस्य सा दैवतं महत्। सैव पूज्याऽर्चनीया च सैव तस्योपकारिका॥ ४६
योऽन्यस्याः फलमश्नन्वै पूजयत्यपरां नरः। इह च प्रेत्य चैवासौ तात नाऽऽप्नोति शोभनम् ४७

---

१ क. रामोऽथ। २ ग. °र्शेन्द्रमहारम्भायोद्यतान्व्र°। ३ क. °यसां स्वामी दे°। ४ क. सस्यैर्हृष्टपुष्टा भ°।

पूज्यन्तां प्रथिताः सी[1]माः सीमान्तं च पुनर्वनम् । वनान्ता गिरयः सर्वे सा चास्माकं परा गतिः
गिरियज्ञस्त्वयं तस्माद्गोयज्ञश्च प्रवर्त्यताम् । किमस्माकं महेन्द्रेण गाव[2]ः शैलाश्च देवताः ॥ ४९
मन्त्रयज्ञपरा विप्राः सीरयज्ञाश्च कर्षकाः । गिरिगोयज्ञशीलाश्च वयमद्रिवनाश्रयाः ॥ ५०
तस्माद्गोवर्धनः शैलो भवद्भिर्विविधार्हणैः । अर्च्यतां पूज्यतां मेध्यं पशुं हत्वा विधानतः ॥ ५१
सर्वघोषस्य संदोहा गृह्यन्तां मा विचार्यताम् । भोज्यन्तां तेन वै विप्रास्तथाऽन्ये चापि वाञ्छकाः
तमर्चितं कृते होमे भोजितेषु द्विजातिषु । शरत्पुष्पकृतापीडाः परिगच्छन्तु गोगणाः ॥ ५३
एतन्मम मतं गोपाः संप्रीत्या क्रियते यदि । ततः कृता भवेत्प्रीतिर्गवामद्रेस्तथा मम ॥ ५४

व्यास उवाच—

इति तस्य वचः श्रुत्वा नन्दाद्यास्ते व्रजौकसः । प्रीत्युत्फुल्लमुखा विप्राः साधु साध्वित्यथाब्रुवन्
शोभनं ते मतं वत्स यदेतद्भवतोदितम् । तत्करिष्याम्यहं सर्वं गिरियज्ञः प्रवर्त्यताम् ॥ ५६
तथाच कृतवन्तस्ते गिरियज्ञं व्रजौकसः । दधिपायसमांसाद्यैर्ददुः शैलबलिं ततः ॥ ५७
द्विजांश्च भोजयामासुः शतशोऽथ सहस्रशः । गावः शैलं ततश्चक्रुरर्चितास्तं प्रदक्षिणम् ॥ ५८
वृषभाश्चाभिनर्दन्तः सतोया जलदा इव । गिरिमूर्धनि गोविन्दः शैलोऽहमिति मूर्तिमान् ॥ ५९
बुभुजेऽन्नं बहुविधं गोपवर्याहृतं द्विजाः । कृष्णस्तेनैव रूपेण गोपैः सह गिरेः शिरः ॥ ६०
अधिरुह्यार्चयामास द्वितीयामात्मनस्तनुम् । अन्तर्धानं गते तस्मिन्गोपा लब्ध्वा ततो वरान् ॥
कृत्वा गिरिमहं गोष्ठं निजमभ्याययुः पुनः ॥ ६१

इति श्रीमहापुराणे आदिब्राह्मे बालचरिते गोवर्धनगिरियज्ञप्रवर्तनं नाम सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९८७८

अथाष्टाशीत्यधिकशततमोऽध्यायः ।

व्यास उवाच[3]—

मखे प्रतिहते शक्रो भृशं कोपसमन्वितः । संवर्तकं नाम गणं तोयदानामथाब्रवीत् ॥ १

इन्द्र उवाच—

भो भो मेघा निशम्यैतद्वदतो वचनं मम । आज्ञा[4]नन्तरमेवाऽऽशु क्रियतामविचारितम् ॥ २
नन्दगोपः सुदुर्बुद्धिर्गोपैरन्यैः सहायवान् । कृष्णाश्रयब[5]लाध्मातो मखभङ्गमचीकरत् ॥ ३
आजीवो यः परं तेषां गोपत्वस्य च कारणम् । ता गावो वृष्टिपातेन पीड्यन्तां वचनान्मम ॥ ४
अहमप्यद्रिशृङ्गाभं तुङ्गमारुह्य वारणम् । साहाय्यं वः करिष्यामि वा[6]यूनां संगमेन च ॥ ५

व्यास उवाच—

इत्याज्ञप्ताः सुरेन्द्रेण मुमुचुस्ते बलाहकाः । वातवर्षं महाभीममभावाय गवां द्विजाः ॥ ६
ततः क्षणेन धरणी ककुभोऽम्बरमेव च । एकं धारामहासारपूरणेनाभवद्द्विजाः ॥ ७

---

१ क. °सीमा गिरयो धेनुकास्तथा । येनास्माकं हि गिरयो धेनुश्च परमा ग° । २ ग. °द्रिबलाध्र°। ३ ख. °च—यह्रो च प्रह्° । ४ क. °ज्ञा परं ममैवाऽऽ° । ५ ख. °बलोन्मत्तो म° । ६ ग. वायुमुत्सर्गयोजितम् । व्या° ।

गावस्तु तेन पतता वर्षवातेन वेगिना । धुताः प्राणाञ्जहुः सर्वास्तिर्यङ्मुखशिरोधराः ॥ ८
क्रोडेन वत्सानाक्रम्य तस्थुरन्या द्विजोत्तमाः । गावो विवत्साश्च कृता वारिपूरेण चापराः ॥ ९
वत्साश्च दीनवदनाः पवनाकम्पिकंधराः । त्राहि त्राहीत्यल्पशब्दाः कृष्णमूचुरिवाऽऽर्तकाः १०
ततस्तद्गोकुलं सर्वं गोगोपीगोपसंकुलम् । अतीवाऽऽर्तं हरिर्दृष्ट्वा त्राणायाचिन्तयत्तदा ॥ ११
एतत्कृतं महेन्द्रेण महभङ्गविरोधिना । तदेतदखिलं गोष्ठं त्रातव्यमधुना मया ॥ १२
इममद्रिमहं वीर्यादुत्पाट्योरुशिलातलम् । धारयिष्यामि गोष्ठस्य पृथुच्छत्रमिवोपरि ॥ १३

व्यास उवाच—

इति कृत्वा मतिं कृष्णो गोवर्धनमहीधरम् । उत्पाट्यैककरेणैव धारयामास लीलया ॥ १४
गोपांश्चाऽऽह जगन्नाथः समुत्पाटितभूधरः । विशध्वमत्र सहिताः कृतं वर्षनिवारणम् ॥ १५
सुनिर्वातेषु देशेषु यथायोग्यमिहाऽऽस्यताम् । प्रविश्य नात्र भेतव्यं गिरिपातस्य निर्भयैः ॥ १६
इत्युक्तास्तेन ते गोपा विविशुर्गोधनैः सह । शकटारोपितैर्भाण्डैर्गोप्यश्चाऽऽसारपीडिताः ॥ १७
कृष्णोऽपि तं दधारैवं शैलमत्यन्तनिश्चलम् । व्रजौकोवासिभिर्हर्षविस्मिताक्षैर्निरीक्षितः ॥ १८
गोपगोपीजनैर्हृष्टैः प्रीतिविस्तारितेक्षणैः । संस्तूयमानचरितः कृष्णः शैलमधारयत् ॥ १९
सप्तरात्रं महामेघा ववर्षुर्नन्दगोकुले । इन्द्रेण चोदिता मेघा गोपानां नाशकारिणा ॥ २०
ततो धृते महाशैले परित्राते च गोकुले । मिथ्याप्रतिज्ञो बलभिद्वारयामास तान्घनान् ॥ २१
व्यभ्रे नभसि देवेन्द्रे वितथे शक्रमन्त्रिते । निष्क्रम्य गोकुलं हृष्टः स्वस्थानं पुनरागमत् ॥ २२
मुमोच कृष्णोऽपि तदा गोवर्धनमहागिरिम् । स्वस्थाने विस्मितमुखैर्दृष्टस्तैर्व्रजवासिभिः ॥ २३

व्यास उवाच—

धृते गोवर्धने शैले परित्राते च गोकुले । रोचयामास कृष्णस्य दर्शनं पाकशासनः ॥ २४
सोऽधिरुह्य महानागमैरावतममित्रजित् । गोवर्धनगिरौ कृष्णं ददर्श त्रिदशाधिपः ॥ २५
चारयन्तं महावीर्यं गाश्च गोपवपुर्धरम् । कृत्स्नस्य जगतो गोपं वृतं गोपकुमारकैः ॥ २६
गरुडं च ददर्शोच्चैरन्तर्धानगतं द्विजाः । कृतच्छायं हरेर्मूर्ध्नि पक्षाभ्यां पक्षिपुंगवम् ॥ २७
अवरुह्य स नागेन्द्रादेकान्ते मधुसूदनम् । शक्रः सस्मितमाहेदं प्रीतिविस्फारितेक्षणः ॥ २८

इन्द्र उवाच—

कृष्ण कृष्ण शृणुष्वेदं यदर्थमहमागतः । त्वत्समीपं महाबाहो नैतच्चिन्त्यं त्वयाऽन्यथा ॥ २९
भारावतरणार्थाय पृथिव्याः पृथिवीतलम् । अवतीर्णोऽखिलाधारस्त्वमेव परमेश्वर ॥ ३०
महभङ्गविरुद्धेन मया गोकुलनाशकाः । समादिष्टा महामेघास्तैश्चैतत्कदनं कृतम् ॥ ३१
त्रातास्तापात्त्वया गावः समुत्पाट्य महागिरिम् । तेनाहं तोषितो वीर कर्मणाऽत्यद्भुतेन ते ॥
साधितं कृष्ण देवानामद्य मन्ये प्रयोजनम् । त्वयाऽयमद्रिप्रवरः करेणैकेन चोद्धृतः ॥ ३३
गोभिश्च नोदितः कृष्ण त्वत्समीपमिहाऽऽगतः । त्वया त्राताभिरत्यर्थं युष्मत्कारणकारणात् ३४
स त्वां कृष्णाभिषेक्ष्यामि गवां वाक्यप्रचोदितः । उपेन्द्रत्वे गवामिन्द्रो गोविन्दस्त्वं भविष्यसि
अथोपवाह्यादादाय घण्टामैरावताद्गजात् । अभिषेकं तया चक्रे पवित्रजलपूर्णया ॥ ३६

---

१ ख. °दना बभूवुर्वर्षपीडिताः । त्रा° । २ क. °गोपगोपीसमाकु° । ३ क. गा गोपैः सहितं तदा । कृ° । ४ क. °क्षणम् । इ° । ५ क. °चित्रं विभो त्वयि । भा° । ६ ख. देव ।

क्रियमाणेऽभिषेके तु गावः कृष्णस्य तत्क्षणात् । प्रस्रवोद्भूतदुग्धार्द्रां सद्यश्चक्रुर्वसुंधराम् ॥ ३७
अभिषिच्य गवां वाक्याद्देवेद्रो वै जनार्दनम् । प्रीत्या सप्रश्रयं कृष्णं पुनराह शचीपतिः ॥ ३८

इन्द्र उवाच—

गवामेतत्कृतं वाक्यात्तथाऽन्यदपि मे शृणु । यद्ब्रवीमि महाभाग भारावतरणेच्छया ॥ ३९
ममांशः पुरुषव्याघ्रः पृथिव्यां पृथिवीधर । अवतीर्णोऽर्जुनो नाम स रक्ष्यो भवता सदा ॥ ४०
भारावतरणे सख्यं स ते वीरः करिष्यति । स रक्षणीयो भवता यथाऽऽत्मा मधुसूदन ॥ ४१

श्रीभगवानुवाच—

जानामि भारते वंशे जातं पार्थं तवांशतः । तमहं पालयिष्यामि यावदस्मि महीतले ॥ ४२
यावन्महीतले शक्र स्थास्याम्यहमरिंदम । न तावदर्जुनं कश्चिद्देवेन्द्र युधि जेष्यति ॥ ४३
कंसो नाम महाबाहुर्दैत्योऽरिष्टस्तथा परः । केशी कुवलयापीडो नरकाद्यास्तथाऽपरे ॥ ४४
हतेषु तेषु देवेन्द्र भविष्यति महाहवः । तत्र विद्धि सहस्राक्ष भारावतरणं कृतम् ॥ ४५
स त्वं गच्छ न संतापं पुत्रार्थे कर्तुमर्हसि । नार्जुनस्य रिपुः कश्चिन्ममाग्रे प्रभविष्यति ॥ ४६
अर्जुनार्थे त्वहं सर्वान्युधिष्ठिरपुरोगमान् । निवृत्ते भारते युद्धे कुन्त्यै दास्यामि विक्षतान् ॥ ४७

व्यास उवाच—

इत्युक्तः संपरिष्वज्य देवराजो जनार्दनम् । आरुह्यैरावतं नागं पुनरेव दिवं ययौ ॥ ४८
कृष्णोऽपि सहितो गोभिर्गोपालैश्च पुनर्व्रजम् । आजगामाथ गोपीनां दृष्टपूतेन वर्त्मना ॥ ४९

इति श्रीमहापुराणे आदिब्राह्मे बालचरिते गोविन्दाभिषेकवर्णनं नामाष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—९९२७

अथोननवत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

गते शक्रे तु गोपालाः कृष्णमक्लिष्टकारिणम् । ऊचुः प्रीत्या धृतं दृष्ट्वा तेन गोवर्धनाचलम् ॥ १

गोपा ऊचुः—

वयमस्मान्महाभाग भवता महतो भयात् । गावश्च भवता त्राता गिरिधारणकर्मणा ॥ २
बालक्रीडेयमतुला गोपालत्वं जुगुप्सितम् । दिव्यं च कर्म भवतः किमेतत्तात कथ्यताम् ॥ ३
कालियो दमितस्तोये प्रलम्बो विनिपातितः । धृतो गोवर्धनश्चायं शङ्कितानि मनांसि नः ॥ ४
सत्यं सत्यं हरेः पादौ श्रयामोऽमितविक्रम । यथा त्वद्वीर्यमालोक्य न त्वां मन्यामहे नरम् ॥ ५
देवो वा दानवो वा त्वं यक्षो गन्धर्व एव वा। किं चास्माकं विचारेण बान्धवोऽस्ति नमोऽस्तु ते
प्रीतिः सस्त्रीकुमारस्य व्रजस्य तव केशव । कर्म चेदमशक्यं यत्समस्तैस्त्रिदशैरपि ॥ ७
बालत्वं चातिवीर्यं च जन्म चास्मास्वशोभनम् । चिन्त्यमानममेयात्मञ्शङ्कां कृष्ण प्रयच्छति॥८

व्यास उवाच—

क्षणं भूत्वा त्वसौ तूष्णीं किंचित्प्रणयकोपवान् । इत्येवमुक्तस्तैर्गोपैराह कृष्णो द्विजोत्तमाः ॥ ९

---

१ क. पुत्रं । २ क. °वः । भविष्यति स° । ३ ख. °श्चित्संग्रामे संभ° । ४ ख. °नार्थं त्व° । ५ °गं त्वरितं स ।

श्रीकृष्ण उवाच—

मत्संबन्धेन वो गोपा यदि लज्जा न जायते। श्लाघ्यो वाऽहं ततः किं वो विचारेण प्रयोजनम्
यदि वोऽस्ति मयि प्रीतिः श्लाघ्योऽहं भवतां यदि। तदर्घा बन्धुसदृशी बान्धवाः क्रियतां मयि
नाहं देवो न गन्धर्वो न यक्षो न च दानवः। अहं वो बान्धवो जातो नातश्चिन्त्यमतोऽन्यथा १२

व्यास उवाच—

इति श्रुत्वा हरेर्वाक्यं बद्धमौनास्ततो बलम्। ययुर्गोपा महाभागास्तस्मिन्प्रणयकोपिनि ॥ १३
कृष्णस्तु विमलं व्योम शरच्चन्द्रस्य चन्द्रिकाम्। तथा कुमुदिनीं फुल्लामामोदितदिगन्तराम् ॥१४
वनराजीं तथा कूजद्भृङ्गमालामनोरमाम्। विलोक्य सह गोपीभिर्मनश्चक्रे रतिं प्रति ॥ १५
सह रामेण मधुरमतीव वनिताप्रियम्। जगौ [1]कमलपादोऽसौ नाम तत्र [2]कृतव्रतः ॥ १६
रम्यं गीतध्वनिं श्रुत्वा संत्यज्यावसथांस्तदा। आजग्मुस्त्वरिता गोप्यो यत्राऽऽस्ते मधुसूदनः ॥
शनैः शनैर्जगौ गोपी काचित्तस्य पदानुगा। दत्तावधाना काचिच्च तमेव मनसाऽस्मरत् ॥ १८
काचित्कृष्णेति कृष्णेति चोक्त्वा लज्जामुपाययौ। ययौ च काचित्प्रेमान्धा [3]तत्पार्श्वमविलज्जिता
काचिदावसथस्यान्तः स्थित्वा दृष्ट्वा बहिर्गुरुम्। तन्मयत्वेन गोविन्दं दध्यौ मीलितलोचना ॥२०
गोपीपरिवृतो रात्रिं शरच्चन्द्रमनोरमाम्। मानयामास गोविन्दो रासारम्भरसोत्सुकः ॥ २१
गोप्यश्च वृन्दशः कृष्णचेष्टाभ्यायत्तमूर्तयः। [4]अन्यदेशगते कृष्णे चेरुर्वृन्दावनान्तरम् ॥ २२
बभ्रमुस्तास्ततो गोप्यः कृष्णदर्शनलालसाः। कृष्णस्य चरणं रात्रौ दृष्ट्वा वृन्दावने द्विजाः ॥ २३
एवं नानाप्रकारासु कृष्णचेष्टासु तासु च। गोप्यो व्यग्राः समं चेरू रम्यं वृन्दावनं वनम् ॥२४
निवृत्तास्तास्ततो गोप्यो निराशाः कृष्णदर्शने। यमुनातीरमागम्य जगुस्तच्चरितं द्विजाः ॥ २५
ततो ददृशुरायान्तं विकाशिमुखपङ्[5]कजम्। गोप्यस्त्रैलोक्य[6]गोप्तारं कृष्णमक्लिष्टकारिणम् ॥ २६
काचिदालोक्य गोविन्दमायान्तमतिहर्षिता। कृष्ण कृष्णेति कृष्णेति प्राहोत्फुल्लविलोचना॥ २७
काचिद्भ्रूभङ्गुरं कृत्वा ललाटफलकं हरिम्। विलोक्य नेत्रभृङ्गाभ्यां पपौ तन्मुखपङ्कजम् ॥ २८
काचिदालोक्य गोविन्दं निमीलितविलोचना। तस्यैव रूपं ध्यायन्ती योगारूढेवसा बभौ ॥२९
त[7]तः कांचित्प्रियाला[8]पैः कांचिद्भ्रूभङ्गवीक्षि[9]तैः। निन्येऽनुनयमन्याश्च करस्पर्शेन माधवः ॥ ३०
ताभिः प्रसन्नचित्ताभिर्गोपीभिः सह सादरम्। रराम रासगोष्ठीभिरुदारचरितो हरिः ॥ ३१
रासमण्डलबद्धोऽपि कृष्णपार्श्वमनूद्गता। गोपीजनो न चैवाभूदेकस्थानस्थिरात्मना ॥ ३२
हस्ते प्रगृह्य चैकैकां गोपिकां रासमण्डलम्। चकार च करस्पर्शनिमीलितदृशं हरिः ॥ ३३
ततः प्र[10]वंवृते रम्या चलद्वलयनिस्वनैः। अ[11]नुयातशरत्काव्यगेयगीतिरनुक्रमात् ॥ ३४
[12]कृष्णः श[13]रच्चन्द्रमसं कौमुदीकु[14]मुदाकरम्। जगौ गोपीजन[15]स्त्वेकं कृष्णनाम पुनः पुनः ॥ ३५
परि[16]वृत्ता श्रमे[17]णैका चलद्वलयतापिनी। ददौ बाहुलतां स्कन्धे गोपी म[18]धुविघातिनः ॥ ३६
काचित्प्रविलसद्बाहुः परिरभ्य चुचुम्ब तम्। गोपी गीतस्तुतिव्याजनिपुणा मधुसूदनम् ॥ ३७

---

१ ग. कलपदं शौरिर्नाम। २ ग. कृतं व्रजे। र°। ३ क. तत्प्रार्थनविल°। ४ क. अन्यास्त्वसंगताः कृ°। ५ क. °ङ्कजाः। गो°। ६ क. °क्यभर्तारं। ७ क. °तः काचि°। ८ क. °पैः काचि°। ९ क. °तैः। त्रियामां गमयामास रसस्पर्शेन मानिनी। ता°। १० क. प्रसन्नचित्ताभिश्चल°। ११ क. °नुपात्तशिराकाव्यं गायन्तीभिर°। १२ क. कृष्णं। १३ क. शरच्चन्द्रनिभं। १४ क. °कुसुमाक°। १५ क. °स्त्वेवं रामं कृष्णं पु°। १६ ग. °रिवर्तश्च°। १७ क. °णैव काचिद्व°। १८ क. °धुनिपाति°।

गोपीकपोलसंश्लेषमभिपद्य हरेर्भुजौ । पुलकोद्गमशस्याय स्वेदाम्बुघनतां गतौ ।। ३८
रासगेयं जगौ कृष्णो यावत्तारतरध्वनिः । साधु कृष्णेति कृष्णेति तावत्ता द्विगुणं जगुः ।। ३९
गतेऽनुगमनं चक्रुर्वलने संमुखं ययुः । प्रतिलोमानुलोमेन[2] भेजुर्गोपाङ्गना हरिम् ।। ४०
स तदा सह गोपीभी रराम मधुसूदनः । स वर्षकोटिप्रतिमः क्षणस्तेन विनाऽभवत् ।। ४१
ता वार्यमाणाः पितृभिः पतिभिर्भ्रातृभिस्तथा । कृष्णं गोपाङ्गना रात्रौ रमयन्ति रतिप्रियाः ४२
सोऽपि कैशोरकवया मानयन्मधुसूदनः । रेमे ताभिरमेयात्मा क्षपासु क्षपिताहितः ।। ४३
तद्भर्तृषु तथा तासु सर्वभूतेषु चेश्वरः । आत्मस्वरूपरूपोऽसौ व्याप्य[3] सर्वमवस्थितः ।। ४४
यथा समस्तभूतेषु नभोऽग्निः पृथिवी जलम् । वायुश्चाऽऽत्मा तथैवासौ व्याप्य सर्वमवस्थितः ।।

व्यास उवाच[4]—

प्रदोषार्धे कदाचित्तु रासासक्ते जनार्दने । त्रासयन्समदो गोष्ठानरिष्टः समुपागतः ।। ४६
सतोयतोयदाकारस्तीक्ष्णशृङ्गोऽर्कलोचनः । खुराग्रपातैरत्यर्थं दारयन्धरणीतलम् । ४७
लेलिहानः सनिष्पेषं[5] जिह्वयोष्ठौ पुनः पुनः । संरम्भाक्षिप्तलाङ्गूलः कठिनस्कन्धबन्धनः[6][7] ।। ४८
उदग्रककुदाभोगः प्रमाणाद्दुरतिक्रमः । विण्मूत्रालिप्तपृष्ठाङ्गो गवामुद्वेगकारकः ।। ४९
प्रलम्बकण्ठोऽभिमुखस्तरुघाताङ्कितानन[8]ः । पातयन्स गवां गर्भान्दैत्यो वृषभरूपधृक् ।। ५०
सूदयंस्तरसा सर्वान्वनान्यटति यः सदा । ततस्तमतिघोराक्षमवेक्ष्यातिभयातुराः ।। ५१
गोपा गोपस्त्रियश्चैव कृष्णकृष्णेति चुक्रुशुः । सिंहनादं ततश्चक्रे[10] तलशब्दं च केशवः ।। ५२
तच्छब्दश्रवणाच्चासौ दामोदरमुखं ययौ । अग्रन्यस्तविषाणाग्रः[11] कृष्णकुक्षिकृतेक्षणः ।। ५३
अभ्यधावत दुष्टात्मा दैत्यो वृषभरूपधृक् । आयान्तं दैत्यवृषभं दृष्ट्वा कृष्णो महाबलम् ।। ५४
न चचाल ततः स्थानादवज्ञास्मितलीलया । आसन्नं चैव जग्राह ग्राहवन्मधुसूदनः ।। ५५
जघान जानुना कुक्षौ[12] विषाणग्रहणाचलम् । तस्य दर्पबलं हत्वा गृहीतस्य विषाणयोः ।। ५६
आपीडयदरिष्टस्य कण्ठं क्लिन्नमिवाम्बरम् । उत्पाट्य शृङ्गमेकं च तेनैवाताडयत्ततः ।। ५७
ममार स महादैत्यो मुखाच्छोणितमुद्वमन् । तुष्टुवुर्निहते तस्मिन्गोपा दैत्ये जनार्दनम् ।।
जम्भे हते सहस्राक्षं पुरा देवगणा यथा ।। ५८

इति श्रीमहापुराणे आदिब्राह्मे बालचरितेऽरिष्टवधनिरूपणं
नामोननवत्यधिकशततमोऽध्यायः ।। १८९ ।।

आदितः श्लोकानां समष्ट्यङ्काः—९९८९

अथ नवत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

ककुद्मिनि हतेऽरिष्टे धेनुके च निपातिते । प्रलम्बे निधनं नीते धृते गोवर्धनाचले ।। १

---

१ क. ग. °कुश्वल° । २ ख. °लोमेन मार्गेण ययुर्गा° । ३ ख. °प्य चाऽऽत्मन्यवस्थि° । ४ ख. °च । परेऽहि च क° । ५ क. सनिष्कम्पो । ६ क. कपिलस्क° । ७ क. ख. °बन्धुरः । उ° । ८ क. °रुपाता° । ९ क. °नः । घात° । १० ग. °क्रे नाल° । ११ क. °न्तं तमथो दैत्यं द° । १२ क. °ष्ठं स्विन्न° ।

दमिते कालिये नागे भग्ने तुङ्गद्रुमद्वये । हतायां पूतनायां च शकटे परिवर्तिते ॥ २
कंसाय नारदः प्राह यथावृत्तमनुक्रमात् । यशोदादेवकीगर्भपरिवर्ताद्यशेषतः ॥ ३
श्रुत्वा तत्सकलं कंसो नारदाद्देवदर्शनात् । वसुदेवं प्रति तदा कोपं चक्रे स दुर्मतिः ॥ ४
सोऽतिकोपादुपालभ्य सर्वयादवसंसदि । जगर्हे यादवांश्चापि कार्यं चैतदचिन्तयत् ॥ ५
यावन्न बलमारूढौ बलकृष्णौ सुबालकौ । तावदेव मया वध्यावसाध्यौ रूढयौवनौ ॥ ६
चाणूरोऽत्र महावीर्यो मुष्टिकश्च महाबलः । एताभ्यां मल्लयुद्धे तौ घातयिष्यामि दुर्मदौ ॥ ७
धनुर्महमहायागव्याजेनाऽऽनीय तौ व्रजात् । तथा तथा करिष्यामि यास्यतः संक्षयं यथा ॥ ८

व्यास उवाच—

इत्यालोच्य स दुष्टात्मा कंसो रामजनार्दनौ । हन्तुं कृतमतिर्वीरमक्रूरं वाक्यमब्रवीत् ॥ ९

कंस उवाच—

भो भो दानपते वाक्यं क्रियतां प्रीतये मम । इतः स्यन्दनमारुह्य गम्यतां नन्दगोकुलम् ॥ १०
वसुदेवसुतौ तत्र विष्णोरंशसमुद्भवौ । नाशाय किल संभूतौ मम दुष्टौ प्रवर्धतः ॥ ११
धनुर्महमहायागश्चतुर्दश्यां भविष्यति । आनेयौ भवता तौ तु मल्लयुद्धाय तत्र वै ॥ १२
चाणूरमुष्टिकौ मल्लौ नियुद्धकुशलौ मम । ताभ्यां सहानयोर्युद्धं सर्वलोकोऽत्र पश्यतु ॥ १३
नागः कुवलयापीडो महामात्रप्रचोदितः । स तौ निहंस्यते पापौ वसुदेवात्मजौ शिशू ॥ १४
तौ हत्वा वसुदेवं च नन्दगोपं च दुर्मतिम् । हनिष्ये पितरं चैव उग्रसेनं च दुर्मतिम् ॥ १५
ततः समस्तगोपानां गोधनान्यखिलान्यहम् । वित्तं चापहरिष्यामि दुष्टानां मद्वधैषिणाम् ॥ १६
त्वामृते यादवाश्चेमे दुष्टा दानपते मम । एतेषां च वधायाहं प्रयतिष्याम्यनुक्रमात् ॥ १७
ततो निष्कण्टकं सर्वं राज्यमेतदयादवम् । प्रसाधिष्ये त्वया तस्मान्मत्प्रीत्या वीर गम्यताम् १८
यथा च माहिषं सर्पिर्दधि चाप्युपहार्यं वै । गोपाः समानयन्त्याशु त्वया वाच्यास्तथा तथा १९

व्यास उवाच—

इत्याज्ञप्तस्तदाऽक्रूरो महाभागवतो द्विजाः । प्रीतिमानभवत्कृष्णं श्वो द्रक्ष्यामीति सत्वरः ॥ २०
तथेत्युक्त्वा तु राजानं रथमारुह्य सत्वरः । निश्चक्राम तदा पुर्या मथुराया मधुप्रियः ॥ २१

व्यास उवाच—

केशी चापि बलोदग्रः कंसदूतः प्रचोदितः । कृष्णस्य निधनाकाङ्क्षी वृन्दावनमुपागमत् ॥ २२
सखुरक्षतभूपृष्ठः सटाक्षेपधुताम्बुदः । पुनर्विक्रान्तचन्द्रार्कमार्गो गोपान्तमागमत् ॥ २३
तस्य हेषितशब्देन गोपाला दैत्यवाजिनः । गोप्यश्च भयसंविग्ना गोविन्दं शरणं ययुः ॥ २४
त्राहि त्राहीति गोविन्दस्तेषां श्रुत्वा तु तद्वचः । सतोयजलदध्वानगम्भीरमिदमुक्तवान् ॥ २५

गोविन्द उवाच—

अलं त्रासेन गोपालाः केशिनः किं भयातुरैः । भवद्भिर्गोपजातीयैर्वीरवीर्यं विलोप्यते ॥ २६
किमनेनाल्पसारेण हेषितारोपकारिणा । दैतेयबलवाह्येन वल्गता दुष्टवाजिना ॥ २७
एह्येहि दुष्ट कृष्णोऽहं पूष्णस्त्विव पिनाकधृक् । पातयिष्यामि दशनान्वदनादखिलांस्तव ॥ २८

---

१ क. °रिवृत्तिमशे° । २ क. °क्रे सुदु° । ३ ख. °मखम° । ४ ख. ग. °तां गोपगो° । ५ ग. °मंहो ममाप्यत्र चतु° । ६ क. °गस्त्रयोदश्यां । ७ क. °दवाः सर्वे दु° । ८ क. तत्क्षणम् । ९ क. °वाक्येन वल्लभा दु° ।

व्यास उवाच—

इत्युक्त्वा स तु गोविन्दः केशिनः संमुखं ययौ । विवृतास्यश्च सोऽप्येनं दैतेयश्च उपाद्रवत् ॥ २९
बाहुमाभोगिनं कृत्वा मुखे तस्य जनार्दनः । प्रवेशयामास तदा केशिनो दुष्टवाजिनः ॥ ३०
केशिनो वदनं तेन विशता कृष्णबाहुना । शातिता दशनास्तस्य सिताभ्रावयवा इव ॥ ३१
कृष्णस्य ववृधे बाहुः केशिदेहगतो द्विजाः । विनाशाय यथा व्याधिराम्भूतैरुपेक्षितः ॥ ३२
विपाटितौष्ठो बहुलं सफेनं रुधिरं वमन् । सृक्कणी विवृते चक्रे विश्लिष्टे मुक्तबन्धने ॥ ३३
जगाम धरणीं पादैः शकृन्मूत्रं समुत्सृजन् । स्वेदार्द्रगात्रः श्रान्तश्च [1]निर्यत्नः सोऽभवत्ततः ॥ ३४
व्यादितास्यो महारौद्रः सोऽसुरः कृष्णबाहुना । निपपात द्विधाभूतो वैद्युतेन यथा द्रुमः ॥ ३५
द्विपादपृष्ठपुच्छार्धश्रवणैकाक्षनासिके । केशिनस्ते द्विधा भूते शकले च विरेजतुः ॥ ३६
हत्वा तु केशिनं कृष्णो मुदितैर्गोपकैर्वृतः । अनायस्ततनुः स्वस्थो हसंस्तत्रैव [3]संस्थितः ॥ ३७
ततो गोपाश्च गोप्यश्च हते केशिनि विस्मिताः । तुष्टुवुः पुण्डरीकाक्षमनुरागमनोरमम् ॥ ३८
आययौ त्वरितो विप्रो नारदो जलदस्थितः । केशिनं निहतं दृष्ट्वा हर्षनिर्भरमानसः ॥ ३९

नारद उवाच—

साधु साधु जगन्नाथ लीलयैव यदच्युत । निहतोऽयं त्वया केशी क्लेशदस्त्रिदिवौकसाम् ॥ ४०
सुकर्माण्यवतारे तु कृतानि मधुसूदन । यानि वै विस्मितं चेतस्तोषमेतेन मे गतम् ॥ ४१
तुरगस्यास्य शक्रोऽपि कृष्ण देवाश्च बिभ्यति । धुतकेसरजालस्य हेषतोऽभ्रावलोकिनः ॥ ४२
यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन । तस्मात्केशवनाम्ना त्वं लोके गेयो भविष्यसि ॥ ४३
स्वस्त्यस्तु ते गमिष्यामि कंसयुद्धेऽधुना पुनः । परश्वोऽहं समेष्यामि त्वया केशिनिषूदन ॥ ४४
उग्रसेनसुते कंसे सानुगे विनिपातिते । भारावतारकर्ता त्वं पृथिव्या धरणीधर ॥ ४५
तत्रानेकप्रकारेण युद्धानि पृथिवीक्षिताम् । द्रष्टव्यानि मया युष्मत्प्रणीतानि जनार्दन ॥ ४६
सोऽहं यास्यामि गोविन्द देवकार्यं महत्कृतम् । त्वया सभाजितश्चाहं स्वस्ति तेऽस्तु व्रजाम्यहम्

व्यास उवाच—

नारदे तु गते कृष्णः सह गोपैरविस्मितः । विवेश गोकुलं गोपीनेत्रपानैकभाजनम् ॥ ४८

इति श्रीमहापुराणे आदिब्राह्मे कृष्णबालचरिते केशिवधनिरूपणं नाम
नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

आदितः श्लोकानां समष्ट्यङ्काः—१००३३

अथैकनवत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

अक्रूरोऽपि विनिष्क्रम्य स्यन्दनेनाऽऽशुगामिना । कृष्णसंदर्शनासक्तः प्रययौ नन्दगोकुले ॥ १
चिन्तयामास चाक्रूरो नास्ति धन्यतरो मया । योऽहमंशावतीर्णस्य मुखं द्रक्ष्यामि चक्रिणः ॥ २

---

१ क. निर्वणः । २ क. °ष्णो गोपालैर्बहुभिर्वृ° । ३ ख. तस्थिवान् । ४ क. ग. °न् । अथाऽऽह त्वं° । ५ ग. °लदे स्थि°

अद्य मे सफलं जन्म सुप्रभाता च मे निशा । यदुन्निद्राब्जपत्राक्षं विष्णोर्द्रक्ष्याम्यहं मुखम् ॥ ३
पापं हरति यत्पुंसां स्मृतं संकल्पनामयम् । तत्पुण्डरीकनयनं विष्णोर्द्रक्ष्याम्यहं मुखम् ॥ ४
निर्जग्मुश्च यतो वेदा वेदाङ्गान्यखिलानि च । द्रक्ष्यामि यत्परं धाम देवानां भगवन्मुखम् ॥ ५
यज्ञेषु यज्ञपुरुषः पुरुषैः पुरुषोत्तमः । इज्यते योऽखिलाधारस्तं द्रक्ष्यामि जगत्पतिम् ॥ ६
इष्ट्वा यमिन्द्रो यज्ञानां शतेनामरराजताम् । अवाप तमनन्तादिमहं द्रक्ष्यामि केशवम् ॥ ७
न ब्रह्मा नेन्द्ररुद्राश्विवस्वादित्यमरुद्गणाः । यस्य स्वरूपं जानन्ति स्पृशत्यद्य स मे हरिः ॥ ८
सर्वात्मा सर्वगः सर्वः सर्वभूतेषु संस्थितः । यो भवत्यव्ययो व्यापी स वीक्ष्यते मयाऽद्य ह ॥९
मत्स्यकूर्मवराहाद्यैः सिंहरूपादिभिः स्थितम् । चकार योगतो योगं स मामालपयिष्यति ॥ १०
सांप्रतं च जगत्स्वामी कार्यजाते व्रजे स्थितिम् । कर्तुं मनुष्यतां प्राप्तः स्वेच्छादेहधृगव्ययः॥११
योऽनन्तः पृथिवीं धत्ते शिखरस्थितिसंस्थिताम् । सोऽवतीर्णो जगत्यर्थे मामक्रूरेति वक्ष्यति॥१२
पितृबन्धुसुहृद्भ्रातृमातृबन्धुमयीमिमाम् । यन्मायां नालमुद्धर्तुं जगत्तस्मै नमो नमः ॥ १३
तरन्त्यविद्यां विततां हृदि यस्मिन्निवेशिते । योगमायामिमां मर्त्यास्तस्मै विद्यात्मने नमः ॥ १४
यज्वभिर्यज्ञपुरुषो वासुदेवश्च शाश्वतैः । वेदान्तवेदिभिर्विष्णुः प्रोच्यते यो नतोऽस्मि तम्॥ १५
तथा यत्र जगद्धाम्नि धार्यते च प्रतिष्ठितम् । सदसत्त्वं स सत्त्वेन मय्यसौ यातु सौम्यताम्॥१६
स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषप्रवरं नित्यं व्रजामि शरणं हरिम् ॥ १७

व्यास उवाच—

इत्थं स चिन्तयन्विष्णुं भक्तिनम्रात्ममानसः । अक्रूरो गोकुलं प्राप्तः किंचित्सूर्ये विराजति॥१८
स ददर्श तदा तत्र कृष्णमादोहने गवाम् । वत्समध्यगतं फुल्लनीलोत्पलदलच्छविम् ॥ १९
प्रफुल्लपद्मपत्राक्षं श्रीवत्साङ्कितवक्षसम्। प्रलम्बबाहुमायामतुङ्गोरस्थलमुन्नसम् ॥ २०
सविलासस्मिताधारं बिभ्राणं मुखपङ्कजम् । तुङ्गरक्तनखं पद्भ्यां धरण्यां सुप्रतिष्ठितम् ॥ २१
बिभ्राणं वाससी पीते वन्यपुष्पविभूषितम् । सान्द्रनीललताहस्तं सिताम्भोजावतंसकम् ॥ २२
हंसेन्दुकुन्दधवलं नीलाम्बरधरं द्विजाः । तस्यानु बलभद्रं च ददर्श यदुनन्दनम् ॥ २३
प्रांशुमुत्तुङ्गबाहुं च विकाशिमुखपङ्कजम् । मेघमालापरिवृतं कैलासाद्रिमिवापरम् ॥ २४
तौ दृष्ट्वा विकसद्वक्त्रसरोजः स महामतिः । पुलकाञ्चितसर्वाङ्गस्तदाऽक्रूरोऽभवद्द्विजाः ॥ २५
*यएतत्परमं धाम एतत्तत्परमं पदम् । अभवद्वासुदेवोऽसौ द्विधा योऽयं व्यवस्थितः ॥ २६

साफल्यमक्ष्णोर्युगपन्ममास्तु दृष्टे जगद्धातरि हासमुच्चैः (?) ।
अप्यङ्गमेतद्भगवत्प्रसादाद्दत्ताङ्गसङ्गे फलवत्मे तत्स्यात् ॥ २७
अद्यैव स्पृष्ट्वा मम हस्तपद्मं करिष्यति श्रीमदनन्तमूर्तिः ।
यस्याङ्गुलिस्पर्शहताखिलाघैरवाप्यते सिद्धिरनुत्तमा नरैः ॥ २८
तथाऽऽश्विरुद्रेन्द्रवसुप्रणीता देवाः प्रयच्छन्ति वरं प्रहृष्टाः ।
चक्रं घ्नता दैत्यपतेर्हृतानि दैत्याङ्गनानां नयनान्तराणि ॥ २९

---

* एतदाद्यध्यायपरिसमाप्त्यन्तो ग्रन्थो नास्ति ग. पुस्तके ।

---

१ क. च शर्वरी । य° । २ क. °प्तः कियत्सू° । ३ क. ख. दक्षः । ४ ग. प्रस्पष्टप° ५ क. °काङ्कितगात्रोऽसौ तदाऽ° ।
६ ख. °तरोमाऽसौ तदाऽ° ।

यत्रा(तोऽ)म्बु विन्यस्य बलिर्मनोभ्याम(ज्ञान)वाप भोगान्वसुधातलस्थः ।
तथाऽमरेशस्त्रिदशाधिपत्यं मन्वन्तरं पूर्णमवाप शक्रः ॥ ३०
अथेश(थापि) मां कंसपरिग्रहेण दोषास्पदीभूतमदोषयुक्तम् ।
कर्ता न मानोपहितं धिगस्तु यस्मान्मनः साधुबहिष्कृतो यः(?) ॥ ३१
ज्ञानात्मकस्याखिलसत्त्वराशेर्व्यावृत्तदोषस्य सदाऽस्फुटस्य ।
किं वा जगत्यत्र समस्तपुंसामज्ञातमस्यास्ति हृदि स्थितस्य ॥ ३२
तस्मादहं भक्तिविनम्रगात्रो व्रजामि विश्वेश्वरमीश्वराणाम् ।
अंशावतारं पुरुषोत्तमस्य अनादिमध्यान्तमजस्य विष्णोः ॥ ३३

इति श्रीमहापुराणे आदिब्राह्मे कृष्णक्रीडायामक्रूरागमनवर्णनं नामैक-
नवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१००६६

अथ द्विनवत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

चिन्तयन्निति गोविन्दमुपगम्य स यादवः । अक्रूरोऽस्मीति चरणौ ननाम शिरसा हरेः ॥ १
सोऽप्येनं ध्वजवज्राब्जकृतचिह्नेन पाणिना । संस्पृश्याऽऽकृष्य च प्रीत्या सुगाढं परिषस्वजे ॥ २
कृतसंवेदनौ तेन यथावद्बलकेशवौ । ततः प्रविष्टौ सहसा तमादायाऽऽत्ममन्दिरम् ॥ ३
सह ताभ्यां तदाऽक्रूरः कृतसंवन्दनादिकः । भुक्तभोज्यो यथान्यायमाचचक्षे ततस्तयोः ॥ ४
यथानिर्भर्त्सितस्तेन कंसेनाऽऽनकदुन्दुभिः । यथा च देवकी देवी दानवेन दुरात्मना ॥ ५
उग्रसेने यथा कंसः स दुरात्मा च वर्तते । यं चैवार्थं समुद्दिश्य कंसेन स विसर्जितः ॥ ६
तत्सर्वं विस्तराच्छ्रुत्वा भगवान्केशिसूदनः । उवाचाखिलमेतत्तु ज्ञातं दानपते मया ॥ ७
करिष्ये च महाभाग यदत्रौपयिकं मतम् । विचिन्त्यं नान्यथैतत्ते विद्धि कंसं हतं मया ॥ ८
अहं रामश्च मथुरां श्वो यास्यावः समं त्वया । गोपवृद्धाश्च यास्यन्ति आदायोपायनं बहु ॥ ९
निशेयं नीयतां वीर न चिन्तां कर्तुमर्हसि । त्रिरात्राभ्यन्तरे कंसं हनिष्यामि सहानुगम् ॥ १०

व्यास उवाच—

समादिश्य ततो गोपानक्रूरोऽपि सकेशवः । सुष्वाप बलभद्रश्च नन्दगोपगृहे गतः ॥ ११
ततः प्रभाते विमले रामकृष्णौ महाबलौ । अक्रूरेण समं गन्तुमुद्यतौ मथुरां पुरीम् ॥ १२
दृष्ट्वा गोपीजनः सास्रः श्लथद्वलयबाहुकः । निश्वसंश्चातिदुःखार्तः प्राह चेदं परस्परम् ॥ १३
मथुरां प्राप्य गोविन्दः कथं गोकुलमेष्यति । नागरस्त्रीकलालापमधु श्रोत्रेण पास्यति ॥ १४
विलासिवाक्यजातेषु नागरीणां कृतास्पदम् । चित्तमस्य कथं ग्राम्यगोपगोपीषु यास्यति ॥ १५
सारं समस्तगोष्ठस्य विधिना हरता हरिम् । प्रहृतं गोपयोषित्सु निर्घृणेन दुरात्मना ॥ १६
भावगर्भस्मितं वाक्यं विलासललिता गतिः । नागरीणामतीवैतत्कटाक्षेक्षितमेव तु ॥ १७

---

१ ख. सहसा । २ ख. वन्दनौ । ३ क. ख्यलप्येतज्ज्ञातं । ४ क. कथयानेषु । ५ क. थं भूयो ग्राम्यगोपी ।

ग्राम्यो हरिरयं तासां विलासनिगडैर्यतः । भवतीनां पुनः पार्श्वं कया युक्त्या समेष्यति ॥ १८
एषो हि रथमारुह्य मथुरां याति केशवः । अक्रूरक्रूरकेणापि हताशेन प्रतारितः ॥ १९
किं न वेत्ति नृशंसोऽयमनुरागपरं जनम् । येनेममक्षराह्लादं नयत्यन्यत्र नो हरिम् ॥ २०
एष रामेण सहितः प्रयात्यत्यन्तनिर्घृणः । रथमारुह्य गोविन्दस्त्वर्यतामस्य वारणे ॥ २१
गुरूणामग्रतो वक्तुं किं ब्रवीषि न नः क्षमम् । गुरवः किं करिष्यन्ति दग्धानां विरहाग्निना॥२२
नन्दगोपमुखा गोपा गन्तुमेते समुद्यताः । नोद्यमं कुरुते कश्चिद्गोविन्दविनिवर्तने ॥ २३
सुप्रभाताऽद्य रजनी मथुरावासियोषिताम् । यासामच्युतवक्त्राब्जे याति नेत्रालिभोग्यताम्॥२४
धन्यास्ते पथि ये कृष्णमितो यान्तमवारिताः । उद्वहिष्यन्ति पश्यन्तः स्वदेहं पुलकाञ्चितम् ॥ २५
मथुरानगरीपौरनयनानां महोत्सवः । गोविन्दवदनालोकादतीवाद्य भविष्यति ॥ २६
को नु स्वप्नः सभाग्याभिर्दृष्टस्ताभिरधोक्षजम् । विस्तारिकान्तनयना या द्रक्ष्यन्त्यनिवारितम् ॥
अहो गोपीजनस्यास्य दर्शयित्वा महानिधिम् । उद्धृतान्यद्य नेत्राणि विधात्राऽकरुणात्मना २८
अनुरागेण शैथिल्यमस्मासु व्रजतो हरेः । शैथिल्यमुपयान्त्याशु करेषु वलयान्यपि ॥ २९
अक्रूरः क्रूरहृदयः शीघ्रं प्रेरयते हयान् । एवमार्तासु योषित्सु घृणा कस्य न जायते ॥ ३०
हे हे कृष्ण रथस्योच्चैश्चक्ररेणुर्निरीक्ष्यताम् । दूरीकृतो हरिर्येन सोऽपि रेणुर्न लक्ष्यते ॥ ३१
इत्येवमतिहार्देन गोपीजननिरीक्षितः । तत्याज व्रजभूभागं सह रामेण केशवः ॥ ३२
गच्छन्तो जवनाश्वेन रथेन यमुनातटम् । प्राप्ता मध्याह्नसमये रामाक्रूरजनार्दनाः ॥ ३३
अथाऽऽह कृष्णमक्रूरो भवद्भ्यां तावदास्यताम् । यावत्करोमि कालिन्द्यामाह्निकार्हणमम्भसि ॥
तथेत्युक्ते ततः स्नातः स्वाचान्तः स महामतिः । दध्यौ ब्रह्म परं विप्राः प्रविश्य यमुनाजले ३५
फणासहस्रमालाढ्यं बलभद्रं ददर्श सः । कुन्दामलाङ्गमुन्निद्रपद्मपत्रायतेक्षणम् ॥ ३६
वृतं वासुकिडिम्भौघैर्महद्भिः पवनाशिभिः । संस्तूयमानमुद्गन्धिवनमालाविभूषितम् ॥ ३७
दधानमसिते वस्त्रे चारुरूपावतंसकम् । चारुकुण्डलिनं मत्तमन्तर्जलतले स्थितम् ॥ ३८
तस्योत्सङ्गे घनश्याममाताम्रायतलोचनम् । चतुर्बाहुमुदाराङ्गं चक्राद्यायुधभूषणम् ॥ ३९
पीते वसानं वसने चित्रमाल्यविभूषितम् । शक्रचापतडिन्मालाविचित्रमिव तोयदम् ॥ ४०
श्रीवत्सवक्षसं चारुकेयूरमुकुटोज्ज्वलम् । ददर्श कृष्णमक्लिष्टं पुण्डरीकावतंसकम् ॥ ४१
सनन्दनाद्यैर्मुनिभिः सिद्धयोगैरकल्मषैः । संचिन्त्यमानं मनसा नासाग्रन्यस्तलोचनैः ॥ ४२
बलकृष्णौ तदाऽक्रूरः प्रत्यभिज्ञाय विस्मितः । अचिन्तयदथो शीघ्रं कथमत्रागताविति ॥ ४३
विवक्षोः स्तम्भयामास वाचं तस्य जनार्दनः । ततो निष्क्रम्य सलिलाद्रथमभ्यागतः पुनः॥४४
ददर्श तत्र चैवोभौ रथस्योपरि संस्थितौ । रामकृष्णौ यथा पूर्वं मनुष्यवपुषाऽऽन्वितौ ॥ ४५
निमग्नश्च पुनस्तोये ददृशे स तथैव तौ । संस्तूयमानौ गन्धर्वैर्मुनिसिद्धमहोरगैः ॥ ४६
ततो विज्ञातसद्भावः स तु दानपतिस्तदा । तुष्टाव सर्वविज्ञानमयमच्युतमीश्वरम् ॥ ४७

अक्रूर उवाच—

तन्मात्ररूपिणेऽचिन्त्यमहिम्ने परमात्मने । व्यापिने नैकरूपैकस्वरूपाय नमो नमः ॥ ४८

---

१ ख. ग. निराशेन । २ क. °म् । योऽयं याति क्षणेनैवमुक्त्वा सर्वं सखीजनम् । ३ ख. मदनाग्निना । ४ ख. °किरम्नाद्यैर्म° । ५ क. ख. °मानं बहुभिर्वन° । ६ ग. °नं तत्रस्थैर्नासा° । ७ क सततं । ८ ग. तत्र ।

शब्दरूपाय तेऽचिन्त्यहविर्भूताय ते नमः । नमो विज्ञानरूपाय पराय प्रकृतेः प्रभो ॥ ४९
भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान् । आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः ॥ ५०
प्रसीद सर्व[1]धर्मात्मन्क्षराक्षर महेश्वर । ब्रह्मविष्णुशिवाद्याभिः कल्पनाभि[2]रुदीरितः ॥ ५१
अनाख्येयस्वरूपात्मन्ननाख्येयप्रयोजन । अनाख्येयाभिधान त्वां नतोऽस्मि परमेश्वरम् ॥ ५२
न यत्र नाथ विद्यन्ते नामजात्यादिकल्पनाः । तद्ब्रह्म परमं नित्यमविकारि भवानजः ॥ ५३
न कल्पनामृतेऽर्थस्य सर्वस्याधिगमो यतः । ततः कृष्णाच्युतानन्त विष्णुसंज्ञाभिरीड्यसे ॥ ५४

सर्वात्मंस्त्वमज विकल्पनाभिरेतैर्देवास्त्वं जगदखिलं त्वमेव विश्वम् ।
विश्वात्मंस्त्वमतिविकारभेदहीनः सर्वस्मिन्न हि भवतोऽस्ति किंचिदन्यत् ॥ ५५
त्वं ब्रह्मा पशुपतिरर्यमा विधाता त्वं धाता त्रिदशपतिः समीरणोऽग्निः ।
तोयेशो धनपतिरन्तकस्त्वमेको भिन्नात्मा जगदपि पासि शक्तिभेदैः ॥ ५६

विश्वं भवान्सृजति हन्ति गभस्तिरूपो
विश्वं च ते गुणमयोऽयमज प्रपञ्चः ।
रूपं परं सदितिवाचकमक्षरं य-
ज्ज्ञानात्मने सदसते प्रणतोऽस्मि तस्मै ॥ ५७

ॐ नमो वासुदेवाय नमः संकर्षणाय च । प्रद्युम्नाय नमस्तुभ्यमनिरुद्धाय ते नमः ॥ ५८

व्यास उवाच—

एवमन्तर्जले कृष्णमभिष्टूय स यादवः । अर्चयामास सर्वेशं धूपपुष्पैर्मनोमयैः ॥ ५९
परित्यज्यान्यविषयं मनस्तत्र निवेश्य सः । ब्रह्मभू[3]ते चिरं स्थित्वा विरराम समाधितः ॥ ६०
कृतकृत्यमिवाऽऽत्मानं मन्यमानो द्विजोत्तमाः । आजगाम रथं भूयो [4]निर्गम्य यमुनाम्भसः ॥ ६१
रामकृष्णौ ददर्शाथ यथापूर्वमवस्थितौ । विस्मिताक्षं तदाऽक्रूरं तं च कृष्णोऽभ्यभाषत ॥ ६२

श्रीकृष्ण उवाच—

किं त्वया दृष्टमाश्चर्यमक्रूर यमुनाजले । विस्मयोत्फुल्लनयनो भवान्संलक्ष्यते यतः ॥ ६३

अक्रूर उवाच—

अन्तर्जले यदाश्चर्यं दृष्टं तत्र मयाऽच्युत । तदत्रैव हि पश्यामि मूर्तिमत्पुरतः स्थितम् ॥ ६४
जगदेतन्महाश्चर्यरूपं यस्य महात्मनः । तेनाऽऽश्चर्यपरेणाहं भवता कृष्ण संगतः ॥ ६५
तत्किमेतेन मथुरां प्रयामो मधुसूदन । बिभेमि कंसा[5]द्धिग्जन्म परपिण्डोप[6]जीविनः ॥ ६६

व्यास उवाच—

इत्युक्त्वा चोदयामास तान्हयान्वातरंहसः । संप्राप्तश्चापि सायाह्ने सोऽक्रूरो मथुरां पुरीम् ॥
विलोक्य मथुरां कृष्णं रामं चाऽऽह स यादवः ॥ ६७

अक्रूर उवाच—

पद्भ्यां यातं महावीर्यौ रथेनै[7]को विशाम्यहम् । गन्तव्यं वसुदेवस्य नो भवद्भ्यां तथा गृहे ॥
युवयोर्हि कृते वृ[8]द्धः कंसेन स निरस्यते ॥ ६८

---

१ ग. °रमयेश्व°। २ ख °रुदाहृतः । ३ क. °भूतश्चिरं । ४ ख. निष्क्रम्य । ५ ख. °सादुद्विग्नः प° । ६ ख. °जीवनः । ७ क. °को व्रजाम्य° । ८ क. शुद्धः ।

व्यास उवाच—

इत्युक्त्वा प्रविवेशासावक्रूरो मथुरां पुरीम् । प्रविष्टौ रामकृष्णौ च राजमार्गमुपागतौ ॥ ६९
स्त्रीभिर्नरैश्च सानन्दलोचनैरभिविक्षितौ । जग्मतुर्लीलया वीरौ प्राप्तौ बालगजाविव ॥ ७०
भ्रममाणौ तु तौ दृष्ट्वा रजकं रङ्गकारकम् । अयाचेतां स्वरूपाणि वासांसि रुचिराणि तौ ॥ ७१
कंसस्य रजकः सोऽथ प्रसादारूढविस्मयः । बहून्याक्षेपवाक्यानि प्राहोच्चै रामकेशवौ ॥ ७२
ततस्तलप्रहारेण कृष्णस्तस्य दुरात्मनः । पातयामास कोपेन रजकस्य शिरो भुवि ॥ ७३
हत्वाऽऽदाय च वस्त्राणि पीतनीलाम्बरौ ततः । कृष्णरामौ मुदायुक्तौ मालाकारगृहं गतौ ॥ ७४
विकासिनेत्रयुगलो मालाकारोऽतिविस्मितः । एतौ कस्य कुतो यातौ मनसाऽचिन्तयत्ततः ॥ ७५
पीतनीलाम्बरधरौ दृष्ट्वाऽतिसुमनोहरौ । स तर्कयामास तदा भुवं देवावुपागतौ ॥ ७६
विकाशिमुखपद्माभ्यां ताभ्यां पुष्पाणि याचितः । भुवं विष्टभ्य हस्ताभ्यां पस्पर्श शिरसा महीम्
प्रसादसुमुखौ नाथौ मम गेहमुपागतौ । धन्योऽहमर्चयिष्यामीत्याह तौ माल्यजीविकः ॥ ७८
ततः प्रहृष्टवदनस्तयोः पुष्पाणि कामतः । चारूण्येतानि चैतानि प्रददौ स विलोभयन् ॥ ७९
पुनः पुनः प्रणम्यासौ मालाकारोत्तमो ददौ । पुष्पाणि ताभ्यां चारूणि गन्धवन्त्यमलानि च ॥
मालाकाराय कृष्णोऽपि प्रसन्नः प्रददौ वरम् । श्रीस्त्वां मत्संश्रया भद्र न कदाचित्त्यजिष्यति ॥
बलहानिर्न ते सौम्य धनहानिरथापि वा । यावद्धरणिसूर्यौ च संततिः पुत्रपौत्रिकी ॥ ८२
भुक्त्वा च विपुलान्भोगांस्त्वमन्ते मत्प्रसादतः । ममानुस्मरणं प्राप्य दिव्यलोकमवाप्स्यसि ॥ ८३
धर्मे मनश्च ते भद्र सर्वकालं भविष्यति । युष्मत्संततिजातानां दीर्घमायुर्भविष्यति ॥ ८४
नोपसर्गादिकं दोषं युष्मत्संततिसंभवः । अवाप्स्यति महाभाग यावत्सूर्यो भविष्यति ॥ ८५

व्यास उवाच—

इत्युक्त्वा तद्गृहात्कृष्णो बलदेवसहायवान् । निर्जगाम मुनिश्रेष्ठा मालाकारेण पूजितः ॥ ८६

इति श्रीमहापुराणे आदिब्राह्मेऽक्रूरप्रत्यागमनं नाम द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०१५१

अथ त्रिनवत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

राजमार्गे ततः कृष्णः सानुलेपनभाजनाम् । ददर्श कुब्जामायान्तीं नवयौवनगोचराम् ॥ १
तामाह ललितं कृष्णः कस्येदमनुलेपनम् । भवत्या नीयते सत्यं वदेन्दीवरलोचने ॥ २
सकामेनैव सा प्रोक्ता सानुरागा हरिं प्रति । प्राह सा ललितं कुब्जा ददर्श च बलात्ततः ॥ ३

कुब्जोवाच—

कान्त कस्मान्न जानासि कंसेनापि नियोजिता । नैकवक्रेति विख्यातामनुलेपनकर्मणि ॥ ४
नान्यपिष्टं हि कंसस्य प्रीतये ह्यनुलेपनम् । भवत्यहमतीवास्य प्रसादधनभाजनम् ॥ ५

---

१ क. °णौ ततो द° । २ ख. सुहपाणि । ३ ख. ग. °गलौ मा° । ४ क. ख. °जीवनः । त° । ५ ख. °दनः स्वयं पु° । ६ क. हृष्टात्मा । ७ ख. मतिश्च । ८ क. °नां महावीर्यं भवि° । ख. °नां बाहुवीर्यं भवि° । ९ क. °त्यं नीलेन्दी° ।

श्रीकृष्ण उवाच—

सुगन्धमेतद्राजार्हं रुचिरं रुचिरानने । आवयोर्गात्रसदृशं दीयतामनुलेपनम् ॥ ६

व्यास उवाच—

श्रुत्वा तमाह सा कृष्णं गृह्यतामिति सादरम् । अनुलेपं च प्रददौ गात्रयोग्यमथोभयोः ॥ ७

भक्तिच्छेदानुलिप्ताङ्गौ ततस्तौ पुरुषर्षभौ । सेन्द्रचापौ विराजन्तौ सितकृष्णाविवाम्बुदौ ॥ ८

ततस्तां चिबुके शौरिरुल्लापनविधानवित् । उल्लाप्य तोलयामास द्व्यङ्गुलेनाग्रपाणिना ॥ ९

चकर्ष पद्भ्यां च तदा ऋजुत्वं केशवोऽनयत् । ततः सा ऋजुतां प्राप्ता योषितामभवद्वरा ॥ १०

विलासललितं प्राह प्रेमगर्भभरालसम् । वस्त्रे प्रगृह्य गोविन्दं व्रज गेहं ममेति वै ॥ ११

आयास्ये भवतीगेहमिति तां प्राह केशवः । विससर्ज जहासोच्चै रामस्याऽऽलोक्य चाऽऽननम् ॥

भक्तिच्छेदानुलिप्ताङ्गौ नीलपीताम्बरावुभौ । धनुःशालां ततो यातौ चित्रमाल्योपशोभितौ ॥ १३

अध्यास्य च धनूरत्नं ताभ्यां पृष्टैस्तु रक्षिभिः । आख्यातं सहसा कृष्णो गृहीत्वाऽपूरयद्धनुः ॥

ततः पूरयता तेन भज्यमानं बलाद्धनुः । चकारातिमहाशब्दं मथुरा तेन पूरिता ॥ १५

अनुयुक्तौ ततस्तौ च भग्ने धनुषि रक्षिभिः । रक्षिसैन्यं निकृत्योभौ निष्क्रान्तौ कार्मुकालयात् १६

अक्रूरागमवृत्तान्तमुपलभ्य तथा धनुः । भग्नं श्रुत्वाऽथ कंसोऽपि प्राह चाणूरमुष्टिकौ ॥ १७

कंस उवाच—

गोपालदारकौ प्राप्तौ भवद्भ्यां तौ ममाग्रतः । मल्लयुद्धेन हन्तव्यौ मम प्राणहरौ हि तौ ॥ १८

नियुद्धे तद्विनाशेन भवद्भ्यां तोषितो ह्यहम् । दास्याम्यभिमतान्कामान्नान्यथैतन्महाबलौ ॥ १९

न्यायतोऽन्यायतो वाऽपि भवद्भ्यां तौ ममाहितौ। हन्तव्यौ तद्वधाद्राज्यं सामान्यं वो भविष्यति

व्यास उवाच—

इत्यादिश्य स तौ मल्लौ ततश्चाऽऽहूय हस्तिपम् । प्रोवाचोच्चैस्त्वया मत्तः समाजद्वारि कुञ्जरः २१

स्थाप्यः कुवलयापीडस्तेन तौ गोपदारकौ । घातनीयौ नियुद्धाय रङ्गद्वारमुपागतौ ॥ २२

तमाज्ञाप्याथ दृष्ट्वा च मञ्चान्सर्वानुपाहृतान् । आसन्नमरणः कंसः सूर्योदयमुदैक्षत ॥ २३

ततः समस्तमञ्चेषु नागरः स तदा जनः । राजमञ्चेषु चाऽऽरूढाः सह भृत्यैर्महीभृतः ॥ २४

मल्लप्राश्निकवर्गश्च रङ्गमध्ये समीपगः । कृतः कंसेन कंसोऽपि तुङ्गमञ्चे व्यवस्थितः ॥ २५

अन्तःपुराणां मञ्चाश्च यथाऽन्ये परिकल्पिताः । अन्ये च वारमुख्यानामन्ये नगरयोषिताम्॥ २६

नन्दगोपादयो गोपा मञ्चेष्वन्येष्ववस्थिताः । अक्रूरवसुदेवौ च मञ्चप्रान्ते व्यवस्थितौ ॥ २७

नगरीयोषितां मध्ये देवकी पुत्रगर्धिनी । अन्तकालेऽपि पुत्रस्य द्रक्ष्यामीति मुखं स्थिता ॥ २८

वाद्यमानेषु तूर्येषु चाणूरे चातिवल्गति । हाहाकारपरे लोक आस्फोटयति मुष्टिके ॥ २९

हत्वा कुवलयापीडं हस्त्यारोहप्रचोदितम् । मदासृगनुलिप्ताङ्गौ गजदन्तवरायुधौ ॥ ३०

मृगमध्ये यथा सिंहौ गर्वलीलावलोकिनौ । प्रविष्टौ सुमहारङ्गं बलदेवजनार्दनौ ॥ ३१

हाहाकारो महाञ्जज्ञे सर्वरङ्गेष्वनन्तरम् । कृष्णोऽयं बलभद्रोऽयमिति लोकस्य विस्मयात् ॥ ३२

सोऽयं येन हता घोरा पूतना सा निशाचरी । प्रक्षिप्तं शकटं येन भग्नौ च यमलार्जुनौ ॥ ३३

---

१ क. शौरिः प्रणयेन वि॰ । २ ख. ॰स प्राङ्गु॰ । ३ क. ॰माल्यानुलेपनौ । अ॰ । ४ क. ख. ॰नं महद्ध॰ । ५ ख. ॰मात्राज्यं चैत॰ । ६ ग. मल्लस॰ । ७ ग. ॰ले च पु॰ । ८ क. बालघातिनि ।

५७

सोऽयं यः कालियं नागं ननर्ताऽऽरुह्य बालकः । धृतो गोवर्धनो येन सप्तरात्रं महागिरिः ॥ ३४
अरिष्टो धेनुकः केशी लीलयैव महात्मना । हतो येन च दुर्वृत्तो दृश्यते सोऽयमच्युतः ॥ ३५
अयं चास्य महाबाहुर्बलदेवोऽग्रजोऽग्रतः । प्रयाति लीलया योषिन्मनोनयननन्दनः ॥ ३६
अयं स कथ्यते प्राज्ञैः पुराणार्थावलोकिभिः । गोपालो यादवं वंशं मग्नमभ्युद्धरिष्यति ॥ ३७
अयं स सर्वभूतस्य विष्णोरखिलजन्मनः । अवतीर्णो महीमंशो नूनं भारहरो भुवः ॥ ३८
इत्येवं वर्णिते पौरै रामे कृष्णे च तत्क्षणात् । उरस्तताप देवक्याः स्नेहस्नुतपयोधरम् ॥ ३९
महोत्सवमिवालोक्य पुत्रावेव विलोकयन् । युवेव वसुदेवोऽभूद्विहायाभ्यागतां जराम् ॥ ४०
विस्तारिताक्षियुगला राजान्तःपुरयोषितः । नागरस्त्रीसमूहश्च द्रष्टुं न विरराम तौ ॥ ४१

स्त्रिय ऊचुः—

सख्यः पश्यत कृष्णस्य मुखमप्यम्बुजेक्षणम् । गजयुद्धकृतायासस्वेदाम्बुकणिकाश्चितम् ॥ ४२
विकासीव सरोम्भोजमवश्यायजलोक्षितम् । परिभूताक्षरं जन्म सफलं क्रियतां दृशः ॥ ४३
श्रीवत्साङ्कं जगद्धाम बालस्यैतद्विलोक्यताम् । विपक्षक्षपणं वक्षो भुजयुग्मं च भामिनि ॥ ४४
वल्गता मुष्टिकेनैव चाणूरेण तथा परैः । क्रियते बलभद्रस्य हास्यमीषद्विलोक्यताम् ॥ ४५
सख्यः पश्यत चाणूरं नियुद्धार्थमयं हरिः । समुपैति न सन्त्यत्र किं वृद्धा युक्तकारिणः ॥ ४६
क्व यौवनोन्मुखीभूतः सुकुमारतनुर्हरिः । क्व वज्रकठिनाभोगशरीरोऽयं महासुरः ॥ ४७
इमौ सुललितौ रङ्गे वर्तेते नवयौवनौ । दैतेयमल्लाश्चाणूरप्रमुखास्त्वतिदारुणाः ॥ ४८
नियुद्धप्राश्निकानां तु महानेष व्यतिक्रमः । यद्बालबलिनोर्युद्धं मध्यस्थैः समुपेक्ष्यते ॥ ४९

व्यास उवाच—

इत्थं पुरस्त्रीलोकस्य वदतश्चालयन्भुवम् । ववर्ष हर्षोत्कर्षं च जनस्य भगवान्हरिः ॥ ५०
बलभद्रोऽपि चाऽऽस्फोट्य ववल्ग ललितं यदा । पदे पदे तदा भूमिर्न शीर्णा यत्तदद्भुतम् ॥ ५१
चाणूरेण ततः कृष्णो युयुधेऽमितविक्रमः । नियुद्धकुशलो दैत्यो बलदेवेन मुष्टिकः ॥ ५२
संनिपातावधूतैश्च चाणूरेण समं हरिः । क्षेपणैर्मुष्टिभिश्चैव कीलावज्रनिपातनैः ॥ ५३
पादोद्धूतैः प्रमृष्टाभिस्तयोर्युद्धमभून्महत् । अशस्त्रमतिघोरं तत्तयोर्युद्धं सुदारुणम् ॥ ५४
स्वबलप्राणनिष्पाद्यं समाजोत्सवसंनिधौ । यावद्यावच्च चाणूरो युयुधे हरिणा सह ॥ ५५
प्राणहानिमवापाग्र्यां तावत्तावन्न बान्धवम् । कृष्णोऽपि युयुधे तेन लीलयैव जगन्मयः ॥ ५६
खेदाच्चालयता कोपान्निजशेषकरे करम् । बलक्षयं विवृद्धिं च दृष्ट्वा चाणूरकृष्णयोः ॥ ५७
वारयामास तूर्याणि कंसः कोपपरायणः । मृदङ्गादिषु वाद्येषु प्रतिषिद्धेषु तत्क्षणात् ॥ ५८
खसंगतान्यवाद्यन्त दैवतूर्याण्यनेकशः । जय गोविन्द चाणूरं जहि केशव दानवम् ॥ ५९
इत्यन्तर्धिगता देवास्तुष्टुवुस्ते प्रहर्षिताः । चाणूरेण चिरं कालं क्रीडित्वा मधुसूदनः ॥ ६०
उत्पाट्य भ्रामयामास तद्वधाय कृतोद्यमः । भ्रामयित्वा शतगुणं दैत्यमल्लममित्रजित् ॥ ६१
भूमावास्फोटयामास गगने गतजीवितम् । भूमावास्फोटितस्तेन चाणूरः शतधा भवन् ॥ ६२

---

१ क. °नमन्दिरः । अ° । २ ख. सत्कथ्य° । ३ क. °र्णोऽयमंशेन भुवो भारहरो विभुः । इ° । ४ क. °मिवाऽऽसाद्य पुत्राननवि° । ५ क. °कनम् । यु° । ६ क. तत्याज । ७ °वोऽपि हर्षादभ्या° । ८ क. ख. जय माधव केशव । इ° । ९ क. °त्वा दशगु° ।

रक्तस्रावमहापङ्कां चकार स तदा भुवम् । बल[1]देवस्तु तत्कालं मुष्टिकेन महाबलः ॥ ६३
युयुधे दैत्यमल्लेन चाणूरेण यथा हरिः । सोऽप्येनं मुष्टिना मूर्ध्नि वक्षस्याहत्य जानुना ॥ ६४
पातयित्वा धरापृष्ठे निष्पिपेष गतायुषम् । कृष्णस्तोशलकं भूयो मल्लराजं महाबलम् ॥ ६५
वाममुष्टिप्रहारेण पातयामास भूतले । चाणूरे निहते मल्ले मुष्टिके च निपातिते ॥ ६६
नीते क्षयं तोशलके सर्वे मल्लाः प्रदुद्रुवुः । ववल्गतुस्तदा रङ्गे कृष्णसंकर्षणावुभौ ॥ ६७
समानव[2]यसो गोपान्बलादाकृष्य हर्षितौ । कंसोऽपि कोपरक्ताक्षः प्राहोच्चै[3]र्व्यायत[4]ान्नरान् ॥ ६८
गोपा[6]वेतौ समाजौघान्निष्क्रम्येतां बलादितः । नन्दोऽपि गृह्यतां पापो निगडैराशु बध्यताम् ६९
अवृद्धार्हेण दण्डेन वसुदेवोऽपि [7]बध्यताम् । वल्गन्ति गोपाः कृष्णेन ये चेमे सहिताः [8]पुनः ॥ ७०
गावो ह्रियन्तामेषां च यच्चास्ति वसु किंचन । एवमाज्ञापयन्तं तं प्रहस्य मधुसूदनः ॥ ७१
उत्पत्याऽऽरुह्य तन्मञ्चं कंसं जग्राह [9]वेगितः । केशेष्वाकृष्य विगलत्किरीटमवनीतले ॥ ७२
स कंसं पातयामास तस्योपरि पपात च । निःशेषजगदाधारगुरुणा पततोपरि ॥ ७३
कृष्णेन त्याजितः प्राणानुग्रसेनात्मजो नृपः । मृतस्य केशेषु तदा गृहीत्वा मधुसूदनः ॥ ७४
चकर्ष देहं कंसस्य रङ्गमध्ये महाबलः । गौरवेणातिमहता [10]परिपातेन कृष्यता ॥ ७५
कृता कंसस्य देहेन वेगितेन महात्मना । कंसे गृहीते कृष्णेन तद्भ्राताऽभ्यागतो रुषा ॥ ७६
सुनामा बलभद्रेण लीलयैव निपातितः । ततो हाहाकृतं सर्वमासीत्तद्रङ्गमण्डलम् ॥ ७७
[11]अवज्ञया हतं दृष्ट्वा कृष्णेन मथुरेश्वरम् । कृष्णोऽपि वसुदेवस्य पादौ जग्राह सत्वरम् ॥ ७८
देवक्याश्च महाबाहुर्बलदेवसहायवान् । उत्थाप्य वसुदेवस्तु देवकी च जनार्दनम् ॥
स्मृतजन्मोक्तवचनौ तावेव प्रणतौ स्थितौ ॥ ७९

वसुदेव उवाच—

प्रसीद देवदेवेश देवानां प्रवर प्रभो । तथाऽऽवयोः प्रसादेन कृताभ्युद्धार केशव ॥ ८०
आराधि[12]तो यद्भगवानवतीर्णो गृहे मम । दुर्वृत्तनिधनार्थाय तेन नः पावितं कुलम् ॥ ८१
त्वमन्तः सर्वभूतानां सर्वभूतेष्ववस्थितः । वर्तते च समस्तात्मंस्त्वत्तो भूतभविष्यती ॥ ८२
यज्ञे त्वमिज्यसेऽचिन्त्य सर्वदेवमयाच्युत । त्वमेव [13]यज्ञो [14]यज्वा च यज्ञानां परमेश्वर ॥ ८३
सापह्नवं मम मनो यदेतत्त्वयि जायते । देवक्याश्चाऽऽत्मज प्रीत्या तदत्यन्तविडम्बना ॥ ८४
त्वं कर्ता सर्वभूतानामनादिनिधनो भवान् । क्व च मे मानुषस्यैषा जिह्वा पुत्रेति वक्ष्यति ॥ ८५
जगदेतज्जगन्नाथ संभूतमखिलं [15]यतः । कया युक्त्या विना [16]मायां सोऽस्मत्तः संभविष्यति ८६
यस्मिन्प्रतिष्ठितं सर्वं जगत्स्थावरजङ्गमम् । स कोष्ठोत्सङ्गशयनो मनुष्याज्जायते कथम् ॥ ८७

स त्वं प्रसीद परमेश्वर पाहि विश्वमंशावतारकरणैर्न ममासि पुत्रः ॥
आब्रह्मपादपमयं जगदीश सर्वं चित्ते विमोहयसि किं परमेश्वरात्मन् ॥ ८८
मायाविमोहितदृशा तनयो ममेति कंसाद्भयं कृतवता तु मयाऽतितीव्रम् ॥
नीतोऽसि गोकुलमरातिभयाकुलस्य वृद्धिं गतोऽसि मम चैव गवामधीश ॥ ८९

---

१ क. ख °देवोऽपि त° । २ ग. °यसौ गो° । ३ ग °र्व्याचृतान्न° । ४ ख. °तान्तरा° । ५ ख. °पाविमौ द्रुतं रङ्गा-न्निगडैरायसैरिह । अ° । ६ क. °सौ द्रुततरं निगडैरायसैरिह । अवधार्हे° । ७ ख. बध्यताम् । ८ ग. पुरः । ९ क. केशवः । ख. वेगवः । १० क. परिश्रमेण । ख. परिवातेन । ११ ग. °वज्ञयाऽऽह° । १२ क. ख. °तोऽपि भग° । १३ ग. यज्ञे । १४ क. ख. यष्टा । १५ क. भवेत् । १६ क. °यां सादृश्यं सं° ।

कर्माणि रुद्रमरुदश्विशतक्रतूनां साध्यानि यानि न भवन्ति निरीक्षितानि ॥
त्वं विष्णुरीशजगतामुपकारहेतोः प्राप्तोऽसि नः परिगतः परमो विमोहः ॥ ९०

इति श्रीमहापुराणे आदिब्राह्मे बालचरिते कंसवधकथनं नाम त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०२४१

अथ चतुर्नवत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

तौ समुत्पन्नविज्ञानौ भगवत्कर्मदर्शनात् । देवकीवसुदेवौ तु दृष्ट्वा मायां पुनर्हरिः ॥ १
मोहाय यदुचक्रस्य विततान स वैष्णवीम् । उवाच चाम्ब भोस्तात चिरादुत्कण्ठितेन तु ॥ २
भवन्तौ कंसभीतेन दृष्टौ संकर्षणेन च । कुर्वतां याति यः कालो मातापित्रोरपूजनम् ॥ ३
स वृथा क्लेशकारी वै साधूनामुपजायते । गुरुदेवद्विजातीनां मातापित्रोश्च पूजनम् ॥ ४
कुर्वतः सफलं जन्म देहिनस्तात जायते । तत्क्षन्तव्यमिदं सर्वमतिक्रमकृतं पितः ॥
कंसवीर्यप्रतापाभ्यामावयोः परवश्ययोः ॥ ५

व्यास उवाच—

इत्युक्त्वाऽथ प्रणम्योभौ यदुवृद्धाननुक्रमात् । पादानतिभिः सस्नेहं चक्रतुः पौरमानसम् ॥ ६
कंसपत्न्यस्ततः कंसं परिवार्य हतं भुवि । विलेपुर्मातरश्चास्य शोकदुःखपरिप्लुताः ॥ ७
बहुप्रकारमस्वस्थाः पश्चात्तापातुरा हरिः । ताः समाश्वासयामास स्वयमस्राविलेक्षणः ॥ ८
उग्रसेनं ततो बन्धान्मुमोच मधुसूदनः । अभ्यषिञ्चत्तथैवैनं निजराज्ये हतात्मजम् ॥ ९
राज्येऽभिषिक्तः कृष्णेन यदुसिंहः सुतस्य सः । चकार प्रेतकार्याणि ये चान्ये तत्र घातिताः ॥
कृतौर्ध्वदैहिकं चैनं सिंहासनगतं हरिः । उवाचाऽऽज्ञापय विभो यत्कार्यमविशङ्कया ॥ ११
ययातिशापाद्वंशोऽयमराज्यार्होऽपि सांप्रतम् । मयि भृत्ये स्थिते देवानाज्ञापयतु किं नृपैः ॥ १२
इत्युक्त्वा चोग्रसेनं तु वायुं प्रति जगाद ह । नृवाचा चैव भगवान्केशवः कार्यमानुषः ॥ १३

श्रीकृष्ण उवाच—

गच्छेन्द्रं ब्रूहि वायो त्वमलं गर्वेण वासव । दीयतामुग्रसेनाय सुधर्मा भवता सभा ॥ १४
कृष्णो ब्रवीति राजार्हमेतद्रत्नमनुत्तमम् । सुधर्माख्या सभा युक्तमस्यां यदुभिरासितुम् ॥ १५

व्यास उवाच—

इत्युक्तः पवनो गत्वा सर्वमाह शचीपतिम् । ददौ सोऽपि सुधर्माख्यां सभां वायोः पुरंदरः ॥
वायुना चाऽऽहृतां दिव्यां ते सभां यदुपुंगवाः । बुभुजुः सर्वरत्नाढ्यां गोविन्दभुजसंश्रयाः १७
विदिताखिलविज्ञानौ सर्वज्ञानमयावपि । शिष्याचार्यक्रमं वीरौ ख्यापयन्तौ यदूत्तमौ ॥ १८

---

१ ख. °हेतुः प्रा° । २ ख. वसुदेवस्य । ३ क. ग. मे । ४ ख. भवतोः । ५ ख. °न न कृतं सेवनं मया । कु° । ६ ख. स तु दुरत्ययोऽत्यर्थं सा° । ७ ख. °वीर्यात्प्रवसतोराव° । ८ ख. वाहितां । ९ क. ख. तां । १० क. यदुनन्दनाः । ११ क. शिष्टाचारक्रमाचार्यौ ख्या° ।

ततः सांदीपनिं काश्यमवन्तिपुरवासिनम् । अस्त्रार्थं जग्मतुर्वीरौ बलदेवजनार्दनौ ॥ १९
तस्य शिष्यत्वमभ्येत्य गुरुवृत्तिपरौ हि तौ । दर्शयांचक्रतुर्वीरावाचारमखिले जने ॥ २०
सरहस्यं धनुर्वेदं ससंग्रहमधीयताम्+ । अहोरात्रैश्चतुःषष्ट्या तदद्भुतमभूद्द्विजाः ॥ २१
सांदीपनिरसंभाव्यं तयोः कर्मातिमानुषम् । विचिन्त्य तौ तदा मेने प्राप्तौ चन्द्रदिवाकरौ ॥ २२
अस्त्रग्राममशेषं च प्रोक्तमात्रमवाप्य तौ । ऊचतुर्व्रियतां या ते दातव्या गुरुदक्षिणा ॥ २३
सोऽप्यतीन्द्रियमालोक्य तयोः कर्म महामतिः । अयाचत मृतं पुत्रं प्रभासे लवणार्णवे ॥ २४
गृहीतास्त्रौ ततस्तौ तु गत्वा तं लवणोदधिम् । ऊचतुश्च गुरोः पुत्रो दीयतामिति सागरम् ॥ २५
कृताञ्जलिपुटश्चाब्धिस्तावथ द्विजसत्तमाः । उवाच न मया पुत्रो हृतः सांदीपनेरिति ॥ २६
दैत्यः पञ्चजनो नाम शङ्खरूपः स बालकम् । जग्राह सोऽस्ति सलिले ममैवासुरसूदन ॥ २७
इत्युक्तोऽन्तर्जलं गत्वा हत्वा पञ्चजनं तथा । कृष्णो जग्राह तस्यास्थिप्रभवं शङ्खमुत्तमम् ॥ २८
यस्य नादेन दैत्यानां बलहानिः प्रजायते । देवानां वर्धते तेजो यात्यधर्मश्च संक्षयम् ॥ २९
तं पाञ्चजन्यमापूर्य गत्वा यमपुरीं हरिः । बलदेवश्च बलवाञ्जित्वा वैवस्वतं यमम् ॥ ३०
तं बालं यातनासंस्थं यथापूर्वशरीरिणम् । पित्रे प्रदत्तवान्कृष्णो बलश्च बलिनां वरः ॥ ३१
मथुरां च पुनः प्राप्तावुग्रसेनेन पालिताम् । प्रहृष्टपुरुषस्त्रीकावुभौ रामजनार्दनौ ॥ ३२

इति श्रीमहापुराणे आदिब्राह्मे बालचरिते चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०२७३

अथ पञ्चनवत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

जरासन्धसुते कंस उपयेमे महाबलः । अस्तिः प्राप्तिश्च भो विप्रास्तयोर्भर्तृहणं हरिम् ॥ १
महाबलपरीवारो मागधाधिपतिर्बली । हन्तुमभ्याययौ कोपाज्जरासंधः सयादवम् ॥ २
उपेत्य मथुरां सोऽथ रुरोध मगधेश्वरः । अक्षौहिणीभिः सैन्यस्य त्रयोविंशतिभिर्वृतः ॥ ३
निष्क्रम्याल्पपरीवारावुभौ रामजनार्दनौ । युयुधाते समं तस्य बलिनौ बलिसैनिकैः ॥ ४
ततो बलश्च कृष्णश्च मतिं चक्रे महाबलः । आयुधानां पुराणानामादाने मुनिसत्तमाः ॥ ५
अनन्तरं चक्रशार्ङ्गे तूणौ चाप्यक्षयौ शरैः । आकाशादागतौ वीरौ तदा कौमोदकी गदा ॥ ६
हलं च बलभद्रस्य गगनादागमत्करम् । बलस्याभिमतं विप्राः सुनन्दं मुशलं तथा ॥ ७
ततो युद्धे पराजित्य ससैन्यं मगधाधिपम् । पुरीं विविशतुर्वीरावुभौ रामजनार्दनौ ॥ ८
जिते तस्मिन्सुदुर्वृत्ते जरासंधे द्विजोत्तमाः । जीवमाने गते तत्र कृष्णो मेने न तं जितम् ॥ ९
पुनरप्याजगामाथ जरासंधो बलान्वितः । जितश्च रामकृष्णाभ्यामपक्रान्तो द्विजोत्तमाः ॥ १०
दश चाष्टौ च संग्रामानेवमत्यन्तदुर्मदः । यदुभिर्मागधो राजा चक्रे कृष्णपुरोगमैः ॥ ११

+ इदमार्षम् ।

---

१ क. शस्त्रार्थं । ख. शिक्षार्थं । २ ख. °णा । असाधारणमा° । ३ ख. तु ऊचतुश्च महोदधिम् । उवाच न मया पुत्रो हृतः सांदीपनेरिति । दै° । ४ ख. बहुरूपी । ५ क. °नं च तम् । कृ° । ६ ख. °स्याङ्गप्र° । ७ क. युद्धात्परावृत्तः ससैन्यो मगधाधिपः । पु° । ८ क. °ने कृष्णस्तममन्यत नो जि° । ९ ग. °पक्रान्तो द्वि° ।

सर्वेष्वेव च युद्धेषु यदुभिः स पराजितः। अपक्रान्तो जरासंधः स्वल्पसैन्यैर्बलाधिकः॥ १२
*तद्बलं यादवानां वै रक्षितं यदनेकशः। तत्तु संनिधिमाहात्म्यं विष्णोरंशस्य चक्रिणः॥ १३
मनुष्यधर्मशीलस्य लीला सा जगतः पतेः। अस्त्राण्यनेकरूपाणि यदरातिषु मुञ्चति॥ १४
मनसैव जगत्सृष्टिसंहारं तु करोति यः। तस्यारिपक्षक्षपणे क्रियानुद्यमविस्तरः॥ १५
तथाऽपि च मनुष्याणां धर्मस्तदनुवर्तनम्। कुर्वन्बलवता संधिं हीनैर्युद्धं करोत्यसौ॥ १६
साम चोपप्रदानं च तथा भेदं च दर्शयन्। +करोति दण्डपातं च क्वचिदेव पलायनम्॥ १७
मनुष्यदेहिनां चेष्टामित्येवमनुवर्तते। लीला जगत्पतेस्तस्य च्छन्दतः संप्रवर्तते॥ १८

इति श्रीमहापुराणे आदिब्राह्मे श्रीकृष्णचरिते पञ्चनवत्यधिकशततमोऽध्यायः॥ १९५॥

आदितः श्लोकानां समष्ट्यङ्काः—१०२९१

अथ षण्णवत्यधिकशततमोऽध्यायः।

व्यास उवाच—

गार्ग्यं गोष्ठे द्विजो[जं] श्यालः षण्ढ[ण्ड] इत्युक्तवान्द्विजाः। यदूनां संनिधौ सर्वे जहसुर्यादवास्तदा
ततः कोपसमाविष्टो दक्षिणापथमेत्य सः। सुतमिच्छंस्तपस्तेपे यदुचक्रभयावहम्॥ २
आराधयन्महादेवं सोऽयश्चूर्णमभक्षयत्। ददौ वरं च तुष्टोऽसौ वर्षे द्वादशके हरः॥ ३
संभावयामास स तं यवनेशो ह्यनात्मजम्। तद्योषित्संगमाच्चास्य पुत्रोऽभूदलिसप्रभः॥ ४
तं कालयवनं नाम राज्ये स्वे यवनेश्वरः। अभिषिच्य वनं यातो वज्राग्रकठिनोरसम्॥ ५
स तु वीर्यमदोन्मत्तः पृथिव्यां बलिनो नृपान्। पप्रच्छ नारदश्चास्मै कथयामास यादवान्॥ ६
म्लेच्छकोटिसहस्राणां सहस्रैः सोऽपि संवृतः। गजाश्वरथसंपन्नैश्चकार परमोद्यमम्॥ ७
प्रययौ चाऽऽतव(प)च्छिन्नैः प्रयाणैः स दिने दिने। यादवान्प्रति सामर्षो मुनयो मथुरां पुरीम्॥
कृष्णोऽपि चिन्तयामास क्षपितं यादवं बलम्। यवनेन समालोक्य मागधः संप्रयास्यति॥ ९
मागधस्य बलं क्षीणं स कालयवनो बली। हन्ता तदिदमायातं यदूनां व्यसनं द्विधा॥ १०
तस्माद्दुर्गं करिष्यामि यदूनामतिदुर्जयम्। स्त्रियोऽपि यत्र युध्येयुः किं पुनर्वृष्णियादवाः॥ ११
मयि मत्ते प्रमत्ते वा सुप्ते प्रवसितेऽपि वा। यादवाभिभवं दुष्टा मा कुर्वन्वै(युर्वै)रिणोऽधिकम्॥ १२
इति संचिन्त्य गोविन्दो योजनानि महोदधिम्। ययाचे द्वादश पुरीं द्वारकां तत्र निर्ममे॥ १३
महोद्यानां महावप्रां तडागशतशोभिताम्। प्राकारशतसंबाधामिन्द्रस्येवामरावतीम्॥ १४
मथुरावासिनं लोकं तत्राऽऽनीय जनार्दनः। आसन्ने कालयवने मथुरां च स्वयं ययौ॥ १५

---

* इत आरभ्य पलायनमित्यन्तो ग्रन्थो ग. पुस्तके नास्ति। + इदमर्धं ख. पुस्तके नास्ति।

---

१ ख. °लाद्बाहिः। त°। २ क. °च। शालोऽयं द्विजशार्दूलं षण्ढमित्यु°। ३ ख. °दवाः स्थिताः। त°। ४ ग. °क्रसुखाव°। ५ ख. °देवमोजस्तीक्ष्णमभूत्तदा। द°। ६ क. सोऽथ प्रत्यक्षतां गतः। द°। ७ ग. संभोजया°। ८ क. °शो जना°। ९ ख. °मात्तस्य। १० ख. °दसमञ्जसः। तं। ११ ख. °म चक्रे स य°। १२ ख. वज्रवत्कठि°। १३ क. ख. °हस्रैश्चापि। १४ ग. कुलम्। १५ क. °म्। पर्वते नगरे रम्ये मागधस्य भविष्यति। १६ ग. °गधस्य भविष्यति। न मा°। १७ ख. न्ताऽत्र° सुसमा°। १८ ख. बहूनां। १९ ख. महोन्नतां। २० ख. °कं द्वारकामानयद्धरिः। उन्मत्तः का°। २१ ख. °वनो मथुरायाः स्व°।

बहिरावासिते सैन्ये मथुराया निरायुधः । निर्जगाम स गोविन्दो ददर्श यवनश्च तम् ॥ १६
सञ्ज्ञात्वा वासुदेवं तं बाहुप्रहरणो नृपः । अनुयातो महायोगिचेतोभिः प्राप्यते न यः ॥ १७
तेनानुयातः कृष्णोऽपि प्रविवेश माहागुहाम् । यत्र शेते महावीर्यो मुचुकुन्दो नरेश्वरः ॥ १८
सोऽपि प्रविष्टो यवनो दृष्ट्वा शय्यागतं नरम् । पादेन [1]ताडयामास कृष्णं मत्वा स दुर्मतिः ॥ १९
दृष्टमात्रश्च तेनासौ जज्वाल यवनोऽग्निना । तत्क्रोधजेन मुनयो भस्मीभूतश्च तत्क्षणात् ॥ २०
सहि देवासुरे युद्धे गत्वा जित्वा महासुरान् । निद्रार्तः सुमहाकालं निद्रां वव्रे वरं सुरान् ॥ २१
प्रोक्तश्च देवैः संसुप्तं यस्त्वामुत्थापयिष्यति । देहजेनाग्निना सद्यः स तु भस्मीभविष्यति ॥ २२
एवं दग्ध्वा स तं पापं दृष्ट्वा च मधुसुदनम् । कस्त्वमित्याह सोऽप्याह जातोऽहं शशिनः कुले २३
वसुदेवस्य तनयो यदुवंशसमुद्भवः । मुचुकुन्दोऽपि तच्छ्रुत्वा वृद्धगार्ग्य[2]वचः स्मरन् ॥ २४
संस्मृत्य प्रणिपत्यैनं सर्वं सर्वेश्वरं हरिम् । प्राह ज्ञातो भवान्विष्णोरंशस्त्वं परमेश्वरः ॥ २५
पुरा गा[3]र्ग्येण कथितमष्टाविंशतिमे* युगे । द्वापरान्ते हरेर्जन्म यदुवंशे भविष्यति ॥ २६
स त्वं प्राप्तो न संदे[4]हो मर्त्यानामुपकारकृत् । तथा हि सुमहत्तेजो नालं सोढुमहं तव ॥ २७
तथा हि सुमहाम्भोदध्वनिधीरतरं ततः । वाक्यं तमिति होवाच युष्मत्पादसुलालितम् ॥ २८
देवासुरे माहायुद्धे दैत्याश्च सुमहाभटाः । न शेकु[5]स्ते महत्तेजस्तत्तेजो न सहाम्यहम् ॥ २९
संसारपतितस्यैको जन्तोस्त्वं शरणं परम् । संप्रसीद प्रपन्नार्तिहर्ता हर ममाशुभम् ॥ ३०
त्वं पयोनिधयः शैलाः सरितश्च वनानि च । मेदिनी गगनं [6]वायुरापोऽग्निस्त्वं तथा पुमान्[7] ॥ ३१
पुंसः परतरं सर्वं व्याप्य जन्म विकल्पवत्[8] । शब्दादिहीनमजरं[9] वृद्धिक्षयविवर्जितम् ॥ ३२
[10]त्वत्तोऽमरास्तु पितरो यक्षगन्धर्वराक्षसाः । सिद्धाश्चाप्सरसस्त्वत्तो मनुष्याः पशवः खगाः ॥ ३३
सरीसृपा मृगाः सर्वे त्वत्तश्चैव महीरुहाः । यच्च भूतं भविष्यद्वा किंचिदत्र चराचरे ॥ ३४
अमूर्तं मूर्तमथवा स्थूलं सूक्ष्मतरं तथा । तत्सर्वं त्वं जगत्कर्तर्नास्ति किंचित्त्वया विना ॥ ३५
मया संसारचक्रेऽस्मिन्भ्रमता भगवन्सदा । तापत्रयाभिभूतेन[11] न प्राप्ता निर्वृतिः क्वचित् ॥ ३६
दुःखान्येव सुखानीति मृगतृष्णा जलाशयः । मया नाथ गृहीतानि [13]तानि तापाय मेऽभवन् ३७
राज्यमुर्वी बलं कोशो मित्रपक्षस्तथाऽऽत्मजाः । भार्या भृत्यजना ये च शब्दाद्या विषयाः प्रभो
सुखबुद्ध्या मया सर्वं गृहीतमिदमव्यय । परिणामे च देवेश तापात्मकमभून्मम ॥ ३९
देवलोकगतिं प्राप्तो नाथ देवगणोऽपि हि । मत्तः साहाय्यकामोभूच्छाश्वती कुत्र निर्वृतिः ॥ ४०
त्वामनाराध्य जगतां सर्वेषां प्रभवास्पदम् । शाश्वती प्राप्यते केन परमेश्वर निर्वृतिः ॥ ४१
त्वन्मायामू[12]ढमनसो जन्ममृत्युजरादिकान् । अवाप्य पापान्पश्यन्ति प्रेतराजानमन्तरा ॥ ४२
ततः पाशशतैर्बद्धा नरकेष्वतिदारुणम् । प्राप्नुवन्ति महद्दुः[14]खं विश्वरूपमिदं तव ॥ ४३
अहमत्यन्तविषयी मोहितस्तव मायया । ममत्वागाधगर्तान्ते भ्रमामि परमेश्वर ॥ ४४

* आर्षीयं सरणिः ।

१ क. घातयामास । २ क. °द्धवाक्यमनुस्म° । ३ ख. गर्गेण । ४ ग. °हो यादवानुप° । ५ ख. °कुर्मम यत्ते° । ६ ख. वायुः पयोऽग्निश्च त° । ७ ख. °न् । त्वयाऽपि युगपत्सर्वं व्याप्तं ज° । ८ ख. °त् । सृष्ट्यादि° । ९ ख. °रं जन्मक्ष° । १० ख °वकिनराः । गि° । ११ ख. तापत्रययुतेन भोः । रा° । १२ ख °दिकैः । शास्त्रवाप्यां प्रपश्य° । १३ ख. °ननं तदा । त° । १४ °खं स्वरूपं निन्दतस्तव ।

सोऽहं त्वां शरणमपारमीशमीड्यं संप्राप्तः परमपदं यतो न किंचित् ।
संसारश्रमपरितापतप्तचेता निर्विण्णे परिणतधाम्नि साभिलाषः ॥ ४९

इति श्रीमहापुराणे आदिब्राह्मे कालयवनवधे मुचुकुन्दस्तुतिनिरूपणं नाम षण्णवत्यधिक-
शततमोऽध्यायः ॥ १९६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०३३६

अथ सप्तनवत्यधिकशततमोऽध्यायः ।

व्यास[1] उवाच—

इत्थं स्तुतस्तदा तेन मुचुकुन्देन धीमता । प्राहेशः सर्वभूतानामनादिनिधनो हरिः ॥ १

श्रीकृष्ण उवाच—

यथाऽभिवाञ्छिताँल्लोकान्दिव्यान्गच्छ नरेश्वर । अव्याहत[2]परैश्वर्यो मत्प्रसादोपबृंहितः ॥ २

भुक्त्वा दिव्यान्महाभोगान्भविष्यसि महाकुले । जातिस्मरो मत्प्रसादात्ततो मोक्षमवाप्स्यसि ३

व्यास उवाच—

इत्युक्तः प्रणिपत्येशं जगतां[3]मच्युतं नृपः । गुहामुखाद्विनिष्क्रान्तो ददृशे सोऽल्पकान्नरान् ॥ ४

ततः कलियुगं ज्ञात्वा प्राप्तं तप्तुं ततो नृपः । नरनाराणस्थानं प्रययौ गन्धमादनम् ॥ ५

कृष्णोऽपि घातयित्वाऽरिमुपायेन हि तद्बलम् । जग्राह मथुरामेत्य हस्त्यश्वस्यन्दनोज्ज्वलम्[4] ॥ ६

आनीय चोग्रसेनाय द्वारवत्यां न्यवेदयत् । पराभिभवनिःशङ्कं बभूव च यदोः[5] कुलम् ॥ ७

बलदेवोऽपि विप्रेन्द्राः[6] प्रशान्ताखिलविग्रहः । ज्ञातिदर्शनसोत्कण्ठः प्रययौ नन्दगोकुलम् ॥ ८

ततो गोपाश्च गोप्यश्च यथापूर्वममित्रजित् । तथैवाभ्यवदत्प्रेम्णा बहुमानपुरःसरम् ॥ ९

कैश्चापि संपरिष्वक्तः कांश्चित्स परिषस्वजे । हासं चक्रे समं कैश्चिद्गोपगोपीजनैस्तथा ॥ १०

प्रियाण्यनेकान्यवदन्[7]गोपास्तत्र हलायुधम्[8] । गोप्यश्च प्रेममुदिताः प्रोचुः सेर्ष्यमथापराः ॥ ११

गोप्यः पप्रच्छुरपरा नागरीजनवल्लभः । कच्चिदास्ते सुखं कृष्णश्चलत्प्रेमरसाकुलः ॥ १२

अस्मच्चेष्टोपहसनं न कच्चित्पुरयोषिताम् । सौभाग्यमानमधिकं करोति क्षणसौहृदः ॥ १३

कच्चित्स्मरति नः कृष्णो गीतानुगमनं कृतम्[9] । अप्यसौ मातरं द्रष्टुं सकृदप्यागमिष्यति ॥ १४

अथवा किं तदालापैः[11] क्रियन्तामपराः कथाः । यदस्माभिर्विना तेन(तस्य) विनाऽस्माकं भविष्यति

पिता माता तथा भ्राता भर्ता बन्धुजनश्च कैः[10] । न त्यक्तस्तत्कृतेऽस्माभिरकृतज्ञस्ततो हि सः ॥१६

तथाऽपि कच्चिदात्मीयमिहाऽऽगमनसंश्रयम् । करोति कृष्णो वक्तव्यं भवता[12] वचनामृतम् ॥ १७

दामोदरोऽसौ गोविन्दः पुरस्त्रीसक्तमानसः । अपेतप्रीतिरस्मासु दुर्दर्शः[13] प्रतिभाति नः ॥ १८

व्यास उवाच—

आमन्त्रितः स कृष्णेति पुनर्दामोदरेति च । जहसुः सुस्वरं गोप्यो हरिणा कृष्टचेतसः ॥ १९

---

१ ख. ब्रह्मोवाच । २ क. °तबलैश्व° । ख. °तवरै° । ३ क. °तामीश्वरं नृ° । ४ ग. °ज्ज्वलाम् । ५ क, ख. यदोबलम् । ६ क. मुनयः । ख. मुनिभिः । ७ क. °दद्गोपांस्त° । ८ क. °युधः । गो° । ९ क. कलम् । १० क. ग. किम् । ११ क. ख. °दालापमि° । १२ क. °ता कृष्ण हृद्गत° । ख. °ता कृष्णपूर्वज । दा° । १३ क. °दर्शो मन्दभागिनाम् । व्या° ।

संदेशैः[1] सौम्यमधुरैः प्रेमगर्भैरगर्वितैः । रामेणाऽऽश्वासिता गोप्यः कृष्णस्यातिमधुरस्वरैः ॥ १९
गोपैश्च पूर्ववद्रामः परिहासमनोहरैः । कथाश्चकार प्रेम्णा च सह तैर्व्रजभूमिषु ॥ २०

इति श्रीमहापुराणे आदिब्राह्मे गोकुले बलप्रत्यागमनवर्णनं नाम
सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०३५७

अथाष्टनवत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

वने [2]विहरतस्तस्य सह गोपैर्महात्मनः[3] । मानुषच्छद्मरूपस्य शेषस्य धरणीभृतः ॥ १
निष्पादितोरुकार्यस्य कार्येणैवावतारिणः । उपभोगार्थमत्यर्थं वरुणः प्राह वारुणीम् ॥ २

वरुण उवाच—

अभीष्टा सर्वदा ह्यस्य मदिरे त्वं महौजसः । अनन्तस्योपभोगाय तस्य गच्छ मुदे शुभे ॥ ३

व्यास उवाच—

इत्युक्ता वारुणी तेन संनिधानमथाकरोत् । वृन्दावनतटोत्पन्नकदम्बतरुकोटरे ॥ ४
[4]विचरन्बलदेवोऽपि मदिरागन्धमुद्धतम् । आघ्राय मदिरा[5]हर्षमवापाथ पुरातनम् ॥ ५
ततः कदम्बात्सहसा मद्यधारां स लाङ्गली । पतन्तीं वीक्ष्य मुनयः प्रययौ परमां मुदम्[6] ॥ ६
पपौ च गोपगोपीभिः समवेतो मुदाऽन्वितः । उपगीयमानो ललितं गीतवाद्यविशारदैः[7] ॥ ७
श्रमतोऽत्यन्तघर्माम्भःकणिकामौक्तिकोज्वलः । आगच्छ यमुने स्नातुमिच्छामीत्याह विह्वलः ॥ ८
तस्य वाचं नदी सा तु मत्तोक्तामवमन्य वै । नाऽऽजगाम ततः क्रुद्धो हलं जग्राह लाङ्गली ॥ ९
गृहीत्वा तां तटेनैव चकर्ष मदविह्वलः । पापे नाऽऽयासि नाऽऽयासि गम्यतामिच्छयाऽन्यतः ॥
सा कृष्टा तेन सहसा मार्गं संत्यज्य निम्नगा । यत्राऽऽस्ते बलदेवोऽसौ प्लावयामास तद्वनम् ११
शरीरिणी तथोपेत्य त्रासविह्वललोचना । प्रसीदेत्यब्रवीद्रामं मुञ्च मां मुशलायुध ॥ १२
सोऽब्रवीदवजानासि मम शौर्यबलं यदि । सोऽहं त्वां हलपातेन नयिष्यामि सहस्रधा ॥ १३

व्यास उवाच—

इत्युक्तयाऽतिसंत्रस्तस्तया नद्या प्रसादितः । भूभागे प्लाविते तत्र मुमोच यमुनां बलः ॥ १४
ततः [8]स्नातस्य वै कान्तिराजगाम महावने । अवतंसोत्पलं चारु गृहीत्वैकं च कुण्डलम् ॥ १५
वरुणप्रहितां चास्मै मालामम्लानपङ्कजाम् । समुद्राहे[9] तथा वस्त्रे नीले लक्ष्मीरयच्छत ॥ १६
कृतावतंसः स तदा चारुकुण्डलभूषितः । नीलाम्बरधरः स्रग्वी शुशुभे कान्तिसंयुतः ॥ १७
इत्थं विभूषितो रेमे तत्र रामस्तदा व्रजे । मासद्वयेन यातश्च पुनः स मथुरां पुरीम् ॥ १८

---

१ ग. °शैः सामम°। २ ख. विचर°। ३ ख. °त्माभिः । मा°। ४ क. विचिन्वन्ब°। ५ ख. सस्मार। ६ ख. °रावर्ष°।
७ क. °दैः । स मत्तोऽत्य° । ८ कान्तस्य । ९ क. °मुद्रस्तु त° ।

रेवतीं चैव तनयां रैवतस्य महीपतेः । उपयेमे बलस्तस्यां जज्ञाते निशठोल्मुकौ ॥ १९

इति श्रीमहापुराणे आदिब्राह्मे हलक्रीडावर्णनं नामाष्टनवत्य-
धिकशततमोऽध्यायः ॥ १९८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०३७६

अथ नवनवत्यधिकशततमोऽध्यायः ।

व्यास उवाच—

भीष्मकः कुण्डिने राजा विदर्भविषयेऽभवत् । रुक्मिणी तस्य दुहिता रुक्मी चैव सुतो द्विजाः॥
रुक्मिणीं चकमे कृष्णः सा च तं चारुहासिनी । न ददौ याचते चैनां रुक्मी द्वेषेण चक्रिणे॥२
ददौ स शिशुपालाय जरासंधप्रचोदितः । भीष्मको रुक्मिणा सार्धं रुक्मिणीमुरुविक्रमः ॥ ३
विवाहार्थं ततः सर्वे जरासंधमुखा नृपाः । भीष्मकस्य पुरं जग्मुः शिशुपालश्च कुण्डिनम् ॥ ४
कृष्णोऽपि बलभद्राद्यैर्यदुभिः परिवारितः । प्रययौ कुण्डिनं द्रष्टुं विवाहं चैद्यभूपतेः ॥ ५
श्वोभाविनि विवाहे तु तां कन्यां हृतवान्हरिः । विपक्षभावमासाद्य रामाद्येष्वेव बन्धुषु ॥ ६
ततश्च पौण्ड्रकः श्रीमान्दन्तवक्त्रो विदूरथः । शिशुपालो जरासंधः शाल्वाद्याश्च महीभृतः ॥ ७
कुपितास्ते हरिं हन्तुं चक्रुरुद्योगमुत्तमम् । निर्जिताश्च समागम्य रामाद्यैर्यदुपुंगवैः ॥ ८
कुण्डिनं न प्रवेक्ष्यामि अहत्वा युधि केशवम् । कृत्वा प्रतिज्ञां रुक्मी च हन्तुं कृष्णमभिद्रुतः ॥९
हत्वा बलं स नागाश्वपत्तिस्यन्दनसंकुलम्[1] । निर्जितः पातितश्चोर्व्यां[2] लीलयैव स चक्रिणा ॥१०
निर्जित्य रुक्मिणं सम्यगुपयेमे स रुक्मिणीम् । राक्षसेन विधानेन संप्राप्तो मधुसूदनः ॥ ११
तस्यां जज्ञे च प्रद्युम्नो मदनांशः[3] स वीर्यवान् । जहार शम्बरो यं वै यो जघान च शम्बरम्[4]१२

इति श्रीमहापुराणे आदिब्राह्मे श्रीकृष्णचरिते नवनवत्य-
धिकशततमोऽध्यायः ॥ १९९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०३८८

अथ द्विशततमोऽध्यायः ।

मुनय ऊचुः—

शम्बरेण[5] हृतो वीरः प्रद्युम्नः स कथं पुनः[6] । शम्बरश्च महावीर्यः प्रद्युम्नेन कथं हतः ॥ १

व्यास उवाच—

षष्ठेऽह्नि जातमात्रे तु प्रद्युम्नं सूतिकागृहात् । ममैष हन्तेति द्विजा हृतवान्कालशम्बरः[7] ॥ २
नीत्वा चिक्षेप[8] चैवैनं ग्राहोऽग्रे लवणार्णवे । कल्लोलजनितावर्ते सुघोरे मकरालये ॥ ३

---

१ क. ख. °णं कृष्णो रुक्मिणीं वरकन्यकाम् । रा° । २ क. ख. विवाहेन । ३ ख. °दनश्चातिवी° । ४ ग. सम्बरम् । ५ ग. सम्बरेण । ६ ग. °नः । सम्ब° । ७ ग. °लसम्ब° । ८ क. °प जलधौ मत्स्योऽग्रे ।

पतितं चैव तत्रैको मत्स्यो जग्राह बालकम् । न ममार च तस्यापि जठ[1]रानले[2]दीपि[3]तः ॥ ४
मत्स्यबन्धैश्च मत्स्योऽसौ मत्स्यैरन्यैः सह द्विजाः । घातितोऽसुरवर्याय शम्बराय निवेदितः ॥५
तस्य मायावती नाम पत्नी सर्वगृहेश्वरी । कारयामास सूदानामाधिपत्यमनिन्दिता ॥ ६
दारिते मत्स्यजठरे ददृशे साऽतिशोभनम् । कुमारं मन्मथतरोर्दग्धस्य प्रथमाङ्कुरम् ॥ ७
कोऽयं कथमयं मत्स्यजठरे समुपागतः । इत्येवं कौतुकाविष्टां तां तन्वीं प्राह नारदः ॥ ८

नारद उवाच—

अयं समस्तजगतां सृष्टिसंहारकारिणा । शं[4]म्बरेण हृतः कृष्णतनयः सूतिकागृहात् ॥ ९
क्षिप्तः समुद्रे मत्स्येन निगीर्णस्ते वशं गतः । नररत्नमिदं सुभ्रु विश्रब्धा परिपालय ॥ १०

व्यास उवाच—

नारदेनैव मुक्ता सा पालयामास तं शिशुम् । बाल्यादेवातिरागेण रूपातिशयमोहिता ॥ ११
स यदा यौवनाभोगभूषितोऽभूद्द्विजोत्तमाः । साभिलाषा तदा सा तु बभूव गजगामिनी ॥ १२
मायावती ददौ चास्मै माया सर्वा महात्मने । प्रद्युम्नायाऽऽत्मभूताय तन्न्यस्तहृदयेक्षणा ॥
प्रसज्जन्तीं तु तामाह स कार्ष्णिः क[5]मललोचनः ॥ १३

प्रद्युम्न उवाच—

मातृभावं विहायैव किमर्थं वर्तसेऽन्यथा ॥ १४

व्यास उवाच—

सा चास्मै कथयामास न पुत्रस्त्वं ममेति वै । तनयं त्वामयं विष्णोर्हृतवान्काल[6]शम्बरः ॥ १५
क्षिप्तः समुद्रे मत्स्यस्य संप्राप्तो जठरान्मया । सा तु रोदिति ते माता कान्ताऽप्याप्यतिवत्सला॥

व्यास उवाच—

इत्युक्तः शं[7]म्बरं युद्धे प्रद्युम्नः स समाह्वयत् । क्रोधाकुलीकृतमना युयुधे[8] च महाबलः ॥ १७
हत्वा सैन्यमशेषं तु तस्य दैत्यस्य माधविः । सप्त माया व्यतिक्रम्य मायां संयुयुजेऽष्टमीम् ॥१८
तया जघान तं दैत्यं मायया काले[9]शम्बर[10]म् । उत्पत्य च तया सार्धमाजगाम पितुः पुरम् ॥ १९
अन्तःपु[11]रं च पतितं मायावत्या समन्वितम् । तं दृष्ट्वा[12] हृष्टसंकल्पा बभूवुः कृष्णयोषितः ॥
रुक्मिणी चाब्रवीत्प्रेम्णाऽऽसक्तदृष्टिरनिन्दिता ॥ २०

रुक्मिण्युवाच—

धन्यायाः खल्वयं पुत्रो वर्तते नवयौवने । अस्मिन्वयसि पुत्रो मे प्रद्युम्नो यदि जीवति ॥ २१
सभाग्या जननी वत्स त्वया काऽपि विभूषिता । अथवा यादृशः स्नेहो मम यादृग्वपुश्च ते ॥
हरेरपत्यं सुव्यक्तं भवान्वत्स भविष्यति ॥ २२

व्यास उवाच—

एतस्मिन्नन्तरे प्राप्तः सह कृष्णेन नारदः । अन्तःपुरवरां देवीं रुक्मिणीं प्राह हर्षितः ॥ २३

---

१ ग. °ठरेऽन° । २ ख. °लर्पीडितः । ३ ग. °पिते । म° । ४ ग. सम्बरेण । ५ ग. °मलेक्षणाम् । मा° । ६ ग. °लसम्ब° । ७ ग. सम्बरं । ८ क. °धेऽथ म° । ९ ग. °लसम्ब° । १० ख. °म् । तथाऽन्यांश्च त° । ११ ग. °रे निप° । १२ ग. °ष्ट्वा कृतसं° ।

श्रीकृष्ण उवाच—

एष ते तनयः सुभ्रु हत्वा शम्बरमागतः[1] । हृतो येनाभवत्पूर्वं पुत्रस्ते सूतिकागृहात् ॥ २४
इयं मायावती भार्या तनयस्यास्य ते सती । शम्बरस्य न भार्येयं श्रूयतामत्र कारणम् ॥ २५
मन्मथे तु गते नाशं तदुद्भवपरायणा । शम्बरं मोहयामास मायारूपेण रुक्मिणि[2] ॥ २६
विवाहाद्युपभोगेषु रूपं मायामयं[3] शुभम् । दर्शयामास दैत्यस्य तस्येयं मदिरेक्षणा ॥ २७
कामोऽवतीर्णः पुत्रस्ते तस्येयं दयिता रतिः । विशङ्का नात्र कर्तव्या स्नुषेयं तव शोभना[4] ॥ २८

व्यास उवाच—

ततो हर्षसमाविष्टौ रुक्मिणीकेशवौ तदा । नगरी च समस्ता सा साधु साध्वित्यभाषत ॥ २९
चिरं[5] नष्टेन पुत्रेण संगतां प्रेक्ष्य रुक्मिणीम् । अवाप विस्मयं सर्वो द्वारवत्यां जनस्तदा ॥ ३०

इति श्रीमहापुराणे आदिब्राह्मे शम्बरहृतप्रद्युम्नागमनवर्णनं नाम
द्विशततमोऽध्यायः ॥ २०० ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०४१८

अथैकाधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

चारुदेष्णं सुदेष्णं च चारुदेहं च शोभनम् । सुषेणं(विचारुं) चारुगुप्तं च भद्रचारुं तथाऽपरम् १
चारुविन्दं(चन्द्रं) सुचारुं च चारुं च बलिनां वरम् । रुक्मिण्यजनयत्पुत्रान्कन्यां चारुमतीं तथा
अन्याश्च भार्याः कृष्णस्य बभूवुः सप्त शोभनाः ।कालिन्दी मित्रविन्दा च सत्या नाग्नजिती तथा
देवी जाम्बवती चापि[6] सदा तुष्टा तु रोहिणी[7] । मद्रराजसुता[8] चान्या सुशीला शीलमण्डला ॥४
सात्राजिती सत्यभामा लक्ष्मणा चारुहासिनी[9]। षोडशात्र सहस्राणि स्त्रीणामन्यानि चक्रिणः ॥
प्रद्युम्नोऽपि महावीर्यो रुक्मिणस्तनयां शुभाम् । स्वयंवरस्थां जग्राह साऽपि तं तनयं हरेः ॥ ६
तस्यामस्याभवत्पुत्रो महाबलपराक्रमः । अनिरुद्धो रणे रुद्धो वीर्योदधिररिंदमः ॥ ७
तस्यापि रुक्मिणः पौत्री वरयामास केशवः । दौहित्राय ददौ रुक्मी स्पर्धयन्नपि शौरिणा ॥ ८
तस्या विवाहे रामाद्या यादवा हरिणा सह । रुक्मिणो नगरं जग्मुर्नाम्ना भोजकटं द्विजाः ॥ ९
विवाहे तत्र निर्वृत्ते प्राद्युम्नेः सुमहात्मनः । कलिङ्गराजप्रमुखा रुक्मिणं वाक्यमब्रुवन् ॥ १०

कलिङ्गादय ऊचुः—

अनक्षज्ञो हली द्यूते तथाऽस्य व्यसनं महत् । तन्न(ज्ज)यामो बलं तस्माद्द्यूतेनैव महाद्युते ॥ ११

व्यास उवाच—

तथेति तानाह नृपान्रुक्मी बलसमन्वितः । सभायां सह[10] रामेण चक्रे द्यूतं च वै तदा ॥ १२
सहस्रमेकं निष्काणां रुक्मिणा विजितो बलः । द्वितीये दिवसे चान्यत्सहस्रं रुक्मिणा जितः १३
ततो दश सहस्राणि निष्काणां[11] पणमाददे । बलभद्रप्रपन्नानि रुक्मी द्यूतविदां वरः ॥ १४

---

१ ग. सम्बरं । २ ग. रूपिणी । ३ क. ख. मायावहं । ४ क. शोभने । ५ ख. पुरा । ६ क. ख. °पि रो° । ७ क. ख °णी कामरूपिणी । म° । ८ ख. मन्त्रराजसुता । ग. भद्रराजसुला । ९ क. °नी । तथा षोडश स । १० ग. °येऽपि पणं चा° । ११ क. °णां ग्लहमा° ।

ततो जहासाथ बलं कलिङ्गाधिपतिर्द्विजाः। दन्तान्विदर्शयन्मूढो रुक्मी चाऽऽह मदोद्धतः॥१५

रुक्म्युवाच—

अविद्योऽयं महाद्यूते बलभद्रः पराजितः। मृषैवाक्षावलेपत्वाद्योऽयं मेनेऽक्षकोविदम्॥ १६

दृष्ट्वा कलिङ्गराजं तु प्रकाशदशनाननम्। रुक्मिणं चापि दुर्वाक्यं कोपं चक्रे हलायुधः॥ १७

व्यास उवाच—

ततः कोपपरीतात्मा निष्ककोटिं हलायुधः। ग्लहं जग्राह रुक्मी च ततस्त्वक्षानपातयत्॥ १८

अजयद्बलदेवोऽथ प्राहोच्चैस्तं जितं मया। ममेति रुक्मी प्राहोच्चैरलीकोक्तैरलं बलम्॥ १९

त्वयोक्तोऽयं ग्लहः सत्यं न ममैषोऽनुमोदितः। एवं त्वया चेद्विजितं न मया विजितं कथम्२०

ततोऽन्तरिक्षे वागुच्चैः प्राह गम्भीरनादिनी। बलदेवस्य तं कोपं वर्धयन्ती महात्मनः॥ २१

आकाशवागुवाच—

जितं तु बलदेवेन रुक्मिणा भाषितं मृषा। अनुक्त्वा वचनं किंचित्कृतं भवति कर्मणा॥ २२

व्यास उवाच—

ततो बलः समुत्थाय क्रोधसंरक्तलोचनः। जघानाष्टापदेनैव रुक्मिणं स महाबलः॥ २३

कलिङ्गराजं चाऽऽदाय विस्फुरन्तं बलाद्बलः। बभञ्ज दन्तान्कुपितो यैः प्रकाशं जहास सः २४

आकृष्य च महास्तम्भं जातरूपमयं बलः। जघान ये तत्पक्षास्तान्भूभृतः कुपितो बलः॥ २५

ततो हाहाकृतं सर्वं पलायनपरं द्विजाः। तद्राजमण्डलं सर्वं बभूव कुपिते बले॥ २६

बलेन निहतं श्रुत्वा रुक्मिणं मधुसूदनः। नोवाच वचनं किंचिद्रुक्मिणीबलयोर्भयात्॥ २७

ततोऽनिरुद्धमादाय कृतोद्वाहं द्विजोत्तमाः। द्वारकामाजगामाथ यदुचक्रं सकेशवम्॥ २८

इति श्रीमहापुराणे आदिब्राह्मेऽनिरुद्धविवाहे रुक्मिवधनिरूपणं नामैकाधिकद्विशततमोऽध्यायः॥ २०१॥

आदितः श्लोकानां समष्ट्यङ्काः—१०४४६

अथ द्व्यधिकद्विशततमोऽध्यायः।

व्यास उवाच—

द्वारवत्यां ततः शौरिं शक्रस्त्रिभुवनेश्वरः। आजगामाथ मुनयो मत्तैरावतपृष्ठगः॥ १

प्रविश्य द्वारकां सोऽथ समीपे च हरेस्तदा। कथयामास दैत्यस्य नरकस्य विचेष्टितम्॥ २

इन्द्र उवाच—

त्वया नाथेन देवानां मनुष्यत्वेऽपि तिष्ठता। प्रशमं सर्वदुःखानि नीतानि मधुसूदन॥ ३

तपस्विजनरक्षार्थं सोऽरिष्टो धेनुकस्तथा। प्रलम्बाद्यास्तथा केशी ते सर्वे निहतास्त्वया॥ ४

कंसः कुवलयापीडः पूतना बालघातिनी। नाशं नीतास्त्वया सर्वे येऽन्ये जगदुपद्रवाः॥ ५

युष्मद्दोर्दण्डसंबुद्धिपरित्राते जगत्त्रये। यज्ञे यज्ञहविः प्राश्य तृप्तिं यान्ति दिवौकसः॥ ६

सोऽहं सांप्रतमायातो यन्निमित्तं जनार्दन। तच्छ्रुत्वा तत्प्रतीकारप्रयत्नं कर्तुमर्हसि॥ ७

---

१ ख. °क्त्वाऽपि वचः किं°। २ क. °वणपृ°। ३ क. ख. °ननाशाय सोऽ°।

भौमोऽयं नरको नाम प्राग्ज्योतिषपुरेश्वरः । करोति सर्वभूतानां[1]मपघातमरिंदम ॥ ८
देवसिद्धसुरादीनां नृपाणां च जनार्दन । हत्वा तु सोऽसुरः कन्या रुरोध निजमन्दिरे ॥ ९
छत्रं यत्सलिलस्रावि तज्जहार प्रचेतसः । मन्दरस्य तथा शृङ्गं हृतवान्मणिपर्वतम् ॥ १०
अमृतस्राविणी दिव्ये मातुर्मेऽमृतकुण्डले । जहार सो[3]ऽसुरोऽदित्या वाञ्छत्यैरावतं द्विपम् ॥ ११
दुर्नीतमेतद्गोविन्द मया तस्य तवोदितम् । यदत्र प्रतिकर्तव्यं तत्स्वयं परिमृश्यताम् ॥ १२

व्यास उवाच—

इति श्रुत्वा स्मितं कृत्वा भगवान्देवकीसुतः । गृहीत्वा वासवं हस्ते समुत्तस्थौ वरासनात् ॥ १३
संचिन्तितमुपारुह्य गरुडं[4] गगनेचरम् । सत्यभामां समारोप्य ययौ प्राग्ज्योतिषं पुरम् ॥ १४
आरुह्यैरावतं नागं शक्रोऽपि त्रिदशालयम् । ततो जगाम[5] सुमनाः पश्यतां द्वारकौकसाम् ॥ १५
प्राग्ज्योतिषपुरस्यास्य समन्ताच्छतयोजनम् । आचितं भैरवैः पाशैः परसैन्यनिवारणे ॥ १६
तांश्चिच्छेद हरिः पाशान्क्षिप्त्वा चक्रं सुदर्शनम् । ततो मुरः समुत्तस्थौ तं जघान च केशवः १७
मुरोस्तु(रस्य) तनयान्सप्त सहस्रास्तां(सा तां)स्ततो हरिः । चक्रधाराग्निनिर्दग्धांश्चकार[6] शलभानिव
हत्वा मुरं हयग्रीवं तथा पञ्चजनं द्विजाः । प्राग्ज्योतिषपुरं धीमांस्त्वरावान्समुपाद्रवत् ॥ १९
नरकेनास्य तत्राभून्महासैन्येन संयुगः । कृष्णस्य यत्र गोविन्दो जघ्ने दैत्यान्सहस्रशः ॥ २०
शस्त्रास्त्रवर्षं मुञ्चन्तं स भौमं नरकं बली । क्षिप्त्वा चक्रं द्विधा चक्रे चक्री दैतेयचक्रहा ॥ २१
हते तु नरके भूमिर्गृहीत्वाऽदितिकुण्डले । उपतस्थे जगन्नाथं वाक्यं चेदमथाब्रवीत् ॥ २२

धरण्युवाच—

यदाऽहमुद्धृता नाथ त्वया शूकरमूर्तिना । त्वत्संस्पर्शभवः पुत्रस्तदाऽयं मय्यजायत ॥ २३
सोऽयं त्वयैव दत्तो मे त्वयैव विनिपातितः । गृहाण कुण्डले चेमे पालयास्य च संततिम् ॥ २४
भारावतरणार्थाय ममैव भगवानिमम् । अंशेन लोकमायातः प्रसादसुमुख प्रभो ॥ २५
त्वं कर्ता च विकर्ता च संहर्ता प्रभवोऽव्ययः । जगत्स्वरूपो यश्च त्वं स्तूयसेऽच्युत किं मया २६
व्यापी व्याप्यः क्रिया कर्ता कार्यं च भगवान्सदा । सर्वभूतात्मभूतात्मा स्तूयसेऽच्युत किं मया
परमात्मा त्वमात्मा च भूतात्मा चाव्ययो भवान् । यदा तदा स्तुतिर्नास्ति किमर्थं ते प्रवर्तताम्
प्रसीद सर्वभूतात्मन्नरकेन कृतं च यत्[7] । तत्क्षम्यताम[8]दोषाय मत्सुतः स निपातितः ॥ २९

व्यास उवाच—

तथेति चोक्त्वा धरणीं भगवान्भूतभावनः । रत्नानि[9] नरकावासा[10]ज्जग्राह मुनि[11]सत्तमाः ॥ ३०
कन्यापुरे स कन्यानां षोडशातुलविक्रमः । शताधिकानि ददृशे सहस्राणि द्विजोत्तमाः ॥ ३१
चतुर्दंष्ट्रान्गजांश्चोग्रान्षट्सहस्राणि दृष्टवान् । काम्बोजानां तथाऽश्वानां नियुतान्येकविंशतिम् ३२
कन्यास्ताश्च तथा नागांस्तानश्वान्द्वारकां पुरीम् । प्रापयामास गोविन्दः सद्यो नरककिंकरैः ३३
ददृशे वारुणं छत्रं तथैव मणिपर्वतम् । आरोपयामास हरिर्गरुडे पतगेश्वरे ॥ ३४

---

१ क. °नामुपद्रवम° । २ ख. दुर्वृत्तमे° । ३ ग. °तिपत्तव्यं । ४ ख. °डं च खगेश्वर° । ५ ग. मौरवैः । ६ क. °र स तु लीलया । ह° । ७ क. °त् । क्षम्य° । ८ क. °म्यतां स च मे दोषः स त्वया विनि° । ९ ख. °नि नारकीयाणि जग्रा° । १० क. °ज्जहार मु° । ११ क. ख. महामतिः ।

आरुह्य च स्वयं कृष्णः सत्यभामासहायवान् । अदित्याः कुण्डले दातुं जगाम त्रिदशालयम् ३९

इति महापुराणे आदिब्राह्मे कृष्णचरिते नरकवधो नाम
द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥
आदितः श्लोकानां समष्ट्यङ्काः—१०४८१

अथ त्र्यधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

गरुडो वारुणं छत्रं तथैव मणिपर्वतम् । सभार्यं च हृषीकेशं लीलयैव वहन्ययौ ॥ १
ततः शङ्खमुपाध्माय स्वर्गद्वारं गतो हरिः । उपतस्थुस्ततो देवाः सार्घपात्रा जनार्दनम् ॥ २
स देवैरर्चितः कृष्णो देवमातुर्निवेशनम् । सिताभ्रशिखराकारं प्रविश्य ददृशेऽदितिम् ॥ ३
स तां प्रणम्य शक्रेण सहितः कुण्डलोत्तमे । ददौ नरकनाशं च शशंसास्यै जनार्दनः ॥ ४
ततः प्रीता जगन्माता धातारं जगतां हरिम् । तुष्टावादितिरव्यग्रं कृत्वा तत्प्रवणं मनः ॥ ५

अदितिरुवाच—

नमस्ते पुण्डरीकाक्ष भक्तानामभयंकर । सनातनात्मन्भूतात्मन्सर्वात्मन्भूतभावन ॥ ६
प्रणेतर्मनसो बुद्धेरिन्द्रियाणां गुणात्मक । सितदीर्घादिनिःशेषकल्पनापरिवर्जित ॥ ७
जन्मादिभिरसंस्पृष्टस्वप्नादिवारिवर्जितः । संध्या रात्रिरहर्भूमिर्गगनं वायुरम्बु च ॥ ८
हुताशनो मनो बुद्धिर्भूतादिस्त्वं तथाऽच्युत । सृष्टिस्थितिविनाशानां कर्ता कर्तृपतिर्भवान् ॥ ९
ब्रह्मविष्णुशिवाख्याभिरात्ममूर्तिभिरीश्वरः । मायाभिरेतद्व्याप्तं ते जगत्स्थावरजङ्गमम् ॥ १०
अनात्मन्यात्मविज्ञानं सा ते माया जनार्दन । अहं ममेति भावोऽत्र यया समुपजायते ॥ ११
संसारमध्ये मायायास्तवैतन्नाथ चेष्टितम् । यैः स्वधर्मपरैर्नाथ नरैराराधितो भवान् ॥ १२
ते तरन्त्यखिलामेतां मायामात्मविमुक्तये । ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा ॥ १३
विष्णुमायामहावर्ते मोहान्धतमसाऽऽवृताः । आराध्य त्वामभीप्सन्ते कामानात्मभवक्षये ॥ १४
पदे ते पुरुषा बद्धा मायया भगवंस्तव । मया त्वं पुत्रकामिन्या वैरिपक्षक्षयाय च ॥ १५
आराधितो न मोक्षाय मायाविलसितं हि तत् । कौपीनाच्छादनप्राया वाञ्छा कल्पद्रुमादपि १६
जायते यदपुण्यानां सोऽपराधः स्वदोषजः । तत्प्रसीदाखिलजगन्मायामोहकराव्यय ॥ १७
अज्ञानं ज्ञानसद्भाव भूतभूतेश नाशय । नमस्ते चक्रहस्ताय शार्ङ्गहस्ताय ते नमः ॥ १८
गदाहस्ताय ते विष्णो शङ्खहस्ताय ते नमः । एतत्पश्यामि ते रूपं स्थूलचिह्नोपशोभितम् ॥
न जानामि परं यत्ते प्रसीद परमेश्वर ॥ १९

व्यास उवाच—

अदित्यैवं स्तुतो विष्णुः प्रहस्याऽऽह सुरारणिम् ॥ २०

श्रीकृष्ण उवाच—

माता देवि त्वमस्माकं प्रसीद वरदा भव ॥ २१

---

१ क. °म् । शैलाभ्राशि° । २ क. प्राह । ३ क. °क । शतशीर्षादि° । ४ क. °वाद्याभि° । ५ ख. °ये यदेते । ६ क. ख. °य शङ्खह° । ७ क. ख. पद्महस्ताय । ८ ख. तत्त्वं । ९ ग. प्रणम्याऽऽह ।

अदितिरुवाच—

एवमस्तु यथेच्छा ते त्वमशेषसुरासुरैः । अजेयः पुरुषव्याघ्र मर्त्यलोके भविष्यसि ॥ २२

व्यास उवाच—

ततोऽनन्तरमेवास्य शक्राणीसहितां दितिम् । सत्यभामा प्रणम्याऽऽह प्रसीदेति पुनः पुनः ॥२३

अदितिरुवाच—

मत्प्रसादान्न ते सुभ्रु जरा वैरूप्यमेव च । भविष्यत्यनवद्याङ्गि सर्व[1]कामा भविष्यसि ॥ २४

व्यास उवाच—

अदित्या तु कृतानुज्ञो देवराजो जनार्दनम् । यथावत्पूजयामास बहुमानपुरःसरम् ॥ २५
ततो ददर्श कृष्णोऽपि सत्यभामासहायवान् । देवोद्यानानि सर्वाणि नन्दनादीनि सत्तमाः २६
ददर्श च सुग[2]न्धाढ्यं मञ्जरीपुञ्जधारिणम् । शैत्याह्लादकरं दि[3]व्यं ताम्रपल्लवशोभितम् ॥ २७
मथ्यमानेऽमृते जातं जातरूपसमप्रभम् । पारिजातं जगन्नाथः केशवः केशिसूदनः ॥
तं दृष्ट्वा प्राह गोविन्दं सत्यभामा द्विजोत्तमाः ॥ २८

सत्यभामोवाच—

कस्मान्न द्वारकामेष नीयते कृष्ण [4]पादपः । यदि ते तद्वचः सत्यं सत्याऽत्यर्थं प्रियेति मे ॥ २९
मद्गृहे निष्कुटार्थाय तदयं नीयतां तरुः । न मे जाम्बवती तादृगभीष्टा न च रुक्मिणी ॥ ३०
सत्ये यथा त्वमित्युक्तं त्वया कृष्णासकृत्प्रियम् । सत्यं तद्यदि गोविन्द नोपचारकृतं [5]वचः ३१
तदस्तु पारिजातोऽयं मम गेहविभूषणम् । बिभ्रती पारिजातस्य केशपाशेन मञ्जरीम् ॥
सपत्नीनामहं मध्ये शोभेयमिति कामये ॥ ३२

व्यास उवाच—

इत्युक्तः स प्रहस्यैनं पारिजातं गरुत्मति । आरोपयामास हरिस्तमूचुर्वनरक्षिणः ॥ ३३

वनपाला ऊचुः—

भोः शची देवराजस्य महिषी तत्परिग्रहम् । पारिजातं न गोविन्द हर्तुमर्हसि पादपम् ॥ ३४
शचीविभूषणार्थाय देवैरमृतमन्थने । उत्पादितोऽयं न क्षेमी गृहीत्वैनं गमिष्यसि ॥ ३५
मौढ्यात्प्रार्थयसे क्षेमी गृहीत्वैनं च को व्रजेत्[10] । अवश्यमस्य देवेन्द्रो वि[11]कृतिं कृष्ण यास्यति ३६
वज्रोद्यतकरं शक्रमनुयास्यन्ति चामराः । तदलं सकलैर्देवैर्विग्रहेण तवाच्युत ॥
विपाककटु यत्कर्म न तच्छंसन्ति पण्डिताः ॥ ३७

व्यास उवाच—

इत्युक्ते तै रुवाचैतान्सत्यभामाऽतिकोपिनी ॥ ३८

सत्यभामोवाच—

का शची पारिजातस्य को[12] वा शक्रः सुराधिपः । सामान्यः सर्वलोकानां यद्येषोऽमृतमन्थने ॥
समुत्पन्नः पुरा कस्मादेको गृह्णाति वासवः । यथा सुरा यथा चेन्दुर्यथा श्रीर्वनरक्षिणः ॥ ४०

---

१ ख. °र्वसौख्यं गमिष्य° । २ °गन्धीनि म° । ३ क. ख. °व्यं बालप° । ४ ख. भूरुहः । ५ ग. तव । ६ क. °चुस्तरुर° । ७ ख. कृष्ण । ८ क. °सि । मोहात्प्रा° । ख. °सि । को वा प्रार्थ° । ९ ख. ग. °यते क्षे° । १० ख. °त् । श्रवणेनास्य । ११ क. ख. निष्कृतिं । १२ क. कोऽयं श° ।

सामान्यः सर्वलोकस्य पारिजातस्तथा द्रुमः । भर्तृबाहुमहागर्वाद्रुणद्ध्येनमथो शची ॥ ४१
तत्कथ्यतां द्रुतं गत्वा पौलोम्या वचनं मम । सत्यभामा वदत्येवं भर्तृगर्वोद्धताक्षरम् ॥ ४२
यदि त्वं दयिता भर्तुर्यदि तस्य प्रिया ह्यसि । मद्भर्तुर्हरतो वृक्षं तत्कारय निवारणम् ॥ ४३
जानामि ते पतिं शक्रं जानामि त्रिदशेश्वरम् । पारिजातं तथाऽप्येनं मानुषी हारयामि ते ॥ ४४

व्यास उवाच—

इत्युक्ता रक्षिणो गत्वा प्रोच्चैः प्रोचुर्यथोदितम् । शची चोत्साहयामास त्रिदशाधिपतिं पतिम् ॥
ततः समस्तदेवानां सैन्यैः परिवृत्तो हरिम् । प्रययौ पारिजातार्थमिन्द्रो योधयितुं द्विजाः ॥ ४६
ततः परिघनिस्त्रिंशगदाशूलधरायुधाः । बभूवुस्त्रिदशाः सज्जाः शक्रे वज्रकरे स्थिते ॥ ४७
ततो निरीक्ष्य गोविन्दो नागराजोपरि स्थितम् । शक्रं देवपरीवारं युद्धाय समुपस्थितम् ॥ ४८
चकार शङ्खनिर्घोषं दिशः शब्देन पूरयन् । मुमोच च शरव्रातं सहस्रायुतसंमितम् ॥ ४९
ततो दिशो नभश्चैव दृष्ट्वा शरशताचितम् । मुमुचुस्त्रिदशाः सर्वे शस्त्राण्यस्त्राण्यनेकशः ॥ ५०
एकैकमस्त्रं शस्त्रं च देवैर्मुक्तं सहस्रधा । चिच्छेद लीलयैवेशो जगतां मधुसूदनः ॥ ५१
पाशं सलिलराजस्य समाकृष्योरगाशनः । चचाल खण्डशः कृत्वा बालपन्नगदेहवत् ॥ ५२
यमेन प्रहितं दण्डं गदाप्रक्षेपखण्डितम् । पृथिव्यां पातयामास भगवान्देवकीसुतः ॥ ५३
शिबिकां च धनेशस्य चक्रेण तिलशो विभुः । चकार शौरिरर्केन्दू दृष्टिपातहतौजसौ ॥ ५४
नीतोऽग्निः शतशो बाणैर्द्राविता वसवो दिशः । चक्रविच्छिन्नशूलाग्रा रुद्रा भुवि निपातिताः५५
साध्या विश्वे च मरुतो गन्धर्वाश्चैव सायकैः । शार्ङ्गिणा प्रेरिताः सर्वे व्योम्नि शाल्मलितूलवत्॥
गरुडश्चापि वक्त्रेण पक्षाभ्यां च नखाङ्कुरैः । भक्षयन्प्रहनदेवान्दानवांश्च सदा खगः ॥ ५७
ततः शरसहस्रेण देवेन्द्रमधुसूदनौ । परस्परं ववर्षाते धाराभिरिव तोयदौ ॥ ५८
ऐरावतेन गरुडो युयुधे तत्र संकुले । देवैः समेतैर्युयुधे शक्रेण च जनार्दनः ॥ ५९
छिन्नेषु शीर्यमाणेषु शस्त्रेष्वस्त्रेषु सत्वरम् । जग्राह वासवो वज्रं कृष्णश्चक्रं सुदर्शनम् ॥ ६०
ततो हाहाकृतं सर्वं त्रैलोक्यं सचराचरम् । वज्रचक्रधरौ दृष्ट्वा देवराजजनार्दनौ ॥ ६१
क्षिप्तं वज्रमथेन्द्रेण जग्राह भगवान्हरिः । न मुमोच तदा चक्रं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ६२
प्रनष्टवज्रं देवेन्द्रं गरुडक्षतवाहनम् । सत्यभामाऽब्रवीद्वाक्यं पलायनपरायणम् ॥ ६३

सत्यभामोवाच—

त्रैलोक्येश्वर नो युक्तं शचीभर्तुः पलायनम् । पारिजातस्रगाभोगात्त्वामुपस्थास्यते शची ॥ ६४
कीदृशं देव राज्यं ते पारिजातस्रगुज्ज्वलाम् । अपश्यतो यथापूर्वं प्रणयाभ्यागतां शचीम् ॥ ६५
अलं शक्र प्रयासेन न व्रीडां यातुमर्हसि । नीयतां पारिजातोऽयं देवाः सन्तु गतव्यथाः ॥ ६६
पतिगर्वावलेपेन बहुमानपुरःसरम् । न ददर्श गृहायातामुपचारेण मां शची ॥ ६७
स्त्रीत्वादगुरुचित्ताऽहं स्वभर्तुः श्लाघनापरा । ततः कृतवती शक्र भवता सह विग्रहम् ॥ ६८
तदलं पारिजातेन परस्वेन हृतेन वा । रूपेण यशसा चैव भवेत्स्त्री का न गर्विता ॥ ६९

---

१ क. °त्वा सत्ययोदितमञ्जसा । श° । २ ख. °च मुशरांस्तीव्रान्सह° । ३ क. भुवि । ४ क. ख. °रुत्मानपि । ५ क. ग. °श्रीर्हारं प° । ६ क. ख. °भर्तः प° । ७ क. ख. प्रतापेन । ८ ग. °ण गर्विता सा तु भर्त्रा स्त्री कालग° ।

व्यास उवाच—

इत्युक्ते वै निवृत्ते देवराजस्तया द्विजाः। प्राह चैनामलं चण्डि सखि खेदातिविस्तरैः ॥ ७०
न चाऽपि सर्गसंहारस्थितिकर्ताऽखिलस्य यः। जितस्य तेन मे व्रीडा जायते विश्वरूपिणा ७१
यस्मिञ्जगत्सकलमेतदनादिमध्ये यस्माद्यतश्च न भविष्यति सर्वभूतात्।
तेनोद्भवप्रलयपालनकारणेन व्रीडा कथं भवति देवि निराकृतस्य ॥ ७२
सकलभुवनमूर्तेर्मूर्तिरल्पा सुसूक्ष्मा विदितसकलवेदैर्ज्ञायते यस्य नान्यैः।
तमजमकृतमीशं शाश्वतं स्वेच्छयैनं जगदुपकृतिमाद्यं को विजेतुं समर्थः ॥ ७३

इति श्रीमहापुराणे आदिब्राह्मे पारिजातहरणे शक्रस्तवनिरूपणं नाम त्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०५५४

अथ चतुरधिकद्विशततमोऽध्यायः।

व्यास उवाच—

संस्तुतो भगवानित्थं देवराजेन केशवः। प्रहस्य भावगम्भीरमुवाचेदं द्विजोत्तमाः ॥ १

श्रीभगवानुवाच—

देवराजो भवानिन्द्रो वयं मर्त्या जगत्पते। क्षन्तव्यं भवतैवैतदपराधकृतं मम ॥ २
पारिजाततरुश्चायं नीयतामुचितास्पदम्। गृहीतोऽयं मया शक्र सत्यावचनकारणात् ॥ ३
वज्रं चेदं गृहाण त्वं यँद्वव्यं प्रहितं त्वया। तवैवैतत्प्रहरणं शक्र वैरिविदारणम् ॥ ४

शक्र उवाच—

विमोहयसि मामीश मर्त्योऽहमिति किं वदन्। जानीमस्त्वां भगवतोऽनन्तसौख्यविदो वयम् ॥ ५
योऽसि सोऽसि जगन्नाथ प्रवृत्तौ नाथ संस्थितः। जगतः शल्यनिष्कर्षं करोष्यसुरसूदन ॥ ६
नीयतां पारिजातोऽयं कृष्ण द्वारवतीं पुरीम्। मर्त्यलोके त्वया मुक्ते नायं संस्थास्यते भुवि ॥ ७

व्यास उवाच—

तथेत्युक्त्वा तु देवेन्द्रमाजगाम भुवं हरिः। प्रयुक्तैः सिद्धगन्धर्वैः स्तूयमानस्त्वथर्षिभिः ॥ ८
जगाम कृष्णः सहसा गृहीत्वा पादपोत्तमम्। ततः शङ्खमुपाध्माय द्वारकोपरि संस्थितः ॥ ९
हर्षमुत्पादयामास द्वारकावासिनां द्विजाः। अवतीर्याथ गरुडात्सत्यभामासहायवान् ॥ १०
निष्कुटे स्थापयामास पारिजातं महातरुम्। यमभ्येत्य जनः सर्वो जातिं स्मरति पौर्विकीम् ११
वास्यते यस्य पुष्पाणां गन्धेनोर्वी त्रियोजनम्। ततस्ते यादवाः सर्वे देवगन्धानमानुषान् ॥ १२
ददृशुः पादपे तस्मिन्कुर्वतो मुखदर्शनम्। किंकरैः समुपानीतं हस्त्यश्वादि ततो धनम् ॥ १३
स्त्रियश्च कृष्णो जग्राह नरकस्य परिग्रहात्। ततः काले शुभे प्राप्त उपयेमे जनार्दनः ॥ १४

---

१ क. °जन्नपायुतः। प्रा°। २ क. °खि वैरेण केवलम्। न। ३ क. °कारिणा मे व्री°। ४ ग. °चेन्द्रं द्वि°। ५ ख. यद्वैतत्प्रहि°। ६ ग. °तो मनुसूक्ष्मवि°। ७ क. देहबन्धान्युपानयन्। ८ क. °वन्तो मु°। ९ क. ख. °खबन्धन°। १० क. °प्रहाः। त°।

ताः कन्या नरकावासात्सर्वतो याः समाहृताः । एकस्मिन्नेव गोविन्दः कालेनाऽऽसां द्विजोत्तमाः
जग्राह विधिवत्पाणीन्पृथग्देहे स्वधर्मतः । षोडश स्त्रीसहस्राणि शतमेकं तथाऽधिकम् ॥ १६
तावन्ति चक्रे रूपाणि भगवान्मधुसूदनः । एकैकशश्च ताः कन्या मेनिरे मधुसूदनम् ॥ १७
ममैव पाणिग्रहणं गोविन्दः कृतवानिति । निशासु जगतः स्रष्टा तासां गेहेषु केशवः ॥
उवास विप्राः सर्वासां विश्वरूपधरो हरिः ॥ १८

इति श्रीमहापुराणे आदिब्राह्मे श्रीकृष्णचरिते चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०५७२

अथ पञ्चाधिकद्विशततमोऽध्यायः ।

व्यास उवाच—
प्रद्युम्नाद्या हरेः पुत्रा रुक्मिण्यां कथिता[2] द्विजाः । भान्वादिकांश्च वै पुत्रान्सत्यभामा व्यजायत १
दीप्तिमन्तः प्रपक्षाद्या रोहिण्यास्तनया हरेः । बभूवुर्जाम्बवत्याश्च साम्बाद्या[3] बाहुशालिनः ॥ २
तनया भद्रविन्दाद्या नाग्नजित्यां महाबलाः । संग्रामजित्प्रधानास्तु शैब्यायां चाभवन्सुताः ॥ ३
वृकाद्यास्तु सुता माद्री[4] गात्रवत्प्रमुखान्सुतान् । अवाप लक्ष्मणा पुत्रान्कालिन्द्याश्च श्रुतादयः ॥ ४
अन्यासां चैव भार्याणां समुत्पन्नानि चक्रिणः । अष्टायुतानि पुत्राणां सहस्राणि शतं तथा ॥ ५
प्रद्युम्नः प्रमुख[5]स्तेषां रुक्मिण्यास्तु सुतस्ततः । प्रद्युम्नादनिरुद्धोऽभूद्वज्रस्तस्मादजायत ॥ ६
अनिरुद्धो रणे रुद्धो बलेः पौत्रीं महाबलः । बाणस्य तनयामू(मु)षामुपयेमे द्विजोत्तमाः ॥ ७
यत्र युद्धमभूद्घोरं हरिशंकरयोर्महत् । छिन्नं सहस्रं बाहूनां यत्र बाणस्य चक्रिणा ॥ ८
मुनय ऊचुः—
कथं युद्धमभूद्ब्रह्मन्नुषार्थे हरकृष्णयोः । कथं क्षयं च बाणस्य बाहूनां कृतवान्हरिः ॥ ९
एतत्सर्वं महाभाग[6] वक्तुमर्हसि नोऽखिलम् । महत्कौतूहलं जातं श्रोतुमेतां कथां शुभाम् ॥ १०
व्यास उवाच—
उषा बाणसुता विप्राः पार्वतीं शंभुना सह । क्रीडन्तीमुपलक्ष्योच्चैः स्पृहां चक्रे तदा[7] स्वयम् ॥
ततः सकलचित्तज्ञा गौरी तामाह भामिनीम् ॥ ११
गौर्युवाच—
अलमित्यनुतापेन भर्त्रा त्वमपि रंस्यसे ॥ १२
व्यास उवाच—
इत्युक्ता सा तदा चक्रे कदेति मतिमात्मनः । को वा भर्ता ममेत्येनां पुनरप्याह पार्वती ॥ १३
पार्वत्युवाच—
वैशाखे शुक्लद्वादश्यां स्वप्ने योऽभिभवं तव । करिष्यति स ते भर्ता राजपुत्रि भविष्यति ॥ १४

---

१ क. ख. °रकेणाऽऽसन्सर्व° । २ क. °ता हि वः । भा° । ३ ख. ग. °द्या बहु° । ४ क. °द्री सुगात्रप्रमु° । ५ क. ख. प्रथमस्ते° । ६ क. ख. °ग समाख्यातुं त्वमर्हसि । म° । ७ ख. ग. °दाश्रयाम् ।

व्यास उवाच—

तस्यां तिथौ पुमान्स्वप्ने यथा देव्या उदीरितः । तथैवाभिभवं चक्रे रागं चक्रे च तत्र सा ॥
ततः प्रबुद्धा पुरुषमपश्यन्ती तमुत्सुका ॥ १७

उषोवाच—

क्व गतोऽसीति निर्लज्जा द्विजाश्चोक्तवती सखीम् । बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा तु तत्सुता
तस्याः सख्यभवत्सा च प्राह कोऽयं त्वयोच्यते । यदा लज्जाकुला नास्य कथयामास सा सखी
तदा विश्वासमानीय सर्वमेवान्ववेदयत् । विदितायां तु तामाह पुनरूषा यथोदितम् ॥
देव्या तथैव तत्प्राप्तौ योऽभ्युपायः कुरुष्व तम् ॥ १८

व्यास उवाच—

ततः पटे सुरान्दैत्यान्गन्धर्वांश्च प्रधानतः । मनुष्यांश्चाभिलिख्यासौ चित्रलेखाऽप्यदर्शयत् ॥ १९
अपास्य सा तु गन्धर्वांस्तथोरगसुरासुरान् । मनुष्येषु ददौ दृष्टिं तेष्वप्यन्धकवृष्णिषु ॥ २०
कृष्णरामौ विलोक्याऽऽसीत्सुभ्रूर्लज्जायतेक्षणा । प्रद्युम्नदर्शने व्रीडाद्दृष्टिं निन्ये ततो द्विजाः २१
दृष्ट्वाऽनिरुद्धं च ततो लज्जा क्वापि निराकृता । सोऽयं सोऽयं ममेत्युक्ते तया सा योगगामिनी॥
ययौ द्वारवतीमू(मु)षां समाश्वास्य ततः सखी ॥ २२

इति श्रीमहापुराणे आदिब्राह्मे बाणयुद्धे पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०५९४

अथ षडधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

बाणोऽपि प्रणिपत्याग्रे ततश्चाऽऽह त्रिलोचनम् ॥ १

बाण उवाच—

देव बाहुसहस्रेण निर्विण्णोऽहं विनाऽऽहवम् । कच्चिन्ममैषां बाहूनां साफल्यकरणो रणः ॥
भविष्यति विना युद्धं भाराय मम किं भुजैः ॥ २

शंकर उवाच—

मयूरध्वजभङ्गस्ते यदा बाण भविष्यति । पिशिताशिजनानन्दं प्राप्स्यसि त्वं तदा रणम् ॥ ३

व्यास उवाच—

ततः प्रणम्य मुदितः शंभुमभ्यागतो गृहात् । भग्नं ध्वजमथाऽऽलोक्य हृष्टो हर्षं परं ययौ ॥ ४
एतस्मिन्नेव काले तु योगविद्याबलेन तम् । अनिरुद्धमथाऽऽनिन्ये चित्रलेखा वरा सखी ॥ ५
कन्यान्तःपुरमध्ये तं रममाणं सहोषया । विज्ञाय रक्षिणो गत्वा शशंसुर्दैत्यभूपतेः ॥ ६
व्यादिष्टं किंकराणां तु सैन्यं तेन महात्मना । जघान परिघं लौहमादाय परवीरहा ॥ ७
हतेषु तेषु बाणोऽपि रथस्थस्तद्वधोद्यतः । युध्यमानो यथाशक्ति यदा वीरेण निर्जितः ॥ ८
मायया युयुधे तेन स तदा मन्त्रचोदितः । ततश्च पन्नगास्त्रेण बबन्ध यदुनन्दनम् ॥ ९

---

१ क. उषा । २ ग. °च । मायू° ।

द्वारवत्यां क यातोऽसावनिरुद्धेति जल्पताम् । यदूनामाचचक्षे तं बद्धं बाणेन नारदः ॥ १०
तं शोणितपुरे श्रुत्वा नीतं विद्याविदग्धया । योषिता प्रत्ययं जग्मुर्यादवा नामं वैरिति(णि) ११
ततो गरुडमारुह्य स्मृतमात्रा गतं हरिः । बलप्रद्युम्नसहितो बाणस्य प्रययौ पुरम् ॥ १२
पुरीप्रवेशे प्रमथैर्युद्धमासीन्महाबलैः । ययौ बाणपुराभ्याशं नीत्वा तान्संक्षयं हरिः ॥ १३
ततस्त्रिपादस्त्रिशिरा ज्वरो माहेश्वरो महान् । बाणरक्षार्थमत्यर्थं युयुधे शार्ङ्गधन्वना ॥ १४
तद्भस्मस्पर्शसंभूततापं कृष्णाङ्गसंगमात् । अवाप बलदेवोऽपि समं संमीलितेक्षणः ॥ १५
ततः संयुध्यमानस्तु सह देवेन शार्ङ्गिणा । वैष्णवेन ज्वरेणाऽऽशु कृष्णदेहान्निराकृतः ॥ १६
नारायणभुजाघातपरिपीडनविह्वलम् । तं वीक्ष्य क्षम्यतामस्येत्याह देवः पितामहः ॥ १७
ततश्च क्षान्तमेवेति प्रोच्य तं वैष्णवं ज्वरम् । आत्मन्येव लयं निन्ये भगवान्मधुसूदनः ॥ १८
मम त्वया समं युद्धं ये स्मरिष्यन्ति मानवाः। विज्वरास्ते भविष्यन्तीत्युक्त्वा चैनं ययौ हरिः॥
ततोऽग्नीन्भगवान्पञ्च जित्वा नीत्वा क्षयं तथा । दानवानां बलं विष्णुश्चूर्णयामास लीलया २०
ततः समस्तसैन्येन दैतेयानां बलेः सुतः । युयुधे शंकरश्चैव कार्तिकेयश्च शौरिणा ॥ २१
हरिशंकरयोर्युद्धमतीवाऽऽसीत्सुदारुणम् । चुक्षुभुः सकला लोकाः शस्त्रास्त्रैर्बहुधाऽर्दिताः ॥ २२
प्रलयोऽयमशेषस्य जगतो नूनमागतः । मेनिरे त्रिदशा यत्र वर्तमाने महाहवे ॥ २३
जृम्भणास्त्रेण गोविन्दो जृम्भयामास शंकरम् । ततः प्रणेशुर्दैतेयाः प्रमथाश्च समन्ततः ॥ २४
जृम्भाभिभूतश्च हरो रथोपस्थमुपाविशत् । न शशाक तदा योद्धुं कृष्णेनाक्लिष्टकर्मणा ॥ २५
गरुडक्षतबाहुश्च प्रद्युम्नास्त्रेण पीडितः । कृष्णहुंकारनिर्धूतशक्तिश्चापययौ गुहः ॥ २६
जृम्भिते शंकरे नष्टे दैत्यसैन्ये गुहे जिते । नीते प्रमथसैन्ये च संक्षयं शार्ङ्गधन्वना ॥ २७
नन्दीशसंगृहीताश्वमभिरूढो महारथम् । बाणस्तत्राऽऽययौ योद्धुं कृष्णकार्ष्णिबलैः सह ॥ २८
बलभद्रो महावीर्यो बाणसैन्यमनेकधा । विव्याध बाणैः प्रद्युम्नो धर्मतश्चापलायतः ॥ २९
आकृष्य लाङ्गलाग्रेण मुशलेन च पोथितम् । बलं बलेन ददृशे बाणो बाणैश्च चक्रिणः ॥ ३०
ततः कृष्णस्य बाणेन युद्धमासीत्समासतः । परस्परं तु संदीप्तान्कायत्राणविभेदिनः ॥ ३१
कृष्णश्चिच्छेद बाणांस्तान्बाणेन प्रहिताञ्शरैः । बिभेद केशवं बाणो बाणं विव्याध चक्रधृक् ३२
मुमुचाते तथाऽस्त्राणि बाणकृष्णौ जिगीषया । परस्परक्षतिपरौ परिघांश्च ततो द्विजाः ॥ ३३
छिद्यमानेष्वशेषेषु शस्त्रेष्वस्त्रे च सीदति । प्राचुर्येण हरिर्बाणं हन्तुं चक्रे ततो मनः ॥ ३४
ततोऽर्कशतसंभूततेजसा सदृशद्युति । जग्राह दैत्यचक्रारिर्हरिश्चक्रं सुदर्शनम् ॥ ३५
मुञ्चतो बाणनाशाय तच्चक्रं मधुविद्विषः । नग्ना दैतेयविद्याऽभूत्कोटरी पुरतो हरेः ॥ ३६
तामग्रतो हरिर्दृष्ट्वा मीलिताक्षः सुदर्शनम् । मुमोच बाणमुद्दिश्य छेत्तुं बाहुवनं रिपोः ॥ ३७
क्रमेणास्य तु बाहूनां बाणस्याच्युतचोदितम् । छेदं चक्रेऽसुरस्याऽऽशु शस्त्रास्त्रक्षेपणाद्द्रुतम्॥ ३८
छिन्ने बाहुवने तत्तु करस्थं मधुसूदनः । मुमुक्षुर्बाणनाशाय विज्ञातस्त्रिपुरद्विषा ॥ ३९
स उत्पत्याऽऽह गोविन्दं सामपूर्वमुमापतिः । विलोक्य बाणं दोर्दण्डच्छेदासृक्स्राववर्षिणम् ४०

रुद्र उवाच—

कृष्ण कृष्ण जगन्नाथ जाने त्वां पुरुषोत्तमम् । परेशं परमात्मानमनादिनिधनं परम् ॥ ४१

---

१ ख. °म तैरि° । २ ग. °मात्रं ग° । ३ क. तद्भस्म कृष्णमं° । ४ क. °भूतः पापकृष्णा° । ५ ग. °तस्तापः कृ° । ६ ग. अत्यन्तद्भुल° । ७ ग. °पि श्रममुन्मीलि° । ८ ग ज्वरः । ९ क महारणे ।

देवतिर्यङ्मनुष्येषु शरीरग्रहणात्मिका । लीलेयं तव चेष्टा हि दैत्यानां वधलक्षणा ॥ ४२
तत्प्रसीदाभयं दत्तं बाणस्यास्य मया प्रभो । तत्त्वया नानृतं कार्यं यन्मया व्याहृतं वचः ॥ ४३
अस्मत्संश्रयवृद्धोऽयं नापराधस्तवाव्यय । मया दत्तवरो दैत्यस्ततस्त्वां क्षमयाम्यहम् ॥ ४४

व्यास उवाच—

इत्युक्तः प्राह गोविन्दः शूलपाणिमुमापतिम् । प्रसन्नवदनो भूत्वा गतामर्षोऽसुरं प्रति ॥ ४५

श्रीभगवानुवाच—

युष्मद्दत्तवरो बाणो जीवतादेष शंकर । त्वद्वाक्यगौरवादेतन्मया चक्रं निवर्तितम् ॥ ४६
त्वया यदभयं दत्तं तद्दत्तमभयं मया । मत्तोऽविभिन्नमात्मानं द्रष्टुमर्हसि शंकर ॥ ४७
योऽहं स त्वं जगच्चेदं सदेवासुरमानुषम् । अविद्यामोहितात्मानः पुरुषा भिन्नदर्शिनः ॥ ४८

व्यास उवाच—

इत्युक्त्वा प्रययौ कृष्णः प्राद्युम्निर्यत्र तिष्ठति । तद्बन्धफणिनो नेशुर्गरुडानिलशोषिताः ॥ ४९
ततोऽनिरुद्धमारोप्य सपत्नीकं गरुत्मति । आजग्मुर्द्वारकां रामकार्ष्णिदामोदराः पुरीम् ॥ ५०

इति श्रीमहापुराणे आदिब्राह्मे बाणयुद्धे षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०६४४

अथ सप्ताधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

चक्रे कर्म महच्छौरिर्बिभ्रद्यो मानुषीं तनुम् । जिगाय शक्रं शर्वं च सर्वदेवांश्च लीलया ॥ १
यच्चान्यदकरोत्कर्म दिव्यचेष्टाविघातकृत् । कथ्यतां तन्मुनिश्रेष्ठ परं कौतूहलं हि नः ॥ २

व्यास उवाच—

गदतो मे मुनिश्रेष्ठाः श्रूयतामिदमादरात् । नरावतारे कृष्णेन दग्धा वाराणसी यथा ॥ ३
पौण्ड्रको वासुदेवश्च वासुदेवोऽभवद्भुवि । अवतीर्णस्त्वमित्युक्तो जनैरज्ञानमोहितैः ॥ ४
स मेने वासुदेवोऽहमवतीर्णो महीतले । नष्टस्मृतिस्ततः सर्वं विष्णुचिह्नमचीकरत् ॥
दूतं च प्रेषयामास स कृष्णाय द्विजोत्तमाः । ५

दूत उवाच—

त्यक्त्वा चक्रादिकं चिह्नं मदीयं नाम माऽऽत्मनः । वासुदेवात्मकं मूढ मुक्त्वा सर्वमशेषतः ॥ ६
आत्मनो जीवितार्थं च तथा मे प्रणतिं व्रज ॥ ७

व्यास उवाच—

इत्युक्तः स प्रहस्यैव दूतं प्राह जनार्दनः ॥ ८

श्रीभगवानुवाच—

निजचिह्नमहं चक्रं समुत्स्रक्ष्ये त्वयीति वै । वाच्यश्च पौण्ड्रको गत्वा त्वया दूत वचो मम ॥ ९
ज्ञातस्त्वद्वाक्यसद्भावो यत्कार्यं तद्विधीयतां । गृहीतचिह्न एवाहमागमिष्यामि ते पुरम् ॥ १०

---

१ ख. °दर्शिनाः । इ° । २ क. ख. °ष्टाभिघा° । ३ क. ख. °स कृ° । ४ क. ख. °य सुमहात्मने । त्य° ।

उत्स्रक्ष्यामि च ते चक्रं निजचिह्नमसंशयम् । आज्ञापूर्वं च यदिदमागच्छेति त्वयोदितम् ॥ ११
संपादयिष्ये श्वस्तुभ्यं तदप्येषोऽविलम्बितम् । शरणं ते समभ्येत्य कर्तास्मि नृपते तथा ॥
यथा त्वत्तो भयं भूयो नैव किंचिद्भविष्यति ॥ १२

व्यास उवाच—

इत्युक्तेऽपगते दूते संस्मृत्याभ्यागतं हरिः । गरुत्मन्तं समारुह्य त्वरितं तत्पुरं ययौ ॥ १३
तस्यापि केशवोद्योगं श्रुत्वाकाशिपतिस्तदा । सर्वसैन्यपरीवारपार्ष्णिग्राहमुपाययौ ॥ १४
ततो बलेन महता काशिराजबलेन च । पौण्ड्रको वासुदेवोऽसौ केशवाभिमुखं ययौ ॥ १५
तं ददर्श हरिर्दूरादुदारस्यन्दने स्थितम् । चक्रशङ्खगदापाणिं पाणिना विधृताम्बुजम् ॥ १६
स्रग्धरं धृतशार्ङ्गं च सुपर्णरचनाध्वजम् । वक्षस्थलकृतं चास्य श्रीवत्सं ददृशे हरिः ॥ १७
किरीटकुण्डलधरं पीतवासःसमन्वितम् । दृष्ट्वा तं भावगम्भीरं जहास मधुसूदनः ॥ १८
युयुधे च बलेनास्य हस्त्यश्वबलिना द्विजाः । निस्त्रिंशर्ष्टिगदाशूलशक्तिकार्मुकशालिना ॥ १९
क्षणेन शार्ङ्गनिर्मुक्तैः शरैरग्निविदारणैः । गदाचक्रातिपातैश्च सूदयामास तद्बलम् ॥ २०
काशिराजबलं चैव क्षयं नीत्वा जनार्दनः । उवाच पौण्ड्रकं मूढमात्मचिह्नोपलक्षणम् ॥ २१

श्रीभगवानुवाच—

पौण्ड्रकोक्तं त्वया यत्तद्दूतवक्त्रेण मां प्रति । समुत्सृजेति चिह्नानि तत्ते संपादयाम्यहम् ॥ २२
चक्रमेतत्समुत्सृष्टं गदेयं ते विसर्जिता । गरुत्मानेष निर्दिष्टः समारोहतु ते ध्वजम् ॥ २३
इत्युच्चार्य विमुक्तेन चक्रेणासौ विदारितः । पोथितो गदया भग्नो गरुत्मांश्च गरुत्मता ॥ २४
ततो हाहाकृते लोके काशीनामधिपस्तदा । युयुधे वासुदेवेन मित्रस्यापचितौ स्थितः ॥ २५
ततः शार्ङ्गविनिर्मुक्तैश्छित्त्वा तस्य शरैः शिरः । काशिपुर्यां स चिक्षेप कुर्वँल्लोकस्य विस्मयम् ॥
हत्वा तु पौण्ड्रकं शौरिः काशिराजं च सानुगम् । रेमे द्वारवतीं प्राप्तोऽमरः स्वर्गगतो यथा ॥ २७
तच्छिरः पतितं तत्र दृष्ट्वा काशिपतेः पुरे । जनः किमेतदित्याह केनेत्यत्यन्तविस्मितः ॥ २८
ज्ञात्वा तं वासुदेवेन हतं तस्य सुतस्ततः । पुरोहितेन सहितस्तोषयामास शंकरम् ॥ २९
अविमुक्ते महाक्षेत्रे तोषितस्तेन शंकरः । वरं वृणीष्वेति तदा तं प्रोवाच नृपात्मजम् ॥ ३०
स वव्रे भगवन्कृत्या पितुर्हन्तुर्वधाय मे । समुत्तिष्ठतु कृष्णस्य त्वत्प्रसादान्महेश्वर ॥ ३१

व्यास उवाच—

एवं भविष्यतीत्युक्ते दक्षिणाग्नेरनन्तरम् । महाकृत्या समुत्तस्थौ तस्यैवाग्निनिवेशनात् ॥ ३२
ततो ज्वालाकरालास्या ज्वलत्केशकलापिका । कृष्ण कृष्णेति कुपिता कृत्वा द्वारवतीं ययौ ॥
तामवेक्ष्य जनः सर्वो रौद्रां विकृतलोचनाम् । ययौ शरण्यं जगतां शरणं मधुसूदनम् ॥ ३४

जना ऊचुः—

काशिराजसुतेनेयमाराध्य वृषभध्वजम् । उत्पादिता महाकृत्या वधाय तव चक्रिणः ॥
जहि कृत्यामिमामुग्रां वह्निज्वालाजटाकुलाम् ॥ ३५

व्यास उवाच—

चक्रमुत्सृष्टमक्षेषु क्रीडासक्तेन लीलया । तदग्निमालाजटिलं ज्वालोद्गारातिभीषणम् ॥ ३६
कृत्यामनुजगामाऽऽशु विष्णुचक्रं सुदर्शनम् । ततः सा चक्रविध्वस्ता कृत्या माहेश्वरी तदा ॥ ३७

१ क. गरुडध्वजः । २ ग. पानितो । ३ ग. °म रिपुर्बली । यु° । ४ क. ख. °पिनी । कृ° । ५ ख. कृत्या ।

जगाम वेगिनी वेगात्तदप्यनुजगाम ताम् । कृत्या वाराणसीमेव प्रविवेश त्वरान्विता ॥ ३८
विष्णुचक्रप्रतिहतप्रभावा मुनिसत्तमाः । ततः काशिबलं भूरि प्रमथानां तथा बलम् ॥ ३९
समस्तशस्त्रास्त्रयुतं चक्रस्याभिमुखं ययौ । शस्त्रास्त्रमोक्षबहुलं दग्ध्वा तद्बलमोजसा ॥ ४०
कृत्वाऽक्षेमामशेषां तां पुरीं वाराणासीं ययौ । प्रभूतभृत्यपौरां तां साश्वमातङ्गमानवाम् ॥ ४१
अशेषदुर्गकोष्ठां तां दुर्निरीक्ष्यां सुरैरपि । ज्वालापरिवृताशेषगृहप्राकारतोरणाम् ॥ ४२
ददाह तां पुरीं चक्रं सकलामेव सत्वरम्[२] । अक्षीणामर्षमत्यल्पसाध्यसाधननिस्पृहम्[३] ॥ ४३
तच्चक्रं प्रस्फुरद्दीप्ति विष्णोरभ्याययौ करम् ॥

इति श्रीमहापुराणे आदिब्राह्मे श्रीकृष्णचरिते पौण्ड्रकवासुदेववधे काशीदाहवर्णनं नाम सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०६८७

अथाष्टाधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

श्रोतुमिच्छामहे भूयो बलभद्रस्य धीमतः । मुने पराक्रमं शौर्यं तन्नो व्याख्यातुमर्हसि ॥ १
यमुनाकर्षणादीनि श्रुतान्यस्माभिरत्र वै । तत्कथ्यतां महाभाग यदन्यत्कृतवान्बलः ॥ २

व्यास उवाच—

शृणुध्वं मुनयः कर्म यद्रामेणाभवत्कृतम् । अनन्तेनाप्रमेयेन शेषेण धरणीभृता ॥ ३
दुर्योधनस्य तनयां स्वयंवरकृतेक्षणाम् । बलादादत्तवान्वीरः साम्बो जाम्बवतीसुतः ॥ ४
ततः क्रुद्धा महावीर्याः कर्णदुर्योधनादयः । भीष्मद्रोणादयश्चैव[४] बबन्धुर्युधि निर्जितम् ॥ ५
तच्छ्रुत्वा यादवाः सर्वे क्रोधं दुर्योधनादिषु । मुनयः प्रतिचक्रुश्च तान्विहन्तुं महोद्यमम् ॥ ६
तान्निवार्य बलः प्राह मदलोलाकुलाक्षरम् । मोक्ष्यन्ति ते मद्वचनाद्यास्याम्येको हि कौरवान् ७
बलदेवस्ततो गत्वा नगरं नागसाह्वयम् । बाह्योपवनमध्येऽभून्न[५] विवेश च तत्पुरम्[६] ॥ ८
बलमागतमाज्ञाय तदा दुर्योधनादयः । गामर्घमुदकं चैव रामाय प्रत्यवेदयन् ॥
गृहीत्वा विधिवत्सर्वं ततस्तानाह कौरवान् ॥ ९

बलदेव उवाच—

आज्ञापयत्युग्रसेनः साम्बमाशु विमुञ्चत ॥ १०

व्यास उवाच—

ततस्तद्वचनं श्रुत्वा भीष्मद्रोणादयो द्विजाः । कर्णदुर्योधनाद्याश्च चुक्रुधुर्द्विजसत्तमाः ॥ ११
ऊचुश्च कुपिताः सर्वे बाह्लिकाद्याश्च भूमिपाः । अराजार्हं यदोर्वंशमवेक्ष्य मुशलायुधम् ॥ १२

कौरवा ऊचुः—

भो भोः किमेतद्भवता बलभद्रेरितं वचः । आज्ञां कुरुकुलोत्थानां यादवः कः प्रदास्यति ॥ १३
उग्रसेनोऽपि यद्याज्ञां कौरवाणां प्रदास्यति । तदलं पाण्डुरैश्छत्रैर्नृपयोग्यैरलंकृतैः ॥ १४

---

१ ग. °ह तद्वरेश्चक्रं । २ ख. °म् । प्रक्षीणसारां कृत्वेमां सा° । ३ ख. °नकारकम् । ४ क. ख. °श्चैनं ब° । ५ ख. °भूद्विवे° । ६ ख. ततः पुरम् । ब° ।

तद्गच्छ बलभद्र त्वं साम्बमन्यायचेष्टितम् । विमोक्ष्यामो न भवतो नोग्रसेनस्य शासनात् ॥ १६
प्रणतिर्या कृताऽस्माकं मान्यानां कुकुरान्धकैः । न नाम सा कृता केयमाज्ञा स्वामिनि भृत्यतः ॥
गर्वमारोपिता यूयं समानासनभोजनैः । को दोषो भवतां नीतिर्यत्प्रीणात्यनपेक्षिता ॥ १७
अस्माभिरर्घ्यो भवता योऽयं बल निवेदितः । प्रेम्णैव न तदस्माकं कुलाद्युष्मत्कुलोचितम् ॥ १८

व्यास उवाच—

इत्युक्त्वा कुरवः सर्वे नामुञ्चन्त हरेः सुतम् । कृतैकनिश्चयाः सर्वे विविशुर्गजसाह्वयम् ॥ १९
मत्तः कोपेन चाऽऽघूर्णं ततोऽधिक्षेपजन्मना । उत्थाय पार्ष्ण्या वसुधां जघान स हलायुधः ॥ २०
ततो विदारिता पृथ्वी पार्ष्णिघातान्महात्मनः । आस्फोटयामास तदा दिशः शब्देन पूरयन् ॥
उवाच चातिताम्राक्षो भ्रुकुटीकुटिलाननः ॥ २१

बलदेव उवाच—

अहो महावलेपोऽयमसाराणां दुरात्मनाम् । कौरवाणामाधिपत्यमस्माकं किल कालजम् ॥ २२
उग्रसेनस्य ये नाऽऽज्ञां मन्यन्ते चाप्यलङ्घनाम् । आज्ञां प्रतीच्छेद्धर्मेण सह देवैः शचीपतिः २३
सदाऽध्यास्ते सुधर्मां तामुग्रसेनः शचीपतेः । धिङ्मनुष्यशतोच्छिष्टे तुष्टिरेषां नृपासने ॥ २४
पारिजाततरोः पुष्पमञ्जरीर्वनिताजनः । बिभर्ति यस्य भृत्यानां सोऽप्येषां न महीपतिः ॥ २५
समस्तभूभुजां नाथ उग्रसेनः स तिष्ठतु । अद्य निष्कौरवामुर्वीं कृत्वा यास्यामि तां पुरीम् ॥ २६
कर्णं दुर्योधनं द्रोणमद्य भीष्मं सबाह्लिकम् । दुःशासनादीन्भूरिं च भूरिश्रवसमेव च ॥ २७
सोमदत्तं शलं भीममर्जुनं सयुधिष्ठिरम् । यमजौ कौरवांश्चान्यान्हन्यां साश्वरथद्विपान् ॥ २८
वीरमादाय तं साम्बं सपत्नीकं ततः पुरीम् । द्वारकामुग्रसेनादीन्गत्वा द्रक्ष्यामि बान्धवान् २९
अथवा कौरवादीनां समस्तैः कुरुभिः सह । भारावतरणे शीघ्रं देवराजेन चोदितः ॥ ३०
भागीरथ्यां क्षिपाम्याशु नगरं नागसाह्वयम् ॥ ३१

व्यास उवाच—

इत्युक्त्वा क्रोधरक्ताक्षस्तालाङ्कोऽधोमुखं हलम् । प्राकारवप्रे विन्यस्य चकर्ष मुशलायुधः ॥ ३२
आघूर्णितं तत्सहसा ततो वै हस्तिनापुरम् । दृष्ट्वा संक्षुब्धहृदयाश्चुक्रुशुः सर्वकौरवाः ॥ ३३

कौरवा ऊचुः—

राम राम महाबाहो क्षम्यतां क्षम्यतां त्वया । उपसंह्रियतां कोपः प्रसीद मुशलायुध ॥ ३४
एष साम्बः सपत्नीकस्तव निर्यातितो बल । अविज्ञातप्रभावाणां क्षम्यतामपराधिनाम् ॥ ३५

व्यास उवाच—

ततो निर्यातयामासुः साम्बं पत्न्या समन्वितम् । निष्क्रम्य स्वपुरीं तूर्णं कौरवा मुनिसत्तमाः ॥
भीष्मद्रोणकृपादीनां प्रणम्य वदतां प्रियम् । क्षान्तमेव मयेत्याह बलो बलवतां वरः ॥ ३७
अद्याप्याघूर्णिताकारं लक्ष्यते तत्पुरं द्विजाः । एष प्रभावो रामस्य बलशौर्यवतो द्विजाः ॥ ३८
ततस्तु कौरवाः साम्बं संपूज्य हलिना सह । प्रेषयामासुरुद्वाहधनभार्यासमन्वितम् ॥ ३९

इति श्रीमहापुराणे आदिब्राह्मे श्रीकृष्णचरिते बलदेवमाहात्म्यनिरूपणं नामाष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०७२६

१ ख. ग. °क्त्वा मदर° । २ ख. °क्ताक्षः कुर्वन्नधो° । ३ ख. °म् । सप्रा° । ४ ख. °कारं च नगरीं न° ।

अथ नवाधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

शृणुध्वं मुनयः सर्वे बलस्य बलशालिनः । कृतं यदन्यदेवाभूत्तदपि श्रूयतां द्विजाः ॥ १
नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः । सखाऽभवन्महा[1]वीर्यो द्विविदो नाम वानरः ॥ २
वैरानुबन्धं बलवान्स चकार सुरान्प्रति ॥ ३

द्विविद उवाच—

नरकं हतवान्कृष्णो बलदर्पसमन्वि[2]तम् । करिष्ये सर्वदेवानां तस्मादेष प्रतिक्रियाम् ॥ ४

व्यास उवाच—

यज्ञविध्वंसनं कुर्वन्मर्त्यलोकक्षयं तथा । ततो विध्वंसयामास यज्ञानज्ञानमोहितः ॥ ५
बिभेद साधुमर्यादां क्षयं चक्रे च देहिनाम् । ददाह [3]चपलो देशं पुरग्रामान्तराणि च ॥ ६
क्वचिच्च पर्वतक्षेपाद्ग्रामादीन्समचूर्णयत् । शैलानुत्पाट्य तोयेषु मुमोचाम्बुनिधौ [4]तथा ॥ ७
पुनश्चार्णवमध्यस्थः क्षोभयामास सागरम् । तेनातिक्षोभितश्चाब्धिरुद्वेलो जायते द्विजाः ॥ ८
प्लावयंस्तीरजा[5]न्ग्रामान्पुरादीनतिवेगवान् । कामरूपं महारूपं कृत्वा सस्यान्यनेकशः ॥ ९
लुठन्भ्रमणसंमर्दैः संचूर्णयति वानरः । तेन विप्रकृतं सर्वं जगदेतद्दुरात्मना ॥ १०
निःस्वाध्यायवषट्कारं द्विजाश्चाऽऽसीत्सुदुःखितम्[6] । कदाचिद्रैवतोद्या[7]ने पपौ पानं हलायुधः ११
रेवती च महाभागा तथैवान्या वरस्त्रियः । उद्गीयमानो विलसल्ललनामौलिमध्यगः ॥ १२
रेमे यदुवरश्रेष्ठः कुबेर इव [8]मन्दरे । ततः स वानरोऽभ्येत्य गृहीत्वा सीरिणो हलम् ॥ १३
मुशलं च चकारास्य संमुखः स विडम्बनाम् । तथैव योषितां तासां जहासाभिमुखं कपिः ॥ १४
पानपूर्णांश्च करकांश्चिक्षेपाऽऽहत्य वै तदा । ततः कोपपरीतात्मा भर्त्सयामास तं बलम् ॥ १५
तथाऽपि तमवज्ञाय चक्रे किलकिलाध्वनिम् । ततः समुत्थाय बलो जगृहे मुशलं रुषा ॥ १६
सोऽपि शैलशिलां भीमां जग्राह प्लवगोत्तमः । चिक्षेप च स तां क्षिप्तां मुशलेन सहस्रधा ॥ १७
बिभेद यादवश्रेष्ठः सा पपात महीतले । अपतन्मुशलं चासौ समुल्लङ्घ्य प्लवंगमः ॥ १८
वेगेनाऽऽयम्य रोषे[9]णं बलेनोरस्यताडयत् । ततो बलेन कोपेन मुष्टिना मूर्ध्नि ताडितः ॥ १९
पपात रुधिरोद्गारी द्विविदः क्षीणजीवितः । पतता तच्छरीरेण गिरेः शृङ्गमशीर्यत ॥ २०
मुनयः शतधा वज्रिवज्रेणेव हि ताडितम् । पुष्पवृष्टिं ततो देवा रामस्योपरि चिक्षिपुः ॥ २१
प्रशशंसुस्तदाऽभ्येत्य[11] साध्वेतत्ते महत्कृतम् । अनेन दुष्टकपिना दैत्यपक्षोपकारिणा ॥
जगन्निराकृतं वीर दिष्ट्या स क्षयमागतः ॥ २२

व्यास उवाच—

एवंविधान्यनेकानि बलदेवस्य धीमतः । कर्माण्यपरिमेयानि शेषस्य धरणीभृतः ॥ २३

इति श्रीमहापुराणे आदिब्राह्मे बलदेवमाहात्म्ये द्विविदवानरवधवर्णनं नाम
नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०७४९

---

१ क. °हामायो द्वि°। २ क. °न्वितः । क°। ३ क. च पुरोद्देशं। ४ क. तदा । ५ क. °जान्वृक्षान्नरा°। ६ क. °म्। एकदा रैव°। ७ क. °द्यानं ययौ क्रीडन्हला°। ८ क. मन्दिरे। ९ क. °नाऽऽगम्य रो°। १० ग. °ण तले°। ११ क. °त्य सांत्वैरेतन्मह°।

अथ दशाधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

एवं दैत्यवधं कृष्णो बलदेवसहायवान् । चक्रे दुष्टक्षितीशानां तथैव जगतः कृते ॥ १
क्षितेश्च भारं भगवा[1]न्फाल्गुनेन समं विभुः । अवतारयामास हरिः समस्ताक्षौहिणीवधात् ॥ २
कृत्वा भारावतरणं भुवो हत्वाऽखिलान्नृपान् । शापव्याजेन विप्राणामुपसंहृतवान्कुलम् ॥ ३
उत्सृज्य द्वारकां कृष्णस्त्यक्त्वा मानुष्यमात्मभूः । स्वांशो विष्णुमयं स्थानं प्रविवेश पुनर्निजम्

मुनय ऊचुः—

स विप्रशापव्याजेन संजह्रे स्वकुलं कथम् । कथं च मानुषं देहमुत्ससर्ज जनार्दनः ॥ ५

व्यास उवाच—

विश्वामित्रस्तथा कण्वो नारदश्च महामुनिः । पिण्डारके महातीर्थे दृष्टा यदुकुमारकैः ॥ ६
ततस्ते यौवनोन्मत्ता भाविकार्य[2]प्रचोदिताः । साम्बं जाम्बवतीपुत्रं भूषयित्वा[3] स्त्रियं यथा ॥
प्रसृतास्तान्मुनीनूचुः प्रणिपातपुरःसरम् ॥ ७

कुमारा ऊचुः—

इयं स्त्री पुत्रकामा[4] तु प्रभो किं जनयिष्यति ॥ ८

व्यास उवाच—

दिव्यज्ञानोपपन्नास्ते विप्रलब्धा कुमारकैः । शापं ददुस्तदा विप्रास्तेषां नाशाय सुव्रताः ॥ ९
मुनयः कुपिताः प्रोचुर्मुशलं जनयिष्यति । येनाखिलकुलो[5]त्सादो यादवानां भविष्यति ॥ १०
इत्युक्तास्तैः कुमारास्त आचचक्षुर्यथातथम् । उग्रसेनाय मुशलं जज्ञे साम्बस्य चोदरात् ॥ ११
तदुग्रसेनो मुशलमयश्चूर्णमकारयत् । जज्ञे तच्चैरका चूर्णं प्रक्षिप्तं वै महोदधौ ॥ १२
मुसलस्याथ लौहस्य चूर्णितस्यान्धकैर्द्विजाः[6] । खण्डं चूर्णयितुं शेकुर्नैव ते तोमराकृति ॥ १३
तदप्यम्बुनिधौ क्षिप्तं मत्स्यो जग्राह जालिभिः । घातितस्योदरात्तस्य लुब्धो जग्राह तज्जरा १४
विज्ञातपरमार्थोऽपि[7] भगवान्मधुसूदनः । नैच्छत्तदन्यथा कर्तुं विधिना यत्समाहृतम् ॥ १५
देवैश्च प्रहितो दूतः प्रणिपत्याऽऽह केशवम् । रहस्येवमहं दूतः प्रहितो भगवन्सुरैः[8] ॥ १६
वस्वश्विमरुदादित्यरुद्रसाध्यादिभिः सह । विज्ञापयति वः शक्रस्तदिदं श्रूयतां प्रभो[9] ॥ १७

देवा ऊचुः—

भारावतरणार्थाय वर्षाणामधिकं शतम् । भगवानवतीर्णोऽत्र त्रिदशैः संप्रसादितः ॥ १८
दुर्वृत्ता निहता दैत्या भुवो भारोऽवतारितः । त्वया सनाथास्त्रिदशा व्रजन्तु त्रिदिवेशताम् ॥ १९
तदतीतं जगन्नाथ वर्षाणामधिकं शतम् । इदानीं गम्यतां स्वर्गो भवता यदि रोचते ॥ २०
देवैर्विज्ञापितो देवोऽप्यथात्रैव रतिस्तव । तत्स्थीयतां यथाकालमाख्येयमनुजीविभिः ॥ २१

श्रीभगवानुवाच—

यत्त्वमात्थाखिलं दूत वेद्मि चैतदहं पुनः । प्रारब्ध एव हि मया यादवानामपि क्षयः ॥ २२

---

१ क. °वान्स बलेन । २ क. °प्रणोदि° । ३ क. °त्वा स्वयं तदा । प्र° । ४ ग. °कामस्य बभ्रो किं । ५ क. °लो-च्छेदो । ६ ख °भिः । पातितं चोद° । ७ क. °पि सर्वशक्तिस्तदा हरिः । नै° । ८ ख. °मात्वृतः । दे° । ९ ख. विभो ।

भुवो नामा[1]तिभारोऽयं यादवै[2]र्निर्वा[3]हितैः । अवतारं करोम्यस्य सप्तरात्रेण सत्वरः ॥ २३
यथागृहीतं चाम्भोधौ हृत्वाऽहं द्वारकां[4] पुनः । यादवानुपसंहृत्य यास्यामि त्रिदशालयम् ॥ २४
मनुष्यदेहमुत्सृज्य संकर्षणसहायवान् । प्राप्त एवास्मि मन्तव्यो देवेन्द्रेण तथा सुरैः ॥ २५
जरासंधादयो येऽन्ये निहता भारहेतवः । क्षितेस्तेभ्यः[5] स भारो हि यदूनां[6][7] समधीयत ॥ २६
तदेतत्सुमहाभारमवतार्य क्षितेरहम् । यास्याम्यमरलोकस्य पालनाय ब्रवीहि तान् ॥ २७

व्यास उवाच—

इत्युक्तो वासुदेवेन देवदूतः प्रणम्य तम् । द्विजाः स दिव्यया गत्या देवराजान्तिकं ययौ ॥२८
भगवानप्यथोत्पातान्दिव्यान्भौमान्तरिक्षगान् । ददर्श द्वारकापुर्यां विनाशाय दिवानिशम् ॥२९
तान्दृष्ट्वा यादवानाह पश्यध्वमतिदारुणान् । महोत्पाताञ्शमायैषां प्रभासं याम मा चिरम् ॥३०

व्यास उवाच—

महाभागवतः प्राह प्रणिपत्योद्धवो हरिम् ॥ ३१

उद्धव उवाच—

भगवंन्यन्मया कार्यं तदाज्ञापय सांप्रतम् । मन्ये कुलमिदं सर्वं भगवान्संहरिष्यति ॥
नाशायास्य निमित्तानि कुलस्याच्युत लक्षये ॥ ३२

श्रीभगवानुवाच—

गच्छ त्वं दिव्यया गत्या मत्प्रसादसमुत्थया । बदरीमाश्रमं पुण्यं गन्धमादनपर्वते ॥ ३३
नरनारायणस्थाने पवित्रितमहीतले । मन्मना मत्प्रसादेन तत्र सिद्धिमवाप्स्यसि ॥ ३४
अहं स्वर्गं गमिष्यामि उपसंहृत्य वै कुलम् । द्वारकां च मया त्यक्तां समुद्रः प्लावयिष्यति ॥ ३५

व्यास उवाच—

इत्युक्तः प्रणिपत्यैनं जगाम स तदोद्धवः । नरनारायणस्थानं केशवे[9]नानुमोदितः ॥ ३६
ततस्ते यादवाः सर्वे[10] रथानारुह्य शीघ्रगान् । प्रभासं प्रययुः सार्धं कृष्णरामादिभिर्द्विजाः ॥ ३७
प्राप्य प्रभासं प्रयता प्रीतास्ते कुकुरान्धकाः । चक्रुस्तत्र[11] सुरापानं वासुदेवानुमोदिताः ॥ ३८
पिबतां तत्र वै तेषां संघर्षेण परस्परम् । यादवानां ततो जज्ञे कलहाग्निः क्षयावहः ॥ ३९
जघ्नुः परस्परं ते तु शस्त्रैर्दैवबलात्कृताः । क्षीणशस्त्रास्तु जगृहुः प्रत्यासन्नामथैरकाम् ॥ ४०
एरका तु गृहीता तैर्वज्रभूतेव लक्ष्यते । तया परस्परं जघ्नुः संप्रहारैः सुदारुणैः ॥ ४१
प्रद्युम्नसाम्बप्रमुखाः कृतवर्माऽथ सात्यकिः । अनिरुद्धादयश्चान्ये पृथुर्विपृथुरेव च ॥ ४२
चारुवर्मा[12] सुचारुश्च[13] तथाऽक्रूरादयो द्विजाः । एरकारूपिभिर्वज्रैस्ते निजघ्नुः परस्परम् ॥ ४३
निवारयामास हरिर्यादवास्ते च केशवम् । सहायं मेनिरे प्राप्तं ते निजघ्नुः परस्परम् ॥ ४४
कृष्णोऽपि कुपितस्तेषामेरकामुष्टिमाददे । वधार्थं[14] तेषां मुशलं मुष्टिलोहमभूत्तदा ॥ ४५
जघान तेन निःशेषा[15]नाततायी स यादवान् । जघ्नुश्च सहसाऽभ्येत्य तथाऽन्ये तु परस्परम् ॥४६
ततश्चार्णवमध्येन जैत्रोऽसौ चक्रिणो रथः । पश्यतो दारुकस्याऽऽशु[16] हृतोऽश्वैर्द्विजसत्तमाः ॥ ४७

---

१ ख. ग. नाद्यापि भा° । २ क. °रतिब° । ३ ग. °निवाहितैः । ४ ग. °रकाभुवम् । या° । ५ ग. °भ्यः कुमारोऽपि य° । ६ ख. °दूनामवर्धा° । ७ ग. °नां नापचीयते । त° । ८ क. °वन्कि मया । ९ ख. °वेन तु चोदि° । १० क. °र्वे ह्याना° । ११ ख. ग. °त्र मुदा पा° । १२ ग. °रुधर्मा । १३ ग. चारुकश्च । १४ क. °य सा तु मु° । ग. °य सोऽपि । मु° । १५ क. °षाञ्ज्ञातिवर्गान्स या° । १६ ख. °शु ततः स्वर्गं द्विजोत्त° ।

चक्रं गदा तथा शार्ङ्गं तूणौ शङ्खोऽसिरेव च । प्रदक्षिणं ततः कृत्वा जग्मुरादित्यवर्त्मना ॥ ४८
क्षणमात्रेण वै तत्र यादवानामभूत्क्षयः । ऋते कृष्णं महाबाहुं दारुकं च द्विजोत्तमाः ॥ ४९
चङ्क्रम्यमाणौ तौ रामं वृक्षमूलकृतासनम् । ददृशाते मुखाच्चास्य निष्क्रामन्तं महोरगम् ॥ ५०
निष्क्रम्य स मुखात्तस्य महाभोगो भुजंगमः । प्रयातश्चार्णवं सिद्धैः पूज्यमानस्तथोरगैः ॥ ५१
तमर्घ्यमादाय तदा जलधिः संमुखं ययौ । प्रविवेश च तत्तोयं पूजितः पन्नगोत्तमैः ॥
दृष्ट्वा बलस्य निर्याणं दारुकं प्राह केशवः ॥ ५२

श्रीभगवानुवाच—

इदं सर्वं त्वमाचक्ष्व वसुदेवोग्रसेनयोः । निर्याणं बलदेवस्य यादवानां तथा क्षयम् ॥ ५३
योगे स्थित्वाऽहमप्येतत्परित्यज्य कलेवरम् । वाच्यश्च द्वारकावासी जनः सर्वस्तथाऽऽहुकः ॥ ५४
यथेमां नगरीं सर्वां समुद्रः प्लावयिष्यति । तस्माद्रथैः सुसज्जैस्तु प्रतीक्ष्यो ह्यर्जुनागमः ॥ ५५
न स्थेयं द्वारकामध्ये निष्क्रान्ते तत्र पाण्डवे । तेनैव सह गन्तव्यं यत्र याति स कौरवः ॥ ५६
गत्वा च ब्रूहि कौन्तेयमर्जुनं वचनं मम । पालनीयस्त्वया शक्त्या जनोऽयं मत्परिग्रहः ॥ ५७
इत्यर्जुनेन सहितो द्वारवत्यां भवाञ्जनम् । गृहीत्वा यातु वज्रश्च यदुराजो भविष्यति ॥ ५८

इति श्रीमहापुराणे आदिब्राह्मे श्रीकृष्णचरिते श्रीकृष्णनिजधामगमननिरूपणं नाम दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०८०७

अथैकादशाधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

इत्युक्तो दारुकः कृष्णं प्रणिपत्य पुनः पुनः । प्रदक्षिणं च बहुशः कृत्वा प्रायाद्यथोदितम् ॥ १
स च गत्वा तथा चक्रे द्वारकायां तथाऽर्जुनम् । आनिनाय महाबुद्धिं वज्रं चक्रे तथा नृपम् ॥ २
भगवानपि गोविन्दो वासुदेवात्मकं परम् । ब्रह्मात्मनि समारोप्य सर्वभूतेष्वधारयत् ॥ ३
स मानयन्द्विजवचो दुर्वासा यदुवाच ह । योगयुक्तोऽभवत्पादं कृत्वा जानुनि सत्तमाः ॥ ४
संप्राप्तो वै जरा नाम तदा तत्र स लुब्धकः । मुशलशेषलोहस्य सायकं धारयन्परम् ॥ ५
स तत्पादं मृगाकारं संमवेक्ष्य व्यवस्थितः । ततो विव्याध तेनैव तोमरेण द्विजोत्तमाः ॥ ६
गतश्च ददृशे तत्र चतुर्बाहुधरं नरम् । प्रणिपत्याऽऽह चैवैनं प्रसीदेति पुनः पुनः ॥ ७
अजानता कृतमिदं मया हरिणशङ्कया । क्षम्यतामात्मपापेन दग्धं मा दग्धुमर्हसि ॥ ८

व्यास उवाच—

ततस्तं भगवानाह नास्ति ते भयमण्वपि । गच्छ त्वं मत्प्रसादेन लुब्ध स्वर्गेश्वरास्पदम् ॥ ९

व्यास उवाच—

विमानमागतं सद्यस्तद्वाक्यसमनन्तरम् । आरुह्य प्रययौ स्वर्गं लुब्धकस्तत्प्रसादतः ॥ १०

---

१ ख. °मानो महोर° । २ क. भव क्षणम् । गृ° । ३ क. वज्रं च । ग. बभ्रुश्च । ४ ख. °ष्वकार° । ५ ख. °त् । चकार भगवान्सर्वं दु° । ६ क. °लोहेन सा° । ग. °लोहैकशा° । ७ क. ग. °यकन्यस्ततोमरः । स । ८ ख. °क्ष्य ह्यव° । ९ क. ग. तले । १० ख. हरिम् ११ ख. °ब्धं सर्वामरास्प° ।

गते तस्मिन्स भगवान्संयोज्याऽऽत्मानमात्मनि । ब्रह्मभूतेऽव्ययेऽचिन्त्ये वासुदेवमयेऽमले ॥११
अजन्मन्यजरेऽनाशिन्यप्रमेयेऽखिलात्मनि । त्यक्त्वा स मानुषं देहमवाप त्रिविधां गतिम् ॥ १२

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे श्रीकृष्णचरिते कृष्णमानुषोत्सर्गकथनं नामैकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०८१९

अथ द्वादशाधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

अर्जुनोऽपि तदाऽन्विष्य कृष्णरामकलेवरे । संस्कारं लम्भयामास तथाऽन्येषामनुक्रमात् ॥ १
अष्टौ महिष्यः कथिता रुक्मिणीप्रमुखास्तु याः । उपगृह्य हरेर्देहं विविशुस्ता हुताशनम् ॥ २
रेवती चैव रामस्य देहमाश्लिष्य सत्तमाः । विवेश ज्वलितं वह्निं तत्सङ्गाह्लादशीतलम् ॥ ३
उग्रसेनस्तु तच्छ्रुत्वा तथैवाऽऽनकदुन्दुभिः । देवकी रोहिणी चैव विविशुर्जातवेदसम् ॥ ४
ततोऽर्जुनः प्रेतकार्यं कृत्वा तेषां यथाविधि । निश्चक्राम जनं सर्वं गृहीत्वा वज्रमेव च ॥ ५
द्वारवत्या विनिष्क्रान्ताः कृष्णपत्न्यः सहस्रशः । वज्रं जनं च कौन्तेयः पालयञ्शनकैर्ययौ ॥ ६
सभा सुधर्मा कृष्णेन मर्त्यलोके समाहृता । स्वर्गं जगाम भो विप्राः पारिजातश्च पादपः ॥ ७
यस्मिन्दिने हरिर्यातो दिवं संत्यज्य मेदिनीम् । तस्मिन्दिनेऽवतीर्णोऽयं कालकायः कलिः किल
प्लावयामास तां शून्यां द्वारकां च महोदधिः । यदुश्रेष्ठगृहं त्वेकं नाऽऽप्लावयत सागरः ॥ ९
नातिक्रामति भो विप्रास्तदद्यापि महोदधिः । नित्यं संनिहितस्तत्र भगवान्केशवो यतः ॥ १०
तदतीव महापुण्यं सर्वपातकनाशनम् । विष्णुक्रीडान्वितं स्थानं दृष्ट्वा पापात्प्रमुच्यते ॥ ११
पार्थः पञ्चनदे देशे बहुधान्यधनान्विते । चकार वासं सर्वस्य जनस्य मुनिसत्तमाः ॥ १२
ततो लोभः समभवत्पार्थेनैकेन धन्विना । दृष्ट्वा स्त्रियो नीयमाना दस्यूनां निहतेश्वराः ॥ १३
ततस्ते पापकर्माणो लोभोपहतचेतसः । आभीरा मन्त्रयामासुः समेत्यात्यन्तदुर्मदाः ॥ १४

आभीरा ऊचुः—

अयमेकोऽर्जुनो धन्वी स्त्रीजनं निहतेश्वरम् । नयत्यस्मानतिक्रम्य धिगेतत्क्रियतां बलम् ॥ १५
हत्वा गर्वसमारूढो भीष्मद्रोणजयद्रथान् । कर्णादींश्च न जानाति बलं ग्रामनिवासिनाम् ॥ १६
बलज्येष्ठान्नरानन्यान्ग्राम्यांश्चैव विशेषतः । सर्वानेवावजानाति किं वो बहुभिरुत्तरैः ॥ १७

व्यास उवाच—

ततो यष्टिप्रहरणा दस्यवो लोष्टहारिणः । सहस्रशोऽभ्यधावन्त तं जनं निहतेश्वरम् ॥
ततो निवृत्तः कौन्तेयः प्राहाऽऽभीरान्हसन्निव ॥ १८

अर्जुन उवाच—

निवर्तध्वमधर्मज्ञा यदीतो न मुमूर्षवः ॥ १९

---

१ क. त्रिदशां । ख. त्रिदिवं । २ क. पार्थश्च विजनोद्देशे । ख. पार्थश्च सुखदे । ३ ख. ग. °म् । १६ । देहयष्टिं महायासाद्गृहीत्वाऽयं सुदुर्मतिः । स°।

व्यास उवाच—

अवज्ञाय वचस्तस्य जगृहुस्ते तदा धनम् । स्त्रीजनं चापि कौन्तेयाद्विष्वक्सेनपरिग्रहम् ॥ २०
ततोऽर्जुनो धनुर्दिव्यं गाण्डीवमजरं युधि । आरोपयितुमारेभे न शशाक स वीर्यवान् ॥ २१
चकार सज्जं कृच्छ्रात्तु तदभूच्छिथिलं पुनः । न सस्मार तथाऽस्त्राणि चिन्तयन्नपि पाण्डवः २२
शरान्मुमोच चैतेषु पार्थः शेषान्स हर्षितः । न भेदं ते परं चक्रुरस्ता गाण्डीवधन्वना ॥ २३
वह्निना चाक्षया दत्ताः शरास्तेऽपि क्षयं ययुः । युध्यतः सह गोपालैरर्जुनस्याभवत्क्षयः ॥ २४
अचिन्तयत्तु कौन्तेयः कृष्णस्यैव हि तद्बलम् । यन्मया शरसंघातैः सबला भूभृतो जिताः ॥२५
मिषतः पाण्डुपुत्रस्य ततस्ताः प्रमदोत्तमाः । अपाकृष्यन्त चाऽऽभीरैः[1] कामाच्चान्याः प्रवव्रजुः २६
ततः शरेषु क्षीणेषु धनुष्कोट्या धनंजयः । जघान दस्यूंस्ते चास्य प्रहाराञ्जहसुर्द्विजाः ॥ २७
पश्यतस्त्वेव पार्थस्य वृष्ण्यन्धकवरस्त्रियः । जग्मुरादाय ते म्लेच्छाः समन्तान्[2]मुनिसत्तमाः ॥ २८
ततः स दुःखितो जिष्णुः कष्टं कष्टमिति ब्रुवन् । अहो भगवता तेन मुक्तोऽस्मीति रुरोद वै[3] २९

अर्जुन उवाच—

तद्धनुस्तानि चास्त्राणि स रथस्ते च वाजिनः । सर्वमेकपदे नष्टं[4] दानमश्रोत्रिये यथा ॥ ३०
अहो[5] चाति बलं दैवं विना तेन महात्मना । यदसामर्थ्ययुक्तो[6]ऽहं नीचैर्नीतः पराभवम् ॥ ३१
तौ बाहू स च मे मुष्टिः[7] स्थानं तत्सोऽस्मि चार्जुनः । पुण्येनेव विना तेन गतं सर्वमसारताम् ॥
ममार्जुनत्वं भीमस्य भीमत्वं तत्कृतं ध्रुवम् । विना तेन यदाभीरैर्जितोऽहं कथमन्यथा ॥ ३३

व्यास उवाच—

इत्थं वदन्ययौ जिष्णुरिन्द्रप्रस्थं पुरोत्तमम् । चकार तत्र राजानं वज्रं यादवनन्दनम् ॥ ३४
स ददर्श ततो व्यासं फाल्गुनः काननाश्रयम् । तमुपेत्य महाभागं[8] विनयेनाभ्यवादयत् ॥ ३५
तं[9] वन्दमानं चरणाववलोक्य सुनिश्चितम् । उवाच पार्थं विच्छायः कथमत्यन्तमीदृशः[10] ॥ ३६
अजारजोनुगमनं ब्रह्महत्याऽथवा कृता । जयाशाभङ्गदुःखी वा भ्रष्टच्छायोऽसि सांप्रतम् ॥ ३७
सान्तानिकादयो वा ते याचमाना निराकृताः । अगम्यस्त्रीरतिर्वाऽपि तेनासि विगतप्रभः ॥३८
भुङ्क्ते प्रदाय विप्रेभ्यो मिष्टमेकमथो भवान् । किं वा कृपणवित्तानि हृतानि भवताऽर्जुन ॥ ३९
कच्चिन्न सूर्यवातस्य गोचरत्वं गतोऽर्जुन । दुष्टचक्षुर्हतो वाऽपि निःश्रीकः कथमन्यथा ॥ ४०
स्पृष्टो नखाम्भसा वाऽपि घटाम्भःप्रोक्षितोऽपि वा । तेनातीवासि विच्छायो[11] न्यूनैर्वा युधि निर्जितः

व्यास उवाच—

ततः पार्थो विनिःश्वस्य श्रूयतां भगवन्निति । प्रोक्तो यथावदाचष्ट विप्रौ[12] आत्मपराभवम् ॥ ४२

अर्जुन उवाच—

यद्बलं यच्च नस्तेजो यद्वीर्यं यत्पराक्रमः । या श्रीश्छाया च नः सोऽस्मान्परित्यज्य हरिर्गतः ॥
इतरेणेव महता स्मितपूर्वाभिभाषिणा । हीना वयं मुने तेन जातास्तृणमया इव ॥ ४४
अस्त्राणां सायकानां च गाण्डीवस्य तथा मम । सारता याऽभवन्मूर्ता स गतः पुरुषोत्तमः ॥४५

---

१ क. °भीरैस्ते शराः प्रययुः क्षयम् । त° । २ क. °मस्ता मुनि° । ३ ख. ह । ४ क. भ्रष्टं । ५ ख. ग. °ह्रोऽतिबलश्चैवं । ६ ख ग. °युक्तेऽपि नीचवर्गे जयप्रदम् । ७ क° °ष्टिः सोऽस्मि चाहं तथाऽर्जु° । ८ ग. °भागो वि° । ९ ग. तं दृष्ट्वा वै मुनिश्रेष्ठाः पृष्टवानहमर्जुनम् । अहो विपार्थ वि° । १० ख. °शः । नुजरजोऽभ° । ग. °शः । कृतं राजानु° । ११ क. ख. °यो नीचैर्वा । १२ क. ख. °प्रायाऽऽऽत्म° ।

यस्यावलोकनादस्माञ्छ्रीर्जयः संपदुन्नतिः । न तत्याज स गोविन्दस्त्यक्त्वाऽस्मान्भगवान्गतः॥
भीष्मद्रोणाङ्गराजाद्यास्तथा दुर्योधनादयः । यत्प्रभावेन निर्दग्धाः स कृष्णस्त्यक्तवान्भुवम् ४७
निर्यौवना हतश्रीका भ्रष्टच्छायेव मे मही । विभाति तात नैकोऽहं विरहे तस्य चक्रिणः ॥ ४८
यस्यानुभावाद्भीष्माद्यैर्मय्यग्नौ शलभायितम् । विना तेनाद्य कृष्णेन गोपालैरस्मि निर्जितः ॥४९
गाण्डीवं त्रिषु लोकेषु ख्यातं यदनुभावतः । मम तेन विनाऽऽभीरैर्लगुडैस्तु तिरस्कृतम् ॥ ५०
स्त्रीसहस्राण्यनेकानि ह्यनाथानि महामुने । यततो मम नीतानि दस्युभिर्लगुडायुधैः ॥ ५१
आनीयमानमाभीरैः सर्वं कृष्णावरोधनम् । हृतं यष्टिप्रहरणैः परिभूय बलं मम ॥ ५२
निःश्रीकता न मे चित्रं यज्जीवामि तदद्भुतम्[1] । नीचावमानपङ्काङ्की निर्लज्जोऽस्मि पितामह॥५३

व्यास उवाच—

श्रुत्वाऽहं तस्य तद्वाक्यमब्रवं द्विजसत्तमाः । दुःखितस्य च दीनस्य पाण्डवस्य महात्मनः ॥ ५४
अलं ते व्रीडया पार्थ न त्वं शोचितुमर्हसि । अवेहि[2] सर्वभूतेषु कालस्य गतिरीदृशी ॥ ५५
कालो भवाय भूतानामभवाय च पाण्डव । कालमूलमिदं ज्ञात्वा कुरु स्थैर्यमतोऽर्जुन ॥ ५६
नद्यः समुद्रा गिरयः[3] सकला च वसुंधरा । देवा मनुष्याः पशवस्तरवश्च सरीसृपाः ॥ ५७
सृष्टाः कालेन कालेन पुनर्यास्यन्ति संक्षयम् । कालात्मकमिदं सर्वं ज्ञात्वा शममवाप्नुहि ॥ ५८
यथाऽऽत्थ कृष्णमाहात्म्यं तत्तथैव धनंजय । भारावतारकार्यार्थमवतीर्णः स मेदिनीम् ॥ ५९
भाराक्रान्ता धरा याता देवानां संनिधौ पुरा । तदर्थमवतीर्णोऽसौ कामरूपी जनार्दनः ॥ ६०
तच्च निष्पादितं कार्यमशेषा भूभृतो हताः । वृष्ण्यन्धककुलं सर्वं तथा पार्थोपसंहृतम् ॥ ६१
न किंचिदन्यत्कर्तव्यमस्य भूमितलेऽर्जुन । ततो गतः स भगवान्कृतकृत्यो यथेच्छया ॥ ६२
सृष्टिं सर्गे करोत्येष देवदेवः स्थितिं स्थितौ । अन्ते[4] ताप(लयं) समर्थोऽयं सांप्रतं वै यथा कृतम्
तस्मात्पार्थ न संतापस्त्वया कार्यः पराभवात्[5] । भवन्ति भवकालेषु पुरुषाणां पराक्रमाः ॥ ६४
यतस्त्वयैकेन हता भीष्मद्रोणादयो नृपाः । तेषामर्जुन कालोत्थः किं न्यूनाभिभवो न सः ॥६५
विष्णोस्तस्यानुभावेन यथा तेषां पराभवः । त्वत्तस्तथैव भवतो दस्युभ्योऽन्ते तदुद्भवः ॥ ६६
स देवोऽन्यशरीराणि समाविश्य जगत्स्थितिम् । करोति सर्वभूतानां नाशं चान्ते जगत्पतिः ६७
भवोद्भवे च कौन्तेय सहायस्ते जनार्दनः । भवान्ते त्वद्विपक्षास्ते केशवेनावलोकिताः ॥ ६८
कः श्रद्दध्यात्सगाङ्गेयान्हन्यास्त्वं सर्वकौरवान् । आभीरेभ्यश्च भवतः कः श्रद्दध्यात्पराभवम् ६९
पार्थैतत्सर्वभूतेषु हरेर्लीलाविचेष्टितम् । त्वया यत्कौरवा ध्वस्ता यदाभीरैर्भवाञ्जितः ॥ ७०
गृहीता दस्युभिर्यच्च रक्षिता भवता स्त्रियः । तदप्यहं यथावृत्तं कथयामि तवार्जुन ॥ ७१
अष्टावक्रः पुरा विप्र उदवासरतोऽभवत् । बहून्वर्षगणान्पार्थ गृणन्ब्रह्म सनातनम् ॥ ७२
जितेष्वसुरसंघेषु मेरुपृष्ठे महोत्सवः । बभूव तत्र गच्छन्त्यो ददृशुस्तं सुरस्त्रियः ॥ ७३
रम्भा तिलोत्तमाद्याश्च शतशोऽथ सहस्रशः । तुष्टुवुस्तं महात्मनं प्रशशंसुश्च[6] पाण्डव ॥ ७४
आकण्ठमग्नं[7] सलिले जटाभारधरं[8] मुनिम् । विनयावनताश्चैव प्रणेमुः स्तोत्रतत्पराः ॥ ७५
यथा यथा प्रसन्नोऽभूत्तुष्टुवुस्तं तथा तथा । सर्वास्ताः कौरवश्रेष्ठ वरिष्ठं तं द्विजन्मनाम् ॥ ७६

---

१ क. °म् । एकाकी जीवमानस्तु नि° । २ ख. ग. अवैहि । ३ क. मुनयः । ४ क. °न्ते तां च समाप्याथ सां° । ख. °न्ते च ह्यस° । ५ ख. °भवे । भ° । ६ ख. प्रसन्नमुखपङ्कजम् । आ° । ७ क. °कर्णम° । ८ क. ख. °टाचीर° ।

अष्टावक्र उवाच—

प्रसन्नोऽहं महाभागा भवतीनां यदिष्यते। मत्तस्तद्व्रियतां सर्वं प्रदास्याम्यपि दुर्लभम् ॥ ७७

व्यास उवाच—

रम्भातिलोत्तमाद्याश्च[1] दिव्याश्चाप्सरसोऽब्रुवन् ॥ ७८

अप्सरस ऊचुः—

प्रसन्ने त्वय्यसंप्राप्तं किमस्माकमिति [2]द्विजाः ॥ ७९

इतरास्त्वब्रुवन्विप्र प्रसन्नो भगवन्यदि। तदिच्छामः पतिं प्राप्तुं विप्रेन्द्र पुरुषोत्तमम् ॥ ८०

व्यास उवाच—

एवं भविष्यतीत्युक्त्वा उत्ततार जलान्मुनिः। तमुत्तीर्णं च ददृशुर्विरूपं वक्रमष्टधा ॥ ८१

तं दृष्ट्वा गूहमानानां यासां हासः स्फुटोऽभवत्। ताः शशाप मुनिः कोपमवाप्य कुरुनन्दन ८२

अष्टावक्र उवाच—

यस्माद्विरूपरूपं मां मत्वा हासावमानना। भवतीभिः कृता तस्मादेष शापं ददामि वः ॥ ८३

मत्प्रसादेन भर्तारं लब्ध्वा तु पुरुषोत्तमम्। मच्छापोपहताः सर्वा दस्युहस्तं गमिष्यथ ॥ ८४

व्यास उवाच—

इत्युदीरितमाकर्ण्य मुनिस्ताभिः प्रसादितः। पुनः सुरेन्द्रलोकं वै प्राह भूयो गमिष्यथ ॥ ८५

एवं तस्य मुनेः शापादष्टावक्रस्य केशवम्। भर्तारं प्राप्य ताः प्राप्ता दस्युहस्तं वराङ्गनाः ॥ ८६

तत्त्वया नात्र कर्तव्यः शोकोऽल्पोऽपि हि पाण्डव। तेनै[3]वाखिलनाथेन सर्वं तदुपसंहृतम् ॥ ८७

भवतां चोपसंहारमासन्नं तेन कुर्वता। बलं तेजस्तथा वीर्यं माहात्म्यं चोपसंहृतम् ॥ ८८

जातस्य नियतो मृत्युः पतनं च तथोन्नतेः। विप्रयोगावसानं तु संयोगः [4]संचयः क्ष(यात्क्ष)यः

विज्ञाय न बुधाः शोकं न हर्षमुपयान्ति ये। तेषामेवेतरे चेष्टां शिक्षन्तः सन्ति तादृशाः ॥ ९०

तस्मात्त्वया नरश्रेष्ठ ज्ञात्वैतद्भ्रातृभिः सह। परित्यज्याखिलं राज्यं गन्तव्यं तपसे वनम् ॥ ९१

तद्गच्छ धर्मराजाय निवेद्यैतद्वचो मम। परश्वो भ्रातृभिः सार्धं गतिं वीर यथा कुरु ॥ ९२

व्यास उवाच—

इत्युक्तो धर्मराजं तु समभ्येत्य तथोक्तवान्। दृष्टं चैवानुभूतं वा कथितं तदशेषतः[5] ॥ ९३

व्यासवाक्यं च ते सर्वे श्रुत्वाऽर्जुनसमीरितम्। राज्ये परीक्षितं कृत्वा ययुः पाण्डुसुता वनम् ॥

इत्येवं वो मुनिश्रेष्ठा विस्तरेण मयोदितम्। जातस्य च यदोर्वंशे वासुदेवस्य चेष्टितम् ॥ ९५

इति श्रीमहापुराणे आदिब्राह्मे श्रीकृष्णचरितसमाप्तिकथनं नाम द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१०९१४

अथ त्रयोदशाधिकद्विशततमोऽध्यायः।

मुनय ऊचुः—

अहो कृष्णस्य माहात्म्यमद्भुतं चातिमानुषम्। रामस्य च मुनिश्रेष्ठ त्वयोक्तं भुवि दुर्लभम् ॥ १

---

१ क. ग. °श्च नैदिक्योऽप्स°। २ ख. ग. द्विज। ३ ख. तेनाखिलनाशेन। ४ क. संभवक्ष°। ५ ग. °तः। मम वा°।

न तृप्तिमधिगच्छामः शृण्वन्तो भगवत्कथाम् । तस्माद्ब्रूहि महाभाग भूयो देवस्य चेष्टितम् ॥ २
प्रादुर्भावः पुराणेषु विष्णोरमिततेजसः । सतां कथयतामेव वराह इति नः श्रुतम् ॥ ३
न जानीमोऽस्य चरितं न विधिं न च विस्तरम् । न कर्मगुणसद्भावं न हेतुत्वमनीषितम् ॥ ४
किमात्मको वराहोऽसौ का मूर्तिः का च देवता । किमाचारप्रभावो वा किंवा तेन तदा कृतम्॥
यज्ञार्थे समवेतानां मिषतां च द्विजन्मनाम् । महावराहचरितं सर्वलोकसुखावहम् ॥ ६
यथा नारायणो ब्रह्मन्वाराहं रूपमास्थितः । दंष्ट्रया गां समुद्रस्थामुज्जहारारिमर्दनः ॥ ७
विस्तरेणैव कर्माणि सर्वाणि रिपुघातिनः । श्रोतुं नो वर्तते बुद्धिर्हरेः कृष्णस्य धीमतः ॥ ८
कर्मणामानुपूर्व्या च प्रादुर्भावाश्च ये विभो । या वाऽस्य प्रकृतिर्ब्रह्मंस्ताश्चाऽऽख्यातुं त्वमर्हसि ॥

व्यास उवाच—

प्रश्नभारो महानेष भवद्भिः समुदाहृतः । यथाशक्त्या तु वक्ष्यामि श्रूयतां वैष्णवं यशः ॥ १०
विष्णोः प्रभावश्रवणे दिष्ट्या वो मतिरुत्थिता । तस्माद्विष्णोः समस्ता वै शृणुध्वं याः प्रवृत्तयः
सहस्रास्यं सहस्राक्षं सहस्रचरणं च यम् । सशस्रशिरसं देवं सहस्रकरमव्ययम् ॥ १२
सहस्रजिह्वं भास्वन्तं सहस्रमुकुटं प्रभुम् । सहस्रदं सहस्रादिं सहस्रभुजमव्ययम् ॥ १३
हवनं सवनं चैव होतारं हव्यमेव च । पात्राणि च पवित्राणि वेदिं दीक्षां समित्स्रुवम् ॥ १४
स्रुक्सोमसूर्यमुशलं प्रोक्षणीं दक्षिणायनम् । अध्वर्युं सामगं विप्रं सदस्यं सदनं सदः ॥ १५
यूपं चक्रं[1] ध्रुवां दर्वीं चरूंश्चोलूखलानि च । प्राग्वंशं यज्ञभूमिं च होतारं च परं च यत् ॥ १६
ह्रस्वाण्यतिप्रमाणानि स्थावराणि चराणि च । प्रायश्चित्तानि वाऽर्घ्यं च स्थण्डिलानि कुशास्तथा
मन्त्रै[2]र्यज्ञवहं वह्निं भागं भागवहं च यत् । अग्रासिनं[3] सोमभुजं हुतार्चिषमुदायुधम् ॥ १८
आहुर्वेदविदो विप्रा यं यज्ञे शाश्वतं प्रभुम् । तस्य विष्णोः सुरेशस्य श्रीवत्साङ्कस्य धीमतः ॥
प्रादुर्भावसहस्राणि समतीतान्यनेकशः । भूयश्चैव भविष्यन्ति ह्येवमाह पितामहः ॥ २०
यत्पृच्छध्वं महाभागा दिव्यां पुण्यामिमां कथाम् । प्रादुर्भावाश्रितां विष्णोः सर्वपापहरां शिवाम्
शृणुध्वं तां महाभागास्तद्गतेनान्तरात्मना । प्रवक्ष्याम्यानुपूर्व्येण यत्पृच्छ[4]ध्वं ममानघाः ॥ २२
वासुदेवस्य माहात्म्यं चरितं च महामतेः । हितार्थं सुरमर्त्यानां लोकानां प्रभवाय च ॥ २३
बहुशः सर्वभूतात्मा प्रादुर्भवति वीर्यवान्[5] । प्रादुर्भावांश्च वक्ष्यामि[6] पुण्यान्दिव्यान्गुणान्वितान् २४
सुप्तो युगसहस्रं यः प्रादुर्भवति कार्यतः[7] । पर्णे युगसहस्रेऽथ देवदेवो जगत्पतिः ॥ २५
ब्रह्मा च कपिलश्चैव त्र्यम्बकस्त्रिदशास्तथा । देवाः सप्तर्षयश्चैव नागाश्चाप्सरसस्तथा ॥ २६
सनत्कुमारश्च महानुभावो मनुर्महात्मा भगवान्प्रजाकरः[8] ।
पुराणदेवोऽथ पुराणि चक्रे[9] प्रदीप्तवैश्वानरतुल्यतेजाः ॥ २७
योऽसौ चार्णवमध्यस्थो नष्टे स्थावरजङ्गमे । नष्टे देवासुरनरे प्रनष्टोरगराक्षसे ॥ २८
योद्धुकामौ दुराधर्षौ तावुभौ मधुकैटभौ । हतौ[10] भगवता[11] तेन तयोर्दत्त्वा[12]ऽमितं वरम् ॥ २९
पुरा कमलनाभस्य स्वपतः सागराम्भसि । पुष्करे तत्र[13] संभूता देवाः सर्षिगणास्तथा ॥ ३०

---

१ क. ध्रुवं । २ क. °यज्ञं बहिर्यज्ञं भा° । ३ क. अग्राशिनं । ४ क. °ध्वं मुनीश्वराः । वा° । ५ ग. कार्यवान् । ६ क. °मि असंख्येयगुणा° । ७ क. ख. वीर्यवान् । ८ क. °न्प्रभाक° । ९ क. °क्रे राष्ट्राणि वै° । १० ग. °तौ प्रभव° । ११ ग. °ताऽनेन । १२ क. °त्त्वा वरं ततः । पु° । १३ ग. यत्र ।

एष पौष्करको नाम प्रादुर्भावो महात्मनः । पुराणं कथ्यते यत्र देवश्रुतिसमाहितम् ॥ ३१
वाराहस्तु श्रुतिमुखः प्रादुर्भावो महात्मनः । यत्र विष्णुः सुरश्रेष्ठो वाराहं रूपमास्थितः ॥ ३२
वेदपादो यूपदंष्ट्रः क्रतुदन्तश्चितीमुखः । अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः ॥ ३३
अहोरात्रेक्षणो दिव्यो वेदाङ्गः श्रुतिभूषणः । आज्यनासः स्रुवतुण्डः सामघोषस्वरो महान् ॥ ३४
सत्यधर्ममयः श्रीमान्क्रमविक्रमसत्कृतः । प्रायश्चित्तनखो घोरः पशुजानुर्मुखाकृतिः ॥ ३५
उद्गतात्रो होमलिङ्गो बीजौषधिमहाफलः । वाद्यन्तरात्मा मन्त्रस्फिग्विकृतः सोमशोणितः ॥ ३६
वेदिस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् । प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरन्वितः ॥ ३७
दक्षिणाहृदयो योगी महासत्रमयो महान् । उपाकर्माष्टरुचकः प्रवर्ग्यावर्तभूषणः ॥ ३८
नानाच्छन्दोगतिपथो गुह्योपनिषदासनः । छायापत्नीसहायोऽसौ मणिशृङ्ग इवोत्थितः ॥ ३९
महीं सागरपर्यन्तां सशैलवनकाननाम् । एकार्णवजलभ्रष्टामेकार्णवगतः प्रभुः ॥ ४०
दंष्ट्रया यः समुद्धृत्य लोकानां हितकाम्यया । सहस्रशीर्षो लोकादिश्चकार जगतीं पुनः ॥ ४१
एवं यज्ञवराहेण भूत्वा भूतहितार्थिना । उद्धृता पृथिवी देवी सागराम्बुधरा पुरा ॥ ४२
वाराह एष कथितो नारसिंहस्ततो द्विजाः । यत्र भूत्वा मृगेन्द्रेण हिरण्यकशिपुर्हतः ॥ ४३
पुरा कृतयुगे नाम सुरारिर्बलदर्पितः । दैत्यानामादिपुरुषश्चकार सुमहत्तपः ॥ ४४
दश वर्षसहस्राणि शतानि दश पञ्च च । जपोपवासनिरतस्तस्थौ मौनव्रतस्थितः ॥ ४५
ततः शमदमाभ्यां च ब्रह्मचर्येण चैव हि । प्रीतोऽभवत्ततस्तस्य तपसा नियमेन च ॥ ४६
तं वै स्वयंभूर्भगवान्स्वयमागम्य भो द्विजाः । विमानेनार्कवर्णेन हंसयुक्तेन भास्वता ॥ ४७
आदित्यैर्वसुभिः सार्धं मरुद्भिर्दैवतैस्तथा । रुद्रैर्विश्वसहायैश्च यक्षराक्षसकिंनरैः ॥ ४८
दिशाभिः प्रदिशाभिश्च नदीभिः सागरैस्तथा । नक्षत्रैश्च मुहूर्तैश्च खेचरैश्च महाग्रहैः ॥ ४९
देवर्षिभिस्तपोवृद्धैः सिद्धैर्विद्वद्भिरेव च । राजर्षिभिः पुण्यतमैर्गन्धर्वैरप्सरोगणैः ॥ ५०
चराचरगुरुः श्रीमान्वृतः सर्वैः सुरैस्तथा । ब्रह्मा ब्रह्मविदां श्रेष्ठो दैत्यं वचनमब्रवीत् ॥ ५१

ब्रह्मोवाच—

प्रीतोऽस्मि तव भक्तस्य तपसाऽनेन सुव्रत । वरं वरय भद्रं ते यथेष्टं काममाप्नुहि ॥ ५२

हिरण्यकशिपुरुवाच—

न देवासुरगन्धर्वा न यक्षोरगराक्षसाः । ऋषयो वाऽथ मां शापैः क्रुद्धा लोकपितामह ॥ ५३
शपेयुस्तपसा युक्ता वर एष वृतो मया । न शस्त्रेण न वाऽस्त्रेण गिरिणा पादपेन वा ॥ ५४
न शुष्केण न चाऽऽर्द्रेण न चैवोर्ध्वं न चाप्यधः । पाणिप्रहारेणैकेन स भृत्यबलवाहनम् ॥ ५५
यो मां नाशयितुं शक्तः स मे मृत्युर्भविष्यति । भवेयमहमेवार्कः सोमो वायुर्हुताशनः ॥ ५६
सलिलं चान्तरिक्षं च आकाशं चैव सर्वशः । अहं क्रोधश्च कामश्च वरुणो वासवो यमः ॥
धनदश्च धनाध्यक्षो यक्षः किंपुरुषाधिपः ॥ ५७

---

१ क. ग. °त्र वेदस्तुति° । २ क. °स्तु ततो जातः प्रा° । ३ ग. °तुहस्ताश्विनीमु° । ४ क. महाभयः । ५ क. °त्तमुखो । ६ क. °शुपायुर्मु° । ७ क. °लिङ्गः फलजीवमहौषधिः । वा° । ८ क. मस्तिकयविकृ° । ९ क. °महोम° । १० ग. उवाक° । ११ क. °कर्मोऽष्ट° । १२ क. °वर्ग्यावलभू° । १३ क. ख. जलोप° । १४ ग. °रतः ज्ञानमौनदृढव्रतः । १५ ख. °तस्तस्थौ° । १६ ख. °स्थौ वाऽभोजनः शुचिः । त° ।

ब्रह्मोवाच—

एते दिव्या वरास्तात मया दत्तास्तवाद्भुताः । सर्वान्कामानिमांस्तात प्राप्स्यसि त्वं न संशयः

व्यास उवाच—

एवमुक्त्वा तु भगवाञ्जगामाऽऽशु पितामहः । वैराजं ब्रह्मसदनं ब्रह्मर्षिगणसेवितम् ॥ ५९

ततो देवाश्च नागाश्च गन्धर्वा मुनयस्तथा । वरप्रदानं श्रुत्वैव पितामहमुपस्थिताः ॥ ६०

देवा ऊचुः—

वरेणानेन भगवन्बाधिष्यति स नोऽसुरः । तत्प्रसीदाऽऽशु भगवन्वधोऽप्यस्य विचिन्त्यताम् ॥

भगवन्सर्वभूतानां स्वयंभूरादिकृत्प्रभुः । स्रष्टा च हव्यकव्यानामव्यक्तं प्रकृतिर्ध्रुवम् ॥ ६२

व्यास उवाच—

ततो लोकहितं वाक्यं श्रुत्वा देवः प्रजापतिः । प्रोवाच भगवान्वाक्यं सर्वदेवगणांस्तथा ॥ ६३

ब्रह्मोवाच—

अवश्यं त्रिदशास्तेन प्राप्तव्यं तपसः फलम् । तपसोऽन्ते च भगवान्वधं विष्णुः करिष्यति ॥६४

व्यास उवाच—

एतच्छ्रुत्वा सुराः सर्वे वाक्यं पङ्कजजन्मनः । स्वानि स्थानानि दिव्यानि जग्मुस्ते वै मुदान्विताः

लब्धमात्रे वरे चापि सर्वाः सोऽबाधत प्रजाः । हिरण्यकशिपुर्दैत्यो वरदानेन दर्पितः ॥ ६६

आश्रमेषु महाभागान्मुनीन्वै संशितव्रतान् । सत्यधर्मरतान्दान्तांस्तदा धर्षितवांस्तथा ॥ ६७

त्रिदिवस्थांस्तथा देवान्पराजित्य महाबलः । त्रैलोक्यं वशमानीय स्वर्गे वसति सोऽसुरः ॥ ६८

यदा वरमदोन्मत्तो विचरन्दानवो भुवि । यज्ञीयानकरोद्दैत्यानयज्ञीयाश्च देवताः ॥ ६९

आदित्या वसवः साध्या विश्वे च मरुतस्तथा । शरण्यं शरणं विष्णुमुपतस्थुर्महाबलम् ॥ ७०

देवब्रह्ममयं यज्ञं ब्रह्मदेवं सनातनम् । भूतं भव्यं भविष्यं च प्रभुं लोकनमस्कृतम् ॥

नारायणं विभुं देवं शरण्यं शरणं गताः ॥ ७१

देवा ऊचुः—

त्रायस्व नोऽद्य देवेश हिरण्यकशिपोर्भयात् । त्वं हि नः परमो देवस्त्वं हि नः परमो गुरुः ७२

त्वं हि नः परमो धाता ब्रह्मादीनां सुरोत्तम । उत्फुल्लामलपत्राक्ष शत्रुपक्षक्षयंकर ॥

क्षयाय दितिवंशस्य शरणं त्वं भवस्व नः ॥ ७३

वासुदेव उवाच—

भयं त्यजध्वममरा अभयं वो ददाम्यहम् । तथैव त्रिदिवं देवाः प्रतिलप्स्यथ मा चिरम् ॥ ७४

एषोऽहं सगणं दैत्यं वरदानेन दर्पितम् । अवध्यममरेन्द्राणां दानवेन्द्रं निहन्मि तम् ॥ ७५

व्यास उवाच—

एवमुक्त्वा तु भगवान्विसृज्य त्रिदशेश्वरान् । हिरण्यकशिपोः स्थानमाजगाम महाबलः ॥ ७६

नरस्यार्धतनुं कृत्वा सिंहस्यार्धतनुं प्रभुः । नारसिंहेन वपुषा पाणिं संस्पृश्य पाणिना ॥ ७७

घनजीमूतसंकाशो घनजीमूतनिस्वनः । घनजीमूतदीप्तौजा जीमूत इव वेगवान् ॥ ७८

---

१ क. श्रुत्वेदं । २ ग. दिवि । ३ क. जयाय । ४ ग. प्रतिपद्यत । ५ ग. °वश्यम° । ६ ख. त्रिदिवेश्व° । ७ क. ख. हरिः ।

दैत्यं सोऽतिबलं दृष्ट्वा दृप्तशार्दूलविक्रमः । दृप्तैर्दैत्यगणैर्गुप्तं हतवानेकपाणिना ॥ ७९
नृसिंह एष कथितो भूयो[1]ऽयं वामनः[2] परः । यत्र वामनमास्थाय रूपं दैत्यविनाशनम् ॥ ८०
बलेर्बलवतो यज्ञे बलिना विष्णुना पुरा । विक्रमैस्त्रिभिरक्षोभ्याः क्षोभितास्ते महासुराः ॥ ८१
विप्रचित्तिः शिवः शङ्कुरयःशङ्कुस्तथैव च । अयःशिरा अश्वशिरा हयग्रीवश्च वीर्यवान् ॥ ८२
वेगवान्केतुमानुग्रः सोग्रव्यग्रो[3] महासुरः । पुष्करः पुष्कलश्चैव शा(सा)श्वोऽश्वपतिरेव च ॥ ८३
प्रह्लादो[4]ऽश्वपतिः कुम्भः संह्रादो गगन[5]प्रियः । अनुह्लादो हरिर्हयो[6] वाराहः[7] संहरो[8]ऽनुजः ॥ ८४
शरभः शलभश्चैव कुपथः[9] क्रोधनः क्रथः । बृहत्कीर्तिर्महाजिह्वः शङ्कुकर्णो महास्वनः ॥ ८५
दीप्तजिह्वोऽर्कनयनो मृगपादो[10] मृगप्रियः[11] । वायुर्गरिष्ठो नमुचिः सम्बरो[12] विस्करो[13] महान् ॥ ८६
चन्द्रहन्ता क्रोधहन्ता क्रोधवर्धन एव च । कालकः कालकोपश्च वृत्रः क्रोधो विरोचनः ॥ ८७
गरिष्ठश्च वरिष्ठश्च प्रलम्बनरकावुभौ । इन्द्रतापनवातापी केतुमान्बलदर्पितः ॥ ८८
असिलोमा पुलोमा च बाष्कलः प्रमदो मदः । स्वमिश्रः[14] कालवदनः[15] करालः केशिरेव च ॥ ८९
एकाक्षश्चन्द्रमा[16] राहुः संह्रादः[17] सम्बरः[18] स्वनः[19] । शतघ्नीचक्रहस्ताश्च तथा मुशलपाणयः ॥ ९०
अश्वयन्त्रायुधोपेता भिन्दिपालायुधास्तथा । शूलोलूखलहस्ताश्च परश्वधधरास्तथा ॥ ९१
पाशमुद्गरहस्ताश्च तथा परिघपाणयः । महाशिलाप्रहरणाः शूलहस्ताश्च दानवाः ॥ ९२
नानाप्रहरणा घोरा नानावेशा महाबलाः । कूर्मकुक्कुटवक्त्राश्च शशोलूकमुखास्तथा ॥ ९३
खरोष्ट्रवदनाश्चैव वराहवदनास्तथा । मार्जारशिखिवक्त्राश्च महावक्त्रास्तथा परे ॥ ९४
नक्रमेषाननाः शूरा गोजाविमहिषाननाः । गोधाशल्लकिवक्त्राश्च[20] क्रोष्टुवक्त्राश्च दानवाः ॥ ९५
आखुदर्दुरवक्त्राश्च घोरा वृकमुखास्तथा । भीमा मकरवक्त्राश्च क्रौञ्चवक्त्राश्च दानवाः ॥ ९६
अश्वाननाः[21] खरमुखा मयूरवदनास्तथा । गजेन्द्रचर्मवसनास्तथा कृष्णाजिनाम्बराः ॥ ९७
चीरसंवृतगात्राश्च तथा[22] नीलकवाससः । उष्णीषिणो मुकुटिनस्तथा कुण्डलिनोऽसुराः ॥ ९८
किरीटिनो लम्बशिखाः कम्बुग्रीवाः[23] सुवर्चसः । नानावेशधरा दैत्या नानामाल्यानुलेपनाः ॥ ९९
स्वान्यायुधानि संगृह्य प्रदीप्तानि[24] च तेजसा । क्रममाणं[25] हृषीकेशमुपा[26]वर्तन्त सर्वशः ॥ १००
प्रमथ्य सर्वान्दैतेयान्पादहस्ततलैर्विभुः । रूपं कृत्वा महाभीमं जहारा[27]ऽऽशु स मेदिनीम् ॥ १०१
तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे । नभः प्रक्रममाणस्य नाभ्यां किल तथा स्थितौ ॥
परमा[28]क्रममाणस्य जानुदेशे व्यवस्थितौ । विष्णोरमितवीर्यस्य वदन्त्येवं द्विजातयः ॥ १०३
हृत्वा स मेदिनीं कृत्स्नां हत्वा चासुरपुंगवान् । ददौ शक्राय वसुधां[29] विष्णुर्बलवतां वरः ॥ १०४
एष वो वामनो नाम प्रादुर्भावो महात्मनः । वेदविद्भिर्द्विजैरेतत्कथ्यते वैष्णवं यशः ॥ १०५
भूयो भूतात्मनो[30] विष्णोः प्रादुर्भावो महात्मनः । दत्तात्रेय इति ख्यातः क्षमया परया युतः ॥ १०६

---

१ क. °योऽसो वा° । २ क. °मनस्ततः । य° । ३ क. सोव्यग्रो हि म° । ४ क. °ह्लादः स्वप° । ५ क. गगन° । ६ क. °हरौ वा° । ७ ग. वराहः । ८ ग. °हनो रजः । ९ क. कुशपः । १० क. मृदुपा° । ११ क. मृदुप्रि° । १२ क. ख. शम्बरो । १३ क. ख. विक्षरो । १४ ख. स्वश्रियः । ग. खसृमः । १५ क. कालदमनः । ख. कालनाभश्च । १६ ग. °न्द्रहा रा° । १७ क. °ह्रादो ह्राद एव च । श° । १८ ग. श्रमरः । १९ ग. स्वमः । २० क. ख. °श्च क्रोष्टु° । २१ ख. ग. गरुडाननाः । २२ क. ख. °था फल° । २३ क. कम्बुकण्ठाः । २४ क. °प्त ानि ते° । २५ क. °माणे हृषी° । २६ क. °केश उपा° । २७ क. °रास्य तु मे° । २८ क. ख. °रमं क्र° । २९ क. °धां दिवं बल° । ३० क. ख. °त्मको वि° ।

तेन नष्टेषु [1]वेदेषु प्रक्रियासु मखेषु च । चातुर्वर्ण्ये च संकीर्णे धर्मे शिथिलतां गते ॥ १०७
[3]अतिवर्धति चाधर्मे सत्ये नष्टेऽनृते स्थिते । प्रजासु क्षीयमाणासु धर्मे चाऽऽकुलतां गते ॥ १०८
सयज्ञाः सक्रिया वेदाः प्रत्यानीता हि तेन वै । चातुर्वर्ण्यमसंकीर्णं कृतं तेन महात्मना ॥ १०९
तेन हैहयराजस्य कार्तवीर्यस्य धीमतः । वरदेन वरो दत्तो दत्तात्रेयेण धीमता ॥ ११०
एतद्बाहुद्वयं यत्ते तत्ते मम [4]कृते नृप । शतानि दश बाहूनां भविष्यन्ति न संशयः ॥ १११
पालयिष्यसि कृत्स्नां च वसुधां वसुधेश्वर । दुर्निरीक्ष्योऽरिवृन्दानां युद्धस्थश्च भविष्यसि ११२
एष वो वैष्णवः श्रीमान्प्रादुर्भावोऽद्भुतः शुभः । भूयश्च जामदग्न्योऽयं प्रादुर्भावो महात्मनः ॥
यत्र बाहुसहस्रेण द्विषतां दुर्जयं रणे । रामोऽर्जुनमनीकस्थं जघान नृपतिं प्रभुः ॥ ११४
रथस्थं पार्थिवं रामः पातयित्वाऽर्जुनं भुवि । धर्षयित्वाऽर्जुनं रामः क्रोशमानं च मेघवत् ॥ ११५
कृत्स्नं बाहुसहस्रं च चिच्छेद भृगुनन्दनः । परश्वधेन दीप्तेन [5]ज्ञातिभिः सहितस्य वै ॥ ११६
कीर्णा क्षत्रियकोटीभिर्मेरुमन्दरभूषणा । त्रिः सप्तकृत्वः पृथिवी तेन निःक्ष[6]त्रिया कृता ॥ ११७
कृत्वा निःक्षत्रियां [7]चैनां भार्गवः सुमहायशाः । सर्वपापविनाशाय वाजिमेधेन चेष्टवान् ॥ ११८
यस्मिन्यज्ञे महादाने दक्षिणां भृगुनन्दनः । मारीचाय ददौ प्रीतः कश्यपाय वसुंधराम् ॥ ११९
[8]वारणांस्तुरगाञ्शुभ्रान्रथांश्च रथिनां वरः । हिरण्यमक्षयं धेनुर्गजेन्द्रांश्च [9]महीपतिः ॥ १२०
ददौ तस्मिन्महायज्ञे वाजिमेधे महायशाः । अद्यापि [10]च हितार्थाय लोकानां भृगुनन्दनः ॥ १२१
चरमाणस्तपो घोरं जामदग्न्यः पुनः प्रभुः । आस्ते [11]वै देववच्छ्रीमान्महेन्द्रे पर्वतोत्तमे ॥ १२२
एष विष्णोः सुरेशस्य शाश्वतस्याव्ययस्य च । जामदग्न्य इति ख्यातः प्रादुर्भावो महात्मनः ॥
चतुर्विंशे युगे वाऽपि विश्वामित्रपुरःसरः । जज्ञे दशरथस्याथ पुत्रः पद्मायतेक्षणः ॥ १२४
कृत्वाऽऽत्मानं महाबाहुश्चतुर्धा प्रभुरीश्वरः । लोके राम इति ख्या[13]तस्तेजसा भास्करोपमः ॥ १२५
[12]प्रसादनार्थं लोकस्य रक्षसां निग्रहाय च । धर्मस्य च विवृद्ध्यर्थं जज्ञे तत्र महायशाः ॥ १२६
तमप्याहुर्मनुष्येन्द्रं सर्वभूतहिते रतम् । यः समाः सर्वधर्मज्ञश्चतुर्दश वनेऽवसत् ॥ १२७
लक्ष्मणानुचरो रा[14]मः सर्वभूतहिते रतः । चतुर्दश वने तप्त्वा तपो वर्षाणि राघवः ॥ १२८
[15]रूपिणी तस्य पा[16]र्श्वस्था सीतेति प्रथिता [17]जने । पूर्वोदिता तु या लक्ष्मीर्भर्तारमनुगच्छति ॥ १२९
जनस्थाने वसन्कार्यं त्रिदशानां चकार सः । तस्यापकारिणं क्रूरं पौल[18]स्त्यं मनुज[19]र्षभः ॥ १३०
सीतायाः पदमन्विच्छन्निजघान महायशाः । देवासुरगणानां च यक्षराक्षसभोगिनाम् ॥ १३१
यत्रावध्यं राक्षसेन्द्रं रावणं [20]युधि दुर्जयम् । युक्तं राक्षसकोटीभिर्नीलाञ्जनचयोपमम् ॥ १३२
त्रैलोक्यद्रावणं क्रूरं रावणं राक्षसेश्वरम् । दुर्जयं [21]दुर्धरं दृप्तं शार्दूलसमविक्रमम् ॥ १३३
दुर्निरीक्ष्यं सुरगणैर्वरदानेन दर्पितम् । जघान सचिवैः सार्धं ससैन्यं रावणं युधि ॥ १३४
महाभ्रगणसंकाशं महाकायं महाबलम् । रावणं निजघानाऽऽशु रामो भूतपतिः पुरा ॥ १३५
सुग्रीवस्य कृते येन वानरेन्द्रो महाबलः । वाली विनिहतः संख्ये सुग्रीवश्चाभिषेचितः ॥ १३६
मधोश्च तनयो दृप्तो लवणो नाम दानवः । हतो मधुवने वीरो वरमत्तो महासुरः ॥ १३७

१ ग. देवेषु । २ ख. प्रयातेषु । ३ ख. अभिव° । ४ क. कृतो वरः । श° । ५ क. °तिभिश्चार्दित° । ६ ग. °त्रियी कृ° । ७ ग. चैव । ८ ग. वारुणां° । ९ ग. महामतिः । १० क. तु । ११ क. वै वेदविच्छ्री° । १२ ख. °सादायाथ लो° । १३ क. ख. °र्थं जातस्तत्र । १४ क. °मः पितुराज्ञापरो द्विजाः । च° । १५ ख. गृहिणी । १६ ख. रामस्य । १७ ख. ग. जनैः । १८ क. °स्त्यं पुरुषर्षभाः । सी° । १९ ख. °र्षभाः । सी° । २० क. भुवि । २१ क. दुर्मदं ।

यज्ञविघ्नकरौ येन मुनीनां भावितात्मनाम् । मारीचश्च सुबाहुश्च बलेन बलिनां वरौ ॥ १३८
निहतौ च निराशौ च कृतौ तेन महात्मना । समरे युद्धशौण्डेन तथाऽन्ये चापि राक्षसाः १३९
विराधश्च कबन्धश्च राक्षसौ भीमविक्रमौ । जघान पुरुषव्याघ्रो गन्धर्वौ शापमोहितौ ॥ १४०

हुताशनार्कांशुतडिद्गुणाभैः प्रतप्तजाम्बूनदचित्रपुङ्खैः ।
महेन्द्रवज्राशनितुल्यसारै[2] रिपून्स रामः समरे निजघ्ने ॥ १४१

तस्मै दत्तानि शस्त्राणि[3] विश्वामित्रेण धीमता । वधार्थं देवशत्रूणां दुर्धर्षाणां सुरैरपि ॥ १४२
वर्तमाने मखे येन जनकस्य महात्मनः । भग्नं माहेश्वरं चापं क्रीडता लीलया पुरा ॥ १४३
एतानि कृत्वा कर्माणि रामो धर्मभृतां वरः । दशाश्वमेधाञ्जारूथ्यानाजहार निरर्गलान् ॥ १४४
नाश्रूयन्ताशुभा वाचो[4] नाऽऽकुलं मारुतो ववौ । न वित्तहरणं चाऽऽसीद्रामे राज्यं प्रशासति ॥
परिदेवन्ति विधवा नानर्थाश्च कदाचन । सर्वमासीच्छुभं तत्र रामे राज्यं प्रशासति ॥ १४६
न प्राणिनां भयं चाऽऽसीज्जलाग्न्यनिलघातजम् । न चापि वृद्धा बालानां प्रेतकार्याणि चक्रिरे
ब्रह्म[6]चर्यपरं क्षत्रं विशस्तु[7] क्षत्रिये रताः । शूद्राश्चैव हि वर्णांस्त्रीन्शुश्रूषन्त्यनहंकृताः ॥ १४८
नार्यो नात्यचरन्भर्तॄन्भार्यां नात्यचरत्पतिः । सर्वमासीज्जगद्दान्तं निर्दस्युरभवन्मही ॥ १४९
राम एकोऽभवद्भर्ता रामः पालयिताऽभवत् । आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः ॥ १५०
अरोगाः प्राणिनश्चाऽऽसन्रामे राज्यं प्रशासति । देवतानामृषीणां च मनुष्याणां च सर्वशः १५१
पृथिव्यां समवायो[9]ऽभूद्रामे राज्यं प्रशासति । गाथामप्यत्र गायन्ति ये पुराणविदो जनाः १५२
रामे निबद्धतत्त्वार्था माहात्म्यं तस्य धीमतः । श्यामो युवा लोहिताक्षो दीप्तास्यो मितभाषितः
आजानुबाहुः सुमुखः सिंहस्कन्धो महाभुजः । दश वर्षसहस्राणि रामो राज्यमकारयत् ॥ १५४
ऋक्सामयजुषां घोषो ज्याघोषश्च महात्मनः । अव्युच्छिन्नोऽभवद्राष्ट्रे दीयतां भुज्यतामिति १५५
सत्त्ववान्गुणसंपन्नो दीप्यमानः स्वतेजसा । अतिचन्द्रं च सूर्यं च रामो दाशरथिर्बभौ ॥ १५६
ईजे क्रतुशतैः पुण्यैः समाप्तवरदक्षिणैः । हित्वाऽयोध्यां दिवं यातो राघवो हि महाबलः ॥ १५७
एवमेव महाबाहुरिक्ष्वाकुकुलनन्दनः । रावणं सगणं हत्वा दिवमाचक्रमे विभुः ॥ १५८
अपरः केशवस्यायं प्रादुर्भावो महात्मनः । विख्यातो माथुरे कल्पे सर्वलोकहिताय वै ॥ १५९
यत्र शाल्वं च चैद्यं च कंसं द्विविदमेव च । अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम् ॥ १६०
नागं कुवलयापीण्डं चाणूरं मुष्टिकं तथा । दैत्यान्मानुषदे[10]हेन सूदयामास वीर्यवान् ॥ १६१
छिन्नं बाहुसहस्रं च बाणस्याद्भुतकर्मणः । नरकश्च हतः संख्ये यवनश्च महाबलः ॥ १६२
हृतानि च महीपानां सर्वरत्नानि तेजसा । दुराचाराश्च[11] निहिताः पार्थिवा ये महीतले ॥ १६३
एष लोकहितार्थाय प्रादुर्भावो महात्मनः । कल्की विष्णुयशा नाम[12] शम्भलग्रामसंभवः ॥ १६४
सर्वलोक हितार्थाय भूयो देवो महायशाः । एते चान्ये च बहवो दिव्या देवगणैर्वृताः ॥ १६५
प्रादुर्भावाः पुराणेषु गीयन्ते ब्रह्मवादिभिः । यत्र देवा विमुह्यन्ति प्रादुर्भावानुकीर्तने ॥ १६६
पुराणं वर्तते यत्र[13] वेदश्रुतिसमाहितम् । एतदुद्देशमात्रेण प्रादुर्भावानुकीर्तनम् ॥ १६७

---

१ °पविक्षतौ । ख. °पवीक्षितौ । २ ग. °सारैः शरैः शरीरेण वियोजितो बलात् । त° । ३ क. शास्त्राणि । ४ क. °चो मरुतो नासुखा वबुः । न । ५ ग. °सीज्जगद्दान्तं रा° । ६ क. °ह्म पर्यचरत्क्षत्रं । ७ ग. विशः क्षत्रमनुव्रताः । ८ क. ख. °न्तं रामे राज्यं प्रशासति । रा° । ९ क. सह वासोऽभू° । १० ग. °देहस्थान्सूद° । ११ क. °राधर्षाश्च । १२ ग. °म सम्भ° । १३ क. °त्र देवश्रु° ।

कीर्तितं कीर्तनीयस्य सर्वलोकगुरोर्विभोः। प्रीयन्ते पितरस्तस्य प्रादुर्भावानुकीर्तनात् ॥ १६८
विष्णोरमिततवीर्यस्य यः शृणोति कृताञ्जलिः ॥ १६९
एताश्च योगेश्वरयोगमायाः श्रुत्वा नरो मुच्यति सर्वपापैः।
ऋद्धिं समृद्धिं विपुलांश्च भोगान्प्राप्नोति शीघ्रं भगवत्प्रसादात् ॥ १७०
एवं मया मुनिश्रेष्ठा विष्णोरमिततेजसः। सर्वपापहराः पुण्याः प्रादुर्भावाः प्रकीर्तिताः ॥ १७१

इति श्रीमहापुराणे आदिब्राह्मे विष्णोः प्रादुर्भावानुकीर्तनं नाम
त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—११०८९

अथ चतुर्दशाधिकद्विशततमोऽध्यायः।

मुनय ऊचुः—

न तृप्तिमधिगच्छामः पुण्यधर्मामृतस्य च। मुने त्वन्मुखगीतस्य तथा कौतूहलं हि नः ॥ १
उत्पत्तिं प्रलयं चैव भूतानां कर्मणो गतिम्। वेत्सि सर्वं मुने तेन पृच्छामस्त्वां महामतिम् ॥ २
श्रूयते यमलोकस्य मार्गः परमदुर्गमः[१]। दुःखक्लेशकरः शश्वत्सर्वभूतभयावहः ॥ ३
कथं तेन नरा यान्ति मार्गेण यमसादनम्। प्रमाणं चैव मार्गस्य ब्रूहि नो वदतां वर ॥ ४
मुने पृच्छाम सर्वज्ञ ब्रूहि सर्वमशेषतः। कथं नरकदुःखानि नाऽऽप्नुवन्ति नरान्मुने ॥ ५
केनोपायेन दानेन धर्मेण नियमेन च। मानुषस्य च याम्यस्य लोकस्य कियदन्तरम् ॥ ६
कथं[२] च स्वर्गतिं यान्ति नरकं केन कर्मणा। स्वर्गस्थानानि कियन्ति कियन्ति नरकाणि च ॥ ७
कथं सुकृतिनो यान्ति कथं दुष्कृतकारिणः। किं रूपं किं प्रमाणं वा को वर्णस्तूभयोरपि ॥
जीवस्य[३] नीयमानस्य यमलोकं[४] ब्रवीहि नः ॥ ८

व्यास उवाच—

शृणुध्वं मुनिशार्दूला वदतो मम सुव्रताः। संसारचक्रमजरं स्थितिर्यस्य न विद्यते ॥ ९
सोऽहं वदामि वः सर्वं यममार्गस्य निर्णयम्। उत्क्रान्तिकालादारभ्य यथा नान्यो वदिष्यति ॥
स्वरूपं चैव मार्गस्य यन्मां पृच्छथ सत्तमाः। यमलोकस्य चाध्वानमन्तरं मानुषस्य च ॥ ११
योजनानां सहस्राणि षडशीतिस्तदन्तरम्। तप्ततामप्रमिवाऽऽतप्तं[५] तदध्वानमुदाहृतम् ॥ १२
तदवश्यं हि गन्तव्यं प्राणिभिर्जीवसंज्ञकैः[६]। पुण्यान्पुण्यकृतो यान्ति पापान्पापकृतोऽधमाः ॥ १३
द्वाविंशतिश्च नरका यमस्य विषये स्थिताः। येषु दुष्कृतकर्माणो विपच्यन्ते पृथक्पृथक् ॥ १४
नरको रौरवो रौद्रः[७] शूकरस्ताल एव च। कुम्भीपाको महाघोरः शाल्मलोऽथ विमोहनः ॥ १५
कीटादः कृमिभक्षश्च ना(ला)लाभक्षो भ्रमस्तथा। नद्यः पूयवहाश्चान्या रुधिराम्भस्तथैव च ॥ १६
अग्निज्वालो महाघोरः संदंशः शुनभोजनः। घोरा वैतरणी चैव असिपत्रवनं तथा ॥ १७

---

१ क. ख. °दुस्तरः। दुः°। २ ग. कर्मणा केन नरकं स्वर्गं वा मनुजा मुने। स्व°। ३ ख. °स्य नियमांस्तस्य। ४ ख. °लोके ब्र°। ५ क. °तप्त एतन्मार्ग उदाहृतः। त°। ६ ग. °संक्षये। पु°। ७ क. महारौद्रः।

न तत्र वृक्षच्छाया वा न तडागाः सरांसि च। न वाप्यो दीर्घिका वाऽपि न कूपो न[1] प्रपा सभा
न मण्डपो नाऽऽयतनं न[2] नद्यो न च पर्वताः। न किंचिदाश्रमस्थानं विद्यते तत्र वर्त्मनि ॥ १९
यत्र विश्रमते श्रान्तः पुरु[3]षोऽतीवकर्षितः। अवश्यमेव गन्तव्यः स सर्वैस्तु महापथः ॥ २०
प्राप्ते काले तु संत्यज्य सुहृद्बन्धुधनादिकम्। जरायुजाण्डजाश्चैव स्वेदजाश्चोद्भिजास्तथा ॥ २१
*जङ्गमाजङ्गमाश्चैव गमिष्यन्ति महापथम्। देवासुरमनुष्यैश्च वैवस्वतवशानुगैः ॥ २२
स्त्रीपुंनपुंसकैश्चैव पृथिव्यां जीवसंज्ञितैः। पूर्वाह्णे चापराह्णे वा मध्याह्ने वा तथा पुनः ॥ २३
संध्याकालेऽर्धरात्रे वा प्रत्यूषे वाऽप्युपस्थिते। वृद्धैर्वा मध्यमैर्वाऽपि यौवनस्थैस्तथैव च ॥ २४
गर्भवासेऽथ बाल्ये वा गन्तव्यः स महापथ[4]ः। प्रवासस्थैर्गृहस्थैर्वा पर्वतस्थैः स्थलेऽपि वा ॥ २५
क्षेत्रस्थैर्वा जलस्थैर्वा गृहमध्यगतैस्तथा। आसीनैश्चास्थितैर्वाऽपि शयनीयगतैस्तथा ॥ २६
जाग्रद्भिर्वा प्रसुप्तैर्वा गन्तव्यः स महापथः। इहानुभूय निर्दिष्टमायुर्जन्तुः स्वयं तदा ॥ २७
तस्यान्ते च स्वयं प्राणैरनिच्छन्नपि मुच्यते। जलमग्निर्विषं शस्त्रं क्षुद्व्याधिः पतनं गिरेः ॥ २८
निमित्तं किंचिदासाद्य देही प्राणैर्विमुच्यते। विहाय सुमहत्कृत्स्नं शरीरं पाञ्चभौतिकम् ॥ २९
अन्यच्छरीरमादत्ते यातनीयं स्वकर्मजम्[5]। दृढं शरीरमाप्नोति सुखदुः[6]खोपभुक्तये ॥ ३०
तेन भुङ्क्ते स कृच्छ्राणि पापकर्ता नरो भृशम्। सुखानि धार्मिको हृष्ट इह नीतो यमक्षये[7] ॥ ३१
ऊष्मा प्रकुपितः काये तीव्रर्वायु[8]समीरितः। भिनत्ति मर्मस्थानानि दीप्यमानो निरन्धनः ॥ ३२
उदानो नाम पवनस्ततश्चोर्ध्वं प्रवर्तते। भुज्यता(क्ताना)मम्बुभक्ष्याणामधोगतिनिरोधकृत् ॥ ३३
ततो येनाम्बुदानानि कृतान्यन्नरसास्तथा। दत्ताः स तस्यामाह्लादमापदि प्रतिपद्यते ॥ ३४
अन्नानि येन दत्तानि श्रद्धापूतेन चेतसा। सोऽपि तृप्तिमवाप्नोति विनाऽप्यन्नेन वै तदा ॥ ३५
येनानृतानि नोक्तानि प्रीतिभेदः कृतो न च। आस्तिकः श्रद्दधानश्च सुखमृत्युं स गच्छति ३६
देवब्राह्मणपूजायां निरताश्चानसूयकाः। शुक्ला वदान्या ह्रीमन्तस्ते नराः सुखमृत्यवः ॥ ३७
यः कामान्नापि संरम्भान्न द्वेषाद्धर्ममुत्सृजेत्। यथोक्तकारी सौम्यश्च स सुखं मृत्यमृ[9]च्छति ॥ ३८
वारिदास्तृषितानां ये क्षुधितान्नप्रदायिनः। प्राप्नुवन्ति नराः काले मृत्युं सुखसमन्वितम् ॥ ३९
शीतं जयन्ति धनदास्ता[10]पं चन्दनदायिनः। प्रा[11]णघ्नीं वेदनां कष्टां ये चा[12]न्योद्वे[13]गधारिणः ॥ ४०
मोहं ज्ञानप्रदातारस्तथा दीपप्रदास्तमः। कूटसाक्षी मृषावादी यो[14] गुरुर्नानुशास्ति वै ॥ ४१
ते मोहमृत्यवः सर्वे तथा ये वेदनिंदकाः। विभीषणाः पूतिगन्धाः कूटमुद्गरपाणयः ॥ ४२
आग[15]च्छन्ति दुरात्मानो यमस्य पुरुषास्[16]तथा। प्राप्तेषु दृक्पथं तेषु जायते तस्य वेपथुः ॥ ४३
क्रन्दत्यविरतः सोऽथ भ्रातृमातृपितॄंस्तथा। सा तु वागस्फुटा विप्रा एकवर्णा विभाव्यते ॥ ४४
दृष्टि[17]र्विभ्राम्यते त्रासात्कासाद्वष्ठ्यत्य(विष्टम)थाऽऽनन[18]म्। ततः स वेदनाविष्टं तच्छरीरं विमुञ्चति

* इदमर्धं क. ख. पुस्तकयोर्नास्ति।

१ क. न नदी प्रपाः। न। २ क. न चोद्यानं न प°। ३ ख. °षो वातक°। ४ क. °थः। वानप्रस्थै°। ५ क. °म। तन्मात्रगुणसंयुक्तमात्मदेहप्रमाणतः। इष्टं श°। ६ क. दुःखानुभूतये। ७ क. यमालये। ८ क. °वातम°। ९ ग. सममृच्छ°। १० क. °पं पवन°। ११ क. प्राणितो। ख. प्राणिनो। १२ क. चान्येऽद्रोहकारि°। १३ ग. °गकारि°। १४ क. योऽधर्ममनु°। १५ ग. °च्छन्तो दु°। १६ क. °स्तदा। प्रा°। १७ क. °भ्रान्तनेत्रा सा कासोच्छ्वासेन वेपितम्। १८ क. °म्। अन्तश्च वे°।

वाय्वग्रसारी तद्रूपदेहमन्यत्प्रपद्यते । तत्कर्मयातनार्थं च न मातृपितृसंभवम् ॥ ४६
तत्प्रमाण[1]वयोवस्थो[2]संस्थानैः प्राप्यते व्यथा । ततो दूतो यमस्याथ पाशैर्बध्नाति दारुणैः ॥ ४७
जन्तोः संप्राप्तकालस्य वेदना[3]र्तस्य वै भृशम् । भूतैः संत्यक्तदेहस्य कण्ठप्राप्तानिलस्य च ॥ ४८
शरीरा[4]च्च्यावितो जीवो रोरवीति तथोल्बणम् । निर्गतो वायुभूतस्तु षाट्[5]कौशिककलेवरे ॥ ४९
मातृभिः पितृभिश्चैव भ्रातृभिर्मातुलै[6]स्तथा । दारैः पुत्रैर्वयस्यै[7]श्च गुरुभिस्त्यज्यत भुवि ॥ ५०
दृश्यमानश्च तैर्दीनैरश्रुपूर्णेक्षणैर्भृशम् । स्वशरीरं समुत्सृज्य वायुभूतस्तु गच्छति ॥ ५१
अन्धकारमपारं च[8] महाघोरं तमोवृतम् । सुखदुःखप्रदातारं दुर्गमं पापकर्मणाम् ॥ ५२
दुःसहं च दुरन्तं[9] च दुर्निरीक्षं[10] दुरासदम् । दुरापमतिदुर्गं च पापिष्ठानां[11] सदाऽहितम् ॥ ५३
कृष्यमाणाश्च तैर्भूतैर्याम्यैः पाशैस्तु संयताः । मुद्गरैस्ताड्यमानाश्च नीयन्ते तं महापथम् ॥ ५४
क्षीणायुषं समालोक्य प्राणिनं चाऽऽयुषक्षये । निर्नीषवः समायान्ति यमदूता भयंकराः ॥ ५५
आरूढा यानकाले तु ऋक्षव्याघ्रखरेषु च । उष्ट्रेषु वानरेष्वन्ये वृश्चिकेषु वृकेषु च ॥ ५६
उलूकसर्पमार्जारं तथाऽन्ये गृध्रवाहनाः । श्येनशृगालमारूढाः[12] सरघाकङ्कवाहनाः ॥ ५७
वराहपशुवेतालमहिषास्यास्तथा परे । नानारूपधरा घोराः सर्वप्राणिभयंकराः ॥ ५८
दीर्घमुष्काः करालास्या वक्रनासास्त्रिलोचनाः । महाहनु[13]कपोलास्याः प्रलम्बदशनच्छदाः ॥ ५९
निर्गतैर्विकृताकारैर्दशनैरङ्कुरोपमैः । मांसशोणितदिग्धाङ्गा दंष्ट्राभिर्भृशमुल्बणैः ॥ ६०
मुखैः पातालसदृशैर्ज्वलज्जिह्वभयंकरैः । नेत्रैः सुविकृताकारैर्ज्वलत्पिङ्गलचञ्चलैः ॥ ६१
मार्जारोलूकखद्योतशक्र[14]गोपवदुद्धतैः । केकरैः संकुलैस्तब्धैर्लोचनैः पावकोपमैः ॥ ६२
भृशमाभरणैर्भीमैराबद्धैर्भुजगोपमैः । शोणासरलगात्रैश्च मुण्डमालाविभूषितैः[15] ॥ ६३
कण्ठस्थकृष्णसर्पैश्च फूत्काररवभीषणैः । वह्निज्वालोपमैः केशैस्तब्धरुक्षैर्भयंकरैः ॥ ६४
बभ्रुपिङ्गललोलैश्च कद्रुश्मश्रुभिरावृताः । भुजदण्डैर्महाघोरैः प्रलम्बैः परिघोपमैः ॥ ६५
केचिद्द्विबाहवस्तत्र तथाऽन्ये च चतुर्भुजाः । द्विरष्टबाहवश्चान्ये दशविंशभुजास्तथा ॥ ६६
असंख्यातभुजाश्चान्ये केचिद्बाहुसहस्रिणः । आयुधैर्विकृताकारैः प्रज्वलद्भिर्भयानकैः ॥ ६७
शक्तितोमरचक्राद्यैः सुदीप्तैर्विविधायुधैः । पाशशृङ्खलदण्डैश्च [16]भीषयन्तो महाबलाः ॥ ६८
आगच्छन्ति महारौद्रा मर्त्यानामायुषः क्षये । ग्रहीतुं[17] प्राणिनः सर्वे यमस्याऽऽज्ञाकरास्तथा ॥ ६९
यत्तच्छरीरमादत्ते यातनीयं स्वकर्मजम् । तदस्य[18] नीयते जन्तोर्यमस्य सदनं प्रति ॥ ७०
बद्ध्वा तत्कालपाशैश्च निगडैर्वज्रशृङ्खलैः । ताडयित्वा भृशं क्रुद्धैर्नीयते[19] यमकिंकरैः ॥ ७१
प्रस्खलन्तं रुदन्तं च आक्रोशन्तं मुहुर्मुहुः[20] । हा तात[21] मातः पुत्रेति वदन्तं कर्मदूषितम् ॥ ७२
आहत्य निशितैः शूलैर्मुद्गरैर्निशितैर्घनैः । खड्गशक्तिप्रहारैश्च वज्रदण्डैः सुदारुणैः ॥ ७३
भर्त्स्यमानो महारावैर्वज्रशक्तिसमन्वितैः । एकैकशो भृशं क्रुद्धैस्ताडयद्भिः समन्ततः ॥ ७४
स मुह्यमानो दुःखार्तः प्रतपंश्च इतस्ततः । आकृष्य नीयते जन्तुरध्वानं सुभयंकरैः ॥ ७५

---

१ क. °माणा व°। २ क. °स्थाशरीरैः प्रा°। ३ क. ख. °नास्तस्य । ४ क. ख. °रादपनीतोऽसौ जीवो रौति त°। ५ ग. °ट्कौषिक° । ६ क. ख. °तुलादिभिः । दा° । ७ क. °श्च रुदद्भिस्त्य° । ८ ग. तं । ९ क. ख. सुदूरं । १० ख. तैर्हृष्टैर्या° । ११ क. °न्ते यमसादनम् । १२ ग. °ढाः खञ्जरीक°। १३ क. °कपाला°। १४ क. ख. °ऋचापैरिवोद्धतैः । १५ क. °भूषणैः । क° । १६ क. ख. चापहस्ता । १७ क. ख. गृहीत्वा । १८ क. ख. तदाऽस्य । १९ क. °रैः। कृत्वा वज्रमयं कायमाक्रो°। २० क. सुदुर्मदैः । २१ ग. °त पुत्र मातेति । हा कलत्रेति चासकृत् । आ° ।

कुशकण्टकवल्मीकशङ्कुपाषाणशर्करे । *तथा प्रदीप्तज्वलने क्षारैवज्रशतोत्कटे ॥ ७६
प्रदीप्तादित्यतप्तेन दह्यमानस्तदंशुभिः । कृष्यते यमदूतैश्च शिवासंनादभीषणैः ॥ ७७
विकृष्यमाणस्तैर्घोरैर्भक्ष्यमाणः शिवाशतैः । प्रयाति दारुणे मार्गे पापकर्मा यमालयम् ॥ ७८
क्वचिद्भीतैः क्वचित्रस्तैः प्रस्खलद्भिः क्वचित्क्वचित् । दुःखेनाऽऽक्रन्दमानैश्च गन्तव्यः स महापथः
निर्भर्त्स्यमानैरुद्विग्नैर्विद्रुतैर्भयविह्वलैः । कम्पमानशरीरैस्तु गन्तव्यं जीवसंज्ञकैः ॥ ८०
कण्टकाकीर्णमार्गेण संतप्तसिकतेन च । दह्यमानैस्तु गन्तव्यं नरैर्दानविवर्जितैः ॥ ८१
मेदःशोणितदुर्गन्धै[3]र्बस्तगात्रैश्च पूगशः । दग्धस्फुटत्त्वचाऽऽकीर्णैर्गन्तव्यं जीवघातकैः ॥ ८२
†कूजद्भिः क्रन्दमानैश्च विक्रोशद्भिश्च विस्वरम् । वेदनार्तैश्च सद्भिश्च गन्तव्यं जीवघातकैः ॥ ८३
शक्तिभिर्भिन्दिपालैश्च खड्गतोमरसायकैः । भिद्यद्भिस्तीक्ष्णशूलाग्रैर्गन्तव्यं जीवघातकैः ॥ ८४
श्वानैर्व्याघ्रैर्वृकैः कङ्कैर्भक्ष्यमाणैश्च पापिभिः ॥ ८५
कृन्तद्भिः क्रकचाघातैर्गन्तव्यं मांसखादिभिः । महिषर्षभशृङ्गाग्रैर्भिद्यमानैः समन्ततः ॥ ८६
[6]उल्लिखद्भिः शूकरैश्च गन्तव्यं मांसखादकैः । सूचीभ्रमरकाकोलमक्षिकाभिश्च संघशः ॥ ८७
भुज्यमानैश्च गन्तव्यं पापिष्ठैर्मधुघातकैः । विश्वस्तं स्वामिनं मित्रं स्त्रियं वा यस्तु घातयेत् ॥ ८८
शस्त्रैर्निकृत्यमानैश्च गन्तव्यं चातुरैर्नरैः । घातयन्ति च ये जन्तूंस्ताडयन्ति निरागसः ॥ ८९
राक्षसैर्भक्ष्यमाणास्ते यान्ति याम्यपथं नराः । ये हरन्ति परस्त्रीणां वरप्रावरणानि च ॥ ९०
ते यान्ति विद्रुता नग्नाः प्रेतीभूता यमालयम् । वासो धान्यं हिरण्यं वा गृहक्षेत्रमथापि वा ॥ ९१
ये हरन्ति दुरात्मानः पापिष्ठाः पापकर्मिणः । पाषाणैर्लगुडैर्दण्डैस्ताड्यमानैस्तु जर्जरैः ॥ ९२
वहद्भिः शोणितं भूरि गन्तव्यं तु यमालयम् । ब्रह्मस्वं ये हरन्तीह नरा नरकनिर्भयाः ॥ ९३
ताडयन्ति तथा विप्रानाक्रोशन्ति नराधमाः । शुष्ककाष्ठनिबद्धास्ते छिन्नकर्णाक्षिनासिकाः ॥ ९४
पूयशोणितदिग्धास्ते कालगृध्रैश्च जम्बुकैः । किंकरैर्भीषणैश्चण्डैस्ताड्यमानाश्च दारुणैः ॥ ९५
विक्रोशमाना गच्छन्ति पापिनस्ते यमालयम् । एवं परमदुर्धर्षमध्वानं ज्वलनप्रभम् ॥ ९६
रौरवं दुर्गविषमं निर्दिष्टं मानुषस्य च । प्रतप्तताम्रवर्णाभं वह्निज्वालास्फुलिङ्गवत् ॥ ९७
कुरण्टकण्टकाकीर्णं पृथुविकटताडनैः । शक्तिवज्रैश्च संकीर्णमुज्ज्वलं तीव्रकण्टकम् ॥ ९८
अङ्गारवालुकामिश्रं वह्निकीटकदुर्गमम् । ज्वालामालाकुलं रौद्रं सूर्यरश्मिप्रतापितम् ॥ ९९
अध्वानं नीयते देही कृष्यमाणः सुनिष्ठुरैः । यदैव क्रन्दते जन्तुर्दुःखार्तः पतितः क्वचित् ॥ १००
तदैवाऽऽहन्यते सर्वैरायुधैर्यमकिंकरैः । एवं संताड्यमानश्च लुब्धः पापेषु योऽनयः ॥ १०१
अवशो नीयते जन्तुर्दुर्धरैर्यमकिंकरैः । सर्वैरेव हि गन्तव्यमध्वानं तत्सुदुर्गमम् ॥ १०२
नीयते विविधैर्घोरैर्यमदूतैरवज्ञया । नीत्वा सुदारुणं मार्गं प्राणिनं यमकिंकरैः ॥ १०३
प्रवेश्यते पुरीं घोरां ताम्रायसमयीं द्विजाः । सा पुरी विपुलाकारा लक्षयोजनमायता ॥ १०४

* क. पुस्तके नास्तीदमर्धम् । † एतदादिश्लोकद्वयं नास्ति क. ख. पुस्तकयोः ।

१ ग. °रदर्शश° । २ क. °क्रम्यमाणैश्च । ३ क. °न्धैर्विष्ठामूत्रानुलेपनैः । द° । ४ ख. ग. °टहजार्भी° । ५ क. °कैः । श्वभिर्व्या° । ६ क. ख. उत्तिष्ठद्भिः । ७ क. ख. °काभिः सहस्रशः । ८ ग. °र्मयचा° । ९ क. °न्ति धनं स्त्री° । १० क. भग्नाः । ११ ग. गावो । १२ क. °म् । देवद्रव्यं ह° । १३ क. ख. °ह गुरुभूमिं तथैव च । ता° । १४ क. °र्णं वृथा वि° । ग. °र्णं वृषावि° । १५ ख. °टरङ्कुरैः । श° । ग. °टमङ्कुरः । श° । १६ क. ख. °द्रं दीप्तसूर्यप्र° । १७ क. ग. पतते । १८ ग. विविधाका° ।

चतुरस्रा[1] विनिर्दिष्टा चतुर्द्वारवती शुभा। प्राकाराः काञ्चनास्तस्या योजनायुतमुच्छ्रिताः ॥ १०५
इन्द्रनीलमहानीलपद्मरागोपशोभिता। सा पुरी विविधैः संघैर्घोरा घोरैः समाकुला ॥ १०६
देवदानवगन्धर्वैर्यक्षराक्षसपन्नगैः। पूर्वद्वारं शुभं तस्याः पताकाशतशोभितम् ॥ १०७
वज्रेन्द्रनीलवैदूर्यमुक्ताफलविभूषितम्। गीतनृत्यैः समाकीर्णं गन्धर्वाप्सरसां गणैः ॥ १०८
प्रवेशस्तेन देवानामृषीणां योगिनां तथा। गन्धर्वसिद्धयक्षाणां विद्याधरविसर्पिणाम् ॥ १०९
उत्तरं[2] नगरद्वारं घण्टाचामरभूषितम्। छत्रचामरविन्यासं नानारत्नैरलंकृतम् ॥ ११०
वीणावेणुरवै रम्यैर्गीतमङ्गलनादितैः[3]। ऋग्यजुःसामनिर्घोषैर्[4]मुनिवृन्दसमाकुलम् ॥ १११
विशन्ति येन धर्मज्ञाः सत्यव्रतपरायणाः। ग्रीष्मे वारिप्रदा ये च शीते चाग्निप्रदा नराः ॥ ११२
श्रान्तसंवाहका ये च प्रियवादरताश्च ये। ये च दानरताः शूरा मातापितृपराश्च[5] ये ॥ ११३
द्विजशुश्रूषणे युक्ता नित्यं येऽतिथिपूजकाः। पश्चिमं तु महाद्वारं पुर्या रत्नैर्विभूषितम् ॥ ११४
विचित्रमणिसोपानं[6] तोमरैः समलंकृतम्। भेरीमृदङ्गसंनादैः[7] शङ्खकाहलनादितम् ॥ ११५
सिद्धवृन्दैः सदा हृष्टैर्मङ्गलैः प्रणिनादितम्। प्रवेशस्तेन हृष्टानां शिवभक्तिमतां नृणाम् ॥ ११६
सर्वतीर्थप्लुता ये च पञ्चाग्नेर्ये च सेवकाः। प्रस्थाने ये मृता वीरा मृताः[8] कालंजरे गिरौ ॥ ११७
अग्नौ[9] विपन्ना ये वीराः साधितं यैरनाशकम्। ये स्वामिमित्रलोकार्थे गोग्रहे संकुले हताः ॥ ११८
ते विशन्ति नराः शूराः पश्चिमेन तपोधनाः। पुर्यां तस्या महाघोरं सर्वसत्त्वभयंकरम् ॥ ११९
हाहाकारसमाक्रुष्टं दक्षिणं द्वारमीदृशम्। अन्धकार[10]समायुक्तं तीक्ष्णशृङ्गैः समन्वितम् ॥ १२०
कण्टकैर्वृश्चिकैः सर्पैर्वज्रकीटैः सुदुर्गमैः। विलुम्पद्भिर्वृकैर्व्याघ्रैर्ऋक्षैः सिंहैः सजम्बुकैः ॥ १२१
श्वानमार्जारगृध्रैश्च सज्वालकवलैर्मुखैः। प्रवेशस्तेन वै नित्यं सर्वेषाम[11]पकारिणाम् ॥ १२२
ये घातयन्ति विप्रान्गा बालं वृद्धं तथाऽऽतुरम्। शरणागतं विश्वस्तं स्त्रियं मित्रं निरायुधम् ॥
येऽगम्यागामिनो मूढाः परद्रव्यापहारिणः। निक्षेपस्यापहर्तारो विषवह्निप्रदाश्च ये ॥ १२४
परभूमिं गृहं शय्यां वस्त्रालंकारहारिणः। पररन्ध्रेषु ये क्रूरा ये सदाऽनृतवादिनः ॥ १२५
ग्रामराष्ट्र[12]पुर[13]स्थाने महादुःखप्रदा[14] हि ये। कूटसाक्षिप्रदातारः कन्या[15]विक्रयकारकाः ॥ १२६
अभक्ष्यभक्षणरता ये गच्छन्ति सुतां स्नुषाम्। मातरं[16] पितरं चैव ये[17] वदन्ति च पौरुषम् ॥ १२७
अन्ये ये चैव निर्दिष्टा महापातककारिणः। दक्षिणेन तु ते सर्वे द्वारेण प्रविशन्ति वै ॥ १२८

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे यमलोकस्य मार्गस्वरूपाख्याननिरूपणं नाम चतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—११२१२

---

१ ग. °तुष्पथवि°। २ क. ख. °रं तु वर°। ३ ख. °तैः। यजुः°। ४ ख. °सामाथर्वघोषै°। ५ क. मातृभक्तिपरायणाः। द्वि°। ६ ख. °पानमन°। ७ ग. °दैः शङ्खकाहलना°। ८ क. ख. मृता ये पतने गि°। ९ ख. जले। १० क. ग. °कारं निरालोकं ती°। ११ क. ख. °वैषां पापका°। १२ ख. ग्रामे पुरे निवसतां म°। १३ क. °रत्रासम°। १४ क. °प्रवर्धकाः। कू°। १५ क. ग. °न्यावादे च येऽनृताः। अ°। १६ ग. °रं दुहित°। १७ ग. ये गच्छन्ति स्वसामपि। अ°।

अथ पञ्चदशाधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

कथं दक्षिणमार्गेण विशन्ति पापिनः पुरम् । श्रोतुमिच्छाम तद्ब्रूहि विस्तरेण तपोधन ॥ १

व्यास उवाच—

सुघोरं तन्महाघोरं द्वारं वक्ष्यामि भीषणम् । नानाश्वापदसंकीर्णं शिवाशतनिनादितम् ॥ २

फेत्काररवसंयुक्तमगम्यं लोमहर्षणम् । भूतप्रेतपिशाचैश्च वृतं चान्यैश्च राक्षसैः ॥ ३

एवं दृष्ट्वा सुदूरान्ते द्वारं दुष्कृतकारिणः । मोहं गच्छन्ति सहसा त्रासाद्विप्रलपन्ति च ॥ ४

ततस्ताञ्शृङ्खलैः पाशैर्बद्ध्वा कर्षन्ति निर्भयाः । ताडयन्ति च दण्डैश्च भर्त्सयन्ति पुनः पुनः ॥ ५

लब्धसंज्ञास्ततस्ते वै रुधिरेण परिप्लुताः । व्रजन्ति दक्षिणं द्वारं प्रस्खलन्तः पदे पदे ॥ ६

तीव्रकण्टकयुक्तेन शर्करानिचितेन च । क्षुरधारानिभैस्तीक्ष्णैः पाषाणैर्निचितेन च ॥ ७

क्वचित्पङ्केन निचिता निरुत्तारैश्च खातकैः । लोहसूचीनिभैर्दन्तैः संछन्नेन क्वचित्क्वचित् ॥ ८

तटप्रपातविषमैः पर्वतैर्वृक्षसंकुलैः । प्रतप्ताङ्गारयुक्तेन यान्ति मार्गेण दुःखिताः ॥ ९

क्वचिद्विषमगर्ताभिः क्वचिल्लोष्टैः सुपिच्छलैः । सुतप्तवालुकाभिश्च तथा तीक्ष्णैश्च शङ्कुभिः ॥ १०

अयःशृङ्गाटकैस्तप्तैः क्वचिद्दावाग्निना युतम् । क्वचित्तप्तशिलाभिश्च क्वचिद्व्याप्तं हिमेन च ॥ ११

क्वचिद्वालुकया व्याप्तमाकण्ठान्तःप्रवेशया । क्वचिद्दुष्टाम्बुना व्याप्तं क्वचित्कर्षाग्निना पुनः ॥ १२

क्वचित्सिंहैर्वृकैर्व्याघ्रैर्दंशकीटैश्च दारुणैः । क्वचिन्महाजलौकाभिः क्वचिदजगरैः पुनः ॥ १३

मक्षिकाभिश्च रौद्राभिः क्वचित्सर्पविषोल्बणैः । क्वचिद्दुष्टगजैश्चैव बलोन्मत्तैः प्रमाथिभिः ॥ १४

पन्थानमुल्लिखद्भिश्च तीक्ष्णशृङ्गैर्महावृषैः । महाशृङ्गैश्च महिषैरुष्ट्रैर्मत्तैश्च खादनैः ॥ १५

डाकिनीभिश्च रौद्राभिर्विकरालैश्च राक्षसैः । व्याधिभिश्च महारौद्रैः पीड्यमाना व्रजन्ति ते ॥ १६

महाधूलिविमिश्रेण महाचण्डेन वायुना । महापाषाणवर्षेण हन्यमाना निराश्रयाः ॥ १७

क्वचिद्विद्युन्निपातेन दीर्यमाणा व्रजन्ति ते । महता बाणवर्षेण भिद्यमानाश्च सर्वशः ॥ १८

पतद्भिर्वज्रनिर्घातैरुल्कापातैः सुदारुणैः । प्रदीप्ताङ्गारवर्षेण दह्यमाना विशन्ति च ॥ १९

महता पांशुवर्षेण पूर्यमाणा रुदन्ति च । मेघारवैः सुघोरैश्च वित्रास्यन्ते मुहुर्मुहुः ॥ २०

निःशेषाः शरवर्षेण चूर्ण्यमाणाश्च सर्वतः । महाक्षाराम्बुधाराभिः सिच्यमाना व्रजन्ति च ॥ २१

महाशीतेन मरुता रूक्षेण परुषेण च । समन्ताद्दीर्यमाणाश्च शुष्यन्ते संकुचन्ति च ॥ २२

इत्थं मार्गेण पुरुषाः पाथेयरहितेन च । निरालम्बेन दुर्गेण निर्जलेन समन्ततः ॥ २३

अतिश्रमेण महता निर्गतेनाऽऽश्रमाय वै । नीयन्ते देहिनः सर्वे ये मूढाः पापकर्मिणः ॥ २४

यमदूतैर्महाघोरैस्तदाज्ञाकारिभिर्बलात् । एकाकिनः पराधीना मित्रबन्धुविवर्जिताः ॥ २५

शोचन्तः स्वानि कर्माणि रुदन्ति च मुहुर्मुहुः । प्रेतीभूता निषिद्धास्ते शुष्ककण्ठौष्ठतालुकाः २६

कृशाङ्गा भीतभीताश्च दह्यमानाः क्षुधाग्निना । बद्धाः शृङ्खलैया केचित्केचिदुत्तानपादयोः ॥ २७

आकृष्यन्ते शुष्यमाणा यमदूतैर्बलोत्कटैः । नरा अधोमुखाश्चान्ये कृष्यमाणाः सुदुःखिताः ॥ २८

१ क. दक्षिणं । २ क. ख. °सा दुःखाद्वि° । ३ ख. °वृकसं° । ४ ग. महागजेन्द्रघृष्टैश्च । ५ क. प्रहारिभिः । ६ क. °भिः । आकाशमु° । ७ क. °रुन्मत्तैश्चैव सादिभिः । डा° । ८ क. °ज्रसंघातैर्गदाघातैः । ९ क. विशन्ति । १० ग. दुर्गेण । ११ ख. °र्गता ये यमालयम् । नी° । १२ °लकैः के° । १३ क. °चिदुत्तानाः पादचारिणः । आ° ।

अन्नपानीयरहिता याचमानाः पुनः पुनः । देहि देहीति भाषन्तः साश्रुगद्गदया गिरा ॥ २९
कृताञ्जलिपुटा दीनाः क्षुत्तृष्णापरिपीडिताः । भक्ष्यानुच्चावचान्दृष्ट्वा भोज्यान्पेयांश्च पुष्कलान् ॥
सुगन्धद्रव्यसंयुक्तान्याचमानाः पुनः पुनः । दधिक्षीरघृतोन्मिश्रं दृष्ट्वा शाल्योदनं तथा ॥ ३१
पानानि च सुगन्धीनि शीतलान्युदकानि च । तान्याचमानांस्ते याम्या भर्त्सयन्तस्तदाऽब्रुवन् ॥
वचोभिः परुषैर्भीमाः क्रोधरक्तान्तलोचनाः । ३२

याम्या ऊचुः—

न भवद्भिर्हुतं काले न दत्तं ब्राह्मणेषु च । प्रसभं दीयमानं च वारितं च द्विजातिषु ॥ ३३
तस्य पापस्य च फलं भवतां समुपागतम् । नाग्नौ दग्धं जले नष्टं न हृतं नृपतस्करैः ॥ ३४
कुतो वा सांप्रतं विप्रे यन्न दत्तं पुराऽधमाः । यैर्दत्तानि तु दानानि साधुभिः सात्त्विकानि तु ३५
तेषामेते प्रदृश्यन्ते कल्पिता ह्यन्नपर्वताः । भक्ष्यभोज्याश्च पेयाश्च लेह्याश्चोष्याश्च संवृताः ॥ ३६
न यूयमभिलप्स्यध्वे न दत्तं च कथंचन । यैस्तु दत्तं हुतं चेष्टं ब्राह्मणाश्चैव पूजिताः ॥ ३७
तेषामन्नं समानीय इह निक्षिप्यते सदा । परस्वं कथमस्माभिर्दातुं शक्येत नारकाः ॥ ३८

व्यास उवाच—

किंकराणां वचः श्रुत्वा निःस्पृहाः क्षुत्तृषार्दिताः । ततस्ते दारुणैश्चास्त्रैः पीड्यन्ते यमकिंकरैः ३९
मुद्गरैर्लोहदण्डैश्च शक्तितोमरपट्टिशैः । परिघैर्भिन्दिपालैश्च गदापरशुभिः शरैः ॥ ४०
पृष्ठतो हन्यमान्याश्च यमदूतैः सुनिर्दयैः । अग्रतः सिंहव्याघ्राद्यैर्भक्ष्यन्ते पापकारिणः ॥ ४१
न प्रवेष्टुं न निर्गन्तुं लभन्ते दुःखिता भृशम् । स्वकर्मोपहताः पापाः क्रन्दमानाः सुदारुणाः ४२
तत्र संपीड्य सुभृशं प्रवेशं यमकिंकरैः । नीयन्ते पापिनस्तत्र यत्र तिष्ठेत्स्वयं यमः ॥ ४३
धर्मात्मा धर्मकृद्देवः सर्वसंयमनो यमः । एवं पथाऽतिकष्टेन प्राप्ताः प्रेतपुरं नराः ॥ ४४
प्रज्ञापितास्तदा दूतैर्निवेश्यन्ते यमाग्रतः । ततस्ते पापकर्माणस्तं पश्यन्ति भयानकम् ॥ ४५
पापापविद्धनयना विपरीतात्मबुद्धयः । दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥ ४६
ऊर्ध्वकेशं महाश्मश्रुं प्रस्फुरदधरोत्तरम् । अष्टादशभुजं क्रुद्धं नीलाञ्जनचयोपमम् ॥ ४७
सर्वायुधोद्यतकरं तीव्रदण्डेन संयुतम् । महामहिषमारूढं दीप्ताग्निसमलोचनम् ॥ ४८
रक्तमाल्याम्बरधरं महामेघमिवोच्छ्रितम् । प्रलयाम्बुदनिर्घोषं पिबन्निव महोदधिम् ॥ ४९
ग्रसन्तमिव त्रैलोक्यमुद्गिरन्तमिवानलम् । मृत्युं च तत्समीपस्थं कालानलसमप्रभम् ॥ ५०
प्रलयानलसंकाशं कृतान्तं च भयानकम् । मारीचोग्रा महामारी कालरात्री च दारुणा ॥ ५१
विविधा व्याधयः कष्टा नानारूपा भयावहाः । शक्तिशूलाङ्कुशधराः पाशचक्रासिधारिणः ॥ ५२
वज्रदण्डधरा रौद्राः क्षुरतूणधनुर्धराः । असंख्याता महावीर्याः क्रूराश्चाञ्जनसप्रभाः ॥ ५३
सर्वायुधोद्यतकरा यमदूता भयानकाः । अनेन परिवारेण महाघोरेण संवृतम् ॥ ५४
यमं पश्यन्ति पापिष्ठाश्चित्रगुप्तं विभीषणम् । निर्भर्त्सयति चाऽत्यर्थं यमस्तान्पापकारिणः ॥ ५५
चित्रगुप्तस्तु भगवान्धर्मवाक्यैः प्रबोधयन् ॥ ५६

---

१ ख. भोज्यराशींश्च पु° । २ क. ख. °धिखण्डघृ° । ३ ख. °म्या निषेधन्त° । ४ ग. °लं सांप्रतं प्रतिभोक्ष्यथ । ना° । ५ ख. विप्रा । ६ ख. भयंकरम् । ७ क. °पातिबद्धहृदया वि° ।

चित्रगुप्त उवाच—

*भो भो दुष्कृतकर्माणः परद्रव्यापहारिणः । गर्विता रूपवीर्येण परदारविमर्दकाः ॥ ५७
यत्स्वयं क्रियते कर्म तत्स्वयं भुज्यते पुनः । तत्किमात्मोप[1]घातार्थं भवद्भिर्दुष्कृतं कृतम् ॥ ५८
इदानीं किं नु शोचध्वं पीड्यमानाः स्वकर्मभिः । भुञ्जध्वं स्वानि दुःखानि न हि दोषोऽस्ति कस्यचित् ॥ ५९
य एते पृथिवीपालाः संप्राप्ता मत्समीपतः । स्वकीयैः कर्मभिर्घोरैर्दुष्प्रज्ञा बलगर्विताः ॥ ६०
भो भो नृपा दुराचाराः प्रजाविध्वंसकारिणः । अल्पकालस्य राज्यस्य कृते किं दुष्कृतं कृतम् ॥
राज्यलोभेन मोहेन बलादन्यायतः प्रजाः । यै[2]र्दण्डिताः फलं तस्य भुञ्जध्वमधुना नृपाः ॥ ६२
कुतो राज्यं कलत्रं च यदर्थमशुभं कृतम् । तत्सर्वं संपरित्यज्य यूयमेकाकिनः स्थिताः ॥ ६३
प[3]श्यामो न बलं सर्वं येन विध्वंसिताः प्रजाः । यमदूतैः पाड्यमाना अधुना कीदृशं फलम् ॥ ६४

व्यास उवाच—

एवं बहुविधैर्वाक्यैरुपालब्धा यमेन ते । शोचन्तः स्वानि कर्माणि तूष्णीं तिष्ठन्ति पार्थिवाः ॥ ६५
इति कर्म समादिश्य नृपाणां धर्मराट्स्वयम्[4] । तत्पातकविशुद्ध्यर्थमिदं वचनमब्रवीत् ॥ ६६

यम उवाच—

भो भोश्चण्ड महाचण्ड गृहीत्वा नृपतीनिमान् । विशोधयध्वं पापेभ्यः क्रमेण नरकाग्निषु ॥ ६७

व्यास उवाच—

ततः शीघ्रं समुत्थाय नृपान्संगृह्य पादयोः । भ्रामयित्वा तु वेगेन क्षिप्त्वा चोर्ध्वं प्रगृह्य च[5] ६८
तत्तत्पापप्रमाणेन यमदूताः शिलातले । आ[6]स्फोटयन्ति तरसा वज्रेणेव महाद्रुमम् ॥ ६९
ततस्तु रक्तं स्रोतोभिः स्रवते जर्जरीकृतः । [7]निःसंज्ञः स तदा देही निश्चेष्टश्च प्रजायते ॥ ७०
ततः स वायुना स्पृष्टः शनैरुज्जीवते पुनः । ततः पापविशुद्ध्यर्थं क्षिपन्ति नरकार्णवे ॥ ७१
अन्यांश्च ते तदा दूताः पापकर्मरतान्नरान् । निवेदयन्ति विप्रेन्द्रा यमाय भृशदुःखितान् ॥ ७२

यमदूता ऊचुः—

एष देव तवाऽऽदेशादस्मा[8]भिर्मोहितो भृशम् । आनीतो धर्मविमुखः सदा पापरतः परः ॥ ७३
एष लुब्धो दुराचारो महापातकसंयुतः । उपपातककर्ता च सदा हिंसारतोऽशुचिः ॥ ७४
अग[9]म्यागामी दुष्टात्मा परद्रव्यापहारकः । [10]कन्याक्रयी कूटसाक्षी कृतघ्नो मित्रवञ्चकः ॥ ७५
अनेन मदमत्तेन सदा धर्मो [11]विनिन्दितः । पापमाचरितं कर्म मर्त्यलोके दुरात्मना ॥ ७६
इ[12]दानीमस्य देवेश निग्रहानुग्रहौ [13][14]वद । प्रभुरस्य क्रियायोगे वयं वा परिपन्थिनः ॥ ७७

व्यास उवाच—

इति विज्ञाप्य देवेशं न्यस्याग्रे पापकारिणम् । नरकाणां सहस्रे[15]षु लक्षकोटिशते[16]षु च ॥ ७८
किंकरास्ते ततो यान्ति[17] ग्रहीतुमपरान्नरान् । प्रतिपन्ने कृते दोषे यमो वै पापकारिणाम् ॥ ७९

---

* अयं श्लोको नास्ति ख. पुस्तके ।

---

१ ग. °पकारार्थं । २ ख. यत्पीडिताः । ३ क. पश्यत । ४ क. ख. °म् । सर्वपापवि° । ५ क. ग. च । सर्वपापेन महता सुप्रतप्ते शि° । ६ क. आस्फालयन्ति । ख. आपोथयन्ति । ७ ग. निःसङ्गः । ८ ख. °सापरोऽशु° । ९ क. ग. °गम्यगा° । १० क. ग. कन्यानृती । ११ ख. विनाशितः । १२ क. ख. °दानीं तस्य । १३ ख. ग. तव । १४ ख. °द । अन्तरं प्रकि° । १५ क. °स्रेण ल° । १६ क. °तेन च । १७ क. °न्ति गृहीत्वा चाप° ।

समादिशति तान्घोरान्निग्रहाय स्वकिंकरान् । यथा यस्य विनिर्दिष्टो वसिष्ठाद्यैर्विनिग्रहः ॥ ८०
पापस्य[1] तद्व(तं भृ)शं क्रुद्धाः कुर्वन्ति यमकिंकराः । अङ्कुशैर्मुद्गरैर्दण्डैः क्रकचैः शक्तितोमरैः ८१
खड्गशूले[2]निपातैश्च भिद्यन्ते पापकारिणः । नरकाणां सहस्रेषु लक्षकोटिशतेषु च ॥ ८२
स्वकर्मोपार्जितैर्दोषैः पीड्यन्ते यमकिंकरैः । शृणुध्वं नरकाणां च स्वरूपं च भयंकरम् ॥ ८३
नामानि च प्रमाणं च येन यान्ति नराश्च तान् । महावाचीति विख्यातं नरकं शोणितै[3]प्लुतम् ८४
वज्रकण्टकसंमिश्रं योजनायुतविस्तृतम् । तत्र संपीड्यते मग्नो भिद्यते वज्रकण्टके[4] ॥ ८५
वर्षलक्षं महाघोरं गोघाती नरके नरः । योजनानां शतं[5] लक्षं कुम्भीपाकं सुदारुणम् ॥ ८६
ताम्रकुम्भवती दीप्ता वालुकाङ्गारसंवृता । ब्रह्महा भूमि[6]हर्ता च निक्षेपस्यापहारकः ॥ ८७
दह्यन्ते तत्र संक्षिप्ता यावदाभूतसंप्लवम् । रौरवो वज्रनाराचैः प्रज्वलद्भिः समावृतः ॥ ८८
योजनानां सहस्राणि षष्टिरायामविस्तरैः* । भिद्यन्ते तत्र नाराचैः सज्वालैर्नरके नराः ॥ ८९
इक्षुवत्तत्र पीड्यन्ते ये नराः कूटसाक्षिणः । अयोमयं प्रज्वलितं मञ्जूषं नरकं स्मृतम् ॥ ९०
निक्षिप्तास्तत्र दह्यन्ते बन्दिग्राहकृताश्च ये । अप्रतिष्ठेति नरकं पूयमूत्रपुरीषकम् ॥ ९१
अधोमुखः पतेत्तत्र ब्राह्मणस्योपपीडकः । लाक्षाप्रज्वलितं घोरं नरकं तु विलेपकम् ॥ ९२
निमग्नास्तत्र दह्यन्ते मद्यपाने द्विजोत्तमाः । महाप्रभेति नरकं दीप्तशूलमहोच्छ्रयम् ॥ ९३
तत्र शूलेन भिद्यन्ते पतिभार्योपभेदिनः । नरकं च महाघोरं जयन्ती चाऽऽयसी शिला ॥ ९४
तया चाऽऽक्रम्यते पापः परदारोपसेवकः । नरकं शाल्मलाख्यं तु प्रदीप्तदृढकण्टकम् ॥ ९५
तया(दा)लिङ्गति दुःखार्ता नारी बहुनरंगमा । ये वदन्ति सदाऽसत्यं परमर्मावकर्तनम् ॥ ९६
जिह्वा चोच्छ्रिय(च्छिद्य)ते तेषां सदस्यैर्यमकिंकरैः । ये तु रागैः कटाक्षैश्च वीक्षन्ते परयोषितम् ॥
तेषां चक्षूंषि नाराचैर्विध्यन्ते यमकिंकरैः । मातरं येऽपि गच्छन्ति भगिनीं दुहितरं स्नुषाम् ॥९८
स्त्रीबालवृद्धहन्तारो यावदिन्द्राश्चतुर्दश । ज्वाला[7]मालाकुलं रौद्रं महारौरवसंज्ञितम् ॥ ९९
नरकं योजनानां च सहस्राणि [8]चतुर्दश । पुरं क्षेत्रं गृहं ग्रामं यो दीपयति वह्निना ॥ १००
स तत्र दह्यते मूढो यावत्कल्पस्थितिर्नरः । तामिस्रमिति विख्यातं लक्षयोजनविस्तृतम् ॥ १०१
निपतद्भिः सदा रौद्रैः खड्गपट्टिशमुद्गरैः । तत्र चौरा नराः क्षिप्तास्ताड्य[9]न्ते यमकिंकरैः ॥ १०२
शूलशक्तिगदाखड्गैर्यावत्कल्पशतत्रयम् । तामिस्राद्द्विगुणं प्रोक्तं महातामिस्रसंज्ञितम् ॥ १०३
जलौकासर्पसंपूर्णं निरालोकं सुदुःखदम् । मातृहा पितृहा चैव मित्रविस्रम्भघातकः ॥ १०४
तिष्ठन्ति[10] तक्ष्यमाणाश्च यावत्तिष्ठति मेदिनी । असिपत्रवनं नाम नरकं भूरिदुःखदम् ॥ १०५
योजनायुतविस्तारं ज्वलत्खड्गैः समाकुलम् । पातितस्तत्र तैः खड्गैः शतधा तु समाहतः ॥ १०६
मित्रघ्नः कृत्यते तावद्यावदाभूतसंप्लवम् । करम्भवालुका नाम नरकं योजनायुतम् ॥ १०७
कूपाकारं वृतं दीप्तैर्वालुकाङ्गारकण्टकैः । दह्य[11]ते भिद्यते वर्षलक्षायुतै[12]शतत्रयम् ॥ १०८
येन दग्धो जनो नित्यं मिथ्योपायैः सुदारुणैः । काकोलं नाम नरकं क्रि[13]मिपूयपरिप्लुतम् ॥ १०९

---

* इदमार्षम् ।

---

१ ग. °स्य संक्षयं क्रु° । २ क. °लप्रपा° । ३ क. °तप्लवम् । ४ क. °ण्टकैः । व° । ५ ख. स्मृतं । ६ क. °मिहारी च । ७ ग. °लाधूमाकु° । ८ ग. च सप्ततिः । पु° । ९ ग. °न्ते वाऽऽयुधैर्भृशम् । शू° । १० ग. °न्ति भक्ष्य° । ११ क. °ते तत्र वर्षायुतत्रयं पुनः । ये° । १२ ख. °तत्रयं पुनः । ये° । १३ क. °मिकीटप° ।

क्षिप्यते तत्र दुष्टात्मा एकाकी मिष्टभुङ्नरः । कुड्मलं नाम नरकं पूर्णं विण्मूत्रशोणितैः ॥ ११०
पञ्चयज्ञक्रियाहीनाः क्षिप्यन्ते तत्र वै नराः । सुदुर्गन्धं महाभीमं मांसशोणितसंकुलम् ॥ १११
अभक्ष्यान्ने रतास्तेऽत्र निपतन्ति नराधमाः । क्रिमिकीटसमाकीर्णं शवपूर्णं महावटम् ॥ ११२
अधोमुखः पतेत्तत्र कन्याविक्रयकृन्नरः । नाम्ना वै तिलपाकेति नरकं दारुणं स्मृतम् ॥ ११३
तिलवत्तत्र पीड्यन्ते परपीडारताश्च ये । नरकं तैलपाकेति ज्वलत्तैलमहीप्लवम् ॥ ११४
पच्यते तत्र मित्रघ्नो हन्ता च शरणागतम् । नाम्ना वज्रकपाटेति वज्रशृङ्खलयाऽन्वितम् ॥ ११५
पीड्यन्ते निर्दयं तत्र यैः कृतः क्षीरविक्रयः । निरुच्छ्वास इति प्रोक्तं तमोन्धं वातवर्जितम् ११६
निश्चेष्टं क्षिप्यते तत्र विप्रदाननिरोधकृत् । अङ्गारोपचयं नाम दीप्ताङ्गारसमुज्ज्वलम् ॥ ११७
दह्यते तत्र येनोक्तं दानं विप्राय नार्पितम् । महापायीति नरकं लक्षयोजनमायतम् ॥ ११८
पात्यन्तेऽधोमुखास्तत्र ये जल्पन्ति सदाऽनृतम् । महाज्वालेति नरकं ज्वालाभास्वरभीषणम् ॥
दह्यते तत्र सुचिरं यः पापे बुद्धिकृन्नरः । नरकं क्रकचाख्यातं पीड्यन्ते तत्र वै नराः ॥ १२०
क्रकचैर्वज्रधारोग्रैरगम्यागमने रताः । नरकं गुडपाकेति ज्वलद्गुडह्रदैर्वृतम् ॥ १२१
निक्षिप्तो दह्यते तस्मिन्वर्णसंकरकृन्नरः । क्षुरधारेति नरकं तीक्ष्णक्षुरसमावृतम् ॥ १२२
छिद्यन्ते तत्र कल्पान्तं विप्रभूमिहरा नराः । नरकं चाम्बरीषाख्यं प्रलयानलदीपितम् ॥ १२३
कल्पकोटिशतं तत्र दह्यते स्वर्णहारकः । नाम्ना वज्रकुठारेति नरकं वज्रसंकुलम् ॥ १२४
छिद्यन्ते तत्र छेत्तारो द्रुमाणां पापकारिणः । नरकं परितापाख्यं प्रलयानलदीपितम् ॥ १२५
गरदो मधुहर्ता च पच्यते तत्र पापकृत् । नरकं कालसूत्रं च वज्रसूत्रविनिर्मितम् ॥ १२६
भ्रमन्तस्तत्र छिद्यन्ते परसस्योपलुण्ठकाः । नरकं कश्मलं नाम श्लेष्मशिङ्घाणकावृतम् ॥१२७
तत्र संक्षिप्यते कल्पं सदा मांसरुचिर्नरः । नरकं चोग्रगन्धेति लालामूत्रपुरीषवत् ॥ १२८
क्षिप्यन्ते तत्र नरके पितृपिण्डाप्रयच्छकाः* । नरकं दुर्धरं नाम जलौकावृश्चिकाकुलम् ॥ १२९
उत्कोचभक्षकस्तत्र तिष्ठते वर्षकायुतम् । यच्च वज्रमहापीडा नरकं वज्रनिर्मितम् ॥ १३०
तत्र प्रक्षिप्य दह्यन्ते पीड्यन्ते यमकिंकरैः । धनं धान्यं हिरण्यं वा परकीयं हरन्ति ये ॥ १३१
यमदूतैश्च चौरास्ते छिद्यन्ते लवशः क्षुरैः । ये हत्वा प्राणिनं मूढाः खादन्ते काकगृध्रवत् ॥१३२
भोज्यन्ते च स्वमांसं ते कल्पान्तं यमकिंकरैः । आसनं शयनं वस्त्रं परकीयं हरन्ति ये ॥ १३३
यमदूतैश्च ते मूढा भिद्यन्ते शक्तितोमरैः । फलं पत्रं नृणां वाऽपि हृतं यैस्तु कुबुद्धिभिः ॥ १३४
यमदूतैश्च ते क्रुद्धैर्दह्यन्ते तृणवह्निभिः । परद्रव्ये कलत्रे च यः सदा दुष्टधीर्नरः ॥ १३५
यमदूतैर्ज्वलत्तस्य हृदि शूलं निखन्यते । कर्मणा मनसा वाचा ये धर्मविमुखा नराः ॥ १३६
यमलोके तु ते घोरा लभन्ते परियातनाः । एवं शतसहस्राणि लक्षकोटिशतानि च ॥ १३७
नरकाणि नरैस्तत्र भुज्यन्ते पापकारिभिः । इह कृत्वा स्वल्पमपि नरः कर्माशुभात्मकम् ॥ १३८
प्राप्नोति नरके घोरे यमलोकेषु यातनाम् । न शृण्वन्ति नरा मूढा धर्मोक्तं साधु भाषितम् १३९

* छादेश आर्षः ।

१ क. ख. °तकर्दमम् । २ क. ख. °भक्ष्यनिर° । ३ ख °पातीति । ग. °पातेति । ४ क. °म् । यान्ति तेऽधो° । ५ ग. पात्यन्तेऽ° । ६ ग. वज्रसूचिसमावृतम् । ७ ख. °री ख्यातं प्र° । ८ क. °कं चातिता° । ९ क. °रस्वस्या° । १० ख. °ल्पं मयमां° । ११ क °क्षणस्त° । १२ ख. °श्च ते मूढाः । १३ क ख. सेव्यन्ते ।

दृष्टं केनेति प्रत्यक्षं [1]प्रत्युक्त्यैवं वदन्ति ते। दिवा रात्रौ प्रयत्नेन पापं कुर्वन्ति ये नराः ॥ १४०
नाऽऽचरन्ति हि ते धर्मं प्रमादेनापि मोहिताः। इहैव फलभोक्तारः परत्र विमुखाश्च ये ॥ १४१
ते पतन्ति सुघोरेषु नरकेषु नराधमाः। दारुणो नरके वासः स्वर्गवासः सुखप्रदः ॥
नरैः संप्राप्यते तत्र कर्म कृत्वा शुभाशुभम् ॥ १४२

इति श्रीमहापुराणे आदिब्राह्मे व्याससर्षिसंवादे नरकगतपृथग्यातनाकीर्तनं नाम पञ्चदशाधिकद्विशततमोऽध्यायः ॥ २१५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—११३५४

अथ षोडशाधिकद्विशततमोऽध्यायः।

मुनय ऊचुः—
*अहोऽतिदुःखं घोरं च यममार्गे त्वयोदितम्। नरकाणि च घोराणि द्वारं याम्यं च सत्तम १
अस्त्युपायो न वा ब्रह्मन्यममार्गेऽतिभीषणे। ब्रूहि येन नरा यान्ति सुखेन यमसादनम् ॥ २

व्यास उवाच—
इह ये धर्मसंयुक्तास्त्वहिंसानिरता नराः। गुरुशुश्रूषणे युक्ता देवब्राह्मणपूजकाः ॥ ३
यस्मिन्मनुष्यलोकास्ते सभार्याः ससुतास्तथा। तमध्वानं च गच्छन्ति यथा तत्कथयामि वः ॥४
विमानैर्विविधैर्दिव्यैः काञ्चनध्वजशोभितैः। धर्मराजपुरं यान्ति सेवमानाप्सरोगणैः ॥ ५
ब्राह्मणेभ्यस्तु दानानि नानारूपाणि भक्तितः। ये प्रयच्छन्ति ते यान्ति सुखेनैव महापथे ॥ ६
अन्नं ये तु प्रयच्छन्ति ब्राह्मणेभ्यः सुसंकृतम्। श्रोत्रियेभ्यो विशेषेण भक्त्या परमया युताः ॥७
तरुणीभिर्वरस्त्रीभिः सेव्यमानाः प्रयत्नतः। धर्मराजपुरं यान्ति विमानैरभ्यलंकृतैः ॥ ८
ये च सत्यं प्रभाषन्ते बहिरन्तश्च निर्मलाः। तेऽपि यान्त्यमरप्रख्या विमानैर्यममन्दिरम् ॥ ९
गोदानानि पवित्राणि विष्णुमुद्दिश्य साधुषु। ये प्रयच्छन्ति धर्मज्ञाः कृशेषु कृशवृत्तिषु ॥ १०
ते यान्ति दिव्यवर्णाभैर्विमानैर्मणिचित्रितैः। धर्मराजपुरं श्रीमान्सेव्य(व)मानाप्सरोगणैः ॥ ११
उपानद्युगलं छत्रं शय्यासनमथापि वा। ये प्रयच्छन्ति वस्त्राणि तथैवाऽऽभरणानि च ॥ १२
ते यान्त्यश्वै रथैश्चैव कुञ्जरैश्चाप्यलंकृताः। धर्मराजपुरं दिव्यं छत्रैः सौवर्णराजतैः ॥ १३
ये च भक्त्या प्रयच्छन्ति गुडपानकमर्चितम्। [3]ओदनं च द्विजाग्र्येभ्यो विशुद्धेनान्तरात्मना १४
ते यान्ति काञ्चनैर्यानैर्[4]विविधैस्तु यमालयम्। वरस्त्रीभिर्यथाकामं सेव्यमानाः पुनः पुनः ॥ १५
ये च क्षीरं प्रयच्छन्ति घृतं दधि गुडं मधु। ब्राह्मणेभ्यः [6]प्रयत्नेन [7]शुद्ध्योपेतं सुसंस्कृतम् ॥ १६
चक्रवाकप्रयुक्तैश्च विमानैस्तु हिरण्मयैः। यान्ति गन्धर्ववादित्रैः सेव्यमाना यमालयम् ॥ १७
ये फलानि प्रयच्छन्ति पुष्पाणि सुरभीणि च। हंसयुक्तैर्विमानैस्तु यान्ति [8]धर्मपुरं नराः ॥ १८
ये तिलांस्तिलधेनुं च घृतधेनुमथापि वा। श्रोत्रियेभ्यः प्रयच्छन्ति विप्रेभ्यः श्रद्धयाऽन्विताः १९

---

* संधिरार्षः।

---

१ क. ख. प्रत्यक्षेण। २ क. धर्मयुक्ताश्च। ३ क. दक्षिणां। ख. अयने। ४ ख. °विमानैर्याम्यमा°। ५ क. ख. तथा। ६ ख. पुण्यदिने। ७ क. श्रद्धोपेतं। ख. शुद्धं मन्त्रसु°। ८ क. धर्मपुरीं।

सोममण्डलसंकाशैर्यानैस्ते यान्ति [1]निर्मलैः । गन्धर्वैरुपगीयन्ते पुरे वैवस्वतस्य ते ॥ २०
येषां वाप्यश्च कूपाश्च तडागानि सरांसि च । दीर्घिकाः पुष्करिण्यश्च शीतलाश्च जलाशयाः २१
यानैस्ते हेमचन्द्राभैर्दिव्यघण्टानिनादितैः । व्यजनैस्तालवृन्तैश्च वीज्यमाना महाप्रभाः ॥ २२
[2]येषां देवकुलान्यत्र चित्राण्यायतनानि च । रत्नैः प्रस्फुरमाणानि मनोज्ञानि शुभानि च ॥ २३
ते यान्ति लोकपालैस्तु विमानैर्वातरंहसैः । धर्मराजपुरं [3]दिव्यं नानाजनसमाकुलम् ॥ २४
*पानीयं ये प्रयच्छन्ति सर्व[4]प्राण्युपजीवितम् । [5]ते वितृष्णाः सुखं यान्ति विमानैरतं महापथम्
काष्ठपादुकयानानि पीठकान्यासनानि च । यैर्दत्तानि द्विजातिभ्यस्तेऽध्वानं यान्ति वै सुखम् २६
सौवर्णमणिपीठेषु पादौ कृत्वोत्तमेषु च । ते प्रयान्ति विमानैस्तु अप्सरोगणमण्डितैः ॥ २७
आरामाणि विचित्राणि पुष्पाढ्यानीह मानवाः । रोपयन्ति फलाढ्यानि नराणामुपकारिणः २८
वृक्षच्छायासु रम्यासु शीतलासु स्वलंकृताः । वरस्त्रीगीतवाद्यैश्च सेव्यमाना व्रजन्ति ते ॥ २९
सुवर्णं रजतं वाऽपि विद्रुमं मौक्तिकं तथा । ये प्रयच्छन्ति ते यान्ति विमानैः कनकोज्ज्वलैः ३०
भूमिदा दीप्यमानाश्च सर्वकामैस्तु तर्पिताः । उदितादित्यसंकाशै[6]र्विमानैर्भृशनादितैः ॥ ३१
कन्यां तु ये प्रयच्छन्ति ब्रह्मदेयामलंकृताम् । दिव्यकन्यावृता यान्ति विमानैस्ते यमालयम्॥ ३२
सुगन्धागुरुकर्पूरान्पुष्पधूपान्द्विजोत्तमाः । प्रयच्छन्ति द्विजातिभ्यो भक्त्या परमयाऽन्विताः॥ ३३
ते सुगन्धाः सुवेशाश्च सुप्रभाः सुविभूषिताः । यान्ति धर्मपुरं यानैर्विचित्रैरभ्यलंकृताः ॥ ३४
दीपदा यान्ति यानैश्च दीपयन्तो दिशो दश । आदित्यसदृशैर्यानैर्दीप्यमाना यथाऽग्नयः ॥ ३५
गृहावसथदातारो गृहैः काञ्चनमण्डितैः । व्रजन्ति बालार्कनिभैर्धर्मराजगृहं नराः ॥ ३६
जलभाजनदातारः कुण्डिकाकरकप्रदाः । पूजमानाप्सरोभिश्च यान्ति दृप्ता महागजैः ॥ ३७
पादाभ्यङ्गं शिरोभ्यङ्गं स्नानपानोदकं तथा । ये प्रयच्छन्ति विप्रेभ्यस्ते यान्त्यश्वैर्यमालयम्॥ ३८
विश्रामयन्ति ये विप्राञ्श्रान्तानध्वनि कर्शितान् । चक्रवाकप्रयुक्तेन यान्ति यानेन ते सुखम्[7] ३९
स्वागतेन च यो विप्रं पूजयेदासनेन च[8] । स गच्छति तमध्वानं सुखं परमनिर्[9]वृतः ॥ ४०
नमो ब्रह्मण्यदेवेति यो हरिं चाभिवादयेत्[10] । गां च पापहरेत्युक्त्वा सुखं यान्ति च त[11]त्पथम् ४१
अनन्तराशिनो ये च दम्भानृतविवर्जिताः । तेऽपि[12] सारसयु[13]क्तैस्तु यान्ति यानैश्च तत्प[14]थम्॥ ४२
वर्तन्ते ह्येकभक्तेन [15]शाठ्यदम्भविवर्जिताः । हंसयुक्तैर्विमानैस्तु सुखं यान्ति यमालयम् ॥ ४३
चतुर्थेनैकभक्तेन वर्तन्ते ये जितेन्द्रियाः । ते यान्ति धर्मनगरं यानैर्बर्हिणयोजितैः ॥ ४४
तृतीये दिवसे ये तु भुञ्जते नियतव्रताः । तेऽपि हस्तिरथैर्दिव्यैर्यान्ति यानैश्च तत्पदम् ॥ ४५
षष्ठेऽन्नभक्षको यस्तु शौचनित्यो जितेन्द्रियः । स याति कुञ्जरस्थस्तु शचीपतिरिव स्वयम् ॥ ४६
धर्मराजपुरं दिव्यं नानामणिविभूषितम् । नानास्वरसमायुक्तं जयशब्दरवैर्युतम् ॥ ४७
पक्षोपवासिनो यान्ति यानैः शार्दूलयोजितैः । पुरं तद्धर्मराजस्य सेव्यमा[16]नाः सुरासुरैः ॥ ४८

* अयं श्लोको नास्ति ख. पुस्तके ।

१ क. ख. निर्मलाः । २ ख. ये च कुर्वन्ति भूलोके दिव्यान्याय° । ३ क. ख. रम्यं । ४ क. °प्राणिषु जीवनम् । ५ ग. तेऽपि तृप्ताः सु° । ६ ग. °नैर्वृषयोजितैः । ७ क °म् । ये तोषयन्ति पथिकानासनैः स्वागतेन । ८ क. च । ते गच्छन्ति महाध्वा° । ९ क. °र्वृताः । परत्र° । १० ग. °त् । गावः सर्वं सहेत्यु° । ११ क. तत्पुरम् । १२ क. °पि हंससमायु° । १३ क. °क्तैर्विमानैर्यान्ति त° । १४ क. ख. °त्पदम् । १५ क. शाकभक्ष्यवि° । १६ क. °मानं सु° ।

ये च मासोपवासं तु कुर्वते [1]संयतेन्द्रियाः । तेऽपि सूर्यप्रदीप्तैस्तु यान्ति यानैर्यमालयम् ॥ ४९
महाप्रस्थानमेकाग्रो यः प्रयाति दृढव्रतः । सेव्यमानस्तु गन्धर्वैर्याति यानैर्यमालयम् ॥ ५०
शरीरं[3] साधयेद्यस्तु वैष्णवेनान्तरात्मना । स रथेनाग्निवर्णेन यातीह त्रिदशालयम् ॥ ५१
अग्निप्रवेशं यः कुर्यान्नारायणपरायणः । स यात्यग्निप्रकाशेन विमानेन यमालयम् ॥ ५२
प्राणांस्त्यति यो मर्त्यः स्मरन्विष्णुं सनातनम् । यानेनार्कप्रकाशेन याति धर्मपुरं नरः ॥ ५३
प्रविष्टोऽन्तर्जलं यस्तु प्राणांस्त्यजति मानवः । सोममण्डलकल्पेन याति यानेन वै सुखम्[4] ॥ ५४
स्वशरीरं हि गृध्रेभ्यो वैष्णवो यः प्रयच्छति । स याति रथमुख्येन काञ्चनेन यमालयम् ॥ ५५
स्त्रीग्रहे गोग्रहे वाऽपि युद्धे मृत्युमुपैति यः । स यात्यमरकन्याभिः सेव्यमानो रविप्रभः ॥ ५६
वैष्णवा ये च कुर्वन्ति तीर्थयात्रां जितेन्द्रियाः । तत्पथं यान्ति ते घोरं सुखयानैरलंकृताः ॥ ५७
ये यजन्ति द्विजश्रेष्ठाः क्रतुभिर्भूरिदक्षिणैः । तप्तहाटकसंकाशैर्विमानैर्यान्ति ते सुखम् ॥ ५८
परपीडामकुर्वन्तो भृत्यानां भरणादिकम् । कुर्वन्ति ते सुखं यान्ति विमानैः कनकोज्ज्वलैः ॥ ५९
ये क्षान्ताः सर्वभूतेषु प्राणिनामभयप्रदाः । क्रोधमोहविनिर्मुक्ता [5]निर्मदाः संयतेन्द्रियाः ॥ ६०
पूर्णचन्द्रप्रकाशेन विमानेन महाप्रभाः । यान्ति वैवस्वतपुरं देवगन्धर्वसेविताः ॥ ६१
एकभावेन ये विष्णुं ब्रह्माणं त्र्यम्बकं [6]रविम् । पूजयन्ति हि ते यान्ति विमानैर्भास्करप्रभैः ॥ ६२
ये च मांसं न खादन्ति सत्यशौचसमन्विताः । तेऽपि यान्ति सुखेनैव धर्मराजपुरं नराः ॥ ६३
मांसान्मिष्टतरं नास्ति भक्ष्यभोज्यादिकेषु च । तस्मान्मांसं न भुञ्जीत नास्ति मिष्टैः सुखोदयः ॥
गोसहस्रं तु यो दद्याद्यस्तु मांसं न भक्षयेत् । समावेतौ पुरा प्राह ब्रह्मा वेदविदां वरः ॥ ६५
सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलम् । अमांसभक्षणे विप्रास्तच्च तच्च च तत्समम् ॥ ६६
एवं सुखेन ते यान्ति यमलोकं च धार्मिकाः । दानव्रतपरा यानैर्यत्र देवो रवेः सुतः ॥ ६७
दृष्ट्वा तान्धार्मिकान्देवः स्वयं संमानयेद्यमः । स्वागतासनदानेन पाद्यार्घ्येण प्रियेण तु ॥ ६८
धन्या यूयं महात्मान आत्मनो हितकारिणः । येन दिव्यसुखार्थाय भवद्भिः सुकृतं कृतम् ॥ ६९
इदं विमानमारुह्य दिव्यस्त्रीभोगभूषिताः । स्वर्गं गच्छध्वमतुलं सर्वकामसमन्वितम् ॥ ७०
तत्र भुक्त्वा महाभोगानन्ते पुण्यपरिक्षयात् । यत्किंचिदल्पमशुभं फलं तदिह भोक्ष्यथ ॥ ७१
ये तु तं धर्मराजानं नराः पुण्यानुभावतः । पश्यन्ति सौम्यमनसं पितृभूतमिवाऽऽत्मनः ॥ ७२
तस्माद्धर्मः सेवितव्यः सदा मुक्तिफलप्रदः । धर्मादर्थस्तथा कामो मोक्षश्च परिकीर्त्यते ॥ ७३
धर्मो माता पिता भ्राता धर्मो नाथः सुहृत्तथा । धर्मः स्वामी सखा गोप्ता तथा धाता च पोषकः
धर्मादर्थोऽर्थतः कामः कामाद्भोगः सुखानि च । धर्मादैश्वर्यमेकाग्र्यं धर्मात्स्वर्गगतिः परा ॥ ७५
धर्मस्तु सेवितो विप्रास्त्रायते महतो भयात् । देवत्वं च द्विजत्वं च धर्मात्प्राप्नोत्यसंशयम् ॥ ७६
यदा च क्षीयते पापं नराणां पूर्वसंचितम् । तदैषां भजते बुद्धिर्धर्मं चात्र द्विजोत्तमाः ॥ ७७
जन्मान्तरसहस्रेषु मानुष्यं प्राप्य दुर्लभम् । यो हि नाऽऽचरते धर्मं भवेत्स खलु वञ्चितः ॥ ७८
कुत्सिता ये दरिद्राश्च विरूपा व्याधितास्तथा । परप्रेष्याश्च मूर्खाश्च ज्ञेया धर्मविवर्जिताः ॥ ७९
ये हि दीर्घायुषः शूराः पण्डिता[10] भोगिनोऽर्थिनः । अरोगा रूपवन्तश्च तैस्तु धर्मः पुरा कृतः ८०

१ क. ख. सुसमाहिताः । २ ख. °नसमये हरिं स्मरति मानवः । से° । ३ क. °रं शोध° । ४ क. °म् । मिष्टान्नभोजनं यस्तु वैष्णवेभ्यः प्र° । ५ क. निर्मलाः । ६ ख. गुरुम् । ७ ख. °द्धर्मश्चिन्तनीयः स° । ८ क. ख° °प्ता त्राता धा° । ९ ग. °धिनस्त° । १० ख. °ता भागि° ।

एवं धर्मरता विप्रा गच्छन्ति गतिमुत्तमाम् । अधर्मं सेवमानास्तु तिर्यग्योनिं व्रजन्ति ते ॥ ८१
ये नरा नरकध्वंसिवासुदेवमनुव्रताः । ते स्वप्नेऽपि न पश्यन्ति यमं वा नरकाणि वा ॥ ८२
अनादिनिधनं देवं दैत्यदानवदारणम् । ये नमन्ति नरा नित्यं नहि पश्यन्ति ते यमम् ॥ ८३
कर्मणा मनसा वाचा येऽच्युतं शरणं गताः । न समर्थो यमस्तेषां ते मुक्तिफलभागिनः ॥ ८४
ये जना जगतां नाथं नित्यं नारायणं द्विजाः । नमन्ति नहि ते विष्णोः स्थानादन्यत्र गामिनः
न ते दूतान्न तन्मार्गं न यमं न च तां पुरीम् । प्रणम्य विष्णुं पश्यन्ति नरकाणि [1]कथंचन ॥ ८६
कृत्वाऽपि बहुशः पापं नरा मोहसमन्विताः । न यान्ति नरकं नत्वा सर्वपापहरं हरिम्[2] ॥ ८७
शाठ्येनापि नरा नित्यं ये स्मरन्ति जनार्दनम् । तेऽपि यान्ति [3]तनुं त्यक्त्वा विष्णुलोकमनामयम्
अत्यन्तक्रोधसक्तोऽपि कदाचित्कीर्तयेद्धरिम् । सोऽपि दोषक्षयान्मुक्तिं ल[4]भेच्चेदिपतिर्यथा ॥ ८९

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे धार्मिकाणां सुगतिनिरूपणं नाम
षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—११४४३

अथ सप्तदशाधिकद्विशततमोऽध्यायः ।

लोमहर्षण उवाच—

श्रुत्वैवं यममार्गं ते नरकेषु च [5]यातनाम् । पप्रच्छुश्च पुनर्व्यासं संशयं मुनिसत्तमाः ॥ १

मुनय ऊचुः—

भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद । मर्त्यस्य कः सहा यो वै पिता माता सुतो गुरुः ॥ २
ज्ञातिसंबन्धिवर्गश्च मित्रवर्गस्तथैव च । [6]गृहं शरीरमुत्सृज्य काष्ठलोष्टसमं जनाः ॥
गच्छन्त्यमुत्र लोके वै कश्चताननुगच्छति ॥ ३

व्यास उवाच—

एकः प्रसूयते विप्रा एक एव हि नश्यति । एकस्तरति दुर्गाणि गच्छत्येकस्तु [7]दुर्गतिम् ॥ ४
असहायः पिता माता तथा भ्राता सुतो गुरुः । ज्ञातिसंबन्धिवर्गश्च मित्रवर्गस्तथैव च ॥ ५
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं जनाः । मुहू[8]र्तमिव रोदित्वा ततो यान्ति पराङ्मुखाः ॥ ६
तैस्तच्छरीरमुत्सृष्टं धर्म [9]एकोऽनुगच्छति । तस्माद्धर्मः सहायश्च सेवितव्यः सदा नृभिः ॥ ७
प्राणी धर्मसमायुक्तो गच्छेत्स्वर्गगतिं पराम् । तथैवाधर्मसंयुक्तो नरकं चोपपद्यते ॥ ८
तस्मा[10]त्पापागतैरर्थै[11]र्नानुरज्येत [12]पण्डितः । धर्म [13]एको मनुष्याणां सहायः परिकीर्तितः ॥ ९
लोभान्मोहादनुक्रोशाद्भयाद्[14]द्वाऽथ[15] बहुश्रुतः । नरः करोत्यकार्याणि परार्थे लोभमोहितः ॥ १०
धर्मश्चार्थश्च कामश्च त्रितयं जीवतः फलम् । ए[16]तत्त्रयमवाप्तव्यमधर्मपरिवर्जितम् ॥ ११

---

१ ख. कदाचन । २ क. °म् । सुखेना° । ३ ख. यमं । ४ क. °भेदिति मतिर्मम ॥ ८९ ॥ ५ ख. पातनम् । ६ ग. मृतं । ७ क. स्वर्गतिम् । ८ ख. °र्तमपि रो° । ९ क. ख. एवानु° । १० ख. °स्मान्याग° । ११ ख. °थैर्धर्मः सेव्यस्तु प° । १२ ख. पण्डितैः । १३ ख. एष । १४ ग. °द्वाऽप्यव° । १५ क. ग. जीविते । ख. जीविनः । १६ क. °तत्तु धर्म-वाक्यं मे अध° ।

मुनय ऊचुः—

श्रुतं भगवतो वाक्यं धर्मयुक्तं परं हितम् । शरीरनिचयं ज्ञातुं बुद्धिर्नोऽत्र प्रजायते ॥ १२

मृतं शरीरं हि नृणां सूक्ष्ममव्यक्ततां गतम् । अचक्षुर्विषयं प्राप्तं कथं धर्मोऽनुगच्छति ॥ १३

व्यास उवाच—

पृथिवी वायुराकाशमापो ज्योतिर्मनोन्तरम् । बुद्धिरात्मा च सहिता धर्मं पश्यन्ति नित्यदा ॥ १४

प्राणिनामिह सर्वेषां साक्षिभूतां दिवानिशम् । एतैश्च सह धर्मो हि तं जीवमनुगच्छति ॥ १५

त्वगस्थि मांसं शुक्रं च शोणितं च द्विजोत्तमाः । शरीरं वर्जयन्त्येते जीवितेन विवर्जितम् ॥ १६

ततो धर्मसमायुक्तः स जीवः सुखमेधते । इहलोके परे चैव किं भूयः कथयामि वः ॥ १७

मुनय ऊचुः—

तद्दर्शितं भगवता यथा धर्मोऽनुगच्छति । एतत्तु ज्ञातुमिच्छामः कथं रेतः प्रवर्तते ॥ १८

व्यास उवाच—

अन्नमश्नन्ति ये देवाः शरीरस्था द्विजोत्तमाः । पृथिवी वायुराकाशमापो ज्योतिर्मनस्तथा ॥ १९

ततस्तृप्तेषु भो विप्रास्तेषु भूतेषु पञ्चसु । मनःषष्ठेषु शुद्धात्मा रेतः संपद्यते महत् ॥ २०

ततो गर्भः संभवति श्लेष्मा स्त्रीपुंसयोर्द्विजाः । एतद्वः सर्वमाख्यातं किं भूयः श्रोतुमिच्छथ ॥ २१

मुनय ऊचुः—

आख्यातं नो भगवता गर्भः संजायते यथा । यथा जातस्तु पुरुषः प्रपद्यते तदुच्यताम् ॥ २२

व्यास उवाच—

आसन्नमात्रपुरुषस्तैर्भूतैरभिभूयते । विप्रयुक्तस्तु तैर्भूतैः पुनर्यात्यपरां गतिम् ॥ २३

स च भूतसमायुक्तः प्राप्नोति जीवमेवहि । ततोऽस्य कर्म पश्यन्ति शुभं वा यदि वाऽशुभम् ॥
देवताः पञ्चभूतस्थाः किं भूयः श्रोतुमिच्छथ ॥ २४

मुनय ऊचुः—

त्वगस्थि मांसमुत्सृज्य तैस्तु भूतैर्विवर्जितः । जीवः स भगवन्कस्थः सुखदुःखे समश्नुते ॥ २५

व्यास उवाच—

जीवः कर्मसमायुक्तः शीघ्रं रेतःसमागतः । स्त्रीणां पुष्पं समासाद्य ततः कालेन भो द्विजाः २६

यमस्य पुरुषैः क्लेशो यमस्य पुरुषैर्वधः । दुःखं संसारचक्रं च नरः क्लेशं च विन्दति ॥ २७

इह लोके स तु प्राणी जन्मप्रभृति भो द्विजाः । सुकृतं कर्म वै भुङ्क्ते धर्मस्य फलमाश्रितः ॥ २८

यदि धर्मं समायुज्य जन्मप्रभृति सेवते । ततः स पुरुषो भूत्वा सेवते नित्यदा सुखम् ॥ २९

अथान्तरान्तरं धर्ममधर्ममुपसेवते । सुखस्यानन्तरं दुःखं स जीवोऽप्यधिगच्छति ॥ ३०

अधर्मेण समायुक्तो यमस्य विषयं गतः । महादुःखं समासाद्य तिर्यग्योनौ प्रजायते ॥ ३१

कर्मणा येन येनेह यस्यां योनौ प्रजायते । जीवो मोहसमायुक्तस्तन्मे शृणुत सांप्रतम् ॥ ३२

---

१ ख. अतिनिर्वि° । २ क. ख. °दा । सर्वथा त्विह । ३ ग. °तानि चानि° । ४ ख. °रीरे वर्तते सर्वं जी° । ५ क. वर्तय° । ६ ख. °तेनाऽऽवृते पुनः । त° । ७ क. °सप्तमात्तु पु° । ८ ख. °मात्मा पु° । ९ क. ख. °रुषः स्वैर्गर्भैरनुभू° । १० क. ख. °स्तु तैः सर्वैः पु° । ११ क. ख. सर्वभू° । १२ क. ख. °श्च किं । १३ क. ख. भूयो मुनयः श्रो° । १४ क. ख. °तः प्रवर्तते । स्त्री° । १५ ख. °मास्थितः ।

यदेतदुच्यते शास्त्रैः सेतिहासैश्च छन्दसि । यमस्य विषयं घोरं मर्त्यलोके[1] प्रवर्तते ॥ ३३
इह स्थानानि पुण्यानि देवतुल्यानि भो द्विजाः । तिर्यग्योन्यतिरिक्तानि गतिमन्ति च सर्वशः ॥
यमस्य भवने दिव्ये ब्रह्मलोकसमे गुणैः । कर्मभिर्नियतैर्बद्धो[2] जन्तुर्दुःखान्युपाश्नुते ॥ ३५
येन येन हि भावेन येन वै कर्मणा गतिम् । प्रयाति पुरुषो घोरां तथा वक्ष्याम्यतः परम् ॥ ३६
अधीत्य चतुरो वेदान्द्विजो मोहसमन्वितः । पतितात्प्रतिगृह्याथ[3] खरयोनौ प्रजायते ॥ ३७
खरो जीवति वर्षाणि दश पञ्च च भो द्विजाः । खरो मृतो बलीवर्दः सप्त वर्षाणि जीवति ३८
बलीवर्दो मृतश्चापि जायते ब्रह्मराक्षसः[4] । ब्रह्मरक्षस्तु[5] मासांस्त्रींस्ततो जायेत ब्राह्मणः[6] ॥ ३९
पतितं याजयित्वा तु कृमियोनौ प्रजायते । तत्र जीवति वर्षाणि दश पञ्च च भो द्विजाः ॥ ४०
क्रिमिभावाद्विनिर्मुक्तस्ततो जायेत गर्दभः । गर्दभः पञ्च वर्षाणि पञ्च वर्षाणि शूकरः ॥ ४१
कुक्कुटः पञ्च वर्षाणि पञ्च वर्षाणि जम्बुकः । श्वा वर्षमेकं भवति ततो जायेत मानवः ॥ ४२
उपाध्यायस्य यः पापं शिष्यः कुर्यादबुद्धिमान् । स जन्मानीह संसारे त्रीनाप्नोति न संशयः ४३
प्राक्श्वा भवति भो विप्रास्ततः क्रव्यात्ततः खरः । प्रेत्य च परिक्लिष्टेषु पश्चाज्जायेत ब्राह्मणः ४४
मनसाऽपि गुरोर्भार्यां यः शिष्यो याति पापकृत् । उदग्रान्प्रैति संसारानधर्मेणेह चेतसा ॥ ४५
श्वयोनौ तु स संभूतस्त्रीणि वर्षाणि जीवति । तत्रापि निधनं प्राप्तः क्रिमियोनौ प्रजायते ॥ ४६
कृमिभावमनुप्राप्तो वर्षमेकं तु जीवति । ततस्तु निधनं प्राप्य ब्रह्मयोनौ प्रजायते ॥ ४७
यदि पुत्रसमं शिष्यं गुरुर्हन्यादकारणम् । आत्मनः कामकारेण सोऽपि हिंस्रः प्रजायते ॥ ४८
पितरं मातरं चैव यस्तु पुत्रोऽवमन्यते । सोऽपि विप्रा मृतो जन्तुः पूर्वं जायेत गर्दभः ॥ ४९
गर्दभत्वं तु संप्राप्य दश वर्षाणि जीवति । संवत्सरं तु कुम्भीरस्ततो जायेत मानवः ॥ ५०
पुत्रस्य मातापितरौ यस्य रुष्टावुभावपि । गुर्वपध्यानतः सोऽपि मृतो जयेत गर्दभः ॥ ५१
खरो जीवति मासांश्च दश चापि चतुर्दश । बिडालः सप्त मासांस्तु ततो जायेत मानवः ॥ ५२
मातापितरावाक्रुश्य सारीकः संप्रजायते । ताडयित्वा तु तावेव जायते कच्छपो द्विजाः ॥ ५३
कच्छपो दश वर्षाणि त्रीणि वर्षाणि शल्यकः । व्यालो भूत्वा तु षण्मासांस्ततो जायेत मानुषः
भर्तृपिण्डमुपाश्नीनो(दत्ते) राजद्विष्टानि सेवते । सोऽपि मोहसमापन्नो मृतो जायेत वानरः ॥ ५५
वानरो दश वर्षाणि सप्त वर्षाणि मूषकः । श्वा च भूत्वा तु षण्मासांस्ततो जायेत मानवः ॥ ५६
न्यासापहर्ता तु नरो यमस्य विषयं गतः । संसाराणां शतं गत्वा कृमियोनौ प्रजायते ॥ ५७
तत्र जीवति वर्षाणि दश पञ्च च भो द्विजाः । दुष्कृतस्य क्षयं कृत्वा ततो जायेत मानुषः[7] ॥ ५८
असूयको नरश्चापि मृतो जायेत शार्ङ्गकः । विश्वासहर्ता[8] च नरो मीनो जायेत दुर्मतिः ॥ ५९
भूत्वा मीनोऽष्टवर्षाणि मृगो जायेत भो द्विजाः । मृगस्तु चतुरो मासांस्ततश्छागः प्रजायते ॥ ६०
छागस्तु निधनं प्राप्य पूर्णे संवत्सरे ततः । कीटः संजायते जन्तुस्ततो जायेत मानुषः ॥ ६१
धान्यान्यवांस्तिलान्माषान्कुलित्थान्सर्षपांश्चणान् । कलायानथ मुद्गांश्च गोधूमानतसीस्तथा ॥ ६२
सस्यान्यन्यानि हर्ता च मर्त्यो मोहादचेतनः । संजायते मुनिश्रेष्ठा मूषिको निरपत्रपः ॥ ६३
ततः प्रेत्य मुनिश्रेष्ठा मृतो जायेत शूकरः । शूकरो जातमात्रस्तु रोगेण म्रियते पुनः ॥ ६४
श्वा ततो जायते मूकः कर्मणा तेन मानवः । भूत्वा श्वा पञ्च वर्षाणि ततो जायेत मानवः ॥ ६५

१ ग. मर्त्यो लोकः प्रजायते । २ ख. °र्भिर्म्रियते बद्धो° । ३ ग. °तान्प्रति° । ४ ख. °सः । राक्षसत्वं समामाद्य ततो । ५ क. °ब्रह्मराक्षसमांसाशी ततो । ६ क. ख. राक्षसः । ७ क. ख. मानवः । ८ ख. °सघाती च ।

परदाराभिमर्शं तु कृत्वा जायेत वै वृकः । श्वा शृगालस्ततो गृध्रो व्यालः कङ्को बकस्तथा ॥६६
भ्रातुर्भार्यां तु पापात्मा यो धर्षयति मोहितः । पुंस्कोकिलत्वमाप्नोति सोऽपि संवत्सरं द्विजाः ॥
सखिभार्यां[1] गुरोर्भार्यां राजभार्यां तथैव च । प्रधर्षयित्वा कामात्मा मृतो जायेत शूकरः ॥ ६८
शूकरः पञ्च वर्षाणि दश वर्षाणि वै बकः । पिपीलिकस्तु मासांस्त्रीन्कीटः स्यान्मासमेव च ॥६९
एतानासाद्य संसारान्कृमियोनौ प्रजायते । तत्र जीवति मासांस्तु कृमियोनौ चतुर्दशे[2] ॥ ७०
नरोऽधर्मक्षयं कृत्वा ततो जायेत मानुषः । पूर्वं दत्त्वा तु यः कन्यां द्वितीये दातुमिच्छति ॥ ७१
सोऽपि विप्रा मृतो जन्तुः क्रिमियोनौ प्रजायते । तत्र जीवति वर्षाणि त्रयोदश द्विजोत्तमाः ७२
अधर्मसंक्षये मुक्तस्ततो जायेत मानुषः । देवकार्यमकृत्वा तु पितृकार्यमथापि वा ॥ ७३
अनिर्वाप्य पितॄन्देवान्मृतो जायेत वायसः । वायसः शतवर्षाणि ततो जायेत कुक्कुटः ॥ ७४
जायते व्यालकश्चापि मासं तस्मात्तु मानुषः । ज्येष्ठं पितृसमं चापि भ्रातरं योऽवमन्यते ॥ ७५
सोऽपि मृत्युमुपागम्य क्रौञ्चयोनौ प्रजायते । क्रौञ्चो जीवति वर्षाणि दश[3] जायेत जीवकः[4] ॥७६
ततो निधनमाप्नोति मानुषत्वमवाप्नुयात् । वृषलो ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ॥ ७७
ततः संप्राप्य निधनं जायते शूकरः पुनः । शूकरो जातमात्रस्तु रोगेण म्रियते द्विजाः ॥ ७८
श्वा च वै जायते मूढः कर्मणा तेन भो द्विजाः । श्वा भूत्वा कृतकर्माऽसौ जायते मानुषस्ततः ॥
तत्रापत्यं समुत्पाद्य मृतो जायेत मूषिकः । कृतघ्नस्तु मृतो विप्रा यमस्य विषयं गतः ॥ ८०
यमस्य विषये क्रूरैर्बद्धः प्राप्नोति वेदनाम् । दण्डकं मुद्गरं शूलमग्निदण्डं च दारुणम् ॥ ८१
असिपत्रवनं घोरं वालुकां कूटशाल्मलीम् । एताश्चान्याश्च बहवो यमस्य विषयं गताः ॥ ८२
यातनाः प्राप्य घोरास्तु ततो याति च भो द्विजाः । संसारचक्रमासाद्य क्रिमियोनौ प्रजायते ८३
क्रिमिर्भवति वर्षाणि दश पञ्च च भो द्विजाः । ततो गर्भं समासाद्य तत्रैव म्रियते नरः[5] ॥ ८४
ततो गर्भशतैर्जन्तुर्बहुशः संप्रपद्यते । संसारान्सुबहून्गत्वा ततस्तिर्यक्प्रजायते ॥ ८५
ततो दुःखमनुप्राप्य बहुवर्षगणानि वै । स पुनर्भवसंयुक्तस्ततः कूर्मः प्रजायते[6] ॥ ८६
दधि हृत्वा बकश्चापि[7] प्लवो मत्स्यानसंस्कृतान् । चोरयित्वा तु[8] दुर्बुद्धिर्मधुदंशः प्रजायते ॥ ८७
फलं वा मूलकं हृत्वा पूपं वाऽपि पिपीलिकः । चोरयित्वा तु निष्पावं जायते फलमूषकः[9] ॥८८
पायसं चोरयित्वा तु तित्तिरत्वमवाप्नुयात् । हृत्वा[10] पिष्टमयं[11][12] पूपं[13] कुम्भोलूकः प्रजायते ॥ ८९
अपो हृत्वा तु दुर्बुद्धिर्वायसो जायते नरः । कांस्यं हृत्वा तु दुर्बुद्धिर्हारीतो जायते नरः ॥ ९०
राजतं भाजनं हृत्वा कपोतः संप्रजायते । हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ॥ ९१
पत्रोर्णं चोरयित्वा तु कुररत्वं[14] नियच्छति । [15]कोशकारं ततो हृत्वा नरो जायेत नर्तकः[16] ॥ ९२
अंशुकं चोरयित्वा तु शुको जायेत मानवः । चोरयित्वा दुकूलं तु मृतो हंसः प्रजायते ॥ ९३
क्रौञ्चः कार्पासिकं हृत्वा मृतो जायेत मानवः । चोरयित्वा नरः पट्टं त्वाविकं चैव भो द्विजाः
क्षौमं च वस्त्रमाहृत्य शशो[17] जन्तुः प्रजायते । चूर्णं[18] तु हृत्वा पुरुषो मृतो जायेत बर्हिणः ॥ ९५

---

१ क. °र्यां पुत्रभार्यां गुरुभार्यां त° । २ ख. °श । ततः पापक्ष° । ३ ग. ततो । ४ ग. वारिकः । ५ ग. शिशुः । ६ क. °ते । आडिर्भूत्वा ब° । ख. °ते । अहिर्भूत्वा ब° । ७ क. °पि ततो जायेत मानवः । चो° । ८ क. तु वै मत्स्याञ्शुष्कदन्तः प्र° । ९ क. फलपोषकः । ग. हलगोलकः । १० क. °त्वा पुष्पं च पत्रं च कु° । ११ ख. पुष्पमयं । १२ ख. °यं कूपं कूपोलू° । १३ क. °द्धिर्बकयोनौ प्रजायते । रा° । १४ क. ख. कुक्कुटत्वं । १५ ग. कोशिका° । १६ ख. मर्कटः । १७ क. कोशो । ख. हंसो । १८ ग. वृक्षं ।

हृत्वा रक्तानि वस्त्राणि जायते जीवजीवकः । वर्णकादींस्तथा गन्धांश्चोरयित्वेह मानवः ॥ ९६
चुच्छुन्दरित्वमाप्नोति विप्रो लोभपरायणः । तत्र जीवति वर्षाणि ततो दश च पञ्च च ॥ ९७
अधर्मस्य क्षयं कृत्वा ततो जायेत मानवः । चोरयित्वा पयश्चापि बलाका संप्रजायते ॥ ९८
यस्तु चोरयते तैलं नरो मोहसमन्वितः । सोऽपि विप्रा मृतो जन्तुस्तैलपायी प्रजायते ॥ ९९
अशस्त्रं पुरुषं हत्वा सशस्त्रः पुरुषाधमः । अर्थार्थे यदि वा वैरी मृतो जायेत वै खरः ॥ १००
खरो जीवति वर्षे द्वे ततः शस्त्रेण वध्यते । स मृतो मृगयोनौ तु नित्योद्विग्नोऽभिजायते ॥ १०१
मृगो विध्येत शस्त्रेण गते संवत्सरे ततः । हतो मृगस्ततो मीनः सोऽपि जालेन बध्यते ॥ १०२
मासे चतुर्थे संप्राप्ते श्वापदः संप्रजायते । श्वापदो दश वर्षाणि द्वीपी वर्षाणि पञ्च च ॥ १०३
ततस्तु निधनं प्राप्तः कालपर्यायचोदितः । अधर्मस्य क्षयं कृत्वा मानुषत्वमवाप्नुयात् ॥ १०४
वाद्यं हृत्वा तु पुरुषो लोमशः संप्रजायते । तथा पिण्याकसंमिश्रमन्नं यश्चोरयेन्नरः ॥ १०५
स जायते बभ्रुसटो दारुणो मूषिको नरः । दशन्वै मानुषान्नित्यं पापात्मा स द्विजोत्तमाः १०६
घृतं हृत्वा तु दुर्बुद्धिः काको मद्गुः प्रजायते । मत्स्यमांसमथो हृत्वा काको जायेत मानवः ॥१०७
लवणं चोरयित्वा तु चिरिकाकः प्रजायते । विश्वासेन तु निक्षिप्तं योऽपनिह्नोति मानवः ॥१०८
स गतायुर्नरस्तेन मत्स्ययोनौ प्रजायते । मत्स्ययोनिमनुप्राप्य मृतो जायेत मानुषः ॥ १०९
मानुषत्वमनुप्राप्य क्षीणायुरुपजायते । पापानि तु नरः कृत्वा तिर्यग्जायेत भो द्विजाः ॥ ११०
न चाऽऽत्मनः प्रमाणं तु धर्मं जानाति किंचन । ये पापानि नराः कृत्वा निरस्यन्ति व्रतैः सदा
सुखदुःखसमायुक्ता व्याधिमन्तो भवन्त्युत । असंवीताः प्रजायन्ते म्लेच्छाश्चापि न संशयः ॥
नराः पापसमाचारा लोभमोहसमन्विताः । वर्जयन्ति हि पापानि जन्मप्रभृति ये नराः ॥ ११३
अरोगा रूपवन्तश्च धनिनस्ते भवन्त्युत । स्त्रियोऽप्येतेन कल्पेन कृत्वा पापमवाप्नुयुः ॥ ११४
एतेषामेव पापानां भार्यात्वमुपयान्ति ताः । प्रायेण हरणे दोषाः सर्व एव प्रकीर्तिताः ॥ ११५
एतद्वै लेशमात्रेण कथितं वो द्विजर्षभाः । अपरस्मिन्कथायोगे भूयः श्रोष्यथ भो द्विजाः ॥ ११६
एतन्मया महाभागा ब्रह्मणो वदतः पुरा । सुरर्षीणां श्रुतं मध्ये पृष्टं चापि यथा तथा ॥ ११७
मयाऽपि तुभ्यं कार्त्स्न्येन यथावदनुवर्णितम् । एतच्छ्रुत्वा मुनिश्रेष्ठा धर्मे कुरुत मानसम् ॥११८

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे संसारचक्रनिरूपणं नाम-
सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—११५६०

अथाष्टादशाधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

अधर्मस्य गतिर्ब्रह्मन्कथिता नस्त्वयाऽनघ । धर्मस्य च गतिं श्रोतुमिच्छामो वदतां वर ॥ १
कृत्वा पापानि कर्माणि कथं यान्त्यशुभां गतिम् । कर्मणा च कृतेनेह केन यान्ति शुभां गतिम् ॥

---

१ ग. °मशनं चोर°। २ ग. °समो दा°। ३ क. °रः । दंशको मशको नित्यं। ४ क. क्षीणद्रव्यः प्रजा°। ५ क पानीयं तु। ६ क. नरो हत्वा । ७ ख. °त्वा निजतानाय भो । ८ ग. °त। स्वयंवाऽक्षाः प्र°। ९ ख. असंवासाः। १० क. °न्ते स्वेच्छाः वानरधर्मिणः । न° । ११ क. जन्तूनां ।

व्यास उवाच—

कृत्वा पापानि कर्माणि[1] स्वधर्मवशमागतः । मनसा विपरीतेन निरयं प्रतिपद्यते ॥ ३
मोहादधर्मं यः कृत्वा पुनः समनुतप्यते । मनःसमाधिसंयुक्तो न स सेवेत दुष्कृतम् ॥ ४
यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हते । तथा तथा शरीरं तु तेनाधर्मेण मुच्यते ॥ ५
यदि[2] विप्राः कथयते विप्राणां धर्मवादिनाम् । ततोऽधर्मकृतात्क्षिप्रमपराधात्प्रमुच्यते ॥ ६
यथा यथा नरः सम्[3]यगधर्ममनुभाषते । समाहितेन मनसा विमुञ्चति तथा तथा ॥ ७
भुजंग इव निर्मोकान्पूर्वभुक्ताञ्जहाति तान् । दत्त्वा विप्रस्य दानानि विविधानि समाहितः ॥ ८
मनःसमाधिसंयुक्तः [4]स्वर्गतिं प्रतिपद्यते[5] । दानानि तु प्रवक्ष्यामि यानि दत्त्वा द्विजोत्तमाः ॥ ९
नरः कृत्वाऽ[6]प्यकार्याणि[7] ततो धर्मेण युज्यते । सर्वेषामेव दानानामन्नं श्रेष्ठमुदाहृतम् ॥ १०
सर्वमन्नं प्रदातव्यमृजुना धर्ममिच्छता । प्राणा ह्यन्नं मनुष्याणां तस्माज्जन्तुः प्रजायते ॥ ११
अन्ने प्रतिष्ठिता लोकास्तस्मादन्नं प्रशस्यते । [8]अन्नमेव प्रशंसन्ति देवर्षिपितृमानवाः ॥ १२
अन्नस्य हि प्रदानेन स्वर्गमाप्नोति मानवः[9] । न्यायलब्धं प्रदातव्यं द्विजातिभ्योऽन्नमुत्तमम् ॥ १३
स्वाध्यायसमुपेतेभ्यः प्रहृष्टेनान्तरात्मना । यस्य त्वन्नमुपाश्नन्ति ब्राह्मणाश्च[10][11] सकृद्दश ॥ १४
हृष्टेन मनसा[12] दत्तं न स तिर्यग्गतिर्भवेत् । ब्राह्मणानां सहस्राणि दशाऽऽभोज्य द्विजोत्तमाः १५
नरोऽधर्मात्प्रमुच्येत पापेष्वभिरतः सदा । [13]भैक्षेणान्नं समाहृत्य विप्रो वेदपुरस्कृतः ॥ १६
स्वाध्यायनि[14]रते विप्रे दत्त्वेह सुखमेधते । [15]अहिंसन्ब्राह्मणस्वानि न्यायेन परिपाल्य च ॥ १७
क्षत्रियस्तरसा प्राप्तमन्नं यो वै प्रयच्छति । द्विजोभ्यो वेदमुख्येभ्यः प्रयतः सुसमाहितः ॥ १८
तेनापोहति धर्मात्मा दुष्कृतं कर्म भो द्विजाः । षड्भागपरिशुद्धं च कृषेर्भागमुपार्जितम् ॥ १९
वैश्यो ददद्द्विजातिभ्यः पापेभ्यः परिमुच्यते । अवाप्य प्राणसंदेहं[16] [17]कार्कश्येन [18]समार्जितम् ॥ २०
अन्नं दत्त्वा द्विजातिभ्यः शूद्रः पापात्प्रमुच्यते[19] । औरसेन बलेनान्नमर्जयित्वा विहिंसकः ॥ २१
यः प्रयच्छति विप्रेभ्यो न स दुर्गाणि सेवते । न्यायेनावाप्तमन्नं तु नरो हर्षसमन्वितः ॥ २२
द्विजेभ्यो वेदवृद्धेभ्यो दत्त्वा पापात्प्रमुच्यते । अन्नमूर्जस्करं लोके दत्त्वोर्जस्वी भवेन्नरः ॥ २३
सतां पन्थानमावृत्य सर्वपापैः प्रमुच्यते । दानविद्भिः [20]कृतः पन्था येन यान्ति मनीषिणः ॥ २४
तेष्वप्यन्नस्य दातारस्तेभ्यो धर्मः सनातनः । सर्वावस्थं मनुष्येण न्यायेनान्नमुपार्जितम् ॥ २५
कार्यान्न्यायागतं नित्यमन्नं हि परमा गतिः । अन्नस्य हि प्रदानेन नरो[21] याति परां गतिम् ॥ २६
सर्वकामसमायुक्तः प्रेत्य चाप्यश्नुते सुखम् । एवं पुण्यसमायुक्तो नरः पापैः प्रमुच्यते ॥ २७
तस्मादन्नं प्रदातव्यम[22]न्यायपरिवर्जितम् । य[23]स्तु प्राणाहुतीपूर्वमन्नं भुङ्क्ते गृही सदा ॥ २८
अवन्ध्यं दिवसं कुर्यादन्नदानेन मानवः । भोजयित्वा शतं नित्यं नरो वेदविदां वरम् ॥ २९

---

१ ग. °णि स्वकर्म°। २ ग. °दि वाक्यं चरेद्विप्रा विप्राणां । ३ क. ख. °म्यक्सुध° । ४ क. ख. सुगतिं । ५ क. ख. °ते । प्रधानानि प्रव° । ६ क. ख. °प्यकर्माणि । ७ क. °णि न हि पापेन यु° । ८ ख. अन्नं चैव । ९ क. °न्नदानं प्र° । १० क. ख. °वः । यःवलभ्यं प्र° । ११ क. ग. °णानां शतं दश । १२ ख. °सा तस्य पवित्रं च कुलं भवे° । १३ क. भैक्षादन्नं । ख. भैक्ष्यान्नं च स° । १४ ग. °रतो वि° । १५ ख. °हिंसाया ब्राह्मणेभ्योऽप्यन्नं दद्याच्च ब्राह्मणः । क्ष° । १६ क. °हं यद्धनं समुपार्जि° । १७ ख. कार्येष्वेव स° । १८ ग. समाहित° । १९ क. °ते । तेनान्नेन विपाप्मा स स्वर्गलोके महीयते । योऽन्नं य° । २० ख. कृतं पुण्यं यथा योग्यं भवत्युत । ते सदाऽन्नप्रदा° । २१ क. °रोऽधर्मान्न सेवते । स° । २२ क. ख. °न्यायेन विव° । २३ ग. °स्तु ब्राह्मणपूर्वं हि भोक्तुमन्नं गृ° ।

न्यायविद्धर्मविदुषामितिहासविदां तथा । न याति नरकं घोरं संसारं न च सेवते ॥ ३०
सर्वकामसमायुक्तः प्रेत्यचाप्यश्नुते सुखम् । एवं[1] कर्मसमायुक्तो रमते विगतज्वरः ॥ ३१
रूपवान्कीर्तिमांश्चैव धनवांश्चोपजायते । एतद्वः सर्वमाख्यातमन्नदानफलं महत् ॥
मूलमेतत्तु धर्माणां प्रदानानां च भो द्विजाः ॥ ३२

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे संसारचक्रेऽन्नदानप्रशंसावर्णनं नामाष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—११५९२

अथैकोनविंशत्यधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—
परलोकगतानां तु स्वकर्मस्थानवासिनाम् । तेषां श्राद्धं कथं ज्ञे(दे)यं पुत्रैश्चान्यैश्च बन्धुभिः ॥ १
*व्यास उवाच—
नमस्कृत्य जगन्नाथं वाराहं लोकभावनम् । शृणुध्वं संप्रवक्ष्यामि श्राद्धकल्पं यथोदितम् ॥ २
पुरा कोकाजले मग्नान्पितॄनुद्धृतवान्विभुः । श्राद्धं कृत्वा तदा देवो यथा तत्र द्विजोत्तमाः ॥ ३
मुनय ऊचुः—
किमर्थं ते तु कोकायां निमग्नाः पितरोऽम्भसि । कथं तेनोद्धृतास्ते वै वाराहेण द्विजोत्तम ॥ ४
तस्मिन्कोकामुखे तीर्थे भुक्तिमुक्तिफलप्रदे । श्रोतुमिच्छामहे ब्रूहि परं कौतूहलं हि नः ॥ ५
व्यास उवाच—
त्रेताद्वापरयोः संधौ पितरो दिव्यमानुषाः । पुरा मेरुगिरेः पृष्ठे विश्वैर्देवैः सह स्थिताः ॥ ६
तेषां समुपविष्टानां पितॄणां सोमसंभवा । कन्या कान्तिमती दिव्या पुरतः प्राञ्जलिः स्थिता ॥
तामूचुः पितरो [4]दिव्या ये तत्राऽऽसन्समागताः ॥ ७
पितर ऊचुः—
काऽसि भद्रे प्रभुः को वा भवत्या वक्तुमर्हसि ॥ ८
व्यास उवाच—
सा प्रोवाच पितॄन्देवान्[5]कला चान्द्रमसीति ह । प्रभुत्वे भवतामेव वरयामि यदीच्छथ ॥ ९
ऊर्जा नामा[6]स्ति प्रथमं स्वधा च तदनन्तरम् । भवद्भिश्चाद्यैव कृतं नाम कोकेति भावितम् ॥ १०
ते हि तस्या वचः श्रुत्वा पितरो दिव्यमानुषाः । तस्या मुखं निरीक्षन्तो न तृप्तिमधिजग्मिरे ११
विश्वेदेवाश्च ताञ्ज्ञात्वा कन्यामुखनिरीक्षका[7]न् । [8]योगच्युतान्निरीक्ष्यैव विहाय त्रिदिवं गताः १२
भगवानपि शीतांशुरूर्जां नापश्यदात्मजाम् । समाकुलमना दध्यौ क्व गतेति महायशाः ॥ १३
स विवेद तदा सोमः प्राप्तां पितॄंश्च कामतः । तैश्चावलोकितां हार्दात्स्वीकृतां च तपोबलात् १४

---

* इत एव क. ख. पुस्तकयोरध्यायारम्भः ।

---

१ क. °वं नरः स° । ग. °वं खलु स° । २ ग. °पद्यते । ३ ग. °द्धृत्य शूकरः । श्राद्धान्येव ददौ दें । ४ ग. देवा । ५ क. °वान्कुले चा° । ६ क. ख. °मास्मि प्र° । ७ ख. °न् । अयोग्यां तां निरी° । ८ क. योग्यतां निरी° ।

ततः क्रोधपरीतात्मा पितॄञ्शशधरो द्विजाः । शशाप निपतिष्यध्वं योगभ्रष्टा विचेतसः ॥ १५
यस्माददत्तां मत्कन्यां कामयध्वं सुबालिशाः । यस्माद्वृतवती चेयं पतीन्पितृमती सती ॥ १६
स्वतन्त्रा धर्ममुत्सृज्य तस्माद्भवतु निम्नगा । कोकेति प्रथिता लोके शिशिराद्रिसमाश्रिता ॥ १७
इत्थं शप्ताश्चन्द्रमसा पितरो दिव्यमानुषाः । योगभ्रष्टा निपतिता हिमवत्पादभूतले ॥ १८
ऊर्जा तत्रैव पतिता गिरिराज्यस्य विस्तृते । प्रस्थे तीर्थं समासाद्य सप्तसामुद्रमुत्तमम् ॥ १९
कोका नाम ततो वेगान्नदी तीर्थशताकुला । प्लावयन्ती गिरेः शृङ्गं सर्पणाच्च सरित्स्मृता ॥ २०
अथ ते पितरो विप्रा योगहीना महानदीम् । ददृशुः शीतसलिलां न विदुस्तां सुलोचनाम् ॥ २१
ततस्तु गिरिराड्दृष्ट्वा पितॄंस्तांस्तु क्षुधार्दितान् । बदरीमादिदेशाथ धेनुं चैकां मधुस्रवाम् ॥ २२
क्षीरं मधु च तद्दिव्यं कोकाम्भो बदरीफलम् । इदं गिरिवरेणैषां पोषणाय निरूपितम् ॥ २३
तया वृत्त्या तु वसतां पितॄणां मुनिसत्तमाः । दश वर्षसहस्राणि ययुरेकमहो यथा ॥ २४
एवं लोके विपितरि तथैव विगतस्वधे । दैत्या बभूवुर्बलिनो यातुधानाश्च राक्षसाः ॥ २५
ते तान्पितृगणान्दैत्या यातुधानाश्च वेगिताः विश्वैर्देवैर्विरहितान्सर्वतः समुपाद्रवन् ॥ २६
दैतेयान्यातुधानांश्च दृष्ट्वाऽऽपततो द्विजाः । कोकातटस्थामुत्तुङ्गां शिलां ते जगृहू रुषा ॥ २७
गृहीतायां शिलायां तु कोका वेगवती पितॄन् । छादयामास तोयेन प्लावयन्ती हिमाचलम् ॥ २८
पितॄनन्तर्हितान्दृष्ट्वा दैतेया राक्षसास्तथा । विभीतकं समारुह्य निराहारास्तिरोहिताः ॥ २९
सलिलेन विषीदन्तः पितरः क्षुद्भ्रमातुराः । विषीदमानमात्मानं समीक्ष्य सलिलाशयाः ॥
जेगुर्जनार्दनं देवं पितरः शरणं हरिम् ॥ ३०

पितर ऊचुः—

जयस्व गोविन्द जगन्निवास जयोऽस्तु नः केशव ते प्रसादात् ।
जनार्दनास्मान्सलिलान्तरस्थानुद्धर्तुमर्हस्यनघप्रताप ॥ ३१
निशाचरैर्दारुणदर्शनैः प्रभो वरेण्य वैकुण्ठ वराह विष्णो ।
नारायणाशेषमहेश्वरेश प्रयाहि भीताञ्जय पद्मनाभ ॥ ३२
उपेन्द्र योगिन्मधुकैटभघ्न विष्णो अनन्ताच्युत वासुदेव ।
श्रीशार्ङ्गचक्राम्बुजशङ्खपाणे रक्षस्व देवेश्वर राक्षसेभ्यः ॥ ३३

त्वं पिता जगतः शंभो नान्यः शक्तः प्रबाधितुम् । निशाचरगणं भीममतस्त्वां शरणं गताः ॥

त्वन्नामसंकीर्तनतो निशाचरा द्रवन्ति भूतान्यपयान्ति चारयः ।
नाशं तथा संप्रति यान्ति विष्णो धर्मादि सत्यं भवतीह मुख्यम् ॥ ३५

व्यास उवाच—

इत्थं स्तुतः स पितृभिर्धरणीधरस्तु तुष्टस्तदाऽऽविष्कृतदिव्यमूर्तिः ।
कोकामुखे पितृगणं सलिले निमग्नं देवो ददर्श शिरसाऽथ शिलां वहन्तम् ॥ ३६

तं दृष्ट्वा सलिले मग्नं क्रोडरूपी जनार्दनः । भीतं पितृगणं विष्णुरुद्धर्तुं मतिरादधे ॥ ३७

---

१ ग. विप्लुते । २ क. ग. जग्मुर्ज° । ३ ख. ते । ४ ख. °व संप्रसीद । ज° । ५ क. °प्रभाव । नि° । ६ क. ख. प्रजाहितार्थं चय । ७ क. °टभारे वि° । ८ ग धाता । ९ क. ख. °न्यपि या° । १० ग. सर्वं भ° । ११ क. °द्धर्तु-मुपचक्रमे । द° ।

दंष्ट्राग्रेण समाहत्य शिलां चिक्षेप शूकरः । पितॄनादाय च विभुरुज्जहार[1] शिलातलात् ॥ ३८
वराह[2]दंष्ट्रासंलग्नाः पितरः कनकोज्ज्वलाः । कोकामुखे गतभयाः कृता[3] देवेन विष्णुना ॥ ३९
उद्धृत्य च पितॄन्देवो विष्णुतीर्थे[4] तु शूकरः । ददौ समाहितस्तेभ्यो[5] विष्णुर्लोहार्गले[6] जलम्॥ ४०
ततः स्वरोमसंभूतान्कुशानादाय केशवः । स्वेदोद्भवांस्तिलांश्चैव चक्रे[7] चोल्मुकमुत्तमम् ॥ ४१
ज्योतिः सूर्यप्रभं कृत्वा पात्रं तीर्थं च कामिकम् । स्थितः कोटि[8]वटस्याधो वारि गङ्गाधरं शुचि[9] ॥
तुङ्गकूटात्समादाय यज्ञीयानोषधीरसान् । मधुक्षीररसान्गन्धान्पुष्पधूपानुलेपनान् ॥ ४३
आदाय धेनुं सरसो रत्नान्यादाय चार्णवात् । दंष्ट्रयोल्लिख्य धरणीमभ्युक्ष्य सलिलेन च ॥ ४४
घर्मोद्भवेनोपलिप्य कुशैरुल्लिख्य तां पुनः । परिणीयोल्मुकेनै[10]नामभ्युक्ष्य च पुनः पुनः ॥ ४५
कुशानादाय प्रागग्राँल्लोमकूपान्तरस्थितान् । ऋषीनाहूय पप्रच्छ करिष्ये पितृतर्पणम् ॥ ४६
तैरप्युक्ते कुरुष्वेति विश्वान्देवांस्ततो विभुः । आहूय मन्त्रतस्तेषां विष्टराणि ददौ प्रभुः ॥ ४७
आहूय मन्त्रतस्तेषां वेदोक्तविधिना हरिः । अक्षतैर्दैवतारक्षां चक्रे चक्रगदाधरः ॥ ४८
अक्षतांस्तु[11] यवौषध्यः सर्वदे[12]वांशसंभवाः । रक्षन्ति सर्वत्र[13] दिशो रक्षार्थं निर्मिता हि ते ॥ ४९
देवदानवदैत्येषु यक्षरक्षःसु चैव हि । नहि कश्चित्क्षयं तेषां कर्तुं शक्तश्चराचरे ॥ ५०
न[14] केनचित्कृतं(त्क्षता) यस्मात्तस्मात्ते ह्यक्षताः कृताः । देवानां ते हि रक्षार्थं नियुक्ता विष्णुना पुरा
कुशगन्धै[15]यवैः पुष्पैरर्घ्यं कृत्वा च शूकरः । विश्वेभ्यो देवेभ्य इति ततस्तान्पर्यपृच्छत ॥ ५२
पितॄनावाहयिष्यामि ये दिव्या ये च मानुषाः । आवाहयस्वेति च तैरुक्तस्त्वावाहये(य)द्धृर्चि[16]ः
श्लिष्टमूलाग्रदर्भांस्तु[17] संतिलान्वेद वेदवित् । जानावारोप्य हस्तं तु ददौ[18] सव्येन चाऽऽसनम् ५४
तथैव जानुसंस्थेन करेणैकेन तान्पितॄन्[19] । वारांहः[20] पितृविप्राणामायान्तु[21] न इतीरयन्[22] ॥ ५५
अपहतेत्युवाचैव रक्षणं चापसव्यतः । कृत्वा चाऽऽवाहनं चक्रे पितॄणां नामगोत्रतः ॥ ५६
तत्पितरो(पितरोऽत्र) मनोजराना(वा आ)गच्छत इतीरयन् (?) । संवत्सरैरित्युदीर्य ततोऽर्घ्यं
तेषु विन्यसेत् ॥ ५७
यास्तिष्ठन्त्यमृता वाचो[23] यन्मति[24] च पितुः पितुः । यन्मे पितामहे[25]त्येवं ददावर्घ्यं पितामह[26] ॥ ५८
यन्मे प्रपितामहे[27]ति ददौ च प्रपितामहे[28] । कुशगन्धतिलोन्मिश्रं सपुष्पमपसव्यतः ॥ ५९
तद्वन्मातामहेभ्यस्तु विधिं चक्रे जनार्दनः । तानर्च्य भूयो गन्धाद्यैर्धूपं दत्त्वा तु भक्तितः[29] ॥ ६०
आदित्या वसवो रुद्रा इत्युच्चार्य जगत्प्रभुः । ततश्चान्नं समादाय सर्पिस्तिलकुशांकुलम्[30] ॥ ६१
विधाय[31] पात्रे[32] तच्चैव पर्यपृच्छत्ततो मुनीन् । अग्नौ करिष्य इति तैः कुरुष्वेति च चोदितः ॥ ६२

---

१ ख. ग. °र स्मात° । २ ग. °हदेहमं° । ३ ग. हता । ४ ग. °र्थेन शू° । ५ ख. °स्तेभ्यास्तलल्लोमार्गते ज° । ६ ग. °हाकुलं ज° । ७ ख. °क्रे त्रैलोक° । ८ क °टिनट° । ९ क. ख. °चि । उग्रकूटे समा° । १० क. °नैव तानभ्यु° । ११ क. °तास्त्वथ चौष° । १२ क. °देवास्थिमं° । १३ ख. सर्वं त्रिदशा र° । १४ क. नतेनचाक्षितं । ख न तेन वाक्षतं । १५ ग. °न्धमयैः पु° । १६ क. °चिः । शिष्ट° । १७ क. °सलिलाद्वैदवाचिनः । जा° । ख. सलिलाद्येन केनचित् । १८ क. °दौ चाऽऽवाहनाम° । ख. °दौ कव्यं सनातन° । १९ क. ख. °न् । आप्याययन्तु पितरः सयवांस्तिलबर्हिषा । वा २० ग. °राहोऽपि त्रिवि° । २१ क. ख. °माप्याययन्त्विवर्ता° । २२ क. °न् । संवत्सरेति दत्त्वाऽर्घं ततोऽर्घं चा° । ख. न् । संवत्सरे ततो दीर्घं तेषु तेषु च स° । २३ क °न्मे पितृस्तात्पितुश्च त त । तन्मे । २४ ग. °ति पितृतात्पितुः । २५ ग. °मई त्ये° । २६ क. °हेऽप्येवं दद्यादर्घ्यं समाहितः । कु° । २७ ग. °महेति । २८ ख. °महम् । कु° । २९ क. ख. शक्तितः । ३० क. °शान्वितम् । ३१ ग. विधाय । ३२ ख. ग. °त्रेणान्येन प° ।

आहु[1]तित्रितयं दद्यात्सोमायाग्नेर्यमाय च । ये मामकेति च जपेद्यजुःसप्तकमच्युतम् ॥ ६३
हुतावशिष्टं च ददौ नामगोत्रसमन्वितम् । त्रिराहुतिक्रमेकैकं पितरं तु प्रति द्विजाः ॥ ६४
अतोऽत्रशिष्टमन्नाद्यं पिण्डपात्रे[3] तु निक्षिपेत् । ततोऽन्नं सरसं स्वादु ददौ पायसपूर्वकम् ॥ ६५
प्रत्यग्रमेकदो स्विन्नमपर्युषितमुत्तमम् । अल्पशाकं बहुफलं षड्रसममृतोपमम् ॥ ६६
यद्ब्राह्मणेषु प्रददौ पिण्डपात्रे पितॄंस्तथा । वेद(देव)पूर्वं पितृस्व(ष्व)न्नमाज्यप्लुतं मधूक्षितम् ॥६७
मन्त्रितं पृथिवीत्येवं मधुर्वातातृचं जगौ । भुञ्जानेषु तु विप्रेषु जपन्वै मन्त्रपञ्चकम् ॥ ६८
यँ[6]त्ते प्रकारमारभ्य नाँ[7]धिकं ते ततो जगौ । त्रिमधु त्रिसुपर्णं च बृहदारण्यकं तथा ॥ ६९
जजाप वैषां जाप्यं तु सूक्तं सौरं सपौरुषम् । भुक्तवत्सु च विप्रेषु पृष्ट्वा तृप्तास्थ इत्युत ॥ ७०
तृप्ताः स्मेति संकृ[10]त्तोयं ददौ मौनविमोचनम् । पिण्डपात्रं समादा[11]य च्छायायै प्रददौ ततः ॥ ७?
सो[12] तदन्नं द्विधा कृत्वा त्रिधैकैकमथाकरोत् । वाराहो भूमथोल्लिख्य सं[13]माच्छाद्य कुशैरपि ॥ ७२
दक्षिणाग्रान्कुशाँ[14]न्कृत्वा तेषामुपरि चाऽऽसनम् । सतिलेषु समूलेषु कुशेष्वेव तु संश्रयः ॥ ७३
गन्धपुष्पादिकं कृत्वा ततः पिण्डं तु भक्तितः । पृथिवी द[15]धीरित्युक्त्वा ततः पिण्डं(पित्रे) प्रदत्तवान्
पितामहाः प्रपितामहाँ[16]स्तथेति(?) चान्तरिक्षतः । मातामहानामप्येवं ददौ पिण्डान्स शूकरः ॥७५
पिण्डनिर्वापणोच्छिष्टमन्नं लेपभुजेष्वदात् । एतद्वः पितरित्युक्त्वा ददौ वासांसि भक्तितः ॥७६
द्व्यँ[17]ङ्गुलजानि शुक्लानि धौतान्यँ[18]भिनवानि च । गन्धपुष्पादिकं दत्त्वा कृत्वा चैषां प्रदक्षिणाम् ७७
आचम्याऽऽचामयेद्विप्रान्पैत्रानादौ ततः सुरान् । तँतँ[19]स्त्वभ्युक्ष्य तां भूमिं दत्त्वाऽपः सुमनोक्षतान्
सतिलाम्बु पितृष्वादौ दत्त्वा देवेषु साक्षतम्[20] । अक्षय्यं नस्त्विति पितॄँ[21]न्प्रीयतामिति देवताः॥७९
प्रीणयित्वा परावृत्य त्रिर्जपेच्चाघमर्षणम् । ततो निवृत्य तु जपद्य[22]न्मे नाम इतीरयन्[23] ॥ ८०
गृहान्नः पितरो दत्त धनधान्यप्रपूरितान् । अर्घ्यपात्राणि पिण्डानाँ[24]मन्तरे सँ[25] पवित्रकाँन्[26] (?)॥८१
निक्षिप्योर्जं वहन्तीति कोकातोयमथोऽजपत् । हिमक्षीरं मधुतिलान्पितॄणां तर्पणं ददौ ॥ ८२
स्वस्तीत्युक्ते पैतृकैस्तु सोराह्ने प्रावतर्पयन् (?) । रजतं दक्षिणां दत्त्वा विप्रान्देवो गदाधरः॥८३
संविभागं मनुष्येभ्यो ददौ स्वदि[27]ति चाब्रुवन् । कश्चि(च्चि)त्संपन्नमि(त्यु)क्त्वा प्रत्युक्तस्तैर्द्विजोत्तमाः
अभिरम्यतामित्युवाच प्रोचुस्तेऽभिरताः स्म वै । शिष्टमन्नं च पप्रच्छ तैरिष्टैः सह चोदितः ॥८५
पाणावादाय तान्विप्रान्कुर्यादर्नुँ[28]गतस्त(तं त)दा । वाजे वाजे इति पठँ[29]न्बहिर्वेदि विनिर्गतः ॥ ८६
कोटितीर्थजलेनासावपसव्यं समुत्क्षिपन् । अलग्नान्विपुलाँ[30]न्वालान्प्रार्थयामासचाशिषम् ॥ ८७
दातारो नोऽभिवर्धन्तां तैस्तथेति समीरितः । प्रदक्षिणमुपावृत्य कृत्वा पादाभिवादनम् ॥ ८८
आसनानि ददौ चैषां छादयामास शूकरः । वि[31]श्राम्यतां प्रविश्याथ पिण्डं जग्राह मध्यमम् ॥

---

१ ख. °तिभिश्चरुं द° । २ ख. °मायेति यमा° । ३ क. ख. °त्रेषु नि° । ४ क. °दाऽप्यन्नमांसाद्यं तन्मधूक्षि° । ५ ग. °वातं ततो ज° । ६ ग. यतः । ७ ग. नाचिकेतं त° । ८ ख °धिक्रान्ते त° । ९ ग. इत्यपः । १० ख. ग. °कृद्देवो द° । ११ क. °य मधुव्राता जगौ त° । १२ क. ख. स । १३ ख. ग. समुत्सृज्य । १४ ग. °शान्दत्त्वा । १५ ख. दस्युरि° । १६ ख. °हास्तृप्त्येचान्तरराक्षितः । १७ क. ख. द्विगुणेयानि । १८ ख. °न्यप्यजिनानि । १९ क. ततः सुप्रोक्षितां । २० क. ख. °म् । आक्षिप्तमिति । २१ क. ख. °तॄन्वै प्रीय° । २२ क. °पेद्येन मेनामिती° । २३ ख. °न् । धारान्नपितरो दत्तधारान्नप्रददौततः । अ° । ग. °न् । वीराधः । पितरो द्वावीरान्प्रददौ ततः । अ° । २४ क. °नामितरे । २५ ख. समविन्नकाम् । राजतं । २६ क. °न् । राजतं । २७ क. °दितमीरयन् । २८ क. ख. °नुमत° । २९ ग. °ठन्नन्तर्वे । ३० ग. °लान्धानान्प्रा° । ३१ क. विश्रम्य° ।

छायामयी मही पत्नी तस्यै पिण्डमदात्प्रभुः । आधत्त पितरो गर्भमित्युक्त्वा साऽपि रूपिणी ॥
पिण्डं गृहीत्वा विप्राणां चक्रे पादाभिवन्दनम् । विसर्जनं पितॄणां स कर्तुकामश्च शूकरः ॥ ९१
कोका च पितरश्चैव प्रोचुः स्वार्थकरं वचः । शप्ताश्च भगवन्पूर्वं दिवस्था हिमभानुना ॥ ९२
योगभ्रष्टा भविष्यध्वं सर्व एव दिवश्च्युताः । तदेवं भवता त्राताः प्रविशन्तो रसातलम् ॥ ९३
योगभ्रष्टांश्च विश्वेशास्तत्यजु[1]र्योगरक्षिणः । तत्ते भूयोऽभिरक्षन्तु विश्वे देवा हि नः सदा ॥ ९४
स्वर्गं यास्यामश्च विभो प्रसादात्तव शूकर । सो(य)मोऽधिदेवोऽस्माकं च भवत्वच्युत योगधृक् ॥
योगाधारस्तथा सोमस्त्रायते न कदाचन । दिवि भूमौ सदा[2] वासो भवत्वस्मासु योगतः ॥ ९६
अन्तरिक्षे च [3]केषांचिन्मासं पुष्टिस्तथाऽस्तु नः । ऊर्जा चेयं हि नः पत्नी स्वधानाम्ना तु विश्रुता
भवत्वेपैव योगाढ्या योगमाता च खेचरी । इत्येवमुक्तः पितृभिर्वाराहो भूतभावनः ॥ ९८
प्रोवाचाथ पितॄन्विष्णुस्तां च कोकां महानदीम् । यदुक्तं तु भवद्भिर्मे सर्वमेतद्भविष्यति ॥ ९९
यमोऽधिदेवो भवतां सोमः स्वाध्याय ईरितः । अधियज्ञस्तथैवाग्निर्भवतां कल्पना त्वियम् १००
अग्निर्वायुश्च सूर्यश्च स्थानं हि भवतामिति । ब्रह्मा विष्णुश्च रुद्रश्च भवतामधिपूरुषाः ॥ १०१
आदित्या वसवो रुद्रा भवतां मूतर्यस्त्विमाः । योगिनो योगदेहाश्च योगधाराश्च सुव्रताः ॥१०२
कामतो विचरिष्यध्वं फलदाः सर्वजन्तुषु । स्वर्गस्थान्नरकस्थांश्च भूमिस्थांश्च चराचरान् ॥१०३
निजयोगबलेनैवाऽऽप्याययिष्वध्वमुत्तमाः । इयमूर्जा शशिसुता कीलालमधुविग्रहा ॥ १०४
भविष्यति महाभागा दक्षस्य दुहिता स्वधा । तत्रेयं भवतां पत्नी भविष्यति वरानना ॥ १०५
कोका[6]नदीति विख्याता गिरिराजसमाश्रिता । तीर्थकोटि[7]महापुण्या मद्रूपपरिपालिता ॥ १०६
अस्यामद्य प्रभृति वै निवत्स्याम्यघनाशकृत् । वराहदर्शनं पुण्यं [8]पूजनं भुक्तिमुक्तिदम् ॥ १०७
कोकासलिलपानं च महापातकनाशनम् । तीर्थे[9]ष्वाप्लवनं पुण्यमुपवासश्च स्वर्गदः ॥ १०८
दानमक्षय्यमुदितं जन्ममृत्युजरापहम् । माघे मां[10]स्यसिते पक्षे भवद्भिरुडुपक्षये ॥ १०९
कोकामुखमुपागम्य स्थातव्यं दिनपञ्चकम् । तस्मिन्काले तु यः श्राद्धं पितॄणां निर्वपिष्यति ११०
प्रागुक्तफलभागी स भविष्यति न[11] संशयः । एकादशीं द्वादशीं च स्थेयमत्र मया सदा ॥ १११
यस्तत्रोपवसेद्धीमान्स प्रागुक्तफलं लभेत् । तद्व्रजध्वं महाभागाः स्थानमिष्टं यथेष्टतः ॥ ११२
अहमप्यत्र वत्स्यामीत्युक्त्वा सोऽन्तरधीयत । गते वराहे पितरः कोकामामन्त्र्य ते ययुः ॥११३
कोकाऽपि तीर्थसहिता संस्थिता गिरिराजनि । छाया महीमयी क्रोडी पिण्डप्राशनबृंहिता ११४
गर्भमादायै[12] सश्रद्धा वाराहस्यैव सुन्दरी । ततोऽस्यां[13] प्राभवत्पुत्रो भौमस्तु नर[14]कासुरः ॥
प्राग्ज्योतिषं च नगरमस्य दत्तं च विष्णुना ॥ ११५

एवं मयोक्तं वरदस्य विष्णोः कोकामुखे दिव्यवराहरूपम् ।
श्रुत्वा नरस्त्यक्तमलो विपाप्मा दशाश्वमेधेष्टिफलं लभेत ॥ ११६

इति श्रीमहापुराणे आदिब्राह्मे व्यासऋषिसंवादे श्राद्धविधिनिरूपणं नामैकोनविंशाधिकद्विशततमोऽध्यायः ॥ २१९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—११७०८

---

१ ग. °जुर्येन र° । २ क. ख. °दाऽध्यासो । ३ क. केनापि सा सा पु° । ४ क. °धा । आत्रेयदुहिता प° । ५ ख. दुहिता । ६ ख. °का नाम्ना च वि । ७ क. °टिवहा । ८ क. पूजया । ख. पूजायां तु विमु° । ९ क. °र्थेष्वल्पं तथा दानमु° । १० क. मासेऽसि° । ख. मासि सि° । ११ क.ख. नरोत्तमः । ए° । १२ ग. °र्भसंस्पर्शाद्गुरा° । १३ ख. °स्यामभ° । १४ ग. °रकोऽसु ।

अथ विंशाधिकद्विशततमोऽध्यायः।

मुनय ऊचुः—

भूयः प्रब्रूहि भगवञ्श्राद्धकल्पं सुविस्तरात्। कथं क च कदा केषु [1]कैस्तद्ब्रूहि तपोधन ॥ १

व्यास उवाच—

शृणुध्वं मुनिशार्दूलाः श्राद्धकल्पं सुविस्तरात्। यथा यत्र यदा [2]येषु यैर्द्रव्यैस्तद्वदाम्यहम् ॥ २

ब्राह्मणैः क्षत्रियैर्वैश्यैः श्राद्धं[3] स्ववरणोदितम्। कुलधर्म[4]मनुर्तिप्रुद्धिर्दातव्यं मन्त्रपूर्वकम् ॥ ३

स्त्रीभिर्वर्णावरैः शूद्रै[5]र्विप्राणामनुशासनात्[6]। अमन्त्रकं विधिपूर्वं वह्नियागविवर्जितम् ॥ ४

पुष्करादिषु तीर्थेषु पुण्येष्वायतनेषु च[7]। शिखरेषु गिरीन्द्राणां पुण्यदेशेषु भो द्विजाः ॥ ५

सरित्सु पुण्यतोयासु नदेषु च सरःसु च। संगमेषु नदीनां च समुद्रेषु च सप्तसु[8] ॥ ६

स्वनुलिप्तेषु गेहेषु स्वेष्वनुज्ञापितेषु च। दिव्यपादपमूलेषु यज्ञियेषु ह्रदेषु च ॥ ७

श्राद्धमेतेषु दातव्यं वर्ज्यमेतेषु चोच्यते। किरातेषु कलिङ्गेषु कोङ्कणेषु[9] क्रमिष्वपि ॥ ८

दशार्णेषु कुमार्येषु तङ्गणेषु [11]क्रथेष्वपि। सिन्धोरुत्तरकूलेषु नर्मदायाश्च दक्षिणे ॥ ९

पूर्वेषु करतो[12]योया न देयं श्राद्धमुच्यते। श्राद्धं देयमुशन्तीह [13]मासि मास्युडुपक्षये ॥ १०

पौर्णमासेषु(?) श्राद्धं च कर्[14]तव्यमृक्षगोचरे। नित्यश्राद्धमदैवं च मनु[15]ष्यैः सह गीयते ॥ ११

नैमित्तिकं सुरैः सार्धं नित्यं नैमित्तिकं तथा। काम्या[16]न्यन्यानि श्राद्धानि प्रतिसंवत्सरं द्विजैः ॥

वृद्धिश्राद्धं च कर्तव्यं जातकर्मादिकेषु [17]च। तत्र युग्मान्द्विजाना[18]हुर्मन्त्रपूर्वं तु वै द्विजाः ॥ १३

कन्यां गते सवितरि दिनानि दश पञ्च [19]च। पूर्वेणैवेह विधिना श्राद्धं तत्र विधीयते ॥ १४

प्रतिपद्धनलाभाय द्वितीया द्विपदप्रदा। पुत्रार्थिनी तृतीया तु चतुर्थी शत्रुनाशिनी ॥ १५

[20]श्रियं प्राप्नोति पञ्चम्यां षष्ठ्यां पू[21]ज्यो भवेन्नरः। गणाधिपत्यं सप्तम्यामष्टम्यां बुद्धिमुत्तमा[22]म् १६

स्त्रियो नव[23]म्यां प्राप्नोति दशम्यां पूर्णकामताम्। वेदांस्तथाऽऽप्नुयात्सर्वानेकादश्यां क्रियापरः ॥

द्वादश्यां [24]जयलाभं च प्राप्नोति पितृपूजकः। प्रजावृद्धिं पशुं मेधां स्वातन्त्र्यं पुष्टिमुत्तमाम् ॥ १८

दीर्घायुरथवैश्वर्यं कुर्वाणस्तु त्रयोदशीम्। अवाप्नोति न संदेहः [25]श्राद्धं श्र[26]द्धासमन्वितः ॥ १९

यथासंभविनाऽन्नेन श्राद्धं श्रद्धासमन्वितः। युवानः पितरो यस्य मृताः शस्त्रेण वा हताः ॥ २०

तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता। श्राद्धं कुर्वन्नमावास्यां यत्नेन पुरुषः शुचिः ॥ २१

सर्वान्कामानवाप्नोति स्वर्गं चानन्तमश्नुते। अतःपरं मुनिश्रेष्ठाः शृणुध्वं वदतो मम ॥ २२

पितॄणां प्रीतये [27]यत्र यद्देयं प्रीति[28]कारिणा। मासं तृप्तिः पितॄणां तु हविष्यान्नेन जायते ॥ २३

मासद्वयं मत्स्यमांसैस्तृप्तिं यान्ति पितामहाः। त्रीन्मासान्हारिणं मांसं विज्ञेयं पितृतृप्तये ॥ २४

---

१ क. कैस्तु ब्रूहि। २ क. येन। ३ क. °द्धं कार्यं यथोदि°। ४ ग. °धर्माण(य)मनुजैर्दा°। ५ क. ग. °द्रैर्देयं विप्रानु°। ६ क. °त्। समन्त्रकविधिं वाऽपि व°। ग. °त्। वह्निवर्जं तु पूर्ववद्वह्नि°। ७ क. ग. °ह्निपाकवि°। ८ ग. वा। ९ ग. °सु। अनु°। १० ख. °षु क्रमिष्व°। ११ ग. कुशेष्वपि। १२ क. ख. °यायां न। १३ क. ख. मासे मासे च पक्षयोः। पौ°। प°। १४ ख. °तव्यं चक्षुगो°। १५ ख. °नुना परिगी°। १६ ग. °म्यान्येतानि। १७ क. ख. वै। १८ ख. °हुर्मातृपू°। १९ ग. च पार्वणेनेह। २० ख. स्त्रियं। २१ क. श्रेष्ठो। २२ ख. °म्। सप्तम्यां श्रियमाप्नोति कार्यप्रदाऽष्टमी मता। स्त्रि°। २३ ख. °म्यां पशुमाप्नो°। २४ ख. पुत्रलाभं। २५ क. ख. श्राद्धे। २६ क. ख. °द्धापरो नरः। य°। २७ क. ग. यच्च प्रदेयं। २८ क. ग. °कारणम्। मा°।

पुष्णाति चतुरो मासाञ्शशस्य पिशितं पितॄन् । शा[1]कुनं पञ्च वै मासान्षण्मासाञ्शूकरामिषम् ॥
छागलं सप्त वै मासानैणेयं चाष्टमासकान् । करोति तृप्तिं नव वै रुरुमांसं न संशयः ॥ २६
ग[2]व्यं मांसं[3] पितृतृप्तिं करोति दशमासिकीम् । तथैकादश मासांस्तु औरभ्रं पितृतृप्तिदम् ॥ २७
संवत्सरं तथा गव्यं पयः पायसमेव च । वाध्रीनमा(ध्रीणसा)मिषं लोहं कालशाकं तथा मधुं[4] २८
रोहितामिषमन्नं च[5] दत्तान्यात्मकुलोद्भवैः । अनन्तं वै प्रयच्छंन्ति तृप्तियोगं सुतांस्तथा ॥ २९
पितॄणां नात्र संदेहो गयाश्राद्धं च भो द्विजाः । यो ददाति गुडोन्मिश्रांस्तिलान्वा श्राद्धकर्मणि
मधु वा मधुमिश्रं वा अक्षयं सर्वमेव तत् । अपि नः[6] स कुले[7] भूयाद्यो नो दद्यांज्जलाञ्जलिम्[8] ३१
पायसं मधुसंयुक्तं वर्षासु च मघासु च । एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् ॥ ३२
गौरीं वाऽप्युद्वहेत्कन्यां[9] नीलं वा वृषमुत्सृजेत् । कृत्तिकासु पितॄनर्च्य स्वर्गमाप्नोति मानवः ॥ ३३
अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां लभेत् । शौर्यमार्द्रासु चाऽऽप्नोति क्षेत्राणि च पुनर्वसौ
पुष्ये[10] तु धनमक्षय्यमाश्लेषे[11] चाऽऽयुरुत्तमम् । मघासु च प्रजां पुष्टिं सौभाग्यं फाल्गुनीषु च ३५
प्रधानशीलो भवति सापत्यश्चोत्तरासु च । प्रयाति श्रेष्ठतां शास्त्रे हस्ते श्राद्धप्रदो नरः ॥ ३६
रूपं तेजश्च चित्रासु तथाऽपत्यमवाप्नुयात् । वाणिज्यलाभदा स्वाती[12] विशाखा पुत्रकामदा॥ ३७
कुर्वन्तां चानुराधासु ता दद्युश्चक्रवर्तिताम् । आधिपत्यं च ज्येष्ठासु मूले चाऽऽरोग्यमुत्तमम्॥ ३८
आषाढासु यशःप्राप्तिरुत्तरासु [13]विशोकता । श्रवणेन शुभाँ[14]ल्लोकान्धनिष्ठासु धनं महत् ॥ ३९
वेदवित्त्वमभिजिति भिषक्सिद्धिं च वारुणे । अजाविकं प्रौष्ठपद्यां [15]विन्देद्गावस्त(श्च त)थोत्तरे ॥
रेवतीषु तथा कुप्यमश्विनीषु तुरङ्गमान् । श्राद्धं कुर्वंस्तथाऽऽप्नोति भरणीष्वायुरुत्तमम् ॥ ४१
एवं फलमवाप्नोति ऋक्षेष्वेतेषु तत्त्ववित् । तस्मात्काम्यानि श्राद्धानि[16] देयानि विधिवद्द्विजाः ॥
कन्याराशिगते सूर्ये फलमत्यन्तमिच्छता । यान्यान्कामानभिध्यायन्कन्याराशिगते रवौ ॥ ४३
श्राद्धं कुर्वन्ति मनुजास्तांस्तान्कामाल्लँभन्ति ते । नान्दीमुखानां कर्तव्यं कन्याराशिगते रवौ ४४
पौर्णमास्यां तु कर्तव्यं वाराहवचनं यथा । दिव्यभौमान्तरिक्षाणि स्थावराणि चराणि च ॥४५
पिण्डमिच्छन्ति पितरः कन्याराशिगते रवौ । कन्यां गते सवितरि यान्यहानि तु षोडश ॥ ४६
क्रतुभिस्तानि तुल्यानि देवो नारायणोऽब्रवीत् । राजसूयाश्वमेधाभ्यां य इच्छेद्दुर्लभं फलम् ४७
अप्यम्बुशाकमूलाद्यैः पितॄन्कन्यागतेऽर्चयेत् । उत्तराहस्तनक्षत्रगते तीक्ष्णांशुमालिनि ॥ ४८
यो[17]ऽर्चयेत्स्वपितॄन्भक्त्या तस्य वासस्त्रिविष्टपे । हस्तर्क्षगे दिनकरे पितृराजानुशासनात् ॥ ४९
तावत्पितृपुरी शून्या यावद्वृश्चिकदर्शनम् । वृश्चिके समतिक्रान्ते पितरो दैवतैः सह ॥ ५०
[18]निःश्वस्य प्रतिगच्छन्ति शापं दत्त्वा सुदुः[19]सहम् । अष्टकासु च कर्तव्यं श्राद्धं मन्वन्तरासु वै॥ ५१
अन्वष्टकासु क्रमशो मातृपूर्वं तदिष्यते । ग्रहणे च व्यतीपाते [20]रविचन्द्रसमागमे ॥ ५२
जन्मर्क्षे ग्रहपीडायां श्राद्धं पार्वणमुच्यते । अयनद्वितये श्राद्धं विषुवद्वितये तथा ॥ ५३
संक्रान्तिषु च कर्तव्यं श्राद्धं विधिवदुत्तमम् । एषु कार्यं द्विजाः श्राद्धं पिण्डनिर्वापणादृते ॥५४

---

१ क. शाकुन्तं । २ ग. गवयस्य मां° । ३ ग. °सं तृ° । ४ क. °धु । दौहित्रामि° । ५ ग. च । ६ क. नः स्वकु° । ७ ग. °ले जाया° । ८ ग. °द्यात्त्रयोदशीम् । ९ क. °हेद्भार्यां नी° । १० ख. तिष्ये । ११ क. ख. °षे पुरुषोत्तम° । १२ क. स्वातिर्विशा° । ग. स्वात्यो । १३ ख. विशेषतः । १४ क. ख. °भान्कामान्ध° । १५ क. विद्विषस्तु तथो । ख. विद्वेषस्तु तथो° । १६ क. ख. °नि कर्तव्यानि द्विजोत्तमाः । क° । १७ ख. °येच्च पि° । १८ ख. निराशाः । १९ ख. सुदारुणम् । २० ग. नवसस्यसमागते ।

वैशाखस्य तृतीयायां[1] नवम्यां कार्तिकस्य च । श्राद्धं कार्यं तु शुक्लायां संक्रान्तिविधिना नरैः ५५
त्रयोदश्यां भाद्रपदे माघे[2] चन्द्रक्षयेऽहनि । श्राद्धं कार्यं[3] पायसेन[4] दक्षिणायनवच्च तत्[5] ॥ ५६
यदा च श्रोत्रियोऽभ्येति गेहं [6]वेदविदग्निमान् । तेनैकेन च कर्तव्यं श्राद्धं विधिवदुत्तमम् ॥ ५७
श्राद्धीयद्रव्यसंप्राप्तिर्यदा[7] स्यात्साधुसंमता । पार्वणेन विधानेन श्राद्धं कार्यं तथा द्विजैः ॥ ५८
प्रतिसंवत्सरं कार्यं मातापित्रोर्मृतेऽहनि[8] । पितृव्यस्याप्यपुत्रस्य भ्रातुर्ज्येष्ठस्य चैव हि ॥ ५९
पार्वणं देवपूर्वं स्यादेकोद्दिष्टं सुरैर्विना । द्वौ दैवे [9]पितृकार्ये त्रीनेकैकमुभयत्र वा ॥ ६०
मातामहानामप्येवं सर्वमूहेन[10] कीर्तितम् । प्रेतीभूतस्य सततं भुवि पिण्डं जलं तथा ॥ ६१
सतिलं सकुशं दद्याद्बहिर्जलसमीपतः । तृतीयेऽह्नि च कर्तव्यं[11] प्रेतास्थिचयनं द्विजैः ॥ ६२
दशाहे ब्राह्मणः शुद्धो द्वादशाहेन [12]क्षत्रियः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥ ६३
सूतकान्ते[13] गृहे श्राद्धमेकोद्दिष्टं प्रचक्षते[14] । द्वादशेऽहनि[15] मासे च त्रिपक्षे च ततः परम् ॥ ६४
मासि मासि च कर्तव्यं यावत्संवत्सरं द्विजाः । तत परतरं कार्यं सपिण्डीकरणं क्रमात्[16] ॥ ६५
कृते सपिण्डीकरणे पार्वणं[17] प्रोच्यते पुनः । ततः प्रभृति निर्मुक्ताः प्रेतत्वात्पितृतां गताः ॥ ६६
अमूर्ता मूर्तिमन्तश्च पितरो द्विविधाः स्मृताः । नान्दीमुखास्त्वमूर्ताः स्युर्मूर्तिमन्तोऽथ पार्वणाः[18] ॥
एकोद्दिष्टाशिनः प्रेताः[19] पितॄणां निर्णयस्त्रिधा ॥ ६७

मुनय ऊचुः—

कथं सपिण्डीकरणं कर्तव्यं द्विजसत्तम । प्रेतीभूतस्य विधिवद्ब्रूहि नो वदतां वर ॥ ६८

व्यास उवाच—

सपिण्डीकरणं विप्राः शृणुध्वं वदतो मम । तच्चापि देवरहितमेकार्घैकपवित्रकम् ॥ ६९
नैवाग्नौकरणं तत्र तच्चाऽऽवाहनवर्जितम् । अपसव्यं च तत्रापि भोजयेदयुजो द्विजान् ॥ ७०
विशेषस्तत्र चान्योऽस्ति प्रतिमासक्रियादिकः । तं कथ्यमानमेकाग्राः शृणुध्वं मे द्विजोत्तमाः ७१
तिल[20]गन्धोदकैर्युक्तं[21] तत्र पात्रचतुष्टयम्[22] । कुर्यात्पितॄणां त्रितयमेकं प्रेतस्य च द्विजाः ॥ ७२
पात्रत्रये प्रेतपात्रादर्घं चैव प्रसेचयेत् । ये समाना इति जपन्पूर्ववच्छेषमाचरेत् ॥ ७३
स्त्रीणामप्येवमेव स्यादेकोद्दिष्टमुदाहृतम् । सपिण्डीकरणं तासां[23] पुत्राभावे न विद्यते ॥ ७४
प्रतिसंवत्सरं कार्यमेकोद्दिष्टं नरैः स्त्रियाः । मृताहनि च तत्कार्यं पितॄणां विधिचोदितम् ॥ ७५
पुत्राभावे सपिण्डास्तु तदभावे सहोदराः । कुर्युरेतं विधिं सम्यक्पुत्रस्य च सुताः सुताः ॥ ७६
कुर्यान्मातामहानां तु पुत्रिकातनयस्तथा[24] । द्व्यामुष्यायणसंज्ञास्तु मातामहपितामहान् ॥ ७७
पूजयेयुर्यथान्यायं श्राद्धैर्नैमित्तिकैरपि । सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममन्त्रकम् ॥ ७८
तदभावे च नृपतिः कारयेत्[25]स्वकुटुम्बिनाम् । तज्जातीयैर्नरैः सम्यग्[26]दाहाद्याः सकलाः क्रियाः ७९

१ क. ख. °यां श्राद्धं कार्यं द्विजोत्तमैः । त्र° । २ ख. °घे मासि क्ष° । ३ क. ख. °र्यं तु शुक्लायां नवम्यां कार्तिकस्य तु । य° । ४ क. °न पितॄणां तृप्तिमिच्छता । दक्षिणायनसंपत्तिर्यदा । ५ ख. °णाभिमुखस्ततः । य° । ६ ख. वेदाङ्गवेदवित् । ते° । ७ ख. °संपत्तिर्य° । ८ क. ख. °पित्रोः क्षयेऽह° । ९ ख. पितृकृत्ये । ग. पितृपक्षे । १० क. ख. °र्वभूतेन । ११ क. °व्यं प्रत्यगावाहनं । ख. °व्यं प्रत्यगाहवनी द्वि° । १२ क. भूमिपः । १३ ग. °न्ते मृतश्रा° । १४ क. प्रशस्यते । १५ क. ख. °शे चैव मा° । ख. °शे चैकमा° । १६ क. ख. तदा । १७ क. ख. °णं प्रारभेत्पुनः । १८ ग. पार्वणे । १९ ख. °ताः प्रेतत्वात्पितृतां गताः । क° । २० क. °लदर्भोद° । २१ क. °क्तं कुर्यादन्नच° । २२ क. °म् । पितॄणां तत्र त्रि° । २३ ग. °र्यं स्त्रीणां तद्विधि° । २४ क. °था । आमु° । २५ क. °येच्च कु° । २६ ग. °म्यग्दायाद्याः ।

सर्वेषामेव वर्णानां बान्धवो नृपतिर्यतः । एता वः कथिता विप्रा नित्या नैमित्तिकास्तथा ॥ ८०
वक्ष्ये श्राद्धाश्रयामन्यां नित्यनैमित्तिकां क्रियाम् । दर्शस्त(र्श त)त्र निमित्तं तु विद्यादिन्दुक्षयान्वितः(तम्) ॥ ८१
नित्यस्तु नियतः कालस्तस्मिन्कुर्याद्यथोदितम् । सपिण्डीकरणादूर्ध्वं पितुर्यः प्रपितामहः ॥ ८२
स तु लेपभुजं याति प्रलुप्तः पितृपिण्डतः । तेषां हि यश्चतुर्थोऽन्यः स तु लेपभुजो भवेत् ॥ ८३
सोऽपि संबन्धतो हीनमुपभोगं प्रपद्यते । पिता पितामहश्चैव तथैव प्रपितामहः ॥ ८४
पिण्डसंबन्धिनो ह्येते विज्ञेयाः पुरुषास्त्रयः । लेपसंबन्धिनश्चान्ये पितामहपितामहात् ॥ ८५
प्रभृत्युक्तास्त्रयस्तेषां यजमानश्च सप्तमः । इत्येष मुनिभिः प्रोक्तः संबन्धः साप्तपौरुषः ॥ ८६
यजमानात्प्रभृत्यूर्ध्वमनुलेपभुजस्तथा । ततोऽन्ये पूर्वजाः सर्वे ये चान्ये नरकौकसः ॥ ८७
येऽपि तिर्यक्त्वमापन्ना ये च भूतादिसंस्थिताः । तान्सर्वान्यजमानो वै श्राद्धं कुर्वन्यथाविधि ८८
स समाप्यायते विप्रा येन येन वदामि तत् । अन्नप्रकिरणं यत्तु मनुष्यैः क्रियते भुवि ॥ ८९
तेन तृप्तिमुपायान्ति ये पिशाचत्वमागताः । यदम्बु स्नानवस्त्रोत्थं भूमौ पतति भो द्विजाः ॥ ९०
तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते । यास्तु गन्धाम्बुकणिकाः पतन्ति धरणीतले ॥ ९१
ताभिराप्यायनं तेषां देवत्वं ये कुले गताः । उद्धृतेष्वथ पिण्डेषु याश्चाम्बुकणिका भुवि ॥ ९२
ताभिराप्यायनं तेषां ये तिर्यक्त्वं कुले गताः । ये चादन्ताः कुले बालाः क्रियायोगाद्बहिष्कृताः
विपन्नास्त्वनधिकाराः संमार्जितजलाशिनः । भुक्त्वा चाऽऽचामतां यच्च यज्जलं चाङ्घ्रिशौचजम्
ब्राह्मणानां तथैवान्यत्तेन तृप्तिं प्रयान्ति वै । एवं यो यजमानस्य यश्च तेषां द्विजन्मनाम् ॥ ९५
कश्चिज्जलान्नविक्षेपः शुचिरुच्छिष्ट एव वा । तेनान्नेन कुले तत्र ये च योन्यन्तरं गताः ॥ ९६
प्रयान्त्याप्यायनं विप्राः सम्यक्श्राद्धक्रियावताम् । अन्यायोपार्जितैरर्थैर्यच्छ्राद्धं क्रियते नरैः ९७
तृप्यन्ते ते न चाण्डालपुल्कसाद्यासु योनिषु । एवमाप्यायनं विप्रा बहूनामेव बान्धवैः ॥ ९८
श्राद्धं कुर्वद्भिरत्राम्बुविक्षेपैः संप्रजायते । तस्माच्छ्राद्धं नरो भक्त्या शाकेनापि यथाविधि ॥ ९९
कुर्वीत कुर्वतः श्राद्धं कुले कश्चिन्न सीदति । श्राद्धं देयं तु विप्रेषु संयतेष्वग्निहोत्रिषु ॥ १००
अवदातेषु विद्वत्सु श्रोत्रियेषु विशेषतः । त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित् ॥ १०१
मातापितृपरश्चैव स्वस्रीयः सामवेदवित् । ऋत्विक्पुरोहिताचार्यमुपाध्यायं च भोजयेत् ॥ १०२
मातुलः श्वशुरः श्यालः संबन्धी द्रोणपाठकः । मण्डलब्राह्मणो यस्तु पुराणार्थविशारदः ॥ १०३
अकल्पः कल्पसंतुष्टः प्रतिग्रहविवर्जितः । एते श्राद्धे नियोक्तव्या ब्राह्मणाः पङ्क्तिपावनाः ॥ १०४
निमन्त्रयेत पूर्वेद्युः पूर्वोक्तान्द्विजसत्तमान् । दैवे नियोगे पित्र्ये च तांस्तथैवोपकल्पयेत् ॥ १०५
तैश्च संयमिभिर्भाव्यं यस्तु श्राद्धं करिष्यति । श्राद्धं दत्त्वा च भुक्त्वा च मैथुनं योऽधिगच्छति
पितरस्तस्य वै मासं तस्मिन्रेतसि शेरते । गत्वा च योषितं श्राद्धे यो भुङ्क्ते यस्तु ग(य)च्छति ॥
रेतोमूत्रकृताहारास्तं मासं पितरस्तयोः । तस्मात्त(त्तु) प्रथमं कार्यं प्राज्ञेनोपनिमन्त्रणम् ॥ १०८
अप्राप्तौ तद्दिने वाऽपि वर्ज्या योषित्प्रसङ्गिनः । भिक्षार्थमागतांश्चापि कालेन संयतान्यतीन् १०९

---

१ क. संप्राप्ते । २ क. °मन्ते ले° । ३ क. बान्धवाः । ४ ग. °योगयथास्थिताः । ५ क. °मार्जनान्नसाशि° । ६ ग. °वान्ये तेन । ७ क. °श्चिन्निला° । ८ ग. °लार्थवि° । ९ क. तेन तेन । १० क °नामपि बा° । ११ °हतान्न प्र° । ख. °हमातं प्र° ।

भोजयेत्प्रणिपाताद्यैः प्रसाद्य यतमानसः। योगिनश्च तदा श्राद्धे भोजनीया विपश्चिता ॥ ११०
योगाधारा हि पितरस्तस्मात्तान्पूजयेत्सदा। ब्राह्मणानां सहस्राणि एको योगी भवेद्यदि[1]॥ १११
यजमानं च भोक्तॄंश्च नौरिवाम्भसि तारयेत्। पितृगाथा तथैवात्र गीयते ब्रह्मवादिभिः ॥ ११२
या गीता पितृभिः[2] पूर्वमैलस्या[3]ऽऽसीन्महीपतेः। कदा नः संततावग्र्यः कस्यचिद्भविता सुतः ११३
यो योगिभुक्तशेषान्नो भुवि पिण्डान्प्रदास्यति। गयायामथवा पिण्डं खड्गमांसं तथा हविः ॥
कालशाकं तिलाज्यं च तृप्तये कृसरं च नः। वैश्वदेवं च सौम्यं च खड्गमांसं परं हविः ११५
विषाणवर्ज्[4] शिरस आ पादादाशिषामहे। दद्याच्छ्राद्धं त्रयोदश्यां मघासु च यथाविधि ॥ ११६
मधुसर्पिःसमायुक्तं पायसं दक्षिणायने। तस्मात्संपूजयेद्भक्त्या स्वपितॄन्विधिवन्नरः ॥ ११७
कामानभीप्सन्सकलान्[5]पापादात्मविमोचनम्। वसून्रुद्रांस्तथाऽऽदित्यान्नक्षत्रग्रहतारकाः ॥ ११८
प्रीणयन्ति मनुष्याणां पितरः श्राद्धतर्पिताः। *आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च
प्रयच्छन्ति तथा राज्यं पितरः श्राद्धतर्पिताः। तथाऽपराह्णः पूर्वाह्णात्पितॄणामतिरिच्यते ॥ १२०
संपूज्य स्वागतेनैतान्सदनेऽभ्यागतान्द्विजान्। पवित्रपाणिराचान्तानासनेषूपवेशयेत् ॥ १२१
श्राद्धं कृत्वा विधानेन संभोज्य च द्विजोत्तमान्। विसर्जयेत्प्रियाण्युक्त्वा प्रणिपत्य च भक्तितः
आद्वारमनुगच्छेच्च आगच्छेदनुमोदितः। ततो नित्यक्रियां कुर्याद्भोजयेच्च तथाऽतिथीन् ॥ १२३
नित्यक्रियां पितॄणां[6] च केचिदिच्छन्ति सत्तमाः। न पितॄणां तथैवान्ये शेषं पूर्ववदाचरेत् ॥
पृथक्त्वेन[7] वदन्त्यन्ये केचित्पूर्वं च पूर्ववत्। +ततस्तदन्नं भुञ्जीत सह भृत्यादिभिर्नरः ॥ १२५
एवं कुर्वीत धर्मज्ञः श्राद्धं पित्र्यं समाहितः। यथा च विप्रमुख्यानां परितोषोऽभिजायते॥ १२६
इदानीं संप्रवक्ष्यामि वर्जनीयान्द्विजाधमान्। मित्रध्रुक्कुनखी क्लीबः क्षयी शुक्री[8] वणिक्पथः १२७
श्यावदन्तोऽथ खल्वाटः काणोऽन्धो बधिरो जडः। मूकः पङ्गुः कुणिः षण्ढो[9] दुश्चर्मा व्यङ्गकेकरौ
कुष्ठी[10] रक्तेक्षणः कुब्जो वामनो विकटोऽलसः। मित्रशत्रु[11]र्दुष्कुलीनः पशुपालो निराकृतिः १२९
परिवित्तिः परिवेत्ता परिवेदनिकासुतः। वृषलीपतिस्तत्[12]सुतश्च न भवेच्छ्राद्धभुग्द्विजः ॥ १३०
वृषलीपुत्रसंस्कर्ता[13] अनूढो दिधिषूपतिः। भृतकाध्यापको यस्तु भृतकाध्यापितश्च यः ॥ १३१
सूतका[14]न्नोपजीवी च मृगयुः सोमविक्रयी। अभिशस्तस्तथा स्तेनः पतितो वार्धुषिः शठः ॥ १३२
पिशुनो वेदसंत्यागी[15] दानाग्नित्यागनिष्ठुरः। राज्ञः पुरोहितो भृत्यो विद्याहीनोऽथ मत्सरी १३३
वृद्ध[16]द्विड्दुर्धरः क्रूरो मूढो देवलकस्तथा। नक्षत्रसूचकश्चैव पर्वकारश्च गर्हितः ॥ १३४
अयाज्ययाजकः षण्ढो गर्हिता ये च येऽधमाः। न ते श्राद्धे नियोक्तव्या दृष्ट्वाऽमी पङ्क्तिदूषकाः
असतां प्रग्रहो यत्र सतां चैवावमानना। दण्डो[17] देवकृतस्तत्र सद्यः पतति दारुणः ॥ १३६
हित्वाऽऽगमं सुविहितं बालिशं यस्तु भोजयेत्। आदिधर्मं समुत्सृज्य दाता तत्र विनश्यति ॥

---

*अयं श्लोको नास्ति क. पुस्तके। + इत आरभ्य जायत इत्यन्तं नास्ति क. ख. पुस्तकयोः।

---

१ ख. °दि। योगी च भोजितश्चेत्स्यान्नौरि°। २ क. ख. °भिः सार्धं पू°। ३ क. ख. °लस्य भूप°। ४ ग. °वर्ज्यो गर्ह्याश्च आमदानाशशानृते। द°। ५ क. °लान्ये दिव्या ये च मानुषाः। व°। ६ क. ख. °णां प्राक्केचि°। ७ ग. °न च नित्यत्वे के°। ८ ग. स्विन्नी। ९ क. षण्ढः कुकर्मा। १० क. कुक्षिकुष्ठो रक्तदृष्टिर्घातनो। ख. कुक्षिकुष्ठो रक्तदृष्टिर्वाम°। ११ क. °त्रुर्दुःखशीलः प°। १२ ग. °स्तत्सूनुश्च तथा तच्छ्रा°। १३ क. °र्ताऽनृतवाग्दिधि°। १४ ख. सूतिकानिष्टकर्ता च। १५ क. °गी होताऽग्नि°। १६ ख. °द्विण्मिथुनश्चैव पतितस्यैव पोषकः। न°। १७ ख. °ण्डो दैव। ग. °ण्डो दैत्यकृ°।

*यस्त्वाश्रितं द्विजं त्यक्त्वा अन्यमानीय भोजयेत्। तन्निःश्वासाग्निनिर्दग्धस्तत्र दाता विनश्यति
वस्त्राभावे क्रिया नास्ति[1] यज्ञा वेदास्तपांसि च । तस्माद्वासांसि देयानि श्राद्धकाले विशेषतः ॥
कौशेयं क्षौमकार्पासं दुकूलमहतं तथा । श्राद्धे त्वेतानि यो दद्यात्कामानाप्नोति चोत्तमान् १४०
यथा गोषु प्रभूतासु वत्सो विन्दति मातरम् । तथा[2]ऽन्नं[3] तत्र विप्राणां जन्तुर्यत्रावतिष्ठते ॥ १४१
नामगोत्रं च मन्त्रांश्च दत्तमन्नं न[4]यन्ति ते । अपि ये निधनं प्राप्तास्तृप्तिस्तानुपतिष्ठते ॥ १४२
देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः[5] स्वाहायै स्वधायै नित्यमेव[6] भवन्त्विति[7] १४३
आद्यावसाने श्राद्धस्य त्रिरावृत्त्या जपेत्तदा । पिण्डनिर्वपणे वा[8]ऽपि जपेदेवं समाहितः ॥ १४४
क्षिप्रमायान्ति पितरो राक्षसाः प्रद्रवन्ति च । प्रीयन्ते[9] त्रिषु लोकेषु मन्त्रो[10]ऽयं तारयत्युत ॥ १४५
क्षौमसूत्रं नवं दद्याच्छा(च्छो)णं कार्पासिकं तथा । पत्रो[11]र्णं पट्टसूत्रं च कौशेयं च विवर्जयेत्१४६
वर्जये[12]च्चादशं प्राज्ञो यद्यप्यव्याहतं भवेत् । न प्रीणयन्त्यथैतानि दातुश्चाप्यनयो भवेत् ॥ १४७
न निवेद्यो भवेत्पिण्डः पितॄणां यस्तु जीवति । इष्टेनान्नेन भक्ष्येण भोजयेत्तं यथाविधि ॥ १४८
पिण्डमग्नौ सदा दद्याद्भोगार्थी सततं नरः । पत्न्यै दद्यात्प्रजार्थी च मध्यमं मन्त्रपूर्वकम् ॥ १४९
उत्तमां[13] द्युतिमन्विच्छन्पिण्डं गोषु प्रयच्छति[14] । प्रज्ञां चैव यशः कीर्तिम[15]प्सु चैव[16] निवेदयेत् ॥१५०
प्रार्थयन्दीर्घमायुश्च वायसेभ्यः प्रयच्छति । कुमारशालामन्विच्छन्कुक्कुटेभ्यः प्रयच्छति ॥ १५१
एके विप्राः पुनः प्राहुः पिण्डोद्धरणमग्रतः । अनुज्ञातस्तु विप्रैस्तैः काममुद्ध्रियतामिति ॥ १५२
तस्माच्छ्राद्धं त[17]था कार्यं यथोक्तमृषिभिः पुरा । अन्यथा तु भवेद्दोषः पितॄणां नोपतिष्ठति॥ १५३
यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चणकैस्तथा । संतर्पयेत्पितॄन्मुद्गैः श्यामाकैः सर्षपद्रवैः ॥ १५४
नीवारैर्हस्तिश्यामाकैः प्रियङ्गुभिस्तथाऽर्घयेत् । प्रसातिकां(असतिकाः) सतूलिकां द(तीलकान्द)
द्याच्छ्राद्धे विचक्षणः ॥ १५५
आम्रमाम्रातकं बिल्वं दाडिमं बीजपूरकम्+ । प्राचीनामलकं क्षी[18]रं नारिकेलं परूषकम् ॥ १५६
नारङ्गं च सखर्जूरं द्राक्षानीलकपित्थकम् । पटोलं च प्रियालं च कर्कन्धूबदराणि च ॥ १५७
[19]विकङ्कतं वत्सकं च[20] कस्त्वारु(र्कारू)र्वारकानपि । एतानि फलजातानि श्राद्धे देयानि यत्नतः १५८
गुडशर्करमत्स्यण्डी देयं फाणितं[21]मूर्मुरम् । गव्यं पयो दधि घृतं तैलं च तिलसंभवम् ॥ १५९
सैन्धवं सागरोत्थं च लवणं सारसं तथा । [22]निवेदयेच्छुचीन्गन्धांश्चन्दनागुरुकुङ्कुमान् ॥ १६०
कालशाकं तन्दुलीयं वास्तुकं मूलकं तथा । शाकमारण्यकं चापि दद्यात्पुष्पाण्यमूनि च ॥ १६१
*जातिचम्पकलोध्राश्च मल्लिकाबाणबर्बरी । वृन्ताशोकाटरूपं च तुलसी तिलकं तथा ॥ १६२
[23]पावन्तीं शतपत्रां च गन्धशेफालिकामपि । कुब्जकं तगरं चैव मृगमारण्यकेतकीम् ॥ १६३

---

* अयं श्लोको नास्ति क. ख. पुस्तकयोः । + इतोऽनन्तरं ग. पुस्तके—'वीणाकं सकुचं जम्बु भव्यं भूतं तथाऽरुकम्' इत्यर्धमधिकम् । * क. ख. पुस्तकयोर्नास्त्ययं श्लोकः ।

---

१ क. °स्ति जपते° । २ क. °थाऽन्नमोति तत्रैव ज° । ३ ग. °न्नं नयते विप्रो ज° । ४ ख. यान्ति । ५ ग. °मः स्वधायै स्वाहायै नि° । ६ ख. °व नमो नमः । आ° । ७ क. °वन्तु नः । आ° । ८ क. चापि । ९ ख. प्रयन्ते । १० ख. मन्त्रास्तांस्तार° । ११ क. पितॄणां । १२ क. ख. °येदीदृशं । १३ क. °मां गति° । १४ क. °ति । आप्नोति च य° । १५ °कीर्तिं यस्तु नित्यं नि° । १६ ख. नित्यं । १७ ग. सदा । १८ ख. तीक्ष्णं । १९ ख. °तं बीजपूरं वैकामपि च पूरकम् । ए° । २० क. च खर्वारुरुचका° । २१ ख. °तशुर्मु° । २२ ग. नियोजये° । २३ क. पाराधिं । ख. पारत्रीं ।

यूथिकामतिमुक्तं च श्राद्धयोग्यानि भो द्विजाः । कमलं कुमुदं पद्मं पुण्डरीकं च यत्नतः॥ १६४
इन्दीवरं कोकनदं कह्लारं च नियोजयेत् । कुष्ठं मांसी वालकं च कुक्कुटी जातिपत्रकम् ॥ १६५
नलिकोशीरमुस्तं च ग्रन्थिपर्णी च सुन्दरी । पुनरप्येवमादीनि गन्धयोग्यानि चक्षते ॥ १६६
गुग्गुलुं चन्दनं चैव श्रीवासमगुरुं तथा । धूपानि [2]पितृयोग्यानि ऋषिगुग्गुलमेव च ॥ १६७
राज[3]माषांश्च चणकान्मसूरान्कोरदूषकान् । विप्रुषान्मर्कटां[4]श्चैव कोद्रवांश्चैव वर्जयेत् ॥ १६८
माहिषं चामरं मार्गमाविकै[5]कशफोद्भवम् । स्त्रैणमौष्ट्रमाविकं च दधि क्षीरं घृतं त्यजेत् ॥ १६९
तालं वरुणकाकोलौ बहुपत्रार्जुनीफलम् । जम्बीरं रक्तबिल्वं च शालस्यापि फलं त्यजेत्॥१७०
मत्स्यसूकरकूर्मांश्च गावो वर्ज्या विशेषतः । पूतिकं मृगनाभिं च रोचनां पद्मचन्दनम् ॥ १७१
कालेयकं तूग्रगन्धं तुरुष्कं चापि वर्जयेत् । पालङ्कं च कुमारीं च [6]किरातं पिण्डमूलकम् ॥ १७२
गृञ्जनं चुक्रिकां चु[7]क्रं वरुमां चनपत्रिकाम् । [8]जीवं च श[9]तपुष्पां च नालिकां ग[10]न्धशूकरम् ॥१७३
हलभृत्यं सर्षपं च पलाण्डुं लशुनं त्यजेत् । मा[11]नकन्दं वि[12]षकन्दं व[13]ज्रकन्दं गदास्थिकम् ॥ १७४
[14]पुरुषाल्वं सपिण्डालुं श्राद्धकर्मणि वर्जयेत् । [15]अलाबुं तिक्तपर्णीं च कूष्माण्डं [16]कटुकत्रयम् ॥ १७५
वार्ताकं शिवजातं च लोमशानि वटानि च । [17]कौलीयं रक्तवाणां च बलाका लकुचं तथा॥१७६
श्राद्धकर्माणि वर्ज्यानि विभीतकफलं तथा । आरनालं च शुक्तं च शीर्णं पर्युषितं तथा ॥ १७७
नोग्रगन्धं च दातव्यं कोविदार[18]कशिग्रुकौ । अत्यम्लं पिच्छिलं सूक्ष्मं यातयामं च सत्तमाः१७८
न च देयं गतरसं मद्यगन्धं च यद्भवेत् । [19]हिङ्ग्वग्रगन्धं फणिशं भूनिम्बं निम्बराजिके ॥ १७९
कुस्तुम्बुरुं कलिङ्गोत्थं वर्जयेदम्लवेतसम् । दाडिमं मागधीं चैव नागरार्द्रकतित्तिडीः ॥ १८०
आम्रातकं जीवकं च तुम्बुरुं च नियोजयेत् । +पायसं शाल्मलीमुद्गान्मोदकादींश्च भक्तितः१८१
पानकं च रसालं च गोक्षीरं च निवेदयेत् । यानि चाभ्यवहार्याणि स्वादुस्निग्धानि भो द्विजाः
ईषदम्लकटून्येव देयानि श्राद्धकर्मणि । अत्यम्लं चातिलवणमति[20]तिरिक्तकटूनि च ॥ १८३
आसुराणीह भोज्यानि तान्यतो दूरतस्त्यजेत् । मृष्टस्निग्धानि यानि स्युरीषत्कट्वम्लकानि च ॥
स्वादूनि देवभोज्यानि तानि श्राद्धे नियोजयेत् । छागमांसं वा[21]र्तिकं च तैत्तिरं शशकामिषम् ॥
शिवालावकराजीवमांसं श्राद्धे नियोजयेत् । [22]वाध्रीणसं रक्तशिवं लोहं शल्कसमन्वितम् ॥ १८६
[23]सिंह[24]तुण्डं च खड्गं च श्राद्धे योज्यं तथोच्यते । [25]यदप्युक्तं हि मनुना रोहितं प्रतियोजयेत् १८७
योक्तव्यं हव्यकव्ये[26]षु तथा न विप्रयोजयेत् । एवमुक्तं [27]मया विप्रा वाराहेणाव[28]लोकितम् ॥ १८८

+ अयं श्लोकः ख. ग. पुस्तकयोर्नास्ति ।

---

१ ख सुक्षताः । २ क. गन्धयोग्यानि । ख. श्राद्धयोग्यानि । ३ ख. °माषं पनं चैव मसू° । ग. °माषानलूंश्चैव मसू° । ४ क. °टांश्चोग्रान्कोद्र° । ५ क. °श्रमजाविकं द° । ख. °श्रमजो द्भूतं द° । ६ क. करम्भं । ग. करण्डं । ७ ग. °क्रं वुवुकावरपोतिका° । ८ ग. जीवकं श° । ९ ग. °तपत्रां च । १० क. गन्धसूतकीम् । ख. गन्धसूचकम् । ११ ख. °नस्कन्दं । १२ ख. °षस्कन्दं । १३ क. बककन्दं । १४ क. पुरपालं । ख परुषालुं । १५ क. तिक्तकणं । ख. त्यक्तकर्णं । १६ ग. कटुपत्रिकाम् । १७ क. कालिङ्गं रक्तवाणुं च वीणाकार्तिं कुवालुकम् । श्रा° । ग. कालिन्दं रक्तदारुं च वीणाका वृत्तवारुकम् । श्रा° । १८ क. °कंकिंशुकौ । ख. °कपित्थकौ । १९ ग. हिङ्गुगन्धां फाणिशं च भू° । २० क. °तितिक्त° । २१ क. °सं च वार्ताकं तै° । २२ क. वादिनक्रशिलालोहशशश° । २३ ग. सिंहं तु° । २४ क. °तुण्डिकख° । २५ ख. °यद्यदुक्तं । ग. यद्यप्युक्तं । २६ ग. °षु कापिलं न नियो° । २७ ख. प्रियं । ग. पुरा । २८ ग. °किना । म° ।

मया निषिद्धं भुञ्जानो रौरवं नरकं व्रजेत् । [1]एतानि च निषिद्धानि वाराहेण तपोधनाः ॥१८९
अभक्ष्याणि द्विजातीनां न देयानि पितृष्वपि । रोहितं शूकरं कूर्मं गोधा[2]हंसं च [3]वर्जयेत् ॥ १९०
चक्रवाकं च मद्गुं च शल्कहीनांश्च मत्स्यकान् । कुररं च निरस्थिं च वासहातं च (?) कुक्कुटान्॥
कलविङ्कमयूरांश्च भारद्वाजांश्च शार्ङ्गकान् । नकुलोलूकमार्जा[4]राल्लोँपानन्यान्सुदुर्ग्रहान् ॥ १९२
टिट्टिभा[5]न्सार्धजम्बूकान्व्या[6]घ्रर्क्षतरक्षुकान् । एतानन्यांश्च [7]संदुष्टान्यो भक्षयति दुर्मतिः ॥ १९३
स महापापकारी तु रौरवं नरकं व्रजेत् । पितृष्वेतांस्तु यो दद्यात्पापात्मा गर्हितामिषान्॥ १९४
स स्वर्गस्थानपि पितॄन्नरके पातयिष्यति । कुसुम्भशाकं जम्बीरं सिग्रुकं कोविदारकम् ॥ १९५
पिण्याकं विप्रुषं चैव मसूरं[8] गृञ्जनं शणम् । कोद्रवं कोकिलाक्षं च चुक्रं [9]कंम्बुकपद्मकम् ॥ १९६
चकोरश्येनमांसं च वर्तुलालाबुतालिनीम् । फलं तालतरूणां च भुक्त्वा नरकमृच्छति ॥ १९७
दत्त्वा पितृषु तैः सार्धं व्रजेत्पूयवहं नरः । तस्मात्सर्वप्रयत्नेन नाऽऽहरेत्तु विचक्षणः ॥ १९८
निषिद्धानि वराहेण स्वयं पित्रर्थमादरात् । वरमेवाऽऽत्ममांसस्य भक्षणं मुनयः कृतम् ॥ १९९
न त्वेव हि निषिद्धानामादानं पुंभिरादरात्। अज्ञानाद्वा प्रमादाद्वा सकृदेतानि च द्विजाः २००
भक्षितानि निषिद्धानि प्रायश्चित्तं ततश्चरेत् । फलमूलदधिक्षीरतक्रगोमूत्रयावकैः ॥ २०१
भो[11]ज्यान्नभोज्यसं[12]भुक्ते प्रत्येकं दिनसप्तकम् । एवं निषिद्धाचरणे कृते सकृदपि द्विजैः ॥ २०२
शुद्धिं नेयं शरीरं तु विष्णुभक्तैर्विशेषतः । निषिद्धं वर्जयेद्द्रव्यं यथोक्तं च द्विजोत्तमाः ॥ २०३
समाहृत्य ततः श्राद्धं कर्तव्यं निजशक्तितः । एवं विधानतः श्राद्धं कृत्वा स्वविभवोचितम् ॥
आब्रह्मस्तम्बपर्यन्तं जगत्प्रीणाति मानवः ॥ २०४

मुनय ऊचुः—

पिता जीवति यस्याथ मृतौ द्वौ पितरौ पितुः । कथं श्राद्धं हि कर्तव्यमेतद्विस्तरशो वद ॥ २०५

व्यास उवाच—

यस्मै दद्यात्पिता श्राद्धं तस्मै दद्यात्सुतः स्वयम् । एवं न हीयते धर्मो लौकिको वैदिकस्तथा ॥

मुनय ऊचुः—

मृतः पिता जीवति च यस्य ब्रह्मन्पितामहः । स हि श्राद्धं कथं कुर्यादेतत्त्वं वक्तुमर्हसि ॥ २०७

व्यास उवाच—

पितुः पिण्डं प्रदद्याच्च भोजयेच्च पितामहम् । प्रपितामहस्य पिण्डं [13]वै ह्ययं शास्त्रेषु निर्णयः ॥२०८
मृतेषु पिण्डं दातव्यं जीवन्तं चापि भोजयेत् । सपिण्डीकरणं नास्ति न च पार्वणमिष्यते २०९
आचा[14]रमाचरेद्यस्तु पितृमेधाश्रितं नरः । आयुषा धनपुत्रैश्च वर्धत्याशु न संशयः ॥ २१०
पितृमे[15]धाध्यायमिमं श्राद्धकालेषु यः पठेत् । तदन्नमस्य पितरोऽश्नन्ति च त्रियुगं द्विजाः ॥ २११

---

१ ग. श्राद्धानि । २ ख. °धामांसं । ३ क. क. चन्द्रकम् । ४ ग. र्जारं नोपकार्यांश्चवर्तवान् । ५ क. भान्गार्ध । ६ क. °घ्रगोपुच्छमर्कटान् । ७ क. संदूष्यान्यो । ८ क. ख. गृञ्जनं । ९ क. °रं वितुषं मतम् । १० ग. कञ्चुक° । ११ क. ख. °ज्यान्नं भो° । १२ क. °संयुक्ते प्र° । ख. °संयुक्तं प्र° । १३ ग. वै श्राद्धेषु निर्णयः कृतः । मृ° । १४ ख. °रवांस्तु पुत्रः स्यात्पितॄन्प्रीणाति श्राद्धतः । आ° । १५ क. °धामृतं पुण्यं प्रातःका° ।

एवं मयोक्तः पितृमेधकल्पः पापापहः पुण्यविवर्धनश्च ।
श्रोतव्य एष प्रयतैर्नरैश्च श्राद्धेषु चैवा प्यनुकीर्तयेत ॥ २१२

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे श्राद्धकल्पनिरूपणं नाम
विंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥

आदितः श्लोकानां समष्ट्यङ्काः—११९२०

अथैकविंशत्यधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

एवं सम्यग्गृहस्थेन देवताः पितरस्तथा । संपूज्या हव्यकव्याभ्यामन्नेनातिथिबान्धवाः ॥ १
भूतानि भृत्याः सकलाः पशुपक्षिपिपीलिकाः । भिक्षवो याचमानाश्च ये चान्ये पान्थका गृहे॥२
सदाचाररता विप्राः साधुना गृहमेधिना । पापं भुङ्क्ते समुल्लङ्घ्य नित्यनैमित्तिकीः क्रियाः ॥ ३

मुनय ऊचुः—

कथितं भवता विप्र नित्यनैमित्तिकं च यत् । नित्यं नैमित्तिकं काम्यं त्रिविधं कर्म पौरुषम् ॥ ४
सदाचारं मुने श्रोतुमिच्छामो वदतस्तव । यं कुर्वन्सुखमाप्नोति परत्रेह च मानवः ॥ ५

व्यास उवाच—

गृहस्थेन सदा कार्यमाचारपा[1]रिरक्षणम् । न ह्याचारविहीनस्य भद्रमत्र परत्र वा ॥ ६
यज्ञदानतपांसीह पुरुषस्य न भूतये । भवन्ति यः सदाचारं समुल्लङ्घ्य प्रवर्तते[2] ॥ ७
दुराचारो हि पुरु[3]षो नेहाऽऽयुर्विन्दते महत् । कार्यो धर्मः सदाचार आचा[4]रस्यैव लक्षणम् ॥ ८
त[5]स्य स्[6]वरूपं वक्ष्यामि सदाचा[7]रस्य भो द्विजाः । आत्मनैकमना भूत्वा[8] तथैव परिपालयेत् ॥ ९
त्रिवर्गसाधने यत्नः कर्तव्यो गृहमेधिना । तत्संसिद्धौ गृहस्थस्य सिद्धिरत्र परत्र च ॥ १०
पादेनाप्यस्य पा[9]रत्र्यं कुर्याच्छ्रेयः स्वमात्मवान् । अर्धेन चाऽऽत्मभरणं नित्यनैमित्तिकानि च ११
पादेनैव तथाऽप्यस्य मूलभूतं विवर्धयेत् । एवमाचरतो विप्रा अर्थः साफल्यमृच्छति ॥ १२
तद्वत्पापनिषेधार्थं धर्मः कार्यो विपश्चिता । परत्रार्थस्तथैवान्यः का[10]र्योऽत्रैव फलप्रदः ॥ १३
प्रत्यवायभयात्कामस्तथाऽन्यश्चाविरोधवान् । द्विधा कामोऽपि रचितस्त्रिवर्गायाविरोधकृत् ॥ १४
प[11]रस्परानु[12]बन्धांश्च सर्वानेतान्विचिन्तयेत् । विपरीतानुबन्धांश्च बुध्यध्वं तान्द्विजोत्तमाः ॥ १५
धर्मो धर्मानुबन्धार्थो धर्मो[13] नाऽऽत्मार्थपीडकः । उभाभ्यां च द्विधा कामं तेन तौ च द्विधा पुनः
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिन्तयेत् । समुत्थाय तथाऽऽचम्य प्र[14]स्नातो नियतः शुचिः ॥ १७
पूर्वां संध्यां सनक्षत्रां पश्चिमां सदिवाकराम् । उपासीत यथान्यायं नैनां जह्यादनापदि ॥ १८
असत्प्रलाप[15]मनृतं वाक्पारुष्यं च वर्जयेत् । असच्छास्त्रमसद्वादमसत्सेवां च वै द्विजाः ॥ १९

---

१ क ख. °रिपालनम् । २ ख. °ते । सदाचारः स पु° । ३ ख. °षो ब्रह्मेदं विन्द° । ४ क. ग. °चारो हन्त्यल° । ५ क. तथा च वः प्रव° । ख. तथा । ६ ख. स्वपक्षं । ७ क. °चारं तु भो । ८ ख. °त्वा तं चैव । ९ ख. पावित्र्यं । १० क. ग. काम्योऽत्रै° । ११ क. ख. °रस्य चानु° । १२ क. °बन्धार्थ स° । ग. °बन्धाच्च स° । १३ क. °र्मो वाऽर्थार्थपादकः । १४ ग. प्राङ्मुखे । १५ क. ख. °मत्यर्थं वा° ।

सायंप्रातस्तथा होमं कुर्वीत नियतात्मवान् । नोदयास्तमने चैवमुदीक्षेत विवस्वतः ॥ २०
केशप्रसाधनादर्शदन्तधावनमञ्जनम् । पूर्वाह्ण एव कार्याणि देवतानां च तर्पणम्[1] ॥ २१
ग्रामा[2]वसथतीर्थानां क्षेत्राणां चैव वर्त्मनि[3] । न विण्मूत्रमनुष्ठेयं न च कृष्टे न गोव्रजे ॥ २२
नग्नां परस्त्रियं नेक्षेन्न पश्येदात्मनः शकृत् । उदक्यादर्शनस्पर्श[4]मेवं संभाषणं तथा ॥ २३
नाप्सु मूत्रं पुरीषं वा मैथुनं वा समाचरेत् । नाधितिष्ठेच्छकृन्मूत्रे केशभस्मसपालिकाः ॥ २४
तुषाङ्गारविशीर्णानि रज्जुवस्त्रादिकानि च । नाधितिष्ठेत्तथा प्राज्ञः पथि[5] वस्त्राणि[6] वा भुवि ॥२५
पितृदेवमनुष्याणां भूतानां च तथाऽर्चनम् । कृत्वा विभवतः पश्चाद्गृहस्थो भोक्तुमर्हति ॥ २६
प्राङ्मुखोदङ्मुखो वाऽपि[7] स्वाचान्तो वाग्यतः शुचिः । भुञ्जीत चाऽन्नं तच्चित्तो ह्यन्तर्जानुः सदा नरः
[8]उपघातमृते दोषान्नान्नस्योदीरयेद्बुधः । प्रत्यक्षलवणं वर्ज्य[9]मन्नमुच्छिष्टमेव च ॥ २८
न गच्छन्न च तिष्ठन्वै विण्मूत्रोत्सर्गमात्मवान् । कुर्वीत चैव[11]मुच्छिष्टं न किंचिदपि भक्षयेत् ॥ २९
उच्छिष्टो नाले[12]पेत्किंचित्स्वाध्यायं च विवर्जयेत् । न पश्येच्च रविं चेन्दुं नक्षत्राणि च कामतः ॥
भिन्नासनं च शय्यां च भाजनं च विवर्जयेत् । गुरूणामासनं देय[13]मभ्युत्थानादिसत्कृतम् ॥ ३१
अनुकूलं तथाऽऽलापमभिकुर्वीत बुद्धिमान् । तत्रानुगमनं कुर्यात्प्रतिकूलं न संचरेत् ॥ ३२
नैकवस्त्रश्च भुञ्जीत न कुर्याद्देवतार्चनम् । नाऽऽवाहयेद्द्विजानग्नौ होमं कुर्वीय बुद्धिमान् ॥ ३३
न स्नायीत नरो नग्नो न शयीत कदाचन । न पाणिभ्यामुभाभ्यां तु कण्डूयेत शिरस्तथा ॥ ३४
न चाभीक्ष्णं शिरःस्नानं कार्यं निष्कारणं बुधैः । शिरःस्नातश्च तैलेन नाङ्गं किंचिदुपस्पृशेत् ३५
अनध्यायेषु सर्वेषु स्वाध्यायं च विवर्जयेत्[14] । ब्राह्मणानलगोसूर्यान्नावमन्येत्कदाचन ॥ ३६
उदङ्मुखो दिवा रात्रावुत्सर्गं दक्षिणामुखः । आबाधासु यथाकामं कुर्यान्मूत्रपुरीषयोः ॥ ३७
दुष्कृतं न गुरोर्ब्रूयात्क्रुद्धं चैनं प्रसादयेत् । परिवादं न शृणुयादन्येषामपि कुर्वताम् ॥ ३८
पन्था देयो ब्राह्मणानां राज्ञो [15]दुःखातुरस्य च । विद्याधिकस्य गर्भिण्या रोगार्तस्य महीयतः ॥
मूकान्धबधिराणां च मत्तस्योन्मत्तकस्य च । देवालयं चैत्यतरुं तथैव च चतुष्पथम् ॥ ४०
विद्याधिकं गुरुं चैव बुधः कुर्यात्प्रदक्षिणम् । उपानद्वस्त्रमाल्या[16]दि धृतमन्यैर्न धारयेत् ॥ ४१
चतुर्दश्यां तथाऽष्टम्यां पञ्चदश्यां च पर्वसु । तैलाभ्यङ्गं तथा भोगं योषितश्च विवर्जयेत् ॥ ४२
*नोत्क्षिप्तबाहुजङ्घश्च प्राज्ञस्तिष्ठेत्कदाचन[17] । न चापि विक्षिपेत्पादौ पादं पादेन नाऽऽक्रमेत् ४३
पुंश्चल्याः कृतकार्यस्य बालस्य पतितस्य च । मर्माभिघातमाक्रोशं पैशुन्यं च विवर्जयेत् ॥ ४४
दम्भाभिमानं तैक्ष्ण्यं च न कुर्वीत विचक्षणः । मूर्खोन्मत्तव्यसनिनो विरूपानपि वा तथा ॥४५
न्यूनाङ्गांश्चा[18]धनांश्चैव नोपहासेन दूषयेत् । परस्य दण्डं नोद्य[19]च्छेच्छिक्षार्थं शिष्यपुत्रयोः ॥ ४६
तद्वन्नोपविशेत्प्राज्ञः पादेनाऽऽकृष्य चाऽऽसनम् । संयावं कृशरं मांसं नाऽऽत्मार्थमुपसाधयेत् ॥
सायं प्रातश्च भोक्तव्यं कृत्वा चातिथिपूजनम् । प्राङ्मुखोदङ्मुखो वाऽपि वाग्यतो दन्तधावनम्[20] ॥

---

* इतः परं श्लोकद्वयं नास्ति ख. पुस्तके ।

---

१ क. पूजनम् । २ क. °मावासे च ती° । ३ ख. °नि । विष्ठामूत्रं न कर्तव्यं न° । ४ क. °स्पर्शं सहसं° । ५ क. पण्यन्त्राणि । ६ ख. पत्राणि । ७ ख. °पि कुर्याद्वाऽर्घ्यं च वा° । ८ ख. उच्चारयेत्सदा दो° । ९ ख. °न्नस्य भोजने बुधः । १० ख. °मशुद्धं तत्प्रकीर्तितम् । न । ११ ग. चैवाऽऽचमनं न । १२ क. ख. °लभेत्किं° । १३ क. °मत्युच्चं चातिस° । १४ ख. °त् । भिक्षाटनं सदा कुर्याद्ब्राह्मणानां च सद्मसु । उ° । १५ क. दुःखार्दितस्य । १६ क. °माल्यं तु धृ° । १७ क. °न । नापि संक्षिपयेत्पा° । १८ क. °श्चाधिकाङ्गाश्च नो° । १९ ग. °द्यच्छेदन्यत्र मित्रपुत्रयोः । २० ख. °म् । शयनं स° ।

कुर्वीत सततं विप्रा [1]वर्जये[2]द्व्यर्थवीरुधम् । नोदक्शिराः स्वपेज्जातु न च प्रत्यक्शिरा नरः ॥ ४९
शिरस्त्वागस्त्यामाधाय शयीताथ पुरंदरीम् । न तु गन्धवतीष्वप्सु शयीत न तथोपासे ॥ ५०
उपरागे परं स्नानमृते दिनमुदाहृतम् । अपमृज्यान्न वस्त्रान्तैर्गात्राण्यम्बरपाणिभिः ॥ ५१
न चावधूनयेत्केशान्वाससी न च निर्धुनेत् । अनुलेपनमादद्यान्नास्नातः कर्हिचिद्बुधः ॥ ५२
न चापि रक्तवासाः स्याच्चित्रासितधरोऽपि वा । न च कुर्याद्विपर्यासं वाससोर्नापि भूपयोः ५३
वर्ज्यं च विदशं वस्त्रमत्यन्तोपहतं च यत् । कीटकेशावपन्नं च तथा श्वभिरवेक्षितम् ॥ ५४
अवलीढं शुना चैव सारोद्धरणदूषितम् । पृष्ठमांसं वृथामांसं वर्ज्यमांसं च वर्ज्ययेत् ॥ ५५
न भक्षयेच्च सततं प्रत्यक्षं लवणं नरः । वर्ज्यं चिरोषितं विप्राः शुष्कं पर्युषितं च यत् ॥ ५६
पिष्टशाकेक्षुपयसां विकारा द्विजसत्तमाः । तथा मांसविकाराश्च नैव वर्ज्याश्चिरोषिताः ॥ ५७
उदयास्तमने भानोः शयनं च विवर्जयेत् । नास्नातो नैव संविष्टो न चैवान्यमना नरः ॥ ५८
न चैव शयने नोर्व्यामुपविष्टो न [3]शब्दकृत् । प्रेष्याणामप्रदायाथ न भुञ्जीत कदाचन ॥ ५९
भुञ्जीत पुरुषः स्नातः सायंप्रातर्यथाविधि । परदारा न गन्तव्याः पुरुषेण विपश्चिता ॥ ६०
इष्टापूर्तायुषां हन्त्री परदारगतिर्नृणाम् । न हीदृशमनायुष्यं लोके किंचन विद्यते ॥ ६१
यादृशं पुरुषस्येह पर[4]दाराभिमर्शनम् । देवाग्निपितृकार्याणि तथा गुर्वभिवादनम् ॥ ६२
कुर्वीत सम्यगाचम्य तद्वदन्नभुजिक्रियाम् । अफेनशब्दगन्धाभिरद्भिरच्छाभिरादरात् ॥ ६३
आचामेच्चैवं तद्वच्च प्राङ्मुखोदङ्मुखोऽपि वा । अन्तर्जलादावसथाद्वल्मीकान्मूषिकास्थलात् ॥ ६४
कृतशौचावशिष्टाश्च वर्जयेत्पञ्च वै मृदः । प्रक्षाल्य हस्तौ पादौ च समभ्युक्ष्य समाहितः ॥ ६५
अन्तर्जानुस्तथाऽऽचामेत्त्रिश्चतुर्वाऽपि[6] वै नरः । परिमृज्य द्विरावर्त्य खानि मूर्धानमेव च ॥ ६६
सम्यगाचम्य तोयेन क्रियां कुर्वीत वै शुचिः । क्षुतेऽवलीढे [7]वाते च तथा निष्ठीवनादिषु ॥ ६७
कुर्यादाचमनं स्पर्शे वाऽस्पृष्टस्यार्कदर्शनम् । कुर्वीताऽऽलम्भनं चापि दक्षिणश्रवणस्य च ॥ ६८
यथाविभवतो ह्येतत्पूर्वाभावे ततः परम् । न विद्यमाने पूर्वोक्त उत्तरप्राप्तिरिष्यते ॥ ६९
न कुर्याद्दन्तसंघर्षं नाऽऽत्मनो देहताडनम् । स्वापेऽध्वनि तथा भुञ्जन्स्वाध्यायं च विवर्जयेत् ७०
*संध्यायां मैथुनं चापि तथा प्रस्थानमेव च । तथाऽपराह्णे कुर्वीत श्रद्धया पितृतर्पणम् ॥ ७१
शिरःस्नानं च कुर्वीत दैवं पित्र्यमथापि च । प्राङ्मुखोदङ्मुखो वाऽपि श्मश्रुकर्म च कारयेत् ७२
व्यङ्गिनीं वर्जयेत्कन्यां [9][10]कुलेजां वाऽप्यरोगिणीम् । उद्वहेत्पितृमात्रोश्च [11]सप्तमीं [12]पञ्चमीं तथा ॥ ७३
रक्षेद्दारांस्त्यजेदीर्ष्यां तथाऽह्नि स्वप्नमैथुने । परोपतापकं कर्म जन्तुपीडां च सर्वदा ॥ ७४
उदक्या सर्ववर्णानां वर्ज्या रात्रिचतुष्टयम् । स्त्रीजन्मपरिहारार्थं पञ्चमीं चापि वर्जयेत् ॥ ७५
ततः षष्ठ्यां व्रजेद्रात्र्यां [13]ज्येष्ठयुग्मासु रात्रिषु । युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ७६
विधर्मिणो वै [14]पर्वादौ संध्याकालेषु [15]षण्ढ[16]काः । क्षुरकर्मणि रिक्तां वै वर्जयीत विचक्षणः ॥ ७७

+ एतदादिः सार्धः श्लोको नास्ति क. ख. पुस्तकयोः ।

---

१ ख. °येद्वृक्षवी° । २ ख. °था मात्स्यवि° । ३ ग. °त् । न चैकवस्त्रो न रुदन्प्रेक्षतामपदाय च । भ° । ४ क. °दारोपसेवन° । ५ ख. °वमद्भिश्च प्रा° । ६ क. °तुर्वा पिबेन्नरः । ग. °तुर्वापि वेदपः । प° । ७ क. वान्ते । ८ ग. °म् । स्वप्नाध्ययनभोज्यानि स्वाध्या° । ९ क. °लटां चाऽतिरो° । १० ग. °जां चातिरो° । ११ क. °समी प° । १२ क. °क्षमी तु या । र° । १३ ख. ज्येष्ठायु° । १४ क. ख. पूर्वादौ । १५ क. कण्टकाः । ग. खण्डकाः । १६ ख. °काः । अपवादोऽविनी । ग. °काः । स्थानं चैवावि° ।

ब्रुवतामविनीतानां न श्रोत[1]व्यं कदाचन । न चोत्कृष्टासनं देयमनुत्कृष्टस्य चाऽऽदरात् ॥ ७८
क्षुरकर्मणि चा(वा)न्ते च स्त्रीसंभोगे च भो द्विजाः । स्नायीत चैलवान्प्राज्ञः कटभूमिमुपेत्य च ॥
देववेदद्विजातीनां साधुसत्यमहात्मनाम् । गुरोः पतिव्रतानां च [2]ब्रह्मयज्ञतपस्विनाम् ॥ ८०
परिवादं न कुर्वीत परिहासं च भो द्विजाः । धवलाम्बरसंवीतः सितपुष्पविभूषितः ॥ ८१
सदा माङ्गल्यवेषः स्यान्न वाऽमाङ्गल्यवान्भवेत् । नो[3]द्धतोन्मत्तमूढैश्च नाविनीतैश्च पण्डितः ॥ ८२
ग[4]च्छेन्मैत्रीमशीलेन न वयोजातिदूषितैः । न चातिव्ययशीलैश्च पुरुषैर्नैव वैरिभिः ॥ ८३
कार्याक्षमैर्निन्दितैर्न न चै[5]वं विटसङ्गिभिः[6] । निस्वैर्न वादैकपरैर्नरैश्चान्यैस्तथाऽधमैः ॥ ८४
सुहृद्दीक्षितभूपालस्नातकश्वशुरैः सह । उत्तिष्ठद्विभवाच्चैनानर्चयेद्गृहमागतान् ॥ ८५
यथाविभवतो विप्राः प्रतिसंवत्सरोषितान् । सम्यग्गृहेऽर्चनं कृत्वा यथास्थानमनुक्रमात् ॥ ८६
संपूजयेत्तथा वह्नौ प्रदद्याच्चाऽऽहुतीः क्रमात् । प्रथमां ब्रह्मणे दद्यात्प्रजानां पतये ततः ॥ ८७
तृतीयां चैव गृ[7]ह्येभ्यः कश्यपाय तथाऽपराम् । ततोऽनुमतये दद्याद्द्याद्गृहु(द्गृह)बलिं ततः ॥ ८८
पूर्वं ख्याता मया या तु नित्यक्रमविधौ क्रिया । वैश्वदेवं ततः कुर्याद्[8]गदत शृणुत द्विजाः ॥ ८९
यथास्थानविभागं तु देवानुदिश्य वै पृथक् । पर्ज[9]न्यापोधरित्रीणां [10]दद्यात्तु [11]मणिके त्रयम् ॥ ९०
[12]वायवे च प्रतिदिशं दिग्भ्यः प्राच्यादिषु क्रमात् । ब्रह्मणे चान्तरिक्षाय सूर्याय च यथाक्रमात् ॥
विश्वेभ्यश्चैव देवेभ्यो विश्वभूतेभ्य एव च । [13]उषसे भूतपतये दद्याद्दोत्तरतः शुचिः ॥ ९२
स्वधा च नम इत्युक्त्वा पितृभ्यश्चैव दक्षिणे । कृत्वाऽपसव्यं वायव्यां [14]यक्ष्मैतत्तेति संवदन् ९३
अन्नावशेषमिश्रं वै तोयं दद्याद्यथाविधि । देवानां च ततः कुर्याद्ब्राह्मणानां नमस्क्रियाम् ॥ ९४
[15]अङ्गुष्ठोत्तरतो रेखा पाणेर्या दक्षिणस्य च । एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय वै ॥ ९५
तर्जन्यङ्गुष्ठयोरन्तः पित्र्यं तीर्थमुदाहृतम् । पितॄणां तेन तोयानि दद्यान्नान्दीमुखादृते ॥ ९६
अङ्गुल्यग्रे तथा दैवं तेन दिव्यक्रियाविधिः । तीर्थं कनिष्ठिकामूले कायं तत्र [16]प्रजापतेः ॥ ९७
एवमेभिः सदा [17]तीर्थैर्विधानं पितृभिः सह । सदा कार्याणि कुर्वीत नान्यतीर्थैः कदाचन ॥ ९८
ब्राह्मेणाऽऽचमनं शस्तं पैत्र्यं पित्र्येण सर्वदा । देवतीर्थेन देवानां प्राजापत्यं जिते(त्यजले)न च
नान्दीमुखानां कुर्वीत प्राज्ञः पिण्डोदकक्रियाम् । प्राजापत्येन तीर्थेन यच्च किंचित्प्रजापतेः ॥
युगपज्जलमग्निं च बिभृयान्न विचक्षणः । गुरुदेवपि[18]तॄन्विप्रान्न च पादौ प्रसारयेत् ॥ १०१
नाऽऽचक्षीत[19] धयन्तीं गां जलं नाञ्जलिना पिबेत् । शौचकालेषु सर्वेषु गुरुष्वल्पेषु वा पुनः ॥
न विलंम्बेत मेधावी न मुखेनानलं धमेत् ॥ १०२
तत्र विप्रा न वस्तव्यं यत्र नास्ति चतुष्टयम् । ऋणप्रदाता वैद्यश्च श्रोत्रियः [21]सजला नदी ॥१०३
जितभृत्यो नृपो यत्र बलवान्धर्मतत्परः । तत्र नित्यं वसेत्प्राज्ञः कुतः कुनृपतौ सुखम् ॥ १०४
पौराः सुसंहता यत्र सततं न्यायवर्तिनः । शान्तामत्सरिणो लोकास्तत्र वासः सुखोदयः॥१०५

---

१ ख. °तव्यः क° । २ क. °ह्मचारित° । ३ क. °द्धतैर्न च नीचैश्च न च मूढैश्च प° । ४ क. °न्मैत्रीं न शैलूषैर्न च वा जा° । ५ ग. °व सर्वस° । ६ क. ख. °भिः । न निस्वैर्न समुद्विग्नैर्न च दैवपरैः सह । सु° । ७ ग. गुह्येभ्यः । ८ ख. ग. °र्याद्गलयः शृ° । ९ ख. °न्यायोध° । ग. °न्याय ध° । १० क. कुर्यात्तु । ११ क. दिनके । १२ ग. दीयते । १३ ग. तपसे । १४ ख यन्मे तं ते विभोजनात् । अ° । ग. यस्मैतत्तेऽभिभोजयेत् । अ° । १५ ख. °ष्ठान्तर° । १६ क. ख. प्रजायते । १७ क. °तीर्थैः कुर्यात्कर्म यथोचितम् । ना° । १८ क. °तॄनग्रे न च । १९ ख. °त वयो जन्तोर्जलं । २० ग. °लङ्घेत वातं च न । २१ ग. सजला ।

यस्मिन्कृषीवला राष्ट्रे प्रायशो नातिमानिनः । यत्रौषधान्यशेषाणि वसेत्तत्र विचक्षणः ॥ १०६
तत्र विप्रा न वस्तव्यं यत्रैतत्त्रितयं सदा । जिगीषुः पूर्ववैरश्च[1] जनश्च सततोत्सवः ॥ १०७
वसेन्नित्यं सुशीलेषु सहचारिषु[2] पण्डितः । यत्राप्रधृष्यो नृपतिर्यत्र सस्यप्रदा मही ॥ १०८
इत्येतत्कथितं विप्रा मया वो हितकाम्यया । अतःपरं प्रवक्ष्यामि भक्ष्यभोज्यविधिक्रियाम् १०९
भोज्यमन्नं पर्युषितं स्नेहाक्तं चिरसंभृतम्[3] । अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥ ११०
शशकः कच्छपो गोधा श्वाविन्मत्स्योऽथ शल्यकः । भक्ष्याश्चैते तथा वर्ज्यौ ग्रामशूकरकुक्कुटौ ॥
पितृदेवादिशेषं च श्राद्धे[4] ब्राह्मणकाम्यया । प्रोक्षितं चौषधार्थं[5] च खादन्मांसं न दुष्यति॥११२
शङ्खाश्मस्वर्णरूप्याणां रज्जूनामथ[6] वाससाम् । शाकमूलफलानां च तथा विदलचर्मणाम्[7] ॥११३
मणिवज्रप्रवालानां तथा मुक्ताफलस्य च । पात्राणां चमसानां च अम्बुना शौचमिष्यते॥ ११४
तथाऽश्मकानां तोयेन अश्मसंघर्षणेन च । सस्नेहानां च पात्राणां शुद्धिरुष्णेन वारिणा ॥११५
शूर्पाणामजिनानां च मुशलोलूखलस्य च । संहतानां च वस्त्राणां प्रोक्षणात्संचयस्य[8] च[9] ॥ ११६
वल्कलानामशेषाणामम्बुमृच्छौचमिष्यते[10] । आविकानां समस्तानां केशानां[11] चैवमिष्यते ॥ ११७
सिद्धार्थकानां कल्केन तिलकल्केन वा पुनः । शोधनं[12] चैव भवति उपघातवतां सदा ॥ ११८
तथा कार्पासिकानां च शुद्धिः स्याज्जलभस्मना । दारुदन्तास्थिशृङ्गाणां तक्षणाच्छुद्धिरिष्यते ॥
पुनः पाकेन भाण्डानां पार्थिवानाममेध्यता । शुद्धं भैक्ष्यं कारुहस्तः[13] पण्यं[14] योषिन्मुखं तथा[15] ॥
रथ्यागमनविज्ञानं[16] दासवर्गेण[17] संस्कृतम्[18] । प्राक्प्रशस्तं चिरातीतमनेकान्तरितं लघु ॥ १२१
अन्तः प्रभूतं बालं च वृद्धान्तरविचेष्टितम्[19] । कर्मान्तागारशालाश्च स्तनद्वयं शुचि स्त्रियाः ॥१२२
शुचयश्च तथैवाऽऽपः स्रवन्त्यो गन्धवर्जिताः[20] । भूमिर्विशुध्यते कालाद्दाहमार्जनगोकुलैः[21] ॥ १२३
लेपादुल्लेखनात्सेकाद्वेश्म[22] संमार्जनादिना । केशकीटावपन्ने च गोघ्राते मक्षिकान्विते[23] ॥ १२४
मृदम्बु भस्म चाप्यन्ने प्रक्षेप्तव्यं विशुद्धये[24] । औदुम्बराणामम्लेन वारिणा त्रपुसीसयोः[25] ॥ १२५
भस्माम्बुभिश्च कांस्यानां शुद्धिः प्लावो द्रवस्य च । अमेध्याक्तस्य मृत्तोयैर्[26]गन्धापहरणेन[27] च १२६
अन्येषां चैव द्रव्याणां वर्णगन्धांश्च हारयेत् । शुचि मांसं तु चाण्डालक्रव्यादैर्विनिपातितम् १२७
रथ्यागतं च तैलादि शुचि गोतृप्तिदं पथः[28] । रजोऽग्निरश्वगोछायारश्मयः पवनो मही ॥ १२८
विप्रुषो मक्षिकाद्याश्च दुष्टसङ्गाददोषिणः । अजाश्वं मुखतो मेध्यं न गोर्वत्सस्य चाऽऽननम् १२९
मातुः प्रस्रवणे(णं) मेध्यं शकुनिः फलपातने । आसनं शयनं यानं[29] तटौ नद्यास्तृणानि च १३०
सोमसूर्यांशुपवनैः[30] शुध्यन्ते[31] तानि पण्यवत् । रथ्यापसर्पणे स्नाने क्षुत्पानानां[32] च कर्मसु ॥ १३१
आचामेत यथान्यायं वाससः परिधापने[33] । स्पृष्टानामथ संस्पर्शैर्[34]द्विरथ्याकर्दमाम्भांसि[35] ॥ १३२

---

१ ख. °श्च. तथा न स° । २ ग. °हवासिषु । ३ क. °संचित° । ४ क. ग. श्राद्धं । ५ क. देवतानां । ६ ख. रञ्जितानां च वा° । ७ ख. °णां च फलानां । ग. °णां वसनानां । ८ क. °त्संहतस्य । ९ ख. च । कल्कानामप्यशे° । १० ख. °म्बुमच्छौ° । ११ ग. °नां चाप्यमेध्यता । सि° । १२ क. ख. साधूनां । १३ ख. °हस्तात्पण्यं । १४ ख. पण्ययो° । १५ ख. °था । यथा गतमविज्ञातं दा° । १६ ग. °गतमविज्ञातं दा° । १७ ग. °वर्गोऽथ तत्कृत° । १८ क. °म् । बाह्यश° । १९ ग. °द्धातुर° । २० °न्धबुद्बुदाः । भु° । २१ क. °गोक्रमैः । ले° । २२ ख. °काद्भस्मना मा° । २३ क. °ते । भस्म चात्र तु विद्वद्भिः प्र° । २४ क. °ये । उदु° । २५ क. °योः । तस्मात्तु मक्षिकान्नानां शु° । २६ क. °त्तोयैः शुद्धिर्ग° । २७ क. °पकर्षणात् । अ° । २८ क. ख. °यः । राजाग्निरथगो° । २९ ख. पानं । ३० ग. °सूर्याम्बुप° । ३१ क. °ध्यन्त्यभानि । ३२ क. क्षुत्वा वातादिक° । ३३ ग. °ने । घृष्टा° । ३४ ख. °स्पर्शो द्विर° । ३५ ग. °म्भसाम् । प° ।

पक्वेष्टकचितानां च मेध्यता वायुसंश्रयात्। प्रभूतोपहतादन्नादग्रमुद्धृत्य संत्यजेत्॥ १३३
शेषस्य प्रोक्षणं कुर्यादाचम्याद्भिस्तथा मृदा। उपवासस्त्रिरात्रं तु दुष्टभक्ताशिनो भवेत्॥ १३४
अज्ञाने ज्ञानपूर्वे तु तद्दोषोपशमे न तु। उदक्यां[1] वावलग्नां[2] च सूतिकान्त्यावसायिनः॥ १३५
स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः। नारं स्पृष्ट्वाऽस्थि सस्नेहं स्नात्वा विप्रो विशुध्यति॥
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा। न लङ्घयेत्तथैवाथ ष्ठीवनोद्वर्तनानि च॥ १३७
गृहादुच्छिष्टविण्मूत्रं पादाम्भस्तत्क्षिपेद्बहिः। पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिणि॥ १३८
स्नायीत देवखातेषु गङ्गाह्रदसरित्सु च। नोद्यानादौ[3] विकालेषु प्राज्ञस्तिष्ठेत्[4]कदाचन॥ १३९
नाऽऽलपेज्जनविद्विष्टान्वीरहीनास्तथा स्त्रियः। देवतापितृसच्छास्त्रयज्विसंन्यासिनिन्दकैः १४०
कृत्वा तु स्पर्शनालापं शुध्यत्यर्कावलोकनात्। अवलोक्य तथोदक्यां संन्यस्तं पतितं शवम् १४१
विधर्मिसूतिकाषण्डविवस्त्रान्त्यावसायिनः। मृतनिर्यातकांश्चैव परदाररताश्च ये॥ १४२
एतदेव हि कर्तव्यं प्राज्ञैः शोधनमात्मनः। अभोज्यभिक्षुपाखण्डमार्जारखरकुक्कुटान्॥ १४३
पतितापविद्धचाण्डालमृताहारांश्च धर्मवित्। संस्पृश्य शुध्यते स्नानादुदक्याग्रामशूकरौ॥ १४४
तद्वच्च सूतिकाशौचदूषितौ पुरुषावपि। यस्य चानुदिनं हानिर्गृहे नित्यस्य कर्मणः॥ १४५
यश्च ब्राह्मणसंत्यक्तः किल्बिषाशी नराधमः। नित्यस्य कर्मणो हानिं न कुर्वीत कदाचन॥ १४६
तस्य त्वकरणं वक्ष्ये केवलं मृतजन्मसु। दशाहं ब्राह्मणस्तिष्ठेद्दानहोमविवर्जितः॥ १४७
क्षत्रियो द्वादशाहं च वैश्यो मासार्धमेव च। शूद्रश्च मासमासीत निजकर्मविवर्जितः॥ १४८
ततः परं निजं कर्म कुर्युः सर्वे यथोचितम्। प्रेताय सलिलं देयं बहिर्गत्वा तु गोत्रकैः॥ १४९
प्रथमेऽह्नि चतुर्थे च सप्तमे नवमे तथा। तस्यास्थिसंचयः कार्यश्चतुर्थेऽहनि गोत्रकैः॥ १५०
ऊर्ध्वं संचयनात्तेषामङ्गस्पर्शो विधीयते। गोत्रकैस्तु क्रियाः सर्वाः कार्याः संचयनात्परम् १५१
स्पर्श एव सपिण्डानां मृताहनि तथोभयोः। अन्वर्थमिच्छया शस्त्ररज्जुबन्धनवह्निषु॥ १५२
विषप्रतापादिमृते प्रायानाशकयोरपि। बाले देशान्तरस्थे च तथा प्रव्रजिते मृते॥ १५३
सद्यः शौचं मनुष्याणां त्र्यहमुक्तमशौचकम्। सपिण्डानां सपिण्डस्तु मृतेऽन्यस्मिन्मृतो यदि॥
पूर्वशौचं समाख्यातं कार्यास्तत्र दिनक्रियाः। एष एव विधिर्दृष्टो जन्मन्यपि हि सूतके॥ १५५
सपिण्डानां सपिण्डेषु यथावत्सोदकेषु च। पुत्रे जाते पितुः स्नानं सचैलस्य विधीयते॥ १५६
तत्रापि यदि वाऽन्यस्मिन्ननुयातस्ततः परम्। तत्रापि शुद्धिरुदिता पूर्वजन्मवतो दिनैः॥ १५७
दशद्वादशमासार्धमाससंख्यैर्दिनैर्गतैः। स्वाः स्वाः कर्मक्रियाः कुर्युः सर्वे वर्णा यथाविधि १५८
प्रेतमुद्दिश्य कर्तव्यमेकोद्दिष्टमतः परम्। दानानि चैव देयानि ब्राह्मणेभ्यो मनीषिभिः॥ १५९
यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे। तत्तद्गुणवते देयं तदेवाक्षयमिच्छता॥ १६०
पूर्णैस्तु दिवसैः स्पृष्ट्वा सलिलं वाहनायुधैः। दत्तप्रेतोदपिण्डाश्च सर्वे वर्णाः कृतक्रियाः॥ १६१
कुर्युः समग्राः शुचिनः परत्रेह च भूतये। अध्येतव्या त्रयी नित्यं भवितव्यं विपश्चिता॥ १६२

---

१ क. °दक्यास्नानमप्याम्बु सू°। २ ख. °क्यां स्वामनग्नां। ३ क. नोद्वाहादौ। ख. नोत्खातादौ। ४ क. प्राज्ञो गच्छेत्क°। ५ ग. °काखण्डवि°। ६ क. °र्यासकां°। ७ क. °पितं पापकर्मभिः। य°। ८ क. °ते। सोदरैस्तु। ग. °ते। सोदकैं°। ९ ग. सर्व। १० क. अन्विच्छमि°। ११ ग. °स्त्रतेजोद्वर्तन°। १२ क. ख. °षयप्रयतासूते। १३ ख. °नुष्यस्य त्र्य°। ग °नुष्यैश्च त्र्य°। १४ ग. °स्मिन्नाते जायेदथाप°। १५ क. ख. द्विजातयः। १६ ख. °ष्ट्वा शालिनं वाहनं बुधैः। वृनोद्यदण्डौ स°। १७ ग. °हलायुधम्। प्रातोददण्डौ च त°।

धर्मतो धनमाहार्यं यष्टव्यं चापि यत्नतः। येन प्रकुपितो नाऽऽत्मा जुगुप्सामेति भो द्विजाः१६३
तत्कर्तव्यमशङ्केन यन्न गोप्यं महाजनैः। एवमाचरतो विप्राः पुरुषस्य गृहे सतः॥ १६४
धर्मार्थकामं संप्राप्य परत्रेह च शोभनम्। इदं रहस्यमायुष्यं धन्यं बुद्धिविवर्धनम्॥ १६५
सर्वपापहरं पुण्यं श्रीपुष्ट्यारोग्यदं शिवम्। यशःकीर्तिप्रदं नृणां तेजोबलविवर्धनम्॥ १६६
अनुष्ठेयं सदा पुंभिः स्वर्गसाधनमुत्तमम्। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च मुनिसत्तमाः॥ १६७
ज्ञातव्यं सुप्रयत्नेन सम्यक्श्रेयोभिकाङ्क्षिभिः। ज्ञात्वैव यः सदा कालमनुष्ठानं करोति वै१६८
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते। सारात्सारतरं चेदमाख्यातं द्विजसत्तमाः॥ १६९
श्रुतिस्मृत्युदितं धर्मं न देयं यस्य कस्यचित्। न नास्तिकाय दातव्यं न दुष्टमतये द्विजाः॥
न दाम्भिकाय मूर्खाय न कुतर्कप्रलापिने॥ १७०

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे सदाचारनिरूपणं नामैकविंशाधिक-
द्विशततमोऽध्यायः॥ २२१॥

आदितः श्लोकानां समष्ट्यङ्काः—१२०९०

अथ द्वाविंशाधिकद्विशततमोऽध्यायः।

मुनय ऊचुः—

श्रोतुमिच्छामहे ब्रह्मन्वर्णधर्मान्विशेषतः। चतुराश्रमधर्मांश्च द्विजवर्य ब्रवीहि तान्॥ १

व्यास उवाच—

ब्राह्मणक्षत्रियविशां शूद्राणां च यथाक्रमम्। शृणुध्वं [1]संयता भूत्वा वर्णधर्मान्मयोदितान्॥ २
[2]दानदयातपोदेवयज्ञस्वाध्यायतत्परः। नित्योदकी भवेद्विप्रः कुर्याच्चाग्निपरिग्रहम्॥ ३
वृत्त्यर्थं [3]याजयेत्त्वन्यान्द्विजानध्यापयेत्तथा। कुर्यात्प्रति[4]ग्रहादानं यज्ञार्थं ज्ञानतो द्विजाः॥ ४
सर्वलोकहितं कुर्यान्नाहितं कस्यचिद्द्विजाः। मैत्री समस्तसत्त्वेषु ब्राह्मणस्योत्तमं धनम्॥ ५
गवि रत्ने च पारक्ये समबुद्धिर्भवेद्द्विजाः। ऋतावभिगमः पत्न्यां शस्यते वाऽस्य भो द्विजाः ६
दानानि दद्यादिच्छातो द्विजेभ्यः क्षत्रियोऽपि हि। यजेच्च विविधैर्यज्ञैरधीयीत च भो द्विजाः ७
शस्त्राजीवो महीरक्षा प्रवरा तस्य जीविका। तस्यापि प्रथमे [5]कल्पे पृथिवीपरिपालनम्॥ ८
धरित्रीपालनेनैव कृतकृत्या नराधिपाः। भवन्ति नृपते[6] रक्षा यतो यज्ञादिकर्मणाम्॥ ९
दुष्टानां शासनाद्राजा शिष्टानां परिपालनात्। प्राप्नोत्यभिमताँल्लोकान्वर्णसंस्थापको नृपः॥ १०
पाशुपाल्यं वणिज्यां च कृषिं च मुनिसत्तमाः। वैश्याय जीविकां ब्रह्मा ददौ लोकपितामहः ११
तस्याप्यध्ययनं यज्ञो दानं धर्मश्च शस्यते। नित्यनैमित्तिकादीनामनुष्ठानं च कर्मणाम्॥ १२
द्विजातिसंश्रयं कर्म तदर्थं तेन पोषणम्। क्रयविक्रयजैर्वाऽपि धनैः कारुभवैस्तु वा॥ १३
दानं दद्याच्च शूद्रोऽपि पाकयज्ञैर्यजेत च। पित्र्यादिकं च वै सर्वं शूद्रः कुर्वीत तेन वै॥ १४
भृत्यादिभरणार्थाय सर्वेषां च परिग्रहाः। ऋतुकालाभिगमनं स्वदारेषु द्विजोत्तमाः॥ १५

---

१ ख. सद्भिः। २ क. प्रयता। ३ ग. दानं दद्याद्यजेद्देवान्यज्ञ°। ४ ख. °र्थाच प्रयतं गृह°। ५ ख. °र्थं सेवयेत्त्व°। ६ ग. °ग्रहं दानं शुक्लार्थं न्यायतो। ख. °ग्रहं दानं सत्यर्थं न्यायतो। ७ ख. काले। ८ क. °तेस्तस्य दानयज्ञादिसिद्धयः। दु°। ९ ग. दातव्यं।

दया समस्तभूतेषु तितिक्षा नाभिमानिता । सत्यं शौचमनायासो मङ्गलं प्रियवादिता ॥ १६
मैत्री चैवास्पृहा तद्वदकार्पण्यं द्विजोत्तमाः । अनसूया च सामान्या वर्णानां कथिता गुणाः ॥१७
आश्रमाणां च सर्वेषामेते सामान्यलक्षणाः । गुणास्तथोपधर्माश्च विप्रादीनामिमे द्विजाः ॥ १८
क्षात्रं कर्म द्विजस्योक्तं वैश्यकर्म तथाऽऽपदि । राजन्यस्य च वैश्योक्तं शूद्रकर्माणि चैतयोः ॥१९
स(अ)सामर्थ्ये सति त्याज्यमुभाभ्यामपि च द्विजाः । तदेवाऽऽपदि कर्तव्यं न कुर्यात्कर्मसंकरम्
इत्येते कथिता विप्रा वर्णधर्मा मयाऽद्य वै । धर्ममाश्रमिणां सम्यग्ब्रुवतोऽपि निबोधत ॥ २१
बालः कृतोपनयनो वेदाहरणतत्परः । गुरोर्गेहे वसन्विप्रा ब्रह्मचारी समाहितः ॥ २२
शौचाचाररतस्तत्र कार्यं शुश्रूषणं गुरोः । व्रतानि चरता ग्राह्यो वेदश्च कृतबुद्धिना ॥ २३
उभे संध्ये रविं विप्रास्तथैवाग्निं समाहितः । उपतिष्ठेत्तथा कुर्याद्गुरोरप्यभिवादनम् ॥ २४
स्थिते तिष्ठेद्व्रजेद्याति नीचैरासीत चाऽऽसिते । शिष्यो गुरौ द्विजश्रेष्ठाः प्रतिकूलं च संत्यजेत्
तेनैवोक्तं पठेद्वेदं नान्यचित्तः पुरस्थितः । अनुज्ञातं च भिक्षान्नमश्नीयाद्गुरुणा ततः ॥ २६
अवगाहेदपः पूर्वमाचार्येणावगाहिताः । समिज्जलादिकं चास्य कल्यकल्यमुपानयेत् ॥ २७
गृहीतग्राह्यवेदश्च ततोऽनुज्ञामवाप्य वै । गार्हस्थ्यमावसेत्प्राज्ञो निष्पन्नगुरुनिष्कृतिः ॥ २८
विधिनाऽवाप्तदारस्तु धनं प्राप्य स्वकर्मणा । गृहस्थकार्यमखिलं कुर्याद्विप्राः स्वशक्तितः ॥ २९
निर्वापेण पितॄनर्च्य यज्ञैर्देवांस्तथाऽतिथीन् । अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥ ३०
बलिकर्मणा भूतानि वाक्सत्येनाखिलं जगत् । प्राप्नोति लोकान्पुरुषो निजकर्मसमार्जितान्॥ ३१
भिक्षाभुजश्च ये केचित्परिव्राड्ब्रह्मचारिणः। तेऽप्यत्र प्रतितिष्ठन्ति गार्हस्थ्यं तेन वै परम् ॥ ३२
वेदाहरणकार्येण तीर्थस्नानाय च द्विजाः । अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च ॥ ३३
अनिकेता ह्यनाहारा ये तु सायं गृहास्तु ते । तेषां गृहस्थः सततं प्रतिष्ठा योनिरुच्यते ॥ ३४
तेषां स्वागतदानानि वक्तव्यं मधुरं सदा । गृहागतानां दद्याच्च शयनासनभोजनम् ॥ ३५
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते । स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥ ३६
अवज्ञानमहंकारो दम्भश्चापि गृहे सतः । परिवादोपघातौ च पारुष्यं च न शस्यते ॥ ३७
यश्च सम्यक्करोत्येवं गृहस्थः परमं विधिम् । सर्वबन्धविनिर्मुक्तो लोकानाप्नोति चोत्तमान् ॥ ३८
वयःपरिणतौ विप्राः कृतकृत्यो गृहाश्रमी । पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ॥ ३९
पर्णमूलफलाहारः केशश्मश्रुजटाधरः । भूमिशायी भवेत्तत्र मुनिः सर्वातिथिर्द्विजाः ॥ ४०
चर्मकाशकुशैः कुर्यात्परिधानोत्तरीयके । तद्वत्त्रिषवणं स्नानं शस्तमस्य द्विजोत्तमाः ॥ ४१
देवताभ्यर्चनं होमः सर्वाभ्यागतपूजनम् । भिक्षा बलिप्रदानं तु शस्तमस्य प्रशस्यते ॥ ४२
वन्यस्नेहेन गात्राणामभ्यङ्गश्चापि शस्यते । तपस्या तस्य विप्रेन्द्राः शीतोष्णादिसहिष्णुता ॥ ४३
यस्त्वेता नियतश्चर्या वानप्रस्थश्चरेन्मुनिः । स दहत्यग्निवद्दोषाञ्जयेल्लोकांश्च शाश्वतान् ॥ ४४
चतुर्थश्चाऽऽश्रमो भिक्षोः प्रोच्यते यो मनीषिभिः । तस्य स्वरूपं गदतो बुध्यध्वं मम सत्तमाः॥४५
पुत्रद्रव्यकलत्रेषु त्यजेत्स्नेहं द्विजोत्तमाः । चतुर्थमाश्रमस्थानं गच्छेन्निर्धूतमत्सरः ॥ ४६

१ क. ख. °जाः । एतदेव च कर्तव्यं । २ क. ख. ग्राह्या । ३ क. ख. °दबुद्धिः सनातनी । उ । ४ ख. °वेदं च त° । ५ ख. °द्विप्रः स्व° । ६ ग. °न्पुत्रश्च नि° । ७ ग. °प्यत्रैवावातिष्ठन्ते गा° । ८ क. निराहारा । ग. ह्यनाचारा । ९ ग. गृहं गताः । त्रिधा गृ° । १० क. समये । ११ क. °णतो वि° । १२ ख. वा । कन्दमू° । १३ ग. °पस्तस्य च वि° । ख. °पस्यतश्च वि° । १४ ख. य एवं नि° । १५ ख. °यनाचारो वा° । १६ क. ख. °तुर्थाश्रमसंस्था° ।

त्रैवर्णिकांस्त्यजेत्सर्वानारम्भान्द्विजसत्तमाः । मित्रादिषु समो मैत्रः समस्तेष्वेव जन्तुषु ॥ ४७
जरायुजाण्डजादीनां वाङ्मनःकर्मभिः क्वचित् । युक्तः कुर्वीत न द्रोहं[1] सर्वसङ्गांश्च वर्जयेत् ॥४८
एकरात्रस्थितिर्ग्रामे पञ्चरात्रस्थितिः पुरे । तथा[2] प्रीतिर्न[3] तिर्यक्षु द्वेषो वा नास्य जायते ॥ ४९
प्राणयात्रानिमित्तं च व्यङ्गारेऽभुक्तवज्जने । काले प्रशस्तै[4]र्वर्णानां भिक्षार्थी पर्यटेद्गृहान् ॥ ५०
अलाभे न विषादी स्याल्लाभे नैव च हर्षयेत् । प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः॥५१
*अतिपूजितलाभांस्तु जुगुप्सं चै(प्सेच्चै)व सर्वतः । अतिपूजितलाभैस्तु य[5]तिर्मुक्तोऽपि बध्यते ५२
कामः क्रोधस्तथा दर्पो लोभमोहादयश्च ये । तांस्तु दोषान्परित्यज्य [6]परिव्राण्निर्ममो भवेत् ॥ ५३
अभयं सर्वसत्त्वेभ्यो दत्त्वा यश्चरते महीम् । तस्य देहाद्विमुक्तस्य भयं नोत्पद्यते क्वचित् ॥ ५४

कृत्वाऽग्निहो[7]त्रं स्वशरीरसंस्थं शारीरमग्निं स्वमुखे जुहोति ।
विप्रस्तु भिक्षोपगतैर्हविर्भिश्चिताग्निना स व्रजति स्म लोकान् ॥ ५५
मोक्षाश्रमं यश्चरते [8]यथोक्तं शुचिश्च संकल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं स ब्रह्मलोकं व्रजति द्विजातिः ॥ ५६

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे वर्णाश्रमधर्मवर्णनं नाम
द्वाविंशाधिकद्विशततमोऽध्यायः ॥ २२२ ॥
आदितः श्लोकानां समष्ट्यङ्काः—१२१४६

अथ त्रयोविंशत्यधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—
सर्वज्ञस्त्वं महाभाग सर्वभूतहिते रतः । भूतं भव्यं भविष्यं च न तेऽस्त्यविदितं मुने ॥ १
कर्मणा केन वर्णानामधमा जायते गतिः । उत्तमा च भवेत्केन ब्रूहि तेषां महामते ॥ २
शूद्रस्तु कर्मणा केन ब्राह्मणत्वं च गच्छति । श्रोतुमिच्छामहे केन ब्राह्मणः शूद्रतामियात् ॥ ३
व्यास उवाच—
[10]हिमवच्छिखरे रम्ये नानाधातु[11]विभूषिते । नानाद्रुमलताकीर्णे नाना[12]श्चर्यसमन्विते ॥ ४
तत्र स्थितं महादेवं त्रिपुरघ्नं त्रिलोचनम् । शैलराजसुता देवी प्रणिपत्य सुरेश्वरम् ॥ ५
इमं प्रश्नं पुरा विप्रा अपृच्छच्चारुलोचना । तदहं संप्रवक्ष्यामि शृणुध्वं मम सत्तमाः ॥ ६
उमोवाच—
भगवन्भगनेत्रघ्न पूष्णो दन्तविनाशन । दक्षक्रतुहर त्र्यक्ष संशयो मे महानयम् ॥ ७
चातुर्वर्ण्यं भगवता पूर्वं सृष्टं स्वयंभुवा । केन कर्मविपाकेन वैश्यो गच्छति शूद्रताम् ॥ ८
वैश्यो वा क्षत्रियः केन द्विजो वा क्षत्रियो भवेत् । प्रतिलोमे कथं देव[13] शक्यो धर्मो निवर्तितुम्॥
केन वा कर्मणा विप्रः शूद्रयोनौ प्रजायते । क्षत्रियः शूद्रतामेति केन वा कर्मणा विभो ॥ १०

---

* इदमर्धं क. ख. पुस्तकयोर्नास्ति ।

---

१ ख °हं दुष्टसङ्गं च व° । २ ग. °था तिष्ठेत्तथा प्री° । ३ ग. °तिर्द्वेषो । ४ ख. °स्तग्रामेषु भि° । ५ क. °तिर्युक्तोऽ° । ६ ख. परब्रह्ममना भ° । ७ क. °होत्रैः स्व° । ८ क. स्वशक्त्या । ९ क. कथं । १० क. हिमालयगिरौ र° । ११ क. °विचित्रिते । १२ क. °नासत्त्वस° । १३ क. °व वर्णधर्मविवर्जिते । के° ।

एतं मे संशयं देव वद भूतपतेऽनघ । त्रयो वर्णाः प्रकृत्येह कथं ब्राह्मण्यमाप्नुयुः ॥ ११

शिव उवाच—

ब्राह्मण्यं देवि दुष्प्रापं निसर्गाद्ब्राह्मणः शुभे[1] । क्षत्रियो वैश्यशूद्रौ वा निसर्गादिति मे मतिः १२
कर्मणा दुष्कृतेनेह स्थानाद्भ्रश्यति स द्विजः । [2]श्रेष्ठं वर्णमनुप्राप्य तस्मादाक्षिप्यते पुनः ॥ १३
स्थितो ब्राह्मणधर्मेण ब्राह्मण्यमुपजीवति । क्षत्रियो वाऽथ [3]वैश्यो वा ब्रह्मभूयं[4] स गच्छति १४
यश्च विप्रत्वमुत्सृज्य[5] क्षत्रधर्मान्निषेवते[6] । ब्राह्मण्यात्स परिभ्रष्टः क्षत्रयोनौ प्रजायते ॥ १५
वैश्यकर्म च यो विप्रो लोभमोहव्यपाश्रयः । ब्राह्मण्यं दुर्लभं प्राप्य करोत्यल्पमतिः सदा ॥ १६
स द्विजो वैश्यतामेति वैश्यो वा शूद्रतामियात् । स्वधर्मात्प्रच्युतो विप्रस्ततः शूद्रत्वमाप्नुयात्[8]॥ १७
तत्रासौ निरयं प्राप्तो वर्णभ्रष्टो[7] बहिष्कृतः । ब्रह्मलोकात्परिभ्रष्टः शूद्रयोनौ प्रजायते ॥ १८
क्षत्रियो वा महाभागे वैश्यो वा धर्मचारिणि । स्वानि कर्माण्यपाकृत्य शूद्रकर्म निषेवते ॥ १९
स्वस्थानात्स परिभ्रष्टो वर्णसंकरतां गतः । ब्राह्मणः क्षत्रियो वैश्यः शूद्रत्वं याति तादृशः ॥२०
यस्तु शूद्रः[9] स्वधर्मेण ज्ञानविज्ञानवाञ्शुचिः । धर्मज्ञो धर्मनिरतः[10] स धर्मफलमश्नुते ॥ २१
इदं चैवापरं देवि ब्रह्मणा[11] समुदाहृतम् । अध्यात्मं नैष्ठिकी[12] सिद्धिर्धर्मकामैर्निषेव्यते ॥ २२
उग्रान्नं गर्हितं देवि गणान्नं श्राद्धसूतकम् । [13]घुष्टान्नं नैव भोक्तव्यं शूद्रान्नं नैव वा क्वचित् ॥ २३
शूद्रान्नं गर्हितं देवि सदा[14] देवैर्महात्मभिः । पितामहमुखोत्सृष्टं प्रमाणमिति मे मतिः ॥ २४
शूद्रान्नेनावशेषेण जठरे म्रियते द्विजः । आहिताग्निस्तथा यज्वा[15] स शूद्रगतिभाग्भवेत् ॥ २५
तेन शूद्रान्नशेषेण ब्रह्मस्थानादपाकृतः[16] । ब्राह्मणः शूद्रतामेति नास्ति तत्र विचारणा ॥ २६
यस्यान्नेनावशेषेण जठरे म्रियते द्विजः । तां तां योनिं व्रजेद्विप्रो यस्यान्नमुपजीवति ॥ २७
ब्राह्मणत्वं सुखं प्राप्य दुर्लभं योऽवमन्यते । अभोज्यान्नानि वाऽश्नाति स द्विजत्वात्पतेत वै २८
[17]सुरापो ब्रह्महा स्तेयी चौरो[18] भग्नव्रतोऽशुचिः । स्वाध्यायवर्जितः पापो लुब्धो नैकृतिकः शठः ॥
अव्रती वृषलीभर्ता कुण्डाशी[19] सोमविक्रयी[20] । विहीनसेवी विप्रो हि पतते ब्रह्मयोनितः ॥ ३०
गुरुतल्पी गुरुद्वेषी गुरुकुत्सारतिश्च[21] यः । ब्रह्मद्विड्वाऽपि पतति ब्राह्मणो ब्रह्मयोनितः ॥ ३१
एभिस्तु कर्मभिर्देवि शुभैराचरितैस्तथा । शूद्रो ब्राह्मणतां गच्छेद्वैश्यः क्षत्रियतां व्रजेत् ॥ ३२
शूद्रः कर्माणि सर्वाणि यथान्यायं यथाविधि । सर्वातिथ्यमुपातिष्ठञ्शेषान्नकृतभोजनः ॥ ३३
शुश्रूषां परिचर्यां यो ज्येष्ठवर्णे प्रयत्नतः । कुर्यादविमनाः श्रेष्ठः सततं सत्पथे स्थितः ॥ ३४
देवद्विजातिसत्कर्ता सर्वातिथ्यकृतव्रतः । ऋतुकालाभिगामी च नियतो नियताशनः ॥ ३५
[22]दक्षः शिष्टजनान्वेषी शेषान्नकृतभोजनः । वृथा मांसं न भुञ्जीत शूद्रो वैश्यत्वमृच्छति ॥ ३६
ऋतवागनहंवादी निर्द्वंद्वः[23] सामकोविदः । यजते नित्ययज्ञैश्च स्वाध्यायपरमः शुचिः ॥ ३७
[24]दान्तो ब्राह्मणसत्कर्ता सर्ववर्णा[25]नसूयकः । गृहस्थव्रत[26]मातिष्ठन्द्विकालकृतभोजनः ॥ ३८

---

१ ख. शुभः । २ ग. ज्येष्ठं । ३ ग. शूद्रो । ४ क. °भूतं स । ५ क. ख. °ज्य क्षात्रं धर्मं निषे° । ६ क. ख. °ते । तस्य क्षत्रत्वमापन्नं क्षत्रयोगः प्र° । ७ क. वर्णाचारव° । ८ ख. ग. °द्रत्वमुपजा° । ९ ग. बुद्धः । १० ख. °तः स्वध° । ११ ख. ब्राह्मण्यं । १२ क. °ष्ठिकीं बुद्धिं धर्मकामे निबोध मे । उ° । १३ क. पृष्टान्नं । ख पिष्टान्नं । १४ क. °दा प्रोक्तं मर्नीषिभिः । ख. °दा प्रोक्तं महा° । १५ क. °ज्वा शूद्रयोनौ प्रजायते । ते° । १६ ग. °पाहृतः । १७ °पो ब्राह्मणः स्ते° । १८ क. चौरस्त्यक्तव्र° । १९ क. कूराशी । २० क. °यी । हीनाचारोऽशुचिर्नित्यं प° । २१ क. °रतश्च । २२ क. °नि । गुप्तावधान° । २३ ग. °द्वः शम° । २४ क. दीनो । २५ ख. ग. °वर्णबुभूषकः । २६ क. °तमन्विच्छन्द्वि° ।

शेषाशी विजिताहारो निष्कामो निरहंवदः । अग्निहोत्रमुपासीनो जुह्वानश्च यथाविधि ॥ ३९
सर्वातिथ्यमुपातिष्ठञ्शेषान्नकृतभोजनः । [1]त्रेताग्निमात्रविहितं वैश्यो भवति च द्विजः ॥ ४०
*स वैश्यः क्षत्रियकुले शुचिर्महति जायते । स वैश्यः क्षत्रियो जातो जन्मप्रभृति संस्कृतः॥४१
उपनीतो व्रतपरो द्विजो भवति संस्कृतः । [2]ददाति यजते यज्ञैः समृद्धैराप्तदक्षिणैः ॥ ४२
अधीत्य स्वर्गमन्विच्छंस्त्रेताग्निशरणः सदा । [3]आर्द्रहस्तप्रदो नित्यं प्रजा धर्मेण पालयन् ॥ ४३
सत्यः सत्यानि कुरुते नित्यं यः शुद्धिदर्शनः । धर्मदण्डेन निर्दग्धो धर्म[4]कामार्थसाधकः ॥ ४४
यन्त्रितः कायकरणैः षड्भागकृतलक्षणः । ग्राम्यधर्मान्न सेवेत स्व[5]च्छन्देनार्थकोविदः ॥ ४५
ऋतुकाले तु धर्मात्मा पत्नीमुपाश्रयेत्सदा । सदोपवासी नियतः स्वाध्यायनिरतः शुचिः ॥ ४६
+वहिस्कान्तरिते(?) नित्यं शयानोऽस्ति सदा गृहे । सर्वातिथ्यं त्रिवर्गस्य कुर्वाणः सुमनाः सदा
शूद्राणां [6]चान्नकामानां नित्यं [7]सिद्धमिति ब्रुवन् । स्वार्थाद्वा यदि [8]वा कामान्न किंचिदुप[9]लक्षयेत् ॥
पितृदेवातिथिकृते साधनं कुरुते च यत् । स्ववेश्मनि यथान्यायमुपास्ते भैक्ष्यमेव च ॥ ४९
द्विकालमग्निहोत्रं च जुह्वानो वै यथाविधि । गोब्राह्मणहितार्थाय रणे चाभिमुखो हतः ॥ ५०
त्रेताग्निमन्त्रपूतेन समाविश्य द्विजो भवेत् । ज्ञानविज्ञानसंपन्नः संस्कृतो वेदपारगः ॥ ५१
वैश्यो भवति धर्मात्मा क्षत्रियः स्वेनकर्मणा । एतैः कर्मफलैर्देवि न्यूनजातिकुलोद्भवः ॥ ५२
शूद्रोऽप्यागमसंपन्नो द्विजो भवति संस्कृतः । ब्राह्मणो वाऽप्यसद्वृत्तः सर्वसंकरभोजनः ॥ ५३
स ब्राह्मण्यं समुत्सृज्य शूद्रो भवति तादृशः । कर्मभिः शुचिभिर्देवी शुद्धात्मा विजितेन्द्रियः ५४
शूद्रोऽपि द्विजवत्सेव्य इति ब्रह्माऽब्रवीत्स्वयम् । स्व[10]भावकर्मणा चैव यत्र(श्व) शू[11]द्रोऽधितिष्ठति ॥
विशुद्धः स द्विजातिभ्यो विज्ञेय इति मे मतिः । न योनिर्नापि संस्कारो न श्रुतिर्न च [12]संततिः
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् । सर्वोऽयं ब्राह्मणो लोके वृत्तेन तु विधीयते ॥ ५७
वृत्ते स्थितश्च शूद्रोऽपि ब्राह्मणत्वं च गच्छति[13] । ब्रह्मस्वभावः सुश्रोणि समः सर्वत्र मे मतः५८
निर्गुणं निर्मलं ब्रह्म यत्र तिष्ठति स द्विजः । एते ये विमला देवि स्थान[14]भावनिदर्शकाः ॥ ५९
स्वयं च वरदेनोक्ता ब्रह्मणा सृजता [15]प्रजाः । ब्रह्मणो हि महत्क्षेत्रं लोके चरति [16]पादवत् ॥ ६०
यत्तत्र बीजं पतति सा कृषिः प्रेत्य भाविनी । संतुष्टेन सदा भाव्यं सत्पथालम्बिना सदा ६१
ब्राह्मं हि मार्गमाक्रम्य वर्तितव्यं [17]बुभूषता । संहिताध्यायिना भाव्यं गृहे वै गृहमेधिना ॥ ६२
नित्यं स्वाध्याययुक्तेन न चाध्ययनजीविना । एवंभूतो हि यो विप्रः सततं सत्पथे स्थितः॥६३
आहिताग्निरधीयानो ब्रह्मभूयाय कल्पते । ब्राह्मण्यं देवि संप्राप्य रक्षितव्यं यतात्मना॥ ६४

---

* इदमर्धं क. ख. पुस्तकयोर्नास्ति । + अयं श्लोको नास्ति क. ख. पुस्तकयोः ।

---

१ क. °ग्निमन्त्रावि° । ग. °ग्निमत्रावि° । २ क. तदाऽपि । ३ ख. आर्तह° । ४ ग. °कार्यानुशासकः । ५ ख. °च्छन्दश्चार्थ° । ६ ग. चार्थका° । ७ ख. ग. सिद्धिमि° । ८ क. वा लोभान्न । ९ क. °पहीयते । पि° । १० ग. °भावं कर्म च शुभं य° । ११ ग. °द्रो हि ति° । १२ क. सद्गतिः । १३ क. ख. °ति । ब्राह्मणश्च भवेच्छूद्रोऽप्येवंवृत्तश्च मे । १४ क. °भावा निरर्थकाः । १५ क. पुरा । १६ क. दाववत् । १७ ख. बुभुत्सुणा ।

योनि[1]प्रतिग्रहादानैः कर्मभिश्च शुचिस्मिते । एतत्ते गुह्यमाख्यातं यथा शूद्रो भवेद्द्विजः ॥
ब्राह्मणो वा च्युतो धर्माद्यथा शूद्रत्वमाप्नुयात् ॥ ६९

इति श्रीमहापुराणे आदिब्राह्मे उमामहेश्वरसंवादे संकरजातिलक्षणवर्णनं नाम त्रयोविंशाधिकद्विशततमोऽध्यायः ॥ २२३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२२११

अथ चतुर्विंशाधिकद्विशततमोऽध्यायः ।

उमोवाच—

भगवन्सर्वभूतेश सुरासुरनमस्कृत । धर्माधर्मे[2] नृणां देव ब्रूहि मे संशयं विभो ॥ १
कर्मणा मनसा वाचा त्रिविधैर्देहिनः सदा । बध्यन्ते बन्धनैः कैर्वा मुच्यन्ते वा कथं वद ॥ २
केन शीलेन वै देव कर्मणा कीदृशेन वा । समाचारैर्गुणैः कैर्वा स्वर्गं यान्तीह मानवाः ॥ ३

शिव उवाच—

देवि धर्मार्थतत्त्वज्ञे धर्मनित्य उमे सदा । सर्वप्राणिहितः प्रश्नः श्रूयतां बुद्धिवर्धनः[3] ॥ ४
सत्यधर्मरताः शान्ताः सर्वलिङ्गविवर्जिताः । नाधर्मेण न धर्मेण बध्यन्ते छिन्नसंशयाः ॥ ५
प्रलयोत्पत्तितत्त्वज्ञाः सर्वज्ञाः सर्वदर्शिनः । वीतरागा विमुच्यन्ते पुरुषाः कर्मबन्धनैः ॥ ६
कर्मणा मनसा वाचा ये न हिंसन्ति किंचन । ये न मज्जन्ति[5] कस्मिंश्चित्ते न बध्नन्ति[6] कर्मभिः ॥ ७
प्राणातिपाताद्विरताः[7] शीलवन्तो दयान्विताः । तुल्यद्वेष्यप्रिया दान्ता मुच्यन्ते कर्मबन्धनैः ॥ ८
सर्वभूतदयावन्तो विश्वास्याः सर्वजन्तुषु । त्यक्तहिंस्रसमाचारास्ते नराः स्वर्गगामिनः ॥ ९
परस्वनिर्ममा नित्यं परदारविवर्जिकाः । धर्मलब्धार्थभोक्तारस्ते नराः स्वर्गगामिनः ॥ १०
मातृवत्स्वसृवच्चैव नित्यं दुहितृवच्च ये । परदारेषु वर्तन्ते ते नराः स्वर्गगामिनः ॥ ११
स्वदारनिरता ये च ऋतुकालाभिगामिनः । अग्राम्यसुखभोगाश्च ते नराः स्वर्गगामिनः ॥ १२
स्तैन्यान्निवृत्ताः सततं संतुष्टाः स्वधनेन च । स्वभाग्यान्युपजीवन्ति ते नराः स्वर्गगामिनः ॥ १३
परदारेषु ये नित्यं चारित्रावृतलोचनाः । जितेन्द्रियाः शीलपरास्ते नराः स्वर्गगामिनः ॥ १४
एष देवकृतो मार्गः सेवितव्यः सदा नरैः[11] । अकषायकृतश्चैव मार्गः सेव्यः सदा बुधैः ॥ १५
अवृथापकृतश्चैव मार्गः सेव्यः सदा बुधैः । दानकर्मतपोयुक्तः शीलशौचदयात्मकः ॥
स्वर्गमार्गमभीप्सद्भिर्न सेव्यस्त्वत उत्तरः ॥ १६

उमोवाच[12]—

वाचा तु बध्यते[13] येन[14] मुच्यते ह्यथवा पुनः । तानि कर्माणि मे देव वद भूतपतेऽनघ ॥ १७

शिव उवाच—

आत्महेतोः परार्थे वा अधर्माश्रितमेव च । ये मृषा न वदन्तीह ते नराः स्वर्गगामिनः ॥ १८

---

१ ख. योनिः प्र° । २ ग. °धर्मौ नृ° । ३ क. बुद्धिवर्धिनि । ४ क. ख. वर्तन्ते । ५ क. ख. सर्पन्ति । ६ क. ख. बध्यन्ति । ७ ख. प्राणनिग्रहकुशलाः । ८ ग. °णाभिपा° । ९ क. ख °हिंसास° । १० क. °याः शौचप° । ११ ग. बुधैः । १२ ख. °च । कर्मनिर्येश्च बध्येत यैर्वा मुच्येत पूरुषः । ता° । १३ क. वदते । १४ क. ये तु मुच्यते । १५ ग. वा माहात्म्यश्रवणात्तथा । ये ।

वृत्त्यर्थं धर्महेतोर्वा कामकारात्तथैव च । अनृतं ये न भाषन्ते ते नराः स्वर्गगामिनः ॥ १९
श्लक्ष्णां[1] वाणीं स्वच्छवर्णां मधुरां पापवर्जिताम् । स्वगतेनाभिभाषन्ते ते नराः स्वर्गगामिनः २०
परुषं ये न भाषन्ते कटुकं निष्ठुरं तथा । न पैशुन्यरताः सन्तस्ते नराः स्वर्गगामिनः ॥ २१
पिशुनं न प्रभाषन्ते मित्रभेदकरं[2] तथा । परपीडाकरं चैव ते नराः स्वर्गगामिनः ॥ २२
ये वर्जयन्ति पौरुषं[3] परद्रोहं च मानवाः । सर्वभूतसमा[4] दान्तास्ते नराः स्वर्गगामिनः ॥ २३
शठप्रलापाद्विरता विरुद्धपरिवर्जकाः । सौम्यप्रलापिनो नित्यं ते नराः स्वर्गगामिनः ॥ २४
न कोपाद्व्याहरन्ते ये वाचं हृदयदारिणीम् । शान्तिं विन्दन्ति ये क्रुद्धास्ते नराः स्वर्गगामिनः ॥
एष वाणीकृतो देवि धर्मः सेव्यः सदा नरैः । शुभसत्यगुणैर्नित्यं वर्जनीया मृषा बुधैः ॥ २६

उमोवाच—

मनसा बध्यते[5] येन कर्मणा पुरुषः सदा । तन्मे ब्रूहि महाभाग देवदेव पिनाकधृक् ॥ २७

महेश्वर उवाच—

मानसेनेह धर्मेण संयुक्ताः पुरुषाः सदा । स्वर्गं गच्छन्ति कल्याणि तन्मे कीर्तयतः शृणु ॥ २८
दुष्प्रणीतेन मनसा दुष्प्रणीतान्तराकृतिः । नरो बध्येत येनेह शृणु वा तं शुभानने ॥ २९
अरण्ये विजने न्यस्तं परस्वं दृश्यते यदा । मनसाऽपि न गृह्णन्ति ते नराः स्वर्गगामिनः ॥ ३०
तथैव परदारान्ये कामवृत्ता रहोगताः । मनसाऽपि न हिंसन्ति ते नराः स्वर्गगामिनः[6] ॥ ३१
शत्रुं मित्रं च ये नित्यं तुल्येन मनसा नराः । भजन्ति [7]मैत्र्यं संगम्य ते नराः स्वर्गगामिनः ३२
श्रुतवन्तो दयावन्तः शुचयः सत्यसंगराः । स्वैरर्थैः परिसंतुष्टास्ते नराः स्वर्गगामिनः ॥ ३३
अवैरा ये त्वनायासा [8]मैत्रचित्तरताः सदा । सर्वभूतदयावन्तस्ते नराः स्वर्गगामिनः[9] ॥ ३४
ज्ञातवन्तः क्रियावन्तः क्षमावन्तः सुहृत्प्रियाः । धर्माधर्मविदो नित्यं ते नराः स्वर्गगामिनः॥३५
शुभानामशुभानां च कर्मणां फलसंचये[10] । निराकाङ्क्षाश्च ये देवि ते नराः स्वर्गगामिनः ॥ ३६
पापोपेतान्[11]वर्जयन्ति देवद्विजपराः सदा । समुत्थान[12]मनुप्राप्तास्ते नराः स्वर्गगामिनः ॥ ३७
शुभैः कर्मफलैर्देवि मयैते परिकीर्तिताः । स्वर्गमार्गपरा भूयः किं त्वं श्रोतुमिहेच्छसि ॥ ३८

उमोवाच—

महान्मे संशयः कश्चि[13]न्मर्त्यान्प्रति महेश्वर । तस्मात्त्वं निपुणेनाद्य मम व्याख्यातुमर्हसि ॥ ३९
केनाऽऽयुर्लभते दीर्घं कर्मणा पुरुषः प्रभो[14] । तपसा वाऽपि देवेश केनाऽऽयुर्लभते महत् ॥ ४०
क्षीणायुः केन भवति कर्मणा भुवि मानवः । विपाकं कर्मणां देव वक्तुमर्हस्य[15]निन्दित ॥ ४१
अपरे च महाभाग्या मन्दभाग्यास्तथा परे । अकुलीनाः कुलीनाश्च संभवन्ति तथा परे ॥ ४२
दुर्दर्शाः केचिदाभान्ति[16] नराः काष्ठमया इव । प्रियदर्शास्तथा चान्ये दर्शनादेव मानवाः ॥ ४३
दुष्प्रज्ञाः केचिदाभान्ति केचिदाभान्ति पण्डिताः । महाप्रज्ञास्तथा चान्ये ज्ञानविज्ञानभाविनः ॥
अल्प[17]वाचास्तथा केचिन्महावाचास्तथा परे । दृश्यन्ते पुरुषा देव ततो व्याख्यातुमर्हसि ॥ ४५

---

१ क. निरालम्बां । ग. निराधारां । २ ख. °करीं गिरम् । ऋतं मित्रैस्तु भाषन्ते ते । ३ क. सततं । ४ क. ख. °समाः शान्ता° । ५ ग बाध्यते । ६ क. °नः । श्रद्धावन्तो न ये । ख. नः । श्रद्धावन्तश्च ये । ७ क. मैत्रीं । ८ ख. मैत्रीचिन्तार° । ९ ग °नः । श्रद्धावन्तो दयावन्तः सौख्याः सौख्यजनप्रियाः । १० ख. ग. °चयम् । विपाकज्ञाश्च । ११ क. ख. पापादपेता ये देवि दे° । १२ ख °नपरा ये वै ते न° । १३ क. °श्चित्सत्त्वान्प्र° । १४ क. °भो । गतायुरपि । १५ क. °स्यशेषतः । अ° । १६ क. °न्ति कष्टभेयास्तथाऽपरे । प्रि° । १७ क. ख. °ल्पबाधास्त° ।

शिव उवाच—

हन्त तेऽहं प्रवक्ष्यामि देवि कर्मफलोदयम् । *मर्त्यलोके नरः सर्वो येन स्वं फलमश्नुते ॥ ४६
प्राणातिपाती योगीन्द्रो दण्डहस्तो नरः सदा । नित्यमुद्यत[1]शस्त्रश्च हन्ति भूतगणान्नरः ॥ ४७
निर्दयः सर्वभूतेभ्यो नित्यमुद्वेगकारकः । अपि कीटपतङ्गानाम[2]शरण्यः सुनिर्घृणः ॥ ४८
एवंभूतो नरो देवि निरयं प्रतिपद्यते । विपरीतस्तु धर्मात्मा स्वरूपेणाभिजायते ॥ ४९
निरयं याति हिंसात्मा याति स्वर्गमहिंसकः । यातनां निरये रौद्रां संकृच्छ्रां[3] लभते नरः ॥ ५०
यः कश्चिन्निरयात्तस्मात्समुत्तरति कर्हिचित् । मानुष्यं लभते वाऽपि हीनायुस्तत्र जायते[4] ॥ ५१
पापेन कर्मणा देवि युक्तो हिंसादिभिर्यतः । अहितः सर्वभूतानां हीनायुरुपजायते ॥ ५२
शुभेन कर्मणा देवि प्राणिघातविवर्जितः । निक्षिप्तशस्त्रो [5]निर्दण्डो न हिंसति कदाचन ॥ ५३
न घातयति नो हन्ति घ्नन्तं नैवानुमोदते[6] । सर्वभूतेषु सस्नेहो यथाऽऽत्मनि तथा परे ॥ ५४
ईदृशः पुरुषो नित्यं देवि देवत्वमश्नुते । उपपन्नान्सुखान्भोगान्सदाऽश्नाति मुदा युतः ॥ ५५
अथ चेन्मानुषे लोके कदाचिदुपपद्यते । एष दीर्घायुषां मार्गः सुवृत्तानां सुकर्मणाम् ॥
प्राणिहिंसाविमोक्षेण ब्रह्मणा समुदीरितः ॥ ५६

इति श्रीमहापुराणे आदिब्राह्मे उमामहेश्वरसंवादे धर्मनिरूपणं नाम चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२२६७

अथ पञ्चविंशत्यधिकद्विशततमोऽध्यायः ।

उमोवाच—

किंशीलः किंसमाचारः पुरुषः कैश्च कर्मभिः । स्वर्गं समभिपद्येत संप्रदानेन केन वा ॥ १

महेश्वर उवाच—

दाता ब्राह्मणसत्कर्ता दीनार्तकृपणादिषु । भक्ष्यभोज्यान्नपानानां वाससां च महामतिः ॥ २
प्रतिश्रयान्सभाः कुर्यात्प्रपाः पुष्करिणीस्तथा । नित्यकादीनि कर्माणि करोति प्रयतः शुचिः ॥ ३
आसनं शयनं यानं गृहं रत्नं धनं तथा । सस्यजातानि सर्वाणि[7] सक्षेत्राण्यथ योषितः ॥ ४
सुप्रशान्तमना नित्यं यः प्रयच्छति मानवः । एवंभूतो नरो देवि देवलोकेऽभिजायते ॥ ५
तत्रोष्य[8] सुचिरं कालं भुक्त्वा भोगाननुत्तमान् । सहाप्सरोभिर्मुदितो रमित्वा नन्दनादिषु ॥ ६
तस्माच्च्युतो महेशानि मानुषेषूपजायते । महाभागकुले देवि धनधान्यसमाचिते[9] ॥ ७
तत्र कामगुणैः सर्वैः समुपेतो मुदाऽन्वितः । महाकार्यो[10] महाभोगो धनी भवति मानवः ॥ ८
एते देवि महाभागाः प्राणिनो दानशालिनः[11] । ब्रह्मणा वै पुरा प्रोक्ताः सर्वस्य प्रियदर्शनाः ॥ ९

---

*एतच्छ्लोकार्धद्वयस्थाने क.पुस्तके—'नरः कृत्वा क्रियाः सर्वा येन प्रीणाति देवताः । चतुर्विधानि भूतानि क्रूरकर्मा नरः सदा' इति ग्रन्थो दृश्यते ।

---

१ ख. °मुद्धृत्य शास्त्रं च ह° । २ क. ख. °टपिपीलानाम° । ३ क. सुकृच्छ्रां । ४ ग. °ते । यस्तु शुक्लाभिजातीयः प्राणघातविवर्जकः । निक्षि° । ५ ग. निर्दम्भो । ६ क. °नान्यक्र° । ७ ख. °णि सुक्षे° । ८ ख. तत्रान्ते सु° । ९ क. ख. °समन्वितः । त° । १० ग. °कायो म° । ११ ग. देवशालिनः ।

अपरे मानवा देवि प्रदानकृपणा द्विजाः । येऽन्नानि न प्रयच्छन्ति विद्यमानेऽप्यबुद्धयः ॥ १०
दीनान्धकृपणान्दृष्ट्वा भिक्षुकानतिथीनपि । याचयमाना निवर्तन्ते जिह्वालोभसमन्विताः ॥ ११
न धनानि न वासांसि न भोगान्न च काञ्चनम् । न गाश्च नान्नविकृतिं प्रयच्छन्ति कदाचन ॥
अप्र[1]लुब्धाश्च ये लुब्धा नास्तिका दानवर्जिताः । एवंभूता नरा देवि निरयं यान्त्यबुद्धयः ॥ १३
ते वै मनुष्यतां यान्ति यदा कालस्य पर्ययात् । धनरिक्ते कुले जन्म लभन्ते स्वल्पबुद्धयः ॥ १४
क्षुत्पिपासापरीताश्च सर्वलोकबहिष्कृताः । निराशाः सर्वभोगेभ्यो जीवन्त्यधर्मजीविकाः ॥ १५
अल्पभोगकुले जाता अल्पभोगरता नराः । अनेन कर्मणा देवि भवन्त्यधनिनो नराः ॥ १६
अपरे दम्भिनो नित्यं मानिनः परतो रताः । आसनार्हस्य ये पीठं न यच्छन्त्यल्पचेतसः ॥ १७
मार्गार्हस्य च ये मार्गं न प्रयच्छन्त्यबुद्धयः । अर्घार्हान्न च संस्कारैरर्चयन्ति यथाविधि ॥ १८
पाद्यमाचमनीयं वा प्रयच्छन्त्यभिबुद्धयः । शुभं चाभिमतं प्रेम्णा गुरुं नाभिवदन्ति ये ॥ १९
अभिमानप्रवृद्धेन लोभेन[2] सममास्थिताः । संमान्यांश्चावमन्यन्ते[3] वृद्धान्परिभवन्ति च ॥ २०
एवंविधा नरा देवि सर्वे निरयगामिनः । ते चेद्यदि नरास्तस्मान्निरयादुत्तरन्ति च ॥ २१
वर्षपूगै[4]स्ततो जन्म लभन्ते कुत्सिते कुले । श्वपाकपुल्कसादीनां कुत्सितानामचेतसाम् ॥ २२
कुलेषु तेऽभिजायन्ते गुरुवृद्धोपतापिनः । न दम्भी[5] न च मानी यो देवतातिथिपूजकः ॥ २३
लोकपूज्यो नमस्कर्ता प्रसूतो मधुरं वचः । सर्वकर्मप्रियकरः सर्वभूतप्रियः सदा ॥ २४
अद्वेषी सुमुखः श्लक्ष्णः स्निग्धवाणीप्रदः सदा । स्वागतेनैव सर्वेषां भूतानामविहिंसकः ॥ २५
यथार्थं सत्क्रियापूर्वमर्चयन्नवतिष्ठते । मार्गार्हाय ददन्मार्गं गुरुमभ्यर्चयन्सदा ॥ २६
अतिथिप्रग्रहरतस्तथाऽभ्यागतपूजकः । एवंभूतो नरो देवि स्वर्गतिं प्रतिपद्यते ॥ २७
ततो मानुष्यमा[6]साद्यविशिष्टकुलजो भवेत् । तत्रासौ विपुलैर्भोगैः सर्वरत्नसमायुतः ॥ २८
यथा[7]र्हदाता चार्हेषु धर्मचर्यापरो भवेत् । संमतः सर्वभूतानां सर्वलोकनमस्कृतः ॥ २९
स्वकर्मफलमाप्नोति स्वयमेव नरः सदा । एष धर्मो मया प्रोक्तो विधात्रा स्वयमीरितः ॥ ३०
यस्तु रौद्रसमाचारः सर्वसत्त्वभयंकरः । हस्ताभ्यां यदि वा पद्भ्यां रज्ज्वा दण्डेन वा पुनः ॥ ३१
लोष्टैः स्तम्भैरुपायैर्वा जन्तून्बाधेत शोभने । हिंसार्थं निष्कृतिप्रज्ञः प्रोद्वेजयति चैव हि ॥ ३२
उपक्रामति जन्तूंश्च उद्वेग[9]जननः सदा । एवं शीलसमाचारो निरयं प्रतिपद्यते ॥ ३३
स चेन्मनुष्यतां गच्छे[10]द्यदि कालस्य पर्ययात् । बह्वाबाधापरिक्लिष्टे कुले जयति सोऽधमे ॥ ३४
लोके[11]द्विष्टोऽधमः पुंसां स्वयं कर्मकृतैः फलैः । एष देवि मनुष्येषु बोद्धव्यो ज्ञातिबन्धुषु ॥ ३५
अपरः सर्वभूतानि दयावाननुपश्यति । मैत्री दृष्टिः पितृसमो निर्वैरो नियतेन्द्रियः[12] ॥ ३६
नोद्वेजयति भूतानि [13]न च हन्ति दयापरः । हस्तपादैश्च नियतैर्विश्वास्यः सर्वजन्तुषु ॥ ३७
न रज्ज्वा न च दण्डेन न लोष्टैर्नाऽऽयुधेन च । उद्वेजयति भूतानि शुभकर्मा दयापरः ॥ ३८
एवं शीलसमाचारः स्वर्गे समुपजायते । तत्रासौ भवने दिव्ये मुदा वसति देववत् ॥ ३९
स [14]चेत्स्वर्गक्षयान्मर्त्यो मनुष्येषूपजायते । अल्पायासो निरातङ्कः स जातः सुखमेधते ॥ ४०

---

१ क. °प्रलभ्याश्च । २ क. °न सुसमन्विताः । ३ ख. °न्ते विन्प्रान्प° । ४ क. °पूगास्त° । ५ क. ख. स्तम्भी । ६ क. ख. °माविश्य वि° । ७ क. °थार्ह सर्ववर्णेषु ब्रह्मचर्यप° । ८ ख. °त्रा च यमादिभिः । य° । ९ क. °द्वेजनपरः स° । १० क. °च्छेत्कदाचित्कालप° । ११ क. °कद्वेष्योऽध° । १२ क. विजितेन्द्रियः । १३ ग. न वै हेठयते सदा । ह° । १४ ख. चेच्छया मर्त्यलोके मर्त्यो ।

सुखभागी निरायासो निरुद्वेगः सदा नरः। एष देवि सतां मार्गो बाधा यत्र न विद्यते ॥ ४१

उमोवाच—

इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः। ज्ञानविज्ञानसंपन्नाः प्रज्ञावन्तोऽर्थकोविदाः ॥ ४२
दुष्प्रज्ञाश्चापरे देव ज्ञानविज्ञानवर्जिताः। केन कर्मविपाकेन प्रज्ञावान्पुरुषो भवेत् ॥ ४३
अल्पप्रज्ञो विरूपाक्ष कथं भवति मानवः। एवं त्वं संशयं छिन्धि सर्वधर्मभृतां वर ॥ ४४
जात्यन्धाश्चापरे देव रोगार्ताश्चापरे तथा। नराः क्लीबाश्च दृश्यन्ते कारणं ब्रूहि तत्र वै ॥ ४५

महेश्वर उवाच—

ब्राह्मणान्वेदविदुषः सिद्धान्धर्मविदस्तथा। परिपृच्छन्त्यहरहः कुशलाकुशलं सदा ॥ ४६
वर्जयन्तोऽशुभं कर्म सेवमानाः शुभं तथा। लभन्ते स्वर्गतिं नित्यमिह लोके यथासुखम् ॥ ४७
स चेन्मनुष्यतां याति मेधावी तत्र जायते। श्रुतं यज्ञानुगं यस्य कल्याणमुपजायते ॥ ४८
परदारेषु ये चापि चक्षुर्दुष्टं प्रयुञ्जते। तेन दुष्टस्वभावेन जात्यन्धास्ते भवन्ति हि ॥ ४९
मनसाऽपि प्रदुष्टेन नग्नां पश्यन्ति ये स्त्रियम्। रोगार्तास्ते भवन्तीह नरा दुष्कृतकारिणः ॥ ५०
ये तु मूढा दुराचारा वियोनौ मैथुने रताः। पुरुषेषु सुदुष्प्रज्ञाः क्लीबत्वमुपयान्ति ते ॥ ५१
पशूंश्च ये वै बध्नन्ति ये चैव गुरुतल्पगाः। प्रकीर्णमैथुना ये च क्लीबा जायन्ति वै नराः ॥ ५२

उमोवाच—

अवद्यं किं तु वै कर्म निरवद्यं तथैव च। श्रेयः कुर्वन्नवाप्नोति मानवो देवसत्तम ॥ ५३

महेश्वर उवाच—

श्रेयांसं मार्गमन्विच्छन्सदा यः पृच्छति द्विजान्। धर्मान्वेषी गुणाकाङ्क्षी स स्वर्गं समुपाश्नुते॥
यदि मानुष्यतां देवि कदाचित्संनियच्छति। मेधावी धारणायुक्तः प्राज्ञस्तत्रापि जायते ॥ ५५
एष देवि सतां धर्मो गन्तव्यो भूतिकारकः। नृणां हितार्थाय सदा मया चैवमुदाहृतः ॥ ५६

उमोवाच—

अपरे स्वल्पविज्ञाना धर्मविद्वेषिणो नराः। ब्राह्मणान्वेदविदुषो नेच्छन्ति परिसर्पितुम् ॥ ५७
व्रतवन्तो नराः केचिच्छ्रद्धादमपरायणाः। अव्रता भ्रष्टनियमास्तथाऽन्ये राक्षसोपमाः ॥ ५८
यज्वानश्च तथैवान्ये निर्होमाश्च तथा परे। केन कर्मविपाकेन भवन्तीह वदस्व मे ॥ ५९

महेश्वर उवाच—

आगमालोकधर्माणां मर्यादाः पूर्वनिर्मिताः। प्रमाणेनानुवर्तन्ते दृश्यन्ते ह दृढव्रताः ॥ ६०
अधर्मं धर्ममित्याहुर्ये च मोहवशं गताः। अव्रता नष्टमर्यादास्ते नरा ब्रह्मराक्षसाः ॥ ६१
ये वै कालकृतोद्योगात्संभवन्ती ह मानवाः। निर्होमा निर्वषट्कारास्ते भवन्ति नराधमाः ॥ ६२
एष देवि मया सर्वसंशयच्छेदनाय ते। कुशलाकुशलो नृणां व्याख्यातो धर्मसागरः ॥ ६३

इति श्रीमहापुराणे आदिब्राह्मे उमामहेश्वरसंवादे धर्मनिरूपणं नाम पञ्चविंशत्य-
धिकद्विशततमोऽध्यायः ॥ २२५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२३३०

---

१ ग. वन्धो। २ क. °न्ते महोत्साहा महाबलाः। दु°। ३ ग. प्रश्नानुगं। ४ ग. °क्षुर्द्रष्टुं प्र°। ५ ख. °वन्त्येव परदारप्रदर्शनात्। ये°।

अथ षड्विंशाधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

श्रुत्वैवं सा जगन्माता भर्तुर्वचनमादितः । हृष्टा बभूव सुप्रीता विस्मिता च तदा द्विजाः ॥ १

ये तत्राऽऽसन्मुनिवरास्त्रिपुरारेः समीपतः । तीर्थयात्राप्रसङ्गेन गतास्तस्मिन्गिरौ द्विजाः ॥ २

तेऽपि संपूज्य तं देवं शूलपाणिं प्रणम्य च । पप्रच्छुः संशयं चैव लोकानां हितकाम्यया ॥ ३

मुनय ऊचुः—

त्रिलोचन नमस्तेऽस्तु दक्षक्रतुविनाशन । पृच्छामस्त्वां जगन्नाथ संशयं हृदि संस्थितम् ॥ ४

संसारेऽस्मिन्महाघोरे भैरवे लोमहर्षणे । भ्रमन्ति सुचिरं कालं पुरुषाश्चाल्पमेधसः ॥ ५

येनोपायेन मुच्य[1]न्ते जन्मसंसारबन्धनात् । ब्रूहि तच्छ्रोतुमिच्छामः परं कौतूहलं हि नः ॥ ६

महेश्वर उवाच—

कर्मपाशनिबद्धानां नराणां दुःखभागिनाम् । नान्योपायं प्रपश्यामि वासुदेवात्परं द्विजाः ॥ ७

ये पूजयन्ति तं देवं शङ्खचक्रगदाधरम् । वाङ्मनःकर्मभिः सम्यक्ते यान्ति परमां[2] गतिम् ॥ ८

किं तेषां जीवितेनेह पशुवच्चेष्टितेन च । येषां न प्रवणं चित्तं वासुदेवे जगन्मये ॥ ९

ऋषय ऊचुः—

पिनाकिन्भगनेत्रघ्न सर्वलोकनमस्कृत । माहात्म्यं वासुदेवस्य श्रोतुमिच्छाम शंकर ॥ १०

महेश्वर उवाच—

पितामहादपि वरः शाश्वतः पुरुषो हरिः । कृष्णो जाम्बूनदाभासो व्यभ्रे सूर्य इवोदितः ॥ ११

दशबाहुर्महातेजा [3]देवतारिनिषूदनः । श्रीवत्साङ्को हृषीकेशः सर्वदैवत[4]यूथपः ॥ १२

ब्रह्मा तस्योदरभवस्तस्याहं च शिरोभवः । शिरोरुहेभ्यो ज्योतींषि रोमभ्यश्च सुरासुराः ॥ १३

ऋषयो देहसंभूतास्तस्य लोकाश्च शाश्वताः । पितामहगृहं साक्षात्सर्वदेवगृहं च सः ॥ १४

सोऽस्याः पृथिव्याः कृत्स्नायाः स्रष्टा त्रिभुवनेश्वरः । संहर्ता चैव भूतानां स्थावरस्य चरस्य च

स हि [5]देवदेवः साक्षाद्देवनाथः परंतपः । सर्वज्ञः सर्वसंस्रष्टा सर्वगः सर्वतोमुखः ॥ १६

न तस्मात्परमं भूतं त्रिषु लोकेषु किंचन । सनातनो महाभागो गोविन्द इति विश्रुतः ॥ १७

ससर्वान्पार्थिवान्संख्ये घातयिष्यति मानदः । सुरकार्यार्थमुत्पन्नो मानुष्यं वपुरास्थितः ॥ १८

न हि देवगणाः शक्तास्त्रिविक्रमविनाकृताः । भुवने देवकार्याणि कर्तुं नायकवर्जिताः ॥ १९

नायकः सर्वभूतानां सर्वभूतनमस्कृतः । एतस्य देवनाथस्य कार्यस्य च परस्य च ॥ २०

ब्रह्मभूतस्य सततं ब्रह्मर्षिशरणस्य च । ब्रह्मा वसति नाभिस्थः शरीरेऽहं च संस्थितः ॥ २१

सर्वाः सुखं संस्थिताश्च शरीरे तस्य देवताः । स देवः पुण्डरीकाक्षः श्रीगर्भः श्रीसहोषितः ॥

शार्ङ्गचक्रायुधः खड्गी सर्वनागरिपुध्वजः । उत्तमेन सुशीलेन शौचेन च दमेन च ॥ २३

पराक्रमेण वीर्येण वपुषा दर्शनेन च । आरोहणप्रमाणेन वीर्येऽऽणार्जवसंपदा ॥ २४

[6]आनृशंस्येन रूपेण बलेन च समन्वितः । अस्त्रैः समुदितः सर्वैर्दिव्यैरद्भुतदर्शनैः ॥ २५

योगमायासहस्राक्षो विरूपाक्षो महामनाः[7] । वाचा मित्रजनश्लाघी ज्ञातिबन्धुजनप्रियः ॥ २६

---

१ क. °न्ते ततः सं° । २ क. °रमं पदम् । ३ क. देवानामरिसूद° । ४ ग. °तपूजकः । ब्र° । ५ क. देवः परः सोऽपि देवानां च प° । ६ ग. अनृशंसेन । ७ क. °नाः । वचो मि° ।

क्षमावांश्चानहंवादी स देवो ब्रह्म[1]दायकः । भयहर्ता भयार्तानां मित्रा[2]नन्दविवर्धनः ॥ २७
शरण्यः सर्वभूतानां दीनानां पालने रतः । श्रुतवानथ संपन्नः सर्वभूतनमस्कृतः ॥ २८
समाश्रितानामुपकृच्छत्रू[3]णां भयकृत्तथा । नीतिज्ञो नीतिसंपन्नो ब्रह्मवादी जितेन्द्रियः ॥ २९
[4]भवार्थमेव देवानां बुद्ध्या परमया युतः । प्राजापत्ये शुभे मार्गे मानवे धर्मसंस्कृते ॥ ३०
समुत्पत्स्यति गोविन्दो मनोर्वंशे महात्मनः । [5]अंशो नाम मनोः पुत्रो ह्यन्तर्धामा ततः परम् ॥ ३१
अन्तर्धाम्नो हविर्धामा प्रजापतिरनिन्दितः । प्राचीनबर्हिर्भविता हविर्धाम्नः सुतो द्विजाः ॥ ३२
तस्य प्रचेतःप्रमुखा भविष्यन्ति दशाऽऽत्मजाः[6] । प्राचेतसस्तथा दक्षो भवितेह प्रजापतिः ॥ ३३
दाक्षायण्यस्तथाऽऽदित्यो मनुरादित्यतस्ततः । मनोश्च वंशज इला सुद्युम्नश्च भविष्यति ॥ ३४
बुधात्पुरूरवाश्चापि तस्मादायुर्भविष्यति । नहुषो भविता तस्माद्ययातिस्तस्य चाऽऽत्मजः ॥ ३५
यदुस्तस्मान्महासत्त्वः क्रोष्टा तस्माद्भविष्यति । [7]क्रौष्टुश्चैव महान्पुत्रो वृजिनीवान्भविष्यति ॥ ३६
वृजिनीवतश्च भविता[8] उ[9]षङ्गुरपराजितः[10] । उ[11]षङ्गोर्भविता पुत्रः शूरश्चित्ररथस्तथा ॥ ३७
तस्य त्ववरजः पुत्रः शूरो नाम भविष्यति । तेषां विख्यातवीर्याणां चारित्रगुणशालिनाम् ॥ ३८
यज्विनां च विशुद्धानां वंशे ब्राह्मणसत्तमाः । स शूरः क्षत्रियश्रेष्ठो महावीर्यो महायशाः ॥ ३९
स्ववंशविस्तारकरं जनयिष्यति मानदम् । वसुदेवमिति ख्यातं पुत्रमानकदुन्दुभिम् ॥ ४०
तस्य पुत्रश्चतुर्बाहुर्वासुदेवो भविष्यति । [12]दाता ब्राह्मणसत्कर्ता ब्रह्मभूतो द्विजप्रियः ॥ ४१
राज्ञो बद्धान्स सर्वान्वै मोक्षयिष्यति यादवः । जरासंधं तु राजानं निर्जित्य गिरिगह्वरे ॥ ४२
सर्वपार्थिवरत्नाढ्यो भविष्यति स वीर्यवान् । पृथिव्यामप्रतिहतो वीर्येणापि भविष्यति ॥ ४३
विक्रमेण च संपन्नः सर्वपार्थिवपार्थिवः । [13]शूरः [14]संहननो [15]भूतो द्वारकायां वसन्प्रभुः ॥ ४४
पालयिष्यति गां देवीं विनिर्जित्य दुराशयान् । तं भवन्तः समासाद्य ब्राह्मणैरर्हणैर्वरैः ॥ ४५
अर्चयन्तु यथान्यायं ब्रह्माणमिव शाश्वतम् । यो हि मां द्रष्टुमिच्छेत ब्रह्माणं च पितामहम् ॥ ४६
द्रष्टव्यस्तेन भगवान्वासुदेवः प्रतापवान् । दृष्टे तस्मिन्नहं दृष्टो न मेऽत्रास्ति विचारणा ॥ ४७
पितामहो वासुदेव इति वित्त तपोधनाः । स यस्य पुण्डरीकाक्षः प्रीतियुक्तो भविष्यति ॥ ४८
तस्य देवगणः प्रीतो ब्रह्मपूर्वो भविष्यति । यस्तु तं मानवो लोके संश्रयिष्यति केशवम् ॥ ४९
तस्य कीर्तिर्यशश्चैव स्वर्गश्चैव भविष्यति । धर्माणां [16]देशिकः साक्षाद्भविष्यति स [17]धर्मवान् ॥ ५०
धर्मविद्भिः स देवेशो नमस्कार्यः सदाऽच्युतः । धर्म एव सदा हि स्यादस्मिन्नभ्यर्चिते विभौ ५१
स हि देवो महातेजाः प्रजाहितचिकीर्षया । धर्मार्थं पुरुषव्याघ्र ऋषिकोटीः ससर्ज च ॥ ५२
ताः सृष्टास्तेन विधिना पर्वते गन्धमादने । सनत्कुमारप्रमुखास्तिष्ठन्ति तपसाऽन्विताः ॥ ५३
तस्मात्स वाग्मी धर्मज्ञो नमस्यो द्विजपुंगवाः । वन्दितो हि स वन्देत मानितो मानयीत च ५४
दृष्टः पश्येदहरहः संश्रितः प्रतिसंश्रयेत् । अर्चितश्चार्चयेन्नित्यं स देवो द्विजसत्तमाः ॥ ५५
एवं तस्यानवद्यस्य विष्णोर्वै परमं तपः । आदिदेवस्य महतः सज्जनाचरितं सदा ॥ ५६
भुवनेऽभ्यर्चितो नित्यं देवैरपि सनातनः । अभयेनानुरूपेण प्रपद्य तमनुव्रताः ॥ ५७

---

१ ख. ग. °ह्मनाय° । २ ख. °त्राणां तद्विनाशनः । ३ क. °त्रूणामपि धर्मवित् । नी° । ४ ख. भवनाशकरः श्रीमान्बुद्ध्या । ५ ख. अंशुर्नाम । ग. अङ्गो । ६ क. °जाः । प्रचे° ७ क. ख. क्रोष्टोश्चै° । ८ क. °ता ऋष° । ९ ग. °षद्गुर° । १० क. °तः । ऋष° । ११ ग. °षद्गोर्भ° । १२ ग. धाता । १३ ग. शूरसं° । १४ ख. संनहनो । १५ क. भूयान्द्वार° । १६ ख. पोषकः । १७ ग. धर्मभाक् ।

कर्मणा मनसा वाचा स नमस्यो द्विजैः सदा । यत्नवद्भिरुपस्थाय द्रष्टव्यो देवकीसुतः ॥ ५८
एष वै विहितो मार्गो मया वै मुनिसत्तमाः । तं दृष्ट्वा सर्वदेवेशं दृष्टाः स्युः सुरसत्तमाः ॥ ५९
महावराहं तं देवं सर्वलोकपितामहम् । अहं चैव नमस्यामि नित्यमेव जगत्पतिम् ॥ ६०
तत्र च त्रितयं दृष्टं भविष्यति न संशयः । समस्ता हि वयं देवास्तस्य देहे वसामहे ॥ ६१
तस्यैव चाग्रजो भ्राता सिताद्रिनिचयप्रभः । हली बल इति ख्यातो भविष्यति धराधरः ॥ ६२
त्रिशिरास्तस्य देवस्य दृष्टोऽनन्त इति प्रभोः । सुपर्णो यस्य वीर्येण कश्यपस्याऽऽत्मजो बली ॥
अन्तं नैवाशकद्द्रष्टुं देवस्य परमात्मनः । स च शेषो विचरते परया वै मुदा युतः ॥ ६४
अन्तर्वसति भोगेन परिरभ्य वसुंधराम् । य एष विष्णुः सोऽनन्तो भगवान्वसुधाधरः ॥ ६५
यो रामः स हृषीकेशोऽच्युतः सर्वधराधरः । तावुभौ पुरुषव्याघ्रौ दिव्यौ दिव्यपराक्रमौ ॥ ६६
द्रष्टव्यौ माननीयौ च चक्रलाङ्गलधारिणौ । एष वोऽनुग्रहः प्रोक्तो मया पुण्यस्तपोधनाः ॥
तद्भवन्तो यदुश्रेष्ठं पूजयेयुः प्रयत्नतः ॥ ६७

इति श्रीमहापुराणे आदिब्राह्मे ऋषिमहेश्वरसंवादे पञ्चविंशत्यधिक-
द्विशततमोऽध्यायः ॥ २२५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२३९७

अथ षड्विंशत्यधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

अहो कृष्णस्य माहात्म्यं श्रुतमस्माभिरद्भुतम् । सर्वपापहरं पुण्यं धन्यं संसारनाशनम् ॥ १
संपूज्य विधिवद्भक्त्या वासुदेवं[3] महामुने । कां गतिं यान्ति मनुजा वासुदेवार्चने रताः ॥ २
किं प्राप्नुवन्ति ते मोक्षं किंवा स्वर्गं महामुने । अथवा किं मुनिश्रेष्ठ प्राप्नुवन्त्युभयं फलम् ॥ ३
छेत्तुमर्हसि सर्वज्ञ संशयं नो हृदि स्थितम् । छेत्ता नान्योऽस्ति लोकेऽस्मिंस्त्वदृते मुनिसत्तम ॥ ४

व्यास उवाच—

साधु साधु मुनिश्रेष्ठा भवद्भिर्यदुदाहृतम् । शृणुध्वमानुपूर्व्येण वैष्णवानां सुखावहम् ॥ ५
दीक्षामात्रेण कृष्णस्य नरा मोक्षं व्रजन्ति वै । किं पुनर्ये सदा भक्त्या पूजयन्त्यच्युतं द्विजाः ६
न तेषां दुर्लभः स्वर्गो मोक्षश्च मुनिसत्तमाः । लभन्ते वैष्णवाः कामान्यान्यान्वाञ्छन्ति दुर्लभान् ॥
रत्नपर्वतमारुह्य नरो रत्नं यथाऽऽददेत् । स्वेच्छया मुनिशार्दूलास्तथा कृष्णान्मनोरथान् ॥ ८
कल्पवृक्षं समासाद्य फलानि स्वेच्छया यथा । गृह्णाति पुरुषो विप्रास्तथा कृष्णान्मनोरथान् ॥
श्रद्धया विधिवत्पूज्य वासुदेवं जगद्गुरुम् । धर्मार्थकाममोक्षाणां प्राप्नुवन्ति नराः फलम् ॥ १०
आराध्य तं जगन्नाथं विशुद्धेनान्तरात्मना । प्राप्नुवन्ति नराः कामान्सुराणामपि दुर्लभान् ॥ ११
येऽर्चयन्ति सदा भक्त्या वासुदेवाख्यमव्ययम् । न तेषां दुर्लभं किंचिद्विद्यते भुवनत्रये ॥ १२
धन्यास्ते पुरुषा लोके येऽर्चयन्ति सदा हरिम् । सर्वपापहरं देवं सर्वकामफलप्रदम् ॥ १३
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रान्त्यजातयः । संपूज्य तं सुरवरं प्राप्नुवन्ति परां गतिम् ॥
तस्माच्छृणुध्वं मुनयो यत्पृच्छत ममानघाः । प्रवक्ष्यामि समासेन गतिं तेषां महात्मनाम् ॥ १५

---

१ क. °भः । बलभद्र इ° । २ क. धरातले । ३ ग° °वं सदा मु° । ४ ख. चेतसा । ५ क. °द्रास्तथाऽन्त्यजाः । सं° ।

त्यक्त्वा मानुष्यकं देहं रोगायतनमध्रुवम् । जरामरणसंयुक्तं जलबुद्बुदसंनिभम् ॥ १६
मांसशोणितदुर्गन्धं विष्ठामूत्रादिभिर्युतम् । अस्थिस्थूणममेध्यं च स्नायुचर्मशिरान्वितम् ॥ १७
कामगेन विमानेन दिव्यगन्धर्वनादिना । तरुणादित्यवर्णेन किङ्किणीजालमालिना ॥ १८
उपगीयमाना गन्धर्वैरप्सरोभिरलंकृताः । व्रजन्ति लोकपालानां भवनं तु पृथक्पृथक् ॥ १९
मन्वन्तरप्रमाणं तु भुक्त्वा कालं पृथक्पृथक् । भुवनानि[1] पृथक्तेषां सर्वभोगैरलंकृताः ॥ २०
ततोऽन्तरिक्षं लोकं ते यान्ति सर्वसुखप्रदम् । तत्र भुक्त्वा[2] वरान्भोगान्दशमन्वन्तरं द्विजाः ॥२१
तस्माद्गन्धर्वलोकं तु यान्ति वै वैष्णवा द्विजाः । विंशन्मन्वन्तरं कालं तत्र भुक्त्वा मनोरमान्२२
भोगानादित्यलोकं तु तस्माद्यान्ति सुपूजिताः । त्रिंशन्मन्वन्तरं तत्र भोगान्भुक्त्वाऽतिदैवतान् ॥
तस्माद्व्रजन्ति ते[3] विप्राश्चन्द्रलोकं सुखप्रदम् । मन्वन्तराणां ते तत्र चत्वारिंशद्गुणान्वितम् २४
कालं भुक्त्वा शुभान्भोगाञ्जरामरणवर्जिताः । तस्मान्नक्षत्रलोकं तु विमानैः समलंकृतम् ॥ २५
व्रजन्ति ते मुनिश्रेष्ठा गुणैः सर्वैरलंकृताः । मन्वन्तराणां पञ्चाशद्भुक्त्वा भोगान्यथेप्सितान्॥२६
तस्माद्व्रजन्ति ते विप्रा देवलोकं सुदुर्लभम् । षष्टिमन्वन्तरं यावत्तत्र भुक्त्वा सुदुर्लभान् ॥ २७
भोगान्नानाविधान्विप्रा ऋग्व्यष्टकसमन्वितान् । शक्रलोकं[4] पुनस्तस्माद्गच्छन्ति[5] सुरपूजिताः ॥२८
मन्वन्तराणां तत्रैव भुक्त्वा कालं च सप्ततिम् । भोगानुच्चावचान्दिव्यान्मनसः प्रीतिवर्धनान् २९
तस्माद्व्रजन्ति ते लोकं प्राजापत्यमनुत्तमम् । भुक्त्वा तत्रेप्सितान्भोगान्सर्वकामगुणान्वितान्३०
मन्वन्तरमशीतिं च कालं सर्वसुखप्रदम् । तस्मात्पैतामहं लोकं यान्ति ते वैष्णवा द्विजाः ॥ ३१
मन्वन्तराणां नवतिं क्रीडित्वा तत्र वै सुखम् । इहाऽऽगत्य[6] पुनस्तस्माद्विप्राणां प्रवरे कुले ॥ ३२
जायन्ते योगिनो विप्रा वेदशास्त्रार्थपारगाः । एवं सर्वेषु लोकेषु भुक्त्वा भोगान्यथेप्सितान् ३३
इहाऽऽगत्य पुनर्यान्ति ह्युपर्युपरि च क्रमात् । संभवे संभवे ते तु शतवर्षं[8] द्विजोत्तमाः ॥ ३४
भुक्त्वा यथेप्सितान्भोगान्यान्ति लोकान्तरं ततः । दशजन्म यदा तेषां क्रमेणैवं प्रपूर्यते ॥ ३५
तदा लोकं हरेर्दिव्यं ब्रह्मलोकाद्व्रजन्ति ते । गत्वा तत्राक्षयान्भोगान्भुक्त्वा सर्वगुणान्वितान् ॥
मन्वन्तरशतं यावज्जन्ममृत्युविवर्जिताः । गच्छन्ति भुवनं पश्चाद्वाराहस्य द्विजोत्तमाः ॥ ३७
दिव्यदेहाः कुण्डलिनो महाकाया महाबलाः । क्रीडन्ति तत्र विप्रेन्द्राः कृत्वा रूपं चतुर्भुजम् ३८
दश कोटिसहस्राणि वर्षाणां द्विजसत्तमाः । तिष्ठन्ति शाश्वते भावे सर्वैर्देवैर्नमस्कृताः[9] ॥ ३९
ततो यान्ति तु ते धीरा नरसिंहगृहं द्विजाः । क्रीडन्ते तत्र मुदिता वर्षकोट्ययुतानि च ॥ ४०
तदन्ते वैष्णवं यान्ति पुरं सिद्धनिषेवितम् । क्रीडन्ते तत्र सौख्येन वर्षाणामयुतानि च ॥ ४१
ब्रह्मलोके पुनर्विप्रा गच्छन्ति साधकोत्तमाः । तत्र स्थित्वा चिरं कालं वर्षकोटिशतान्बहून्॥ ४२
नारायणपुरं यान्ति ततस्ते साधकेश्वराः[10] । भुक्त्वा भोगांश्च विविधान्वर्षकोट्यर्बुदानि च ॥ ४३
अनिरुद्धपुरं पश्चाद्दिव्यरूपा महाबलाः । गच्छन्ति साधकवराः स्तूयमानाः सुरासुरैः ॥ ४४
तत्र कोटिसहस्राणि वर्षाणां च चतुर्दश । तिष्ठन्ति वैष्णवास्तत्र जरामरणवर्जिताः ॥ ४५
प्रद्युम्नस्य[11] पुरं पश्चाद्गच्छन्ति विगतज्वराः । तत्र तिष्ठन्ति[12] ते विप्रा लक्षकोटिशतत्रयम्[13] ॥ ४६

---

१ क. भवनानि । २ क. ख. °क्त्वा शुभान्भो° । ३ ख. ते वीराश्च° । ४ क. ख. °कं मुदा युक्तास्त° । ५ क. ख. °न्ति पू° । ६ क. °गताः पु° । ७ क. ख. °न्यथासुखम् । इ° । ८ ख. षष्टिवर्षं । ९ क. सर्वलोकनम° । १० क. °धकोत्तमाः । भु° । ११ क. ख. प्राद्युम्नेयं । १२ क. °न्ति वर्षाणि ल° । १३ क. ख. °तद्वय° ।

स्वच्छन्दगामिनो हृष्टा बलशक्तिसमन्विताः* । गच्छन्ति योगिनः पश्चाद्यत्र संकर्षणः प्रभुः ॥
तत्रोषित्वा चिरं कालं भुक्त्वा भोगान्सहस्रशः । विशन्ति वासुदेवेति विरूपाख्ये निरञ्जने॥४८
विनिर्मुक्ताः परे तत्त्वे जरामरणवर्जिते । तत्र गत्वा विमुक्तास्ते भवेयुर्नात्र संशयः ॥ ४९
एवं क्रमेण भुक्तिं ते प्राप्नुवन्ति मनीषिणः । मुक्तिं च मुनिशार्दूला वासुदेवार्चने रताः ॥ ५०

इति श्रीमहापुराणे आदिब्राह्मे वैष्णवानां गतिख्यापनं नाम
षड्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२४४७

अथ सप्तविंशत्यधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

एकादश्यामुभे पक्षे निराहा[1]रः समाहितः । स्नात्वा सम्यग्विधानेन धौतवासा जितेन्द्रियः ॥ १
संपूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः । पुष्पैर्गन्धैस्तथा दीपैर्धूपैर्नैवेद्यकैस्तथा ॥ २
उपहारैर्बहुविधैर्जप्यैर्होमप्रदक्षिणैः । स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यैर्मनोहरैः ॥ ३
दण्डवत्प्रणिपातैश्च जयशब्दैस्तथोत्तमैः । एवं संपूज्य विधिवद्रात्रौ कृत्वा प्रजागरम् ॥ ४
कथां वा गीतिकां विष्णोर्गायन्विष्णुपरायणः । याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः

मुनय ऊचुः—

प्रजागरे गीति[3]कायाः फलं विष्णोर्महामुने । ब्रूहि तच्छ्रोतुमिच्छामः परं कौतूहलं हि नः ॥ ६

व्यास उवाच—

शृणुध्वं मुनिशार्दूलाः प्रवक्ष्याम्यनुपूर्वशः । गीतिकायाः फलं विष्णोर्जागरे यदुदाहृतम् ॥ ७
अवन्ती नाम नगरी बभूव भुवि विश्रुता । तत्राऽऽस्ते भगवान्विष्णुः शङ्खचक्रगदाधरः ॥ ८
तस्या नगर्याः पर्यन्ते चाण्डालो [4]गीतिकोविदः । सद्वृत्त्योत्पादितधनो भृत्यानां भरणे रतः ॥ ९
विष्णुभक्तः स[5] चाण्डालो मासि मासि दृढव्रतः । एकादश्यां समागम्य सोपवासोऽथ गायति ॥
गीतिका विष्णुनामाङ्काः प्रादुर्भावसमाश्रिताः । गान्धारषड्जनैषादस्वरपञ्चमधैवतैः ॥ ११
रात्रिजागरणे विष्णुं गाथाभिरुपगायति । प्रभाते च प्रणम्येशं द्वादश्यां गृहमेत्य च ॥ १२
जामातृभागिनेयांश्च भोजयित्वा [6]सकन्यकाः । ततः सपरिवारस्तु पश्चाद्भुङ्क्ते द्विजोत्तमाः ॥ १३
एवं तस्याऽऽसतस्तत्र कुर्वतो विष्णुप्रीणनम् । गीतिकाभिर्विचित्राभिर्वयः प्रतिगतं बहु ॥ १४
एकदा चैत्रमासे तु कृष्णैकादशिगोच[7]रे । विष्णुशुश्रूषणार्थाय ययौ वनमनुत्तमम् ॥ १५
वनजातानि पुष्पाणि ग्रहीतुं भक्तितत्परः । क्षिप्रातटे महारण्ये विभीतकतरोरधः ॥ १६
दृष्टः स राक्षसेनाथ गृहीतश्चापि भक्षितुम् । चाण्डालस्तमथोवाच नाद्य भक्ष्यस्त्वया ह्यहम् ॥१७
प्रातर्भोक्ष्यसि कल्याण सत्यमेष्याम्यहं पुनः । अद्य कार्यं मम महत्तस्मान्मुञ्चस्व राक्षस ॥ १८

---

* अत्रैवाध्यायसमाप्तिः क. ख. पुस्तकयोः ।

---

१ क. विप्रा । २ क. °हारसमन्वितः । ३ ख. °कायां फ° । ४ क. ख. गीतको° । ५ ख. सदा सोऽपि मा° । ६ ग. स्वकन्यकाः । ७ क. °चरैः । वि° ।

श्वः सत्येन समेष्यामि ततः खादसि मामिति । विष्णुशुश्रूषणार्थाय रात्रिजागरणं मया ॥
कार्यं न व्रतविघ्नं मे कर्तुमर्हसि राक्षस ॥ १९

व्यास उवाच—

तं राक्षसः प्रत्युवाच दशरात्रमभोजनम् । ममाभूदद्य च भवान्मया लब्धो मतङ्गज ॥ २०
न मोक्ष्ये भक्षयिष्यामि क्षुधया पीडितो भृशम् । निशाचरवचः श्रुत्वा मातङ्गस्तमुवाच ह ॥
सान्त्वयञ्श्लक्ष्णया वाचा स सत्यवचनैर्दृढैः ॥ २१

मातङ्ग उवाच—

सत्यमूलं[1] जगत्सर्वं ब्रह्मराक्षस तच्छृणु । सत्येनाहं शपिष्यामि पुनरागमनाय च ॥ २२
आदित्यश्चन्द्रमा वह्निर्वायुर्भूर्द्यौर्जलं मनः । अहोरात्रं यमः संध्ये द्वे विदुर्नरचेष्टितम् ॥ २३
परदारेषु यत्पापं यत्परद्रव्यहारिषु । यच्च ब्रह्महनः पापं सुरापे गुरुतल्पगे ॥ २४
वेन्ध्यापतेश्च[2] यत्पापं यत्पापं वृषलीपतेः । यच्च देवलके पापं मत्स्यमांसाशिनश्च यत् ॥ २५
क्रोडमांसाशिनो यच्च[3] कूर्ममांसाशिनश्च यत्[4] । वृथा मांसाशिनो यच्च पृष्ठमांसाशिनश्च यत् ॥ २६
कृतघ्ने मित्रघातके यत्पापं दिधिषूपतौ । सूतकस्य[5] च यत्पापं यत्पापं क्रूरकर्मणः ॥ २७
कृपणस्य च यत्पापं यच्च[6] वन्ध्यातिथेरपि । अमावास्याऽष्टमी षष्ठी कृष्णशुक्ल[7]चतुर्दशी ॥ २८
तासु[8] यद्गमनात्[9]पापं यद्विप्रो[10] व्रजति स्त्रियम् । रजस्वलां तथा पश्चाच्छ्राद्धं कृत्वा स्त्रियं व्रजेत् २९
सर्वस्व[11]स्नातभोज्यानां यत्पापं मलभोजने[12] । मित्रभार्यां गच्छतां च यत्पापं पिशुनस्य च ॥ ३०
दम्भमायानुरक्ते च यत्पापं मधु[13]घातिनः । *ब्राह्मणस्य प्रतिश्रुत्य यत्पापं तदयच्छतः ॥ ३१
यच्च कन्यानृते पापं यच्च गोश्व[14]तरानृते । स्त्रीबालहन्तुर्यत्पापं यच्च मिथ्याभिभाषिणः ॥ ३२
देववेदद्विजनृपपत्र[15]मित्रसतीस्त्रियः । यच्च निन्दयतां पापं[16] गुरु[17]मिथ्यापचारतः ॥ ३३
अग्नित्यागिषु यत्पापमग्निदायिषु यद्वने[18] । गृहेष्व्या पातके यच्च यद्गोघ्ने यद्द्विजाधमे ॥ ३५
यत्पापं परिवित्ते च यत्पापं परिवेदिनः । तयोर्दातृग्रहीत्रोश्च यत्पापं भ्रूणघातिनः ॥ ३६
किं चात्र बहुभिः प्रोक्तैः शपथैस्तव राक्षस । श्रूयतां शपथं भीमं दुर्वाच्यमपि कथ्यते ॥ ३४
स्वकन्याजीविनः पापं गूढ[19]सत्येन साक्षिणः । अयाज्ययाजके षण्ढे यत्पापं श्रवणे[20]ऽधमे ॥ ३७
प्रव्रज्यावसिते यच्च ब्रह्मचारिणि कामुके । एतैस्तु पापैर्लिप्येऽहं यदि नैष्यामि तेऽन्तिकम् ॥ ३८

व्यास उवाच—

मातङ्गवचनं श्रुत्वा विस्मितो ब्रह्मराक्षसः । प्राह गच्छस्व सत्येन समयं चैव पालय ॥ ३९
इत्युक्तः कुणपाशेन श्वपाकः कुसुमानि तु । समादायागमच्चैव विष्णोः स निलयं गतः ॥ ४०
तानि प्रादाद्ब्राह्मणाय सोऽपि प्रक्षाल्य चाम्भसा । विष्णुमभ्यर्च्य निलयं जगाम स तपोधनाः
सोऽपि मातङ्गदायादः सोपवासस्तु तां निशाम् । गायन्हि बाह्यभूमिष्ठः प्रजागरमुपाकरोत् ॥ ४२

---

* इदमर्धं क. ख. पुस्तकयोर्नास्ति ।

---

१ क. सत्याधारं । २ ग. संध्यापाताच्च । ३ क. °च्च वृषमां° । ४ क. °त् । कू° । ५ ख. शूलिकस्य । ६ क. यत्पापं ग्रामयाजके । अ° । ७ ग. °क्लत्रयोदशी । ८ क. तेषु । ९ क. यच्चरणात्पा° । १० क. °द्विप्रा ध्यायतः स्त्रि° । ११ ख. °स्वप्रान्तभोज्या° । १२ क. शल्यभोजिनाम् । १३ क. °धुगन्धिनः । १४ ख. ग. °श्वनरा° । १५ क. °पयज्ञसंधिस° । १६ ग. °पं सुरां मिथ्यापचर्यतः । १७ ख. मिथ्योपरेततः । १८ ख. °ने । गूढचेष्टेषु यत्पापं यच्च गोघ्ने द्विजा । १९ ग. कूटसत्येन । २० ख. °वणाध° ।

प्रभातायां तु शर्वर्यां स्नात्वा देवं नमस्य च । सत्यं स समयं कर्तुं प्रतस्थे यत्र राक्षसः ॥ ४३
तं व्रजन्तं पथि नरः प्राह भद्र क गच्छसि । स तथाऽकथयत्सर्वं सोऽप्येनं पुनरब्रवीत् ॥ ४४
धर्मार्थकाममोक्षाणां शरीरं साधनं[3] यतः । महता तु प्रयत्नेन शरीरं पालयेद्बुधः ॥ ४५
*जीवधर्मार्थसुखं नरस्तथाऽऽप्नोति मोक्षगतिमग्र्याम् ।
जीवन्कीर्तिमुपैति च भवति मृतस्य का कथा लोके ॥ ४६
मातङ्गस्तद्वचः श्रुत्वा प्रत्युवाचाथ हेतुमत् ॥ ४७

मातङ्ग उवाच—

भद्र सत्यं पुरस्कृत्य गच्छामि शपथाः कृताः ॥ ४८

व्यास उवाच—

तं भूयः प्रत्युवाचाथ किमेवं मूढधीर्भवान् । किं न श्रुतं त्वया साधो मनुना यदुदीरितम् ॥ ४९
गोस्त्रीद्विजानां परिरक्षणार्थं विवाहकाले सुरतप्रसङ्गे ।
प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानि ॥ ५०
धर्मवाक्यं न च स्त्रीषु न विवाहे तथा रिपौ । वञ्चने चार्थहानौ च स्वनाशेऽनृतके तथा ॥
एवं तद्वाक्यमाकर्ण्य मातङ्गः प्रत्युवाच ह ॥ ५१

मातङ्ग उवाच—

मैवं वदस्व भद्रं ते सत्यं लोकेषु पूज्यते । सत्येनावाप्यते सौख्यं यत्किंचिज्जगतीगतम् ॥ ५२
सत्येनार्कः प्रतपति सत्येनाऽऽपो रसात्मिकाः । ज्वलत्यग्निश्च सत्येन वाति सत्येन मारुतः ५३
धर्मार्थकामसंप्राप्तिर्मोक्षप्राप्तिश्च दुर्लभा । सत्येन जायते पुंसां तस्मात्सत्यं न संत्यजेत् ॥ ५४
सत्यं ब्रह्म परं लोके सत्यं यज्ञेषु चोत्तमम् । सत्यं स्वर्गसमायातं तस्मात्सत्यं न संत्यजेत्॥ ५५

व्यास उवाच—

इत्युक्त्वा सोऽथ मातङ्गस्तं प्रक्षिप्य नरोत्तमम् । जगाम तत्र यत्राऽऽस्ते प्राणिहा ब्रह्मराक्षसः ५६
तमागतं समीक्ष्यासौ चाण्डालं ब्रह्मराक्षसः । विस्मयोत्फुल्लनयनः शिरःकम्पं तमब्रवीत् ॥ ५७

ब्रह्मराक्षस उवाच—

साधु साधु महाभाग सत्यवाक्यानुपालक । न मातङ्गमहं मन्ये भवन्तं सत्यलक्षणम् ॥ ५८
कर्मणाऽनेन[10] मन्ये त्वां ब्राह्मणं शुचिमव्ययम्[11] । यत्किंचित्त्वां भद्रमुखं प्रवक्ष्ये धर्मसंश्रयम् ॥
किं तत्र भवता रात्रौ कृतं विष्णुगृहे वद ॥ ५९

व्यास उवाच—

तमभ्युवाच मातङ्गः शृणु विष्णुगृहे मया । यत्कृतं रजनीभागे यथातथ्यं वदामि ते ॥ ६०
विष्णोर्देवकुलस्याधः स्थितेनाऽऽनम्रमूर्तिना । प्रजागरः कृतो रात्रौ गायता विष्णुगीतिकाम् ६१
तं ब्रह्मराक्षसः प्राह कियन्तं कालमुच्यताम् । प्रजागरो विष्णुगृहे कृतं(तो) भक्तिमता वद ॥ ६२

---

* एतत्पद्यस्थाने क. पुस्तके—'धर्ममर्थं तथा सौख्यं मोक्षं प्राप्नोति वै नरः । जीवन्कीर्तिमवाप्नोति विपरीतमतोऽन्यथा' इति पद्यम् ।

---

१ क. °सः । तत्र यान्तं तु पथिकः प्रा° । २ क. यास्यासि । ३ क. ख. °नं तु यत् । म° । ४ क. ख. °चासौ किं° । ५ क. ख. °दुदाहृत° । ६ ख. सुखदे च धर्मे । प्रा° । ग. सुहृदां च धर्मे । प्रा° । ७ ग. °र्वजनोप° । ८ ग. °शे कृतकं भवेत् । ए° । ९ ख. °समस्तात त° । १० क. °नेन पुण्येन । ११ क. °चिम् ।

तमभ्युवाच प्रहसन्विंशत्यब्दानि राक्षस । एकादश्यां मासि मासि कृतस्तत्र प्रजागरः ॥
मातङ्गवचनं श्रुत्वा प्रोवाच ब्रह्मराक्षसः ॥ ६३

ब्रह्मराक्षस उवाच—

यदद्य त्वां प्रवक्ष्यामि तद्भवान्वक्तुमर्हति । एकरात्रिकृतं साधो मम देहि प्रजागरम् ॥ ६४
एवं त्वां मोक्षयिष्यामि मोक्षयिष्यामि नान्यथा । त्रिः सत्येन महाभाग इत्युक्त्वा विरराम ह ६५

व्यास उवाच—

मातङ्गस्तमुवाचाथ मयाऽऽत्मा ते निशाचर । निवेदितः किमुक्तेन खादस्व स्वेच्छयाऽपि माम् ॥
तमाह राक्षसो भूयो यामद्वयप्रजागरम् । सगीतं मे प्रयच्छस्व कृपां कर्तुं त्वमर्हसि ॥ ६७
मातङ्गो राक्षसं प्राह किमसंबद्धमुच्यते । खादस्व स्वेच्छया मां त्वं न प्रदास्ये प्रजागरम् ॥
मातङ्गवचनं श्रुत्वा प्राह तं ब्रह्मराक्षसः ॥ ६८

ब्रह्मराक्षस उवाच—

को हि दुष्टमतिर्मन्दो भवन्तं द्रष्टुमुत्सहेत् । धर्षयितुं पीडयितुं रक्षितं धर्मकर्मणा ॥ ६९
दीनस्य पापग्रस्तस्य विषयैर्मोहितस्य च । नरकार्तस्य मूढस्य साधवः स्युर्दयान्विताः ॥ ७०
तन्मम त्वं महाभाग कृपां कृत्वा प्रजागरम् । यामस्यैकस्य मे देहि गच्छ वा निलयं स्वकम् ॥

व्यास उवाच—

तं पुनः प्राह चाण्डालो न यास्यामि निजं गृहम् । न चापि तव दास्यामि कथं चिद्यामजागरम्
तं प्रहस्याथ चाण्डालं प्रोवाच ब्रह्मराक्षसः ॥ ७२

ब्रह्मराक्षस उवाच—

रात्र्यवसाने या गीता गीतिका कौतुकाश्रया । तस्याः फलं प्रयच्छस्व त्राहि पापात्समुद्धर ७३

व्यास उवाच—

एवमुच्चारिते तेन मातङ्गस्तमुवाच ह ॥ ७४

मातङ्ग उवाच—

किं पूर्वं भवता कर्म विकृतं कृतमञ्जसा । येन त्वं दोषजातेन [1]संभूतो [2]ब्रह्मराक्षसः ॥ ७५

व्यास उवाच—

तस्य तद्वाक्यमाकर्ण्य मातङ्गं ब्रह्मराक्षसः । प्रोवाच दुःखसंतप्तः संस्मृत्य स्वकृतं कृतम् ॥ ७६

ब्रह्मराक्षस उवाच—

[3]श्रूयतां योऽहमासं वै पूर्वं यच्च मया कृतम् । यस्मिन्कृते पापयोनिं गतवानस्मि राक्षसीम् ॥ ७७
सोमशर्म इति ख्यातः पूर्वमासमहं द्विजः । पुत्रोऽध्ययनशीलस्य देवशर्मस्य यज्व[4]नः ॥ ७८
कस्यचिद्यजमानस्य[5] सूत्रमन्त्रबहिष्कृतः । नृपस्य [6]कर्मसक्तेन[7] यूप[8]कर्मसुनिष्ठितः ॥ ७९
आग्नीध्रं चाकरोद्यज्ञे लोभमोहप्रपीडितः । तस्मिन्परिसमाप्ते तु मौर्ख्याद्दम्भमनुष्ठितः ॥ ८०
यष्टुमारब्धवानस्मि द्वादशाहं महाक्रतुम् । प्रवर्तमाने [9]तस्मिंस्तु कुक्षिशूलोऽभवन्मम ॥ ८१

---

१ क. प्राप्तो । २ क. राक्षसयोनिताम् । ३ क. °तां हि महाबुद्धे पू° । ४ क. °नः । किंचिच्च यज° । ग. °नः । किंचित्तो यज° । ५ क °स्य शूद्रमन्तर्बहि° । ख. °स्य शूद्रस्यान्नव° । ६ ख. कर्मशक्तेन । ग. सूर्यशाक्तस्तु । ७ ख. °न पूर्वक° । ८ क. ख. °र्मस्वनुष्ठि° । ९ ग. कर्मणि ।

[1]संपूर्णे दशरात्रे तु न समाप्ते तथा क्रतौ । विरूपाक्षस्य *दीयन्त्यामाहुत्यां राक्षसे क्षणे ॥ ८२
मृतोऽहं तेन दोषेण संभूतो ब्रह्मराक्षसः । [2]मूर्खेण मन्त्रहीनेन सूत्रस्वरविवर्जितम् ॥ ८३
अजानता यज्ञविद्यां यदिष्टं याजितं च यत् । तेन कर्मविपाकेन संभूतो ब्रह्मराक्षसः ॥ ८४
तन्मां पापमहाम्भोधौ निमग्नं त्वं समुद्धर । प्रजागरे गीतिकैकां पश्चिमां दातुमर्हसि ॥ ८५

व्यास उवाच—

तमुवाचाथ चाण्डालो यदि प्राणिवधाद्भवान् । निवृत्तिं कुरुते दद्यां ततः पश्चिमगीतिकाम्॥ ८६
बाढमित्यवदत्सोऽपि मातङ्गोऽपि ददौ तदा । गीतिकाफलमामन्त्र्यमुहूर्तार्धप्रजागरम् ॥ ८७
तस्मिन्गीतिफले दत्ते मातङ्गे ब्रह्मराक्षसः । प्रणम्य प्रययौ हृष्टस्तीर्थवर्यं पृथूदकम् ॥ ८८
तत्रानशनसंकल्पं कृत्वा प्राणाञ्जहौ द्विजाः । राक्षसत्वाद्विनिर्मुक्तो गीतिकाफलबृंहितः ॥ ८९
पृथूदकप्रभावाच्च ब्रह्मलोकं च दुर्लभम् । दश वर्षसहस्राणि निरातङ्कोऽवसत्ततः ॥ ९०
तस्यान्ते ब्राह्मणो जातो बभूव स्मृतिमान्वशी । तस्याहं चरितं भूयः कथयिष्यामि भो द्विजाः॥
मातङ्गस्य कथाशेषं शृणुध्वं गदतो मम । राक्षसे तु गते धीमान्गृहमेत्य यतात्मवान् ॥ ९२
तद्विप्रचरितं स्मृत्वा निर्विण्णः शुचिरप्यसौ । पुत्रेषु भार्यां निक्षिप्य ददौ भूम्याः प्रदक्षिणाम् ॥
कोकामुखात्समारभ्य यावद्वै स्कन्ददर्शनम् । दृष्ट्वा स्कन्दं ययौ [3]धाराचक्रे चापि प्रदक्षिणम्॥९४
ततोऽद्रिवरमागम्य विन्ध्यमुच्चशिलोच्चयम् । पापप्रमोचनं तीर्थमाससाद स तु द्विजाः ॥ ९५
[4]स्नानं पापहरं चक्रे स तु चाण्डालवंशजः । विमुक्तपापः सस्मार पूर्वजातीरनेकशः ॥ ९६
स पूर्वजन्मन्यभवद्भिक्षुः संयतवाङ्मनाः । [5]यतकायश्च मतिमान्वेदवेदाङ्गपारगः ॥ ९७
एकदा गोषु नगराद्ध्रियमाणासु तस्करैः । भिक्षाऽ[6]वधूता रजसा [7]मुक्ता तेनाथ भिक्षुणा ॥ ९८
स [8]तेनाधर्मदोषेण चाण्डालीं योनिमागतः । पापप्रमोचने स्नातः स [9]मृतो नर्मदातटे[10] ॥ ९९
मूर्खोऽभूद्ब्राह्मणवरो वाराणस्यां च भो द्विजाः । तत्रास्य वसतोऽब्दैस्तु [11]त्रिंशद्भिः सिद्धपूरुषः॥
विरूपरूपी [12]बभ्राम योगमालाबलान्वितः । तं दृष्ट्वा सोपहासार्थमभिवाद्याभ्युवाच ह ॥ १०१
कुशलं सिद्धपुरु[13]षं कुतस्त्वागम्यते [14]त्वया ॥ १०२

व्यास उवाच—

एवं संभाषितस्तेन ज्ञातोऽहमिति चिन्त्य तु । प्रत्युवाचाथ [15]वन्द्यस्त्वं स्वर्गलोकादुपागतः ॥ १०३
तं सिद्धं प्राह मूर्खोऽसौ किं त्वं वेत्सि त्रिविष्टपे । नारायणोरुप्रभवामुर्वशीमप्सरोवराम् ॥ १०४
सिद्धस्तमाह तां वेद्मि शक्रचामरधारिणीम् । स्वर्गस्याऽऽभरणं मुख्यमुर्वशीं साधुसंभवाम्॥१०५
विप्रः सिद्धमुवाचाथ ऋजुमार्[16]गविवर्जितः । तन्मित्र मत्कृते वार्तामुर्वश्या भवताऽऽदरात् ॥ १०६
कथनीया यच्च सा ते ब्रूयादाख्यास्यते भवान् । बाढमित्यब्रवीत्सिद्धः सोऽपि विप्रो मुदाऽन्वितः
बभूव सिद्धोऽपि ययौ मेरुपृष्ठं सुरालयम् । समेत्य चोर्वशीं प्राह यदुक्तोऽसौ द्विजेन तु ॥ १०८
सा प्राह तं सिद्धवरं नाहं काशिपतिं द्विजम् । जानामि सत्यमुक्तं ते न चेतसि मम स्थितम् ॥

* आर्षत्वात्परस्मैपदम् ।

१ ख. ग. अपूर्णे । २ ख मुखेन । ३ क. ग. °धारां च° । ४ ग. स्थानं । ५ क. जितकायश्च । ६ ग. °वभूता । ७ ख भुक्ता । ८ क तेन ब्रह्मदो° । ख तेन भ्रमदो° । ९ ग. मूढो । १० क. °टे । मुख्योऽभू° । ख. °टे । मुक्तोऽभू° । ११ क. ख. विंशद्भिः । १२ क. ख. बलवान्योग° । १३ क. °रुष कु° । १४ ख. ग. चिरात् । १५ ख. वन्द्यं तं स्व° । १६ ग. °र्गप्रधार्षितम् । त° ।

इत्युक्तः प्रययौ सोऽपि कालेन बहुना पुनः । वाराणसीं ययौ सिद्धो दृष्टो मूर्खेण वै पुनः ११०
दृष्टः पृष्टः किल भूयः किमाहोरुभवा तव । सिद्धोऽब्रवीन्न जानामि मामुवाचोर्वशी स्वयम् ॥
सिद्धवाक्यं ततः श्रुत्वा स्मितभिन्नौष्ठसंपुटः । पुनः प्राह कथं वेत्सीत्येवं वाच्या त्वयोर्वशी ॥
बाढमेवं करिष्यामीत्युक्त्वा सिद्धो दिवं गतः। ददर्श शक्रभवनान्निष्क्रामन्तीमथोर्वशीम् ॥११३
प्रोवाच तां सिद्धवरः सा च तं सिद्धमब्रवीत् । नियमं कंचिदपि हि करोतु द्विजसत्तमः ॥११४
येनाहं कर्मणा सिद्ध तं जानामि न चान्यथा। तदुर्वशीवचोऽभ्येत्य तस्मै मूर्खद्विजाय तु ॥११५
कथयामास सिद्धस्तु सोऽपीमं नियमं जगौ । तवाग्रे सिद्धपुरुष नियमोऽयं कृतो मया ॥ ११६
न भोक्ष्येऽद्यप्रभृति वै शंकटं सत्यमीरितम् । इत्युक्तः प्रययौ सिद्धः स्वर्गे दृष्ट्वोर्वशीमथ ॥ ११७
प्राहासौ शंकटं भोक्ष्ये नाद्यप्रभृति कर्हिचित् । तं सिद्धमुर्वशी प्राह ज्ञातोऽसौ सांप्रतं मया ११८
नियमग्रहणादेव मूर्खो मा(ऽय)मुपहासकः । इत्युक्त्वा प्रययौ शीघ्रं वासं नारायणात्मजा॥ ११९
सिद्धोऽपि विचचारासौ कामचारी महीतलम् । उर्वश्यपि वरारोहा गत्वा वाराणसीं पुरीम् ॥
मत्स्योदरीजले स्नानं चक्रे दिव्यवपुर्धरा । अथासावपि मूर्खस्तु नदीं मत्स्योदरीं मुने ॥ १२१
जगामाथ ददर्शासौ स्नायमानामथोर्वशीम् । तां दृष्ट्वा ववृधेऽथास्य मन्मथः क्षोभकृद्दृढम् ॥१२२
चकार मूर्खश्रेष्ठाश्च तं विवेदोर्वशी स्वयम् । तं मूर्खं सिद्धगदितं ज्ञात्वा सस्मितमाह तम् ॥ १२३

उर्वश्युवाच—

किमिच्छसि महाभाग मत्तः शीघ्रमिहोच्यताम् । करिष्यामि वचस्तुभ्यं त्वं विश्रब्धं करिष्यसि

मूर्खब्राह्मण उवाच—

आत्मप्रदानेन मम प्राणान्रक्ष शुचिस्मिते ॥ १२५

व्यास उवाच—

तं प्राहाथोर्वशी विप्रं नियमस्थाऽस्मि सांप्रतम् । त्वं तिष्ठस्व क्षणमथ प्रतीक्षस्वाऽऽगतं मम १२६
स्थितोऽस्मीत्यब्रवीद्विप्रः साऽपि स्वर्गं जगाम ह । मासमात्रेण साऽऽयाता ददर्श तं कृशं द्विजम्
स्थितं मासं नदीतीरे निराहारं सुराङ्गना । तं दृष्ट्वा निश्चययुतं भूत्वा वृद्धवपुस्ततः ॥ १२८
सा चकार नदीतीरे शकटं शर्कराद्वृतम् । घृतेन मधुना चैव नदीं मत्स्योदरीं गता ॥ १२९
स्नात्वाऽथ भूमौ वसन्ती शकटं च यथार्थतः । तं ब्राह्मणं समाहूय वाक्यमाह सुलोचना॥१३०

उर्वश्युवाच—

मया तीव्रं व्रतं विप्र चीर्णं सौभाग्यकारणात् । व्रतान्ते निष्कृतिं दद्यां प्रतिगृह्णीष्व भो द्विज ॥

व्यास उवाच—

स प्राह किमिदं लोके दीयते शर्करावृतम् । क्षुत्क्षामकण्ठः पृच्छामि साधु भद्रे समीरय ॥ १३२
सा प्राह शकटो विप्र शर्करापिष्टसंयुतः । इमं त्वं समुपादाय प्राणं तर्पय मा चिरम् ॥ १३३
स तच्छ्रुत्वाऽथ संस्मृत्य क्षुधया पीडितोऽपि सन्। प्राह भद्रे न गृह्णामि नियमो हि कृतो मया
पुरतः सिद्धवर्गस्य न भोक्ष्ये शकटं त्विति । परिज्ञानार्थमुर्वश्या दत्स्वान्यस्य कस्यचित्॥१३५
साऽब्रवीन्नियमो भद्र कृतः काष्ठमये त्वया । नासौ काष्ठमयो भुङ्क्ष्व क्षुधया चातिपीडितः ॥

१ ख. 'नाद्विनिष्कान्ताम' । २ ख. संकटं । ३ ख. संकटं । ४ ख. मूर्खः साधुप्रहारकः । ५ क. शुभम् । ६ ग. 'तः । व्रतान्ते पिष्टककृतं श' । ७ क. 'राद्युत' । ८ क. ख. प्रहीष्ये ।

तां ब्राह्मणः प्रत्युवाच न मया तद्विशेषणम् । कृतं भद्रेऽथ नियमः सामान्येनैव मे कृतः ॥१३७
तं भूयः प्राह सा तन्वी न चेद्भोक्ष्यसि ब्राह्मण । गृहं गृहीत्वा गच्छस्व कुटुम्बं तत्र भोक्ष्यति॥
स तामुवाच सुदति न तावद्यामि मन्दिरम् । इहाऽऽयाता वरारोहा त्रैलोक्येऽप्यधिका गुणैः ॥
सा मया मदनार्तेन प्रार्थिताऽऽश्वासितस्तया । स्थीयतां क्षणमित्येवं स्थास्यामीति मयोदितम्॥
मासमात्रं गतायास्तु तस्या भद्रे स्थितस्य च । मम सत्यानुरक्तस्य संगमाय धृतव्रते ॥ १४१
तस्य सा वचनं श्रुत्वा कृत्वा स्वं रूपमुत्तमम् । विहस्य भावगम्भीरमुर्वशी प्राह तं द्विजम् ॥

उर्वश्युवाच—

साधु सत्यं त्वया विप्र व्रतं निष्ठितचेतसा । निष्पादितं हठादेव मम दर्शनमिच्छता ॥ १४३
अहमेवोर्वशी विप्र त्वां जिज्ञासार्थमागता । परीक्षितो निश्चितवान्भवान्सत्यतपा ऋषिः ॥१४४
गच्छ शूकरवोद्देशं रूपतीर्थेति विश्रुतम् । सिद्धिं यास्यसि विप्रेन्द्र ततस्त्वं मामवाप्स्यसि॥१४५

व्यास उवाच—

इत्युक्त्वा दिवमुत्पत्य सा जगामोर्वशी द्विजाः । स च सत्यतपा विप्रो रूपतीर्थं जगाम ह १४६
तत्र शान्तिपरो भूत्वा नियमव्रतधृक्शुचिः । देहोत्सर्गे जगामासौ गान्धर्वं लोकमुत्तमम् ॥ १४७
तत्र मन्वन्तरशतं भोगान्भुक्त्वा यथार्थतः । बभूव सुकुले राजा प्रजारञ्जनतत्परः ॥ १४८
स यज्वा विविधैर्यज्ञैः समाप्तवरदक्षिणैः । पुत्रेषु राज्यं निक्षिप्य ययौ शौकरवं पुनः ॥ १४९
रूपतीर्थे मृतो भूयः शक्रलोकमुपागतः । तत्र मन्वन्तरशतं भोगान्भुक्त्वा ततश्च्युतः ॥ १५०
प्रतिष्ठाने पुरवरे बुधपुत्रः पुरूरवाः । बभूव तत्र चोर्वश्याः संगमाय तपोधनाः ॥ १५१

एवं पुरा सत्यतपा द्विजातिस्तीर्थे प्रसिद्धे स हि रूपसंज्ञे ।
आराध्य जन्मन्यथ चार्च्य विष्णुमवाप्य भोगानथ मुक्तिमेति ॥ १५२

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे प्रजागरे गीतिकायाः प्रशंसानिरूपणं नाम सप्तविंशत्यधिकद्विशततमोऽध्यायः ॥ २२७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२५९९

अथाष्टाविंशत्यधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

श्रुतं फलं गीतिकाया अस्माभिः सुप्रजागरे । कृष्णस्य येन चाण्डालो गतोऽसौ परमां गतिम् १
यथा विष्णौ भवेद्भक्तिस्तन्नो ब्रूहि महामते । तपसा कर्मणा येन श्रोतुमिच्छाम सांप्रतम् ॥ २

व्यास उवाच—

शृणुध्वं मुनिशार्दूलाः प्रवक्ष्याम्यनुपूर्वशः । यथा कृष्णे भवेद्भक्तिः पुरुषस्य महाफला ॥ ३
संसारेऽस्मिन्महाघोरे सर्वभूतभयावहे । महामोहकरे नृणां नानादुःखशताकुले ॥ ४
तिर्यग्योनिसहस्रेषु जायमानः पुनः पुनः । कथंचिल्लभते जन्म देही मानुष्यकं द्विजाः ॥ ५

---

१ क. °प्र जि° । ख. °प्र त्वजिज्ञा° । २ क. °र्थमुपाग° । ३ क. °च्छ त्वं शू° । ४ क. °करोद्दे° । ५ ग. °त्र क्षान्ति° । ६ क. शूकरकं । ७ ख. °वर इलापु° । ८ क. °हाभयक° । ९ क. ख. °ले । निम्नयोनि° ।

मानुषत्वेऽपि विप्रत्वं विप्रत्वेऽपि विवेकिता । विवेकाद्धर्मबुद्धिस्तु बुद्ध्या तु श्रेयसां ग्रहः ॥ ६
*यावत्पापक्षयं पुंसां न भवेज्जन्म संचितम् । तावन्न जायते भक्तिर्वासुदेवे जगन्मये ॥ ७
तस्माद्वक्ष्यामि भो विप्रा भक्तिः कृष्णे यथा भवेत् । अन्यदेवेषु या भक्तिः पुरुषस्येह जायते ८
कर्मणा मनसा वाचा तद्गतेनान्तरात्मना । तेन तस्य भवेद्भक्तिर्यजने मुनिसत्तमाः ॥ ९
स करोति ततो विप्रा भक्तिं चाग्नेः समाहितः । तुष्टे हुताशने तस्य भक्तिर्भवति भास्करे ॥ १०
पूजां करोति सततमादित्यस्य ततो द्विजाः । प्रसन्ने भास्करे तस्य भक्तिर्भवति शंकरे ॥ ११
पूजां करोति विधिवत्स तु शंभोः प्रयत्नतः । तुष्टे त्रिलोचने तस्य भक्तिर्भवति केशवे ॥ १२
संपूज्य तं जगन्नाथं वासुदेवाख्यमव्ययम् । ततो भुक्तिं च मुक्तिं च स प्राप्नोति द्विजोत्तमाः १३

मुनय ऊचुः—

अवैष्णवा नरा ये तु दृश्यन्ते च महामुने । किं ते विष्णुं नार्चयन्ति ब्रूहि तत्कारणं द्विज ॥ १४

व्यास उवाच—

द्वौ भूतसर्गौ विख्यातौ लोकेऽस्मिन्मुनिसत्तमाः । आसुरश्च तथा दैवः पुरा सृष्टः स्वयंभुवा ॥ १५
दैवीं प्रकृतिमासाद्य पूजयन्ति ततोऽच्युतम् । आसुरीं योनिमापन्ना दूषयन्ति नरा हरिम् ॥ १६
मायया हतविज्ञाना विष्णोस्ते तु नराधमाः । अप्राप्य तं हरिं विप्रास्ततो यान्त्यधमां गतिम् १७
तस्य या गहरी माया दुर्विज्ञेया सुरासुरैः । महामोहकरी नृणां दुस्तरा चाकृतात्मभिः ॥ १८

मुनय ऊचुः—

इच्छामस्तां महामायां ज्ञातुं विष्णोः सुदुस्तराम् । वक्तुमर्हसि धर्मज्ञ परं कौतूहलं हि नः ॥ १९

व्यास उवाच—

स्वप्नेन्द्रजालसंकाशा माया सा लोककर्षणी । कः शक्नोति हरेर्मायां ज्ञातुं तां केशवादृते ॥ २०
या वृत्ता ब्राह्मणैर्स्योऽऽसीन्मायार्थे नारदस्य च । विडम्बनां तु तां विप्राः शृणुध्वं गदतो मम
प्रागासीन्नृपतिः श्रीमानाग्नीध्र इति विश्रुतः । नगरे कामदमनस्तस्याथ तनयः शुचिः ॥ २२
धर्मारामः क्षमाशीलः पितृशुश्रूषणे रतः । प्रजानुरञ्जको दक्षः श्रुतिशास्त्रकृतश्रमः ॥ २३
पिताऽस्य त्वकरोद्यत्नं विवाहाय न चैच्छत । तं पिता प्राह किमिति नेच्छसे दारसंग्रहम् ॥ २४
सर्वमेतत्सुखार्थं हि वाञ्छन्ति मनुजाः किल । सुखमूला हि दाराश्च तस्मात्तं त्वं समाचर ॥ २५
स पितुर्वचनं श्रुत्वा तूष्णीमास्ते च गौरवात् । मुहुर्मुहुस्तं च पिता चोदयामास भो द्विजाः ॥ २६
अथासौ पितरं प्राह तात नामानुरूपता । मया समाश्रिता व्यक्ता वैष्णवी परिपालिनी ॥ २७
तं पिता प्राह संगम्य नैष धर्मोऽस्ति पुत्रक । न विधारायितव्या स्यात्पुरुषेण विपश्चिता ॥ २८
कुरु मद्वचनं पुत्र प्रभुरस्मि पिता तव । मा निमज्ज कुलं मह्यं नरके संततिक्षयात् ॥ २९
स हि तं पितुरादेशं श्रुत्वा प्राह सुतो वशी । भीतः संस्मृत्य पौराणीं संसारस्य विचित्रताम् ३०

पुत्र उवाच—

शृणु तात वचो मह्यं तत्त्ववाक्यं सहेतुकम् । नामानुरूपं कर्तव्यं सत्यं भवति पार्थिव ॥ ३१

---

* एतच्च बहुव्रीहिणा जन्मविशेषणं संचितमित्यपि तद्विशेषणमेव ।

---

१ ख. चाग्नौ । २ क. तस्यैवैषा महामा° । ३ क. °णश्रेष्ठा माया° । ४ ख. °स्यार्थे मया° । ५ ग. °पतः । म° । ६ ग. व्यक्तं त्वदाज्ञाप° । ७ ग. °ह प्रहसन्ग्राम्यं नाम च पु° । ८ ग. विचारयितव्यं । ९ क. °त । पितुरादेशनं श्रु° । १० ग. कृत्वा ।

मया जन्मसहस्राणि जरामृत्युशतानि च । प्राप्तानि दारसंयोगवियोगानि च सर्वशः ॥ ३२
तृणगुल्मलतावल्लीसरीसृपमृगद्विजाः । पशुस्त्रीपुरुषाद्यानि प्राप्तानि शतशो मया ॥ ३३
गणकिंनरगन्धर्वविद्याधरमहोरगाः । यक्षगुह्यकरक्षांसि दानवाप्सरसः सुराः ॥ ३४
नदीश्वरसहस्रं च प्राप्तं तात पुनः पुनः । सृष्टस्तु बहुशः सृष्टौ संहारे चापि संहृतः ॥ ३५
दारसंयोगयुक्तस्य तातेदृक्षे विडम्बना । इतस्तृतीये यद्वृत्तं मम जन्मनि तच्छृणु ॥
कथयामि समासेन तीर्थमाहात्म्यसंभवम् ॥ ३६

अतीत्य जन्मानि बहूनि तात नृदेवगन्धर्वमहोरगाणाम् ।
विद्याधराणां खगकिंनराणां जातो हि वंशे सुतपा महर्षिः ॥ ३७
ततो महाभूदचला हि भक्तिर्जनार्दने लोकपतौ मधुघ्ने ।
व्रतोपवासैर्विविधैश्च भक्त्या संतोषितश्चक्रगदास्त्रधारी ॥ ३८
तुष्टोऽभ्यगात्पक्षिपतिं महात्मा विष्णुः समारुह्य वरप्रदो मे ।
प्राहोच्चशब्दं व्रियतां द्विजाते वरो हि यं वाञ्छसि तं प्रदास्ये ॥ ३९
ततोऽहमूचे हरिमीशितारं तुष्टोऽसि चेत्केशव तद्वृणोमि ।
*या सा त्वदीया परमा हि माया तां वेत्तुमिच्छामि जनार्दनोऽहम् ॥ ४०
अथाब्रवीन्मे मधुकैटभारिः किं ते तया ब्रह्मन्मायया वै ।
धर्मार्थकामानि ददानि तुभ्यं पुत्राणि मुख्यानि निरामयत्वम् ॥ ४१
ततो मुरारिं पुनरुक्तवानहं भूयोऽर्थधर्मार्थजिगीषितैव यत् ।
माया तवेमामिह वेत्तुमिच्छे ममाद्य तां दर्शय पुष्कराक्ष ॥ ४२
ततोऽभ्युवाचाथ नृसिंहमुख्यः श्रीशः प्रभुर्विष्णुरिदं वचो मे ॥

विष्णुरुवाच—

मायां मदीयां न हि वेत्ति कश्चिन्न चापि वा वेत्स्यति कश्चिदेव । ४३
पूर्वं सुरर्षिर्द्विज नारदाख्यो ब्रह्मात्मजोऽभून्मम भक्तियुक्तः ।
तेनापि पूर्वं भवता यथैव संतोषितो भक्तिमता हि तद्वत् ॥ ४४
वरं च दत्तं(दातुं) गतवानहं च स चापि वव्रे वरमेतदेव ।
निवारितो मामतिमूढभावाद्भवान्यथैवं वृतवान्वरं च ॥ ४५
ततो मयोक्तोऽम्भसि नारद त्वं मायां हि मे वेत्स्यसि संनिमग्नः ।
ततो निमग्नोऽम्भसि नारदोऽसौ कन्या बभौ काशिपतेः सुशीला ॥ ४६
तां यौवनाढ्यामथ चारुधर्मिणे विदर्भराज्ञस्तनयाय वै ददौ ।
स्व(सु)धर्मणे सोऽपि तया समेतः सिषेव कामानतुलान्महर्षिः ॥ ४७
स्वर्गे गतेऽसौ पितरि प्रतापवान्राज्यं क्रमायातमवाप्य हृष्टः ।
विदर्भराष्ट्रं परिपालयानः पुत्रैः सपौत्रैर्बहुभिर्वृतोऽभूत् ॥ ४८
अथाभवद्भूमिपतेः सुधर्मणः काशीश्वरेणाथ समं सुयुद्धम् ।
तत्र क्षयं प्राप्य(प) सपुत्रपौत्रं विदर्भराट्काशिपतिश्च युद्धे ॥ ४९

---

* इतः प्रभृति—'चाण्डालवेश्मन्यभवद्द्विजः सः' इत्यन्तो ग्रन्थो नास्ति क. ख. पुस्तकयोः ।

ततः सुशीला पितरं सपुत्रं ज्ञात्वा पतिं चापि सपुत्रपौत्रम् ।
पुराद्विनिःसृत्य रणावनिं गता दृष्ट्वा सुशीला कदनं महान्तम् ॥ ५०
भर्तुर्बले तत्र पितुर्बले च दुःखान्विता सा सुचिरं विलप्य ।
जगाम सा मातरमार्तरूपा भ्रातॄन्सुतान्भ्रातृन्सुतान्सपौत्रान् ॥ ५१
भर्तारमेषा पितरं च गृह्य महाश्मशाने च महाचितिं सा ।
कृत्वा हुताशं प्रददौ स्वयं च यदा समिद्धो हुतभुग्बभूव ॥ ५२
तदा सुशीला प्रविवेश वेगाद्धा पुत्र हा पुत्र इति ब्रुवाणा ।
तदा पुनः सा मुनिर्नारदोऽभूत्स चापि वह्निः स्फटिकामलाभः ॥ ५३
पूर्णं सरोऽभूदथ चोत्ततार तस्याग्रतो देववरस्तु केशवः ।
......................प्रहस्य देवर्षिमुवाच नारदम् ॥ ५४
कस्ते तु पुत्रो वद मे महर्षे मृतं च कं शोचसि नष्टबुद्धिः ।
व्रीडान्वितोऽभूदथ नारदोऽसौ ततोऽहमेनं पुनरेव चाऽऽह ॥ ५५
इतीदृशा नारद कष्टरूपा माया मदीया कमलासनाद्यैः ।
शक्या न वेत्तुं समहेन्द्ररुद्रैः कथं भवान्वेत्स्यति दुर्विभाव्याम् ॥ ५६
स वाक्यमाकर्ण्य महामहर्षिरुवाच भक्तिं मम देहि विष्णो ।
प्राप्तेऽथ काले स्मरणं तथैव सदा च संदर्शनमीश तेऽस्तु ॥ ५७
यत्राहमार्तश्चितिमद्य रूढस्तत्तीर्थमस्त्वच्युतपापहर्त्रा ।
अधिष्ठितं केशव नित्यमेव त्वया सहाऽऽसं(हेदं) कमलोद्भवेन ॥ ५८
ततो मयोक्तो द्विज नारदोऽसौ तीर्थं सितोदे(दं) हि चितिस्तवास्तु ।
स्थास्याम्यहं चात्र सदैव विष्णुर्महेश्वरः स्थास्यति चोत्तरेण ॥ ५९
यदा विरञ्चेर्वदनं त्रिनेत्रः स च्छेत्स्यतेयं च ममु(त्वथ चो)ग्रवाचम् ।
तदा कपालस्य तु मोचनाय समेष्यते तीर्थमिदं त्वदीयम् ॥ ६०
स्नातस्य तीर्थे त्रिपुरान्तकस्य पतिष्यते भूमितले कपालम् ।
ततस्तु तीर्थेति कपालमोचनं ख्यातं पृथिव्यां च भविष्यते तत् ॥ ६१
तदा प्रभृत्यम्बुदवाहनोऽसौ न मोक्ष्यते तीर्थवरं सुपुण्यम् ।
न चैव तस्मिन्द्विज संप्रचक्षते तत्क्षेत्रमुग्रं त्वथ ब्रह्मवध्या ॥ ६२
यदा न मोक्षत्यमरारिहन्ता तत्क्षेत्रमुख्यं महदाप्तपुण्यम् ।
तदा विमुक्तेति सुरै रहस्यं तीर्थं स्तुतं पुण्यदमव्ययाख्यम् ॥ ६३
कृत्वा तु पापानि नरो महान्ति तस्मिन्प्रविष्टः शुचिरप्रमादी ।
यदा तु मां चिन्तयते स शुद्धः प्रयाति मोक्षं भगवत्प्रसादात् ॥ ६४
भूत्वा तस्मिन्रुद्रपिशाचसंज्ञो योन्यन्तरे दुःखमुपाश्नुतेऽसौ ।
विमुक्तपापो बहुवर्षपूगैरुत्पत्तिमायास्यति विप्रगेहे ॥ ६५
शुचिर्यतात्माऽस्य ततोऽन्तकाले रुद्रो हितं तारकमस्य कीर्तयेत् ।
इत्येवमुक्त्वा द्विजवर्य नारदं गतोऽस्मि दुग्धार्णवमात्मगेहम् ॥ ६६

स चापि विप्रस्त्रिदिवं चचार गन्धर्वराजेन समर्च्यमानः।
एतत्तवोक्तं ननु बोधनाय माया मदीया नहि शक्यते सा॥ ६७
ज्ञातुं भवानिच्छति चेत्ततोऽद्य एवं विशस्वाप्सु च वेत्सि येन।
एवं द्विजातिर्हरिणा प्रबोधितो भाव्यर्थयोगान्निममज्ज तोये॥ ६८
कोकामुखे तात ततो हि कन्या चाण्डालवेश्मन्यभवद्द्विजः सः।
रूपान्विता शीलगुणोपपन्ना अवाप सा यौवनमाससाद॥ ६९
चाण्डालपुत्रेण सुबाहुनाऽपि विवाहिता रूपविवर्जितेन।
पतिर्न तस्या हि मतो बभूव सा तस्य चैवाभिमता बभूव॥ ७०
पुत्रद्वयं नेत्रहीनं बभूव कन्या च पश्चाद्बधिरा तथाऽन्या।
पतिर्दरिद्रस्त्वथ साऽपि मुग्धा नदीगता रोदिति तत्र नित्यम्॥ ७१
गता कदाचित्कलशं गृहीत्वा साऽन्तर्जलं स्नातुमथ प्रविष्टा।
यावद्द्विजोऽसौ पुनरेव तावज्जातः क्रियायोगरतः सुशीलः॥ ७२
तस्याः स भर्ताऽथ चिरंगतेति द्रष्टुं जगामाथ नदीं सुपुण्याम्।
ददर्श कुम्भं न च तां तटस्थां ततोऽतिदुःखात्प्ररुरोद नादयन्॥ ७३
ततोऽन्धयुग्मं बधिरा च कन्या दुःखान्विताऽसौ समुपाजगाम।
ते वै रुदन्तं पितरं च दृष्ट्वा दुःखान्विता वै रुरुदुर्भृशार्ताः॥ ७४
ततः स पप्रच्छ नदीतटस्थान्द्विजान्भवद्भिर्यदि योषिदेका।
दृष्टा तु तोयार्थमुपाद्रवन्ती आख्यात ते प्रोचुरिमां प्रविष्टा॥ ७५
नदीं न भूयस्तु समुत्ततार एतावदेवेह समीहितं नः।
स तद्वचो घोरतरं निशम्य रुरोद शोकाश्रुपरिप्लुताक्षः॥ ७६
तं वै रुदन्तं ससुतं सकन्यं दृष्ट्वाऽहमार्तः सुतरां बभूव।
आर्तिश्च मेऽभूदथ संस्मृतिश्च चाण्डालयोषाऽहमिति क्षितीश॥ ७७
ततोऽब्रवं तं नृपते मतङ्गं किमर्थमार्तेन हि रुद्यते त्वया।
तस्या न लाभो भविताऽतिमौर्ख्यादाक्रन्दितेनेह वृथा हि किं ते॥ ७८
स मामुवाचाऽऽत्मजयुग्ममन्धं कन्या चैका बधिरेयं तथैव।
कथं द्विजाते अधुनाऽऽर्तमेतमाश्वासयिष्येऽप्यथ पोषयिष्ये॥ ७९
इत्येवमुक्त्वा स सुतैश्च सार्धं फूत्कृत्य फूत्कृत्य च रोदिति स्म।
यथा यथा रोदिति स श्वपाकस्तथा तथा मे ह्यभवत्कृताऽपि॥ ८०
ततोऽहमार्तं तु निवार्य तं वै स्ववंशवृत्तान्तमथाऽऽचचक्षे।
ततः स दुःखात्सह पुत्रकैः संविवेश कोकामुखमार्तरूपः॥ ८१
प्रविष्टमात्रे सलिले मतङ्गस्तीर्थप्रभावाच्च विमुक्तपापः।
विमानमारुह्य शशिप्रकाशं ययौ दिवं तात ममोपपश्यतः॥ ८२
तस्मिन्प्रविष्टे सलिले मृते च ममार्तिरासीदतिमोहकर्त्री।
ततोऽतिपुण्ये नृपवर्य कोकाजले प्रविष्टस्त्रिदिवं गतश्च॥ ८३

१ ग. °गतो रो° । २ ग. °था मूर्तिरन्या बभूव । त° । ३ ग. °मात्मरू° ।

भूयो[2]ऽभवं वैश्यकुले व्यथार्तो [1]जातिस्मरस्[3]तीर्थवरप्रसादात् ।
ततोऽतिनिर्विण्णमना गतोऽहं कोकामुखं संयतवाक्यचित्तः ॥ ८४
व्रतं समास्थाय कलेवरं स्वं संशोषयित्वा दिवमारुरोह ।
तस्माच्च्युतस्त्वद्भवने च जातो जातिस्मरस्तात हरिप्रसादात् ॥ ८५
सोऽहं समाराध्य मु[4]रारिदेवं कोकामुखे त्यक्तशुभाशुभेच्छः ।
इत्येवमुक्त्वा पितरं प्रणम्य गत्वा च कोकामुख[5]मग्रतीर्थम् ॥
विष्णुं समाराध्य वराहरूपमवाप सिद्धिं मनुजर्षभोऽसौ ॥ ८६
इत्थं स कामदमनः [6]सहपुत्रपौत्रः कोकामुखे तीर्थवरे सुपुण्ये ।
त्यक्त्वा तनुं दोषमयीं ततस्तु गतो दिवं सूर्यसमैर्विमानैः ॥ ८७
एवं मयोक्ता परमेश्वरस्य माया सुराणामपि दुर्विचिन्त्या ।
स्वप्नेन्द्रजालप्रतिमा मुरारेर्यया जगन्मोहमुपैति विप्राः ॥ ८८

इति श्रीमहापुराणे आदिब्राह्मे विष्णुधर्मानुकीर्तने मायाप्रादुर्भावनिरूपणं नामाष्टाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२६८७

अथैकोनत्रिंशदधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

अस्माभिस्तु श्रुतं व्यास यत्त्वया समुदाहृतम् । प्रादुर्भावाश्रितं पुण्यं माया विष्णोश्च [7]दुर्विदा ॥१
श्रोतुमिच्छामहे त्वत्तो यथावदुपसंहृतिम् । महाप्रलयसंज्ञां च कल्पान्ते च महामुने ॥ २

व्यास उवाच—

श्रूयतां भो मुनिश्रेष्ठा यथावदनुसंहृतिः । कल्पान्ते प्राकृते चैव प्रलये जायते यथा ॥ ३
अहोरात्रं पितॄणां तु मासोऽब्दं त्रिदिवौकसाम् । चतुर्युगसहस्रे तु ब्रह्मणोऽहर्द्विजोत्तमाः ॥ ४
कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् । दैवैर्वर्षसहस्रैस्तु तद्द्वादशभिरुच्यते ॥ ५
चतुर्युगाण्यशेषाणि सदृशानि स्वरूपतः । आद्यं कृतयुगं प्रोक्तं मुनयोऽन्त्यं तथा कलिम् ॥ ६
आद्ये कृतयुगे सर्गो ब्रह्मणा क्रियते यतः । क्रियते चोपसंहारस्तथाऽन्तेऽपि कलौ युगे ॥ ७

मुनय ऊचुः—

कलेः स्वरूपं भगवन्विस्तराद्वक्तुमर्हसि । धर्मश्चतुष्पाद्भगवान्यस्मिन्वैकल्यमृच्छति ॥ ८

व्यास उवाच—

कलिस्वरूपं भो विप्रा यत्पृच्छध्वं ममानघाः । निबोधध्वं समासेन वर्तते यन्महत्तरम् ॥ ९
वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणाम् । न सामऋग्यजुर्वेदविनिष्पाद[9]नहैतुकी ॥ १०
विवाहा न कलौ धर्मा न शिष्या गुरुसंस्थिताः । [10]न पुत्रा धार्मिकाश्चैव न च वह्निक्रियाक्रमः ॥

---

१ क. जातश्च तीर्थप्रव° । २ ख. ग. °तो हि नि° । ३ क. °खं तीर्थवरं विचिन्त्य । त्र° । ४ ख. वराहदेवं । ५ क. °मप्यर्ना° । ६ क. सबलः सपुत्रः । ७ क. दुर्मदा । ८ क. °श्च यस्माद्ध° । ९ ग. °नहेतु° । १० ग. न दास्यत्यक्रमेणैव ।

यत्र तत्र कुले जातो बली सर्वेश्वरः कलौ । सर्वेभ्य एव [1]वर्णेभ्यो नरः कन्योपजीविनः ॥ १२
येन तेनैव योगेन द्विजातिर्दीक्षितः कलौ । [2]यैत्र सैत्र च विप्रेन्द्राः प्रायश्चित्तक्रिया कलौ ॥ १३
सर्वमेव कलौ शास्त्रं यस्य यद्वचनं द्विजाः । देवताश्च कलौ सर्वाः सर्वः सर्वस्य चाऽऽश्रमः॥ १४
उपवासस्तथाऽऽयासो वित्तोत्सर्गस्तथा कलौ । धर्मो यथाभिरुचितैरनुष्ठानैरनुष्ठितः ॥ १५
वित्तेन भविता पुंसां [3]स्वल्पेनैव मदः कलौ । स्त्रीणां रूपमदश्चैव केशैरेव भविष्यति ॥ १६
सुवर्णमणिरत्नादौ वस्त्रे चोपक्षयं गते[4] । कलौ स्त्रियो भविष्यन्ति तदा केशैरलंकृताः ॥ १७
परित्यक्ष्यन्ति भर्तारं वित्तहीनं तथा स्त्रियः । भर्ता भविष्यति कलौ [5]वित्तवानेव योषिताम्॥ १८
यो यो ददाति बहुलं स स स्वामी [6]तदा नृणाम् । स्वामित्वहेतुसंबन्धो भविताऽभिजनस्तदा १९
गृहान्ता द्रव्यसंघाता द्रव्यान्ता च तथा मतिः । अर्थाश्चार्थोपभोगान्ता भविष्यन्ति तदा कलौ॥
स्त्रियः कलौ भविष्यन्ति स्वैरिण्यो ललितस्पृहाः । अन्यायावाप्तवित्तेषु पुरुषेषु स्पृहालवः ॥ २१
अभ्यर्थितोऽपि सुहृदा स्वार्थहानिं तु मानवः । पणस्यार्धार्धमात्रेऽपि करिष्यति तदा द्विजाः ॥
सदा सपौरुषं चेतो भावि विप्र तदा कलौ । क्षीरप्रदानसंबन्धि भाति गोषु च गौरवम् ॥ २३
अनावृष्टिभयात्प्रायः प्रजाः क्षुद्भयकातराः । भविष्यन्ति तदा सर्वा गगनासक्तदृष्टयः ॥ २४
मूलपर्णफलाहारास्तापसा इव मानवाः । आत्मानं[11] घातयिष्यन्ति[12] तदाऽवृष्ट्याऽभिदुःखिताः ॥ २५
दुर्भिक्षमेव सततं [13]सदा क्लेशमनीश्वराः । प्राप्स्यन्ति व्याहतसुखं[15] [14]प्रमादान्मानवाः कलौ ॥ २६
अस्नातभोजिनो नाग्निदेवतातिथिपूजनम् । करिष्यन्ति कलौ प्राप्ते न च पिण्डोदकक्रियाम्॥ २७
लोलुपा ह्रस्वदेहाश्च बह्वन्नादनतत्पराः । बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः ॥ २८
उभाभ्यामथ पाणिभ्यां शिरःकण्डूयनं स्त्रियः । कुर्वत्यो गुरुभर्तॄणामाज्ञां भेत्स्यन्त्यनावृताः २९
स्वपोषणपराः क्रुद्धा देहसंस्कारवर्जिताः । परुषानृतभाषिण्यो भविष्यन्ति कलौ स्त्रियः ॥ ३०
दुःशीला दुष्टशीलेषु कुर्वत्यः सततं स्पृहाम् । असद्वृत्ता भविष्यन्ति पुरुषेषु कुलाङ्गनाः ॥ ३१
वेदादानं करिष्यन्ति वडवाश्च तथाऽव्रताः । गृहस्थाश्च न होष्यन्ति न दास्यन्त्युचितान्यपि[16] ॥
भवेयुर्वनवासा वै ग्राम्याहारपरिग्रहाः । भिक्षवश्चापि [17]पुत्रा[18]दि स्नेहसंबन्धै[19]र्यन्त्रकाः ॥ ३३
अरक्षितारो हर्तारः शुल्कव्याजेन पार्थिवाः । हारिणो जनवित्तानां संप्राप्ते च कलौ युगे ॥ ३४
यो योऽश्वरथनागाढ्यः स स राजा भविष्यति । यश्च यश्चाबलः सर्वः स स भृत्यः कलौ युगे॥
वैश्याः कृषिवणिज्यादि संत्यज्य निजकर्म यत् । शूद्रवृत्त्या [20]भविष्यन्ति कारुकर्मोपजीविनः॥ ३६
भैक्ष्यव्रतास्तथा शूद्राः प्रव्रज्यालिङ्गिनोऽधमाः । पाखण्डसंश्रयां वृत्तिमाश्रयिष्यन्त्यसंस्कृताः ३७
दुर्भिक्षकरपीडाभिरतीवोपद्रुता जनाः । गोधूमान्नयवान्नाढ्यान्देशान्यास्यन्ति दुःखिताः ॥ ३८
वेदमार्गे प्रलीने च [21]पाखण्डाढ्ये ततो जने । अधर्मवृद्ध्या लोकानामल्पमायुर्भविष्यति ॥ ३९
*अशास्त्रविहितं घोरं तप्यमानेषु वै तपः । नरेषु नृपदोषेण बालमृत्युर्भविष्यति ॥ ४०

---

* अयं श्लोकः क. पुस्तके नास्ति ।

---

१ ख. °भ्यो ज्येष्ठः न्याधगोधनी । ये° । २ क. °था यज्ञो वि° । ३ क. ग. °ल्पेनाऽऽढ्यम° । ४ क. °ते । काश्चित्स्त्रियो । ५ क. चिन्तितश्चैव । ६ क. सदा । ७ ख. °जाः । न सदा पौ° । ८ ग. भावि । ९ क. °भयाः प्रायः । १० क. ख. °लकन्दफ° । ११ क. ख. °नं पात° । १२ क. °न्ति अभक्षाश्चापि दुः° । १३ क. तदा । १४ ग. प्रमोदा मान° । १५ क. °लौ केचिन्न च प्रेतोद° । १६ ग. °पि । वनवासिनो भविष्यन्ति ग्रा° । १७ ग. मित्रा । १८ क. °त्रादिस्ने° । १९ क. °न्यपाणयः । अ° । २० ग. प्रवत्स्यन्ति । २१ क. °खण्डोद्योतिते ज° ।

भवित्री योषितां सूतिः पञ्चषट्सप्तवार्षिकी[1] । नवाष्टदशवर्षाणां मनुष्याणां तथा कलौ ॥ ४१
पलितोद्गमश्च भविता तदा द्वादशवार्षिकैः[2] । न[3] जीविष्यति वै कश्चित्कलौ वर्षाणि विंशतिम् ४२
अल्पप्रज्ञा[4] वृथालिङ्गा दुष्टान्तःकरणाः कलौ । यतस्ततो विनश्यन्ति कालेनाल्पेन मानवाः॥ ४३
यदा यदा हि पाखण्डवृत्तिरत्रोपलक्ष्यते । तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥ ४४
यदा यदा सतां हानिर्वेदमार्गानुसारिणाम् । तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥ ४५
*प्रारम्भाश्चावसीदन्ति यदा धर्मकृतां नृणाम् । तदाऽनुमेयं प्राधान्यं कलेर्विप्रा विचक्षणैः ॥४६
यदा यदा न यज्ञानामीश्वरः पुरुषोत्तमः । इज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलम् ॥ ४७
न प्रीतिर्वेदवादेषु पाखण्डेषु यदा रतिः । कलेर्वृद्धिस्तदा प्राज्ञैरनुमेया [5]द्विजोत्तमाः ॥ ४८
कलौ जगत्पतिं विष्णुं सर्वस्रष्टारमीश्वरम् । नार्चयिष्यन्ति भो विप्राः पाखण्डोपहता नराः॥४९
+किं देवैः किं द्विजैर्वेदैः किं शौचेनाम्बुजल्प(न्म)ना । इत्येवं प्रलपिष्यन्ति पाखण्डोपहता नराः
अल्पवृष्टिश्च पर्जन्यः स्वल्पं सस्यफलं तथा । फलं तथाऽल्पसारं च विप्राः प्राप्ते कलौ युगे॥५१
*जानुप्रायाणि वस्त्राणि शमीप्राया महीरुहाः । शूद्रप्रायास्तथा वर्णा भविष्यन्ति कलौ युगे ५२
अणुप्रायाणि धान्यानि[6] आजप्रायं तथा पयः । भविष्यति कलौ प्राप्त औशीरं चानुलेपनम् ५३
श्वश्रूश्वशुरभूयिष्ठा गुरवश्च नृणां कलौ[7] । शालाद्याहारिभार्याश्च सुहृदो मुनिसत्तमाः ॥ ५४
कस्य माता पिता कस्य यदा कर्मात्मकः पुमान् । इति चोदाहरिष्यन्ति[8] श्वशुरानुगता नराः ५५
वाङ्मनःकायजैर्दोषैरभिभूताः[9] पुनः पुनः । नराः पापान्यनुदिनं करिष्यन्त्यल्पमेधसः ॥ ५६
निःसंस्थानामशौचानां[10] निर्ह्रीकाणां तथा द्विजाः । यद्यद्दुःखाय तत्सर्वं कलिकाले भविष्यति ५७
निःस्वाध्यायवषट्कारे[11] स्वधास्वाहाविवर्जिते[12] । [13]तदा प्रविरलो विप्रः कश्चिल्लोके भविष्यति॥५८
तत्राल्पेनैव[14] कालेन पुण्यस्कन्धमनुत्तमम् । करोति यः कृतयुगे क्रियते[15] तपसा हि [16]यः ॥ ५९

मुनय ऊचुः—

कस्मिन्कालेऽल्पको धर्मो ददाति सुमहाफलम्[17] । वक्तुमर्हस्यशेषेण श्रोतुं वाञ्छा प्रवर्तते ॥ ६०

व्यास उवाच—

धन्ये कलौ भवेद्विप्रास्त्वल्पक्लेशैर्महत्फलम् । तथा भवेतां स्त्रीशूद्रौ धन्यौ चान्यन्निबोधत ॥ ६१
यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तत् । द्वापरे तच्च मासेन अहोरात्रेण तत्कलौ ॥ ६२
तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजाः । प्राप्नोति पुरुषस्तेन कलौ[18] साध्विति भाषितुम्[19] ॥ ६३
ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥ ६४
धर्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ । स्वल्पायासेन धर्मज्ञास्तेन तुष्टोऽस्म्यहं कलौ ॥ ६५
व्रतचर्यापरैर्ग्राह्या वेदाः पूर्वं द्विजातिभिः । ततस्तु धर्मसंप्राप्तैर्यष्टव्यं विधिवर्द्धनैः[20] ॥ ६६
वृथा कथा वृथा भोज्यं वृथा स्वं च द्विजन्मनाम् । पतनाय तथा भाव्यं तैस्तु संयतिभिः[21] सह[22] ॥

* अयं श्लोकः क. पुस्तके नास्ति । + एतत्पद्यं क. ग. पुस्तकयोर्नास्ति । * नास्त्ययं श्लोकः ख. पुस्तके ।

१ क. °षष्टाष्टवा° । २ ग. °कः । नातर्जीवति । ३ ख. न तु जीवति । ४ क. ख. °प्रजा वृ° । ५ ख. विचक्षणैः । ६ क. ख. °नि अज° । ७ ग. °लौ । शीला° । ८ क. °हरन्तीह येऽसुग° । ९ ख. ग. °कायिकैर्दो° । १० क. °सत्त्वाना° । ११ क. °ट्कारः स्व° । १२ क. °जितः । तथा चापरपरो यस्तु विष्णोर्लोके । १३ ख. तथा पापप्रवृत्तिश्च क्वचिल्लोको भ° । १४ क. ख. तदाऽल्पेन च यत्नेन । १५ क. व्रियते । १६ क. ख. सः । १७ क. ख. °महत्फल° । १८ क. ख. काल । ग. कलिः । १९ क. भाषणात् । २० ग. °वर्धनैः । २१ ख. संपविभिः । २२ क. मदा ।

असम्यकरणे दोषास्तेषां सर्वेषु वस्तुषु । भोज्यपेयादिकं चैषां नेच्छाप्राप्तिकरं द्विजाः ॥ ६८
पारतन्त्र्यात्समस्तेषु तेषां कार्येषु वै ततः । लोकान्क्लेशेन महतो[1] यजन्ति विनयान्विताः ॥ ६९
द्विजशुश्रूषणेनैव पाकयज्ञाधिकारवान् । +निजं जयति वै लोकं शूद्रो धन्यतरस्ततः ॥ ७०
भक्ष्याभक्ष्येषु नाँ[3]शा(त्रा)स्ति येषां पापेषु वा यतः । नियमो मुनिशार्दूलास्तेनासौ साध्वितीरितम्
स्वधर्मस्याविरोधेन नरैर्लभ्यं धनं सदा । प्रतिपादनीयं पात्रेषु यष्टव्यं च यथाविधि ॥ ७२
तस्यार्जने महान्क्लेशः पालनेन द्विजोत्तमाः । तँ[4]था सद्विनियोगाय विज्ञेयं गहनं नृणाम् ॥ ७३
एभिरन्यैस्तथा क्लेशैः पुरुषा द्विजसत्तमाः । निजाञ्जयन्ति वै लोकान्प्राजापत्यादिकान्क्रमात् ॥
योषिच्छुश्रूषणांद्भर्तुः कर्मणा मनसा गिरा । एतँद्विषयमाप्नोति तत्सालोक्यं यतो द्विजाः ॥ ७५
नातिक्लेशेन महता तानेव पुरुषो यथा । तृतीयं व्याहृतं तन मया साध्विति योँ[6]षितः ॥ ७६
एतद्वः कथितं विप्रा यन्निमित्तमिहाऽऽगताः । तत्पृच्छध्वं यथाकाममहं वक्ष्यामि वः स्फुटम् ७७
अल्पेनैव प्रयत्नेन धर्मः सिध्यति वै कलौ । नरैरात्मगुणाम्भोभिः क्षालिताखिलकिल्बिषैः ॥७८
शूद्रैश्च द्विजशुश्रूषातत्परैर्मुनिसत्तमाः । तथा स्त्रीभिरनायासात्पतिशुश्रूषयैव हि ॥ ७९
ततस्त्रितयमप्येतन्मम धन्यतमं मतम् । धर्मसंराधने क्लेशो द्विजातीनां कृतादिषु ॥ ८०
तथा स्वल्पेन तपसा सिद्धिं यास्यन्ति मानवाः । धन्या धर्मं चरिष्यन्ति युगान्ते मुनिसत्तमाः ॥
भवद्भिर्यदभिप्रेतं तदेतत्कथितं मया । अपृष्टेनापि धर्मज्ञाः किमन्यत्क्रियतां द्विजाः ॥ ८२

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे भविष्यकथनं नामैकोन-
त्रिंशदधिकद्विशततमोऽध्यायः ॥ २२९ ॥
आदितः श्लोकानां समष्ट्यङ्काः—१२७६९

अथ त्रिंशदधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

आसन्नं विप्रकृष्टं वा यदि कालं न विद्महे । ततो द्वापरविध्वंसं युगान्तं स्पृहयामहे ॥ १
प्राप्ता वयं हि तत्कालमनया धर्मतृष्णया । आदद्याम परं धर्मं[10] सुखमल्पेन कर्मणा ॥ २
संत्रासोद्वेगजननं युगान्तं समुपस्थितम् । प्रनष्टधर्मं धर्मज्ञ निमित्तै[11]र्वक्तुमर्हसि ॥ ३

व्यास उवाच—

अरक्षितारो हर्तारो बलिभागस्य पार्थिवाः । युगान्ते प्रभविष्यन्ति स्वरक्षणपरायणाः ॥ ४
*[12]अक्षात्रियाश्च राजानो विप्राः शूद्रोपजीविनः । शूद्राश्च ब्राह्मणाचारा भविष्यन्ति युगक्षये ॥ ५
श्रोत्रियाः काण्[13]डपृष्ठाश्च निष्कर्माणि हवींषि च । एकपङ्क्त्यामशिष्यन्ति युगान्ते मुनिसत्तमाः[14] ॥६
अशिष्टवन्तोऽर्थपरा नरा मद्यामिषप्रियाः । मित्रभार्यां[15] भजिष्यन्ति युगान्ते पुरुषाधमाः ॥ ७

+ एतदादि प्राजापत्यादिकान्क्रमादित्यन्तं ख. पुस्तके नास्ति । * एतदादि श्लोकत्रयं नास्ति क. पुस्तके ।

---

१ ग. °तः । यजन्ति ये द्विजा लो° । २ ग. °ता द्विजाः । द्वि° । ३ ग. नास्यास्ति ये पापे येषु । ४ ग. तच्चास° । ५ ग. °तद्धि समवाप्नोति भर्तृलोकं ततो । ६ ग. योषिताम् । ७ क. °म् । कर्म° । ८ क. °द्यादप° । ९ क. सर्ग । १० ग. °धर्मध° । ११ ग. °मित्तं वक्तु° । १२ ख. कृतपापाश्च । १३ ख. °ण्डस्पृहाश्च । ग. °ण्डस्पृष्टाश्च । १४ ख. °माः । सदा साधुद्रोहप° । १५ क. ख. हरिष्यन्ति ।

राजवृत्तिस्थिताश्चौरा राजानश्चौर[1]शीलिनः । भृत्या ह्यनिर्दिष्टभुजो भविष्यन्ति [2]युगक्षये ॥ ८
धनानि श्लाघनीयानि सतां वृत्तमपूजितम् । अकुत्सना च पतिते भविष्याते युगक्षये ॥ ९
प्रन[3]ष्टनासाः पुरुषा मुक्तकेशा विरूपिणः । ऊनषोडशवर्षाश्च प्रसोष्यन्ति तथा स्त्रियः ॥ १०
अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः । प्रमदाः केश[4]शूलाश्च भविष्यन्ति युगक्षये ॥ ११
सर्वे ब्रह्म वदिष्यन्ति द्विजा वाजसनेयिकाः । शूद्राभा वादिनश्चैव ब्राह्मणा[5]श्चान्त्यवासिनः॥ १२
[6]शुक्लदन्ता[7] जिताक्षाश्च मुण्डाः काषायवाससः । शूद्रा धर्मं[8] वदिष्यन्ति शाठ्यबुद्ध्योपजीविनः १३
श्वापदप्रचुरत्वं च गवां चैव परिक्षयः । साधूनां [9]परिवृत्तिश्च विद्यादन्तगते युगे ॥ १४
अन्त्या मध्ये निवत्स्यन्ति मध्याश्चान्तनिवासिनः । निर्ह्रीकाश्च प्रजाः सर्वा नष्टास्तत्र युगक्षये ॥
तपोयज्ञफलानां च विक्रेतारो द्विजोत्तमाः । ऋतवो विपरीताश्च भविष्यन्ति युगक्षये ॥ १६
तथा द्विहायना [10]दम्या[11]ः कलौ लाङ्ग[12]लधारिणः । चित्रवर्षी च पर्जन्यो युगे क्षीणे भविष्यति॥ १७
सर्वे[13] शूरकुले जाता[14]ः क्षमानाथा भवन्ति हि[15] । यथा निम्नाः प्रजाः सर्वा भविष्यन्ति युगक्षये
पितृदेयानि दत्तानि भविष्यन्ति तथा सुताः । न च धर्मं चरिष्यन्ति मानवा निर्गते युगे ॥ १९
*ऊषरा बहुला भूमिः पन्थानस्तस्कराद्दताः । सर्वे ····वाणिकाश्चैव भविष्यन्ति युगक्षये ॥ २०
पितृदायाददत्तानि [16]विभजन्ति तथा सुताः । ह[17]रणे यत्नवन्तोऽपि लोभादिभिर्विरो[18]धिनः ॥ २१
सौकुमार्ये तथा रूपे रत्ने चोपक्षयं गते । भविष्यन्ति युगस्यान्ते नार्यः केशैरलंकृताः ॥ २२
निर्वीर्यस्य रतिस्तत्र गृहस्थस्य भविष्यति । युगान्ते समनुप्राप्ते नान्या भार्यासमा रतिः ॥ २३
कुशीलानार्यभूयिष्ठा वृथारूपसमन्विताः । पुरुषाल्पं बहुस्त्रीकं तद्युगान्तस्य लक्षणम् ॥ २४
बहुयाचनको लोको न दास्यति परस्परम् । राजचौराग्निदण्डा[19]दिक्षीणः क्षयमुपैष्यति ॥ २५
अफलानि च सस्यानि तरुणा वृद्धशीलिनः । अशीलाः सुखिनो लोके भविष्यन्ति युगक्षये २६
वर्षासु परुषा वाता [20]नीचाः शर्करवर्षिणः । संदिग्धः परलोकश्च भविष्यति युगक्षये ॥ २७
वैश्या इव च राजन्या धनधान्योपजीविनः । युगापक्रमणे पूर्वं भविष्यन्ति न बान्धवाः ॥ २८
अप्रवृत्ताः [21]प्रेपश्यन्ति समयाः शपथास्तथा । ऋणं सविनयभ्रंशं युगे क्षीणे भविष्यति ॥ २९
भविष्यत्यफलो हर्षः क्रोधश्च सफलो नृणाम् । अजाश्चापि निरोत्स्यन्ति पयसोऽर्थे युगक्षये॥ ३०
अशास्त्रविहितो यज्ञ एवमेव भविष्यति । अप्रमाणं करिष्यन्ति नराः पण्डितमानिनः ॥ ३१
शास्त्रोक्तस्याप्रवक्तारो भविष्यन्ति न संशयः । सर्वः सर्वं[22] विजानाति वृद्धान[23]नुपसेव्य वै ॥ ३२
न कश्चिदकविर्नाम युगान्ते समुपस्थिते । नक्षत्राणि वियोगानि न कर्मस्था द्विजातयः ॥ ३३
चौर[24]प्रायाश्च राजानो युगान्ते समुपस्थिते । कुण्डीवृषा नैकृतिकाः सुरापा ब्रह्मवादिनः ॥ ३४
अश्वमेधेन यक्ष्यन्ते युगान्ते द्विजसत्तमाः । याजयिष्यन्त्ययाज्यांस्तु [25]तथाऽभक्ष्यस्य भक्षिणः ३५

---

* अयं श्लोकः क. ख. पुस्तकयोर्नास्ति ।

---

१ क. °रर्त्पिणः । भृ° । २ क. कलौ युगे । ३ ग. °ष्टचेतनाः पुंसो मु° । ४ क. °शूलिन्यो भ° । ५ ख. °णाश्चै-र्यवा° । ६ ख. °क्लदीक्षाञ्जितीष्याश्च । ७ क. °न्तादिनासा च मु° । ८ क. °ह्यधर्मोप° । ९ ग. विनिवृत्तिश्च । १० क. वत्साः । ११ क. ग. °म्यास्तथा ला° । १२ ग. °लकर्षकाः । चि° । १३ ख. ग. °र्वे चौर° । १४ ख. °ताः स्वल्पेनाद्या भ° । १५ क. हि । जना यथाचारयुता भ° । १६ ख. ग. भजिष्यन्ति । १७ ख. ग. °रणाय भजिष्यन्ति लो° । १८ ख. ग. °धिनाः । सौ° । १९ क. °ण्डानां तैक्ष्ण्यात्क्षय° । २० ख. नीराः । २१ ग. प्रविस्यन्ति । २२ क. °र्वं न जा° । २३ क. °नत्र प्रसे° । २४ ग. °रप्रिया° । २५ ग. तदाऽभ° ।

ब्राह्मणा[1] धनतृष्णार्ता युगान्ते समुपस्थिते । भोःशब्दमभिधास्यन्ति न च कश्चित्पाठिष्यति ॥ ३६
एकशङ्खास्तथा नार्यो गवेधुकपिनद्धकाः(?) । नक्षत्राणि विवर्णानि विपरिता दिशो दश ॥ ३७
संध्यारागो [2]विदग्धाङ्गो भविष्यति युगक्षये । प्रेषयन्ति पितॄन्पुत्रा वधूः श्वश्रूः स्वकर्मसु ॥ ३८
[3]युगेष्वेवं निवत्स्यन्ति प्रमदाश्च नरास्तथा । अ[4]कृत्वाऽग्राणि भोक्ष्यन्ति द्विजाश्चैवाहुताग्नयः ॥३९
भिक्षां बलिमदत्त्वा च भोक्ष्यन्ति पुरुषाः स्वयम् । वञ्चयित्वा पतीन्सुप्तान्गमिष्यन्ति स्त्रियोऽन्यतः
न व्याधितान्नाप्यरूपान्नोद्यतान्नाप्यसूयकान् । कृते न प्रतिकर्ता च युगे क्षीणे भविष्यति ॥ ४१

मुनय ऊचुः—

एवं विलम्बिते धर्मे मानुषाः [5]करपीडिताः । कुत्र देशे निवत्स्यन्ति किमाहारविहारिणः ॥ ४२
किंकर्माणः किमीहन्तः किंप्रमाणाः किमायुषः । कां च काष्ठां समासाद्य प्र[6]पत्स्यन्ति कृतं युगम्

व्यास उवाच—

अत ऊर्ध्वं च्युते धर्मे गुणहीनाः प्रजास्तथा । शीलव्यसनमासाद्य प्राप्स्यन्ति ह्रासमायुषः ॥ ४४
आयुर्हान्या बलग्लानिर्बलग्लान्या विवर्णता । वैवर्ण्याद्व्याधिसंपीडा निर्वेदो व्याधिपीडनात् ॥ ४५
निर्वेदादात्मसंबोधः संबोधाद्धर्मशीलता । एवं गत्वा परां काष्ठां प्रपत्स्यन्ति कृतं युगम् ॥ ४६
[7]उद्देशतो धर्मशीलाः केचिन्मध्यस्थतां गताः । [8]किंधर्मशीलाः केचित्तु के[9]चिदत्र कुतूहलाः ॥ ४७
प्रत्यक्षमनुमानं च प्रमाणमिति निश्चिताः । अप्रमा[10]णं करिष्यन्ति सर्वमित्य[11]परे जनाः ॥ ४८
नास्तिक्यपरताश्चापि केचिद्धर्मविलोपकाः । भविष्यन्ति नरा मूढा द्विजाः पण्डितमानिनः ॥४९
तदात्वमात्रश्रद्धेया शास्त्रज्ञानबहिष्कृताः । दाम्भिकास्ते भविष्यन्ति नरा ज्ञानविलोपिताः ॥ ५०
त[12]था विलुलिते धर्मे जनाः श्रेष्ठपुरस्कृताः । शुभान्समाचरिष्यन्ति दानशीलपरायणाः ॥ ५१
.र्भक्षाः स्वयंगुप्ता निर्घृणा निरपत्रपाः । भविष्यन्ति तदा लोके तत्कषायस्य लक्षणम् ॥ ५२
.ायोपप्लवे काले ज्ञान[13]निष्ठाप्रणाशने । सिद्धिमल्पेन कालेन प्राप्स्यन्ति निरुपस्कृताः ॥ ५३
विप्राणां शाश्वतीं वृत्तिं यदा वर्णावरे ज[14]नाः । संश्रयिष्यन्ति[15] भो विप्रा[16]स्तत्कषायस्य लक्षणम् ॥
महायुद्धं महावर्षं महावातं म[17]हातपः । भविष्यति युगे क्षीणे तत्कषायस्य लक्षणम् ॥ ५५
विप्ररूपेण यक्षांसि राजानः [18]कर्णवेदिनः । पृथिवीमुपभोक्ष्यन्ति युगान्ते समुपस्थिते ॥ ५६
निःस्वाध्यायवषट्काराः [19]कुनेतारोऽभिमानिनः । क्रव्यादा ब्रह्मरूपेण सर्वभक्ष्या वृथाव्रताः ॥ ५७
[20]मूर्खाश्चार्थपरा लुब्धाः क्षुद्राः क्षुद्रप[21]रिच्छदाः । व्यवहारोपवृत्ताश्च च्युता धर्माश्च(च्च) शाश्वतात् ॥
हर्तारः प[22]ररत्नानां परदारप्रधर्षकाः । कामात्मानो दुरात्मानः सोपधाः प्रियसाहसाः ॥ ५९
तेषु प्रभवमाणेषु जनेष्वपि च सर्वशः । [23]अभाविनो भविष्यन्ति मुनयो बहुरूपिणः ॥ ६०
[24]कलौ युगे समुत्पन्नाः प्रधानपुरुषाश्च ये । कथायोगेन तान्सर्वान्पूजयिष्यन्ति मानवाः ॥ ६१
सस्यचोरा भविष्यन्ति तथा चैलापहारिणः । भोक्ष्यभोज्यहराश्चैव करण्डानां च हारिणः ॥ ६२
चौराश्चौरस्य हर्तारो हन्ता हन्तुर्भविष्यति । चौरैश्चौरक्षये चापि कृते क्षेमं भविष्यति ॥ ६३

---

१ ख. °णा ऋणतृ° । २ ग. दिशादाहो । ३ °गेऽप्येवं । ४ ख. ग. °कृताग्रा° । ५ क कष्टपी° । ६ ख. °पश्यन्ति । ७ क. उद्देशिनो । ८ किंमर्म° । ९ क. °चित्तत्र । ख. °चित्कौतू° । १० क. °णं चरि° । ११ ख. °पराः प्रजाः । ना° । १२ क. °थाऽखिले गते ध° । १३ क. ख. °नविद्याप्र° । १४ ग. °नाः । निखिलेन ग्रहीष्य° । १५ ग. °न्ति तत्क° । १६ क. ख. °स्तदा निष्ठा कलेः स्मृता । म° । १७ ग. महाभयम् । १८ ख. कर्मवादि° । १९ क. कुनग लोभमा° । २० क. ख. मूर्खाः स्वार्थ° । २१ ख. °रिग्रहाः । व्य° । २२ क. °रधान्यानां । २३ ख. अभिमानिनो । २४ क. कृते ।

निःसारे क्षुभिते [1]काले निष्क्रिये संव्यवस्थिते । नरा वनं श्रयिष्यन्ति करभारप्रपीडिताः ॥ ६४
यज्ञकर्मण्युपरते रक्षांसि श्वापदानि च । कीटमूषिकसर्पाश्च धर्षयिष्यन्ति मानवान् ॥ ६५
क्षेमं सुभिक्षमारोग्यं सामर्थ्यं चैव बन्धुषु । उद्देशेषु [2]नराः श्रेष्ठा भविष्यन्ति युगक्षये ॥ ६६
स्वयंपालाः स्वयं [3]चौरा[4]ः [5]प्लवसंभारसंभृताः । मण्डलैः संभविष्यन्ति देशे देशे पृथक्पृथक् ॥ ६७
स्वदेशेभ्यः परिभ्रष्टा निःसाराः सह बन्धुभिः । नराः सर्वे भविष्यन्ति तदा कालपरिक्षयात् ६८
ततः सर्वे समादाय कुमारान्प्रद्रुता भयात् । कौशिकीं [6]संतरिष्यन्ति नराः क्षुद्भयपीडिताः ६९
अङ्गान्वङ्गान्कलिङ्गांश्च[7] काश्मीरानथ [8]कोशलान् । [9]ऋषिकान्तगिरिद्रोणीः संश्रयिष्यन्ति मानवाः ॥
कृत्स्नं च हिमवत्पार्श्वं कूलं च लवणाम्भसः । विविधं जीर्णपत्रं च वल्कलान्यजिनानि च ॥७१
स्वयं कृत्वा निवत्स्यन्ति तस्मिन्भूते युगक्षये । अरण्येषु च वत्स्यन्ति नरा [10]म्लेच्छगणैः सह ७२
नैव शून्या [11]नैवारण्या भविष्यति वसुंधरा । अगोप्तारश्च गोप्तारो भविष्यन्ति नरा[12]धिपा[13]ः ॥ ७३
मृगैर्मत्स्यैर्विहङ्गैश्च श्वापदैः सर्पकीटकैः । मधुशाकफलैर्मूलैर्वर्तयिष्यन्ति मानवाः ॥ ७४
शीर्णपर्णफलाहारा वल्कलान्यजिनानि च । स्वयं कृत्वा निवत्स्यन्ति यथा मुनिजनस्तथा ॥७५
[14]बीजानां[15]मकृत[16]स्नेहा आहताः काष्ठ[17]शङ्कुभिः । [18]अजैडकं खरोष्ट्रं च पालयिष्यन्ति नित्यशः ॥ ७६
नदीस्रोतांसि रोत्स्यन्ति तोयार्थं कूलमाश्रिताः । पक्वान्नव्यवहारेण विपणन्तः परस्परम् ॥ ७७
तनूरुहै[19]र्यथाजातैः [20]समलान्तरसंभृतैः । बह्वपत्याः प्रजाहीनाः कुलशीलविवर्जिताः ॥ ७८
एवं भविष्यन्ति तदा नराश्चाधर्मजीविनः । हीना[21] हीनं तथा धर्मं प्रजा समनुवत्स्यति ॥ ७९
आयुस्तत्र च मर्त्यानां परं त्रिंशद्भविष्यति । दुर्बला विषयग्लाना जरा[22]शोकैरभिप्लुताः ॥ ८०
भविष्यन्ति तदा तेषां रोगैरिन्द्रियसंक्षयः । आयुःप्रत्ययसंरोधाद्विषयादु(यैरु) परंस्यते ॥ ८१
शुश्रुषवो भविष्यन्ति साधूनां दर्शने रताः । सत्यं च प्रति[23]रंस्यन्ति व्यवहारोपसंक्षयात् ॥ ८२
भविष्यन्ति च कामानामलाभाद्धर्मशीलिनः । करिष्यन्ति च[24] [25]संस्कारं [26]स्वयं च क्षयपीडिताः ।
एवं शुश्रूषवो दाने [27]सत्ये प्राण्यभि[28]रक्षणे[29] । ततः पादप्रवृत्ते तु धर्मे श्रेयो [30]निपत्स्यते ॥ ८४
तेषां लब्धानुमानानां गुणेषु परिवर्तताम् । स्वादु किंत्विति विज्ञाय धर्म एव च दृश्यते ॥ ८५
यथा हानिक्रमं प्राप्तास्तथा ऋद्धिक्रमं गताः । प्रगृहीते ततो धर्मे प्र[31]पश्यन्ति कृतं युगम् ॥ ८६
साधुवृत्तिः कृतयुगे कषाये हानिरुच्यते । एक ए[32]वं तु कालोऽयं हीनवर्णो यथा शशी ॥ ८७
छन्नश्च तमसा सोमो यथा कलियुगं तथा । मुक्तश्च तमसा सोम एवं कृतयुगं च तत् ॥ ८८
अर्थवादः परं ब्रह्म वेदार्थ इति तं विदुः । अ[33]विविक्तमविज्ञातं दा[34]यौ[35]द्यमिह धार्यते ॥ ८९
इष्टवादस्तपो नाम तपो हि स्थविरीकृतः । गुणै[36]ः कर्माभिनिर्वृत्तिर्गुणाः शुध्यन्ति कर्मणा ॥ ९०

---

१ ख. लोके । २ क. ख. नरश्रे॰ । ३ क. चौरा युगसं॰ । ४ ख. ॰राः सुगन्धभा॰ । ५ क. ॰संयुताः । ६ ग. संश्रयिष्य॰ । ७ क. ॰श्च तथा मगधमेकलान् । ८ ख. मेकलान् । ९ क. ऋषीकं ते गि॰ । ख. ऋषीसत्त्वां गि॰ । १० क. भिक्षुगणैः । ११ क. न चार॰ । १२ ग. ॰रा वृताः । मृ॰ । १३ ख. ॰पाः । नरर्म॰ । १४ क. बीजना॰ । १५ क. ग. ॰नामाकृतिनिम्नेष्वाह॰ । १६ ख. ॰कृतिस्नेहा हन्तुः का॰ । १७ क. ॰ष्ठजन्तुभिः । १८ क. अजाण्डजान्खरो॰ । १९ क. ॰थायातममलान्तर॰ । २० ग. समलोत्तर॰ । २१ क. ॰नाधीनं । २२ क. ॰गाक्लेशैर॰ । २३ ख. ॰पश्यन्ति । २४ ग. न । २५ ग. संकोचं । २६ क. स्वपक्षभय॰ । ख. स्वपक्षक्ष॰ । २७ क. सत्यप्रा॰ । २८ क. ॰रक्षिणः । त॰ । २९ ग. ॰णे । चतुष्पदे प्र॰ । ३० क. विपत्स्यति । ३१ ख. ॰पत्स्यन्ति । ३२ क. ख. ॰व चतुष्कालो ही॰ । ३३ क. ख. ॰विमुक्त॰ । ३४ ग. ॰यादमि॰ । ३५ ख. ॰मिव धा॰ । ३६ ग. ॰गुणस्तथ्येन क॰ ।

आशीस्तु पुरुषं दृष्ट्वा देशकालानुवर्तिनी। युगे युगे यथाकालमृषिभिः समुदाहृ[1]ता ॥ ९१
धर्मार्थकाममोक्षाणां [2]देवानां च प्रतिक्रिया। आशिषश्च शिवाः पुण्यास्तथैवाऽऽयुर्युगे युगे ॥९२
तथा युगानां परिवर्तनानि[3] चिरप्रवृत्तानि विधिस्वभावात्।
क्षणं न संतिष्ठति जीवलोकः क्षयोदयाभ्यां परिवर्तमानः ॥ ९३

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे भविष्यकथनं नाम
त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२८६२

अथैकत्रिंशदधिकद्विशततमोऽध्यायः।

व्यास उवाच—
सर्वेषामेव भू[4]तानां त्रिविधः प्रतिसंचरः। नैमित्तिकः प्राकृतिकस्तथैवाऽऽत्यन्तिको मतः ॥ १
ब्राह्मो नैमित्तिकस्तेषां कल्पान्ते प्रतिसंचरः। आत्यन्तिको वै मोक्षश्च प्राकृतो द्विपरार्धिकः॥ २
मुनय ऊचुः—
परा[5]र्धसंख्यां भगवंस्त्वमाचक्ष्व यथोदिताम्। द्विगुणीकृतयज्ज्ञेयः प्राकृतः प्रतिसंचरः ॥ ३
व्यास उवाच—
स्थानात्स्थानं दशगुण[6]मेकैकं गण्यते द्विजाः। ततोऽष्टादशमे भागे परार्धमभिधीयते ॥ ४
परार्धं द्विगुणं यत्तु प्राकृतः स लयो द्विजाः। तदाऽव्यक्तेऽखिलं व्यक्तं सहेतौ लयमेति वै ॥ ५
निमेषो मानुषो योऽयं मात्रामात्रप्रमाणतः। तैः पञ्चदशभिः काष्ठा त्रिंशत्काष्ठास्तथा कला ॥६
नाडिका तु प्रमाणेन कला च(श्च) दश पञ्च चँ[7]। उन्मानेनाम्भसः सा तु पलान्यर्धत्रयोदश॥ ७
हेममाषैः कृतच्छि[8]द्रा चतुर्भिश्चतुरङ्गुलैः। मागधेन प्रमाणेन जलप्रस्थस्तु स स्मृतः ॥ ८
नाडिकाभ्यामथ द्वाभ्यां मुहूर्तो द्विजसत्तमाः। अहोरात्रं मुहूर्तास्तु त्रिंशन्मासो दिनैस्तथा ॥ ९
मासैर्द्वादशभि[9]र्वर्षमहोरात्रं तु तद्दिवि। त्रिभिर्वर्षशतैर्वर्षं षष्ट्या चैवासुरद्विषाम् ॥ १०
तैस्तु द्वादशसाहस्रैश्चतुर्युगमुदाहृतम्। चतुर्युगसहस्रं तु कथ्यते ब्रह्मणो दिनम् ॥ ११
स कल्पस्तत्र मनवश्चतुर्दश द्विजोत्तमाः। तदन्ते चैव भो विप्रा ब्रह्मनैमित्तिको लयः ॥ १२
तस्य स्वरूपमत्युग्रं द्विजेन्द्रा गदतो मम। शृणुध्वं प्राकृतं भूयस्ततो वक्ष्याम्यहं लयम् ॥ १३
चतुर्युगसहस्रान्ते क्षीणप्राये महीतले। अनावृष्टिरतीवोग्रा जायते शत[10]वार्षिकी ॥ १४
ततो यान्यल्पसाराणि तानि स[11]त्त्वान्यनेक[12]शः। क्षयं यान्ति मुनिश्रे[13]ष्ठाः पार्थिवान्यतिपीडनात् ॥
ततः स भगवान्कृष्णो रुद्ररू[14]पी तथाऽव्ययः। क्षयाय यतते कर्तुमात्मस्थाः सकलाः प्रजाः ॥१६
ततः स भगवा[15]न्विष्णुर्भानोः सप्तसु रश्मिषु। स्थितः पिबत्यशेषाणि जलानि मुनिसत्तमाः ॥१७

---

१ ग. °हृतम्। भ°। २ ग. वेदानां। ३ क. °नि यथा यथा वै प्रकृतिस्व°। ४ क. ख. वर्णानां। ५ ग. °संज्ञां भ°। ६ ग. °मेकस्माद्गण्य°। ७ ग च। तन्मा°। ८ क °च्छिद्रश्चतु°। ९ क. °र्वर्षं तन्मानं परिकीर्तितम्। शतैस्तैस्तु चतुःषष्ट्या वर्षं वै त्रिदिवौकसाम्। तैं°। १० क. °ते दशवा°। ख. °ते वार्षिकी तदा। त°। ११ ग. सर्गाण्यने°। १२ क. °शः। क्षीयन्ते मुनयः श्रे°। १३ क. °श्रेष्ठा अन्नाभावे तु जन्तवः। त°। १४ क. ख. °रूप-भरोऽव्य°। १५ क. °वान्कृष्णो भानोः।

पीत्वाऽम्भांसि समस्तानि प्राणिभूतगतानि वै । शोषं नयति भो विप्राः समस्तं पृथिवीतलम् ॥
समुद्रान्सरितः शैलाञ्शैलप्रस्रवणानि च । पातालेषु च यत्तोयं तत्सर्वं नयति क्षयम् ॥ १९
ततस्तस्याप्यभावेन तोयाहारोपबृंहिताः । सहस्ररश्मयः सप्त जायन्ते तत्र भास्कराः ॥ २०
अधश्चोर्ध्वं च ते दीप्तास्ततः सप्त दिवाकराः । दहन्त्यशेषं त्रैलोक्यं सपातालतलं द्विजाः ॥ २१
दह्यमानं तु तैर्दीप्तैस्त्रैलोक्यं दीप्तभास्करैः । साद्रिनगार्णवाभोगं निःस्नेहमभिजायते ॥ २२
ततो निर्दग्धवृक्षाम्बु त्रैलोक्यमखिलं द्विजाः । भवत्येषा च वसुधा कूर्मपृष्ठोपमाकृतिः ॥ २३
ततः कालाग्निरुद्रोऽसौ भूतसर्गहरो हरः । शेषाहिश्वाससंतापात्पातालानि दहत्यधः ॥ २४
पातालानि समस्तानि स दग्ध्वा ज्वलनो महान् । भूमिमभ्येत्य सकलं दग्ध्वा तु वसुधातलम् ॥
भुवो लोकं ततः सर्वं स्वर्गलोकं च दारुणः । ज्वालामालामहावर्तस्तत्रैव परिवर्तते ॥ २६
अम्बरीषमिवाऽऽभाति त्रैलोक्यमखिलं तदा । ज्वालावर्तपरीवारमुपक्षीणबलास्ततः ॥ २७
ततस्तापपरीतास्तु लोकद्वयनिवासिनः । हृतावकाशा गच्छन्ति महर्लोकं द्विजास्तदा ॥ २८
तस्मादपि महातापतप्ता लोकास्ततः परम् । गच्छन्ति जनलोकं ते दशावृत्त्या परैषिणः ॥ २९
ततो दग्ध्वा जगत्सर्वं रुद्ररूपी जनार्दनः । मुखनिःश्वासजान्मेघान्करोति मुनिसत्तमाः ॥ ३०
ततो गजकुलप्रख्यास्तडिद्वन्तो निनादिनः । उत्तिष्ठन्ति तदा व्योम्नि घोराः संवर्तका घनाः ॥
केचिदञ्जनसंकाशाः केचित्कुमुदसंनिभाः । धूमवर्णा घनाः केचित्केचित्पीताः पयोधराः ॥ ३२
केचिद्धरिद्रावर्णाभा लाक्षारसनिभास्तथा । केचिद्वैडूर्यसंकाशा इन्द्रनीलनिभास्तथा ॥ ३३
शङ्खकुन्दनिभाश्चान्ये जातीकुन्दनिभास्तथा । इन्द्रगोपनिभाः केचिन्मनःशिलानिभास्तथा ॥ ३४
पद्मपत्रनिभाः केचिदुत्तिष्ठन्ति घना घनाः । केचित्पुरवराकाराः केचित्पर्वतसंनिभाः ॥ ३५
कूटागारनिभाश्चान्ये केचित्स्थलनिभा घनाः । महाकाया महारावा पूरयन्ति नभस्तलम् ॥ ३६
वर्षन्तस्ते महासारास्तमग्निमतिभैरवम् । शमयन्त्यखिलं विप्रास्त्रैलोक्यान्तरविस्तृतम् ॥ ३७
नष्टे चाग्नौ शतं तेऽपि वर्षाणामधिकं घनाः । प्लावयन्तो जगत्सर्वं वर्षन्ति मुनिसत्तमाः ॥ ३८
धाराभिरक्षमात्राभिः प्लावयित्वाऽखिलां भुवम् । भुवो लोकं तथैवोर्ध्वं प्लावयन्ति दिवं द्विजाः ॥
अन्धकारीकृते लोके नष्टे स्थावरजङ्गमे । वर्षन्ति ते महामेघा वर्षाणामधिकं शतम् ॥ ४०

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे संहारलक्षणकथनं नामैक-
त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२९०२

अथ द्वात्रिंशदधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

सप्तर्षिस्थानमाक्रम्य स्थितेऽम्भसि द्विजोत्तमाः । एकार्णवं भवत्येतत्त्रैलोक्यमखिलं ततः ॥ १
अथ निःश्वासजो विष्णोर्वायुस्ताञ्जलदांस्ततः । नाशं नयति भो विप्रा वर्षाणामधिकं शतम् ॥ २

---

१ क. ग. °गणानि । २ ख. °स्तस्य तु बीजेन । ३ ग. °स्यानुभा° । ४ ग हारिः । ५ क. ते देशा भृत्या । ६ ग. °भः । अथ निः° । ७ ख. कूपागा° । ८ ग. °टाहार° । ९ ख. पूरयन्तो । १० ग. °हाभागा व° । ११ क. °तः । मुखनि° । १२ ग. °सतो वि° ।

सर्वभूतमयोऽचिन्त्यो भगवान्भूतभावनः । अनादिरादिर्विश्वस्य पीत्वा वायुमशेषतः ॥ ३
एकार्णवे[1] ततस्तस्मिञ्शेषशय्यास्थितः प्रभुः । ब्रह्मरूपधरः [2]शेते भगवानादिकृद्धरिः ॥ ४
जनलोकगतैः सिद्धैः सनकाद्यैरभिष्टुतः । ब्रह्मलोकगतैश्चैव चिन्त्यमानो मुमुक्षुभिः ॥ ५
आत्ममायामयीं दिव्यां योगनिद्रां समास्थितः । आत्मानं वासुदेवाख्यं चिन्तयन्परमेश्वरः ॥ ६
एष नैमित्तिको नाम विप्रेन्द्राः प्रतिसंचरः । निमित्तं तत्र यच्छेते ब्रह्मरू[3]पधरो हरिः ॥ ७
यदा जागर्ति सर्वात्मा स तदा चेष्टते जगत् । निमीलत्येतदखिलं मायाशय्याशयेऽच्युते ॥ ८
पद्मयोनेर्दिनं यत्तु चतुर्युगसहस्रवत् । एकार्णवकृते लोके तावती रात्रिरुच्यते ॥ ९
ततः प्रबुद्धो रात्र्यन्ते पुनः सृष्टिं करोत्यजः । ब्रह्मस्वरूपधृग्विष्णुर्यथा वः कथितं पुरा ॥ १०
इत्ये[5]ष कल्पसंहारो अन्तरप्रलयो द्विजाः । नैमित्तिको[6] वः कथितः शृणुध्वं प्राकृतं परम् ॥ ११
अवृष्ट्यग्न्यादिभिः सम्यक्कृते [7]शय्यालये द्विजाः । समस्तेष्वेव लोकेषु पातालेष्वखिलेषु च ॥ १२
महदादेर्विकारस्य विशेषात्तत्र [10]संक्षये । कृष्णेच्छाकारिते तस्मिन्[11]प्रवृत्ते प्रतिसंचरे ॥ १३
आपो ग्रसन्ति वै पूर्वं भूमेर्ग[12]न्धादिकं गुणम् । [13]आत्तगन्धा ततो भूमिः प्र[14]लयाय प्रकल्पते ॥ १४
प्रनष्टे गन्धतन्मात्रे भवत्युर्वी जलात्मिका । आपस्तदा प्रवृत्तास्तु वेगवत्यो महास्वनाः ॥ १५
सर्वमापूरयन्तीदं तिष्ठन्ति[15] विचरन्ति च । सलिलेनैवोर्मिमता लोकालोकः समन्ततः ॥ १६
अपामपि गुणो यस्तु ज्यो[16]तिषा पीयते तु सः । नश्यन्त्यापः सुतप्ताश्च रसतन्मात्रसंक्षयात् ॥ १७
ततश्चाऽऽपो[17]ऽमृतरसा ज्योतिष्ट्वं प्राप्नुवन्ति वै । अग्न्यवस्थे तु सलिले तेजसा सर्वतो वृते ॥ १८
स चाग्निः सर्वतो व्याप्य आदत्ते तज्जलं तदा । सर्वमापूर्यतो चाभि(रयत्यग्नि)स्तदा जगदिदं शनैः ॥
अर्चिभिः संतते तस्मिंस्तिर्यगूर्ध्वमधस्तथा । ज्योतिषोऽपि परं रूपं वायुरत्ति प्रभाकरम् ॥ २०
प्रलीने च ततस्तस्मिन्वायुभूतेऽखिलात्मके । प्रनष्टे रूपतन्मात्रे कृतरूपो विभावसुः ॥ २१
प्रशाम्यति तदा ज्योतिर्वायुर्दोधूयते महान् । निरालोके तदा लोके वायुसंस्थे च तेजसि ॥ २२
ततः प्रलयमासाद्य [18]वायुसंभवमात्मनः । ऊ[19]र्ध्वं च वायुस्तिर्यक्च दोधवीति दिशो दश ॥ २३
वायोस्त्वपि गुणं स्पर्शमाकाशं ग्रसते ततः । प्रशाम्यति तदा वायुः खं तु तिष्ठत्यनावृतम् ॥ २४
अरूपमरसस्पर्शमगन्धवदमूर्तिमत् । सर्वमापूरयच्चैव सुमहत्तत्प्रकाशते ॥ २५
परिम[20]ण्डलतस्तत्तु आकाशं शब्दलक्षणम् । शब्दमात्रं तथाऽऽकाशं सर्वमावृत्य तिष्ठति ॥ २६
ततः शब्दगुणं तस्य भूतादिर्ग्रसते पुनः । भूतेन्द्रियेषु युगपद्भूतादौ संस्थितेषु वै ॥ २७
अभिमानात्मको ह्येष भूतादिस्तामसः स्मृतः । *भूतादिं ग्रसते चापि महाबुद्धिर्विचक्ष[21]णा ॥ २८
उर्वी महांश्च जगतः प्रान्तेऽन्तर्बाह्यतस्तथा । एवं[22] सप्तमहाबुद्धिः (?) क्रमात्प्रकृतयस्तथा ॥ २९
प्रत्याहारैस्तु ताः सर्वाः प्रविशन्ति परस्परम् । येनेदमावृतं सर्वमण्डमप्सु प्रलीयते ॥ ३०
सप्तद्वीपसमुद्रान्तं सप्तलोकं सपर्वतम् । उदकावरणं ह्यत्र ज्योतिषा पीयते तु तत् ॥ ३१

---

* कपुस्तक एतदादि प्रकृतय इत्यन्तं नास्ति ।

---

१ क. ख. °वे पुनस्त° । २ क. शान्तो । ३ क. °पमयो ह° । ४ क. ख. °स्वकम् । ए° । ५ क. °त्येवं क° । ६ ख. °त्तिकश्च क° । ७ ग. यः । ८ ग. संस्कानले । ९ ग. °त्तस्य सं° । १० ख. संकुले । ११ क. °न्प्रकृते प्र° । १२ ग. °न्धात्मकं रसम् । १३ क. शान्तगन्धा । १४ क. ग. °लयत्वाय क° । १५ ग. °न्ति च रमन्ति । १६ क. °तिषि लीय° । १७ ग. °पो हत° । १८ ग. वायुः सं° । १९ क. ग. °र्ध्वं चाधश्च तिर्य° । २० ग. °ण्डलं तच्छुषिरमाका° । २१ ग. °क्षणः । उ, । २२ ख. °वं सुप्ते महायुद्धे क्र° ।

ज्योतिर्वायौ लयं याति यात्याकाशे समीरणः । आकाशं चैव भूतादिर्ग्रसते तं तथा महान् ॥ ३२
महान्तमेभिः सहितं प्रकृतिर्ग्रसते द्विजाः[1] । गुणसाम्यमनुद्रिक्तमन्यूनं[2] च द्विजोत्तमाः ॥ ३३
प्रोच्यते प्रकृतिर्हेतुः प्रधानं कारणं परम् । इत्येषा प्रकृतिः सर्वा व्यक्ताव्यक्तस्वरूपिणी ॥ ३४
व्यक्तस्वरूपमव्यक्ते तस्यां विप्राः प्रलीयते । एकः शुद्धोऽक्षरो[3] नित्यः सर्वव्यापी तथा पुनः ३५
सोऽप्यंशः सर्वभूतस्य द्विजेन्द्राः परमात्मनः । नश्यन्ति सर्वा यत्रापि नामजात्यादिकल्पनाः ३६
सत्तामात्रात्मके ज्ञेये ज्ञानात्मन्यात्मनः परे । स ब्रह्म[4] तत्परं[5] धाम परमात्मा[6] परेश्वरः ॥ ३७
स विष्णुः सर्वमेवेदं यतो नाऽऽवर्तते पुनः[7] । प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी ॥
पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि । परमात्मा च सर्वेषामाधारः परमेश्वरः ॥ ३९
विष्णुनाम्ना स वेदेषु वेदान्तेषु[8] च गीयते । प्रवृत्तं[9] च निवृत्तं च द्विविधं कर्म वैदिकम् ॥ ४०
ताभ्यामुभाभ्यां पुरुषैर्यज्ञमूर्तिः स इज्यते । ऋग्यजुःसामभिर्मार्गैः प्रवृत्तैरिज्यते ह्यसौ ॥ ४१
यज्ञेश्वरो यज्ञपुमान्पुरुषैः[10] पुरुषोत्तमः । ज्ञानात्मा ज्ञानयोगेन ज्ञानमूर्तिः स इज्यते ॥ ४२
निवृत्तैर्[11]योगमार्गैश्च[12] विष्णुर्मुक्तिफलप्रदः । ह्रस्वदीर्घप्लुतैर्यत्तु किंचिद्वस्त्वभिधीयते ॥ ४३
यच्च वाचामविषयस्तत्सर्वं विष्णुरव्ययः । व्यक्तः स एवमव्यक्तः स एव पुरुषोऽव्ययः ॥ ४४
परमात्मा च विश्वात्मा विश्वरूपधरो हरिः । व्यक्ताव्यक्तात्मिका तस्मिन्प्रकृतिः सा विलीयते ॥
पुरुषश्चापि भो विप्रा यस्तदव्याकृतात्मनि । द्विपरार्धात्मकः कालः कथितो यो मया द्विजाः ४६
तदहस्तस्य विप्रेन्द्रा विष्णोरीशस्य कथ्यते । व्यक्ते तु प्रकृतौ लीने प्रकृत्यां पुरुषे तथा ॥ ४७
तत्राऽऽस्थिते[13] निशा तस्य तत्प्रमाणा तपोधनाः[14] । नैवाहस्तस्य च निशा नित्यस्य परमात्मनः ॥
उपचारात्तथाऽप्येतत्तस्येशस्य तु कथ्यते । इत्येष मुनिशार्दूलाः कथितः प्राकृतो लयः ॥ ४९

इति श्रीमहापुराणे आदिब्राह्मे प्राकृतलयनिरूपणं नाम द्वात्रिंशदधिक-
द्विशततमोऽध्यायः ॥ २३२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१२९५१

अथ त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ।

व्यास उवाच—

आध्यात्मिकादि भो विप्रा ज्ञात्वा तापत्रयं बुधः । उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं लयम्
आध्यात्मिको[15]ऽपि द्विविधः शारीरो मानसस्तथा । शारीरो बहुभिर्भेदैर्भिद्यते श्रूयतां च सः ॥२
शिरोरोगप्रतिश्यायज्वरैः[16]शूलभगंदरैः । गुल्मार्शःश्वयथुश्वासच्छर्द्यादिभिरनेकधा ॥ ३
तथाऽक्षिरोगातीसारैः[17]कुष्ठाङ्गामयसंज्ञकैः । भिद्यते देहजस्तापो मानसं श्रोतुमर्हथ ॥ ४
कामक्रोधभयद्वेषलोभमोहविषादजः । शोकासूयावमानेर्ष्यामात्सर्याभिभवस्तथा ॥ ५
मानसोऽपि द्विजश्रेष्ठास्तापो भवति नैकधा । इत्येवमादिभिर्भेदैस्तापो ह्याध्यात्मिकः स्मृतः ॥ ६

१ क. °जाः । स्वगुणे सा° । २ क. °म्यमुद्रि° । ३ क. °क्षयो नि° । ४ क. °ह्मणः परो वासः प° । ५ ख. °रं वासः प° । ६ क. ख. °त्मा स चेश्व° । ७ ग. यतिः । ८ क. °दारम्भेषु गी° । ९ ग. प्रवृत्ति । १० ख °मान्यज्ञभुक्पु° । ११ क. °वृत्ते यो° । १२ क. °मार्गे तु वि° । १३ क. ख. ततः स्थि° । १४ क. द्विजोत्तमाः । १५ ग. °को वै द्वि° । १६ क. °ररो-गभ° । १७ क. °रकव्याम° ।

मृगपक्षिमनु[1]ष्याद्यैः पिशाचोरगराक्षसैः । सरीसृपाद्यैश्च नृणां जन्यते चाऽऽधिभौतिकः ॥ ७
शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः । तापो द्विजवरश्रेष्ठाः कथ्यते चाऽऽधिदैविकः ॥ ८
गर्भजन्मजराज्ञानमृत्युनारकजं तथा । दुःखं सहस्रशो भेदैर्भिद्यते मुनिसत्तमाः ॥ ९
सुकुमारतनुर्गर्भे जन्तुर्बहुमलावृते[2] । उल्बसंवेष्टि[3]तो भग्नपृष्ठग्रीवो[4]स्थिसंहतिः ॥ १०
अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः । अतितापिभिरत्यर्थं बाध्यमानोऽतिवेदनः ॥ ११
प्रसारणाकुञ्चनादौ नागा(ङ्गा)नां प्रभुरात्मनः । शकृन्मूत्रमहापङ्कशायी सर्वत्र पीडितः ॥ १२
निरुच्छ्वासः सचैतन्यः स्मरञ्जन्मशतान्यथ । आस्ते गर्भेऽतिदुःखेन निजकर्मनिबन्धनः ॥ १३
जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः । प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः ॥ १४
अधोमुखस्तैः क्रियते प्रबलैः सूतिमारुतैः । क्लेशैर्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः ॥ १५
मूर्छामवाप्य महतीं संस्पृष्टो बाह्यवायुना । विज्ञानभ्रंशमाप्नोति जातस्तु मुनिसत्तमाः ॥ १६
कण्टकैरिव तुन्नाङ्गः क्रकचैरिव दारितः । पूतिव्रणान्निपतितो धरण्यां क्रिमिको यथा ॥ १७
कण्डूयनेऽपि चाशक्तः परिवर्तेऽप्यनीश्वरः । स्तनपानादिकाहारमवाप्नोति परेच्छया ॥ १८
अशुचिस्रस्तरे सुप्तः कीटदंशादिभिस्तथा । भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे ॥ १९
जन्मदुःखान्यनेकानि जन्मनो[5]ऽनन्तराणि च । बालभावे यदाप्नोति आधिभूतादिकानि च ॥ २०
अज्ञानतमसा छन्नो मूढान्तःकरणो नरः । न जानाति कुतः कोऽहं कुत्र गन्ता किमात्मकः ॥ २१
केन बन्धेन बद्धोऽहं कारणं किमकारणम् । किं कार्यं किमकार्यं वा किं वाच्यं किं न चोच्यते
को धर्मः कश्च वाऽधर्मः कस्मिन्वर्तेत वै कथम् । किं कर्तव्यमकर्तव्यं किं वा किं गुणदोषवत् २३
एवं पशुसमैर्मूढैरज्ञानप्रभवं महत् । अवाप्यते नरैर्दुःखं शिश्नोदरपरायणैः ॥ २४
अज्ञानं तामसो भावः कार्यारम्भप्रवृत्तयः । अज्ञानिनां प्रवर्तन्ते कर्मलोपस्ततो द्विजाः ॥ २५
नरकं कर्मणां लोपात्फलमाहुर्महर्षयः । तस्मादज्ञानिनां दुःखमिह चामुत्र चो[6]त्तमम् ॥ २६
जराजर्जरदेहश्च शिथिलावयवः पुमान् । विचलच्छीर्णदशनो[7] वलिस्नायुशिरावृतः ॥ २७
दूरप्रनष्टनयनो व्योमान्तर्गततारकः । नासाविवरनिर्यातरोमपुञ्जश्चलद्वपुः ॥ २८
प्रकटीभूतसर्वास्थिर्नतपृष्ठास्थिसंहतिः । उत्सन्नजठराग्नित्वादल्पाहारोऽल्पचेष्टितः ॥ २९
कृच्छ्रचंक्रमणोत्थानशयनासनचेष्टितः । मन्दीभवच्छ्रोत्रनेत्रगलल्लालाविलाननः ॥ ३०
अनायत्तैः समस्तैश्च करणैर्मरणोन्मुखः । तत्क्षणेऽप्यनुभूतानामस्मर्ताऽखिलवस्तुनाम्* ॥ ३१
सकृदुच्चारिते वाक्ये स[8]मुद्भूतमहाश्रमः । श्वासका[9]सामयायाससमुद्भूतप्रजागरः ॥ ३२
अन्येनोत्थाप्यतेऽन्येन तथा संवेश्यते जरी । भृत्यात्मपुत्रदाराणाम[10]पमानप[11]रीकृतः ॥ ३३
प्रक्षीणाखिलशौचश्च विहाराहारसंस्पृहः । हास्यः परिजनस्यापि निर्विण्णाशेषबान्धवः ॥ ३४
अनुभूतमिवान्यस्मिञ्जन्मन्यात्मविचेष्टितम् । संस्मरन्यौवने दीर्घं निश्वसित्यतितापितः ॥ ३५
एवमादीनि दुःखानि जरायामनुभूय च । मरणे यानि दुःखानि प्राप्नोति शृणु तान्यपि ॥ ३६

---

* आर्षो नुडभावः ।

---

१ क. °नुष्यौघैः पि° । २ ख. °ते । वसते वे° । ३ क. °तो भुग्न° । ४ क. °वास्यसं° । ५ क. °नोऽभ्यन्त° । ६ क. चोच्यते । ७ क. °शनस्त्वचा स्ना° । ८ क. °मुद्गत° । ९ ग. °कासमहाया° । १० क. ख. °मवमा° । ११ क. °परिक्षतः । ख. °परिप्लुतः ।

श्लथग्रीवाङ्घ्रिहस्तोऽथ प्राप्तो वेपथुना नरः । मुहुर्ग्लानिपरश्वासौ मुहुर्ज्ञानबलान्वितः ॥ ३७
हिरण्यधान्यतनयभार्याभृत्यगृहादिषु । एते कथं भविष्यन्तीत्यतीवममताकुलः ॥ ३८
मर्मविद्भिर्महारोगैः क्रकचैरिव दारुणैः । शरैरिवान्तकस्योग्रैश्छिद्यमानास्थिबन्धनः ॥ ३९
परिवर्तमानताराक्षिहस्तपादं मुहुः क्षिपन् । संशुष्यमाणताल्वोष्ठकण्ठो घुरघुरायते ॥ ४०
निरुद्धकण्ठदेशोऽपि उदानश्वासपीडितः । तापेन महता व्याप्तस्तृषा व्याप्तस्तथा क्षुधा ॥ ४१
क्लेशादुत्क्रान्तिमाप्नोति याम्यकिंकरपीडितः । ततश्च यातनादेहं क्लेशेन प्रतिपद्यते ॥ ४२
एतान्यन्यानि चोग्राणि दुःखानि मरणे नृणाम् । शृणुध्वं नरके यानि प्राप्यन्ते पुरुषैर्मृतैः ॥ ४३
याम्यकिंकरपाशादिग्रहणं दण्डताडनम् । यमस्य दर्शनं चोग्रमुग्रमार्गविलोकनम् ॥ ४४
करम्भवालुकावह्नियन्त्रशस्त्रादिभीषणे । प्रत्येकं यातनायाश्च यातनादि द्विजोत्तमाः ॥ ४५
क्रकचैः पीड्यमानानां मृ(मू)षायां चापि ध्माप्यताम् । कुठारैः पाट्यमानानां भूमौ चापि निखन्यताम् ॥ ४६
शूलेष्वारोप्यमाणानां व्याघ्रवक्त्रे प्रवेश्यताम् । गृध्रैः संभक्ष्यमाणानां द्वीपिभिश्चोपभुज्यताम् ४७
क्वथ्यतां तैलमध्ये च क्लिद्यतां क्षारकर्दमे । उच्चान्निपात्यमानानां क्षिप्यतां क्षेपयन्त्रकैः ॥ ४८
नरके यानि दुःखानि पापहेतूद्भवानि वै । प्राप्यन्ते नारकैर्विप्रास्तेषां संख्या न विद्यते ॥ ४९
न केवलं द्विजश्रेष्ठा नरके दुःखपद्धतिः । स्वर्गेऽपि पातभीतस्य क्षयिष्णोर्नास्ति निर्वृतिः ॥ ५०
पुनश्च गर्भो भवति जायते च पुनर्नरः । गर्भे विलीयते भूयो जायमानोऽस्तमेति च ॥ ५१
जातमात्रश्च म्रियते बालभावे च यौवने । यद्यत्प्रीतिकरं पुंसां वस्तु विप्राः प्रजायते ॥ ५२
तदेव दुःखवृक्षस्य बीजत्वमुपगच्छति । कलत्रपुत्रमित्रादिगृहक्षेत्रधनादिकैः ॥ ५३
क्रियते न तथा भूरि सुखं पुंसां यथाऽसुखम् । इति संसारदुःखार्कतापतापितचेतसाम् ॥ ५४
विमुक्तिपादपच्छायामृते कुत्र सुखं नृणाम् । तदस्य त्रिविधस्यापि दुःखजातस्य पण्डितैः ॥ ५५
गर्भजन्मजराद्येषु स्थानेषु प्रभविष्यतः । निरस्तातिशयाह्लादं सुखभावैकलक्षणम् ॥ ५६
भेषजं भगवत्प्राप्तिरेका चाऽऽत्यन्तिकी मता । तस्मात्तत्प्राप्तये यत्नः कर्तव्यः पण्डितैर्नरैः ॥ ५७
तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं द्विजोत्तमाः । आगमोत्थं [9]विवेकाच्च द्विधा ज्ञानं तथोच्यते ॥ ५८
शब्दब्रह्माऽऽगममयं परं ब्रह्म विवेकजम् । अन्धं तम इवाज्ञानं दीपवच्चेन्द्रियोद्भवम् ॥ ५९
यथा सूर्यस्तथा ज्ञानं यद्वै विप्रा विवेकजम् । मनुरप्याह वेदार्थं स्मृत्वा यन्मुनिसत्तमाः ॥ ६०
तदेतच्छ्रूयतामत्र [10]संबन्धे गदतो मम । द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् ॥ ६१
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति । द्वे विद्ये वै वेदितव्ये इति चाऽऽथर्वणी श्रुतिः ॥
[11]परयो ह्यक्षरप्राप्तिर्ऋग्वेदादिमयाऽपरा । यत्तदव्यक्तमजरमचिन्त्यमजमव्ययम् ॥ ६३
अनिर्देश्यमरूपं च पाणिपादाद्यसंयुतम् । वित्तं सर्वगतं नित्यं भूतयोनिमकारणम् ॥ ६४
व्याप्यं व्याप्तं यतः सर्वं तद्वै पश्यन्ति सूरयः । तद्ब्रह्म परमं धाम तद्ध्येयं मोक्षकाङ्क्षिभिः ॥ ६५
[12]श्रुतिवाक्योदितं सूक्ष्मं तद्विष्णोः परमं पदम् । [13]उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ॥ ६६
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति । ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः ॥ ६७

---

१ ख. प्राप्नोति यातनां ततः । मु° । २ ख. °यतातभृ° । ३ क. °षणैः । प्र° । ख. °षणम् । प्र° । ४ ग. °श्च पातानां द्वि द्वि° । ५ क. °म । यन्त्रेष्वा° । ६ ख. ग. °त्रार्थगृ° । ७ क. °स्तातनयारादिषु° । ८ ख. °हृत्यादिषु° । ९ ख. विवेकोत्थं । १० ख. संश्रयो । ११ ग [illegible] । १२ क. °[illegible]ोचितं । १३ क. °त्तिं च निपत्तिं च भू° ।

भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः । सर्वाणि तत्र भूतानि[1] निवसन्ति परात्मनि[2] ॥ ६८
भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः । उवाचेदं महर्षिभ्यः पुरा पृष्टः प्रजापतिः ॥ ६९
नामव्याख्यामनन्तस्य वासुदेवस्य तत्त्वतः । भूतेषु वसते योऽन्तर्वसन्त्यत्र च तानि यत् ॥
धाता विधाता जगतां वासुदेवस्ततः प्रभुः । ७०

ससर्वभूतप्र[3]कृ[4]तिर्गुणांश्च दोषांश्च[5] [6]सर्वान्स(न)गुणो ह्यतीतः ।
अतीतसर्वावरणोऽखिलात्मा तेनाऽऽवृतं य[7]द्भुवनान्तरालम् ॥ ७१
समस्तकल्याणगुणात्मको हि स्वशक्तिलेशादृतभूतसर्गः ।
इच्छागृहीताभिमतोरुदेहः संसाधिताशेषजगद्धितोऽसौ ॥ ७२
तेजोबलैश्वर्यमहावरोधः स्ववीर्यशक्त्यादिगुणैकराशिः ।
[8]परः पराणां सकला न यत्र क्लेशादयः सन्ति परा[9]परेशे ॥ ७३
स ईश्वरो [10]व्यष्टिस[11]मष्टिरूपोऽव्यक्तस्वरूपः प्रकटस्वरूपः ।
सर्वेश्वरः सर्व[12]दृक्सर्ववेत्ता समस्तशक्तिः परमेश्वराख्यः ॥ ७४
संज्ञायते येन तदस्तदोषं शुद्धं परं निर्मलमेकरूपम् ।
संदृश्यते वाऽप्यथ गम्यते वा तज्ज्ञानमज्ञानमतोऽन्यदुक्तम् ॥ ७५

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवाद आत्यन्तिकलयनिरूपणं नाम त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३०२६

अथ चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

इदानीं ब्रूहि योगं च दुःखसंयोगभेषजम् । यं विदित्वाऽव्ययं तत्र युञ्जामः पुरुषोत्तमम् ॥ १
श्रुत्वा स वचनं तेषां कृष्णद्वैपायनस्तदा । अब्रवीत्परमप्रीतो[13] योगी[14] योगविदां वरः ॥ २

व्यास उवाच—

योगं वक्ष्यामि भो विप्राः शृणुध्वं भवनाशनम् । यमभ्यस्याऽऽप्नुयाद्योगी मोक्षं परमदुर्लभम् ॥ ३
श्रुत्वाऽऽदौ योगशास्त्राणि गुरुमाराध्य भक्तितः । इतिहासं पुराणं च वेदांश्चैव विचक्षणः ॥ ४
आहारं योगदोषांश्च देशकालं च बुद्धिमान् । ज्ञात्वा समभ्यसेद्[15]योगं निर्द्वंद्वो निष्परिग्रहः[16] ॥ ५
भुञ्जन्सक्तुं यवागूं च[17] तक्रमूलफलं पयः । यावकं कणपिण्याकमाहारं योगसाधनम् ॥ ६
न मनोविकले ध्माते न श्रान्ते क्षुधिते तथा । न द्वंद्वे न च शीते च न चोष्णे नानिलात्मके ॥ ७
सशब्दे न जलाभ्यासे जीर्णगोष्ठे चतुष्पथे । सरीसृपे श्मशाने च न नद्यन्तेऽग्निसंनिधौ ॥ ८
न चैत्ये न च वल्मीके सभये कूपसंनिधौ । न शुष्कपर्णनिचये योगं युञ्जीत कर्हिचित् ॥ ९

---

१ क. °नि व° । २ क. परमात्म° । ३ ग. °कृतेर्विकारं गुणां° । ४ ख. °तिर्विकारान्गुणां° । ५ ख. °श्च स गुणेष्वती° । ६ ग. स वत्स्यते ततः । ७ ख. यज्ञव° । ८ क. ख. परावरा° । ९ ख. °रावरे° । १० क. व्यस्तस° । ११ क. °मस्तरू° । १२ ख. °र्वजनप्रद्रष्टा स° । १३ ख. °प्रीतस्तदा योगवि° । १४ ग. योगं । १५ ग. °द्योगी नि° । १६ ख. °हः । भैक्षं सक्तुं । १७ क. च पत्रं मू° ।

देशानेताननादृत्य मूढत्वाद्यो युनक्ति वै । प्रवक्ष्ये तस्य ये दोषा जायन्ते विघ्नकारकाः ॥ १०
बाधिर्यं जडता लोपः स्मृतेर्मूकत्वमन्धता । ज्वरश्च जायते सद्य[1]स्तद्वदज्ञानसंभवः ॥ ११
तस्मात्सर्वात्मना कार्या रक्षा योगविदा सदा । धर्मार्थकाममोक्षाणां शरीरं साधनं यतः ॥ १२
आश्रमे विजने गुह्ये निःशब्दे निर्भये नगे । शून्यागारे शुचौ रम्ये चैकान्ते देवतालये ॥ १३
रजन्याः पश्चिमे या[2]मे पूर्वे च सुसमाहितः । पूर्वाह्णे मध्यमे चा[3]ह्नि युक्ताहारो जितेन्द्रियः ॥ १४
आसीनः प्रा[5]ङ्[4]मुखो रम्य आसने सुखनिश्चले । नातिनीचे न चोच्छ्रिते निस्पृहः सत्यवाक्शुचिः
[6]युक्तनिद्रो जितक्रोधः सर्वभूतहिते रतः । सर्वद्वंद्वसहो धीरः समकायाङ्घ्रिमस्तकः ॥ १६
नाभौ निधाय हस्तौ द्वौ शान्तः पद्मासने स्थितः । संस्थाप्य दृष्टिं नासाग्रे प्राणानायम्य वाग्यतः ॥
समाहृत्येन्द्रियग्रामं मनसा हृदये मुनिः । प्रणवं दीर्घमुद्यम्य [7]संवृतास्यः सुनिश्चलः[8] ॥ १८
रजसा तमसो वृत्तिं सत्त्वेन रजसस्तथा । संछाद्य निर्मले शान्ते स्थितः संवृतलोचनः ॥ १९
हृत्पद्मकोटरे लीनं सर्वव्यापि निरञ्जनम् । युञ्जीत सततं योगी मुक्तिदं पुरुषोत्तमम् ॥ २०
करणेन्द्रियभूतानि क्षेत्रज्ञे प्रथमं न्यसेत् । क्षेत्रज्ञश्च परे योज्यस्ततो युञ्जति योगवित् ॥+ २१
मनो यस्यान्तमभ्येति परमात्मनि च[9]ञ्चलम् । संत्यज्य विषयांस्तस्य योगसिद्धिः प्रकाशिता ॥
यदा निर्विषयं चित्तं परे ब्रह्मणि लीयते । समाधौ योगयुक्तस्य तदाऽभ्येति परं पदम् ॥ २३
[10]असंसक्तं यदा चित्तं योगिनः सर्वकर्मसु । [11]भवत्यानन्दमासाद्य तदा निर्वाणमृच्छति ॥ २४
[12]शुद्धं धामत्रयातीतं तुर्याख्यं पुरुषोत्तमम् । प्राप्य योगबलाद्योगी मुच्यते नात्र संशयः[13] ॥ २५
निःस्पृहः सर्वकामेभ्यः सर्वत्र प्रियदर्शनः । सर्वत्रानित्यबुद्धिस्तु योगी मुच्येत नान्यथा ॥ २६
इन्द्रियाणि न सेवेत वैराग्येण च योगवित् । सदा चाभ्यासयोगेन मुच्यते नात्र संशयः ॥ २७
न च पद्मास[14]नाद्योगो न नासाग्रनिरीक्षणात् । मनसश्चेन्द्रियाणां च संयोगो योग उच्यते ॥ २८
एवं मया मुनिश्रेष्ठा योगः प्रोक्तो विमुक्तिदः । संसारमोक्षहेतुश्च किमन्यच्छ्रोतुमिच्छथ ॥ २९

लोमहर्षण उवाच—

श्रुत्वा ते वचनं तस्य साधु साध्विति चाब्रुवन् । व्यासं[15] प्रशस्य संपूज्य[16] पुनः प्रष्टुं समुद्यताः ३०

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे योगाभ्यासनिरूपणं नाम
चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३०५६

———

+ इतः परं ख.पुस्तके—'वालाग्रशतधाभागलक्षणं परमं पदम् । मनोदीपेन पश्यन्ति योगिनो ध्यानतत्पराः । इन्द्रियाणि समाहृत्य कूर्मोऽङ्गानीव योगवित् । इत्यधिकं दृश्यते ।

१ ग. °द्यः शुद्धविज्ञानयोगिनः । त° । २ क. ख. भागे । ३ क. ख. वाऽह्नि । ४ क. °ङ्मुखे देश आ° । ५ ग. °ग्वोदग्वा आ° । ६ ग. मुक्तनिद्रो । ७ ख. संयतास्यः । ८ ग. °लः । सोमपा योगयुक्तस्य युञ्जन्तः परमं पदम् । बाह्यात्मा संपरित्यज्य योऽन्तर्ध्यानरतः सदा । अन्तःसुखोऽन्तरारामः स मोक्षं लभते ध्रुवम् । जाग्रत्स्वप्नसुषुप्तं च त्यक्त्वा स्थानत्रयं बुधः । तुरीयं पदमासाद्य न शोचति न काङ्क्षति । मनो । ९ ख. केवलम् । १० क. ख. असंशयं । ११ ख. भगवत्पादशा° । १२ क. ख. °द्धं सूक्ष्मं गुणातीतं सत्त्वाख्यं । १३ क. °यः । बद्धप° । १४ क. °सनो योगी स्वना° । १५ क. ख. °सं स° । १६ क. ख. °ज्य मुनयः पु° ।

अथ पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

तव वक्त्राब्धिसंभूतममृतं वाङ्मयं मुने । पिबतां नो द्विजश्रेष्ठ न तृप्तिरिह दृश्यते ॥ १
तस्माद्योगं मुने ब्रूहि विस्तरेण विमुक्तिदम् । सांख्यं च द्विपदां श्रेष्ठ श्रोतुमिच्छामहे वयम् ॥ २
[1]प्रज्ञावाञ्श्रोत्रियो यज्वा [2]ख्यातः प्राज्ञोऽनसूयकः[3] । सत्यधर्ममतिर्ब्रह्मन्कथं ब्रह्माधिगच्छति ॥ ३
तपसा ब्रह्मचर्येण सर्वत्यागेन मेधया । सांख्ये वा यदि वा योग एतत्पृष्टो वदस्व नः ॥ ४
मनसश्चेन्द्रियाणां च यथैकाग्र्यमवाप्यते । येनोपायेन पुरुषस्तत्त्वं व्याख्यातुमर्हसि ॥ ५

व्यास उवाच—

नान्यत्र ज्ञानतपसोर्नान्यत्रेन्द्रियनिग्रहात् । नान्यत्र सर्वसंत्यागात्सिद्धिं विन्दति कश्चन ॥ ६
महाभूतानि सर्वाणि पूर्वसृष्टिः स्वयंभुवः । भूयिष्ठं प्राणभृद्ग्रामे निविष्टानि शरीरिषु ॥ ७
भूमेर्देहो जलात्स्नेहो ज्योतिषश्चक्षुषी स्मृते । प्राणापानाश्रयो वायुः कोष्ठाकाशं शरीरिणाम् ॥ ८
क्रान्तौ विष्णुर्बले शक्रः कोष्ठेऽग्निर्भोक्तुमिच्छति । कर्णयोः प्रदिशः श्रोत्रे जिह्वायां वाक्सरस्वती
कर्णौ त्वक्चक्षुषी जिह्वा नासिका चैव पञ्चमी । दश तानीन्द्रियोक्तानि द्वाराण्याहारसिद्धये १०
शब्दस्पर्शौ तथा रूपं रसं गन्धं च पञ्चमम्* । इन्द्रियार्थान्पृथग्विद्यादिन्द्रियेभ्यस्तु नित्यदा ११
इन्द्रियाणि मनो युङ्क्ते +अवश्या(शा)निव राजिनः(लः) । मनश्चापि सदा युङ्क्ते भूतात्मा हृदयाश्रितः ॥ १२
इन्द्रियाणां तथैवैषां सर्वेषामीश्वरं मनः । नियमे च विसर्गे च भूतात्मा मनसस्तथा ॥ १३
इन्द्रियाणीन्द्रियार्थाश्च स्वभावश्चेतना मनः । प्राणापानौ च जीवश्च नित्यं देहेषु देहिनाम् ॥ १४
*आश्रयो नास्ति सत्त्वस्य गुणशब्दो न चेतनाः । सत्त्वं हि तेजः सृजति न गुणान्वै कथंचन ॥
एवं सप्तदशं देहं वृतं षोडशभिर्गुणैः । मनीषी मनसा विप्राः पश्यत्यात्मानमात्मनि ॥ १६
न ह्ययं चक्षुषा दृश्यो न च सर्वैरपीन्द्रियैः । मनसा तु प्रदीप्तेन महानात्मा प्रकाशते ॥ १७
अशब्दस्पर्शरूपं तच्च(च्चा) रसागन्धमव्ययम् । अशरीरं शरीरे[10] स्वे निरीक्षेत निरिन्द्रियम् ॥ १८
†अव्यक्तं सर्वदेहेषु मर्त्येषु परमार्चितम् । योऽनुपश्यति स[11] प्रेत्य कल्पते ब्रह्मभूयतः ॥ १९
विप्रे[12] विनयसंपन्नब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ २०
स हि सर्वेषु भूतेषु जङ्गमेषु ध्रुवेषु च । वसत्येको महानात्मा येन सर्वमिदं ततम् ॥ २१
सर्वभूतेषु चाऽऽत्मानं सर्वभूतानि चाऽऽत्मनि[13] । यदा पश्यति भूतात्मा[14] ब्रह्म संपद्यते तदा २२
यावानात्मनि वेदाऽऽत्मा तावानात्मा परात्मनि । य एवं सततं वेद सोऽमृतत्वाय कल्पते ॥ २३
सर्वभूतात्मभूतस्य सर्वभूतहितस्य[15] च । *देवापि मार्गे मुह्यन्ति अपदस्य पदैषिणः ॥ २४

---

* एतदग्रे कथंचनेत्यन्तं ख. पुस्तके त्रुटितम् । + एतदादि सदा युङ्क्त इत्यन्तो ग्रन्थः क. पुस्तके नास्ति । * अयं श्लोको ग. पुस्तक एव । † अयं श्लोकस्त्रुटितः ख. पुस्तके । * आर्षोऽयं संधिः ।

---

१ क. प्रज्ञावां । २ ग. ख्यातप्रज्ञो° । ३ ख. °कः । अभ्यासेन सदा ब्रह्म° । ग. °कः । अनागतगतिर्ब्र° । ४ ख. वाग्वे[illegible] । ५ [illegible] शक्रः । ख. शक्त्या । ६ क. °र्थाय स्व° । ७ क. °नाश्रयः । प्रा° । ८ क. कृतं । ९ क. [illegible] । १० क ख. [illegible] । ११ क. सर्वेभ्यः [illegible] न तु सूयते । वि° । १२ ग. °द्याभिजनसं° । १३ क. °नि । एवं [illegible] स । १४ ग. सर्वात्मा । १५ ख. °तस्य देहिनः । दे° ।

शकुन्तानामिवाऽऽकाशे मत्स्यानामिव चोदके । यथा गतिर्न[1] दृश्येत तथा ज्ञानविदां[2] गतिः २५
कालः पचति भूतानि सर्वाण्येवाऽऽत्मनाऽऽत्मनि । यस्मिंस्तु पच्यते कालस्तन्न वेदेह कश्चन[3] २६
न तदूर्ध्वं[4] न तिर्यक्च नाधो न च पुनः पुनः । न मध्ये[5] प्रतिगृह्णीते[6] नैव किंचिन्न कश्चन ॥ २७
सर्वे तत्स्था इमे लोका बाह्यमेषां न किंचन । यद्यप्यग्रे समागच्छेद्यथा बाणो गुणच्युतः ॥ २८
नैवान्तं कारणस्येयाद्यद्यपि स्यान्मनोजवः । तस्मात्सूक्ष्मतरं नास्ति नास्ति स्थूलतरं तथा ॥ २९
सर्वतःपाणिपादं तत्सर्वतोक्षिशिरोमुखम् । सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ ३०
तदेवाणोरणुतरं तन्महद्भ्यो महत्तरम् । तदन्तः सर्वभूतानां ध्रुवं तिष्ठन्न दृश्यते ॥ ३१
अक्षरं च क्षरं चैव द्वेधा भावोऽयमात्मनः । क्षरः सर्वेषु भूतेषु दिव्यं त्वमृतमक्षरम् ॥ ३२
नवद्वारं पुरं कृत्वा[7] हंसो हि नियतो वशी । ईदृशः सर्वभूतस्य स्थावरस्य चरस्य च[8] ॥ ३३
हानेनाभिविकल्पानां नराणां संचयेन च । शरीराणामजस्याऽऽहुर्हंसत्वं[9] पारदर्शिनः ॥ ३४
हंसोक्तं च क्षरं चैव कूटस्थं यत्तदक्षरम् । तद्विद्वानक्षरं प्राप्य जहाति प्राणजन्मनी ॥ ३५

व्यास उवाच—

भवतां पृच्छतां विप्रा यथावदिह तत्त्वतः । सांख्यं ज्ञानेन संयुक्तं यदेतत्कीर्तितं मया ॥ ३६
योगकृत्यं तु भो विप्राः[10] कीर्तयिष्याम्यतः परम् । एकत्वं बुद्धिमनसोरिन्द्रियाणां च सर्वशः ३७
आत्मनो व्यापिनो ज्ञानं ज्ञानमेतदनुत्तमम् । तदेतदुपशान्तेन दान्तेनाध्यात्मशीलिना ॥ ३८
आत्मारामेण[11] बुद्धेन बोद्धव्यं शुचिकर्मणा । योगदोषान्समुच्छिद्य पञ्च[12] यान्कवयो विदुः ॥ ३९
कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् । क्रोधं शमेन जयति कामं संकल्पवर्जनात् ॥ ४०
सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति । धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ॥ ४१
चक्षुः श्रोत्रं च मनसा मनो वाचं च कर्मणा । अप्रमादाद्भयं जह्याद्दम्भं प्राज्ञोपसेवनात् ॥ ४२
एवमेतान्योगदोषाञ्जयेन्नित्यमतन्द्रितः । अग्नींश्च ब्राह्मणांश्चाथ देवताः प्रणमेत्सदा ॥ ४३
वर्जयेदुद्धतां[13] वाचं हिंसायुक्तां मनो[14]नुगाम्[15] । ब्रह्मतेजोमयं शुक्रं[16] यस्य सर्वमिदं जगत्[17] ॥ ४४
एतस्य भूतभूतस्य दृष्टं स्थावरजङ्गमम् । ध्यानमध्ययनं दानं सत्यं[18] ह्रीरार्जवं क्षमा ॥ ४५
शौचं चैवाऽऽत्मनः शुद्धिरिन्द्रियाणां च निग्रहः । [19]एतैर्विवर्धते तेजः पाप्मानं चापकर्षति ॥ ४६
समः सर्वेषु भूतेषु लभ्या[20]लभ्येन वर्तयन् । धूतपाप्मा तु तेजस्वी लघ्वाहारो जितेन्द्रियः ॥ ४७
कामक्रोधौ वशे कृत्वा निषेवेद्ब्रह्मणः पदम् । मनसश्चेन्द्रियाणां च[21] कृत्वैकाग्र्यं समाहितः ॥ ४८
पूर्वरात्रे परार्धे च धारयेन्मन आत्मनः । जन्तोः पञ्चेन्द्रियस्यास्य यद्येकं क्लिन्नमिन्द्रियम् ॥ ४९
ततोऽस्य स्रवति[22] प्रज्ञा गिरेः पादादिवोदकम् । मनसः[23] पूर्वमादद्या[24]त्कूर्माणामिव मत्स्यहा ॥ ५०
ततः श्रोत्रं ततश्चक्षुर्जिह्वा घ्राणं च योगवित् । तत एतानि संयम्य मनसि स्थापयेद्यदि ॥ ५१
तथैवापोह्य संकल्पान्मनो ह्यात्मनि धारयेत् । पञ्चेन्द्रियाणि मनसि हृदि संस्थापयेद्यदि ॥ ५२

---

१ ख. °तिर्विनश्ये° । २ ख. °नस्य चोदयः । का° । ३ क. °न । नैवोर्ध्वं न । ४ क. °र्यगधो न च भाति पु° । ५ ग. मन्ये । ६ ग. °हृणीतो नै° । ७ क. °त्वा सोऽत्र वै नियतं वसेत् । ई° । ८ क. च । हानेनाऽऽगतक° । ९ क. °रीरं हि नरस्येह निःसर्वं पा° । १० ख. ग. °प्रा वर्त° । ११ ग. °रागेण । १२ क. ख. °ञ्च तान्क° । १३ ख. °येद्दुःखदां वा° । ग. °येत्कुथितां वा° । १४ क. °नोजवाम् । १५ ख. °म् । ब्राह्मं ते° । १६ क शक्रं । १७ ग. रसः । १८ क. °त्यं क्रोधाऽऽर्ज° । १९ ग. सम्यक्समर्थे° । २० ख. ग. लब्ध्वा लब्धेन । २१ ख. च तत्त्वैका° । २२ ख. क्षरति । २३ क. ख. मनसा । २४ क. °द्यात्कर्मणा° ।

यदैतान्यवतिष्ठन्ते मनःषष्ठानि चाऽऽत्मनि । प्रसीदन्ति च संस्थायां तदा ब्रह्म प्रकाशते ॥ ५३
विधूम इव दीप्तार्चिरादित्य इव दीप्तिमान् । वैद्युतोऽग्निरिवाऽऽकाशे[3] पश्यन्त्यात्मानमात्मनि ॥
सर्वं तत्र तु सर्वत्र व्यापकत्वाच्च दृश्यते । तं पश्यन्ति महात्मानो ब्राह्मणा ये मनीषिणः ॥ ५५
धृतिमन्तो महाप्राज्ञाः सर्वभूतहिते रताः । एवं परिमितं कालमाचरन्संशितव्रतः ॥ ५६
आसीनो हि रहस्येको गच्छेदक्षरसाम्यताम् । प्रमोहो भ्रम आवर्तो घ्राणं श्रवणदर्शने ॥ ५७
अद्भुतानि रसः स्पर्शः शीतोष्णमारुताकृतिः । प्रतिभानुपसर्गांश्च प्रतिसंगृह्य योगतः ॥ ५८
तांस्तत्त्वविदनादृत्य साम्येनैव निवर्तयेत् । कुर्यात्परिचयं योगे त्रैलोक्ये नियतो मुनिः ॥ ५९
गिरिशृङ्गे तथा चैत्ये वृक्षमूलेषु योजयेत् । संनियम्येन्द्रियग्रामं कोष्ठे भाण्डमना इव ॥ ६०
एकाग्रं चिन्तयेन्नित्यं योगान्नोद्विजते मनः । येनोपायेन शक्येत नियन्तुं चञ्चलं मनः ॥ ६१
तत्र युक्तो निषेवेत न चैव विचलेत्ततः । शून्यागाराणि चैकाग्रो निवासार्थमुपक्रमेत् ॥ ६२
नातिव्रजेत्परं वाचा कर्मणा मनसाऽपि वा । उपेक्षको यताहारो लब्धालब्धसमो भवेत् ॥ ६३
यश्चैनमभिनन्देत यश्चैनमभिवादयेत् । समस्तयोश्चाप्युभयोर्नाभिध्यायेच्छुभाशुभम् ॥ ६४
न प्रहृष्येत लाभेषु नालाभेषु च चिन्तयेत् । समः सर्वेषु भूतेषु सधर्मा मातरिश्वनः ॥ ६५
एवं स्वस्थात्मनः साधोः सर्वत्र समदर्शिनः । षण्मासान्नित्ययुक्तस्य शब्दब्रह्माभिवर्तते ॥ ६६
वेदनार्तान्परान्दृष्ट्वा समलोष्टाश्मकाञ्चनः । एवं तु निरतो मार्गे विरमेन्न विमोहितः ॥ ६७
अपि वर्णावकृष्टस्तु नारी वा धर्मकाङ्क्षिणी । तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ॥ ६८

अजं पुराणमजरं सनातनं यमिन्द्रियातिगमगोचरं द्विजाः ।
अवेक्ष्य चेमां परमेष्ठिसाम्यतां प्रयान्त्यनावृत्तिगतिं मनीषिणः ॥ ६८

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे सांख्ययोगनिरूपणं नाम पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३१२५

अथ षट्त्रिंशदधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

यद्येवं वेदवचनं कुरु कर्म त्यजेति च । कां दिशं विद्यया यान्ति कां च गच्छन्ति कर्मणा ॥ १
एतद्वै श्रोतुमिच्छामस्तद्भवान्प्रब्रवीतु नः । एतदन्योन्यवैरूप्यं वर्तते प्रतिकूलतः ॥ २

व्यास उवाच—

शृणुध्वं मुनिशार्दूला यत्पृच्छध्वं समासतः । कर्मविद्यामयौ चोभौ व्याख्यास्यामि क्षराक्षरौ ॥३
यां दिशं विद्यया यान्ति यां गच्छन्ति च कर्मणा । शृणुध्वं सांप्रतं विप्रा गहनं ह्येतदुत्तरम् ॥४

---

१ क. सच्छायां । २ ख °प्ताग्निरा° । ३ घ. °शे दृश्य° । ४ ख. सर्वतन्त्रं च स° । ५ क काष्ठे । ६ क. तादृङ्मना । ७ ख. एकान्ते । ८ क. °गात्मा चिन्तयन्परः । ये° । ९ क. ख. °नः । तं च यु° । १० क. नाभिष्वज्येत बालं वा क° । ११ क. °सा गिरा । उ° । १२ क जिताहारो । १३ क. लभ्यालभ्यस° । १४ ख °र्मात्मा मुनीश्वरः । ए° । १५ ग. °नार्ताः प्रजा दृ° । १६ ग. °त्तिपथं म° । १७ ख. ग. यदिदं वे° । १८ क. गातिं । १९ क. °द्यावेतौ व्या° । २० ग. चराचरौ । २१ ग. °रौ । द्वा° ।

अस्ति धर्म इति युक्तं नास्ति तत्रैव यो वदेत् । यक्षस्य सादृश्यमिदं यक्षस्येदं भवेदथ* ॥ ५
द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः । प्रवृत्तिलक्षणो धर्मो निवृत्तो वा विभाषितः ॥ ६
कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते । तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ ७
कर्मणा जायते प्रेत्य मूर्तिमान्षोडशात्मकः । विद्यया जायते नित्यमव्यक्तं ह्यक्षरात्मकम् ॥ ८
कर्म त्वेके प्रशंसन्ति स्वल्पबुद्धिरता नराः । तेन ते देहजा[1]लेन रमयन्त उपासते ॥ ९
ये तु बुद्धिं परां प्राप्ता धर्मनै[2]पुण्यदर्शिनः । न ते कर्म प्रशंसन्ति कूपं नद्यां पिबन्निव ॥ १०
कर्मणा फलमाप्नोति सुखदुःखे भवाभवौ । विद्यया तदवाप्नोति यत्र गत्वा न शोचति ॥ ११
न म्रियते यत्र गत्वा यत्र गत्वा न जायते । न जीर्यते यत्र गत्वा यत्र गत्वा न वर्धते ॥ १२
यत्र तद्ब्रह्म परममव्यक्तमचलं ध्रुवम् । अव्याकृतमनायाममृतं चा[3]धियोगवित् ॥ १३
द्वंद्वैर्न यत्र बाध्यन्ते मानसेन च कर्मणा । समाः सर्वत्र मैत्राश्च सर्वभूतहिते रताः ॥ १४
विद्यामयोऽन्यः पुरुषो द्विजाः कर्ममयोऽपरः । [4]विप्राश्चन्द्रे[5]समस्पर्शै[6]ः सूक्ष्मया कलया स्थि[7]तः ॥
तदेतदृषिणा प्रोक्तं विस्तरेणानुगीयते । [8]न वक्तुं शक्यते द्रष्टुं चक्र[9]तन्तुमिवाम्बरे ॥ १६
एकादशविकारात्मा कलासंभारसंभृतः । मूर्तिमानिति तं विद्याद्विप्राः कर्मगुणात्मकम् ॥ १७
देवो यः संश्रितस्तस्मिं[10]न्बुद्धीन्दुरिव पुष्करे । क्षेत्रज्ञं तं विजानीयान्नित्यं योगजितात्मकम् ॥ १८
तमो रजश्च सत्त्वं च ज्ञेयं [11]जीवगुणात्मकम् । जीवमात्मगुणं विद्यादात्मानं परमात्मनः ॥ १९
सचेतनं जीवगुणं वदन्ति [12]स चेष्टते[13] जीवगुणं च सर्वम् ।
ततः परं क्षेत्रविदो वदन्ति[14] प्रकल्पयन्तो भुवनानि सप्त ॥ २०

व्यास उवाच--

प्रकृत्यास्तु विकारा ये क्षेत्र[15]ज्ञा[16]स्ते परिश्रुताः । ते चैनं न प्रजानन्ति न जानाति स तानपि ॥
तैश्चैव कुरुते कार्यं म[17]नःषष्ठैरिहेन्द्रियैः । सुदान्तैरिव संयन्ता [18]दृढः परमवाजिभिः ॥ २२
[19]इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यः परमं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥ २३
महतः परमव्यक्तमव्यक्तात्परतोऽमृतम् । अमृता[20]न्न परं किंचित्सा काष्ठा परमा गतिः ॥ २४
एवं सर्वेषु भूतेषु गूढात्मा न प्रकाशते । दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ २५
अन्तरात्मनि संलीय मनःषष्ठानि मेधया । इन्द्रियैरिन्द्रियार्थांश्च बहुचित्तमचिन्तयन् ॥ २६
ध्याने[21]ऽपि परमं कृत्वा विद्यासंपादितं मनः । अनीश्वरः प्रशान्तात्मा ततो गच्छेत्परं पदम् २७
इन्द्रियाणां तु सर्वेषां वश्यात्मा चलितस्मृ[22]तिः । आत्मनः संप्रदानेन मर्त्यो मृत्युमुपाश्नुते ॥ २८
विहत्य सर्वसंकल्पान्सत्त्वे चित्तं निवेशयेत् । सत्त्वे चित्तं समावेश्य ततः कालं[23]जरो भवेत् ॥ २९
चित्तप्रसादेन यतिर्जहातीह शुभाशुभम् । प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमत्यन्तमश्नुते ॥ ३०

---

* इत ऊर्ध्वं सार्धश्लोको नास्ति क. पुस्तके ।

---

१ ख. °जालानि र° । ग. °जातानि र° । २ क. °मज्ञाः पुण्य° । ३ क. बाधयोगतः । ख. बाधियोगिता । ४ ख. विप्रश्च° । ५ ख. °न्द्रमसः स्पर्शात्स सूक्ष्मो लोकसंस्थि° । ग. °न्द्रमसं स्प° । ६ क. °स्पर्शं तत्सूक्ष्मक° । ग. स्पर्शसू° । ७ क. स्थितम् । ८ ख. न चक्रं शशिनं दृष्ट्वा चक्रत° । ९ क. चक्रस्तरुमिवापरे । १० क. °स्मिन्नब्धीन्दु° । ११ ख. जीवात्मकं गुणम् । १२ ख. स तिष्ठते चेतयते तु स° । १३ क. °ते चिन्तयन्तीह स° । १४ ग. °न्ति प्राकल्पयन्यो भु° । १५ क. °त्रज्ञे ते प° । १६ ख. °ज्ञाश्च प° । १७ ग. मनसश्चेन्द्रियैः सह । सु° । १८ ख. दृढैः । १९ क. ख. अनर्थेभ्यः । २० क. ख. °ताच्च प° । २१ क. °नेनोप° । २२ ख. °स्मृतः । आ° । २३ ग. °लंचरो ।

लक्षणं तु प्रसादस्य यथा स्वप्ने सुखं [१]भवेत्[२] । निर्वाते वा यथा दीपो दीप्यमानो न कम्पते ॥ ३१

एवं पूर्वापरे रात्रे युञ्जन्नात्मानमात्मना । लघ्वाहारो विशुद्धात्मा पश्यत्यात्मानमात्मनि ॥ ३२

रहस्यं सर्ववेदाना[३]मनैतिह्यमनागमम् । आत्मप्रत्ययकं शास्त्रमिदं पुत्रानुशासनम् ॥ ३३

धर्माख्यानेषु सर्वेषु सत्याख्यानेषु [४]यद्वसु[५] । दशवर्षसहस्राणि निर्मथ्यामृतमुद्धृतम् ॥ ३४

नवनीतं यथा[६] दध्नः काष्ठादग्निर्यथैव च । तथैव विदुषां ज्ञानं मुक्ति[७]हेतोः समुद्धृतम् ॥ ३५

स्नातकानामिदं शास्त्रं वाच्यं पुत्रानुशासनम् । तदिदं नाप्रशान्ताय नादान्ताय तपस्विने[८] ॥ ३६

नावेदविदुषे वाच्यं तथा नानुगताय च । नासूयकायानृजवे न चानिर्दिष्टकारिणे ॥ ३७

न तर्कशास्त्रदग्धाय तथैव पिशुनाय च । श्लाघिने श्लाघनीयाय प्रशान्ताय तपस्विने[९] ॥ ३८

इदं प्रियाय पुत्राय शिष्यायानुगताय तु । रहस्यधर्मं वक्तव्यं नान्यस्मै तु कथंचन । ३९

यद्प्यस्य महीं दद्याद्रत्नपूर्णामिमां नरः । इदमेव ततः श्रेय [१०]इति मन्येत तत्त्ववित् ॥ ४०

[११]अतो गुह्यतरार्थं तदध्यात्ममतिमानुषम् । [१२]यत्तन्महर्षिभिर्दृष्टं वेदान्तेषु च गीयते ॥ ४१

तद्युष्मभ्यं [१३]प्रयच्छामि यन्मां पृच्छत सत्तमाः । यन्मे मनसि वर्तेत यस्तु वो हृदि संशयः ॥

श्रुतं भवद्भिस्तत्सर्वं किमन्यत्कथयामि वः ॥ ४२

मुनय ऊचुः—

अध्यात्मं विस्तरेणेह पुनरेव वदस्व नः । यदध्यात्मं यथा [१४]विप्रो भगवन्नृषिसत्तम ॥ ४३

व्यास उवाच—

अध्यात्मं यदिदं विप्राः पुरुषस्येह [१५]पठ्यते । युष्मभ्यं कथयिष्यामि [१६]तस्य व्याख्याऽवधार्यताम् ॥

भूमिरापस्तथा ज्योतिर्वायुराकाशमेव च । महाभूतानि[१७] यश्चैव सर्वभूतेषु भूतकृत् ॥ ४५

मुनय ऊचुः—

आ[१८]कारं तु भवेद्यस्य यस्मिन्देहं न पश्यति । आकाशाद्यं शरीरेषु कथं तदुपव[१९]र्णयेत् ॥

[२०]इन्द्रिया[२१]णां गुणाः केचित्कथं तानुपलक्षयेत् ॥ ४६

व्यास उवाच—

एतद्वो वर्णयिष्यामि यथा[२२]वदनुदर्शनम् । शृणुध्वं तदिहैकाग्र्या यथातत्त्वं यथा च तत् ॥ ४७

शब्दः श्रोत्रं तथा खानि त्रयमाकाशलक्षणम् । प्राणश्चेष्टा तथा स्पर्श एते वायुगुणास्त्रयः ॥ ४८

रूपं चक्षुर्विपाकश्च त्रिधा ज्योतिर्विधीयते । रसो[२३]ऽथ रसनं स्वेदो गुणास्त्वेते त्रयोऽम्भसाम् ॥ ४९

घ्रेयं घ्राणं शरीरं च भूमेरेते गुणास्त्रयः । एतावानिन्द्रियग्रामो व्याख्यातः पाञ्चभौतिकः ॥ ५०

वायोः स्पर्शो रसोऽद्भ्यश्च ज्योतिषो रूपमुच्यते । आकाशप्रभवः शब्दो गन्धो भूमिगुणः स्मृतः

मनो बुद्धिः स्वभावश्च गुणा एते स्वयोनि[२४]जाः । [२५]ते गुणानतिवर्तन्ते गुणेभ्यः परमा मताः ॥ ५२

यथा कूर्म इवाङ्गानि प्रसार्य संनियच्छति । एवमेवेन्द्रियग्रामं बुद्धिश्रेष्ठो नियच्छति[२६] ॥ ५३

---

१ ख. स्वयम् । २ ख. °त् । शनैर्वाति य° । ३ ख. °मनौपम्यमनामयम् । ४ क. यद्वनु । ख. वस्तुषु । ५ ग. °सु । दर्शे दशस° । ६ क. °था दुग्धात्काष्ठा° । ७ ख. °हेतौ स° । ८ ग. °ने । इदं प्रियाय पुत्राय शिष्यायानु° । ९ ग. °ने । र° । १० ग. इदं । ११ क. ख. ततो । १२ क. यत्र गूढं समुद्दिष्टं । १३ क. ख. प्रवक्ष्यामि । १४ क. ख. विप्र । १५ ख. इष्यते । १६ ग. तच्छृणुध्वमतन्द्रिताः । भू° । १७ ख. गं. °नि पञ्चैव । १८ ग. °कारात्तात वै यस्य । ख °काशस्तु भ° । १९ क. °र्णनम् । इ° । २० ग. इन्द्रियाणि । २१ क. ख. °णां विचरतां कथं । २२ क. ख. °वत्तदुपासन° । २३ क. °सो द्रवस्तथा स्वे° । २४ क. °जाः । एते त्रयोऽभिव° । २५ ख. न । २६ ख. °ति । न तूर्ध्वं ।

यदूर्ध्वं पादतलयोरवार्कोर्द्ध्वं च(गश्च) पश्यति । एतस्मिन्नेव कृत्ये सा वर्तते बुद्धिरुत्तमा ॥ ५४
गुणैस्तु[1] नीयते बुद्धिर्बुद्धिरेवेन्द्रियाण्यपि । मनःषष्ठानि सर्वाणि बुद्ध्या[2] भावात्[3]कुतो गुणाः ॥ ५५
इन्द्रियाणि नरैः पञ्च षष्ठं तन्मन उच्यते । सप्तमीं बुद्धिमेवाऽऽहुः क्षेत्रज्ञं विद्धि चाष्टमम् ॥ ५६
चक्षुरालोकनायैव[4] संशयं कुरुते मनः । बुद्धिरध्यवसानाय साक्षी क्षेत्रज्ञ उच्यते ॥ ५७
रजस्तमश्च सत्त्वं च त्रय एते स्वयोनिजाः । समाः[5] सर्वेषु भूतेषु तान्गुणानुपलक्षयेत् ॥ ५८
तत्र यत्प्रीतिसंयुक्तं किंचिदात्मनि लक्षयेत् । प्रशान्तमिव संयुक्तं सत्त्वं तदुपधारयेत् ॥ ५९
यत्तु संतापसंयुक्तं काये मनसि वा भवेत् । प्रवृत्तं रज इत्येवं तत्र चाप्युपलक्षयेत् ॥ ६०
यत्तु[6] संमोहसंयुक्तमव्यक्तं[7] विषमं भवेत् । अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ॥ ६१
प्रहर्षः प्रीतिरानन्दं स्वाम्यं स्वस्थात्मचित्तता । अकस्माद्[8]यदि वा कस्माद्वदन्ति सात्त्विकान्गुणान्
अभिमानो[9] मृषावादो लोभो मोहस्तथा क्षमा । लिङ्गानि रजसस्तानि वर्तन्ते[10] हेतुतत्त्वतः ६३
तथा मोहः प्रमादश्च तन्द्री निद्राऽप्रबोधिता । कथंचिदभिवर्तन्ते विज्ञेयास्तामसा गुणाः ॥ ६४
मनः प्रसृजते भावं बुद्धिरध्यवसायिनी[11] । हृदयं प्रियमेवेह त्रिविधा कर्मचोदना ॥ ६५
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा [12]परः स्मृतः ॥ ६६
बुद्धिरात्मा मनुष्यस्य बुद्धिरेवाऽऽत्मनायिका । यदा विकुरुते भावं[13] तदा भवति सा मनः ॥ ६७
इन्द्रियाणां पृथग्भावाद्बुद्धिर्विकुरुते ह्यनु[14] । शृण्वती भवति श्रोत्रं स्पृशती स्पर्श उच्यते ॥ ६८
पश्यन्ती च भवेद्दृष्टी रसन्ती रसना भवेत् । जिघ्रन्ती भवति घ्राणं बुद्धिर्विकुरुते पृथक् ॥ ६९
इन्द्रियाणि तु तान्याहुस्तेषां[15] वृत्त्या वितिष्ठति । तिष्ठति पुरुषे बुद्धिर्[16]बुद्धिभावव्यवस्थिता ॥ ७०
कदाचिल्लभते प्रीतिं कदाचिदपि शोचति । न सुखेन च दुःखेन कदाचिदिह मुह्यते ॥ ७१
स्वयं भावात्मिका भावांस्त्रीनेतान्[17]अतिवर्तते । सरितां सागरो भर्ता महावेलामिवोर्मिमान् ॥ ७२
यदा प्रार्थयते किंचित्तदा भवति सा[18] मनः । अधिष्ठाने च वै बुद्ध्या पृथगेतानि संस्मरेत् ॥ ७३
इन्द्रियाणि च मेध्यानि विचेतव्यानि कृत्स्नशः[19] । सर्वाण्येवानुपूर्वेण यथा[20]यदा च विधीयते ॥ ७४
अविभागमना[21] बुद्धिर्भावो मनसि वर्तते । प्रवर्तमान[22]स्तु रजः सत्त्वमप्यतिवर्तते[23] ॥ ७५
ये वै भावेन वर्तन्ते सर्वेष्वेतेषु ते त्रिषु । अन्वर्थान्संप्रवर्तन्ते रथनेमिमरा इव ॥ ७६
प्रदीपार्थं[24] मनः कुर्यादिन्द्रियैर्बुद्धिसत्तमैः । निश्चरद्भिर्[25]यथायोगमुदासीनैर्यदृच्छया ॥ ७७
एवंस्वभावमेवेदमिति बुद्ध्वा[26] न मुह्यति । अशोचन्संप्रहृष्यंश्च नित्यं विगतमत्सरः ॥ ७८
न ह्यात्मा शक्यते द्रष्टुमिन्द्रियैः कामगोचरैः । प्रवर्तमानैरनेकैर्दुर्धरैरकृतात्मभिः ॥ ७९
तेषां[27] तु मनसा रश्मीन्यदा सम्यङ्नियच्छति । तदा प्रकाशतेऽस्याऽऽत्मा दीपदीप्ता यथाऽऽ-
कृतिः ॥ ८०

---

१ क. गुणान्ते नी° । ख. गुणागुणाय° । २ क. बुद्धिभाजः कृता गु° । ३ ग भावे ततो । ४ ग. °लोचना° । ५ क. ख. समः । ६ ख. °त्तु व्यामो° । ७ ग. °व्यक्तविषयं भ° । ८ क. अस्माकं यदि । ९ ख. °नो विवादो वा लो° । १० ग. °न्ते देहत° । ११ ग. °नी । कृत्यं प्रियाप्रिये चैव त्रि° । १२ ख. परो मतः । १३ ख. वाचं । १४ क. मनः । १५ ख. °स्तेषु दृश्योऽवति° । ग. °स्तेषु दृश्ये च ति° । १६ क. °द्धिः सदा भा° । १७ ख. ग. °नभिव° । १८ क. सागरः । विष्टा-विनिर्यवं भर्ता पृ° । ख. सागरः । आविष्टामिव वै बुद्ध्या पृ° । १९ क. °शः । भूतान्येवा° । २० क. यथावदभिर्धी° । २१ ख. °मनो बु° । २२ क. °मानोरुर° । ख. °मानं तु र° । २३ ग. °ते । यैरेव भावा वर्तन्ते भावाः सर्वेषु तेषु च । भ° । २४ क. प्रदीप्यर्थं । २५ क. निश्चसद्भि° । २६ ख. ग. बुद्ध्या । २७ ख. °षां सुम° ।

सर्वेषामेव भूतानां तमस्युपगते यथा। प्रकाशं भवते सर्वं तथैवमुपधार्यताम् ॥ ८१
यथा वारिचरः पक्षी न लिप्यति जले चरन्। विमुक्तात्मा तथा योगी गुणदोषैर्न लिप्यते ८२
एवमेव कृतप्रज्ञो न दोषैर्विषयांश्चरन्। असज्जमानः सर्वेषु न कथंचित्प्रलिप्यते ॥ ८३
त्यक्त्वा पूर्वकृतं कर्म रतिर्यस्य सदाऽऽत्मनि। सर्वभूतात्मभूतस्य गुणसङ्गेन सज्जतः ॥ ८४
स्वयमात्मा प्र[2]सवति गु[3]णेष्वपि [4]कदाचन। न गुणा विदुरात्मानं गुणान्वेद स सर्वदा ॥ ८५
परिदध्याद्गुणानां स द्रष्टा चैव यथातथम्। सत्त्वक्षेत्रज्ञयोरेवमन्तरं लक्षयेन्नरः ॥ ८६
सृजते तु गुणानेक एको न सृजते गुणान्। पृथग्भूतौ प्रकृत्यैतौ संप्रयुक्तौ च सर्वदा ॥ ८७
यथाऽश्मना हिरण्यस्य संप्रयुक्तौ तथैव तौ। मशकौदुम्बरौ वाऽपि संप्रयुक्तौ यथा सह ॥ ८८
इषिका वा यथा मुञ्जे पृथक्च सह चैव ह। तथैव सहितावेतौ अन्योन्यस्मिन्प्रतिष्ठितौ ॥ ८९

इति श्रीमहापुराणे आदिब्राह्मे व्यासर्षिसंवादे षट्त्रिंशदधिक-
द्विशततमोऽध्यायः ॥ २३६ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३२१४

अथ सप्तत्रिंशदधिकद्विशततमोऽध्यायः।

व्यास उवाच—

सृजते तु गुणान्सत्त्वं क्षेत्रज्ञस्त्वधितिष्ठति। गुणान्विक्रि[1]यतः सर्वानुदासीनवदीश्वरः ॥ १
स्वभावयुक्तं तत्सर्वं [7]यदिमान्सृजते गुणान्। ऊर्णनाभिर्यथा सूत्रं सृजते तद्गुणांस्तथा ॥ २
[8]प्रवृत्ता न निवर्तन्ते प्रवृत्तिर्नोपलभ्यते। [9]एवमेके व्यवस्यन्ति निवृत्तिमिति चापरे ॥ ३
उभयं संप्रधार्यैतदध्यवस्येद्यथामति। अनेनैव विधानेन भवेद्वै संशयो महान् ॥ ४
अनादिनिधनो ह्यात्मा तं बुद्ध्वा [10]विहरेन्नरः। अक्रुध्यन्नप्रहृष्यंश्च नित्यं विगतमत्सरः ॥ ५
इत्येवं हृदये सर्वो [11]बुद्धिचिन्ता[12]मयं दृढम्। अनित्यं सुखमासीन[13]मशोच्यं छिन्नसंशयः ॥ ६
तरयेत्प्रच्युतां पृथ्वीं यथा पूर्णां नदीं नराः। अवगाह्य च विद्वांसो विप्रा लोलमिमं त[14]था ॥ ७
न तु तप्यति वै विद्वान्स्थले चरति तत्त्ववित्। एवं विचिन्त्य चाऽऽत्मानं केवलं ज्ञानमात्मनः ८
*तां(तं) तु बुद्ध्वा नरः सर्गं भूतानामागतिं गतिम्। समचेष्टश्च वै सम्यग्लभते शममुत्तमम् ॥ ९
एतद्विजन्मसामग्र्यं ब्राह्मणस्य विशेषतः। आत्मज्ञानसमस्नेहपर्याप्तं तत्परायण[15]म् ॥ १०
तत्त्वं बुद्ध्वा भवेद्बुद्धः किमन्य[16]द्[17]बुद्धलक्षणम्। विज्ञायैतद्विमुच्यन्ते कृतकृत्या मनीषिणः ॥ ११

न भवति विदुषां महद्भयं यदविदुषां सुमहद्भयं परत्र।
न हि गतिरधिकाऽस्ति कस्यचिद्भवति हि या विदुषः सनातनी ॥ १२

---

* एतच्छ्लोकद्वयं नास्ति ग. पुस्तके।

---

१ ग. °तः । मूर्तिमा° । २ ग. प्रसराति । ३ ग. गुणानपि । ४ क. ख. कथंचन । ५ क. ख. तद्गुच । ६ ख. °यते स° । ७ क. यदात्मा सृज° । ८ ग. प्रध्वस्ता । ९ क. एकमेव व्य° । १० ग. विरहेन्न° । ११ क. बुद्धिं चि° । १२ क. °मयां दृढाम् । १३ क. ख. °मसाध्यं छि° । १४ क. °था । नानुलिप्येत वै । १५ क. ख. °म् । एतद्बुद्ध्वा । १६ क. °न्यद्बोधल° । १७ ग. °द्बुद्धिल° ।

लोके मातरमसूयते नरस्तत्र देवमनिरीक्ष्य शोचते ।
तत्र चेत्कुशलो न शोचते ये विदुस्तदुभयं कृताकृतम् ॥ १३
यत्करोत्यनभिसंधिपूर्वकं तच्च निन्दयति यत्पुरा कृतम् ।
यत्प्रियं तदुभयं न वाऽप्रियं तस्य तज्जनयतीह कुर्वतः ॥ १४

मुनय ऊचुः—

यस्माद्धर्मात्परो धर्मो विद्यते नेह कश्चन । यो विशिष्टश्च भूतेभ्यस्तद्भवान्प्रब्रवीतु नः ॥ १५

व्यास उवाच—

धर्मं च संप्रवक्ष्यामि पुराणमृषिभिः स्तुतम् । विशिष्टं सर्वधर्मेभ्यः शृणुध्वं मुनिसत्तमाः ॥ १६
इन्द्रियाणि प्रमाथीनि बुद्ध्या संयम्य तत्त्वतः । सर्वतः प्रसृतानीह पिता बालानिवाऽऽत्मजान् ॥
मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं परमं तपः । विज्ञेयः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥ १८
तानि सर्वाणि संधाय मनःषष्ठानि मेधया । आत्मतृप्तः स एवाऽऽसीद्बहुचिन्त्यमचिन्तयन् ॥ १९
गोचरेभ्यो निवृत्तानि यदा स्थास्यन्ति वेश्मनि । तदा चैवाऽऽत्मनाऽऽत्मानं परं द्रक्ष्यथ शाश्वतम्
सर्वात्मानं महात्मानं विधूममिव पावकम् । प्रपश्यन्ति महात्मानं ब्राह्मणा ये मनीषिणः ॥ २१
यथा पुष्पफलोपेतो बहुशाखो महाद्रुमः । आत्मनो नाभिजानीते क्व मे पुष्पं क्व मे फलम् ॥ २२
एवमात्मा न जानीते क्व गमिष्ये कुतोऽन्वहम् । अन्यो ह्यस्यान्तरात्माऽस्ति यः सर्वमनुपश्यति ॥
ज्ञानदीपेन दीप्तेन पश्यत्यात्मानमात्मना । दृष्ट्वाऽऽत्मानं तथा यूयं विरागा भवत द्विजाः ॥ २४
विमुक्ताः सर्वपापेभ्यो मुक्तत्वच इवोरगाः । परां बुद्धिमवाप्येहाप्यचिन्ता विगतज्वराः ॥ २५
सर्वतःस्रोतसं घोरां नदीं लोकप्रवाहिणीम् । पञ्चेन्द्रियग्राहवतीं मनःसंकल्परोधसम् ॥ २६
लोभमोहतृणच्छन्नां कामक्रोधसरीसृपाम् । सत्यतीर्थानृतक्षोभां क्रोधपङ्कां सरिद्वराम् ॥ २७
अव्यक्तप्रभवां शीघ्रां कामक्रोधसमाकुलाम् । प्रतरध्वं नदीं बुद्ध्या दुस्तरामकृतात्मभिः ॥ २८
संसारसागरगमां योनिपातालदुस्तराम् । आत्मजन्मोद्भवां तां तु जिह्वावर्तदुरासदाम् ॥ २९
यां तरन्ति कृतप्रज्ञा धृतिमन्तो मनीषिणः । तां तीर्णः सर्वतो मुक्तो विधूतात्माऽऽत्मवाञ्शुचिः
उत्तमां बुद्धिमास्थाय ब्रह्मभूयाय कल्पते । उत्तीर्णः सर्वसंक्लेशान्प्रसन्नात्मा विकल्मषः ॥ ३१
भूयिष्ठानीव भूतानि सर्वस्थानान्निरीक्ष्य च । अक्रुध्यन्नप्रसीदंश्च ननृशंसमतिस्तथा ॥ ३२
ततो द्रक्ष्यथ सर्वेषां भूतानां प्रभवाप्ययम् । एतद्धि सर्वधर्मेभ्यो विशिष्टं मेनिरे बुधाः ॥ ३३
धर्मं धर्मभृतां श्रेष्ठा मुनयः सत्यदर्शिनः । आत्मानो व्यापिनो विप्रा इति पुत्रानुशासनम् ॥ ३४
प्रयताय प्रवक्तव्यं हितायानुगताय च । आत्मज्ञानमिदं गुह्यं सर्वगुह्यतमं महत् ॥ ३५
अब्रवं यदहं विप्रा आत्मसाक्षिकमञ्जसा । नैव स्त्री न पुमानेवं न चैवेदं नपुंसकम् ॥ ३६
अदुःखमसुखं ब्रह्म भूतभव्यभवात्मकम् । नैतज्ज्ञात्वा पुमान्स्त्री वा पुनर्भवमवाप्नुयात् ॥ ३७
यथा मतानि सर्वाणि तथैतानि यथा तथा । कथितानि मया विप्रा भवन्ति न भवन्ति च ॥ ३८
तत्प्रीतियुक्तेन गुणान्वितेन पुत्रेण सत्पुत्रदयान्वितेन ।
दृष्ट्वा हितं प्रीतमना यदर्थं ब्रूयात्सुतस्येह यदुक्तमेतत् ॥ ३९

१ क. लोकमा° । २ ग. °स्तत्तमेव च नि° । ३ क. बुद्ध्वा । ४ क. ख. °नि पर्वतस्थो नि° । ५ क. ख. सत्यवादिनः । ६ ग. इदं विप्रान्° । ७ क. °त्मशान्तिकरं परम् । नै° । ८ ग. गतानि ।

मुनय ऊचुः—

मोक्षः पितामहेनोक्त उपायान्नानुपायतः । तमुपायं यथान्यायं श्रोतुमिच्छामहे मुने ॥ ४०

व्यास उवाच—

अस्मासु तन्महाप्राज्ञा युक्तं निपुणदर्शनम् । यदुपायेन सर्वार्थान्मृगयध्वं सदाऽनघाः ॥ ४१

घटोपकरणे बुद्धिर्घटोत्पत्तौ न सा मता । एवं धर्माद्युपायार्थे नान्यधर्मेषु कारणम् ॥ ४२

पूर्वे समुद्रे यः पन्था न स गच्छति पश्चिमम् । एकः पन्था हि मोक्षस्य तच्छृणुध्वं ममानघाः ४३

क्षमया क्रोधमुच्छिन्द्यात्कामं संकल्पवर्जनात् । सत्त्वसंसेवनाद्धीरो निद्रामुच्छेत्तुमर्हति ॥ ४४

अप्रमादाद्भयं रक्षेद्रक्षेत्क्षेत्रं च संविदम् । इच्छां द्वेषं च कामं च धैर्येण विनिवर्तयेत् ॥ ४५

निद्रां च प्रतिभां चैव ज्ञानाभ्यासेन तत्त्ववित् । उपद्रवांस्तथा योगी हितजीर्णमिताशनात् ॥ ४६

लोभं मोहं च संतोषाद्विषयांस्तत्त्वदर्शनात् । अनुक्रोशादधर्मं च जयेद्धर्ममुपेक्षया ॥ ४७

आयत्या च जयेदाशां सामर्थ्यं सङ्गवर्जनात् । अनित्यत्वेन च स्नेहं क्षुधां योगेन पण्डितः ॥ ४८

कारुण्येनाऽऽत्मनाऽऽत्मानं तृष्णां च परितोषतः । उत्थानेन जयेत्तन्द्रां वितर्कं निश्चयाज्जयेत् ॥

मौनेन बहुभाषां च शौर्येण च भयं जयेत् । यच्छेद्वाङ्मनसी बुद्ध्या तां यच्छेज्ज्ञानचक्षुषा ॥ ५०

ज्ञानमात्मा महान्यच्छेत्तं यच्छेच्छान्तिरात्मनः । तदेतदुपशान्तेन बोद्धव्यं शुचिकर्मणा ॥ ५१

योगदोषान्समुच्छिद्य पञ्च यान्कवयो विदुः । कामं क्रोधं च लोभं च भयं स्वप्नं च पञ्चमम् ५२

परित्यज्य निषेवेत यथावद्योगसाधनात् । ध्यानमध्ययनं दानं सत्यं ह्रीरार्जवं क्षमा ॥ ५३

शौचमाचारतः शुद्धिरिन्द्रियाणां च संयमः । एतैर्विवर्धते तेजः पाप्मानमुपहन्ति च ॥ ५४

सिध्यन्ति चास्य संकल्पा विज्ञानं च प्रवर्तते । धूतपापः स तेजस्वी लघ्वाहारो जितेन्द्रियः ॥ ५५

कामक्रोधौ वशे कृत्वा निर्विशेद्ब्रह्मणः पदम् । अमूढत्वमसङ्गित्वं कामक्रोधविवर्जनम् ॥ ५६

अदैन्यमनुदीर्णत्वमनुद्वेगो ह्यवस्थितिः । एष मार्गो हि मोक्षस्य प्रसन्नो विमलः शुचिः ॥

तथा वाक्कायमनसां नियमाः कामतोऽव्ययाः ॥ ५७

इति श्रीमहापुराणे आदिब्राह्मे सांख्ययोगनिरूपणं नाम सप्तत्रिंशदधिक-
द्विशततमोऽध्यायः ॥ २३७ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३२७१

अथाष्टात्रिंशदधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

सांख्यं योगस्य नो विप्र विशेषं वक्तुमर्हसि । तत्र धर्मज्ञ सर्वं हि विदितं मुनिसत्तम ॥ १

व्यास उवाच—

सांख्याः सांख्यं प्रशंसन्ति योगान्योगविदुत्तमाः । वदन्ति कारणैः श्रेष्ठैः स्वपक्षोद्भवनाय वै ॥

अनीश्वरः कथं मुच्येदित्येवं मुनिसत्तमाः । वदन्ति कारणैः श्रेष्ठं योगं सम्यङ्मनीषिणः ॥ ३

---

१ ग. मुक्तं । २ क. °र्थान्प्राप्नुवध्वं । ३ क. °र्घटेत्युक्ते न । ४ ख. नानाध° । ५ क. °क्षगात् । आ° । ६ क. आपत्त्या । ७ ख. द. °दाशामर्थं सङ्गविव° । ८ ग. उत्ताने° । ९ क. °न्द्रां द्वापरं धर्मनिर्णयात् । मौ° । १० ख. °साध-नम् । ध्या° । ११ ग. °गा योगं द्विजातयः । वि° ।

*वदन्ति कारणं वेदं सांख्यं सम्यग्द्विजातयः । विज्ञायेह गतीः सर्वा [1]विरक्तो विषयेषु यः ४
ऊर्ध्वं स देहात्सुव्यक्तं विमुच्येदिति नान्यथा । एतदाहुर्महाप्राज्ञाः सांख्यं वै मोक्षदर्शनम् ॥ ५
स्वपक्षे कारणं ग्राह्यं समर्थं वचनं हितम् । +शिष्टानां हि मतं ग्राह्यं भवद्भिः शिष्टसंमतैः ॥ ६
प्र[2]त्यक्षं हेतवो योगाः सांख्याः शास्त्रविनि[3]श्चयाः । उभे चैते मते तत्त्वे समवेते द्विजोत्तमाः ॥ ७
उभे चैते मते ज्ञाते [4]मुनीन्द्राः शिष्टसंमते । अनुष्ठिते यथाशास्त्रं नयेतां परमां गतिम् ॥ ८
तुल्यं शौचं तयोर्युक्तं [5]दया भूतेषु [6]चानघाः । व्रतानां धारणं तुल्यं दर्शनं त्वसमं तयोः ॥ ९

मुनय ऊचुः—

यदि तुल्यं व्रतं शौचं दया चात्र महामुने । तुल्यं तद्दर्शनं कस्मात्तन्नो ब्रूहि द्विजोत्तम ॥ १०

व्यास उवाच—

रागं मोहं तथा स्नेहं कामं क्रोधं च केवलम् । योगास्थिरोदितान्दोषान्पञ्चैतान्प्राप्नुवन्ति तान् ॥
यथा वाऽनिमिषाः स्थूलं जालं छित्त्वा पुनर्जलम् । प्राप्नुवन्ति तथा योगात्तत्पदं वीतकल्मषाः ॥
तथैव वागुरां छित्त्वा बलवन्तो यथा मृगाः । प्राप्नुयुर्विमलं मार्गं विमुक्ताः सर्वबन्धनैः ॥ १३
लोभजानि तथा विप्रा बन्धनानि बलान्विताः । छित्त्वा [7]योगात्परं मार्गं गच्छन्ति विमलं शुभम्
[8]अचलास्त्वाविला विप्रा वागुरासु तथाऽपरे । विनश्यन्ति न संदेहस्तद्वद्योगबलादृते ॥ १५
बलहीनाश्च विप्रेन्द्रा यथा जालं गता द्विजाः । बन्धं न गच्छन्त्यनघा योगास्ते तु सुदुर्लभाः[9] १६
यथा च शकुनाः सूक्ष्मं प्राप्य जालमरिंदमाः । तत्राशक्ता विपद्यन्ते मुच्यन्ते तु बलान्विताः ॥
कर्मजैर्बन्धनैर्बद्धास्तद्वद्योगपरा द्विजाः । अबला न विमुच्यन्ते मुच्यन्ते च बलान्विताः ॥ १८
अल्पकश्च यथा विप्रा वह्निः शाम्यति दुर्बलः । आक्रान्त इन्धनैः स्थूलैस्तद्वद्योगबलः स्मृतः १९
स एव च तदा विप्रा वह्निर्जातबलः पुनः । समीरणगतः कृत्स्नां दहेत्क्षिप्रं महीमिमाम् ॥ २०
[10]तत्त्वज्ञानबलो योगी दीप्ततेजा महाबलः । अन्तकाल इवाऽऽदित्यः कृत्स्नं संशोषयेज्जगत् ॥ २१
दुर्बलश्च यथा विप्राः स्रोतसा [11]ह्रियते नरः । बलहीनस्तथा योगी [12]विषयैर्ह्रियते च सः ॥ २२
तदेव तु यथा स्रोतो विष्कम्भयति वारणः । तद्वद्योगबलं लब्ध्वा न भवेद्विषयैर्हृतः ॥ २३
विशन्ति वा [13]वशाद्वाऽथ योगाद्योगबलान्विताः । प्रजापतीन्मनून्सर्वान्महाभूतानि चेश्वराः ॥ २४
न यमो नान्तकः [14]क्रुद्धो न मृत्युर्भीमविक्र[15]मः । विशन्ते तद्द्विजाः सर्वे योगस्यामिततेजसः ॥ २५
आ[16]त्मनां च सहस्राणि बहूनि द्विजसत्तमाः । योगं कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत् ॥ २६
प्राप्नुयाद्विषयान्कश्चित्पुनश्चोग्रं तपश्चरेत् । संक्षिप्येच्च पुनर्विप्राः सूर्यस्तेजोगुणानिव ॥ २७
बलस्थस्य हि योगस्य [17]बलार्थं मुनिसत्तमाः । विमोक्षप्रभवं विष्णुमुपपन्नमसं[18]शयम् ॥ २८
बलानि योगप्रोक्तानि मयैतानि द्विजोत्तमाः । निदर्शनार्थं सूक्ष्माणि वक्ष्यामि च पुनर्द्विजाः २९
आत्मनश्च समाधाने धारणां प्रति वा द्विजाः । निदर्शनानि सूक्ष्माणि शृणुध्वं मुनिसत्तमाः ३०
अप्रमत्तो यथा धन्वी लक्ष्यं हन्ति समाहितः । युक्तः सम्यक्तथा योगी मोक्षं प्राप्नोत्यसंशयम् ॥

* इदमर्धं क. पुस्तके नास्ति ।+ इदमर्धं क. पुस्तके नास्ति ।

१ ख. चरित्वा । २ ग. °त्यक्षहेतुका यो° । ३ क. °श्चये । उ° ४ ख. मुनिभिः । ५ ग. यदा । ६ क. ख. मानवाः । ७ ख. योगपरं । ८ क. ख. अबला° । ९ क. ख. दुर्लभः । १० क. तद्वज्ज्ञान° । ११ ग. ह्रीयते । १२ ग. °यैर्ह्रीय° । १३ क. °शा नार्यो यो° । १४ क. क्रूरो । १५ ख. °मः । ईशतस्तु द्विजाः । १६ ख. °त्मना च । १७ ग. बन्धने यस्य म° । १८ क. ख. °शयः । ब° ।

स्नेहपात्रे यथा पूर्णे मन आधाय निश्चलम् । पुरुषो युक्त[1] आरोहेत्सोपानं युक्तमानसः ॥ ३२
मुक्तस्तथाऽयमात्मानं योगं तद्वत्सुनिश्चलम् । करोत्यमलमात्मानं भास्करोपमदर्शने ॥ ३३
यथा च नावं विप्रेन्द्राः कर्णधारः समाहितः । महार्णवगतां शीघ्रं नयेद्विप्रांस्तु पत्तनम् ॥ ३४
तद्वदात्मसमाधानं युक्तो योगेन[2] योगवित् । दुर्गमं स्थानमाप्नोति हित्वा देहमिमं द्विजाः ॥ ३५
सारथिश्च यथा युक्तः सदश्वान्सुसमाहितः । देशमिष्टं नयत्याशु धन्विनं पुरुषर्षभम् ॥ ३६
तथैव च द्विजा योगी धारणासु[3] समाहितः । प्राप्नोत्याशु परं स्थानं लक्ष्यमुक्त इवाऽऽशुगैः[4] ३७
आविश्याऽऽत्मनि चाऽऽत्मानं योऽवतिष्ठति सोऽचलः। पाशं हत्वेव मीनानां पदमाप्नोति सोऽजरम्
नाभ्यां[5] शीर्षे च कुक्षौ च हृदि वक्षसि पार्श्वयोः । दर्शने श्रवणे वाऽपि घ्राणे[6] चामितविक्रमः ॥
स्थानेष्वेतेषु यो योगी महाव्रतसमाहितः । आत्मना सूक्ष्ममात्मानं युङ्क्ते सम्यग्द्विजोत्तमाः ॥४०
सुशीघ्रमचलप्रख्यं कर्म दग्ध्वा शुभाशुभम् । उत्तमं योगमास्थाय यदीच्छति विमुच्यते ॥ ४१

मुनय ऊचुः—

आहारान्कीदृशान्कृत्वा कानि जित्वा च सत्तम । योगी[7] बलमवाप्नोति तद्भवान्वक्तुमर्हति ॥ ४२

व्यास उवाच—

कणानां भक्षणे युक्तः पिण्याकस्य च भो द्विजाः । स्नेहानां वर्जने युक्तो योगी बलमवाप्नुयात् ॥
भुञ्जानो यावकं रूक्षं दीर्घकालं द्विजोत्तमाः । एकाहारी विशुद्धात्मा योगी बलमवाप्नुयात् ॥४३
पक्षान्मासानृतूंश्चित्रान्संचरंश्च गुहास्तथा । अपः पीत्वा पयोमिश्रा योगी बलमवाप्नुयात् ॥ ४४
अखण्डमपि वा मासं सततं मुनिसत्तमाः । उपोष्य सम्यक्शुद्धात्मा योगी बलमवाप्नुयात् ॥ ४५
कामं जित्वा तथा क्रोधं शीतोष्णं वर्षमेव च । भयं शोकं तथा स्वापं पौरुषान्विषयांस्तथा ४६
अरतिं दुर्जयां चैव घोरां दृष्ट्वा च भो द्विजाः । स्पर्शं[8] निद्रां तथा[9] तन्द्रां दुर्जयां मुनिसत्तमाः ॥
दीपयन्ति[10] महात्मानं सूक्ष्ममात्मानमात्मना । वीतरागा महाप्राज्ञा ध्यानाध्ययनसंपदा[11] ॥ ४८
दुर्गस्त्वेष मतः पन्था ब्राह्मणानां विपश्चिताम् । यः कश्चिद्व्रजति क्षिप्रं क्षेमेण मुनिपुंगवाः ॥४९
यथा कश्चिद्वनं घोरं बहुसर्पसरीसृपम् । श्वभ्रवत्तोयहीनं च दुर्गमं बहुकण्टकम् ॥ ५०
अभक्तमटवीप्रायं दावदग्धमहीरुहम् । पन्थानं तस्कराकीर्णं क्षेमेणाभिपतेत्तथा ॥ ५१
योगमार्गं समासाद्य यः कश्चिद्व्रजते द्विजः । क्षेमेणोपरमेन्मार्गा[12]द्बहुदोषो[13]ऽपि संमतः ॥ ५२
आस्थेयं क्षुरधारासु निशितासु द्विजोत्तमाः । धारणा सा तु योगस्य दुर्गेयमकृतात्मभिः ॥ ५३
विषमा धारणा विप्रा यान्ति वै न शुभां गतिम् । नेतृहीना यथा नावः पुरुषाणां तु वै द्विजाः॥
यस्तु तिष्ठति योगाधौ[14] धारणासु[15] यथाविधि । मरणं[16] जन्मदुःखित्वं सुखित्वं स विशिष्यते ॥
नानाशास्त्रेषु[17] नियतं नानामुनिनिषेवितम् । परं योगस्य पन्थानं निश्चितं[18] तं द्विजातिषु ॥ ५५

परं हि[19] तद्ब्रह्ममयं मुनीन्द्रा ब्रह्माणमीशं वरदं[20] च विष्णुम् ।
भवं च धर्मं च महानुभावं[21] यद्ब्रह्मपुत्रान्सुमहानुभावान् ॥ ५६

१ ग. मुक्त । २ ख. ग. युक्तेन । ३ क. °णायां स° । ४ क. ख. °गः । अवेक्ष्याऽऽत्म° । ५ ग. नाड्यां । ६ ग. प्राणे । ७ क. योगस्य फलमाप्नो° । ८ ख. श्वासं । ९ ख. भयं । १० क. °न्ति तथाऽऽत्मा° । ११ क. ख. °संयुताः । दु° । १२ ख. °र्गाद्बंद्वदो° । १३ क. °हुपोष्यो हि सं° । १४ क. °गान्वै धा° । १५ क. °रणां तु य° । १६ क. °णं दुश्चिकित्स्यं च सु° । १७ क. ख. °षु निष्पन्नं योगेष्वेवमुदाहृतम् । १८ ख. °तं तद्द्विजा° । १९ ख. हितं ब्रह्म° । २० क. °दं वरिष्ठम् । २१ ग. महानरं ।

तमश्च कष्टं सुमहद्रजश्च सत्त्वं च शुद्धं प्रकृतिं परां च ।
सिद्धिं च देवीं वरुणस्य पत्नीं तेजश्च कृत्स्नं सुमहच्च धैर्यम् ॥ ५९
ताराधिपं खे विमलं सुतारं विश्वांश्च देवानुरगान्पितॄंश्च ।
शैलांश्च कृत्स्नानुदधींश्च वाऽचलान्नदीश्च सर्वाः सनगांश्च नागान् ॥ ६०
साध्यांस्तथा यक्षगणान्दिशश्च गन्धर्वसिद्धान्पुरुषान्स्त्रियश्च ।
परस्परं प्राप्य महान्महात्मा विशेत योगी नचिराद्विमुक्तः ॥ ६१
कथा च या विप्रवराः प्रसक्ता दैवे महावीर्यमतौ शुभेयम् ।
योगान्स सर्वाननुभूय मर्त्या नारायणं तं द्रुतमाप्नुवन्ति ॥ ६२

इति श्रीमहापुराणे आदिब्राह्मे व्याससर्षिसंवादे योगविधिनिरूपणं नामाष्टात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३८ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३३३३

अथैकोनचत्वारिंशदधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

सम्यक्क्रियेयं विप्रेन्द्र वर्णिता शिष्टसंमता । योगमार्गो यथान्यायं शिष्यायेह हितैषिणा ॥ १
सांख्ये त्विदानीं धर्मस्य विधिं प्रब्रूहि तत्त्वतः । त्रिषु लोकेषु यज्ज्ञानं सर्वं तद्विदितं हि ते ॥ २

व्यास उवाच—

शृणुध्वं मुनयः सर्वमाख्यानं विदितात्मनाम् । विहितं यतिभिर्वृद्धैः कपिलादिभिरीश्वरैः ॥ ३
यस्मिन्सुविभ्रमाः केचिद्दृश्यन्ते मुनिसत्तमाः । गुणाश्च यस्मिन्बहवो दोषहानिश्च केवला ॥ ४
ज्ञानेन परिसंख्याय सदोषान्विषयान्द्विजाः । मानुषान्दुर्जयान्कृत्स्नान्पैशाचान्विषयांस्तथा ॥ ५
विषयानौरगाञ्ज्ञात्वा गन्धर्वविषयांस्तथा । पितॄणां विषयाञ्ज्ञात्वा तिर्यक्त्वं चरतां द्विजाः॥ ६
सुपर्णविषयाञ्ज्ञात्वा मरुतां विषयांस्तथा । महर्षिविषयांश्चैव राजर्षिविषयांस्तथा ॥ ७
आसुरान्विषयाञ्ज्ञात्वा वैश्वदेवांस्तथैव च । देवर्षिविषयाञ्ज्ञात्वा योगानामपि वै परान् ॥ ८
विषयांश्च प्रमाणस्य ब्रह्मणो विषयांस्तथा । आयुषश्च परं कालं लोकैर्विज्ञाय तत्त्वतः ॥ ९
सुखस्य च परं कालं विज्ञाय मुनिसत्तमाः । प्राप्तकाले च यद्दुःखं पततां विषयैषिणाम् ॥ १०
तिर्यक्त्वे पततां विप्रास्तथैव नरकेषु यत् । स्वर्गस्य च गुणाञ्ज्ञात्वा दोषान्सर्वांश्च भो द्विजाः ॥
वेदवादे च ये दोषा गुणा ये चापि वैदिकाः । ज्ञानयोगे च ये दोषा ज्ञानयोगे च ये गुणाः ॥
सांख्यज्ञाने च ये दोषांस्तथैव च गुणा द्विजाः । सत्त्वं दशगुणं ज्ञात्वा रजो नवगुणं तथा॥ १३
तमश्चाष्टगुणं ज्ञात्वा बुद्धिं सप्तगुणां तथा । षड्गुणं च नभो ज्ञात्वा तमश्च त्रिगुणं महत् ॥ १४
द्विगुणं च रजो ज्ञात्वा सत्त्वं चैकगुणं पुनः । मार्गं विज्ञाय तत्त्वेन प्रलयप्रेक्षणेन तु ॥ १५
ज्ञानविज्ञानसंपन्नाः कारणैर्भावितात्मभिः । प्राप्नुवन्ति शुभं मोक्षं सूक्ष्मा इव नभः परम् ॥ १६

---

१ क. गुभावं । २ ग. °नभिभ्° । ३ ग. सांख्यं । ४ ख. °र्वसांख्यानां वि° । ५ क. °तिभिः पूर्वैः क° । ६ क. ग. °पि चेश्वरान् । वि° । ७ क. गुणयोगे । ८ ख. °लये प्रेक्षणं तथा । ज्ञा° । ग. °लये प्रलयं तथा । ज्ञा° ।

रूपेण दृष्टिं संयुक्तां घ्राणं गन्धगुणेन च । शब्दग्राह्यं[1] तथा श्रोत्रं जिह्वां रसगुणेन च ॥ १७
त्वचं स्पर्शं तथा शक्यं वायुं चैव तदाश्रितम् । मोहं[2] तमसि संयुक्तं लोभं मोहेषु संश्रितम्[3] ॥ १८
विष्णुं क्रान्ते बले शक्रं कोष्ठे सक्तं तथाऽनलम् । अप्सु देवीं समायुक्तामापस्तेजसि संश्रिताः ॥
तेजो वायौ तु संयुक्तं[4] वायुं नभसि चाऽऽश्रितम् । नभो महति संयुक्तं तमो महसि संस्थितम् ॥
रजः सत्त्वं तथा सक्तं सत्त्वं सक्तं तथाऽऽत्मनि । सक्तमात्मानमीशे च देवे नारायणे तथा २१
देवं मोक्षे च संयुक्तं ततो मोक्षं च न क्वचित् । ज्ञात्वा सत्त्वगुणं देहं वृतं षोडशभिर्गुणैः ॥ २२
स्वभावं भावनां चैव ज्ञात्वा देहसमाश्रिताम् । मध्यस्थमिव चाऽऽत्मानं पापं यस्मिन्न विद्यते ॥
द्वितीयं कर्म वै ज्ञात्वा विप्रेन्द्रा विषयैषिणाम् । इन्द्रियाणीन्द्रियार्थांश्च सर्वानात्मनि [5]संश्रितान्
दुर्लभत्वं च मोक्षस्य विज्ञाय श्रुतिपूर्वकम् । प्राणापानौ समानं च व्यानोदानौ च तत्त्वतः ॥२५
आद्यं चैवानिलं ज्ञात्वा प्रभवं चानिलं पुनः । सप्तधा तांस्तथा शेषान्सप्तधा विधिवत्पुनः ॥ २६
प्रजापतीनृषींश्चैवं[6] सर्गांश्च सुबहून्वरान् । सप्तर्षींश्च बहूञ्ज्ञात्वा राजर्षींश्च परंतपान् ॥ २७
सुरर्षीन्मरुतश्चान्यान्ब्रह्मर्षीन्सूर्यसंनिभान् । ऐश्वर्या[7]च्च्यावितान्दृष्ट्वा कालेन महता द्विजाः ॥ २८
महतां भूतसंघानां श्रुत्वा नाशं च भो द्विजाः । गतिं वाचां शुभां ज्ञात्वा अर्चार्हाः[8] पापकर्मणाम्
वैतरण्यां च यद्दुःखं पतितानां यमक्षये । योनिषु च विचित्रासु संचारानशुभांस्तथा ॥ ३०
जठरे चाशुभे वासं शोणितोदकभाजने । श्लेष्ममूत्रपुरीषे च तीव्रगन्धसमन्विते ॥ ३१
शुक्रशोणितसंघाते मज्जास्नायुपरिग्रहे । शिराशतसमाकीर्णे नवद्वारे पुरेऽथ वै ॥ ३२
विज्ञाय हितमात्मानं योगांश्च विविधान्द्विजाः । तामसानां च जन्तूनां रमणीयानृतात्मनाम् ३३
सात्त्विकानां च जन्तूनां कुत्सितं मुनिसत्तमाः । गर्हितं महतामर्थे सांख्यानां विदितात्मनाम् ३४
उपप्लवांस्तथा घोराञ्शशिनस्तेजसस्तथा । ताराणां पतनं दृष्ट्वा नक्षत्राणां च पर्ययम् ॥ ३५
[9]द्वंद्वानां विप्रयोगं च विज्ञाय कृपणं द्विजाः । अन्योन्य[10]भक्षणं दृष्ट्वा भूतानामपि चाशुभम् ॥ ३६
बाल्ये मोहं च विज्ञाय पक्षदेहस्य चाशुभम् । रागं मोहं च संप्राप्तं क्वचित्सत्त्वं समाश्रितम् ॥३७
सहस्रेषु नरः कश्चिन्मोक्षबुद्धिं समाश्रितः । दुर्लभत्वं च मोक्षस्य विज्ञानं श्रुतिपूर्वकम् ॥ ३८
बहुमानमलब्धेषु[11] लब्धे मध्यस्थतां पुनः । विषयाणां च दौरात्म्यं विज्ञाय च पुनर्द्विजाः ॥ ३९
गतासूनां च सत्त्वानां देहान्भित्त्वा तथा शुभान् । वासं कुलेषु जन्तूनां[12] मरणाय धृतात्मनाम् ४०
सात्त्विकानां च जन्तूनां दुःखं विज्ञाय भो द्विजाः । ब्रह्मघ्नानां गतिं ज्ञात्वा पतितानां सुदारुणाम्
सुरापाने च सक्तानां ब्राह्मणानां दुरात्मनाम् । गुरुदारप्रसक्तानां गतिं विज्ञाय चाशुभाम् ॥४२
जननीषु[13] च वर्तन्ते येन सम्यग्द्विजोत्तमाः । [14]सदेवकेषु लोकेषु येन वर्तन्ति मानवाः ॥ ४३
तेन ज्ञानेन विज्ञाय गतिं चाशुभकर्मणाम् । तिर्यग्योनिगतानां च विज्ञाय च गतीः पृथक् ॥ ४४
वेदवादां[15]स्तथा चित्रा[16]नृतूनां पर्ययांस्तथा । क्षयं संवत्सराणां च मासानां च क्षयं तथा ॥ ४५
पक्षक्षयं तथा दृष्ट्वा दिवसानां च संक्षयम् । क्षयं वृद्धिं च चन्द्रस्य दृष्ट्वा प्रत्यक्षतस्तथा ॥ ४६
वृद्धिं दृष्ट्वा समुद्राणां क्षयं तेषां तथा पुनः । क्षयं धनानां दृष्ट्वा च पुनर्वृद्धिं तथैव च ॥ ४७

---

१ क. ख. शब्दशक्त्या । २ ग. सत्त्वेषु । ३ क. °म् । मोहेऽनलं तथा क्रान्तं बले स° । ४ ख. °क्तं ततो म° । ग. °क्तं तथा म° । ५ ख. संस्थितान् । ६ क. ख. °व मार्गांश्चैव वसुंधराम् । स° । ७ क. ख. °भां प्राप्ताः पापाश्च क° । ८ ख. °ज्ञायाहि° । ९ ख. बद्धानां । १० ख. °न्यरक्षणां द° । ११ क. °लभ्ये तु ल° । १२ ख. ग. °नां रमणीयानृतात्म° । १३ क. ख. रजनीषु । १४ क. सदैव° । १५ ख. °दविद्यास्त° । १६ ख. °त्रा भूतानां ।

संयोगानां तथा दृष्ट्वा युगानां च विशेषतः । [1]देहवैक्लव्यतां चैव सम्यग्विज्ञाय तत्त्वतः ॥ ४८
आत्मदोषांश्च विज्ञाय सर्वानात्मनि संस्थितान् । स्वदेहादुत्थितान्गधांस्तथा विज्ञाय चाशुभान्

मुनय ऊचुः—

कानुत्पातभवान्दोषान्पश्यसि ब्रह्मवित्तम । एतं नः संशयं कृत्स्नं वक्तुमर्हस्यशेषतः ॥ ५०

व्यास उवाच—

पञ्च दोषान्द्विजा देहे प्रवदन्ति मनीषिणः । मार्गज्ञाः कापिलाः सांख्याः शृणुध्वं मुनिसत्तमाः
कामक्रोधौ भयं निद्रा पञ्चमः श्वास उच्यते[2] । एते दोषाः शरीरेषु दृश्यन्ते सर्वदेहिनाम् ॥ ५२
छिन्दन्ति क्षमया क्रोधं कामं संकल्पवर्जनात् । सत्त्वसंसेवनान्निद्रामप्रमादाद्भयं तथा ॥ ५३
छिन्दन्ति पञ्चमं श्वासमल्पाहारतया द्विजाः । गुणान्गुणशतैर्ज्ञात्वा दोषान्दोषशतैरपि ॥ ५४
हेतून्हेतुशतैश्चित्रैश्चित्रान्विज्ञाय तत्त्वतः । अपां [3]फेनोपमं लोकं विष्णोर्मायाशतैः कृतम् ॥ ५५
+चित्रभित्तिप्रतीकाशं नलसारमनर्थकम् । तमःसंभ्रमितं दृष्ट्वा वर्षबुद्बुदसंनिभम् ॥ ५६
नाशप्रायं सुखाधानं नाशोत्तरमहाभयम् । रजस्तमसि संमग्नं पङ्के द्विपमिवावशम् ॥ ५७
सांख्या विप्रा महाप्राज्ञास्त्यक्त्वा स्नेहं प्रजाकृतम् । ज्ञानज्ञेयेन सांख्येन व्यापिना महता द्विजाः
राजसानशुभान्गन्धांस्तामसांश्च तथाविधान् । पुण्यांश्च सात्त्विकान्गन्धान्स्पर्शजान्देहसंश्रितान् ॥
छित्त्वाऽऽत्मज्ञानशस्त्रेण तपोदण्डेन सत्तमाः । ततो दुःखादिकं घोरं चिन्ताशोकमहाह्रदम् ॥ ६०
व्याधिमृत्युमहाघोरं महाभयमहोरगम् । तमःकूर्मं रजोमीनं प्रज्ञया संतरन्त्युत ॥ ६१
स्नेहपङ्कं जरादुर्गं स्पर्शद्वीपं द्विजोत्तमाः । कर्मागाधं सत्यतीरं[8] स्थितं व्रतमनीषिणः ॥ ६२
हर्षसंघमहावेगं नानारससमाकुलम् । नानाप्रीतिमहारत्नं दुःखज्वरसमीरितम् ॥ ६३
शोकतृष्णामहावर्तं तीक्ष्णव्याधिमहारुजम् । अस्थिसंघातसंघट्टं श्लेष्मयोगं द्विजोत्तमाः ॥ ६४
दानमुक्ताकरं घोरं शोणितोद्गारविद्रुमम् । हसितोत्क्रुष्टनिर्घोषं नानाज्ञानसुदुष्करम् ॥ ६५
रोदनाश्रुमलक्षारं सङ्गयोगपरायणम् । प्रलब्ध्वा जन्मलोको यं पुत्रबान्धवपत्तनम् ॥ ६६
*अहिंसासत्यमर्यादं प्राणयोगमयोर्मिलम्[11] । वृन्दानुगामिनं क्षीरं सर्वभूतपयोदधिम्[12] ॥ ६७
मोक्षदुर्लभविषयं वाडवासुख[13]सागरम् । तरन्ति यतयः सिद्धा ज्ञानयोगेन चानघाः ॥ ६८
[14]तीर्त्वा च दुस्तरं जन्म विशन्ति विमलं नभः[15] । ततस्तान्सुकृतीञ्ज्ञात्वा सूर्यो वहति रश्मिभिः ॥
पद्मतन्तुवदाविश्य प्रवहन्विषयान्द्विजाः । तत्र तान्प्रवहो वायुः प्रतिगृह्णाति चानघाः ॥ ७०
वीतरागान्यतीन्सिद्धान्वीर्ययुक्तांस्तपोधनान् । सूक्ष्मः शीतः सुगन्धश्च सुखस्पर्शश्च भो द्विजाः ॥
सप्तानां मरुतां श्रेष्ठो लोकान्गच्छति यः शुभान् । स तान्वहति विप्रेन्द्रा नभसः परमां गतिम् ॥
[16]नभो वहति लोकेशात्रजसः परमां गतिम् । रजो वहति विप्रेन्द्राः सत्त्वस्य परमां गतिम् ॥ ७३
सत्त्वं वहति शुद्धात्मा परं नारायणं प्रभुम् । प्रभुर्वहति शुद्धात्मा परमात्मानमात्मना ॥ ७४

+ इदमर्धं नास्ति क. पुस्तके । * इत आरभ्य सार्धः श्लोकः क. पुस्तके न ।

१ क. ख. अहंवक्तव्यतां । २ क. °ते । पञ्च विध्वंसकर्तारो वर्तन्ते । ख. °ते । योगविध्वंसकर्तारो वर्तन्ते । ३ क. व्योमपरं । ४ ख. चिन्ताभि° । ५ ख. सुखासीनं । ६ क. ख. °ह्यान्वित्रा° । ७ क. ख. °ज्ञान्स तानाह प्रजापतिः । अनेन दोषान्सांख्ये° । ८ क. ख. °रं सत्यत्र° । ९ क. ख. °म् । पुनर्वा ज° । १० क. ख. °त्रत्रभूचयत्परम् । ११ क. °म् । वेदानुयायिनक्षी° । १२ ग. °म् । महोक्ष° । १३ ग. °विषं वडवामुख° । १४ ख. भित्त्वा । १५ क. तमः । ख. ततः । १६ ख. तमो ।

परमात्मानमासाद्य तद्भूता यतयोऽमलाः । अमृतत्वाय कल्पन्ते न निवर्तन्ति च द्विजाः ॥ ७५
परमा सा गतिर्विप्रा निर्द्वंद्वानां महात्मनाम् । सत्यार्जवरतानां वै सर्वभूतदयावताम् ॥ ७६

मुनय ऊचुः—

स्थानमुत्तममासाद्य भगवन्तं स्थिरव्रताः । आजन्ममरणं वा ते[1] रमन्ते तत्र वा न वा ॥ ७७
यदत्र तथ्यं तत्त्वं नो यथावद्वक्तुमर्हसि । त्वदृते मानवं नान्यं प्रष्टुमर्हाम सत्तम ॥ ७८
[2]मोक्षदोषो महानेष प्राप्य सिद्धिं गतानृषीन् । यदि तत्रैव विज्ञाने वर्तन्ते यतयः परे ॥ ७९
प्रवृत्तिलक्षणं धर्मं पश्याम परमं द्विजं[3] । मग्नस्य हि परे ज्ञाने किंतु दुःखान्तरं भवेत् ॥ ८०

व्यास उवाच—

यथान्यायं मुनिश्रेष्ठाः प्रश्नः पृष्टश्च संकटः । बुधानामपि संमोहः प्रश्नेऽस्मिन्मुनिसत्तमाः ॥ ८१
अत्रापि तत्त्वं परमं शृणुध्वं वचनं मम । बुद्धिश्च परमा यत्रे[4] कपिलानां महात्मनाम् ॥ ८२
इन्द्रियाण्यपि बुध्यन्ते स्[5]वदे[6]हं देहिनां द्विजाः । करणान्यात्मनस्तानि सूक्ष्मं[7] पश्यन्ति तैस्तु सः ॥ ८३
आत्मना विप्रहीणानि का[8]ष्ठकुड्यसमानि तु । विनश्यन्ति न संदेहो वेला इव महार्णवे ॥ ८४
इन्द्रियैः सह सुप्तस्य देहिनो[9] द्विजसत्तमाः[10] । सूक्ष्मश्चरति सर्वत्र नभसीव समीरणः ॥ ८५
स पश्यति यथान्यायं[11] स्मृत्वा स्पृशति चानघाः । बुध्यमानो यथापूर्वमखिलेनेह भो द्विजाः ॥ ८६
इन्द्रियाणि ह सर्वाणि स्वे स्वे स्थाने यथाविधि । अनीशत्वात्प्रलीयन्ते सर्पा विषहता इव ॥ ८७
इन्द्रियाणां तु सर्वेषां स्वस्थानेष्वेव सर्वशः । आक्रम्य गतयः सूक्ष्माव(श्च)रत्यात्मा न संशयः ॥
सत्त्वस्य च गुणान्कृत्स्नान्रजसश्च गुणान्पुनः । गुणांश्च तमसः सर्वान्गुणान्बुद्धेश्च सत्तमाः ॥ ८९
गुणांश्च मनसश्चापि नभसश्च गुणांस्तथा । गुणान्वायोश्च सर्वज्ञाः स्नेहजांश्च गुणान्पुनः ॥ ९०
अपां गुणास्तथा विप्राः पार्थिवांश्च गुणानपि । सर्वानेव [12]गुणैर्व्याप्य क्षेत्रज्ञेषु द्विजोत्तमाः ॥ ९१
आत्मा च[13]रति क्षेत्रज्ञः कर्मणा च शुभा[14]शु[15]भे । शिष्या इव महात्मानमिन्द्रियाणि च तं द्विजाः ॥ ९२
*प्रकृतिं चाप्यतिक्रम्य शुद्धं सूक्ष्मं परात्परम् । नारायणं महात्मानं निर्विकारं परात्परम् ॥ ९३
विमुक्तं सर्वपापेभ्यः प्रविष्टं च ह्यनामयम् । परमात्मानमगुणं निर्वृतं तं च सत्तमाः ॥ ९४
श्रेष्ठं तत्र मनो विप्रा इन्द्रियाणि च भो द्विजाः । आगच्छन्ति यथाकालं गुरोः सं[16]देशकारिणः ॥
शक्यं वाऽल्पेन कालेन[17] शान्तिं प्रा[18]प्तुं गुणांस्तथा । एवमुक्तेन विप्रेन्द्राः सांख्ययोगेन मोक्षिणीम्[19]
सांख्या विप्रा महाप्राज्ञा गच्छन्ति परमां गतिम् । ज्ञानेनानेन विप्रेन्द्रास्तुल्यं ज्ञानं न विद्यते ॥ ९७
अत्र वः संशयो मा भूज्ज्ञानं सांख्यं परं मतम् । अक्षरं ध्रुवमेवोक्तं पूर्वं ब्रह्म सनातनम् ॥ ९८
अनादिमध्यनिधनं निर्द्वंद्वं कर्तृ शाश्वतम् । कूटस्थं चैव नित्यं च यद्वदन्ति शमात्मकाः ॥ ९९
यतः सर्वाः प्रवर्तन्ते सर्गप्रलयविक्रियाः । एवं शंसन्ति शास्त्रेषु प्रवक्तारो महर्षयः ॥ १००
सर्वे विप्राश्च वेदाश्च तथा सामविदो जनाः । ब्रह्मण्यं परमं देवमनन्तं परमाच्युतम् ॥ १०१

---

* एतदादि सार्धं श्लोकद्वयं ग. पुस्तके नास्ति ।

---

१ ग. ते स्मरन्त्यत्र सदाऽनघाः । य° । २ ग. मोक्षलाभो । ३ ख. °ज । यस्य हिंसापरं ज्ञानं किं° । ४ क. ख. °त्र जायते हि म° । ५ क. स्वदेहे । ६ ख. °देहस्थानि भो द्वि° । ७ ख. सूक्ष्मः । ८ क. ख. पापकर्मकृतानि । ९ क. °नो व्याकुलस्य तु । सू° । १० क. °माः । मनो भ्रमति । ११ ग. °यं स्पर्शान्स्पृश° । १२ क. गुणान्व्याप्य । १३ ग. च याति । १४ ख. °भान्गुणान् । शि° । १५ क. °शुभम् । शि° । १६ क. ख. °देहका° । १७ क. °न प्राप्तश्चाऽऽप्तगु° । ख. °न प्राप्तुं प्राप्ता गुणात्मनाम् । ए° । १८ ग. प्राप्तिं गुणार्थिना । ए° । १९ क. ख. °मू । शीतोष्णादि परित्यज्य ग° ।

प्रार्थयन्तश्च तं विप्रा वदन्ति गुणबुद्धयः । सम्यगुक्तास्तथा योगाः सांख्यांश्चामितदर्शनाः १०२
अमूर्तिस्तस्य विप्रेन्द्राः सांख्यं मूर्तिरिति श्रुतिः । अभिज्ञानानि तस्याऽऽहुर्महांन्ति मुनिसत्तमाः
द्विविधानि हि भूतानि पृथिव्यां द्विजसत्तमाः । अगम्यगम्यसंज्ञानि गम्यं तत्र विशिष्यते १०४

ज्ञानं महद्वै महतश्च विप्रा वेदेषु सांख्येषु तथैव योगे ।
यच्चापि दृष्टं विधिवत्पुराणे सांख्यागतं तन्निखिलं मुनीन्द्राः ॥ १०५
यच्चेतिहासेषु महत्सु दृष्टं यथार्थशास्त्रेषु विशिष्टदृष्टम् ।
ज्ञानं च लोके यदिहास्ति किंचित्सांख्यागतं तच्च महामुनीन्द्राः ॥ १०६
समस्तदृष्टं परमं बलं च ज्ञानं च मोक्षश्च यथावदुक्तम् ।
तपांसि सूक्ष्माणि च यानि चैव सांख्ये यथावद्विहितानि विप्राः ॥ १०७
विपर्ययं तस्य हितं सदैव गच्छन्ति सांख्याः सततं सुखेन ।
तांश्चापि संधार्य ततः कृतार्थाः पतन्ति विप्रायतनेषु भूयः ॥ १०८
हित्वा च देहं प्रविशन्ति मोक्षं दिवौकसश्चापि च योगसांख्याः ।
अतोऽधिके तेऽभिरता महार्हे सांख्ये द्विजा भो इह शिष्टजुष्टे ॥ १०९
तेषां तु तिर्यग्गमनं हि दृष्टं नाधो गतिः पापकृतां निवासः ।
न वा प्रधाना अपि ते द्विजातयो ये ज्ञानमेतन्मुनयो न सक्ताः ॥ ११०
सांख्यं विशालं परमं पुराणं महार्णवं विमलमुदारकान्तम् ।
कृत्स्नं हि सांख्या मुनयो महात्मनारायणे धारयताप्रमेयम् ॥ १११
एतन्मयोक्तं परमं हि तत्त्वं नारायणाद्विश्वमिदं पुराणम् ।
स सर्गकाले च करोति सर्गं संहारकाले च हरेत भूयः ॥ ११२

इति श्रीमहापुराणे आदिब्राह्मे व्यासऋषिसंवादे सांख्यविधिनिरूपणं नामैकोनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २३९ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३४४५

अथ चत्वारिंशदधिकद्विशततमोऽध्यायः ।

मुनय ऊचुः—

किं तदक्षरमित्युक्तं यस्मान्नाऽऽवर्तते पुनः । किंस्वित्तत्क्षरमित्युक्तं यस्मादावर्तते पुनः ॥ १
अक्षराक्षरयोर्व्यक्तिं पृच्छामस्त्वां महामुने । उपलब्धुं मुनिश्रेष्ठ तत्त्वेन मुनिपुंगव ॥ २
त्वं हि ज्ञानविदां श्रेष्ठः प्रोच्यसे वेदपारगैः । ऋषिभिश्च महाभागैर्यतिभिश्च महात्मभिः ॥ ३
तदेतच्छ्रोतुमिच्छामस्त्वत्तः सर्वं महामते । न तृप्तिमधिगच्छामः शृण्वन्तोऽमृतमुत्तमम् ॥ ४

व्यास उवाच—

अत्र वो वर्णयिष्यामि इतिहासं पुरातनम् । वसिष्ठस्य च संवादं करालजनकस्य च ॥ ५
वसिष्ठं श्रेष्ठमासीनमृषीणां भास्करद्युतिम् । पप्रच्छ जनको राजा ज्ञानं नैःश्रेयसं परम् ॥ ६
परमात्मनि कुशलमध्यात्मगतिनिश्चयम् । मैत्रावरुणिमासीनमभिवाद्य कृताञ्जलिः ॥ ७

---

१ क. °यः । ज्ञमयुक्ता° । २ क. योगे । ३ क. °ख्याश्च जात° । ४ क. ख. °मेतं हि मु° । ५ ख. विप्रेषु यतान्ति भू° । ६ ग. सांख्या । ७ ग. च तदन्ति भू° ।

स्वच्छन्दं सुकृतं[1] चैव मधुरं चाप्यनुल्बणम् । पप्रच्छर्षिवरं राजा करालजनकः पुरा ॥ ८

करालजनक उवाच—

भगवञ्श्रोतुमिच्छामि परं ब्रह्म सनातनम् । यस्मिन्न पुनरावृत्तिं प्राप्नुवन्ति मनीषिणः ॥ ९

यच्च तत्क्षरमित्युक्तं यत्रेदं क्षरते जगत् । यच्चाक्षरमिति प्रोक्तं शिवं क्षेममनामयम् ॥ १०

वसिष्ठ उवाच—

श्रूयतां पृथिवीपाल क्षरतीदं यथा जगत् । यत्र क्षरति पूर्वेण यावत्कालेन चाप्यथ ॥ ११

युगं द्वादशसाहस्र्यं कल्पं विद्धि चतुर्युगम् । दशकल्पशतावर्तमहस्तद्ब्राह्ममुच्यते ॥ १२

रात्रिश्चैतावती राजन्यस्यान्ते प्रतिबुध्यते । सृजत्यनन्तकर्माणि महान्तं भूतमग्रजम् ॥ १३

मूर्तिमन्तममूर्तात्मा विश्वं शंभुः स्वयंभुवः । *यत्रोत्पत्तिं प्रवक्ष्यामि मूलतो नृपसत्तम ॥ १४

अणिमा लघिमा प्राप्तिरीशानं ज्योतिरव्ययम् । सर्वतःपाणिपादान्तं सर्वतोक्षिशिरोमुखम् ॥ १५

सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति । हिरण्यगर्भो भगवानेष बुद्धिरिति स्मृतिः[3] ॥ १६

महानिति च योगेषु [4]विरिञ्चिरिति चाप्यथ । सांख्ये च पठ्यते शास्त्रे नामभिर्बहुधात्मकः ॥ १७

विचित्ररूपो विश्वात्मा एकाक्षर इति स्मृतः । धृतमेकात्मकं येन कृत्स्नं त्रैलोक्यमात्मना ॥ १८

तथैव बहुरूपत्वाद्विश्वरूप इति श्रुतः । एष वै विक्रियापन्नः[5] सृजत्यात्मानमात्मना ॥ १९

†प्रधानं तस्य संयोगादुत्पन्नं सुमहत्पुरम् । अहंकारं महातेजाः[6] प्रजापतिनमस्कृतम्[7] ॥ २०

अव्यक्ताद्व्यक्तिमापन्नं[8] विद्यासर्गं वदन्ति तम् । महान्तं चाप्यहंकारमविद्यासर्ग एव च ॥ २१

अचरश्च[9] चरश्चैव समुत्पन्नौ तथैकतः । विद्याऽविद्येति विख्याते श्रुतिशास्त्रानुचिन्तकैः ॥ २२

भूतसर्गमहंकारात्तृतीयं विद्धि पार्थिव । अहंकारेषु नृपते चतुर्थं विद्धि वैकृतम् ॥ २३

वायुर्ज्योतिरथाऽऽकाशमापोऽथ पृथिवी तथा । शब्दस्पर्शौ च रूपं च रसो गन्धस्तथैव च ॥ २४

एवं युगपदुत्पन्नं दशवर्गमसंशयम् । पञ्चमं विद्धि राजेन्द्र भौतिकं सर्गमर्थकृत् ॥ २५

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणमेव च पञ्चमम् । वाग्हस्तौ चैव पादौ च पायुर्मेढ्रं तथैव च ॥ २६

बुद्धीन्द्रियाणि चैतानि तथा कर्मेन्द्रियाणि च । संभूतानीह युगपन्मनसा सह पार्थिव ॥ २७

एषा तत्त्वचतुर्विंशा[10] सर्वाऽऽकृतिः[11] प्रवर्तते । यां ज्ञात्वा नाभिशोचन्ति ब्राह्मणास्तत्त्वदर्शिनः ॥ २८

एवमेतत्समुत्पन्नं त्रैलोक्यमिदमुत्तमम् । वेदितव्यं नरश्रेष्ठ सदैव नरकार्णवे[12] ॥ २९

सयक्षभूतगन्धर्वे सकिंनरमहोरगे । *सचारणपिशाचे वै सदेवर्षिनिशाचरे ॥ ३०

सदंशकीटमशके सपूतिकृमिमूषके । शुनि श्वपाके[13] चैणेये सचाण्डाले[14] सपुल्कसे ॥ ३१

हस्त्यश्वखरशार्दूले सवृके गवि चैव हे[15] । या च मूर्तिश्च यत्किंचित्सर्वत्रैतन्निदर्शनम् ॥ ३२

जले भुवि तथाऽऽकाशे नान्यत्रेति विनिश्चयः । स्थानं देहवतामासीदित्येवमनुशुश्रुम ॥ ३३

कृत्स्नमेतावतस्तात क्षरते व्यक्तसंज्ञकः[16] । अहन्यहनि भूतात्मा[17] यच्चाक्षर इति स्मृतम्[18] ॥ ३४

---

* इदमर्धं ग. पुस्तके नास्ति । † इदमर्धं क. ग. पुस्तकयोर्नास्ति । * इत आरभ्य गवि चैव हेत्यन्तं ख. पुस्तके नास्ति ।

---

१ ग. सुक्षेत्रं । २ ग. प्रसृतं । ३ क. स्मृतः । ४ ग. विरञ्च इति । ५ ख. °यायत्नः स° । ६ ख. °तेजा जातस्तत्र प्रजापतिः । अ° । ७ ग. °तिमहत्कृत° । ८ क. ग. °क्तान्यक्तमा° । ९ ख. °थैव च । वि° । १० क °र्वा प्रकृतिर्वर्त° । ११ ग. °कृतिषु व° । १२ ख. °र्णवात् । स° । १३ क. °के कृपणे पशुचा° । १४ ख. °ण्डालपु° । १५ क. ह । यच्च मूर्तं च य° । १६ क. °संज्ञितम् । अ° । १७ ख. °त्मा तदक्षरमिति । १८ ग. °म् । एतदक्षर° ।

ततस्तत्क्षरमित्युक्तं क्षरतीदं यथा जगत् । जगन्मो[1]हात्मकं चाऽऽहुरव्यक्तो[2]व्यक्तसंज्ञकम् ॥ ३५
महांश्चै[2]वाक्षरो नित्यमेतत्क्षरै[3]विवर्जनम् । कथितं ते महाराज यस्मान्नाऽऽवर्तते पुनः ॥ ३६
पञ्चविंशतिको[4]ऽमूर्तः स नित्यस्तत्त्वसंज्ञकः । सत्त्वसंश्रयणात्तत्वं सत्त्वमाहुर्मनीषिणः ॥ ३७
यदमूर्तिः सृजद्व्यक्तं तन्मूर्तिमधितिष्ठति । चतुर्वि[6]शतिमो व्यक्तो ह्यमूर्तिः पञ्चविंशकः ॥ ३८
स एव हृदि सर्वासु मूर्तिष्वातिष्ठताऽऽत्मवान्[7] । चेतयंश्चेतनो नित्यं सर्वमूर्तिरमूर्तिमान् ॥ ३९
सर्गप्रलयधर्मेण स सर्गप्रलयात्मकः । गोचरे वर्तते नित्यं निर्गुणो गुणसंज्ञितः ॥ ४०
[8]एवमेष महात्मा च सर्गप्रलयकोटिशः । विकुर्वाणः प्रकृतिमान्नाभिमन्येत बुद्धिमान् ॥ ४१
तमःसत्त्वरजोयुक्तस्तासु तास्विह योनिषु । लीयते प्रतिबुद्धत्वादबुद्धजनसेवनात् ॥ ४२
सहवासनिवासत्वा[9]द्बालोऽहमिति मन्यते । योऽहं न सोऽहमित्युक्तो गुणानेवानुवर्तते ॥ ४३
तमसा तामसान्भावान्विविधान्प्रतिपद्यते । रजसा राजसांश्चैव सात्त्विकान्सत्त्वसंश्रयात् ॥ ४४
शुक्ललोहितकृष्णानि रूपाण्येतानि त्रीणि तु । सर्वाण्येतानि रूपाणि जानीहि प्रा[10]कृतानि तु ॥ ४५
तामसा निरयं यान्ति राजसा मानुषानथ । सात्त्विका देवलोकाय गच्छन्ति सुखभागिनः ॥ ४६
निष्केवलेन पापेन तिर्यग्योनिमवाप्नुयात् । पुण्यपापेषु मानुष्यं पुण्यमात्रेण देवताः ॥ ४७
एवमव्यक्तविषयं[11] मोक्षमाहुर्मनीषिणः । पञ्चविंशतिमो योऽयं ज्ञानादेव प्रवर्तते ॥ ४८

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवादे क्षराक्षरविचारनिरूपणं नाम चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४० ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३४९३

अथैकचत्वारिंशदधिकद्विशततमोऽध्यायः।

वसिष्ठ उवाच—

एवमप्रतिबुद्धत्वा[12]दबुद्धमनुवर्तते । देहाद्देहसहस्राणि तथा च न स भिद्यते ॥ १
तिर्यग्योनिसहस्रेषु कदाचिद्देवतास्वपि । उत्पद्यति तपोयोगाद्गुणैः सं[13]ह गुणक्षयात् ॥ २
मनुष्यत्वाद्दिवं याति देवो मानुष्यमेति च । मानुष्यान्निरयस्थानमा[14]लयं प्रतिपद्यते ॥ ३
कोषकारो यथाऽऽत्मानं कीटः समभिरुन्धति । सूत्रतन्तुगुणैर्नित्यं तथाऽयमगुणो गुणैः ॥ ४
द्वंद्वमेति च निर्द्वंद्वस्तासु तास्विह योनिषु । शीर्षरोगेऽक्षिरोगे च दन्तशूले गलग्रहे ॥ ५
जलोदरेऽतिसारे च गण्डमालाविचर्चिके । श्वित्रकुष्ठेऽग्निदग्धे च सिध्मापस्मारयोरपि ॥ ६
यानि चान्यानि द्वंद्वानि प्राकृतानि शरीरिणाम् । उत्पद्यन्ते विचित्राणि तान्येवाऽऽत्माऽभिम[15]न्यते ॥ ७
अभिमानातिमानानां तथैव सुकृतान्यपि । एकवासाश्चै[16]तुर्वासाः शायी नित्यमधस्तथा ॥ ८
मण्डूकशायी च तथा वीरासनगतस्तथा । वीरमासनमाकाशे तथा शयनमेव च ॥ ९

---

१ ग. °क्ताव्यक्त° । २ क. ग. °वाग्रजो नि° । ३ ख. ग. °रनिदर्शन° । ४ ख. °तिमो मू° । ५ ग. विष्णोः । ६ क. °तिको व्य° । ७ ख. °न् । अचेताश्चे° । ८ क. एष एव म° । ९ क. °त्वात्तेनाह° । ख. °त्वान्नान्योऽह° । १० ग. प्रकृतानि । ११ ग. °यं क्षरमा° । १२ ख. °त्वादबुद्धिरेव प्रव° । १३ क. °ह युगक्ष° । १४ ग. °मानुष्यं प्र° । १५ ख. °भिगच्छति । अ° । १६ ख. °श्च दुर्वा° ।

इष्टकाप्रस्तरे चैव चक्रकप्रस्तरे तथा। भस्मप्रस्तरशायी च भूमिशय्यानुलेपनः ॥ १०
वीरस्थानाम्बुपाके च शयनं फलकेषु च। विविधासु च शय्यासु फलगृद्ध्यान्वितासु च ॥ ११
उद्याने खललग्ने तु क्षौमकृष्णाजिनान्वितः[2]। मणिवालपरीधानो व्याघ्रचर्मपरिच्छदः ॥ १२
सिंहचर्मपरीधानः पट्ट[3]वासास्तथैव च। फलकं (?) परिधानश्च तथा[4] कटकवस्त्रधृक् ॥ १३
कटैकवसनश्चैव चीरवासास्तथैव च। वस्त्राणि चान्यानि बहून्यभिमत्य च बुद्धिमान् ॥ १४
भोजनानि विचित्राणि रत्नानि विविधानि च। एकरात्रान्तराशित्वमेककालिकभोजनम् ॥ १५
चतुर्थाष्टमकालं[5] च षष्ठकालिकमेव च। षड्रात्रभोजनश्चैव तथा चाष्टाहभोजनः ॥ १६
मासोपवासी मूलाशी फलाहारस्तथैव च। वायुर्भक्ष[6]श्च पिण्याकदधिगोमयभोजनः ॥ १७
गोमूत्रभोजनश्चैव काशपुष्पाशनस्तथा। शैवालभोजनश्चैव तथा चान्येन वर्तयन् ॥ १८
वर्तयञ्शीर्णपर्णैश्च प्रकीर्णफलभोजनः। विविधानि च कृच्छ्राणि सेवते सिद्धिकाङ्क्षया ॥ १९
चान्द्रायणानि विधिवल्लिङ्गानि विविधानि च। चातुराश्रम्ययुक्तानि[7] धर्माधर्माश्रयाण्यपि ॥ २०
उपाश्रयानप्यपरान्पाखण्डान्विविधानपि। विविक्ताश्च शिलाछायास्तथा प्रस्रवणानि च ॥ २१
पुलिनानि विविक्तानि विविधानि वनानि च। काननेषु विविक्ताश्च शैलानां महतीर्गुहाः ॥ २२
नियमान्विविधांश्चापि विविधानि तपांसि च। यज्ञांश्च विविधाकारान्विधाश्च विविधास्तथा २३
वणिक्पथं द्विजक्षत्रवैश्यशूद्रांस्तथैव च। दानं च विविधाकारं दीनान्धकृपणादिषु ॥ २४
अभिमन्येत[8] संधातुं तथैव विविधान्गुणान्। सत्त्वं रजस्तमश्चैव धर्मार्थौ काम एव च[9] ॥ २५
प्रकृत्याऽऽत्मानमेवाऽऽत्मा एवं प्रविभजं[10]त्युत। स्वाहाकारवषट्कारौ स्वधाकारनमस्क्रिये ॥ २६
यजनाध्ययने दानं तथैवाऽऽहुः प्रतिग्रहम्। याजनाध्यापने चैव तथाऽन्यदपि किंचन ॥ २७
जन्ममृत्युविधानेन तथा विशसनेन च। शुभाशुभमयं सर्वमेतदाहुः[11] सनातनम् ॥ २८
प्रकृतिः कुरुते देवी भयं प्रलयमेव च। दिवसान्ते गुणानेतानतीत्यैकोऽवतिष्ठते ॥ २९
रश्मिजालमिवाऽऽदित्यस्तत्कालं संनियच्छति। एवमेवैष तत्सर्वं क्रीडार्थमभिमन्यते ॥ ३०
आत्मरूपगुणानेतान्विविधान्हृदयप्रियान्। एवमेतां प्रकुर्वाणः सर्गप्रलयधर्मिणीम् ॥ ३१
क्रियां क्रियापथे रक्तस्त्रिगुणस्त्रिगुणाधिपः। क्रियाक्रियापथोपेतस्तथा तदिति मन्यते ॥ ३२
प्रकृत्या सर्वमेवेदं जगदन्धीकृतं विभो। रजसा तमसा चैव व्याप्तं सर्वमनेकधा ॥ ३३
एवं द्वंद्वान्यतीतानि मम वर्तन्ति नित्यशः। मत्त एतानि जायन्ते प्रलये यान्ति मामपि ॥ ३४
निस्तर्तव्याण्यथैतानि सर्वाणीति नराधिप। मन्यते पक्षबुद्धित्वात्तथैव सुकृतान्यपि ॥ ३५
भोक्तव्यानि ममैतानि देवलोकगतेन वै। इहैव चैनं भोक्ष्यामि[12] शुभाशुभफलोदयम् ॥ ३६
सुखमेवं तु कर्तव्यं सकृत्कृत्वा सुखं मम। यावदेव तु मे सौख्यं जात्यां जात्यां भविष्यति ३७
भविष्यति न मे दुःखं कृतेनेहाप्यनन्तकम्। सुखदुः[13]खं हि मानुष्यं निरये चापि मज्जनम्॥ ३८
निरयाच्चापि मानुष्यं कालेनैष्याम्यहं पुनः। मनुष्यत्वाच्च देवत्वं देवत्वात्पौरुषं पुनः ॥ ३९
मनुष्यत्वाच्च निरयं[14] पर्यायेणोपगच्छति[15]। एष एवं द्विजातीनामात्मा वै स गुणैर्वृतः ॥ ४०

---

१ क. °व कुशस्य प्र°। २ ग. °तः। शालिवानप°। ३ ख. पटवा°। ४ ख. तथोदकसुव°। ५ ख. °कालश्च ष°। ६ ख. °भक्षोऽम्बुपि°। ७ क. °नि वर्णधर्माश्र°। ८ क. °मन्य तु सं°। ख. °मन्यवसं°। ९ क. च। स कृत्वाऽऽत्मा°। १० क. ख. °जत्पुनः। स्वा°। ११ ख. ग. क्रियापथम्। १२ क. °मि पापपुण्यफ°। १३ ग. °दुःखे हि। १४ क. नरकं। १५ ग. °ति। य एवं वेत्ति नित्यं वै निरात्माऽऽत्मगु°।

तेन देवमनुष्येषु निरयं चोपपद्यते । ममत्वेनाऽऽवृतो नित्यं तत्रैव परिवर्तते ॥ ४१
सर्गकोटिसहस्राणि मरणान्तासु मूर्तिषु । य एवं कुरुते कर्म शुभाशुभफलात्मकम् ॥ ४२
स एवं फलमाप्नोति त्रिषु लोकेषु मूर्तिमान् । प्रकृतिः कुरुते कर्म शुभाशुभफलात्मकम् ॥ ४३
प्रकृतिश्च तथाऽऽप्नोति त्रिषु लोकेषु कामगा । तिर्यग्योनिमनुष्यत्वे देवलोके तथैव च ॥ ४४
त्रीणि स्थानानि चैतानि जानीयात्प्राकृतानि ह । अलिङ्गप्रकृतित्वाच्च लिङ्गैरप्यनुमीयते ॥ ४५
तथैव पौरुषं लिङ्गमनुमानाद्धि मन्यते । स लिङ्गान्तरमासाद्य प्राकृतं लिङ्गमव्रणम्[1] ॥ ४६
व्रणद्वाराण्यधिष्ठाय कर्माण्यात्मानि[2] मन्यते । श्रोत्रादीनि तु सर्वाणि पञ्च कर्मेन्द्रियाण्यथ ॥ ४७
रागादीनि प्रवर्तन्ते गुणेष्विह गुणैः सह । अहमेतानि वै कुर्वन्ममैतानीन्द्रियाणि ह ॥ ४८
निरिन्द्रियो हि मन्येत व्रणवानस्मि निर्व्रणः । अलिङ्गो लिङ्गमात्मानमकालं कालमात्मनः ॥ ४९
असत्त्वं सत्त्वमात्मानममृतं मृतमात्मनः । अमृत्युं मृत्युमात्मानमचरं चरमात्मनः ॥ ५०
अक्षेत्रं क्षेत्रमात्मानमसङ्गं सङ्गमात्मनः । अतत्त्वं तत्त्वमात्मानमभवं भवमात्मनः ॥ ५१
अक्षरं क्षरमात्मानमबुद्धत्वाद्धि मन्यते । एवमप्रतिबुद्धत्वादबुद्धजनसेवनात् ॥ ५२
सर्गकोटिसहस्राणि पतनान्तानि गच्छति[3] । जन्मान्तरसहस्राणि मरणान्तानि गच्छति ॥ ५३
तिर्यग्योनिमनुष्यत्वे देवलोके तथैव च । चन्द्रमा इव कोशानां[4] पुनस्तत्र सहस्रशः ॥ ५४
नीयतेऽप्रतिबुद्धत्वादेवमेव कुबुद्धिमान् । कला[5] पञ्चदशी योनिस्तद्धाम इति[6] पठ्यते[7] ॥ ५५
नित्यमेव[8] विजानीहि सोमं वै षोडशांशकैः[9] । कलया[10] जायतेऽजस्रं पुनः पुनरबुद्धिमान्[11] ॥ ५६
धीमांश्चायं न भवति नृप एवं हि जायते । षोडशी तु कला सूक्ष्मा स सोम उपधार्यताम् ॥ ५७
न[12] तूपयुज्यते देवैर्देवानपि युनक्ति सः । ममत्वं क्षपयित्वा तु जायते नृपसत्तम ॥
प्रकृतेस्त्रिगुणायास्तु स एव त्रिगुणो[13] भवेत् ॥

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवाद एकचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४१ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३५५१

अथ द्विचत्वारिंशदधिकद्विशततमोऽध्यायः ।

जनक उवाच—

अक्षरक्षरयोरेष द्वयोः संबन्ध इष्यते । स्त्रीपुंसयोर्वा[14] संबन्धः स वै पुरुष उच्यते ॥ १
ऋते तु पुरुषं नेह स्त्री गर्भान्धारयत्युत । ऋते स्त्रियं न पुरुषो रूपं[15] निर्वर्तते तथा ॥ २
अन्योन्यस्याभिसंबन्धादन्योन्यगुणसंश्रयात् । रूपं निर्वर्तयेदेतदेवं सर्वासु योनिषु[16] ॥ ३
रत्यर्थमतिसंयोगादन्योन्यगुणसंश्रयात् । ऋतौ निर्वर्तते रूपं तद्वक्ष्यामि निदर्शनम् ॥ ४

---

१ ख. °म् । प्राणान्द्वारा° । २ क. ग. कर्मणाऽऽत्म° । ३ ग °ति । धाम्ना धामस° । ४ क. लोकानां । ५ ग. कलाः । ६ ख. ग. इव । ७ ख. पद्यते । ८ ख. ग. °मेतद्विजा° । ९ क. °दशात्मकम् । क° । ग. °डशीं कलाम् । क° । १० क. कला पञ्चदशी तेजस्ते पुनश्च कुः° । ११ ग. °न् । धाम तस्योपगुञ्जन्ति भूय एव तु जा° । १२ क. न भूयश्चेज्य° । १३ ग. द्विगुणो । १४ ग. °योर्भगवन्संबन्धस्तु तदुच्य° । १५ क. °पं प्रतिनिवर्तते । अ° । १६ ख. °षु । गत्यर्थानभिसं° ।

ये गुणाः पुरुषस्येह ये च मातुर्गुणास्तथा । अस्थि स्नायु च मज्जा च जानीमः पितृतो द्विज॥५
त्वङ्मांसशोणितं चेति मातृजान्यनुशुश्रुम । एवमेतद्द्विजश्रेष्ठ वेदशास्त्रेषु पठ्यते ॥ ६
प्रमाणं यच्च वेदोक्तं शास्त्रोक्तं यच्च पठ्यते । वेदशास्त्रप्रमाणं च प्रमाणं तत्सनातनम् ॥ ७
एवमेवाभिसंबन्धौ नित्यं प्रकृतिपूरुषौ । यच्चापि भगवंस्तस्मान्मोक्षधर्मो न विद्यते ॥ ८
अथवाऽनन्तरकृतं किंचिदेव निदर्शनम् । तन्ममाऽऽचक्ष्व तत्त्वेन प्रत्यक्षो ह्यसि सर्वदा ॥ ९
मोक्षकामा वयं चापि काङ्क्षामो यदनामयम् । अजेयमजरं नित्यमतीन्द्रियमनीश्वरम् ॥ १०

वसिष्ठ उवाच—

यदेतदुक्तं भवता वेदशास्त्रनिदर्शनम् । एवमेतद्यथार्थो वक्ष्ये तत्त्वग्राही यथा भवान् ॥ ११
धार्यते हि त्वया ग्रन्थ उभयोर्वेदशास्त्रयोः । न च ग्रन्थस्य तत्त्वज्ञो यथातत्त्वं नरेश्वर ॥ १२
यो हि वेदे च शास्त्रे च ग्रन्थधारणतत्परः । न च ग्रन्थार्थतत्त्वज्ञस्तस्य तद्धारणं वृथा ॥ १३
भारं स वहते तस्य ग्रन्थस्यार्थं न वेत्ति यः । यस्तु ग्रन्थार्थतत्त्वज्ञो नास्य ग्रन्थागमो वृथा ॥ १४
ग्रन्थस्यार्थं स पृष्टस्तु मादृशो वक्तुमर्हति । यथातत्त्वाभिगमनादर्थं तस्य स विन्दति ॥ १५
न यः समुत्सुकः कश्चिद्ग्रन्थार्थं स्थूलबुद्धिमान् । स कथं मन्दविज्ञानो ग्रन्थं वक्ष्यति निर्णयात्॥
*अज्ञात्वा ग्रन्थतत्त्वानि वादं यः कुरुते नरः । लोभाद्वाऽप्यथवा दम्भात्स पापी नरकं व्रजेत्॥
निर्णयं चापि च्छिद्रात्मा न तद्वक्ष्यति तत्त्वतः । सोऽपीहास्यार्थतत्त्वज्ञो यस्मान्नैवाऽऽत्मवानपि॥
तस्मात्त्वं शृणु राजेन्द्र यथैतदनुदृश्यते[६] । यथा तत्त्वेन सांख्येषु योगेषु च महात्मसु ॥ १९
यदेव योगाः पश्यन्ति सांख्यं तदनुगम्यते । एकं सांख्यं च योगं च यः पश्यति स बुद्धिमान्.
त्वङ्मांसं रुधिरं मेदः पित्तं मज्जाऽस्थि स्नायु च । एतदैन्द्रियकं तात यद्भवानित्थमात्थ माम् ॥
द्रव्याद्द्रव्यस्य निर्वृत्तिरिन्द्रियादिन्द्रियं तथा । देहाद्देहमवाप्नोति बीजाद्बीजं तथैव च ॥ २२
निरिन्द्रियस्य बीजस्य निर्द्रव्यस्यापि देहिनः । कथं गुणा भविष्यन्ति निर्गुणत्वान्महात्मनः २३
गुणा गुणेषु जायन्ते तत्रैव विरमन्ति च । एवं गुणाः प्रकृतिजा जायन्ते न च यान्ति च॥ २४
त्वङ्मांसं रुधिरं मेदः पित्तं मज्जाऽस्थि स्नायु च । अष्टौ तान्यथ शुक्रेण जानीहि प्राकृतेन वै ॥
पुमांश्चैवापुमांश्चैव स्त्रीलिङ्गं प्राकृतं स्मृतम् । वायुरेष पुमांश्चैव रसं इत्यभिधीयते ॥ २६
अलिङ्गा प्रकृतिर्लिङ्गैरुपलभ्यति[११] साऽऽत्मजैः[१२] । यथा पुष्पफलैर्नित्यं+ मूर्तं चामूर्तयस्तथा ॥ २७
एवमप्यनुमानेन स लिङ्गमुपलभ्यते । पञ्चविंशतिकस्तात लिङ्गेषु नियतात्मकः[१३] ॥ २८
अनादिनिधनोऽनन्तः सर्वदर्शनकेवलः[१४] । केवलं[१५] त्वभिमानित्वाद्गुणेषु गुण उच्यते ॥ २९
गुणा गुणवतः सन्ति निर्गुणस्य[१६] कुतो गुणाः । तस्मादेवं विजानन्ति ये जना गुणदर्शिनः॥ ३०
यदा त्वेष गुणानेतान्प्राकृतानभिमन्यते । तदा स गुणवानेव[१७] गुणभेदान्प्रपश्यति ॥ ३१
यत्तद्बुद्धेः परं प्राहुः सांख्ययोगं च सर्वशः[१८] । बुध्यमानं महाप्राज्ञाः प्रबुद्धपरिवर्जनात् ॥ ३२

---

* अयं श्लोको ग. पुस्तके नास्ति । + इत आरभ्याग्रे 'प्रकृतिं प्रसवात्मिकाम्' इत्येतत्पर्यन्तं त्रुटितं ख. पुस्तके ।

---

१ क. च याति नः पि॰ । २ ग. ॰धर्मान्न वि॰ । ३ क. अन्यद्वाऽन॰ । ४ क. ॰था तद्वै जन्म गृह्णाति चेतनः । धा॰ । ग. ॰था तद्वै तत्त्वं गृह्णाद्यथा । ५ क. ह्यर्थं । ६ क. ॰ते । याथातथ्येन । ७ ग. सांख्यैस्तदभिकथ्यते । ८ क. जायन्ते । ९ क. ख. शुभम् । १० क. रेत । ११ क. ॰लिङ्ग उप॰ । १२ ग. ॰ति चाऽऽत्म॰ । १३ ग. ॰त्मकम् । अ॰ । १४ ग. ॰वलम् । के॰ । १५ क. ॰लं बलवानीशगुणे॰ । १६ क. ॰र्गुणेषु कु॰ । १७ ग. ॰व परमेनाव॰ । १८ ग. ॰शः । प्रबुद्धिमान्महाप्राज्ञः प्र॰ ।

अप्रबुद्धं यथा व्यक्तं स्वगुणैः प्राहुरीश्वरम् । निर्गुणं चेश्वरं नित्यमधिष्ठातारमेव च ॥ ३३
प्रकृतेश्च गुणानां च पञ्चविंशतिकं बुधाः । सांख्ययोगे च कुशला बुध्यन्ते परमैषिणः ॥ ३४
*यदा प्रबुद्धमव्यक्तमवस्थात(प)ननी(भी)रवः । बुध्यमानं[1] न बुध्यन्ते[2]ऽवगच्छन्ति समं[3] तदा ३५
एतन्निदर्शनं सम्बद्धन[4] सम्यगनुदर्शनम् । बुध्यमानं प्रबुध्यन्ते द्वाभ्यां पृथगरिंदम ॥ ३६
परस्परेणैतदुक्तं क्षराक्षरनिदर्शनम् । एकत्वमक्षरं प्राहुर्नानात्वं क्षरमुच्यते ॥ ३७
पञ्चविंशतिनिष्ठो[5]ऽयं तदा सम्यक्प्रचक्षते । एकत्वदर्शनं चास्य नानात्वं चास्य दर्शनम् ॥ ३८
तत्त्ववित्[6]तत्त्वयोरेव पृथगेतन्निदर्शनम् । पञ्चविंशतिभिस्तत्त्वं तत्त्वमाहुर्मनीषिणः ॥ ३९
+निस्तत्त्वं पञ्चविंशस्य परमाहुर्मनीषिणः । वर्ज्यस्य[7] वर्ज्यमाचारं[8] तत्त्वं तत्त्वात्सनातनम् ॥ ४०

करालजनक उवाच—

नानात्वैकत्वमित्युक्तं त्वयैतद्द्विजसत्तम । पश्यतस्तद्धि संदिग्धमेतयोर्वै निदर्शनम् ॥ ४१
तथा बुद्ध[9]प्रबुद्धाभ्यां[10] बुध्यमानस्य चानघ । स्थूलबुद्ध्या न पश्यामि तत्त्वमेतन्न संशयः ॥ ४२
अक्षरक्षरयोरुक्तं त्वया यदपि कारणम् । तदप्यस्थिरबुद्धित्वात्प्रनष्टमिव मेऽनघ ॥ ४३
तदेतच्छ्रोतुमिच्छामि नानात्वैकत्वदर्शनम्[11] । द्वंद्वं चैवानिरुद्धं च बुध्यमानं च तत्त्वतः ॥ ४४
विद्याविद्ये च भगवन्नक्षरं क्षरमेव च । सांख्ययोगं च[12] कृत्स्नेन बुद्धाबुद्धिं पृथक्पृथक् ॥ ४५

वसिष्ठ उवाच—

हन्त ते संप्रवक्ष्यामि यदेतदनुपृच्छसि । योगकृत्यं[13] महाराज पृथगेव शृणुष्व मे ॥ ४६
योगकृत्यं तु योगानां ध्यानमेव परं बलम् । तच्चापि[14] द्विविधं ध्यानमाहुर्विद्याविदो जनाः ॥४७
एकाग्रता च मनसः प्राणायामस्तथैव च । प्राणायामस्तु[15] सगुणो निर्गुणो मानसस्तथा ॥ ४८
मूत्रोत्सर्गे पुरीषे च भोजने च नराधिप(?) । द्विकालं नोपभुञ्जीत शेषं भुञ्जीत तत्परः[16] ॥ ४९
इन्द्रियाणीन्द्रियार्थेभ्यो निवर्त्य मनसा मुनिः । दशद्वादशभिर्वाऽपि[17] चतुर्विंशात्परं[18] यतः ॥ ५०
स चोदनाभिर्मतिमान्नाऽऽत्मानं चोदयेदथ । तिष्ठन्तमजरं[19] तं तु यत्तदुक्तं मनीषिभिः ॥ ५१
विश्वात्मा सततं ज्ञेय इत्येवमनुशुश्रुम । द्रव्यं हीन[20]मनसो नान्यथेति विनिश्चयः ॥ ५२
विमुक्तः सर्वसङ्गेभ्यो लघ्वाहारो[21] जितेन्द्रियः । पूर्वरात्रे परार्धे च धारयीत[22] मनो हृदि ॥ ५३
स्थिरीकृत्येन्द्रियग्रामं मनसा मिथिलेश्वर । मनो बुद्ध्या स्थिरं कृत्वा पाषाण इव निश्चलः ॥५४
स्थाणुवच्चाप्यकम्प्यः स्याद्दारुवच्चापि निश्चलः । बुद्ध्या विधिविधानज्ञस्ततो युक्तं[23] प्रचक्षते ॥५५
न शृणोति न चाऽऽघ्राति न[24] च पश्यति किंचन । न च स्पर्शं विजानाति न च संकल्पते मनः
न चापि[25] मन्यते किंचिन्न च बुध्येत[26] काष्ठवत् । तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषिणः[27] ॥ ५७

* इदमर्धं ग. पुस्तके नास्ति । + इदमर्धं क. पुस्तके नास्ति ।

१ ग. °माने न । २ ग. °न्ते न ग° । ३ ग. मतं । ४ ग. °म्यग्ग्रन्थदर्शनद° । ५ ग. °तिविष्णोऽयं । ६ ग. तद्वन्निस्तत्त्व° । ७ ग. वर्गस्य । ८ ग. वर्गमात्मानं त° । ९ क. बुद्धं प्र° । १० क. °द्धात्मा बु° । ११ ग. °म् । बुद्धं जहात्यबुद्धं च बु° । १२ क. च सांख्येन पृथक्त्वेन पृथक्स्थितिः । व° । १३ क. °त्यं तु योगेन ध्यान° । १४ क. °पि तद्विधत्वाच्च आहु° । १५ क. °यामः सत्त्वगु° । १६ क. तत्त्वतः । १७ क. °पि पञ्चविंशा° । १८ क. °रं तत्र । संवादादीभि° । १९ क. °जरत्वं तु । २० क. °हार्दीन° । २१ क. लघुवागात्मा° । २२ क. वाचयित्वा । २३ क. नित्यं । २४ ग. न रंस्यति न पश्यति । न । २५ क. °चावम° । २६ ग. बुध्यति । २७ ग. °णः । निवाते हि ।

न भाति हि यथा [1]दीपो दीप्तिस्तद्वच्च दृश्यते । निलिङ्गश्चाधश्चोर्ध्वं च तिर्यग्गतिमवाप्नुयात् ॥५८
तदा तदुपपन्नश्च यस्मिन्दृष्टे च कथ्यते । हृदयस्थोऽन्तरात्मेति ज्ञेयो ज्ञस्तात मद्विधैः ॥ ५९
निर्धूम इव सप्तार्चिरादित्य इव रश्मिवान् । वैद्युतोऽग्निरिवाऽऽकाशे पश्यत्यात्मानमात्मनि॥ ६०
यं पश्यन्ति महात्मानो धृतिमन्तो मनीषिणः । ब्राह्मणा ब्रह्मयोनिस्था ह्ययोनिममृतात्मकम् ६१
तदेवाऽऽहुरणुभ्योऽणु तन्महद्भ्यो महत्तरम् । सर्वत्र सर्वभूतेषु ध्रुवं तिष्ठन्न दृश्यते ॥ ६२
[2]बुद्धिद्रव्येण दृश्येन मनोदीपेन लोककृत् । महतस्तमसस्तात पारे [3]तिष्ठन्न तामसः ॥ ६३
तमसो दूर इत्युक्तस्तत्त्वज्ञैर्वेदपारगैः । विमलो विमतश्चैव निर्लिङ्गोऽलिङ्गसंज्ञकः ॥ ६४
योग एष हि [4]लोकानां किमन्यद्योगलक्षणम् । एवं पश्यन्प्रपश्येत आत्मानमजरं परम् ॥ ६५
योगदर्शनमेतावदुक्तं ते तत्त्वतो मया । [5]सांख्यज्ञानं प्रवक्ष्यामि परिसंख्यानिदर्शनम् ॥ ६६
अव्यक्तमाहुः [6]प्रख्यानं परां [7]प्रकृतिमात्मनः । तस्मान्महत्समुत्पन्नं द्वितीयं राजसत्तम ॥ ६७
अहंकारस्तु महतस्तृतीय इति नः श्रुतम् । पञ्चभूतान्यहंकारादाहुः [8]सांख्यात्मदर्शिनः ॥ ६८
एताः प्रकृतयस्त्वष्टौ विकाराश्चापि षोडश । पञ्च चैव विशेषाश्च तथा पञ्चेन्द्रियाणि च ॥ ६९
एतावदेव तत्त्वानां सांख्यमाहुर्मनीषिणः । सांख्ये सांख्यविधानज्ञा नित्यं सांख्यपथे स्थिताः
यस्माद्यदभिजायेत तत्तत्रैव प्रलीयते । लीयन्ते प्रतिलोमानि [9]गृह्यन्ते चान्तरात्मना ॥ ७१
आनुलोम्येन जायन्ते लीयन्ते प्रतिलोमतः । गुणा गुणेषु सततं सागरस्योर्मयो यथा ॥ ७२
सर्गप्रलय एतावान्प्रकृतेर्नृपसत्तम । एकत्वं [10]प्रलये चास्य बहुत्वं च [11]तथा सृजि ॥ ७३
एवमेव च राजेन्द्र विज्ञेयं ज्ञानकोविदैः । अधिष्ठातारमव्यक्तमस्याप्येतन्निदर्शनम् ॥ ७४
एकत्वं च बहुत्वं च प्रकृतेरनुतत्त्ववान् । एकत्वं प्रलये चास्य बहुत्वं च प्रवर्तनात् ॥ ७५
बहुधाऽऽत्मा प्रकुर्वीत प्रकृतिं प्रसवात्मिकाम् । [12]तच्च क्षेत्रं महानात्मा पञ्चविंशोऽधितिष्ठति ॥ ७६
अधिष्ठातेति राजेन्द्र प्रोच्यते यतिसत्तमैः । अधिष्ठानादधिष्ठाता क्षेत्राणामिति नः श्रुतम् ॥ ७७
क्षेत्रं जानाति [13]चाव्यक्तं क्षेत्रज्ञ इति चोच्यते । अव्यक्तिके पुरे शेते पुरुषश्चेति कथ्यते ॥ ७८
अन्यदेव च क्षेत्रं स्यादन्यः क्षेत्रज्ञ उच्यते । क्षेत्रमव्यक्त इत्युक्तं ज्ञातारं पञ्चविंशकम् ॥ ७९
अन्यदेव च ज्ञानं स्यादन्यज्ज्ञेयं तदुच्यते । ज्ञानमव्यक्तमित्युक्तं [14]ज्ञेयो वै पञ्चविंशकः ॥ ८०
अव्यक्तं क्षेत्रमित्युक्तं तथा सत्त्वं तथेश्वरम्* । अनीश्वरमतत्त्वं च [15]तत्त्वं तत्पञ्चविंशकम् ॥ ८१
+सांख्यदर्शनमेतावत्परिसंख्या न विद्यते । संख्या प्रकुरुते चैव प्रकृतिं च [16]प्रवक्ष्यते ॥ ८२
चत्वारिंशच्चतुर्विंशत्प्रतिसंख्याय तत्त्वतः । संख्या [17]सहस्रकृत्या तु निस्तत्त्वः पञ्चविंशकः ॥ ८३
पञ्चविंशत्[18]प्रबुद्धात्मा बुध्यमान इति [19]श्रुतः । यदा बुध्यति आत्मानं तदा भवति [20]केवलः ॥ ८४
सम्यग्दर्शनमेतावद्भाषितं तव तत्त्वतः । एवमेतद्विजानन्तः साम्यतां प्रतियान्त्युत ॥ ८५

---

* इत उत्तरम् 'यथा मत्स्यो ह्यभिज्ञानात्' इत्येतत्पर्यन्तं त्रुटितं क. पुस्तके । + इदमर्धं ख. पुस्तके नास्ति ।

---

१ ग. दीप्यदीप्तो दीपः प्रद° । २ क. °द्धिर्दर्शयेत मानादि येन तल्लोकवैकृतम् । म° । ग. °द्धिर्द्रव्ये° । ३ क. °न्ननामयः । त° । ४ क. योगानां । ५ क. सांख्ययोगं । ६ ग. प्रकृतिं । ७ ग. °तिवादिनः । ८ क. सांख्यविशारदाः । ए° । ९ ग. सज्यन्ते । १० क. प्रीतये । ११ क. °थाऽस्य तत् । ए° । १२ क. तत्त्वक्षे° । १३ क. ख. °क्तं ज्ञेयो वै पञ्चविंशकः । अ° । १४ क. ख. °क्तं तथा वै । १५ ख. तत्त्वमेकवि° । १६ ग. प्रचक्षते । १७ ख. °स्रप्रकृत्या नि° । १८ ग. °बुद्ध्यो बु° । १९ ख. स्मृतः । २० ग. केवलम् ।

सम्यङ्निदर्शनं नाम प्रत्यक्षं प्रकृतेस्तथा। गुणवत्त्वाद्यथैतानि निर्गुणेभ्यस्तथा भवेत् ॥ ८६
न त्वेवं वर्तमानानामावृत्तिर्वर्तते पुनः। विद्यते क्षरभावश्च न परस्परमव्ययम् ॥ ८७
पश्यन्त्यमतयो ये न सम्यक्तेषु च दर्शनम्। ते व्यक्तिं प्रतिपद्यन्ते पुनः पुनररिंदम ॥ ८८
सर्वमेतद्विजानन्तो न सर्वस्य प्रबोधनात्। व्यक्तिभूता भविष्यन्ति व्यक्तस्यैवानुवर्तनात् ॥ ८९
सर्वमव्यक्तमित्युक्तमसर्वः पञ्चविंशकः। य एवमभिजानन्ति न भयं तेषु विद्यते ॥ ९०

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवादे द्विचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४२ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३६४१

अथ त्रिचत्वारिंशदधिकद्विशततमोऽध्यायः।

वसिष्ठ उवाच—
सांख्यदर्शनमेतावदुक्तं ते नृपसत्तम। विद्याविद्ये त्विदानीं मे त्वं निबोधानुपूर्वशः ॥ १
अभेद्यमाहुरव्यक्तं सर्गप्रलयधर्मिणः। सर्गप्रलय इत्युक्तं विद्याविद्ये च विंशकः ॥ २
परस्परस्य विद्या वै तन्निबोधानुपूर्वशः। यथोक्तमृषिभिस्तात सांख्यस्यातिनिदर्शनम् ॥ ३
कर्मेन्द्रियाणां सर्वेषां विद्या बुद्धीन्द्रियं स्मृतम्। बुद्धीन्द्रियाणां च तथा विशेषा इति नः श्रुतम्
विषयाणां मनस्तेषां विद्यामाहुर्मनीषिणः। मनसः पञ्च भूतानि विद्या इत्यभिचक्षते ॥ ५
अहंकारस्तु भूतानां पञ्चानां नात्र संशयः। अहंकारस्तथा विद्या बुद्धिर्विद्या नरेश्वर ॥ ६
बुद्ध्या प्रकृतिरव्यक्तं तत्त्वानां परमेश्वरः। विद्या ज्ञेया नरश्रेष्ठ विधिश्च परमः स्मृतः ॥ ७
अव्यक्तमपरं प्राहुर्विद्या वै पञ्चविंशकः। सर्वस्य सर्वमित्युक्तं ज्ञेयज्ञानस्य पारगः ॥ ८
ज्ञानमव्यक्तमित्युक्तं ज्ञेयं वै पञ्चविंशकम्। तथैव ज्ञानमव्यक्तं विज्ञाता पञ्चविंशकः ॥ ९
विद्याविद्ये तु तत्त्वेन मयोक्ते वै विशेषतः। अक्षरं च क्षरं चैव यदुक्तं तन्निबोध मे ॥ १०
उभावेतौ क्षरावुक्तौ उभावेतावन(था)क्षरौ। कारणं तु प्रवक्ष्यामि यथाज्ञानं तु ज्ञानतः ॥ ११
अनादिनिधनावेतौ उभावेवेश्वरौ मतौ। तत्त्वसंज्ञावुभावेव प्रोच्येते ज्ञानचिन्तकैः ॥ १२
सर्गप्रलयधर्मित्वादव्यक्तं प्राहुरव्ययम्। तदेतद्गुणसर्गाय विकुर्वाणं पुनः पुनः ॥ १३
गुणानां महदादीनामुत्पद्यति परस्परम्। अधिष्ठानं क्षेत्रमाहुरेतद्वै पञ्चविंशकम् ॥ १४
यदन्तर्गुणजालं तु तद्व्यक्तात्मनि संक्षिपेत्। तदहं तद्गुणैस्तैस्तु पञ्चविंशे विलीयते ॥ १५
गुणा गुणेषु लीयन्ते तदेका प्रकृतिर्भवेत्। क्षेत्रज्ञोऽपि तदा तावत्क्षेत्रज्ञः संप्रणीयते ॥ १६
*यदाऽक्षरं प्रकृतिर्ये गच्छते गुणसंज्ञिता। निर्गुणत्वं च वै देहे गुणेषु परिवर्तनात् ॥ १७

---

* इत आरभ्य सार्धश्लोको नास्ति ख. पुस्तके।

---

१ ग. °णतत्त्वान्यथै°। २ ग. °न्त्यथैकम°। ३ ख. °न्तो भवान्सर्वत्र°। ४ ख. प्रविशन्ति। ५ ग. °वाऽऽत्मदर्शना°। ६ ख. °त्युक्तं स सर्व प°। ७ ख. °शकम्। य। ८ ख. °स्परं द्विधा चैतत्त्वं निबो°। ९ ख. °स्याभिनिवेदन°। १० ख. °क्तस्य प°। ११ ख. °शकन्। स°। १२ ख. °नामित्युक्तं°। १३ ग. °विद्यार्थंत°। १४ ग. °योक्तान्तवि°। १५ ख. °थाविज्ञानज्ञा°। १६ ग. °ज्ञानुभावेन प्रो°। १७ ख. °सहाय। १८ ग. °ष्ठानात्क्षेत्र°। १९ ग. यद्यन्त°। २० ग. °लं तदव्यक्ता°। २१ ग. तात क्षेत्र°। २२ ख. °त्रज्ञानं परिक्षयेत्। य°।

एवमेव च क्षेत्रज्ञः क्षेत्रज्ञानपरिक्षयात् । प्रकृत्या निर्गुणस्त्वेष इत्येवमनुशुश्रुम ॥ १८
क्षरो भवत्येष यदा गुणवती गुणेष्वथ । प्र[1]कृतिं त्वथ जानाति निर्गुणत्वं तथाऽऽत्मनः ॥ १९
तथा[2] विशुद्धो भवति प्रकृतेः परिवर्जनात् । अन्योऽहमन्येयमिति यदा बुध्यति बुद्धिमान् ॥ २०
तदै[3]षोऽव्यथतामेति न च मिश्रत्वमाव्रजेत् । प्रकृत्या चैष राजेन्द्र [3]मिश्रोऽन्योऽन्यस्य दृश्यते २१
यदा तु गुणजालं तत्प्राकृतं विजुगुप्सते । पश्यते च परं पश्यंस्तदा [4]पश्यन्नु संसृजेत् ॥ २२
किं मया कृतमेतावद्योऽहं[5] कालनिमज्जनः । यथा मत्स्यो ह्यभिज्ञानादनुवर्तितवाञ्जलम् ॥ २३
अहमेव हि संमोहा[6]दन्यमन्यं जनाज्जनम् । मत्स्यो यथोदकज्ञानादनुवर्तितवानिह ॥ २४
मत्स्योऽन्य[7]त्वम[8]थाज्ञानादु[9]दकान्नाभिमन्यते । आत्मानं तद[10]वज्ञाना[11]दन्यं चैव न वेद्म्यहम् ॥ २५
ममास्तु धिक्कुबुद्धस्य योऽहं मग्न इमं पुनः । अनुवर्तितवान्मोहादन्यमन्यं जनाज्जनम् ॥ २६
अयम[12]नुभवेद्बन्धुरनेन सह मे क्षयम् । साम्यमेकत्वतां यातो यादृशस्तादृशस्त्वहम् ॥ २७
तुल्यतामिह पश्यामि सदृशोऽहमनेन वै । अयं हि विमलो व्यक्तमहमीदृशकस्तदा ॥ २८
योऽहमज्ञानसंमोहा[13]दज्ञया संप्रवृत्तवान् । संसर्गा[14]दतिसंसर्गात्स्थितः कालमिमं त्वहम् ॥ २९
सोऽहमेवं वशीभूतः कालमेतं न बुद्धवान्[15] । उत्तमाधममध्यानां तामहं कथमावसे ॥ ३०
समानमायया चेह सहवासमहं कथम् । गच्छाम्यबुद्धभावत्वादिहेदानीं स्थिरो भव ॥ ३१
सहवासं न यास्यामि कालमेतं विवञ्चनात् । वञ्चितो ह्यनया यद्धि निर्विकारो विकारया ॥ ३२
न तत्तदपराद्धं स्यादपराधो ह्ययं मम । योऽहमत्राभवं सक्तः पराङ्मुखमुपस्थितः ॥ ३३
ततोऽस्मिन्बहुरूपोऽथ स्थितो मूर्तिरमूर्तिमान् । अमूर्तिश्चाप्यमूर्तात्मा ममत्वेन प्रधर्षितः ॥ ३४
प्रकृत्या च तया तेन तासु तास्विह योनिषु । निर्ममस्य ममत्वेन विकृतं तासु तासु च ॥ ३५
योनिषु वर्तमानेन नष्टसंज्ञेन चेतसा[16] । समता न मया काचिदहंका[17]रे कृता मया ॥ ३६
आत्मानं बहुधा कृत्वा [18]सोऽयं भूयो युनक्ति माम् । इदानीमवबुद्धोऽस्मि निर्ममो निरहंकृतः ३७
ममत्वं मनसा नित्यमहंकारकृतात्मकम् । अपलग्नामिमां हित्वा संश्रयिष्ये निरामयम् ॥ ३८
अनेन साम्यं यास्यामि नानयाऽहमचेतसा । क्षेमं मम सहानेन नैवैकमनया सह ॥ ३९
एवं परमसंबोधात्पञ्चविंशोऽनुबुद्धवान् । अक्षरत्वं निगच्छति त्यक्त्वा क्षरमनामयम् ॥ ४०
अव्यक्तं व्यक्तधर्माणं सगुणं निर्गुणं तथा । निर्गुणं प्रथमं दृष्ट्वा तादृग्भवति मैथिल ॥ ४१
अक्षरक्षरयोरेतदुक्तं तव निदर्शनम् । मयेह ज्ञानसंपन्नं यथा श्रुतिनिदर्शनात् ॥ ४२
निःसंदिग्धं च सूक्ष्मं च विशुद्धं विमलं तथा । प्रवक्ष्यामि तु ते भूयस्तन्निबोध यथाश्रुतम् ॥ ४३
सांख्ययोगो मया प्रोक्तः शास्त्रद्वयनिदर्शनात् । यदेव सांख्यशास्त्रोक्तं योगदर्शनमेव तत् ॥ ४४
प्रबोधनपरं ज्ञानं सांख्यानामवनीपते । विस्पष्टं प्रोच्यते तत्र शिष्याणां हितकाम्यया ॥ ४५
बृहच्चै[19]वमिदं शास्त्रमित्याहुर्विदुषो जनाः । अस्मिंश्च शास्त्रे योगानां पुनर्भवपुरःसरम् ॥ ४६
पञ्चविंशात्परं तत्त्वं पठ्यते च नराधिप । सांख्यानां तु परं तत्त्वं यथावदनुवर्णितम्[20] ॥ ४७

---

१ ख. °कृतिस्त्वथ । २ ख. °थाऽभिशु° । ३ ख. भिथ्याऽन्येषु स दृ° । ४ ख. पश्यंश्च । ५ ख. °हंकारनि° । ६ ग. °हादन्यमन्यजलाज्जलम् । म° । ७ क. °न्यत्वं यथाऽन्यद्वा उदकं नावम° । ८ ग. °मथ ज्ञा° । ९ ग. °दकं नाभि° । १० ग. °दभिज्ञा° । ११ ख. ग. °दन्यत्वं चैव वे° । १२ ख. °मत्र भवेदेवं दुराननसहक्ष° । १३ क. ग. °हादाज्ञ° । १४ °र्गाहस्तु निःसङ्गः स्थितः । १५ क. °न् । मध्यमोऽहं हीनतरैस्तानहं । १६ क. °सा । मम । ग. °सा । मम तन्नानया कार्यमहं° । १७ ग. °कारकृ° । १८ ख. स्वयं । १९ ग. °व निरालम्बमि° । २० ख. °म् । शुद्धम° ।

बुद्धमप्रतिबुद्धं[1] च बुध्यमानं च तत्त्वतः । बुध्यमानं च बुद्धत्वं प्राहुर्योगनिदर्शनम् ॥ ४८

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवादे त्रिचत्वारिंशदधिक-
द्विशततमोऽध्यायः ॥ २४३ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३६८९

अथ चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ।

वसिष्ठ उवाच—

अप्रबुद्धमथाव्यक्त[2]मिमं गुणनिधिं सदा । गुणानां[3] धार्यतां तत्त्वं सृजत्याक्षिपते तथा ॥ १
[4]अजो हि क्रीडया भूप विक्रियां प्राप्त इत्युत । आत्मानं बहुधा कृत्वा नानेव[5] प्रतिचक्षते[6] ॥ २
एतदेवं विकुर्वाणो बुध्यमानो न बुध्यते । गुणानाचरते ह्येष सृजत्याक्षिपते तथा ॥ ३
अव्यक्तबोधनाच्चैव बुध्यमानं वदन्त्यपि[7] । न त्वेवं बुध्यतेऽव्यक्तं सगुणं तात निर्गुणम् ॥ ४
कदाचित्त्वेव खल्वेतत्तदाहुः प्रतिबुद्धकम् । बुध्यते यदि चाव्यक्तमेतद्वै पञ्चविंशकम् ॥ ५
बुध्यमानो भवत्येष ममात्मक[8] इति श्रुतः । अन्योन्यप्रतिबुद्धेन वदन्त्यव्यक्तमच्युतम् ॥ ६
अव्यक्तबोधनाच्चैव बुध्यमानं वदन्त्युत । पञ्चविंशं महात्मानं न चासावपि बुध्यते ॥ ७
षड्विंशं विमलं बुद्धमप्रमेयं सनातनम् । सततं पञ्चविंशं तु चतुर्विंशं[9] विबुध्यते ॥ ८
दृश्यादृश्ये ह्यनुगतं[10]तत्स्वभावे महाद्युते[11] । अव्यक्तं चैव तद्ब्रह्म बुध्यते[12] तात केवलम् ॥ ९
पञ्चविंशं[13] चतुर्विंश[14]मात्मानमनुपश्यति । बुध्यमानो यदाऽऽत्मानमन्योऽहमिति मन्यते ॥ १०
तदा प्रकृतिमानेष भवत्यव्यक्तलोचनः । बुध्यते च परां बुद्धिं[15] विशुद्धाममलां[16] यथा(दा) ॥ ११
षड्विंशं राजशार्दूल तदा बुद्धः[17] कृतो व्रजेत् । ततस्त्यजति सोऽव्यक्तं सर्गप्रलयधर्मिणम् ॥ १२
[18]निर्गुणां प्रकृतिं वेद गुणयुक्तामचेतनाम् । ततः केवलधर्माऽसौ भवत्यव्यक्तदर्शनात् ॥ १३
केवलेन समागम्य विमुक्तात्मानमाप्नुयात् । एतत्तु तत्त्वमित्याहुर्निस्तत्त्वमजरामरम् ॥ १४
तत्त्वसंश्रवणादेव तत्त्वज्ञो जायते नृप । पञ्चविंशतितत्त्वानि प्रवदन्ति मनीषिणः ॥ १५
न चैव तत्त्ववांस्तात[19] संसारेषु निमज्जति । एषामुपैति तत्त्वं[20] हि क्षिप्रं बुध्यस्व[21] लक्षणम् ॥ १६
षड्विंशो[22]ऽयमिति प्राज्ञो गृह्यमाणोऽजरामरः । केवलेन बलेनैव समतां यात्यसंशयम् ॥ १७
षड्विंशेन प्रबुद्धेन बुध्यमानोऽप्यबुद्धिमान् । एतन्नानात्व[23]मित्युक्तं सांख्यश्रुतिनिदर्शनात् ॥ १८
चेतनेन समेतस्य पञ्चविंशतिकस्य ह । एकत्वं वै भवेत्तस्य यदा[24] बुद्ध्यो[25]ऽनुबुध्यते ॥ १९
बुध्यमानेन[26] बुद्धेन समतां याति मैथिल । सङ्गधर्मा भवत्येष निःसङ्गात्मा नराधिप ॥ २०

---

१ ख. °तिशुद्धत्वं प्रा° । २ क. °व्यक्तं निर्गुणानां नि° । ३ ग. °णानधार्यं ते ह्येष सृ° । ४ ख. ग. अजस्रं नि... क्रीडार्थं विकुर्वन्ति जनाधिप । आ° । ५ क. ग. तान्येव । ६ ग. °चक्ष्यते । ७ क. ख. °दत्यपि । ८ ग. शमा... ९ क. °शं तु कथ्यते । १० क. ख. °तमुभावेव म° । ११ क. महद्धिते । १२ क. ख. °ते भावके° । १३ ग. °... १४ ग. °श आत्मना च न प° । १५ क. ख. बुद्धिमशु° । १६ क. ख. °मलो य° । १७ ग. बुद्धकृतो । ... १९ ख. °त निरतस्तत्त्वबुद्धिमान् । ए° । ग. °त निरस्तस्तत्त्वबुद्धिमान् । ए° । २० क. बुद्धिं । २१ क. ... °शोऽहमि° । २३ ग. एनं वामार्थमि° । २४ क. यथा । ख. यद्वा तु ध्यानबुध्यतः । बु° । २५ ग. °... °मानाप्रबु° ।

निःसङ्गात्मानमासाद्य षड्विंशं कर्मजं विदुः। विभुस्त्यजति चाव्यक्तं यदा त्वेतद्विबुध्यते ॥ २१
चतुर्विंशमगाधं च षड्विंशस्य प्रबोधनात्। एष ह्यप्रतिबुद्धश्च बुध्यमानस्तु तेऽनघ ॥ २२
उक्तो बुद्धश्च तत्त्वेन यथाश्रुतिनिदर्शनात्। मशकोदुम्बरे यद्वदन्यत्वं तद्वदेतयोः(कता) ॥ २३
मत्स्योदके यथा तद्वदन्यत्वमुपलभ्यते। एवमेव च गन्तव्यं नानात्वैकत्वमेतयोः ॥ २४
एतावन्मोक्ष इत्युक्तो ज्ञानविज्ञानसंज्ञितः। पञ्चविंशतिकस्याऽऽशु योऽयं देहे प्रवर्तते ॥ २५
एष मोक्षयितव्येति प्राहुरव्यक्तगोचरात्। सोऽयमेवं विमुच्येत नान्यथेति विनिश्चयः ॥ २६
परश्च परधर्मा च भवत्येव समेत्य वै। विशुद्धधर्मा शुद्धेन नाशुद्धेन च बुद्धिमान् ॥ २७
विमुक्तधर्मा बुद्धेन समेत्य पुरुषर्षभ। वियोगधर्मिणा चैव विमुक्तात्मा भवत्यथ ॥ २८
विमोक्षिणा विमोक्षश्च समेत्येह तथा भवेत्। शुचिकर्मा शुचिश्चैव भवत्यमितबुद्धिमान् ॥ २९
विमलात्मा च भवति समेत्य विमलात्मना। केवलात्मा तथा चैव केवलेन समेत्य वै ॥
स्वतन्त्रश्च स्वतन्त्रेण स्वतन्त्रत्वमवाप्यते ॥ ३०

एतावदेतत्कथितं मया ते तथ्यं महाराज यथार्थतत्त्वम्।
अमत्सरस्त्वं प्रतिगृह्य बुद्ध्या सनातनं ब्रह्म विशुद्धमाद्यम् ॥ ३१
तद्वेदनिष्ठस्य जनस्य राजन्प्रदेयमेतत्परमं त्वया भवेत्।
विधित्समानाय निबोधकारकं प्रबोधहेतोः प्रणतस्य शासनम् ॥ ३२
न देयमेतच्च यथाऽनृतात्मने शठाय क्लीबाय न जिह्मबुद्धये।
न पण्डितज्ञानपरोपतापिने देयं तथा शिष्यविबोधनाय ॥ ३३
श्रद्धान्विताय गुणान्विताय परापवादाद्विरताय नित्यम्।
विशुद्धयोगाय बुधाय चैव कृपावतेऽथ क्षमिणे हिताय ॥ ३४
विविक्तशीलाय विधिप्रियाय विवादहीनाय बहुश्रुताय।
विनीतवेशाय नहैतुकात्मने सदैव गुह्यं त्विदमेव देयम् ॥ ३५
एतैर्गुणैर्हीनतमे न देयमेतत्परं ब्रह्म विशुद्धमाहुः।
न श्रेयसे योक्ष्यति तादृशे कृतं धर्मप्रवक्तारमपात्रदानात् ॥ ३६
पृथ्वीमिमां वा यदि रत्नपूर्णां दद्याददेयं त्विदमव्रताय।
जितेन्द्रियाय प्रयताय देयं देयं परं तत्त्वविदे नरेन्द्र ॥ ३७
कराल मा ते भयमस्ति किंचिदेतच्छ्रुतं ब्रह्म परं त्वयाऽद्य।
यथावदुक्तं परमं पवित्रं विशोकमत्यन्तमनादिमध्यम् ॥ ३८
अगाधमेतदजरामरं च निरामयं वीतभयं शिवं च।
समीक्ष्य मोहं परवादसंज्ञमेतस्य तत्त्वार्थमिमं विदित्वा ॥ ३९
अवाप्तमेतद्धि पुरा सनातनाद्धिरण्यगर्भाद्धि ततो नराधिप।
प्रसाद्य यत्नेन तमुग्रतेजसं सनातनं ब्रह्म यथा त्वयैतत् ॥ ४०

वक्तव्यं। २ क. बुध्यस्व। ३ क. °न्यमन्यत्तथोभयोः। ४ क. °यं वेदेषु व°। ५ क. एतं मो°। ६ ...
... ७ क. °क्तमादरात्। ८ क. °धर्मयुक्तेन। ९ क. विशुद्धात्मा। १० ख. °तदीप्तिमा°। ११ क. ...
... चार्थं। १३ क. °मृ। देवैकनि°। १४ ख. सोऽहं।

पृष्टस्त्वया चाऽस्मि यथा नरेन्द्र तथा मयेदं त्वयि नोक्तमन्यत् ।
यथाऽवाप्तं ब्रह्मणो मे नरेन्द्र महाज्ञानं[1] मोक्षविदां परायणम् ॥ ४१

व्यास उवाच—

एतदुक्तं परं ब्रह्म यस्मान्नाऽऽवर्तते पुनः । पञ्चविंशं[2] मुनिश्रेष्ठा वसिष्ठेन यथा पुरा ॥ ४२
पुनरावृत्तिमाप्नोति परमं ज्ञानमव्ययम् । नाति बुध्यति तत्त्वेन बुध्यमानोऽजरामरम् ॥ ४३
एतन्निःश्रेयसकरं ज्ञानं भोः परमं मया । कथितं तत्त्वतो विप्राः श्रुत्वा देवर्षितो द्विजाः ॥ ४४
हिरण्यगर्भादृषिणा वसिष्ठेन समाहृतम् । वसिष्ठादृषिशार्दूलो नारदोऽवाप्तवानिदम् ॥ ४५
नारदाद्विदितं मह्यमेतदुक्तं सनातनम् । मा शुचध्वं मुनिश्रेष्ठाः श्रुत्वैतत्परमं पदम् ॥ ४६
येन क्षराक्षरे भिन्ने न भयं तस्य विद्यते । विद्यते[3] तु भयं यस्य यो नैनं वेत्ति तत्त्वतः ॥ ४७
अविज्ञानाच्च[4] मूढात्मा पुनः पुनरुपद्रवान् । प्रेत्य जातिसहस्राणि मरणान्तान्युपाश्नुते ॥ ४८
देवलोकं तथा तिर्यङ्मानुष्यमपि चाश्नुते । यदि[5] वा मुच्यते वाऽपि तस्मादज्ञानसागरात् ॥ ४९
अज्ञानसागरे घोरे ह्यव्यक्तागाध उच्यते । अहन्यहनि मज्जन्ति यत्र भूतानि भो द्विजाः ॥ ५०
*तस्मादगाधादव्यक्तादुपक्षीणात्सनातनात् । तस्माद्यूयं विरजस्का वितमस्काश्च भो द्विजाः ॥ ५१
एवं मया मुनिश्रेष्ठाः सारात्सारतरं परम् । कथितं[6] परमं मोक्षं यं ज्ञात्वा न निवर्तते ॥ ५२
न नास्तिकाय दातव्यं नाभक्ताय कदाचन । न दुष्टमतये विप्रा न श्रद्धाविमुखाय च ॥ ५३

इति श्रीमहापुराणे आदिब्राह्मे वसिष्ठकरालजनकसंवादसमाप्तिनिरूपणं नाम
चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३७४३

अथ पञ्चचत्वारिंशदधिकद्विशततमोऽध्यायः ।

लोमहर्षण उवाच—

एवं पुरा मुनीन्व्यासः पुराणं श्लक्ष्णया गिरा । दशाष्टदोषरहितैर्वाक्यैः सारतरैर्द्विजाः ॥ १
पूर्णमस्तमलैः शुद्धैर्नाना[7]शास्त्रसमुच्चयैः । जातिशुद्धसमायुक्तं[8] साधुशब्दोपशोभितम् ॥ २
पूर्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितम् । श्रावयित्वा[10] यथान्यायं विरराम महामतिः ॥ ३
तेऽपि श्रुत्वा मुनिश्रेष्ठाः[11] पुराणं वेदसंमितम् । आद्यं ब्राह्माभिधानं च सर्ववाञ्छाफलप्रदम् ॥ ४
हृष्टा बभूवुः सुप्रीता विस्मिताश्च पुनः पुनः । प्रशशंसुस्तदा व्यासं कृष्णद्वैपायनं मुनिम् ॥ ५

मुनय ऊचुः—

अहो त्वया मुनिश्रेष्ठ पुराणं श्रुतिसंमितम् । सर्वाभिप्रेतफलदं सर्वपापहरं परम्[12] ॥ ६
प्रोक्तं श्रुतं तथाऽस्माभिर्विचित्रपदमक्षरम् । न तेऽस्त्यविदितं किंचित्त्रिषु लोकेषु वै प्रभो ।

---

* अयं श्लोकः क. पुस्तके नास्ति ।

---

१ ग. महज्ज्ञानं । २ क. ग. पञ्चविंशो । ३ क. °ते न जरा शोको य एतद्वेत्ति । ४ क. °च्च मे
यदा भवति कालेन न° । ६ क. °तं मोक्षशास्त्रं वै यद्गत्वा । ७ ग. शुभ्रैर्ना° । ८ ख. °क्तं सांख्यश°
१० क. वाचयित्वा । ११ क. ख. मुनिवराः । १२ क. शिवम् ।

७५

सर्वज्ञस्त्वं महाभाग देवेष्विव बृहस्पतिः । नमस्यामो महाप्राज्ञं ब्रह्मिष्ठं त्वां महामुनिम् ॥ ८
येन त्वया तु वेदार्था भारते प्रकटीकृताः । कः शक्नोति गुणान्वक्तुं तव सर्वान्महामुने ॥ ९
अधीत्य चतुरो वेदान्साङ्गान्व्याकरणानि च[2] । [3]कृतवान्भारतं [4]शास्त्रं तस्मै [5]ज्ञानात्मने नमः ॥ १०
नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दाय[6]तपत्रनेत्र ।
येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥ ११
अज्ञानतिमिरान्धानां [7]भ्रामितानां कुदृष्टिभिः । ज्ञानाञ्जनशलाकेन त्वया चोन्मीलिता दृशः ॥
एवमुक्त्वा समभ्यर्च्य व्यासं ते चैव पूजिताः । जग्मुर्यथागतं सर्वे कृतकृत्याः स्वमाश्रमम् ॥ १३
तथा मया मुनिश्रेष्ठा कथितं हि सनातनम् । *पुराणं सुमहापुण्यं सर्वपापप्रणाशनम् ॥ १४
यथा भवद्भिः पृष्टोऽहं संप्रश्नं द्विजसत्तमाः । व्यासप्रसादात्तत्सर्वं मया संपरिकीर्तितम् ॥ १५
इदं गृहस्थैः श्रोतव्यं यतिभिर्[9]ब्रह्मचारिभिः । [10]धनसौख्यप्रदं नृणां पवित्रं पापनाशनम् ॥ १६
तथा ब्रह्मपरैर्विप्रैर्ब्राह्मणाद्यैः सुसंयतैः । श्रोतव्यं सुप्रयत्नेन सम्यक्श्रेयोभिकाङ्क्षिभिः ॥ १७
प्राप्नोति ब्राह्मणो विद्यां क्षत्रियो विजयं रणे । वैश्यस्तु धनमक्षय्यं शूद्रः सुखमवाप्नुयात् ॥ १८
यं यं काममभिध्यायञ्शृणोति पुरुषः [11]शुचिः । तं तं काममवाप्नोति नरो नास्त्यत्र संशयः १९
पुराणं वैष्णवं त्वेतत्[12]सर्वकिल्बिषनाशनम् । विशिष्टं सर्वशास्त्रेभ्यः पुरुषार्थोपपादकम् ॥ २०
एतद्वो यन्मयाऽऽख्यातं पुराणं वेदसंमितम् । श्रुतेऽस्मिन्सर्वदोषोत्थः पापराशिः [13]प्रणश्यति २१
प्रयागे पुष्करे चैव कुरुक्षेत्रे तथाऽर्बुदे । उपोष्य यदवाप्नोति तदस्य [14]श्रवणान्नरः ॥ २२
यदग्निहोत्रे सुहुते वर्षे नाऽऽप्नोति वै फलम् । महापुण्यमयं विप्रास्तदस्य श्रवणात्सकृत् ॥ २३
[15]यज्ज्येष्ठशुक्लद्वादश्यां स्नात्वा वै यमुनाजले । मथुरायां हरिं दृष्ट्वा प्राप्नोति [16]पुरुषः [17]फलम् ॥ २४
तदाप्नोति[18] फलं [19]सम्यक्समाधानेन कीर्तनात् । पुराणेऽस्य हितो (?) विप्राः केशवार्पितमानसः
+यत्फलं क्रि(श्रि)यमालोक्य पुंरुषोऽथ लभेन्नरः । तत्फलं समवाप्नोति यः पठेच्छृणुयादपि २६
इदं यः श्रद्धया नित्यं पुराणं वेदसंमितम् । यः पठेच्छृणुयान्मर्त्यः स याति भुवनं हरेः ॥ २७
श्रावयेद्ब्राह्मणो यस्तु सदा पर्वसु संयतः । एकादश्यां द्वादश्यां च विष्णुलोकं स गच्छति ॥ २८
इदं यशस्यमायुष्यं सुखदं कीर्तिवर्धनम् । बलपुष्टिप्रदं नृणां धन्यं दुःस्वप्ननाशनम् ॥ २९
त्रिसंध्यं यः पठेद्विद्वाञ्श्रद्धया सुसमाहितः । इदं वरिष्ठमाख्यानं स सर्वमीप्सितं लभेत् ॥ ३०
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् । भयाद्विमुच्यते भीत[21] आपदापन्न आपदः ॥ ३१
जातिस्मरत्वं विद्यां च पुत्रान्मेधां[22] पशून्धृतिम् । धर्मं चार्थं च कामं च मोक्षं तु लभते नरः ३२
यान्यान्कामानभिप्रेत्य पठेत्प्रयतमानसः । तांस्तान्सर्वानवाप्नोति *पुरुषो नात्र संशयः ॥ ३३

---

* इदमर्धं क. ख. पुस्तकयोर्नास्ति । + इदमर्धं ख. पुस्तक एव । * इतः प्रभृति ग. पुस्तके त्रुटितम् ।

... महामते । २ ग. च । रक्षितं भार° । ३ ख. कृतं हि भार° । ४ ख. ग. येन । ५ क. योगात्मने । ६ क. ... ग. तर्कज्ञानं । ८ ख. पाराशरं । ९ क. °भिर्धर्मचा° । १० क. धनारोग्यप्र° । ११ क. सुधीः । ख. ... °न्सद्यः कि° । १३ क. प्रशाम्यति । १४ ख. °णाद्द्विजाः । य° । १५ ख. दन्माघशु° । १६ ख. ... । यदा° । १८ क. °ति कलौ स° । १९ क. °म्यक्स्मृत्वा तु मधुसूदनम् । पुराणश्रवणादेव के° । ...१ क. ख. °तश्चौरान्मुच्येन्महाधनः । जा° । २२ क. °धां यशो धृति° ।

यश्चेदं सततं शृणोति मनुजः स्वर्गापवर्गप्रदं
विष्णुं लोकगुरुं प्रणम्य वरदं भक्त्येकचित्तः शुचिः ।
भुक्त्वा चात्र सुखं विमुक्तकलुषः स्वर्गे च दिव्यं सुखं
पश्चाद्याति हरेः पदं सुविमलं मुक्तो गुणैः प्राकृतैः ॥ ३४

तस्माद्विप्रवरैः स्वधर्मनिरतैर्मुक्त्येकमार्गेप्सुभि-
स्तद्वत्क्षत्रियपुंगवैस्तु नियतैः श्रेयोर्थिभिः सर्वदा ।
वैश्यैश्चानुदिनं विशुद्धकुलजैः शूद्रैस्तथा धार्मिकैः
श्रोतव्यं त्विदमुत्तमं बहुफलं धर्मार्थमोक्षप्रदम् ॥ ३५

धर्मे मतिर्भवतु वः पुरुषोत्तमानां स ह्येक एव परलोकगतस्य बन्धुः ।
अर्थाः स्त्रियश्च निपुणैरपि सेव्यमाना नैव प्रभावमुपयान्ति न च स्थिरत्वम् ॥ ३६

धर्मेण राज्यं लभते मनुष्यः स्वर्गं च धर्मेण नरः प्रयाति ।
आयुश्च कीर्तिं च तपश्च धर्मं धर्मेण मोक्षं लभते मनुष्यः ॥ ३७

धर्मोऽत्र मातापितरौ नरस्य धर्मः सखा चात्र परे च लोके ।
त्राता च धर्मस्त्विह मोक्षदश्च धर्मादृते नास्ति तु किंचिदेव ॥ ३८

इदं रहस्यं श्रेष्ठं च पुराणं वेदसंमितम् । न देयं दुष्टमतये नास्तिकाय विशेषतः ॥ ३९

इदं मयोक्तं प्रवरं पुराणं पापापहं धर्मविवर्धनं च ।
श्रुतं भवद्भिः परमं रहस्यमाज्ञापयध्वं मुनयो व्रजामि ॥ ४०

इति श्रीमहापुराणे आदिब्राह्मे रोमहर्षणमुनिसंवादे पुराणप्रशंसनं नाम
पञ्चचत्वारिंशदधिकाद्विशततमोऽध्यायः ॥ २४५ ॥

आदितः श्लोकानां समष्ट्यङ्काः—१३७८३

समाप्तमिदमादिब्राह्माभिधं महापुराणम् ।

ॐ तत्सद्ब्रह्मार्पणमस्तु ।

---

१ ख. °व.चेताः शु° । २ ख. °मुंत्तैक° । ३ ख. °यसंयुतैस्तु । ४ ख. °व्यं तदनुत्त° । ५
ख. °ण सौख्यं समुपैति सर्वम । धर्मश्च मा° । ७ ख. °श्च ज्ञानप्रदश्चात्र सुखप्रदश्च । इ° । ८ ख